"અહો શ્રુતજ્ઞાનમ્" ગ્રંથ જીર્ણોધ્ધાર ૩૫

# શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસનમ્

## સ્વોપજ્ઞશબ્દમહાર્ણવન્યાસ બૃહન્ન્યાસ અધ્યાય-૩-(૨) (૩)

**: દ્રવ્ય સહાયક :**

**પૂજ્ય સાધ્વિજી શ્રી જયવંતાશ્રીજી મ.સા. તથા**
**અન્ય ઠાણાની પ્રેરણાથી**
**શ્રી સાબરમતી જૈન આરાધના ભવન ટ્રસ્ટ સંચાલિત**
**શ્રી અભયસાગરજી આરાધના ભવનના જ્ઞાનખાતાના ઉપજમાંથી**

**: સંયોજક :**

**શાહ બાબુલાલ સરેમલ બેડાવાળા**
**શ્રી આશાપૂરણપાર્શ્વનાથ જૈન જ્ઞાનભંડાર**
**શા. વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન**
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-૩૮૦૦૦૫
(મો.) ૯૪૨૬૫૮૫૯૦૪ (ઓ.) ૨૨૧૩૨૫૪૩ (રહે.) ૨૭૫૦૫૭૨૦

**સંવત ૨૦૬૫ ઈ.સ. ૨૦૦૯**

"Aho Shrutgyanam"

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६५ (ई. 2009) सेट नं.-१

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.ahoshrut.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रमांक | पुस्तकनुं नाम | कर्त्ता-टीकाकार-संपादक | पृष्ठ |
|---|---|---|---|
| 001 | श्री नंदीसूत्र अवचूरी | पू. विक्रमसूरिजी म.सा. | 238 |
| 002 | श्री उत्तराध्ययन सूत्र चूर्णी | पू. जिनदासगणि चूर्णीकार | 286 |
| 003 | श्री अर्हद्गीता-भगवद्गीता | पू. मेघविजयजी गणि म.सा. | 84 |
| 004 | श्री अर्हच्चूडामणि सारसटीकः | पू. भद्रबाहुस्वामी म.सा. | 18 |
| 005 | श्री यूक्ति प्रकाशसूत्रं | पू. पद्मसागरजी गणि म.सा. | 48 |
| 006 | श्री मानतुङ्गशास्त्रम् | पू. मानतुंगविजयजी म.सा. | 54 |
| 007 | अपराजितपृच्छा | श्री बी. भट्टाचार्य | 810 |
| 008 | शिल्प स्मृति वास्तु विद्यायाम् | श्री नंदलाल चुनिलाल सोमपुरा | 850 |
| 009 | शिल्परत्नम् भाग-१ | श्रीकुमार के. सभात्सव शास्त्री | 322 |
| 010 | शिल्परत्नम् भाग-२ | श्रीकुमार के. सभात्सव शास्त्री | 280 |
| 011 | प्रासादतिलक | श्री प्रभाशंकर ओघडभाई | 162 |
| 012 | काश्यशिल्पम् | श्री विनायक गणेश आपटे | 302 |
| 013 | प्रासादमञ्जरी | श्री प्रभाशंकर ओघडभाई | 156 |
| 014 | राजवल्लभ याने शिल्पशास्त्र | श्री नारायण भारती गोंसाई | 352 |
| 015 | शिल्पदीपक | श्री गंगाधरजी प्रणीत | 120 |
| 016 | वास्तुसार | श्री प्रभाशंकर ओघडभाई | 88 |
| 017 | दीपार्णव उत्तरार्ध | श्री प्रभाशंकर ओघडभाई | 110 |
| 018 | જિનપ્રાસાદ માર્તણ્ડ | શ્રી નંદલાલ ચુનીલાલ સોમપુરા | 498 |
| 019 | जैन ग्रंथावली | श्री जैन श्वेताम्बर कोन्फ्रन्स | 502 |
| 020 | હીરકલશ જૈન જ્યોતિષ | શ્રી હિમ્મતરામ મહાશંકર જાની | 454 |
| 021 | न्यायप्रवेशः भाग-१ | श्री आनंदशंकर बी. ध्रुव | 226 |
| 022 | दीपार्णव पूर्वार्ध | श्री प्रभाशंकर ओघडभाई | 640 |
| 023 | अनेकान्त जयपताकाख्यं भाग-१ | पू. मुनिचंद्रसूरिजी म.सा. | 452 |
| 024 | अनेकान्त जयपताकाख्यं भाग-२ | श्री एच. आर. कापडीआ | 500 |
| 025 | प्राकृत व्याकरण भाषांतर सह | श्री बेचरदास जीवराज दोशी | 454 |
| 026 | तत्त्पोपप्लवसिंहः | श्री जयराशी भट्ट, बी. भट्टाचार्य | 188 |
| 027 | शक्तिवादादर्शः | श्री सुदर्शनाचार्य शास्त्री | 214 |
| 028 | क्षीरार्णव | श्री प्रभाशंकर ओघडभाई | 414 |
| 029 | वेधवास्तु प्रभाकर | श्री प्रभाशंकर ओघडभाई | 192 |

| | | | |
|---|---|---|---|
| 030 | **शिल्परत्नाकर** | **श्री नर्मदाशंकर शास्त्री** | 824 |
| 031 | **प्रासाद मंडन** | **पं. भगवानदास जैन** | 288 |
| 032 | **श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-१** | **पू. लावण्यसूरिजी म.सा.** | 520 |
| 033 | **श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-२** | **पू. लावण्यसूरिजी म.सा.** | 578 |
| 034 | **श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-३ (१)** | **पू. लावण्यसूरिजी म.सा.** | 278 |
| 035 | **श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-3 (२) (३)** | **पू. लावण्यसूरिजी म.सा.** | 252 |
| 036 | **श्री सिद्धहेम बृहद्वृत्ति बृहन्न्यास अध्याय-५** | **पू. लावण्यसूरिजी म.सा.** | 324 |
| 037 | વાસ્તુનિઘંટુ | પ્રભાશંકર ઓઘડભાઈ સોમપુરા | 302 |
| 038 | તિલકમઞ્જરી ભાગ-૧ | પૂ. લાવણ્યસૂરિજી | 196 |
| 039 | તિલકમઞ્જરી ભાગ-૨ | પૂ. લાવણ્યસૂરિજી | 190 |
| 040 | તિલકમઞ્જરી ભાગ-૩ | પૂ. લાવણ્યસૂરિજી | 202 |
| 041 | સપ્તસન્ધાન મહાકાવ્યમ્ | પૂ. વિજયઅમૃતસૂરિશ્વરજી | 480 |
| 042 | સપ્તભઙ્ગીમિમાંસા | પૂ. પં. શિવાનન્દવિજયજી | 228 |
| 043 | ન્યાયાવતાર | સતિષચંદ્ર વિદ્યાભૂષણ | 60 |
| 044 | વ્યુત્પત્તિવાદ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 218 |
| 045 | સામાન્યનિર્યુક્તિ ગુઢાર્થતત્ત્વાલોક | શ્રી ધર્મદત્તસૂરિ (બચ્છા ઝા) | 190 |
| 046 | સપ્તભઙ્ગીનયપ્રદીપ બાલબોધિનીવિવૃત્તિઃ | પૂ. લાવણ્યસૂરિજી | 138 |
| 047 | વ્યુત્પત્તિવાદ શાસ્ત્રાર્થકલા ટીકા | શ્રીવેણીમાધવ શાસ્ત્રી | 296 |
| 048 | નયોપદેશ ભાગ-૧ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 210 |
| 049 | નયોપદેશ ભાગ-૨ તરઙ્ગિણીતરણી | પૂ. લાવણ્યસૂરિજી | 274 |
| 050 | ન્યાયસમુચ્ચય | પૂ. લાવણ્યસૂરિજી | 286 |
| 051 | સ્યાદ્વાર્થપ્રકાશઃ | પૂ. લાવણ્યસૂરિજી | 216 |
| 052 | દિન શુદ્ધિ પ્રકરણ | પૂ. દર્શનવિજયજી | 532 |
| 053 | બૃહદ્ ધારણા યંત્ર | પૂ. દર્શનવિજયજી | 113 |
| 054 | જ્યોતિર્મહોદય | સં. પૂ. અક્ષયવિજયજી | 112 |

# શ્રી આશાપૂરણ પાર્શ્વનાથ જૈન જ્ઞાનભંડાર

**સંયોજક – બાબુલાલ સરેમલ શાહ**
શાહ વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, રામનગર, સાબરમતી, અમદાવાદ-૦૫.
(મો.) ૯૪૨૬૫૮૫૯૦૪ (ઓ) ૨૨૧૩૨૫૪૩ (ઇ-મેલ) ahoshrut.bs@gmail.com

## અહો શ્રુતજ્ઞાનમ્ ગ્રંથ જીર્ણોદ્ધાર – સંવત ૨૦૬૬ (ઈ. ૨૦૧૦) – સેટ નં-૨

પ્રાયઃ જીર્ણ અપ્રાપ્ય પુસ્તકોને સ્કેન કરાવીને ડી.વી.ડી. બનાવી તેની યાદી.

*આ પુસ્તકો www.ahoshrut.org વેબસાઇટ પરથી પણ ડાઉનલોડ કરી શકાશે.*

| ક્રમ | પુસ્તકનું નામ | ભાષા | કર્તા-ટીકાકાર-સંપાદક | પૃષ્ઠ |
|---|---|---|---|---|
| 055 | श्री सिद्धहेम बृहद्वृत्ति बृहद्न्यास अध्याय-६ | सं | पू. लावण्यसूरिजी म.सा. | 296 |
| 056 | विविध तीर्थ कल्प | सं | पू. जिनविजयजी म.सा. | 160 |
| 057 | ભારતીય જૈન શ્રમણ સંસ્કૃતિ અને લેખનકળા | ગુજ. | पू. पूण्यविजयजी म.सा. | 164 |
| 058 | सिद्धान्तलक्षणगूढार्थ तत्त्वलोकः | सं | श्री धर्मदत्तसूरि | 202 |
| 059 | व्याप्ति पञ्चक विवृत्ति टीका | सं | श्री धर्मदत्तसूरि | 48 |
| 060 | જૈન સંગીત રાગમાળા | ગુ. | श्री मांगरोळ जैन संगीत मंडळी | 306 |
| 061 | चतुर्विंशतीप्रबन्ध (प्रबंध कोश) | सं | श्री रसिकलाल एच. कापडीआ | 322 |
| 062 | व्युत्पत्तिवाद आदर्श व्याख्यया संपूर्ण ६ अध्याय | सं | श्री सुदर्शनाचार्य | 668 |
| 063 | चन्द्रप्रभा हेमकौमुदी | सं | पू. मेघविजयजी गणि | 516 |
| 064 | विवेक विलास | सं/ગુ. | श्री दामोदर गोविंदाचार्य | 268 |
| 065 | पञ्चशती प्रबोध प्रबंध | सं | पू. मृगेन्द्रविजयजी म.सा. | 456 |
| 066 | सन्मतितत्त्वसोपानम् | सं | पू. लब्धिसूरिजी म.सा. | 420 |
| 067 | ઉપદેશમાલા દોધટ્ટી ટીકા ગુર્જરાનુવાદ | ગુજ. | पू. हेमसागरसूरिजी म.सा. | 638 |
| 068 | मोहराजापराजयम् | सं | पू. चतुरविजयजी म.सा. | 192 |
| 069 | क्रियाकोश | सं/हिं | श्री मोहनलाल बांठिया | 428 |
| 070 | कालिकाचार्यकथासंग्रह | सं/ગુ. | श्री अंबालाल प्रेमचंद | 406 |
| 071 | सामान्यनिरुक्ति चंद्रकला कलाविलास टीका | सं. | श्री वामाचरण भट्टाचार्य | 308 |
| 072 | जन्मसमुद्रजातक | सं/हिं | श्री भगवानदास जैन | 128 |
| 073 | मेघमहोदय वर्षप्रबोध | सं/हिं | श्री भगवानदास जैन | 532 |
| 074 | જૈન સામુદ્રિકનાં પાંચ ગ્રંથો | ગુજ. | श्री हिम्मतराम महाशंकर जानी | 376 |

| | | | | |
|---|---|---|---|---|
| 075 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૧ | ગુજ. | **श्री साराभाई नवाब** | **374** |
| 076 | જૈન ચિત્ર કલ્પદ્રૂમ ભાગ-૨ | ગુજ. | **श्री साराभाई नवाब** | **238** |
| 077 | સંગીત નાટ્ય રૂપાવલી | ગુજ. | **श्री विद्या साराभाई नवाब** | **194** |
| 078 | ભારતનાં જૈન તીર્થો અને તેનું શિલ્પસ્થાપત્ય | ગુજ. | **श्री साराभाई नवाब** | **192** |
| 079 | શિલ્પ ચિન્તામણિ ભાગ-૧ | ગુજ. | **श्री मनसुखलाल भुदरमल** | **254** |
| 080 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૧ | ગુજ. | **श्री जगन्नाथ अंबाराम** | **260** |
| 081 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૨ | ગુજ. | **श्री जगन्नाथ अंबाराम** | **238** |
| 082 | બૃહદ્ શિલ્પ શાસ્ત્ર ભાગ-૩ | ગુજ. | **श्री जगन्नाथ अंबाराम** | **260** |
| 083 | આયુર્વેદના અનુભૂત પ્રયોગો ભાગ-૧ | ગુજ. | **पू. कान्तिसागरजी** | **114** |
| 084 | કલ્યાણ કારક | ગુજ. | **श्री वर्धमान पार्श्वनाथ शास्त्री** | **910** |
| 085 | **विश्वलोचन कोश** | **सं./हिं** | **श्री नंदलाल शर्मा** | **436** |
| 086 | કથા રત્ન કોશ ભાગ-1 | ગુજ. | **श्री बेचरदास जीवराज दोशी** | **336** |
| 087 | કથા રત્ન કોશ ભાગ-2 | ગુજ. | **श्री बेचरदास जीवराज दोशी** | **230** |
| 088 | હસ્તસઞ્જીવનમ્ | સં. | **पू. मेघविजयजीगणि** | **322** |
| 089 | એન્દ્રચતુર્વિંશતિકા | સં. | **पू.यशोविजयजी, पू. पुण्यविजयजी** | **114** |
| 090 | સમ્મતિ તર્ક મહાર્ણવાવતારિકા | સં. | **आचार्य श्री विजयदर्शनसूरिजी** | **560** |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६७ (ई. 2011) सेट नं.-३

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.ahoshrut.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रम | पुस्तक नाम | कर्त्ता / टीकाकार | भाषा | संपादक / प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|
| 91 | स्याद्वाद रत्नाकर भाग-१ | वादिदेवसूरिजी | सं. | मोतीलाल लाधाजी पुना | 272 |
| 92 | स्याद्वाद रत्नाकर भाग-२ | वादिदेवसूरिजी | सं. | मोतीलाल लाधाजी पुना | 240 |
| 93 | स्याद्वाद रत्नाकर भाग-३ | वादिदेवसूरिजी | सं. | मोतीलाल लाधाजी पुना | 254 |
| 94 | स्याद्वाद रत्नाकर भाग-४ | वादिदेवसूरिजी | सं. | मोतीलाल लाधाजी पुना | 282 |
| 95 | स्याद्वाद रत्नाकर भाग-५ | वादिदेवसूरिजी | सं. | मोतीलाल लाधाजी पुना | 118 |
| 96 | पवित्र कल्पसूत्र | पुण्यविजयजी | सं./अं | साराभाई नवाब | 466 |
| 97 | समराङ्गण सूत्रधार भाग-१ | भोजदेव | सं. | टी. गणपति शास्त्री | 342 |
| 98 | समराङ्गण सूत्रधार भाग-२ | भोजदेव | सं. | टी. गणपति शास्त्री | 362 |
| 99 | भुवनदीपक | पद्मप्रभसूरिजी | सं. | वेंकटेश प्रेस | 134 |
| 100 | गाथासहस्त्री | समयसुंदरजी | सं. | सुखलालजी | 70 |
| 101 | भारतीय प्राचीन लिपीमाला | गौरीशंकर ओझा | हिन्दी | मुन्शीराम मनोहरराम | 316 |
| 102 | शब्दरत्नाकर | साधुसुन्दरजी | सं. | हरगोविन्ददास बेचरदास | 224 |
| 103 | सुबोधवाणी प्रकाश | न्यायविजयजी | सं./गु | हेमचंद्राचार्य जैन सभा | 612 |
| 104 | लघु प्रबंध संग्रह | जयंत पी. ठाकर | सं. | ओरीएन्ट इन्स्टीट्युट बरोडा | 307 |
| 105 | जैन स्तोत्र संचय-१-२-३ | माणिक्यसागरसूरिजी | सं, | आगमोद्धारक सभा | 250 |
| 106 | सन्मति तर्क प्रकरण भाग-१,२,३ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 514 |
| 107 | सन्मति तर्क प्रकरण भाग-४,५ | सिद्धसेन दिवाकर | सं. | सुखलाल संघवी | 454 |
| 108 | न्यायसार – न्यायतात्पर्यदीपिका | सतिषचंद्र विद्याभूषण | सं. | एसियाटीक सोसायटी | 354 |
| 109 | जैन लेख संग्रह भाग-१ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 337 |
| 110 | जैन लेख संग्रह भाग-२ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 354 |
| 111 | जैन लेख संग्रह भाग-३ | पुरणचंद्र नाहर | सं./हि | पुरणचंद्र नाहर | 372 |
| 112 | जैन धातु प्रतिमा लेख भाग-१ | कांतिविजयजी | सं./हि | जिनदत्तसूरि ज्ञानभंडार | 142 |
| 113 | जैन प्रतिमा लेख संग्रह | दौलतसिंह लोढा | सं./हि | अरविन्द धामणिया | 336 |
| 114 | राधनपुर प्रतिमा लेख संदोह | विशालविजयजी | सं./गु | यशोविजयजी ग्रंथमाळा | 364 |
| 115 | प्राचिन लेख संग्रह-१ | विजयधर्मसूरिजी | सं./गु | यशोविजयजी ग्रंथमाळा | 218 |
| 116 | बीकानेर जैन लेख संग्रह | अगरचंद नाहटा | सं./हि | नाहटा ब्रधर्स | 656 |
| 117 | प्राचीन जैन लेख संग्रह भाग-१ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 122 |
| 118 | प्राचिन जैन लेख संग्रह भाग-२ | जिनविजयजी | सं./हि | जैन आत्मानंद सभा | 764 |
| 119 | गुजरातना ऐतिहासिक लेखो-१ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 120 | गुजरातना ऐतिहासिक लेखो-२ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 404 |
| 121 | गुजरातना ऐतिहासिक लेखो-३ | गिरजाशंकर शास्त्री | सं./गु | फार्बस गुजराती सभा | 540 |
| 122 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-१ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 274 |
| 123 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-४ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 414 |
| 124 | ऑपरेशन इन सर्च ऑफ संस्कृत मेन्यु. इन मुंबई सर्कल-५ | पी. पीटरसन | अं. | रॉयल एशियाटीक जर्नल | 400 |
| 125 | कलेक्शन ऑफ प्राकृत एन्ड संस्कृत इन्स्क्रीप्शन्स | पी. पीटरसन | अं. | भावनगर आर्चीऑलॉजीकल डिपा. | 320 |
| 126 | विजयदेव माहात्म्यम् | जिनविजयजी | सं. | जैन सत्य संशोधक | 148 |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६८ (ई. 2012) सेट नं.-४

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.ahoshrut.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रम | पुस्तक नाम | कर्त्ता / संपादक | भाषा | प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|
| 127 | महाप्रभाविक नवस्मरण | साराभाई नवाब | गुज. | साराभाई नवाब | 754 |
| 128 | जैन चित्र कल्पलता | साराभाई नवाब | गुज. | साराभाई नवाब | 84 |
| 129 | जैन धर्मनो प्राचीन इतिहास भाग-२ | हीरालाल हंसराज | गुज. | हीरालाल हंसराज | 194 |
| 130 | ओपरेशन इन सर्च ओफ सं. मेन्यु. भाग-६ | पी. पीटरसन | अंग्रेजी | एशियाटीक सोसायटी | 171 |
| 131 | जैन गणित विचार | कुंवरजी आणंदजी | गुज. | जैन धर्म प्रसारक सभा | 90 |
| 132 | दैवज्ञ कामधेनु (प्राचिन ज्योतिष ग्रंथ) | शील खंड | सं. | ब्रज. बी. दास बनारस | 310 |
| 133 | करण प्रकाशः | ब्रह्मदेव | सं./अं. | सुधाकर द्विवेदि | 276 |
| 134 | न्यायविशारद महो. यशोविजयजी स्वहस्तलिखित कृति संग्रह | यशोदेवसूरिजी | गुज. | यशोभारती प्रकाशन | 69 |
| 135 | भौगोलिक कोश-१ | डाह्याभाई पीतांबरदास | गुज. | गुजरात वर्नाक्युलर सोसायटी | 100 |
| 136 | भौगोलिक कोश-२ | डाह्याभाई पीतांबरदास | गुज. | गुजरात वर्नाक्युलर सोसायटी | 136 |
| 137 | जैन साहित्य संशोधक वर्ष-१ अंक-१, २ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 266 |
| 138 | जैन साहित्य संशोधक वर्ष-१ अंक-३, ४ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 244 |
| 139 | जैन साहित्य संशोधक वर्ष-२ अंक-१, २ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 274 |
| 140 | जैन साहित्य संशोधक वर्ष-२ अंक-३, ४ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 168 |
| 141 | जैन साहित्य संशोधक वर्ष-३ अंक-१, २ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 282 |
| 142 | जैन साहित्य संशोधक वर्ष-३ अंक-३, ४ | जिनविजयजी | हिन्दी | जैन साहित्य संशोधक पुना | 182 |
| 143 | नवपदोनी आनुपूर्वी भाग-१ | सोमविजयजी | गुज. | शाह बाबुलाल सवचंद | 384 |
| 144 | नवपदोनी आनुपूर्वी भाग-२ | सोमविजयजी | गुज. | शाह बाबुलाल सवचंद | 376 |
| 145 | नवपदोनी आनुपूर्वी भाग-३ | सोमविजयजी | गुज. | शाह बाबुलाल सवचंद | 387 |
| 146 | भाषवति | शतानंद मारछता | सं./हि | एच.बी. गुप्ता एन्ड सन्स बनारस | 174 |
| 147 | जैन सिद्धांत कौमुदी (अर्धमागधी व्याकरण) | रत्नचंद्र स्वामी | प्रा./सं. | भैरोदान सेठीया | 320 |
| 148 | मंत्रराज गुणकल्प महोदधि | जयदयाल शर्मा | हिन्दी | जयदयाल शर्मा | 286 |
| 149 | फक्कीका रत्नमंजूषा-१, २ | कनकलाल ठाकूर | सं. | हरिकृष्ण निबंध | 272 |
| 150 | अनुभूत सिद्ध विशायंत्र (छ कल्प संग्रह) | मेघविजयजी | सं./गुज | महावीर ग्रंथमाळा | 142 |
| 151 | सारावलि | कल्याण वर्धन | सं. | पांडुरंग जीवाजी | 260 |
| 152 | ज्योतिष सिद्धांत संग्रह | विश्वेश्वरप्रसाद द्विवेदी | सं. | ब्रीजभूषणदास बनारस | 232 |
| 153 | ज्ञान प्रदीपिका तथा सामुद्रिक शास्त्रम् | रामव्यास पान्डेय | सं. | जैन सिद्धांत भवन | 160 |
| | **नूतन संकलन** | | | | |
| १ | आ. चंद्रसागरसूरिजी ज्ञानभंडार – उज्जैन | हस्तप्रत सूचीपत्र | हिन्दी | श्री आशापुरण पार्श्वनाथ जैन ज्ञानभंडार | |
| २ | श्री गुजराती श्वे.मू. जैन संघ-हस्तप्रत भंडार – कलकत्ता | हस्तप्रत सूचीपत्र | हिन्दी | श्री आशापुरण पार्श्वनाथ जैन ज्ञानभंडार | |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543 - ahoshrut.bs@gmail.com
शाह वीमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-05.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०६९ (ई. 2013) सेट नं.-५

प्रायः अप्राप्य प्राचीन पुस्तकों की स्केन डीवीडी बनाई उसकी सूची। *यह पुस्तके www.ahoshrut.org वेबसाइट से भी डाउनलोड कर सकते हैं।*

| क्रम | पुस्तक नाम | कर्त्ता / संपादक | विषय | भाषा | संपादक / प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|---|
| 154 | उणादि सूत्रो ओफ हेमचंद्राचार्य | पू. हेमचंद्राचार्य | व्याकरण | संस्कृत | जोहन क्रिष्टे | 304 |
| 155 | उणादि गण विवृत्ति | पू. हेमचंद्राचार्य | व्याकरण | संस्कृत | पू. मनोहरविजयजी | 122 |
| 156 | प्राकृत प्रकाश-सटीक | भामाह | व्याकरण | प्राकृत | जय कृष्णदास गुप्ता | 208 |
| 157 | द्रव्य परिक्षा और धातु उत्पत्ति | ठक्कर फेरू | धातु | संस्कृत /हिन्दी | भंवरलाल नाहटा | 70 |
| 158 | आरम्भसिध्धि – सटीक | पू. उदयप्रभदेवसूरिजी | ज्योतीष | संस्कृत | पू. जितेन्द्रविजयजी | 310 |
| 159 | खंडहरो का वैभव | पू. कान्तीसागरजी | शील्प | हिन्दी | भारतीय ज्ञानपीठ | 462 |
| 160 | बालभारत | पू. अमरचंद्रसूरिजी | काव्य | संस्कृत | पं. शीवदत्त | 512 |
| 161 | गिरनार माहात्म्य | दौलतचंद परषोत्तमदास | तीर्थ | संस्कृत /गुजराती | जैन पत्र | 264 |
| 162 | गिरनार गल्प | पू. ललितविजयजी | तीर्थ | संस्कृत/गुजराती | हंसकविजय फ्री लायब्रेरी | 144 |
| 163 | प्रश्नोत्तर सार्ध शतक | पू. क्षमाकल्याणविजयजी | प्रकरण | हिन्दी | साध्वीजी विचक्षणाश्रीजी | 256 |
| 164 | भारतिय संपादन शास्त्र | मूलराज जैन | साहित्य | हिन्दी | जैन विद्याभवन, लाहोर | 75 |
| 165 | विभक्त्यर्थ निर्णय | गिरिधर झा | न्याय | संस्कृत | चौखम्बा प्रकाशन | 488 |
| 166 | व्योम वती-१ | शिवाचार्य | न्याय | संस्कृत | संपूर्णानंद संस्कृत युनिवर्सिटी | 226 |
| 167 | व्योम वती-२ | शिवाचार्य | न्याय | संस्कृत | संपूर्णानंद संस्कृत विद्यालय | 365 |
| 168 | जैन न्यायखंड खाद्यम् | उपा. यशोविजयजी | न्याय | संस्कृत /हिन्दी | बद्रीनाथ शुक्ल | 190 |
| 169 | हरितकाव्यादि निघंटू | भाव मिश्र | आयुर्वेद | संस्कृत /हिन्दी | शीव शर्मा | 480 |
| 170 | योग चिंतामणि-सटीक | पू. हर्षकीर्तिसूरिजी | आयुर्वेद | संस्कृत /हिन्दी | लक्ष्मी वेंकटेश प्रेस | 352 |
| 171 | वसंतराज शकुनम् | पू. भानुचन्द्र गणि टीका | ज्योतिष | संस्कृत | खेमराज कृष्णदास | 596 |
| 172 | महाविद्या विडंबना | पू. भुवनसुन्दरसूरि टीका | ज्योतिष | संस्कृत | सेन्ट्रल लायब्रेरी | 250 |
| 173 | ज्योतिर्निबन्ध | शिवराज | ज्योतिष | संस्कृत | आनंद आश्रम | 391 |
| 174 | मेघमाला विचार | पू. विजयप्रभसूरिजी | ज्योतिष | संस्कृत/गुजराती | मेघजी हीरजी | 114 |
| 175 | मुहूर्त चिंतामणि-सटीक | रामकृत प्रमिताक्षय टीका | ज्योतिष | संस्कृत | अनूप मिश्र | 238 |
| 176 | मानसोल्लास सटीक-१ | भुलाकमल्ल सोमेश्वर | ज्योतिष | संस्कृत | ओरिएन्ट इन्स्टीट्यूट | 166 |
| 177 | मानसोल्लास सटीक-२ | भुलाकमल्ल सोमेश्वर | ज्योतिष | संस्कृत | ओरिएन्ट इन्स्टीट्यूट | 368 |
| 178 | ज्योतिष सार प्राकृत | भगवानदास जैन | ज्योतिष | प्राकृत/हिन्दी | भगवानदास जैन | 88 |
| 179 | मुहूर्त संग्रह | अंबालाल शर्मा | ज्योतिष | गुजराती | शास्त्री जगन्नाथ परशुराम द्विवेदी | 356 |
| 180 | हिन्दु एस्ट्रोलोजी | पिताम्बरदास त्रीभोवनदास | ज्योतिष | गुजराती | पिताम्बरदास टी. महेता | 168 |

# श्री आशापूरण पार्श्वनाथ जैन ज्ञानभंडार

संयोजक – शाह बाबुलाल सरेमल - (मो.) 9426585904 (ओ.) 22132543. E-mail : ahoshrut.bs@gmail.com
शाह विमळाबेन सरेमल जवेरचंदजी बेडावाळा भवन
हीराजैन सोसायटी, रामनगर, साबरमती, अमदावाद-380005.

## अहो श्रुतज्ञानम् ग्रंथ जीर्णोद्धार – संवत २०७१ (ई. 2015) सेट नं.-६

**प्रायः अप्राप्य प्राचीन पुस्तकों की डिजिटाइझेशन द्वारा डीवीडी बनाई उसकी सूची।**
***यह पुस्तके www.ahoshrut.org वेबसाइट से भी डाउनलोड कर सकते हैं।***

| क्रम | पुस्तक नाम | कर्त्ता / टिकाकार | विषय | भाषा | संपादक / प्रकाशक | पृष्ठ |
|---|---|---|---|---|---|---|
| 181 | काव्यप्रकाश भाग-१ | पूज्य मम्मटाचार्य कृत | | संस्कृत | पूज्य जिनविजयजी | 364 |
| 182 | काव्यप्रकाश भाग-२ | पूज्य मम्मटाचार्य कृत | | संस्कृत | पूज्य जिनविजयजी | 222 |
| 183 | काव्यप्रकाश उल्लास-२ अने ३ | उपा. यशोविजयजी | | संस्कृत | यशोभारति जैन प्रकाशन समिति | 330 |
| 184 | नृत्यरत्न कोश भाग-१ | श्री कुम्भकर्ण नृपति | | संस्कृत | श्री रसीकलाल छोटालाल | 156 |
| 185 | नृत्यरत्न कोश भाग-२ | श्री कुम्भकर्ण नृपति | | संस्कृत | श्री रसीकलाल छोटालाल | 248 |
| 186 | नृत्याध्याय | श्री अशोकमलजी | | संस्कृत /हिन्दी | श्री वाचस्पति गैरोभा | 504 |
| 187 | संगीरत्नाकर भाग-१ सटीक | श्री सारंगदेव | | संस्कृत/अंग्रेजी | श्री सुब्रमण्यम शास्त्री | 448 |
| 188 | संगीरत्नाकर भाग-२ सटीक | श्री सारंगदेव | | संस्कृत/अंग्रेजी | श्री सुब्रमण्यम शास्त्री | 444 |
| 189 | संगीरत्नाकर भाग-३ सटीक | श्री सारंगदेव | | संस्कृत/अंग्रेजी | श्री सुब्रमण्यम शास्त्री | 616 |
| 190 | संगीरत्नाकर भाग-४ सटीक | श्री सारंगदेव | | संस्कृत/अंग्रेजी | श्री सुब्रमण्यम शास्त्री | 632 |
| 191 | संगीत मकरन्द | नारद | | संस्कृत | श्री मंगेश रामकृष्ण तेलंग | 84 |
| 192 | संगीत नृत्य अने नाट्य संबंधी जैन ग्रंथो | श्री हीरालाल कापडीया | | गुजराती | मुक्ति-कमल-जैन मोहन ग्रंथमाला | 244 |
| 193 | न्यायबिंदु सटीक | पूज्य धर्मोतराचार्य | | संस्कृत | श्री चंद्रशेखर शास्त्री | 220 |
| 194 | शीघ्रबोध भाग-१ थी ५ | पूज्य ज्ञानसुन्दरजी | | हिन्दी | सुखसागर ज्ञान प्रसारक सभा | 422 |
| 195 | शीघ्रबोध भाग-६ थी १० | पूज्य ज्ञानसुन्दरजी | | हिन्दी | सुखसागर ज्ञान प्रसारक सभा | 304 |
| 196 | शीघ्रबोध भाग-११ थी १५ | पूज्य ज्ञानसुन्दरजी | | हिन्दी | सुखसागर ज्ञान प्रसारक सभा | 446 |
| 197 | शीघ्रबोध भाग-१६ थी २० | पूज्य ज्ञानसुन्दरजी | | हिन्दी | सुखसागर ज्ञान प्रसारक सभा | 414 |
| 198 | शीघ्रबोध भाग-२१ थी २५ | पूज्य ज्ञानसुन्दरजी | | हिन्दी | सुखसागर ज्ञान प्रसारक सभा | 409 |
| 199 | अध्यात्मसार सटीक | पूज्य गंभीरविजयजी | | संस्कृत/गुजराती | नरोत्तमदास भानजी | 476 |
| 200 | छन्दोनुशासन | एच. डी. वेलनकर | | संस्कृत | सिंघी जैन शास्त्र शिक्षापीठ | 444 |
| 201 | मग्गानुसारिया | श्री डी. एस शाह | | संस्कृत/गुजराती | ज्ञातपुत्र भगवान महावीर ट्रस्ट | 146 |

卐 श्री विजय नेमिसूरीश्वर ग्रन्थ माला रत्नम् ६२ 卐

॥ आशैशवशीलशालिने श्रीनेमीशानाय नमः ॥

कुमारपाल भूपाल प्रतिबोधक सुगृहीतनामधेय,

कलिकाल सर्वज्ञ श्री हेमचन्द्रसूरि भगवत्प्रणीतं ।

# ॥ श्री सिद्ध हेमचन्द्र शब्दानुशासनम् ॥

[ स्वोपज्ञ तत्व प्रकाशिकाभिध बृहद्वृत्ति शब्दमहार्णवन्यास तदनुसन्धान सहितम् ]

तत्र

## तृतीयाऽध्यायस्य द्वितीय-तृतीयपादौ

**नम्र सूचन**
इस ग्रन्थ के अभ्यास का कार्य पूर्ण होते ही नियत
समयावधि में शीघ्र वापस करने की कृपा करें.
जिससे अन्य वाचकगण इसका उपयोग कर सकें.

न्यासानुसन्धानकारः संपादकश्च

जगद्गुरु शासनसम्राट् सूरिचक्रचक्रवर्त्ति तपोगच्छाधिपति विविध तीर्थोद्धारक

परम पूज्याचार्यदेवेश श्रीविजयनेमिसूरीश्वर पट्टालङ्कार-व्याकरण

वाचस्पति कविरत्न शास्त्रविशारद इति पदाङ्कृत

श्रीमद्विजयलावण्यसूरीश्वरः ।

"Aho Shrutgyanam"

प्रकाशिका :—

# श्री सिद्ध हेम प्रकाशन समितिः

कार्यवाहक :-

शाह नरोत्तमदास गुलाबचन्द्रः।

घाटकोपर मुबंई

| श्रीविजयलावण्यसूरीश्वर<br>ज्ञान मन्दिर,<br>बोटाद ( सौराष्ट्र ) गुजरात | 卐<br>प्राप्ति<br>स्थानम्<br>卐 | सरस्वती पुस्तक भण्डार<br>रतनपोल-हाथी खाना,<br>अहमदाबाद ( गुजरात ) |
|---|---|---|

वीर संवत् २५०२ नेमि संवत् २७ विक्रम संवत् २०३२





मुद्रक :

प्रकाश प्रिन्टर्स,

जालोरी गेट, जोधपुर ( राजस्थान )

मूल्यम
१० रूप्याकाणि

"Aho Shrutgyanam"

# प्रकाशकीय निवेदन

श्री विजय नेमिसूरीश्वर ग्रन्थ–माला में ६२ रत्न स्वरूप श्री सिद्ध हेमचन्द्र शब्दानुशासन का न्यासानुसन्धान सहित वृहद्वृत्ति के तृतीयाऽध्यायान्तर्गत द्वितीयपादादिज्ञानजिज्ञासु महानुभावों के समक्ष इस भाग को उपस्थापित करता हुआ अत्यन्त आनन्द को प्राप्त कर रहा हूँ।

इसमें तृतीयाध्याय के द्वितीयपाद एवं तृतीयपाद मात्र है। श्रीसिद्धहेमव्याकरण की भव्यता-विशिष्टता तथा अत्युपयोगिता सर्वत्र विदित है। इस प्रकरण में कहने योग्य विषय तृतीयाध्याय के प्रथम पाद को आपकी सेवा में उपस्थापन करते समय में ही वृहद् रूप से कहा गया है।

अग्रिम सब अध्यायों के पठन-पाठन में उपयोगार्थ शीघ्राति-शीघ्र प्रकाशन हेतु प्रयास जारी है। यत्र-तत्र नगर के प्रसिद्ध प्रेस में प्रकाशन हेतु प्रारूप दिया हुआ है। कई भाग छप चुके हैं। पञ्चम अध्याय भी जोधपुर नगर के प्रसिद्ध कुम्भट प्रेस से प्रकाशित हो चुका है।

यह तृतीय अध्याय यत्र–तत्र प्रेस में छपने पर भी अपूर्ण ही रहा जिसको हम आपके समक्ष समर्पित कर रहे हैं।

इसके कुछ भाग बनारस भार्गव प्रेस में कुछ भाग जोधपुर के भूतपूर्व कुम्भट प्रिण्टर्स में तथा वर्तमान यह भाग प्रकाशप्रिण्टर्स जालोरीगेटमें छपाहै। इसमें तृतीय अध्याय के प्रथम, द्वितीय व तृतीय पाद मात्र है। चतुर्थ पाद काल कवलित हो गया है। पूज्यपाद प्रकाण्डपण्डित (इस गन्थ के लेखक) सूरीश्वरजी की दिवंगतता के कारण वाध्य होकर खण्डित ग्रन्थ ही उपस्थापित किया जाता है।

इस प्रस्तुत अध्याय के भी शब्द महार्णव न्यास के सम्पूर्ण अनुसन्धान जगद्गुरु शासन-सम्राट् सूरि चक्र-चक्र वर्त्ति तपोगच्छाधिपति बाल-ब्रह्मचारी परमाराध्य परम-पूज्य आचार्य देवेश श्रीमद् विजय नेमिसूरिश्वरजी म० श्रीजी के पट्टालङ्कार व्याकरण वाचस्पति कविरत्न शास्त्र विशारद् साधिक सप्त लक्ष श्लोक प्रमाण नूतन संस्कृत साहित्य-सर्जक अनुपम-व्याख्यान सुधावर्त्ति पूज्य-पाद आचार्य देव श्रीमद् विजय लावण्यसूरीश्वरजी महाराज ने किया है।

तृतीय अध्याय में व्याकरण के समास प्रत्यय आदि मनोरम विषय का अनुसन्धान महर्षि श्री हेमचन्द्रजी ने अति सुन्दर ढंग से लिखा है, उसी के आधार पर सुन्दर सरल रसप्रद विशाल-काय यह पुस्तक है। इसमें सूक्ष्माति सूक्ष्म विषय को सरल प्राञ्जल रीति से वर्णन और चिन्तन है।

"Aho Shrutgyanam"

रचनाकार महर्षि के प्रत्येक रचना में अनेकविध ग्रन्थों का चिन्तन मनन तथा परिशीलन है इसमें प्रकाण्ड पाण्डित्य प्रतिभा का झलक है। यह किसी भी साक्षर से अविदित नहीं है।

भावी जिज्ञासुओं के बोध और उपकार की कामना से पूज्यपाद आचार्य देवजी अपने शारीरिक कमजोरी स्वास्थ्य आदि की परवाह किये बिना अनेक प्रकार शासन प्रभावना आदि शुभ कार्यों को करते हुये भी साथ २ न्यासानुसन्धान कार्य को शीघ्र परिपूर्ण करने हेतु अविरत प्रयत्न शाली रहे। इस प्रकार आचार्य देव श्री की अप्रमत्त ज्ञानदशा प्राणी मात्र को भाव पूर्वक अभिवादन करने योग्य बनाती रही। इस प्रकार महान् बुद्धि वैभवी परमाराध्य आचार्य देव श्री के सर्वोपयोगी चिरस्थायी साहित्य के प्रकाशन करने का अमूल्य लाभ एवं ज्ञान सेवा में यत् किञ्चित् अवसर पाकर उनके विद्वान् शिष्य प्रशिष्य गण अपने को भाग्यशाली समझते हैं।

परम पूज्य आचार्य देव के सब ग्रन्थों को पाठक वर्ग और जिज्ञासु विज्ञ महानुभावों ने जो सानन्द भावपूर्वक सत्कार तथा अभिनन्दन किया है उसी प्रकार अधिकाधिक उपयोग के साथ इसको भी अभिनन्दित करेंगे एवं हृदयङ्गम करके प्रसन्न होंगे ऐसी आशा है।

परस्परोपग्रहो जीवानाम्

"Aho Shrutgyanam"

। अर्हँ ।

आशैशवशीलशालिने श्रीनेमीश्वराय नमो नमः ।

कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवत्प्रणीतं-

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।

## [ स्वोपज्ञतत्त्वप्रकाशिकाभिधबृहद्वृत्ति-तत्त्वप्रकाशिका-प्रकाशशब्दमहार्णवन्याससंवलितम् ]

## तत्र-

## [ तृतीयाध्याये द्वितीयपादः ]

### परस्परान्योन्येतरेतरस्याम् स्यादेर्वा पुंसि ।३. २. १ ॥

त० प्र०—परस्परादीनामपुंसि-स्त्रियां नपुंसके च प्रयुज्यमानानां संबन्धिनः स्यादेः स्थाने आमादेशो वा भवति । इमे सख्यौ परस्परां भोजयतः, परस्परं भोजयतः; आभिः सखीभिः परस्परां भोज्यते, परस्परेण भोज्यते; इमाः सख्यः परस्परां प्रयच्छन्ति, परस्परस्मै प्रयच्छन्ति; इमाः परस्परां परस्परस्माद् वा बिभ्यति, इमाः परस्परां परस्परस्य वा स्मरन्ति, इमाः परस्परां परस्परस्मिन् वा स्निह्यन्ति; इमे कुले परस्परां भोजयतः, परस्परं भोजयत इत्यादि । इमे सख्यौ कुले वा अन्योन्यामन्योन्यं वा भोजयतः, सखीभिः कुलैर्वा अन्योन्यामन्योन्येन वा भोज्यते । इमे सख्यौ कुले वा इतरेतरामितरेतरं वा भोजयतः; सखीभिः कुलैर्वा इतरेतरामितरेतरेण वा भोज्यते । अपुंसीति किम्? इमे नराः परस्परं भोजयन्ति, नरैः परस्परेण भोज्यते; नरैः परस्परस्मै दीयते ।

अपरोऽर्थः—परस्परादीनामपुंसि प्रयुज्यमानानां संबन्धिनः स्यादेरमादेशो वा भवति । आभिः सखीभिः कुलैर्वा परस्परं परस्परेण वा भोज्यते, स्त्रीभिः कुलैर्वा परस्परं परस्परस्मै वा दीयते ।

अपरोऽर्थः—परस्परादीनां पुंसि प्रयुज्यमानानां संबन्धिनः स्यादेरस् वा भवति । एभिर्नरैः परस्परं परस्परेण वा भोज्यते, एभिर्नरैः परस्परं परस्परस्मै वा दीयते । एवं च स्त्री-नपुंसकयोरमामौ द्वावादेशौ वा भवत इति त्रैरूप्यम् । इमे परस्परादयः शब्दाः स्वभावादेकत्व-पुंस्त्ववृत्तयः कर्मव्यतीहारविषयाः, अस्मादेव च निर्देशात् परा-ऽन्यतरशब्दानां सर्वनाम्नां द्विर्वचनादि निपात्यते ॥ १ ॥

श० म० न्यासानुसन्धानम्—परस्परा० । परस्परादीनां समाहारः, ततः षष्ठी, लाघवात् सर्वत्राचार्यैः समाहारादरस्यैव दृष्टत्वात्, तात्पर्यविशेषसूचनार्थमेव क्वचित् तदनादरः । यद्यपि परस्परश्चान्योऽन्यश्चेतरेतरश्चेति विग्रहेऽन्योन्येतरेतरशब्दयोः स्वराद्यदन्तत्वमितरेतरशब्दापेक्षया चान्योऽन्यशब्दस्याल्पस्वरत्वमिति तस्यैव पूर्वनिपात उचितः, तथापि सूत्रकारनिर्देशबलात् तस्य धर्मार्थादिगणे पाठोऽनुमेयः, समासद्वयकल्पने गौरवात्, त्रयाणामपि सहैव विवक्षितत्वेन पूर्वमन्योन्येतरेतरशब्दयोर्द्वन्द्वकरणे प्रमाणाभावात्, दृश्यते च पदद्वयसमासेऽपि सूत्रकृतां पूर्वनिपातनियमपरित्यागः, यथा—"समुद्राभ्राद्धः" [पा० सू० ४. ४. ११८.] "लक्षण-हेत्वोः" [पा० सू० ३. २. १२६.] इति पाणिनिसूत्रयोः स्वराद्यदन्तत्वाल्पस्वरत्वप्रयुक्तपूर्वनिपातनियमपरित्यागः, पूर्वत्राभ्रशब्दस्य स्वराद्यदन्तत्वात् पूर्वनिपातः प्राप्तोऽपरत्र हेतुशब्दस्याल्पस्वरत्वात्, अर्च्यत्वं तु न विवक्षितुं शक्यतेऽनर्थकत्वात् । अत एव च नवीना निर्दिष्टसूत्रद्वयशैल्या पूर्वनिपातनियमानां सर्वेषामेव क्वाचित्कत्वं मन्यन्ते; अत एव "स सौष्ठवौदार्यविशेष-

"Aho Shrutgyanam"

शालिनीम्" [ कि० अ० १।२ ] इति भारविप्रयोगे–औदार्यस्य परप्रयोगः समाधीयत इत्यन्यदेतत् । एते च परस्परादयो नाखण्डाः शब्दा अपि तु परान्येतरशब्दानां द्विरुक्तानां रूपविशेषाः, तत्र कथं द्विरुक्तिः कथं वा पूर्वपदेऽपि सकारादीनां श्रुतिरित्येतद् विवेचयिष्यते सूत्रशेषे । अत्र सूत्रे पञ्च पदानि–प्रथमं षष्ठ्यन्तम्, तत आमिति, अमिति वा, स्यादेरिति षष्ठ्यन्तम्, वेत्यव्ययम्, ततः अपुंसि इति, पुंसि इति वा; तत्र 'आम्, अपुंसि' इति पदच्छेदमाश्रित्य सूत्रं व्याख्यायते-**परस्परादीनामपुंसि** इति, अपुंसीति पर्युदासः, स च सदृग्ग्राही, सादृश्यं च लिङ्गत्वेनैव ग्राह्यं प्रत्यासत्तेः साजात्याद् वा, तथा चापुंसीत्यस्य पुंभिन्ने तत्सदृशे लिङ्गे इत्यर्थात् पर्यवसितमर्थमाह–**स्त्रियां नपुंसके** चेति ।

**इमे सख्यौ परस्परां भोजयतः** इति–प्रथमा सखी भुङ्क्ते तामन्या [द्वितीया] प्रेरयति, सा च भुङ्क्ते तां प्रथमा प्रेरयतीत्येकस्यैव भुजिक्रियार्थकप्रेरणस्योभाभ्यां व्यतिहारेण सम्पादनं प्रतीयते, तथा च क्रियाव्यतीहारे परान्येतरशब्दानां स्याद्यन्तानां यथायोगं स्त्रीनपुंसकलिङ्गानां निपातनाद् द्वित्वं, पूर्वभागस्थस्य स्यादेः सत्वमोत्त्वं परान्यशब्दविषये; इतरशब्दविषये च निपातनादेव पूर्वभागस्थविभक्तेर्लुप्, उत्तरभागस्थाया विभक्तेश्चानेनाम्भाव इति प्रक्रिया । अन्ये च वैयाकरणा इह सविभक्तिकानां द्वित्वे कृते पूर्वपदस्थाया विभक्तेः सादेशं विदधति, इतरशब्दे च समासवद्भावं विदधति, आमादेशश्च समानः । कथञ्चिदिष्टरूपसिद्धिः कार्येति स्वमते सर्वं स्वभावादेवेत्याश्रयिष्यते । अत्र च स्त्रियामापोऽभावः, क्लीबे चान्येतरशब्दयोर्द्वितीयैकवचने "पञ्चतोऽन्यादेः०" [ १. ४. ५८. ] इति सूत्रेण दत्वाभावश्चान्यैर्बहुलग्रहणात् साधितः, स्वमते च स्वभावादेव साध्य इति आमोऽभावपक्षे पुंवदेव रूपं दृश्यते । तदाह-**परस्परं भोजयतः** इति । क्रमेणान्यासामपि विभक्तीनामुदाहरणान्याह–**आभिः सखीभिरि**त्यादिना । अन्ये च वैयाकरणा आमादेशो द्वितीयाया एवेत्याहुः, तथैव महाभाष्ये समुदाहरणात् । अपरे तूदाहरणस्य दिङ्मात्रत्वात् सर्वविभक्तीनामामादेशमाहुः, अत एव भाष्ये 'न चोदाहरणमादरणीयम्' इत्युक्तम्, तस्यायमाशयः—एतावन्त्येवोदाहरणानीत्यादरो न कर्तव्यः, उदाहरणस्य दिङ्मात्रदर्शनार्थत्वादिति । अत एवाचार्येण सर्वविभक्तीनामुदाहरणानि प्रदर्शितानि । केचित्–"आभिः सखीभिः परस्परेण भोज्यते" इत्यत्र करणे सहार्थे वा तृतीयायामेको णिग्, कर्त्तरि तृतीयायां णिग्द्वयम्" इत्याहुः, तत्र हेतुं चाहुः–भोजनार्थत्वेन प्रयोज्यकर्त्तुः कर्मत्वं स्यादिति, तन्न रोचयामहे–प्रयोज्यप्रयोजकभावस्येहोभयत्र सत्त्वात्, कर्मसंज्ञायाः कर्तृसंज्ञया बाधेन कर्मत्वासंभवात्, यत्र हि प्रयोजकभिन्नः प्रयोज्यस्तत्रैव प्रयोज्यकर्तुः कर्मत्वसंभवात् । तथा च 'अथवा प्रथमैकवचनस्यामादेशः' इति समाधानमपि नावश्यकम्, प्रथमान्तोदाहरणाभावेन तत्रामादेशस्य सत्त्वे प्रमाणाभावात् । स्त्रियां सप्तम्यन्तमुदाहृत्य नपुंसकेऽप्युदाहरणदिशं प्रदर्शयति–**इमे कुले परस्परां भोजयतः** इति–अत्र विकल्पपक्षे एकवचनान्तस्यैवोदाहरणादेकवचनस्यैवाम्भाव इति स्वमतमग्रे वक्ष्यते । अन्ये तु द्विवचनादीन्यप्युदाहरन्ति, किन्तु तत्र सर्वत्र पुंवदेव रूपम्, केवलं द्वितीयायाम्–अन्योन्ये, परस्परे, इतरेतरे, अन्योन्यानि, परस्पराणि, इतरेतराणीति विशेषो नपुंसके, स्त्रियां च–न विशेषः, आपोऽभावस्येष्टत्वात् । परस्परशब्दस्योदाहरणमुक्त्वा अन्योऽन्येतरशब्दयोरप्युदाहरणमाह–**इमे सख्यौ कुले वा अन्योन्यामि**त्यादिना । पदकृत्यं पृच्छति—**अपुंसीति किमिति** । उत्तरयति–**इमे नराः परस्परं भोजयन्ती**त्यादिना ।

'अम्' इति च्छेदपक्षमाश्रित्य सूत्रं व्याख्याति—**अपरोऽर्थः** इत्यादिना, तथैव चोदाह्रियते–**परस्परं परस्परेण वा भोज्यते** इति, द्वितीयायां रूपे विशेषाभावात् तृतीयामारभ्योदाहृतम् । एवं पुंसीति च्छेदमाश्रित्य सूत्रार्थमाह–**अपरोऽर्थः** इति । तथा च फलितं निगमयति–**एवं च स्त्रीनपुंसकयोरि**ति–अमामयो रूपद्वयं तदभावे च शुद्धं रूपमिति त्रैरूप्यम् । स्त्रियामापोऽभावस्य, नपुंसके च दादेशाभावस्य दर्शनात् कथं तदिति शङ्कामपनुदति–**इमे परस्परादयः शब्दाः** इति, **स्वभावादि**ति–स्वाभाविकी हि शब्देष्वर्थाभिधानशक्तिः, यादृशेन यल्लिङ्गेन यद्वचनेन च योऽर्थोऽनादिपरम्परयाऽभिधीयते, स एव शब्दः कथंचिच्छास्त्रेणान्वाख्यायते, न तु काचिन्नवीना शक्तिर्नवीनं वा रूपं शब्दानां विधीयते, तथा चैभिः परस्परादिभिः शब्दैरेकत्वपुंस्त्ववृत्तिभिरेव कर्मव्यतीहारः स्त्री-नपुंसकविषयोऽभिधीयत इति तादृशत्वमेवैषां साधुतया स्वीकरणीयमिति भावः । **कर्मव्यतिहारविषयाः** इति–कर्म चात्र क्रिया, तस्या व्यतीहारो विनिमयः, विषयो येषामिति विग्रहः । एकत्ववृत्तित्वेन कर्त्रादीनां बहुत्वेऽपि तेषामेकवचनान्तत्वमेव । **कैश्चित्** तन्न स्वीक्रियते, दीक्षितादिभिः 'अन्योन्यौ, अन्योन्यान्' इत्यादीनामुदाहरणात्, "अन्योन्येषां पुष्कैरामृशन्तः" इति शिशुपालवधे माघकविप्रयोगः, "क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ।" इति भारविप्रयोगश्च यद्यपि एकवचनान्तेन विग्रहेऽपि साधयितुं शक्यते, तथापि क्षितिनिवासिनो नभो-

"Aho Shrutgyanam"

निवासिनः सुरलोकनिवासिनश्च स्वसमानलोकनिवासिनोऽपि परस्परं न पश्यन्तीति विस्तृतत्वस्य विवक्षितत्वात् तत्रापि बहुवचनान्तेनैव विग्रहस्य युक्तत्वात्। पुँस्त्ववृत्तित्वाच्च न स्त्रीत्वनिमित्तक आप्, नवा नपुंसकत्वनिमित्तकोऽन्योऽन्येतरेतरशब्दयोर्दादेश इति तात्पर्यम्।

पाणिनीये च नये दीक्षितेनैतत् सर्वं बाहुलकात् समाहितम्, तथा चोक्तं तेन—"दलद्वये टाबभावः क्लीबे चाद्ड्विरहः स्वमोः, समासे सोरलुक् चेति सिद्धं बाहुलकात् त्रयम्।" इति। व्याख्यातं च तेनेत्थम्—"तथाहि–अन्योन्यं परस्परमित्यत्र दलद्वयेऽपि टाप् प्राप्तः, न च सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः, अन्यपरयोरसमासवद्भावात्; न च द्विर्वचनमेव वृत्तिः "यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया" इत्यादावतिप्रसङ्गात्॥ अन्योऽन्यमितरेतरमित्यत्र च "अद्ड्डतरादिभ्यः" [पा० सू० ७. १. २५.] इत्यद्ड् प्राप्तः, 'अन्योन्यसंसक्तमहस्त्रियामम्' 'अन्योन्याश्रयः, परस्पराक्षिसादृश्यम्, अदृष्टपरस्परैः' इत्यादौ सोर्लुक् च प्राप्तः, सर्वं बाहुलकेन समाधेयम्। प्रकृतवार्त्तिकभाष्योदाहरणं—"स्त्रियाम्" [पा० सू० ४. १. ३.] इति सूत्रे अन्योन्यसंश्रयत्वे तदिति भाष्यं चात्र प्रमाणमिति" इति।

अयमाशयः—"कर्मव्यतीहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्" इति वार्त्तिकं "प्रकारे गुणवचनस्य" इति सूत्रे पठ्यते, तेनान्यपरेतरशब्दानां सर्वादीनां कर्मव्यतीहारे द्विर्वचनमितरशब्दस्य च द्वित्वे कृते समासवद्भावो विधीयते, अन्यपरशब्दयोश्च न समासवद्भावः, केवलं पूर्वपदस्थाया विभक्तेः 'सुः' [स्वमते सिः] आदेशो विधीयते परस्परशब्दे सत्वं च, तस्य कस्कादिगणे पाठानुमानात्। तत्र स्त्रीविषये प्रयोगे उभयत्र भागे आपः प्राप्तिः, नपुंसके च–आदिष्टस्य सोः, परभागे विधीयमानस्यामश्च दादेशः प्राप्तः, यत्र च समस्तः प्रयोगः, यथा—'अन्योन्यसंसक्तम्' 'अन्योन्याश्रयः' 'परस्पराक्षिसादृश्यम्' 'अदृष्टपरस्परैः' इत्यादि, तत्रान्योन्यपरस्परशब्दपूर्वभागस्थस्य [सोः] सेः ऐकार्थ्ये लुप् च प्राप्तः, सर्वमेतद् बाहुलकेन समाधेयमिति प्रकृतसूत्रस्थभाष्योदाहरणादिभिर्निश्चीयत इति। बाहुलकमप्यभिधानस्वाभाव्यान्नातिरिच्यत इत्यन्यैरपीदृशस्थले स्वभाववाद एवाश्रीयत इत्येतदर्थं परमतमिहोपन्यस्तम्।

नवीना नागेशादयश्चान्यथैव आपोऽभावादिकं समादधति न स्वभाववादं नवा बाहुलकमाश्रयन्ति। तथा हि–नागेशेन "प्रकारे गुणवचनस्य" [पा० सू० ८. १. १२.] इति सूत्रभाष्ये उद्योते इत्थमुक्तम्—"परे तु–डतरादिभ्यो विहितयोः स्वमोरद्डित्यर्थस्य "सर्वादि" [पा० सू० १. १. २७.] सूत्रे भाष्ये उक्तत्वात् 'इतरेतरम्' इत्यादौ नाद्डः प्राप्तिः, अन्योन्यमिमे ब्राह्मण्यावित्यादावपि 'क्षुदुपहन्तुं शक्यम्' इतिवत् सामान्ये नपुंसकमिति रीत्याऽन्यशब्दस्यैव द्वित्वेन टाप एवाभावः। स्त्रीनपुंसकयोरित्यस्य तत्समानाधिकरणयोरित्यर्थ इत्याहुः" इति।

अस्यायमाशयः—कृतद्विर्वचनानां नपुंसके सेरमश्च अद्ड् [स्वमते द्] आदेशो न भवति, सर्वादिगणे पठितानुपूर्वीकशब्दविहितस्यैव सेरमश्च तदादेशविधानात्, इह च कृतद्विर्वचनस्य शब्दान्तरत्वमेव। स्त्रियां च नापः प्राप्तिः, विशेष्यस्य ब्राह्मण्यादेः स्त्रीत्वेऽपि विशेषणभूतानामन्योन्यादिशब्दानां सामान्यविवक्षया नपुंसकलिङ्गत्वात्, दृश्यते च विशेषणे नपुंसकलिङ्गविवक्षा 'क्षुदुपहन्तुं शक्यम्' इत्यादिभाष्यप्रयोगे। न चैवमाम्विधायके "स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वक्तव्यः" इति वार्त्तिके स्त्रीनपुंसकयोरित्युक्तत्वात् स्त्रीत्वाभावे आम् न स्यादिति वाच्यम्, स्त्रीनपुंसकयोरित्यस्य स्त्रीसमानाधिकरणे नपुंसकसमानाधिकरणे चेत्यर्थाद् विशेषणे नपुंसकत्वविवक्षायामपि तस्य स्त्रीसमानाधिकरणत्वाक्षतेरिति। अन्योन्याश्रय इत्यादिसमासे पूर्वभागस्थसोरलुक् च तस्यादेशस्वरूपत्वेन ऐकार्थ्यघटितत्वाभावादिति। वस्तुतस्तु–एतादृशं समाधानमप्यगतिकगतिरेवेति स्वभाववादान्नातिरिच्यत इत्यवधेयम्।

केचित् तु—सर्वादेः सर्वत्र वृत्तौ पुंवदेव रूपमिति वार्त्तिकोक्तिमाश्रित्य द्विर्वचनस्यापि वृत्तित्वं चाश्रित्य कृतद्विर्वचनानां स्त्रीनपुंसकनिमित्तककार्याभावमाहुः, तन्न–"यां यां प्रियः प्रैक्षत कातराक्षी, सा सा ह्रिया नम्रमुखी बभूव।" इति शिशुपालवधे तृतीयसर्गे माघकविप्रयोगे पुंवद्भावापत्तेः। किञ्च, "अकथितं च" [पा० सू० १. ४. २१.] इति सूत्रे "कारकं चेद् विजानीयात् यां यां मन्येत सा भवेत्" इति भाष्यप्रयोगेऽपि 'यां याम्' इत्यत्र पुंवद्भावापत्तिः। स्वमते च "सर्वादयोऽस्यादौ" [३. २. ६१.] इति सूत्रेण स्यादौ परतः पुंवद्भावस्य पर्युदस्तत्वादेषा शङ्कैव नोदेति।

सूत्रास्पृष्टमेकत्वं पुंस्त्वं च स्वभावबलात् प्रसाध्य सूत्रस्पृष्टमर्थं सूत्रेणैव साधयति—**अस्मादेव च निर्देशादिति।** **सर्वनाम्नामि**ति–सर्वेषां नाम सर्वनामेति योगार्थमाश्रित्य सर्वादीनामिह सर्वनामपदेन कथनं तेषां संज्ञोपसर्जनदशायां प्रकृतसूत्रलभ्यकार्याभावप्रतिपादनाय। **द्विर्वचनादी**त्यादि-

"Aho Shrutgyanam"

शब्देन पूर्वभागस्थविभक्तेः सादेशः, इतरेतरशब्दे च तल्लुप्, तस्य समस्तत्वं वा, यत्किञ्चिदलाक्षणिकं कार्यं तत् सर्वं संगृह्यते ॥३. २. १. ॥

## अमव्ययीभावस्यातोऽपञ्चम्याः । ३. २. २ ॥

**त० प्र०—अव्ययीभावसमासस्याकारान्तस्य संबन्धिनः स्यादेरमित्ययमादेशो भवति, अपञ्चम्याः—पञ्चमीं च वर्जयित्वा । उपकुम्भं तिष्ठति, उपकुम्भं पश्य, उपकुम्भं देहि, उपकुम्भं स्वामी । अव्ययीभावस्येति किम् ? कष्टश्रितः । तत्संबन्धिनः स्यादेरिति किम् ? प्रियोपकुम्भस्तिष्ठति, योपकुम्भाय देहि । अत इति किम् ? अधिस्त्रि, उपवधु, उपकर्तृ । अपञ्चम्या इति किम् ? उपकुम्भात् ॥२॥**

**श०म० न्यासानुसन्धानम्—अमव्ययी० । 'अव्ययीभावस्यात'** इति पदद्वयं विशेष्यविशेषणभावापन्नम्, न तु अवयवावयविभावसम्बन्धे षष्ठी, तथा सति वैयधिकरण्येनान्वयप्रसङ्गाल्लक्ष्यासिद्धेश्च, किञ्च सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति न्यायोऽपि सामानाधिकरण्यान्वयसाधकः, तथा चात इति विशेषणमव्ययीभावस्येति विशेष्यम्, "विशेषणमन्तः" [ ७. ४. ११३. ] इति न्यायसहकारेण च तदन्तार्थलाभ इत्याह—**अकारान्तस्ये**ति । **स्यादेरि**ति पूर्वसूत्रादनुवृत्तम्, तन्निरूपितसम्बन्ध एवाव्ययीभावस्येत्यत्र षष्ठी, तथा चाव्ययीभावसंज्ञोत्तरं नामसंज्ञायां समुदायादुत्पद्यमानस्य स्यादेरमादेशः सिध्यति । **अपञ्चम्याः** इति पदं पृथगेव व्याख्याति—**पञ्चमीं वर्जयित्वे**ति—पञ्चम्या न भवतीत्यर्थः । वस्तुतस्त्वित्थं पृथग् व्याख्याने गौरवमिति 'अपञ्चम्याः' इति पर्युदासार्थकमेवाश्रयणीयमिति पञ्चमीभिन्नस्य स्यादेरित्येवार्थो युक्तो लाघवात्; पूर्वममादेशं प्रसज्य तन्निषेधापेक्षया तत्प्रसक्तेरेव वारणस्य युक्तत्वात्, "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति सिद्धान्तात्, अथाप्येवं व्याख्यानं स्पष्टप्रतिपत्त्यर्थं ज्ञेयम् । प्रथमात आरभ्य सप्तमीपर्यन्तं विभक्तिसप्तकमध्ये पञ्चम्याः प्रकृतसूत्रेण पर्युदस्तत्वात् तृतीयासप्तम्योरग्रे विकल्पेनामो विधानात् पर्यवसितानां चतसृणां विभक्तीनां रूपाण्युदाहरति—**उपकुम्भं तिष्ठती**त्यादिना, कुम्भस्य समीपमिति विग्रहे समीपेऽव्ययीभावसमासः, अलौकिकप्रक्रियावाक्यस्थाया विभक्तेस्तु "ऐकार्थ्ये" [ ३. २. ८. ] इति लुप्, ततः समुदायादुत्पन्नविभक्तेरनेनामादेशः । **उपकुम्भं तिष्ठतीति**—कुम्भसामीप्ययुतं यत् किञ्चित् तिष्ठतीति प्रथमा । **उपकुम्भं पश्येति—**कुम्भसामीप्ययुतं पश्येति द्वितीया । **उपकुम्भं देही**ति—कुम्भसामीप्ययुताय देहीति चतुर्थी । **उपकुम्भं स्वामी**ति—कुम्भसामीप्ययुतस्य स्वामीति षष्ठी; तृतीयासप्तम्योरग्रे विकल्पयिष्यमाणत्वादत्र नोदाहृतम् । **अव्ययीभावस्येति किमि**ति—समासविशेषग्रहणं किमर्थं सामान्येनाकारान्तस्य समासस्य सम्बन्धिनः स्यादेरित्यर्थ एव स्वीकार्य इति प्रश्नाशयः, अव्ययीभावस्येति पदमपनीय तत्स्थाने समासस्येति पठनीयमिति यावत्, अन्यथा अव्ययीभावस्येत्यस्याभावेऽकारान्तात् परस्य स्यादेः, अकारान्तसम्बन्धिनः स्यादेरिति वार्थे 'देवः, कृष्णः' इत्याद्येव प्रत्युदाहृतं स्यात्, 'कष्टश्रितः' इति समस्ताकारान्तप्रत्युदाहरणानुसरणं व्यर्थमेव स्यात् । श्रितादित्वादत्र तत्पुरुषः । **तत्सम्बन्धिनः स्यादेरिति किमिति,** तथा च समीपार्थिका षष्ठी स्वीकर्त्तव्या—अव्ययीभावस्याकारान्तस्य समीपे यः स्यादिस्तस्यामादेश इति स्वीकार्यम्, अथवा—अव्ययीभावादत इति पञ्चम्यन्त एव पाठः कार्यः—अकारान्तादव्ययीभावात् परस्य स्यादेरमित्यर्थः कार्य इति प्रश्नाशयः । **प्रियोपकुम्भः** इति—प्रियमुपकुम्भं यस्येति अव्ययीभावोत्तरपदको बहुव्रीहिः, अत्र चोपकुम्भेत्यव्ययीभावात् परस्य तत्समीपस्थस्य वा सेरमादेशः स्यादिति प्रत्युदाहरणाशयः, 'तत्सम्बन्धिनः' इत्युक्तौ तु नायं सिरुपकुम्भसम्बन्धी, किन्तु प्रियोपकुम्भेति बहुव्रीहिसम्बन्धीति तस्यामादेशो न भवति । एवं—**प्रियोपकुम्भाये**त्यत्रापि चतुर्थी नाव्ययीभावसम्बन्धिनीति न भवत्यमादेशः । **अत इति किमिति,** अयमाशयः—"अनतो लुप्" [ ३. २. ६. ] इति सूत्रेणाकारान्तभिन्नाव्ययीभावसम्बन्धिनः स्यादेर्लुब् विधीयते, स च प्रकृतसूत्रात् परो विधिरित्यकारान्तभिन्ने सर्वत्र स एव भविष्यतीति परिशेषादकारान्तसम्बन्धिन एव स्यादेरनेनामादेशो भविष्यतीत्यत इति व्यर्थं व्यावर्त्याभावादिति । व्यावर्त्यमाह—**अधिस्त्री**ति—स्त्रियामिति—अधिस्त्रि, विभक्त्यर्थेऽत्राव्ययीभावः, वध्वाः समीपमिति—**उपवधु,** कर्तुः समीपमिति—**उपकर्तृ,** उभयत्र समीपार्थेऽव्ययीभावः; अयमाशयः—एतत्सूत्रे 'अतः' इत्यस्य सत्त्वेऽस्य विषये परत्वाल्लुपोऽप्रवृत्त्यर्थमेव लुब्विधायके 'अनतः' इति पठ्यते, अत्र चात इत्यस्याभावेऽस्य व्यापकत्वेनैतद्विषयपरिहारस्य कर्त्तुमशक्यतया तत्राप्यनत इति व्यर्थमेव, ततश्च तेनापि सामान्येन लुब् विधास्यते । इत्थं च द्वयोः क्वापि स्वातन्त्र्येणावकाशाभावादुभयशास्त्रप्रामाण्येनोभयमपि सर्वत्र प्रवर्त्तिष्यत इत्यकारान्तस्यापि स्यादेर्लुप् स्यादनकारान्तस्याप्यमादेशः स्यादिति सर्वत्र रूपद्वयापत्तिः स्यादिति विषयव्यवस्थार्थमत्रात इत्यस्या-

"Aho Shrutgyanam"

वश्यकत्वम्, कृते चात इति निर्देशे तत्रानत इत्यस्याभावेऽकारान्तेऽपि तस्य प्रवृत्तिर्मा भूदित्येतदर्थं तत्राप्यनत इत्यावश्यकमित्युभयोर्विषयविभागः सिध्यतीति । अथवाऽत्र अत इत्यस्याभावे "अनतो लुप्" [ ३. २. ६. ] इति सूत्रमनत इति पर्युदासाश्रयणेनाकारान्तभिन्नस्य तत्सदृशस्य स्वरान्तस्याव्ययीभावस्य सम्बन्धिन एव स्यादेर्लुपं विधास्यति, व्यञ्जनान्तेषु तस्याऽप्रवृत्त्या तेष्वस्य [ प्रकृतसूत्रस्य ] प्रवृत्तिः स्यादिति 'उपसमित्' इत्यादावप्यमादेशः स्यादित्यपि प्रत्युदाहर्त्तुं शक्यते । **अपञ्चम्या इति किमि**ति–अव्ययीभावस्याव्ययार्थप्राधान्येनाव्यये च कारक-संख्यादिसम्बन्धासम्भवात् पदत्वार्थं प्रथमैकवचनस्य ततः प्राप्तावप्यन्यासां विभक्तीनां तत उत्पत्त्यसम्भवात् पञ्चमीवर्जनमनर्थकमिति भावः । **उपकुम्भादि**ति–अयमाशयः—अव्ययीभावस्याव्ययार्थप्राधान्येऽपि शब्दशक्तिस्वाभाव्यादव्ययीभावेनाभिधीयमानोऽव्ययार्थः कारकसंख्यायोगी भवतीति विज्ञायते, अत्र चात्रत्यम् 'अपञ्चम्याः' इति, "वा तृतीयायाः" [ ३. २. ३. ] "सप्तम्या वा" [ ३. २. ४. ] इति सूत्रद्वयं च मानम्, ततश्चाव्ययीभावात् पञ्चम्यपि भविष्यत्येवेति तस्या अमादेशाभावार्थमपञ्चम्या इत्यावश्यकमेव ।

केचित् तु—अव्ययीभावस्याव्ययसंज्ञामारभन्ते, तेनाव्ययेभ्यः परस्य स्यादेर्लुब्विधायकसूत्रेणैवाव्ययीभावादपि परस्य स्यादेर्लुब् विधीयते, प्रकृतसूत्रे च निषेधोऽपि पठ्यते, योगविभागश्च क्रियते, पूर्वेण योगेनाकारान्तादव्ययीभावात् परस्य स्यादेर्लुब् निषिध्यते, परेण च पञ्चमीवर्जितस्यादेरमादेशो विधीयत, इत्यमादेशाभावेऽपि पञ्चम्या लुब् न भवति । स्वमते चाव्ययत्वमव्ययीभावस्येष्टमेव नहि, लुप् चानतो विधीयत इति सर्वमनवद्यम् । एवं चोपकुम्भादित्यादौ पञ्चम्या अमादेशाभावार्थं प्रकृतसूत्रे पञ्चमीपरिवर्जनमावश्यकमेव ।। ३. २. २. ।।

## वा तृतीयायाः । ३. २. ३ ।।

**त० प्र०—अकारान्तस्याव्ययीभावस्य संबन्धिन्यास्तृतीयायाः स्थाने वा अम् भवति । किं न उपकुम्भम्, किं न उपकुम्भेन । तत्संबधिन्यास्तृतीयाया इति किम् ? किं नः प्रियोपकुम्भेन ।। ३ ।।**

**श० म० न्यासानुसन्धानम्—वा तृ०** । पूर्वसूत्रेण तृतीयाया अवर्जनात् तस्या नित्यममादेशे प्राप्तेऽनेन पाक्षिकोऽमादेशो विधीयते, तथा चापञ्चम्या इति विहाय पूर्वसूत्रं सर्वमनुवर्त्तते, तदाह–**अकारान्तस्याव्ययीभावस्ये**ति । **किं न उपकुम्भमि**ति—उपकुम्भमिति रूपस्यान्यविभक्तिसाधारण्येन तृतीयान्तत्वप्रतीत्यर्थं 'किं नः' इति पदद्वयमुपन्यस्तम्, तथा च नः उपकुम्भेन किं साध्यं? किमपि न साध्यमित्यर्थस्य विवक्षितत्वात् गम्यमानां साधनक्रियां प्रति उपकुम्भस्य करणत्वेन करणे तृतीयैषा, तस्याश्च पाक्षिकोऽमादेशः । अव्ययीभावस्येत्यनुवृत्त्या तृतीयायास्तत्सम्बन्धित्वं विज्ञायते, तस्य प्रयोजनं स्फोरयति–**तत्सम्बन्धिन्यास्तृतीयाया इति किमि**ति । पूर्वसूत्रवत् यत्राव्ययीभावस्यान्यसमासान्तःपातित्वं तत्र तृतीयायाः समुदायसम्बन्धिन्या व्यावर्त्तनाय तदावश्यकमित्याह–**किं नः प्रियोपकुम्भेने**ति–प्रियमुपकुम्भमस्य तेन तथा ।।३. २. ३.।।

## सप्तम्या वा । ३. २. ४ ।।

**त० प्र०—अकारान्तस्याव्ययीभावस्य संबन्धिन्याः सप्तम्या अमादेशो भवति वा । उपकुम्भं निधेहि, उपकुम्भे निधेहि । तत्संबन्धिन्याः सप्तम्या इति किम् ? प्रियोपकुम्भे निधेहि । योगविभाग उत्तरार्थः ।। ४ ।।**

**श० म० न्यासानुसन्धानम्-सप्त०** । **उपकुम्भं निधेही**ति—कुम्भसमीपे निधेहीत्यर्थः, अमोऽभावे च—**उपकुम्भे निधेही**ति । पृच्छति-**तत्सम्बन्धिन्याः सप्तम्या इति किमि**ति प्रत्युदाहरणमुखेनोत्तरयति—**प्रियोपकुम्भे निधेही**ति–प्रियमुपकुम्भमस्य तस्मिंस्तथा । पूर्वसूत्रवदिदमपि "अमव्ययीभावस्यातोऽपञ्चम्याः" [ ३. २. ३.] इति सूत्रापवाद एव, तेन नित्यं प्राप्तस्यामो विकल्पविधानार्थत्वात् । तत्र पूर्वसूत्र एव "तृतीयासप्तम्योर्वा" इति सह निर्देशे कर्त्तव्ये योगविभागस्य प्रयोजनं किमिति शङ्कामपनुदति—**योगविभाग उत्तरार्थः** इति—उत्तरसूत्रे केवलं सप्तम्याः सम्बन्धो यथा स्यादित्येतदर्थं पृथक् सूत्रकरणमिति भावः, अन्यथा *एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः * इति न्यायेन तृतीयासप्तम्योरुभयोरेव तत्र सम्बन्धः स्यात्, स चानिष्टः । यद्यपि लक्ष्यानुरोधात् क्वचिदेकदेशानुवृत्तिरपि स्वीकृता, अतोऽन्यैस्तावन्मात्रे स्वरितत्वं प्रतिज्ञातं, तथा च * क्वचिदेकदेशोऽप्यनुवर्त्तते * इति न्यायान्तरमपि स्वीकृतम्, तथापि एकदेशे स्वरितत्वप्रतिज्ञा, तद्बोधनाय तथा व्याख्यानमित्यादिक्लेशापनोदाय पृथक् सूत्रमेव कृतं 'व्याख्यानाद् वरं करणम्' इति सिद्धान्तात् ।।३.२.४.।।

"Aho Shrutgyanam"

## ऋद्ध-नदी-वंश्यस्य । ३.२.५ ॥

**त० प्र०——ऋद्धं-समृद्धम्, यस्य समृद्धिः सुशब्दादिना द्योत्यते तदन्तस्य, नद्यन्तस्य, वंश्यान्तस्य चाकारान्तस्याव्ययीभावस्य सम्बन्धिन्याः सप्तम्याः स्थानेऽमादेशो भवति । ऋद्ध–मगधानां समृद्धिः–सुमगधं वसति, सुमद्रं वसति । नदी–उन्मत्ता गङ्गा यस्मिन्नुन्मत्तगङ्गं देशे वसति, एवं–लोहितगङ्गं शनैर्गङ्गं तूष्णींगङ्गं वसति; द्वे यमुने–द्वियमुनं वसति, एवं–सप्तगोदावरम् । वंश्य–एकविंशतिर्भारद्वाजा वंश्याः–एकविंशतिभारद्वाजं वसति, एवं–त्रिपञ्चाशद्गौतमम्, त्रिकोशलम् । प्रतिपदोक्तस्यैव ग्रहणादिह न भवति–उपगङ्गं, उपयमुने । पूर्वेण तु विकल्पो भवत्येव, नित्यार्थं वचनम् ॥ ५ ॥**

**श० म० न्यासानुसन्धानम्**——ऋद्ध० । ऋद्धपदेन "विभक्तिसमीपसमृद्धि०" [ ३. १. ३९. ] इति सूत्रोक्तसमृद्ध्यर्थे विहिताव्ययीभावस्य ग्रहणं व्याख्यानादित्याह——'**ऋद्धं समृद्धमि**'ति । समृद्धं च समृद्ध्यर्थयोगि, स चार्थः कथं प्रतीयत इति द्योतनायाह-**यस्य समृद्धिरि**त्यादिना । **सुशब्दादिने**त्यत्रादिशब्दः प्रकारे, सुशब्दसदृशसमृद्ध्यर्थबोधकशब्देनेत्यर्थः । तथा च क्वचिदन्यशब्देनापि तदर्थबोधने भवति प्रकृतसूत्रप्रवृत्तिः, यद्यप्यन्यस्तादृशोऽव्ययशब्दो नोपलभ्यते तथापि शब्दस्वभावस्यापरिच्छेद्यत्वादित्थमुक्तिः । **सुमगधमि**त्यादौ मगधानां समृद्धिः सुशब्देन द्योत्यत इति स समासो ऋद्धान्तो विज्ञायत इति तत्त्वम् । **नद्यन्तस्ये**ति——"नदीभिर्नाम्नि" [ ३. १. २७. ] इत्यादिसूत्रविहितसमासस्येति भावः । **वंश्यान्तस्ये**ति——"वंश्येन पूर्वार्थे" [ ३. १. २९. ] इति सूत्रविहितसमासस्येति भावः । पूर्वसूत्रेण सप्तम्या विकल्पेनामादेशः प्राप्तः, एषु च समासेषु सप्तम्या नित्यममादेशो विधीयते । क्रमेणोदाहर्तुमनाः पूर्वमृद्धसमासमुदाहर्तुमाह–ऋद्धेति, मगधानां समृद्धिः——**सुमगधमि**ति, मद्राणां समृद्धिः——**सुमद्रमि**ति, सप्तम्यन्तताविज्ञानाय **वसती**ति पदं प्रयुक्तं वासस्याधिकरणापेक्षत्वात् । नदीमुदाहर्तुमाह——**नदी**ति, **उन्मत्ता गङ्गा यस्मिन्** इति विग्रहः, **उन्मत्तगङ्गमि**ति च समासः, उन्मत्तगङ्गायुतस्य कस्यचिन्नेदं विशेषणमपि तु देशविशेषस्य संज्ञेत्याह-**देशे** इति, सप्तमीज्ञापनाय **वसती**ति, एवमुत्तरत्रिके, लोहिता गङ्गा यत्रेति–**लोहितगङ्गमि**ति, मन्दा गङ्गा यत्रेति–**शनैर्गङ्गमि**ति, अशब्दायमाना गङ्गा यत्रेति–**तूष्णींगङ्गमि**ति, एषु "नदीभिर्नाम्नि" [ ३. १. २७. ] इति संज्ञायामव्ययीभावः । **द्वे यमुने** इति——समाहृते इति शेषः, इदं च समासार्थदर्शकं लौकिकं वाक्यम्, न तु प्रकृतप्रयोगार्थपरिचायकं, प्रयोगस्य सप्तम्यर्थप्राधान्यात् । तथा च प्रयोगार्थपरिचयार्थं तत्रेति पदमपि देयम्, **द्वियमुनमि**ति च "संख्या समाहारे" [३.१.२८.] इति समाहारेऽव्ययीभावः, एवमुत्तरत्र, अतिदिशति–**एवमि**ति । सप्त गोदावर्यः समाहृताः–**सप्तगोदावरम्** । वंश्यसमासमुदाहर्तुमाह——**वंश्ये**ति, **एकविंशतिर्भारद्वाजा** इति विग्रहः, यद्यपि भरद्वाजशब्दो बिदादिपठितः, ततश्चापत्यार्थे विहितस्याञो "यञञोऽश्यापर्णान्तगोपवनादेः" [ ६. १. १२६. ] इति बहुत्वे लुप् स्यादिति 'एकविंशतिर्भरद्वाजाः' इति विग्रहो युक्तः,तथाप्याचार्यवचनप्रामाण्याद् भरद्वाजशब्दस्योपकादिषु पाठं परिकल्प्य लुपो वैकल्पिकत्वमेष्टव्यम् । केचित् तु——"प्रकृतदोषपरिहारायापत्यार्थं परित्यज्येदमर्थे तस्येदमित्यण्" इत्याहुः, तन्न युक्तम्-वंश्यत्वविज्ञानायापत्यार्थमुच्चार्यैव व्युत्पत्तेरावश्यकत्वात् । कैयटेन च——"तृतीया-सप्तम्योर्बहुलम्" [पा० सू० २. ४. ८४.] इति सूत्रे——"सप्तम्या ऋद्धनदीसमाससंख्यावयवेभ्यो नित्यम्" इत वार्तिक-भाष्योदाहरणम्——'एकविंशतिभारद्वाजम्' इति व्याचक्षाणेन "एकविंशतिर्भरद्वाजा वंश्या इति "संख्या वंश्येन" [ पा० सू० २. १. १८. ] इति समासः । तत्र वर्त्तिपदानां स्वार्थोपसर्जनार्थान्तराभिधायित्वाद् गौतमभारद्वाजशब्दयोरेकत्वविशिष्टेऽर्थान्तरे सङ्क्रमाल्लुगभावः" इत्युक्तम् । नागेशेन च तद्व्याख्यानसमये उद्योते–'एकविंशतिर्भरद्वाजाः' इत्यनयोः स्वार्थोपसर्जनवंश्या इत्यर्थाभिधायित्वादित्यर्थः । एवं हि अङ्गानतिक्रान्तोऽत्यङ्ग इति न सिध्येत्; तस्मात् भाष्यकारप्रयोगादत्र लुगभाव इति हरदत्तः । युक्ततरं चैतत्, अन्यथा बिदानामपत्यं बैद इति सिद्धचर्थं "तद्राज०" [पा० सू० २. ४. ६२.] सूत्रे उक्तवार्तिक-भाष्यासङ्गत्यापत्तिः । एतद्भाष्यप्रामाण्यादिमौ उपकादिषु बोध्याविति बोध्यमिति ।

अयमाशयः——कैयटेन विग्रहवाक्ये 'भरद्वाजाः' इत्येव प्रयुक्तम्, प्रयोगे च भारद्वाजशब्दो भाष्ये पठितः, तत्र वर्त्तिपदयोः समासे गुणीभूतत्वेन समासार्थं प्रत्युपसर्जनीभावादेकत्वविशिष्टेऽर्थ एव पर्यवसानमिति समासे सति भारद्वाजस्यैकत्वार्थविशिष्टतया बहुत्वविनिवृत्तेर्बहुत्वनिमित्तो लुबपि विनिवर्त्तते । एषैव रीतिस्त्रिपञ्चाशद्गौतममित्यत्रापि ।

नागेशेन चैतादृशार्थस्वीकारेऽनुपपत्तिः प्रदर्शिता, तस्यायमाशयः——एवमन्यपदार्थप्राधान्ये स्वार्थबहुत्वनिवृत्तौ स्वीकृता-

"Aho Shrutgyanam"

याम् 'अङ्गानतिक्रान्तोऽत्यङ्गः' इति प्रयोगो न सिध्येत्। अङ्गा इत्यत्रापि हि बहुत्वनिमित्तक एवापत्यार्थस्य लुब् भवति, तच्च बहुत्वमतिक्रमणकर्त्तुरेकत्वेन तत्प्राधान्यान्निवृत्तमिति तन्निमित्ते प्रत्ययलुपि निवृत्ते सति अत्याङ्ग इति प्रयोगः स्यात्। स च भाष्यकृतामनिष्टः, स्पष्टं चेदं "तद्राजस्य बहुषु तेनैवास्त्रियाम्" [पा० सू० २. ४. ६२.] इति सूत्रे महाभाष्ये। तस्माद् भाष्यकारप्रयोगादेवात्र प्रत्ययस्य लुब् नेति हरदत्तोक्तमेवादरणीयम्। तथा च सति बिदानामपत्यं बैद इति सिद्धयर्थं "तद्राज [पा० २०२. ४. ६२.] सूत्रे "गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्वयेकयोरलुक्" इति वार्तिकं यदुक्तं तस्याप्यसङ्गत्यापत्तिः। अनेन वार्तिकेन हि बिदानामपत्यं बैद इति सिद्धयर्थं प्रत्ययस्यालुक् चोद्यते, [भाष्यकृता च सोऽर्थोऽन्यथा साध्यत इत्यन्यदेतत्] तच्च कैयटोक्तरीत्या व्यर्थमेव स्यात्, यतोऽपत्यस्यैकत्वेन तस्यैव च प्राधान्येन पूर्वबहुत्वनिवृत्तौ लुकः प्राप्तिरेव नेत्यलुग्वचनमनर्थकमेव, तस्माद् यथा विग्रहवाक्ये लुप् विधीयते तथैव समासे कृतेऽपि तस्य स्थितिः स्यादेवेति प्रकृतभाष्यप्रयोगप्रामाण्येन भरद्वाजगोतमशब्दयोरुपकादिगणे पाठः कल्पनीयः, येन "वोपकादेः" [६. १. १३०.] इति विकल्पेन लुकि भरद्वाजा भारद्वाजा इति प्रयोगद्वयमपि सिध्येदिति। एतदेव स्वमतेऽपि स्वीकर्त्तव्यमित्युक्तं प्रागेवेत्यपत्यस्येदमर्थतया विवक्षणं नाश्रयणीयम्। **एकविंशतिभारद्वाजम्**इति च "वंश्येन पूर्वार्थे" [३. १. २९.] इत्यव्ययीभावः। अतिदिशति—**एवम्**इति, त्रिपञ्चाशद् गौतमा वंश्या इति—**त्रिपञ्चाशद्गौतमम्**, त्रयः कौशला वंश्या इति—**त्रिकोशलम्**इति।

प्रकृतसूत्रे च नदीशब्दमुच्चार्य विहितस्यैव समासस्य नदीशब्देन ग्रहणं * लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् * इति न्यायादित्याह—**प्रतिपदोक्तस्यैव ग्रहणादिह नेति**—प्रतिपदोक्तत्वं च तच्छब्दोच्चारणेन विहितत्वम्, उन्मत्तगङ्गमित्यादौ हि "नदीभिर्नाम्नि" [३. १. २७.] इति विहितः समासो नदीशब्दमुच्चार्यैव, '**उपगङ्ग**' इत्यादौ च समीपार्थे "विभक्तिसमीप०" [३. १. ३९.] इति समासः, स च न नदीशब्दोच्चारणेनेति लाक्षणिकत्वादिह न गृह्यत इति न नित्यममादेशोऽपितु विकल्पेनैव, तदाह-**पूर्वेण विकल्पो भवत्येवेति**। पूर्वेण सिद्धिमाशङ्क्याह—**नित्यार्थवचनम्**इति, एतदुक्तं प्रागेव ॥३. २. ५.॥

# अनतो लुप्। ३. २. ६॥

**त० प्र०—अकारान्तं वर्जयित्वाऽन्यस्याव्ययीभावस्य संबन्धिनः स्यादेर्लुब् भवति। स्त्रीषु–अधिस्त्रि, उपवधु, उपकर्तृ। अनत इति किम्? उपकुम्भात्, उपकुम्भाभ्याम्, उपकुम्भेभ्यः, उपकुम्भेन, उपकुम्भे। तत्संबन्धिविज्ञानादिह न भवति–प्रियोपवधुः, अत्युपवधुः ॥ ६ ॥**

**श० म० न्यासानुसन्धानम्–अनतो०।** '**अनतः**' इति पर्युदासः, स च पूर्वतोऽनुवृत्तस्याव्ययीभावस्येत्यस्य विशेषणम्, अत इत्यस्य विशेषणकोटिप्रविष्टत्वेन तदन्तपरत्वमित्यकारान्तार्थत्वम्, नञश्च वर्जनमर्थ इत्याह—**अकारान्तं वर्जयित्वे**ति। तद्वर्जने च तत्सदृशस्यान्यस्य ग्रहणं * नञिवयुक्तमन्यसदृशाधिकरणे * इति न्यायलभ्यमेवेति, तदाह—**अन्यस्ये**ति, तथा चाकारान्तस्य सम्बन्धिनः स्यादेर्लुब् न भवति, तदन्यस्य सर्वस्य भवतीति फलति। **स्त्रीषु** इति विग्रहः, **अधिस्त्रि** इति विभक्त्यर्थेऽव्ययीभावः, तत्सम्बन्धिनः स्यादेर्लुप्। वध्वाः समीपमिति—**उपवधु** इति समीपेऽव्ययीभावः, तथैव **उपकर्तृ** इत्यपि। **अनत इति किम्**इति, अयमाशयः—अदन्ताव्ययीभावसम्बन्धिनः स्यादेरमादेशः "अमव्ययीभावस्यातोऽपञ्चम्याः" [३. १. २.] इति सूत्रेण विहितः, तत्सामर्थ्याच्च तद्विषये लुपः प्रवृत्तिरेव न भविष्यतीत्यनत इति वर्जनमनावश्यकमेवेति। व्यावर्त्यमाह—**उपकुम्भादि**त्यादिना, अयमाशयः—यत्रामादेशप्रवृत्तिर्नित्या तत्र तद्विधानसामर्थ्याल्लुपोऽप्रवृत्तिरस्तु, यत्र चामादेशो न भवति, यत्र वा विकल्पेन भवति तत्र लुपः प्रवृत्तौ बाधकाभावात् 'उपकुम्भात्' इत्यादि रूपं न स्यादिति 'अनत' इति वर्जनमावश्यकमेव। अत एव पञ्चम्यन्ततृतीयान्तसप्तम्यन्तान्येव प्रत्युदाहृतानि। **तत्सम्बन्धिविज्ञानादि**ति—अकारान्तभिन्नाव्ययीभावसम्बन्धित्वविज्ञानाद् यत्रान्यसमासघटकत्वमव्ययीभावस्य तत्सम्बन्धिनः स्यादेर्न भवतीति भावः। तथा च तत्र यथायथं स्यादिः श्रूयत एवेत्याह **प्रियोपवधुरि**त्यादि। प्रियमुपवधु यस्येति—**प्रियोपवधुरि**ति बहुव्रीहिः, वधूसामीप्याभिलाषीति तदर्थः। अतिक्रान्त उपवधु इति—**अत्युपवधुरि**ति तत्पुरुषः, वधूसामीप्यातिक्रमणकर्त्ता विरक्त इति तदर्थः॥ ३. २. ६.॥

"Aho Shrutgyanam"

## अव्ययस्य । ३. २. ७ ॥

त० प्र०—अव्ययसंबन्धिनः स्यादेर्लुप् भवति । स्वः, प्रातः, उच्चैः, परमोच्चैः, कृत्वा, भोजं भोजं व्रजति, ततः, तत्र, कथं, ब्राह्मणवत्, पचतितराम्, द्विधा, अस्ति । तत्संबन्धिविज्ञानादिह न भवति–अतिस्वरः, अत्युच्चैसः । अत एव लुब्विधानादव्ययेभ्यः स्यादयोऽनुमीयन्ते, ततश्च 'अथो स्वस्ते गृहम्, अथोच्चैर्मे गृहम्' इत्यादौ "सपूर्वात् प्रथमान्ताद् वा" [ २. १. ३२. ] इति विकल्पेन 'ते मे' आदेशौ, पदसंज्ञा च सिद्धा भवति ॥ ७ ॥

श० म० न्यासानुसन्धानम्—अव्ययस्य । "स्वरादयोऽव्ययम्" [ १. १. ३०. ] इत्यादिसूत्रैः स्वरादिगणपठितानां चादीनामन्येषां चाव्ययसंज्ञोक्ता, त एवेहाव्ययशब्देन गृह्यन्ते, तत्सम्बन्धिनः स्यादेरनेन लुब् विधीयते । 'स्वः, प्रातः, उच्चैः, इति स्वरादिपठिताः । परमोच्चैरिति—तदन्तस्याप्यव्ययसंज्ञा भवतीति परमोच्चैरित्यस्याप्यव्ययत्वम् । न च गणपठितानुपूर्वीकभिन्नानां कथमव्ययसंज्ञा, "विशेषणमन्तः" [७. ४. ११३.] इति परिभाषयाऽपि न सिद्धिः विशेष्यानिर्देशादिति वाच्यम्, शब्दस्वरूपं विशेष्यमध्याहृत्य तत्सिद्धेः । किञ्चाव्ययमिति महासंज्ञाकरणेनापि तदन्तविधिरिति विज्ञायते, यतो 'लघ्वर्थं हि संज्ञाकरणम्' इति सिद्धान्ताद् 'दु' 'द्रि' इत्यादिसंज्ञावदेकाक्षरैव काचित् संज्ञा स्वरादीनां विधेया, महती चेयमव्ययसंज्ञा विधीयते, ततश्च तस्या अन्वर्थसंज्ञात्वं विज्ञास्यते । अव्ययशब्दार्थश्च—

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम् ॥" इति कारिकया प्रदर्शितः, तत्र चतुर्थचरणेनाव्ययपदव्युत्पत्तिरुक्ता–न व्येति–विविधं विकारं न गच्छतीति सत्त्वधर्माणां लिङ्गसंख्यादीनामभावस्तत्र सूच्यते; तथैव शेषेण चरणत्रयेण तद्व्याख्यानम्, ततश्च तादृशो योगार्थवत एव स्वरादेरव्ययसंज्ञेति महासंज्ञया सूचितम् । एतादृशं सूचनं चोपसर्जनभूतानां संज्ञाभूतानां च निवृत्त्यर्थम्, तत्रोपसर्जनत्वं च पदान्तरसम्बन्धं विना न संभाव्यते, पदान्तरसम्बन्धे चानुपूर्वीभेदः सुतरामिति तद्व्यावृत्त्यर्थं क्रियमाणा महासंज्ञा तदन्तस्यापि संज्ञां ज्ञापयतीति परमोच्चैरित्यादौ यत्राव्ययार्थस्यैव प्राधान्यं तत्राव्ययलक्षणसत्त्वे बाधकाभावाद् भवत्येवाव्ययसंज्ञेति तत्सम्बन्धिनः स्यादेरनेन लुबपि भवत्येव, यत्र च न तदर्थप्राधान्यं तत्र नेति स्फुटीभविष्यत्यनुपदमेव । कृत्वेति—"क्त्वातुमम्" [ १. १. ३५. ] इत्यव्ययसंज्ञा, भोजं भोजमित्यत्रापि तेनैव । ततः, तत्रेति–"अधणतस्वाद्याशसः" [ १. १. ३२. ] इत्यव्ययसंज्ञा । कथमिति—"विभक्तिथमन्त०"[ १. १. ३३. ] इत्यव्ययसंज्ञा । ब्राह्मणवत्, पचतितरामिति—"वत्तस्याम्" [ १. १. ३४. ] इत्यव्ययसंज्ञा । द्विधेति—"अधणतस्वाद्याशसः"[ १.१. ३२. ] इत्यव्ययत्वम् । अस्तीति—"विभक्ति०" [ १. १. ३३. ] इत्यव्ययसंज्ञा । तत्सम्बन्धिविज्ञानादिति—तत्पदमिह मुख्यतत्परमित्यव्ययार्थस्योपसर्जनत्वं यत्र तत्र तत्त्वमेव नास्तीति कुतस्तत्सम्बन्धित्वमिति तादृशस्थले न भवति लुप्, क्वेत्याह—अतिस्वरः इति—स्वरतिक्रान्ता इत्यर्थः । अत्युच्चैसः इति-उच्चैरतिक्रान्ता इत्यर्थः । तथा चात्रातिक्रमणकर्त्तुः प्राधान्येनातिस्वरादीनां सत्त्वप्राधान्याल्लिङ्गसंख्यायोगित्वेन पूर्वोक्तरूपेणाव्ययत्वं नास्तीति तत्सम्बन्धिनः स्यादेर्नाव्ययसम्बन्धित्वमिति लुप् न भवति । अत्रेदं शङ्क्यते—उच्चैःशब्दस्याधिकरणशक्तिप्रधानत्वेन कर्मत्वायोगादतिक्रमणकर्मत्वेन विग्रहवाक्ये तस्य कथं समावेश इति, सत्यम्—शक्तिप्रधानान्यव्ययानि वृत्तिविषये शक्तिमत्प्रधानानि क्वचिद् भवन्तीति स्वीकारादुच्चैस्त्ववद्द्रव्यपरत्वमुच्चैःशब्दस्येति तस्य कर्मत्वसंभवात् । नन्वव्ययानां संख्या-कारकसम्बन्धाभावस्याव्ययमिति महासंज्ञया सूचितत्वेनैकत्वादिविशिष्टकर्तृत्वादिबोधिकानां स्यादिविभक्तीनां तत उत्पत्तेरेवाभावेन प्रकृतसूत्रेण स्यादेर्लुब्विधानं व्यर्थमेवेति चेदत्राह-अत एव लुब्विधानादिति—आचार्येण स्यादेर्लुबनेन सूत्रेण विधीयते, न च स्याद्युत्पत्तिं विना लुब्विधानमुपपद्यत इत्यनुपपन्नं लुब्विधानमव्ययेभ्यः स्याद्युत्पत्तिमाक्षिपतीति भावः । ननु एवं स्याद्युत्पत्तिं कल्पयित्वा तस्य लुब्विधानं व्यर्थं क्वचिदपि तस्य श्रवणाभावादिति चेदत्राह-ततश्चाथो स्वस्ते गृहम्, अथोच्चैर्मे गृहमिति, अयमाशयः–मास्तु क्वचित् स्यादीनां श्रवणं तथापि प्रत्ययलक्षणेन स्यादिनिमित्तकं पदत्वं तथा प्रथमान्तत्वादिकं तत्र विज्ञायत इति "सपूर्वात् प्रथमान्ताद् वा" [ २.१. ३२. ] इति सूत्रेण प्रकृतप्रयोगे स्वःशब्दोच्चैःशब्दयोः प्रथमान्तत्वेन ग्रहणाद् विकल्पेन 'ते मे' आदेशौ भवतः, पदत्वं च तस्य भवतीत्यपदं न प्रयुञ्जीतेति निषेधातिक्रमश्च न भवतीति ।

महाभाष्ये चान्यथापि स्वाद्युत्पत्तिः साधिता । तथाहि–"अव्ययादाप्सुपः" [पा.सू.२.४.८२.] इति सूत्रेऽव्ययाद् विहितस्यापः सुपः [ स्यादेः ] च लुब्विधायके शङ्कितम्—"अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात्" इति वार्त्तिकेन, अस्याय-

"Aho Shrutgyanam"

मर्थः—अव्ययादापो लुग्वचनं व्यर्थं, स्त्रियां ह्याब् विधीयते, न चास्ति तस्य [अव्ययस्य] लिङ्गमिति लिङ्गाभावादाप उत्पत्तिरेव नेति किं लुग्वचनेनेति । न च स्त्रियामित्यस्य स्त्रीसमानाधिकरणे इत्यर्थः, तथा चाव्ययेषु स्वतो लिङ्गाभावेऽपि स्त्रिया सह तेषां सामानाधिकरण्यं भवत्येवेत्यापः संभावनाऽस्तीति वाच्यम्, तस्य पक्षस्य भाष्यकृतैव तत्र सूत्रे खण्डितत्वात्, तथा च 'भूतमियं ब्राह्मणी' इति भाष्यकृता प्रयुक्तम्, तत्र भूतशब्दस्य स्त्रीसामानाधिकरण्ये सत्यपि न तत आप्, ततश्चापोऽभावान्न लुग्वचनप्रयोजनमिति शङ्किते, आक्षिपति—"किमिदं भवान् सुपो लुकं मृष्यति, आपो लुकं न मृष्यति, यथैव ह्यलिङ्गमव्ययमेवमसंख्यमपि" इति, समाधत्ते—"सत्यमेवमेतत्, प्रत्ययलक्षणमाचार्यः प्रार्थयमानः सुपो लुकं मृष्यति । आपः पुनरस्य लुकि सति न किंचिदपि प्रयोजनमस्ति ।" इति । पुनराक्षिपति—"उच्यमानेप्येतस्मिन् स्वाद्युत्पत्तिर्न प्राप्नोति । किं कारणम् ? एकत्वादीनामभावात्, एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते, न चैषामेकत्वादयः सन्ति" इति । ततः समाहितम्—"अविशेषेणोत्पद्यन्ते, उत्पन्नानां नियमः क्रियते । अथवा प्रकृतानर्थानपेक्ष्य नियमः क्रियते । के च प्रकृताः ? एकत्वादयः । एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु । द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु । बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोरिति" इति ।

अयमाशयः—लिङ्गाभावाद् यथा आप् न प्राप्नोति तथैव यद्यपि संख्याभावात् स्यादिरपि न प्राप्नोति, तथापि यथा आप उत्पत्तौ स्त्रीलिङ्गापेक्षा, न तथा स्यादीनामुत्पत्तौ संख्यापेक्षा । द्विधा हि स्याद्युत्पत्तौ नियमः—प्रत्ययनियमोऽर्थनियमश्च, तत्र अर्थनियमपक्षेऽविशेषेणोत्पन्नानां प्रत्ययानां शास्त्रेणार्थनियमादन्येषां निवृत्तिर्भवति, तथा चैकार्थप्रतिपिपादिषायामेकवचनमेव तिष्ठति, न द्विवचनादि, अत्र पक्षेऽव्ययेभ्यो विभक्त्युत्पत्तौ बाधकाभावः, उत्पन्नानामेकत्वादिनिवृत्त्या निवृत्तिश्चेदस्तु, सैव निवृत्तिरनेन सूत्रेणानुशास्यते । प्रत्ययनियमपक्षे च एकस्मिन्नेवैकवचनमित्यादिक्रमेण बोधे द्वित्वादिव्यवच्छेदे एव तात्पर्यम्, न तु एकत्वादिसंख्याया असत्त्वे न स्याद्युत्पत्तिरित्यत्रेति भवति सर्वासां विभक्तीनामव्ययेभ्यः प्राप्तिः । नियमाभावे—एकवाक्यतया—एकत्वादावेकवचनादि विधीयत इति स्वीकारे का गतिरिति चेदत्राह—अथवा आचार्यप्रवृत्तिर्ज्ञापयति—उत्पद्यन्तेऽव्ययेभ्यः स्वादय इति । यदयम्—"अव्ययादाप्सुपः" इति लुकं शास्ति" इति । तथैव स्वमतेऽपि समाहितमेवेति सर्वं सुस्थम् ।। ३. २.७।।

## ऐकार्थ्ये । ३. २. ८ ।।

**त० प्र०—ऐकार्थ्यम्—ऐकपद्यं, तन्निमित्तस्य स्यादेर्लुप् भवति । चित्रा गावो यस्य—चित्रगुः, राजपुरुषः, पुत्रमिच्छति—पुत्रीयति, पुत्रकाम्यति, कुम्भं करोति—कुम्भकारः; उपगोरपत्यम्—औपगवः । एषु 'चित्र जस् [अस्]' 'गो जस् [अस्]' 'राजन् ङस् [अस्]' 'पुरुष सि [स्]' 'पुत्र अम् क्य [य]' 'पुत्र अम् काम्य' 'कुम्भ अम् कार' 'उपगु ङस् [अस्]' अण् [अ]' इति स्थिते, ऐकार्थ्ये सति तन्निमित्तस्य स्यादेर्लुप् । अत एव च लुब्विधानात् "नाम नाम्नै०" [३. १. १८.] इत्युक्तावपि विभक्त्यन्तानामेव समासो विज्ञायते । 'ऐकार्थ्ये' इति निमित्तसप्तमीविज्ञानादैकार्थ्योत्तरकालस्य न भवति—चित्रगुः । ऐकार्थ्य इति किम् ? चित्रा गावो यस्येत्यादिवाक्ये न भवति ।। ८ ।।**

**श० म० न्यासानुसन्धानम्—ऐकार्थ्ये ।** एकार्थस्य भाव ऐकार्थ्यमिति प्रतीयमाने न विवक्षितार्थसिद्धिरिति ऐकार्थ्यपदमिह यदर्थे प्रयुक्तं तदाह- **ऐकार्थ्यमैकपद्यमिति**—एकोऽर्थो ययोर्येषां वा तानि—एकार्थानि, तेषां भाव इत्यैकार्थ्यशब्दव्युत्पत्तौ सत्यामपि पृथक्पदानामर्थैक्यस्यासम्भव एव, पर्यायस्थलेऽपि यथाकथञ्चिदर्थभेदसत्त्वात्, तथा चैकार्थ्यशब्देनेह पृथगुपस्थापितार्थानां पदानां वृत्तिवशादेकोपस्थितिजनकत्वरूप एकार्थीभाव एवाभिधीयत इति स्वीकार्यम्, एकार्थीभावे च सत्येकपदत्वमेव भवति, अन्यथैकोपस्थितिजनकत्वासंभवात् । तथा चार्थत एकार्थस्यैकपदमर्थः, तस्य भावश्चैकपद्यमित्यार्थिकार्थकथनमिदं, न तु स्वरूपार्थकथनम् ।

केचित् त्वैकार्थ्यशब्दमित्थं व्याचक्षते—एक इवाचरत्येकति, एकतीत्येकः, आरोपितैकत्ववान्, अनेकेष्वेकत्वाहरणमारोपितैकत्वम्, आरोपितैकत्वधर्मवानर्थो यस्य स एकार्थः, तस्य भाव ऐकार्थ्यमेकार्थीभाव इति यावत् । तथा च विचित्राः शब्दशक्तय इति सिद्धान्तात् पृथगर्थानां स्वार्थद्रव्यादिपञ्चविधार्थान्वयक्रमेण पृथग्भूतार्थकानां पदानां विशेष्यविशेषणभावमहिम्ना समन्वीयमानेष्वर्थेष्वेकत्वधीर्या सैवेकत्वस्याहार्यारोपः, तद्भाव एवैकार्थ्यम्, तच्चैकपदत्वे सत्येव भवतीत्यैकपद्यशब्देनोक्तम् । अथवा एकार्थत्वे सम्भवत्येवैकपद्यं भवतीत्येकपद्यनिमित्तकत्वेनैकार्थ्यस्यैकपद्यशब्देन व्यवहारः । केचित् तु—ऐकार्थ्यमस्त्यत्रेति मत्वर्थेन ऐकार्थ्यमैकपद्यमुच्यते । एवं च यत्र पदानि परित्यक्तस्वार्थानि उपसर्जनीभूतस्वार्थानि वाऽर्थान्तरे सङ्क्रान्तानि भवन्ति तदैकार्थ्यं, तच्चैकपद्यरूपमेव पर्यवस्यति ।

"Aho Shrutgyanam"

**तन्निमित्तस्येति**—ऐकपद्यनिमित्तस्येत्यर्थः, यस्मिन् सति यद् भवति तत् तस्य निमित्तमिति सामान्यव्याप्त्या यस्मिन् स्यादौ सति यत्र समुदाये ऐकपद्यमुत्पद्यते स स्यादिस्तन्निमित्तमिति, ऐकपद्यपूर्वकालविद्यमानस्य स्यादेर्लुबिति भावः।

ऐकपद्यं च चतुर्षु भवति—समासे नामधातुषु कृदन्ते तद्धितान्ते चेति क्रमशश्चतुर्विधमुदाहरति—**चित्रा गावो यस्ये**त्यादिना । एषु कस्यामवस्थायामैकपद्यमुत्पद्यते तत् क्रमशो दर्शयति—**एष्विति, 'चित्र जस्[अस्] गो जस्[अस्]'** इति चित्रगुरित्यस्यालौकिकं प्रक्रियावाक्यं, तस्मिन्नेव समाससंज्ञयैकपद्यमुत्पद्यत इत्युभयपदे अस्स्यादिस्तन्निमित्तमिति तस्यानेन लुब् भवति । एवं—**'राजन् ङस्[अस्] पुरुष सि [स्]'** इति राजपुरुष इत्यस्य प्रक्रियावाक्यम्, **'पुत्र अम् क्य [य]'** इति पुत्रीयतीत्यस्य, **'पुत्र अम् काम्य'** इति पुत्रकाम्यतीत्यस्य, **'कुम्भ अम् कारः,** इति कुम्भकार इत्यस्य, **'उपगु ङस् [अस् अण् [अ]'** इति औपगव इत्यस्य स्थितिः, एष्वेवालौकिकप्रक्रियावाक्येषु समासेन 'चित्रगुः, राजपुरुषः' इत्यनयोः, धातुसंज्ञया 'पुत्रीयति, पुत्रकाम्यति' इत्यनयोः, उपपदसमासेन 'कुम्भकार' इत्यत्र, स च "ङस्युक्तं कृता" [ ३. १. ४९. ] इति सूत्रेण विहितत्वात् कृन्निमित्तकोऽपि, अतश्च तत्र कृत्प्रत्ययकृत एवैकार्थीभावः, तथापि कृद्योगा द्वितीयापि तन्निमित्तं तस्यां सत्यामेव समासप्रवृत्तिः । 'उपगु अस् अ' इत्यत्र च तद्धितप्रत्ययेनैकार्थ्यम् । समासविधायकेषु सूत्रेषु "नाम नाम्नैकार्थ्ये समासो बहुलम्" [ ३. १. १८. ] इति सूत्रान्नाम नाम्नेति पदद्वयस्य सम्बन्धात्, नाम्नश्च विभक्तिरहितस्यैव संभवात् समासरूपवृत्तौ न स्यादिप्रवेश आवश्यक इति समासरूपैकार्थ्ये न स्यादिर्निमित्तम्, नामधातुप्रत्ययस्य तद्धितप्रत्ययस्य च स्याद्यन्तादुत्पद्यमानत्वेऽपि तदर्थं प्रत्यये इत्येव कार्यम्, तत्रैकार्थीभावस्य प्रत्ययनिमित्तत्वादिति शङ्कायामाह—**अत एव च लुब्विधानादिति,** अयमाशयः—नाम नाम्नेति प्रकृत्य यद्यपि समासो विहितस्तथापि तत्रैकार्थ्यनिमित्तस्य स्यादेर्लुब्विधानात् स्याद्यन्तस्यैव सर्वत्र समास इति विज्ञायते, ततश्च तत्र स्थितस्य स्यादेर्लुब्विधानेनास्य सार्थक्यम् । सूत्रे निमित्तबोधकपदाभावान्निमित्तार्थलाभः कस्मात्, किं च तदर्थविवक्षणेन फलमित्याह—**ऐकार्थ्ये इति निमित्तसप्तमीविज्ञानादिति**—निमित्ते सप्तमीविधायकं च सूत्रं "तद्युक्ते हेतौ" [ २. २. १००.] इति, यथा—चर्मणि द्वीपिनं हन्तीत्यादौ, निमित्तं च द्विविधम्—हेतुः [ कारणं ] फलं च, लोके द्वयोरपि प्रयोजनादिपदप्रयोगात् । तथा च यत्प्राप्तीच्छाप्रयोज्या यत्प्रयोजिका वा क्रिया तदुभयं क्रियानिमित्तम्, तत्राद्यस्य-चर्मणि द्वीपिनं हन्तीत्यादिविषयः, द्वितीयस्य—'अविद्यारजनीक्षये यदुदेति' इत्यादि । 'ऐकार्थ्ये' इत्यत्र च सहकारित्वरूपं हेतुत्वं, ततश्चैकार्थ्योत्पत्तिपूर्वकालस्थितस्यैव स्यादेरनेन लुप्, तदुत्तरकालोत्पन्नस्य च न तन्निमित्तत्वम्, कार्यनियतपूर्ववृत्तेरेव कारणत्वात्, तदुत्तरकालोत्पन्नस्य तत्कार्यत्वमेव, ततश्च समासोत्तरकालमनेन स्यादेर्लुपि ततः समुदायादुत्पन्नः स्यादिस्तिष्ठत्येव न लुप्यते, क्वेत्यत्राह—**चित्रगुरिति । ऐकार्थ्ये इति किमिति**—विशिष्य ऐकपद्यनिमित्तस्यैव स्यादेर्लुप् कुतो विधीयते, सामान्येन 'वृत्तौ' इति सूत्र्यतां, वृत्तिनिमित्तस्य स्यादेर्लुब् विधीयतामित्याशयः, अथवा सूत्रमिदमारभ्य तत्सामर्थ्यात् स्याद्यन्तानां समासं परिकल्प्य तस्य स्यादेरनेन लुब्विधानापेक्षया सूत्रमिदं न क्रियताम्, नाम नाम्नैव समस्येत, ततश्च समासार्थप्रक्रियावाक्ये स्याद्यन्तानां प्रवेश एव नेति तत्सम्बन्धिस्यादेर्लुब्विधानं व्यर्थमेवेति प्रश्नाशयः, नामधात्वादिषु स्याद्यन्तानां प्रवेशेऽपि तदर्थं प्रत्यये इत्येव सूत्र्यताम् । तत्राह-**चित्रा गावो यस्येत्यादिवाक्ये न भवती**ति, अयमाशयः- समर्थः पदविधिरिति परिभाषणात् सर्वेषां पदविधीनां समर्थाश्रितत्वम्, समर्थश्च सामर्थ्यवान्, सामर्थ्यं च द्विविधम्—व्यपेक्षा एकार्थीभावश्च, तत्र व्यपेक्षा नाम पृथगर्थानां पदानामाकाङ्क्षायोग्यताऽऽसत्तितात्पर्यवशात् परस्परं विशेष्यविशेषणभावावगाहिबोधजनकत्वम्, एकार्थीभावश्च तादृशानामेव पदानां वृत्तिवशादेकोपस्थितिजनकत्वमित्युक्तमेव । एवं चोभयत्र विशेष्यविशेषणभावादिसम्बन्धमूलकमेव सामर्थ्यं, संसृष्टार्थं समर्थमिति भाष्यम्, तथा च अलौकिके एकार्थीभावनिमित्ते प्रक्रियावाक्येऽपि विशेष्यविशेषणभावावगतये स्याद्यन्तानामेव प्रवेशआवश्यकः, तत्र च यदि "नाम नाम्नैकार्थ्ये" इत्यादिसूत्रेण नाममात्रस्य समासान्तःपातितया प्रवेशाभ्यनुज्ञा स्वीक्रियेत, तदा व्यपेक्षावाक्येऽपि नाम्नामेव प्रवेशः स्यादिति विभक्तिर्न श्रूयेत, तथा च चित्रा गावो यस्येति रूपं तस्य न स्यात्, अतश्चैकार्थीभावे स्यादेर्लुब् भवति, व्यपेक्षायां नेति भेदस्य सिद्धये सूत्रमिदमारब्धव्यमेवेति भावः । किञ्चाग्रिमसूत्रैस्तत्र तत्र समासादिषु स्यादेर्लुपो निषेधस्यापि सार्थक्याय "ऐकार्थ्ये" इत्यनेन लुब्विधानमावश्यकमेव, अन्यथा 'प्राप्तौ सत्यां निषेधः' इति सार्वजनीनानुभवेन लुपः प्राप्त्यभावे तन्निषेधविधानमनुचितमेव स्यात्, निषेधसामर्थ्याच्च वृत्तौ स्यादेर्लुब् भवतीति सामान्यतया यदि कल्प्यते किमपि वाक्यं लुब्विधायकम्, तर्हि वृत्तिनिमित्तत्वं व्यपेक्षावाक्यस्यापि अक्षतमेव, व्यपेक्षा

"Aho Shrutgyanam"

वाक्यबोधितैव विशेष्यविशेषणभावादिरूपा योग्यताऽलौकिके प्रक्रियावाक्ये कल्प्यते, अन्यथा तत्रापरिनिष्ठितानामेव प्रवेशात् तादृशानां चार्थबोधजननासामर्थ्यात् तत्रार्थस्यैवाभावेन क्वैकार्थ्यं तिष्ठेत्। तथा च व्यपेक्षावाक्यस्यापि वृत्तिनिमित्तत्वं सिद्धमेवेति तत्रापि लुब् मा भूदित्येतदर्थं विशिष्यैकार्थ्ये लुब्विधानमावश्यकमित्यास्तां विस्तरेणेति ॥३.२.८॥

## न नाम्येकस्वरात् खित्युत्तरपदेऽमः । ३. २. ९ ॥

**त० प्र०——समासारम्भकमन्त्यं पदमुत्तरपदम्, नाम्यन्तादेकस्वरात् पूर्वपदात् परस्यामः खित्प्रत्ययान्ते उत्तरपदे परे लुप् न भवति। स्त्रीं स्त्रियं वात्मानं मन्यते–स्त्रींमन्यः, स्त्रियंमन्यः; श्रियंमन्यः, भ्रुवंमन्यः, नरंमन्यः, रायंमन्यः, गांमन्यः, नावंमन्यः। अथ श्रियमात्मानं मन्यते–श्रियंमन्यं कुलमित्यत्र नपुंसकलक्षणोऽमो लोपः कस्मान्न भवति? उच्यते–श्रीशब्दस्यात्मसमानाधिकरणस्य नपुंसके वृत्त्यभावादाविष्टलिङ्गत्वाच्च न भवति; अन्ये त्वाहुः–यथा प्रष्ठादयः शब्दा धवयोगात् स्त्रियां वर्तमानाः स्वलिङ्गं विहाय स्त्रीलिङ्गमुपाददते, तथा श्रीशब्दः कुले वर्तमानः स्वलिङ्गपरित्यागेन वर्तते, ततो नपुंसकलक्षणं ह्रस्वत्वममो लुप् च भवति–श्रिमन्यं कुलमिति। न चायं नपुंसकलक्षणस्य लोपस्यापवादः, किंतु ऐकार्थ्यलक्षणस्योत्तरपदग्रहणात्। नामिग्रहणं किम्? ज्ञंमन्यः, क्ष्मंमन्यः, वाग्मन्यः। एकस्वरादिति किम्? हरिणिंमन्या, बुधंमन्या। खितीति किम्? स्त्रीमानी——"मन्याण्णिन्" [५. १. ११६.] ॥ ९ ॥**

**श० म० न्यासानुसन्धानम्–न नाम्येक०।** उत्तरं च तत् पदमुत्तरपदमिति व्युत्पत्त्या उत्तरपदशब्दोऽव्यावर्त्तकः स्यात्, सर्वस्यापि पदस्य यत्किञ्चित्पदापेक्षया कालिकोत्तरत्वसंभवात्; दैशिकं पूर्वोत्तरत्वं च न शब्देषु सम्भवति, शब्दानामाकाशाश्रितत्वात्, आकाशे च तेषां व्याप्त्यैव स्थितिरिति दर्शनात्, तत्र पूर्वापरीभावानवगमात् तस्य च प्रकृतशास्त्रानुपयोगाच्चेति सर्वं मनसि निधायाह–**समासारम्भकमन्त्यं पदमिति**–समास आरभ्यते यैस्तानि पदानि समासारम्भकाणि, तेषु यच्चरमं पदं तदिह शास्त्रे उत्तरपदशब्देन व्यवह्रियत इत्यर्थः। अत एवाहुरन्ये–उत्तरपदशब्दो हि समासचरमावयवपदे रूढ इति। असति पूर्वस्मिन् पदे तस्योत्तरपदत्वं न सम्भवतीत्युत्तरपदशब्देन पूर्वपदमाक्षिप्यते 'येन विना यदनुपपन्नं तेन तदाक्षिप्यते' इति न्यायात्। उत्तरपूर्वादिपदार्थानां नियतावधिसाकाङ्क्षत्वात् यत्किञ्चिदपेक्षया पूर्वत्वमुत्तरत्वं च भवतीति पूर्वपदेनोत्तरपदमुत्तरपदेन पूर्वपदमाक्षिप्यते, व्याप्यव्यापकभावसम्बन्धेनानुमीयत इति यावत्। तस्यैव विशेषणत्वेन **नाम्येकस्वरादि**ति पठ्यते, तत्र नामीति पदमवर्णरहितस्वरबोधकम्, तस्य चैकस्वरेति विशेषणं व्यर्थमेवेति द्वयमप्याक्षिप्तस्य पूर्वपदस्यैव विशेषणम्, नामिपदं च तदन्तबोधकं "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया; एकस्वरपदं बहुव्रीहिणा समुदायबोधकमिति न तत्र तदन्तविधिरसंभवात्, एवं च यः सूत्रार्थः सम्पन्नस्तमाह——**नाम्यन्तादेकस्वरादि**त्यादिना। खितः प्रत्ययाः ख–खश्–खिष्णु–खुकञ्–प्रभृतयः "क्षेमप्रिय०" [ ५. १. १०५. ] इत्यादिना कृत्सु वक्ष्यन्ते, तदन्तं यदुत्तरपदं तस्मिन् परतः, तत्र च कुम्भकार इत्यादाविवोपपदसमासाद् "ऐकार्थ्ये" [ ३. २. ८. ] इत्यमो द्वितीयैकवचनस्य लुप् प्राप्नोति, तस्य निषेधोऽनेन विधीयते, तथा च तच्छ्रवणं तन्निमित्तककार्यान्तरप्रवृत्तिश्च भवति। अत्र यद्यपि खितीत्युत्तरपदे इति सप्तम्यन्तस्य विशेषणमिति "सप्तम्या आदिः" [ ७. ४. ११४. ] इति परिभाषया तदादिग्रहणात् खिदादावुत्तरपदे इत्यर्थः प्राप्नोति, तथापि खिदादेरुत्तरपदस्यासंभवेन न तदादिबोध इति बोध्यम्।

अथ विगृह्योदाहरति——**स्त्रीं स्त्रियं वात्मानं मन्यते** इति विग्रहः, "वाम्शसि" [ २. १. ५५. ] इतीयादेशविकल्पेन रूपद्वयम्, अत एव समासेऽमो लुबभावेऽपि रूपद्वयं भवतीत्याह——**स्त्रींमन्यः, स्त्रियंमन्यः** इति, अत्र "कर्तुः खश्" [ ५. १. ११७. ] इति खश्, "ङस्युक्तं०" [ ३. १. ४९. ] इति च समासः। श्रियं भुवं नरं रायं गां नावं वात्मानं मन्यत इति विग्रहे क्रमेण **श्रियंमन्य** इत्यादिसमासाः, पूर्वपदभूताश्च श्री-भ्रू-नृ-रै-गो-नौशब्दा नाम्यन्ताः, एषु कृद्योगा षष्ठी न प्रवर्त्ततेऽमो लुब्निषेधेन तस्यैव प्रकृते श्रवणस्येष्टताऽवधारणात्। इत्थं पुंसः कर्त्तृत्वे उदाहृत्य यत्र क्लीबस्य प्रत्ययार्थत्वं तत्र समुदायस्य तत्प्राधान्यात् पूर्वपदस्याऽपि तल्लिङ्गतापत्त्या क्लीबनिमित्तककार्यं स्यान्नवेति व्यवस्थापयितुं शङ्कते–**अथ श्रियमात्मानं मन्यते** इत्यादिना, अयमाशयः——*अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा* इति न्यायेन न "नाम्येकस्वरात्" [ ३. २. ९. ] इत्यमो लुपः प्रतिषेधोऽनन्तरस्य "ऐकार्थ्ये" [ ३. २. ८. ] इति सूत्रेण प्राप्तस्यैव स्यात्, न तु बहुव्यवहितस्य "अनतो लुप्" [ १. ४. ५९. ] इति नपुंसकसम्बन्धिनोऽमो लुब्विधायकस्य, एवं च श्रियमात्मानं मन्यते यत् कुलमित्यर्थे कुलपरत्वेन श्रीशब्दस्य क्लीबत्वमिति तत्सम्बन्धिनोऽमो लप् स्यादेवेति।

"Aho Shrutgyanam"

उत्तरयति—**उच्यते** इत्यादिना, **श्रीशब्दस्यात्मसमानाधिकरणस्येति,** अयमर्थः—श्रियमात्मानं मन्यते यत् कुलमित्यर्थे श्रीशब्दस्य न कुलेन सह सामानाधिकरण्यमपि तु आत्मशब्देन सहेति तस्य च नपुंसकत्वाभावेन न नपुंसकनिमित्तस्य लुपः प्राप्तिरिति ऐकार्थ्यनिमित्तत्वादेव प्राप्तिः, सा चानेन प्रतिषिध्यत एव। ननु कथमिदमुच्यते, यावताऽत्रात्मशब्दः कुलवाचकत्वेनैवायात इति तस्य नित्यपुंस्त्वात् क्लीबताभावेऽपि तत्समानाधिकरणस्य श्रीशब्दस्य क्लीबत्वमवश्यं स्यादेवेति चेत् ? अत्राह—**आविष्टलिङ्गत्वाच्चे**ति, अयमाशयः—यथैवात्मशब्द आविष्टलिङ्गः–नित्यपुंलिङ्गः, तथा श्रीशब्दोऽपि नित्यस्त्रीलिङ्ग एवेति तस्य कुलसामानाधिकरण्येऽपि न क्लीबत्वमिति न तन्निमित्तोऽमो लुप् प्राप्तः।

भाष्यकृन्मतमाह—**अन्ये त्वाहु**रित्यादिना। प्रष्ठोऽग्रगामी, अग्रगमनस्य च स्वभावतः पुंधर्मत्वात् प्रष्ठशब्दो नित्यपुंलिङ्ग इति तस्यैव धवयोगनिमित्तकं स्त्रीत्वमुत्पाद्य प्रष्ठीति रूपं भवति, तथा च सम्बन्धविशेषमहिम्ना लिङ्गपरिवर्त्तनं भवति, तथेहापि भविष्यतीति श्रीशब्दः कुले वर्त्तमानः स्वकीयं स्त्रीलिंगं विहाय क्लीबे वर्त्तिष्यत इति क्लीबनिमित्तोऽमो लुक् स्यादेवेति नपुंसकत्वनिमित्तके ह्रस्वत्वेऽमो लुपि च कृते—श्रिमन्यं कुलमित्येवं रूपं युक्तमिति। ननु प्रकृतसूत्रेण सामान्यत एवामो लुब् निषिध्यते, ततश्च ऐकार्थ्यनिमित्तस्य क्लीबत्वनिमित्तस्य वा सर्वस्यामो लुपोऽनेन निषेधः स्यादेवेति चेत् ? अत्राह—**न चायमि**ति–अयं–प्रकृतसूत्रप्रतिपाद्यः, लोपस्यापवादो–निषेधः, नपुंसकलक्षणस्य लुपो न भवति, किन्तु ऐकार्थ्यनिमित्तस्यैव "ऐकार्थ्ये" [ ३. २. ८. ] इति सूत्रप्राप्तस्य, कुत इत्याह—**उत्तरपदग्रहणादि**ति–उत्तरपदशब्दस्य समासारम्भकेऽन्त्ये पदे निरूढतया तादृशस्थले प्राप्तस्यैवामो लुप् प्रतिषिध्यतेऽनेन, *अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा* इति न्यायादित्युक्तं पूर्वम्, अत्र च उत्तरपदग्रहणमपि कारणत्वेन निर्दिश्यते, तथा च *उत्सर्गसमानदेशा अपवादाः* इति न्यायोऽपीह नियामक इति विशिष्यते; "ऐकार्थ्ये" [ ३. २. ८. ] इति लुबपि समासादिस्थल एव प्रवर्त्तते, प्रकृतसूत्रमपि तादृशस्थल एवेति सिद्धमुभयोः समानदेशत्वम्। **नामिग्रहणं किमि**ति–सामान्यत एकस्वरादित्येवोच्यतामिति तदाशयः, तथा च बहुव्रीहिणा एकस्वरवतः स्वरान्ताद् व्यञ्जनान्ताद् वा प्रसक्तिरित्याह—**ज्ञंमन्य** इत्यादि, अत्र हि नामो लुप् प्रतिषिध्यतेऽपि तु "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [ ३. २. १११. ] इति, ह्रस्वे कृते मोऽन्तो भवति, अत्र नामिग्रहणाभावे त्वमो लुपः प्रतिषेधेन तद्व्यवधानात् खितीति ह्रस्वो न स्यात्, खिदन्तस्य विभक्त्या व्यवहितत्वात्, तथा च ज्ञांमन्यः क्ष्मांमन्य इति स्यात्; **वाग्मन्य** इत्यत्र तु वाचम्मन्य इति स्यात्। अस्तु तर्हि नाम्यन्तादित्येवैकस्वरादिति व्यर्थमिति पृच्छति—**एकस्वरादिति किमि**ति। **हरिंमन्ये**ति–अत्रापि खितीति ह्रस्वसमुच्चितो मागमः। **वधुमन्ये**ति–अत्रापि पूर्वत्रेव ह्रस्वसमुच्चितोम् भवति, एकस्वरादिति कृतेऽत्तु न प्रकृतसूत्रप्राप्तिः। **खितीति किमि**ति–उत्तरपदमात्रं निमित्तकोटावस्त्विति भावः। **स्त्रीमानी**ति—स्त्रियमात्मानं मन्यत इत्यर्थेऽत्र "मन्याण्णिन्" [ २. १. ११६. ] इति णिन् भवति, तत्रापि समासो भवत्येवेत्युत्तरपदसत्त्वेऽपि खिदन्तत्वाभावान्न भवति ॥ ३. २. ९॥

## असत्त्वे ङसेः । ३. २. १० ॥

**त० प्र०—असत्त्वे विहितो यो ङसिः तस्योत्तरपदे परे लुप् न भवति। स्तोकान्मुक्तः, अल्पान्मुक्तः, कृच्छ्रान्मुक्तः, कतिपयान्मुक्तः, अन्तिकादागतः, अभ्याशादागतः, सविधादागतः, दूरादागतः, विदूरादागतः, विप्रकृष्टादागतः, "क्तेनासत्त्वे" [ ३. १. ७४. ] इति समासः। असत्त्वे इति किम् ? स्तोकभयम्, स्तोकापेतः। उत्तरपद इत्येव–निष्क्रान्तः स्तोकान्निःस्तोकः ॥ १० ॥**

**श० म० न्यासानुसन्धानम् असत्त्वे०। असत्त्वे विहित** इति–"स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे" [ २. २. ७९. ] इति सूत्रेण,तथा "असत्त्वारादर्थात् टाङसिङ्यम्"[२.२.१२०.] इति सूत्रेण च विहित इति भाव; **'स्तोकान्मुक्तः'** इत्यादावाद्येन **'अन्तिकादागतः'** इत्यादौ द्वितीयेन पञ्चमी, तदन्तस्य च क्तान्ते परे "क्तेनाऽसत्त्वे" [ ३. १. ७४. ] इति समासः, तत ऐकार्थ्यनिमित्तो लुप् प्राप्तः सोऽनेन निषिध्यते। तदेवाह—**तस्योत्तरपदे लुब् न भवती**ति। यद्यपि सर्वत्र समासे वाक्यमपि भवतीति समासाभावे स्तोकान्मुक्त इत्यादिरूपाणां सिद्धिः स्यादेव, ततश्चैतादृशे स्थले समासाभाव एव कार्यः किं समासोत्तरं प्राप्तस्य लुपोऽभावविधानेनेति स्थूलदृशां शङ्का सम्भवति, तथापि समासे सत्यैकपद्यं भवति, तत्र विशेषणयोगाभावश्च भवति। किञ्च ततस्तद्धितादिप्रत्ययविधाने प्रथमस्वरस्य वृद्धिर्भवति, तथा च "स्तोकान्मुक्तस्यापत्यं–स्तौकान्मुक्तिः, स्तोकान्मुक्ताया अपत्यं–स्तौकान्मुक्तेयः' इत्यादिषु समुदायादेव तद्धितोत्पत्तिः। न च समासनिमित्तैकार्थ्यनिमित्तस्य स्यादेरिदमादिसूत्रैर्लुब् निषिध्यतां, तद्धितनिमित्तैकार्थ्ये जाते

"Aho Shrutgyanam"

च पुनः स लुप्यतामिति शङ्क्यम्, पूर्वसूत्रप्राप्तस्यानेन निषेधः, स च समासनिमित्तैकार्थ्यमाश्रित्य तद्धितनिमित्तैकार्थ्यमाश्रित्य वा भवतु, तत्र न पुनः शास्त्रव्यापारप्रयोजनमित्याश्रयणात्। अथवाऽस्तु तद्धितनिमित्तमैकार्थ्यं किन्तु नैतदन्तर्गतो ङसिस्तन्निमित्तमित्यैकार्थ्यनिमित्तत्वाभावेन पुनर्लुपः प्राप्तिरेव नेति कुतः पुनः प्रतिषेधावश्यकता। किञ्चानेन केवलं ङसेरेव लुपो निषेधे द्विवचनान्तेन विग्रहे स्यादेर्लुप् स्यादेवेति स्तोकमुक्त इत्येव तत्र प्रयोग इति न भ्रमितव्यम्, ङसिमात्रस्य लुपो निषेधेनाचार्यस्य द्विवचनान्तेन सह समासो न भवतीत्यत्रैव तात्पर्यविधारणात्; तथा च स्तोकाभ्यां मुक्त इत्यादिविग्रहे वाक्यमेव तिष्ठति न समासो भवति, स्पष्टं चेदं काशिकादौ। **असत्त्व इति किमि**ति—सीदतोऽस्मिल्लिङ्गसंख्ये इति सत्त्वं द्रव्यम्, तथा च गुणोपसर्जनाः स्तोकादयः सत्त्ववचना भवन्ति, तेभ्यश्च नासत्त्वे ङसिर्विधीयते, ततश्च स्तोकाद् विषाद् भयमित्यादितात्पर्येण विषादिपरात् स्तोकशब्दाद् भयशब्दयोगे पञ्चमी भवति, तदन्तस्य च समासे सति नानेन लुपो निषेधः। एवं **स्तोकापेतः** इत्यत्रापि स्तोकशब्दः स्तोकत्वगुणोपसर्जनद्रव्यवचन एवेति तत्रापादानपञ्चम्या समासे नानेन लुपो निषेध इति। उत्तरपदानुवृत्तिं सार्थकयति—**उत्तरपद इत्येवे**ति। **निर्गतः स्तोकादि**ति—अत्र हि स्तोकशब्द एवोत्तरपदमिति तस्योत्तरपदपरत्वाभावान्न पञ्चम्या लुपः प्रतिषेधः, 'असत्त्वे' इत्यस्यानुक्तौ तु सर्वविधङसेर्लुबनेन प्रतिषिध्येतेत्युक्तप्रकारेषु सर्वत्र स्तोकाद्भयमित्याद्येव रूपं स्यात्, नहि तदिष्टमित्यसत्त्वे इत्यावश्यकमिति ॥३. २. १०॥

## ब्राह्मणाच्छंसी ।३।२।११॥

**त० प्र०—'ब्राह्मणाच्छंसी'इत्यत्र ङसेर्लुबभावो निपात्यते। ब्राह्मणाद् ग्रन्थादादाय शंसति–ब्राह्मणाच्छंसी, ब्राह्मणाच्छंसिनौ, ब्राह्मणाच्छंसिनः, रूढिवशादृत्विग्विशेष उच्यते। उपात्तविषयमेव तदपादानं, यथा—कुसूलात् पचति। निपातनस्येष्टविषयत्वादृत्विग्विशेषादन्यत्र लुप् भवति–ब्राह्मणशंसिनी स्त्री॥ ११ ॥**

श० म० न्यासानुसन्धानम्-ब्राह्मणा०। एकलक्ष्यमात्रविषयत्वात् सूत्रस्य निपातनपरत्वमेवेति प्रतीतावपि प्रकरणपरिशुद्ध्यर्थं विधेयांशमाह–**ङसेर्लुबभावः** इति। प्रयोगार्थमाह—**ब्राह्मणाद् ग्रन्थादि**ति–वेदोक्तानां मन्त्राणां कर्मसु **विनियोगप्रतिपादकः कर्मस्वरूपबोधकश्च** वेदभागो ब्राह्मणमित्याख्यायते, मन्त्र-ब्राह्मणयोर्वेदनामधेयमिति प्रसिद्धेः, तथा च ग्रन्थविशेषपरः एव ब्राह्मणशब्द इह गृहीत इति भावः। ब्राह्मणं स्वरूपतो न शंसति किन्तु तस्माद् ग्रन्थात् कमपि विषयमादाय शंसति योऽसौ ब्राह्मणाच्छंसी ऋत्विग्विशेषः, तस्य हि तादृशं व्रतं यज्ञकाले श्रुतमिति "व्रताभीक्ष्ण्ये" [५. १. १५७.] इति णिन्। दीक्षितस्तु–ब्राह्मणे [ग्रन्थे] विहितानि शस्त्राणि उपचाराद् ब्राह्मणानि, तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः, द्वितीयार्थे पञ्चमी उपसंख्यानादेव [निपातनादेव] इत्याह। तत्र 'प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्' इति याज्ञिकानां सम्प्रदाये व्यवहारः। तथा च ब्राह्मणशब्द इह ब्राह्मणग्रन्थप्रतिपादितस्तोत्रविशेषपरः, तस्य च शंसनक्रियाकर्मत्वमिति द्वितीया विभक्तिरेवोचिता, तथापि प्रकृतनिपातनपरसूत्रनिर्देशादेव द्वितीयार्थे पञ्चमी भवति। स्वमते च आदायेति क्रियापदमध्याहृत्य तां क्रियामपेक्ष्यापादानत्वं साधयति—**उपात्तविषयमेवे**ति—उपात्ता समीपोच्चारिता क्रियैव विषयो यस्य तथाभूतम्, आदायेति क्रियानिरूपितमेवेत्यर्थः, आदानं हि यस्माद् भवति तत् तस्यापादानं विश्लेषस्य सत्त्वात्। एतादृशमपादानं क्व प्रसिद्धमिति शङ्कामुदाहरणेन हरति—**यथा-कुसूलात् पचतीति**–कुसूलादुद्धृत्य तण्डुलं पचतीति विवक्षायामुद्धरणक्रियाविषयमपादानं यथा भवति तथैवेति भावः। लुबभाव एव विधेयो निपातनाश्रयणमनर्थकमित्याशङ्कायामाह–**निपातनस्येष्टविषयत्वादि**ति–निपातनेन हि तस्य लक्ष्यस्येष्टविषयत्वं विज्ञायते, तथा च ऋत्विग्विशेषपरत्वे एव ब्राह्मणाच्छंसिन्-शब्दः प्रयोक्तव्योऽन्यत्र ङसेर्लुबेव भवति, यथा—**ब्राह्मणशंसिनी स्त्री**ति, स्त्रिया ऋत्विक्कर्मानर्हत्वमिति तादृग्विशेषाभावबोधनायैव स्त्रीलिङ्गप्रयोगः, पुंस्यपि तद्विषये लुब् भविष्यत्येवेति ज्ञेयम् ॥३. २. ११॥

## ओजोऽञ्जःसहोम्भस्तमस्तपसष्टः। ३. २. १२॥

**त०प्र० एभ्यः परस्य टस्तृतीयैकवचनस्योत्तरपदे परे लुब् भवति। ओजसाकृतम्, अञ्जसाकृतम्, सहसाकृतम्, अम्भसाकृतम्, तमसाकृतम्, तपसाकृतम्; तपसाप्राप्तम्। कथं "सततनैशतमोवृतमन्यतः" इति [किराते]? उत्तरपदस्य संबन्धिशब्दत्वाद् यत्र पूर्वपदीभूतस्तमःशब्दस्तत्रायं निषेधः, यत्र तु पदान्तरेण समस्तस्तत्र न प्रतिषेधः। ट इति किम्?**

"Aho Shrutgyanam"

**ओजसो भावः—ओजोभावः। तमसो नेच्छन्त्येके, तपसोऽन्ये ॥ १२॥**

**श० म० न्यासानुसन्धानम्—ओजो०।** ओजः—आन्तरं बलम्, अञ्जः—सौकर्यम्, सहः—सहनसामर्थ्यं बलम्, अम्भस्-तमस्-तपांसि प्रसिद्धानि, एषां कर्तृत्वविवक्षायां करणत्वविवक्षायां वा तृतीया, कर्त्तरि षष्ठी तु न, "क्तयोरसदाधारे" (२. २. ९१) इति निषेधात्। "कारकं कृता" (३. १. ६८) इति समासे सति ऐकार्थ्यनिमित्तस्य स्यादेर्लुप् प्राप्तः, तस्यानेन निषेधः, एवं सर्वत्र। क्वचित् कविप्रयोगे लुब् दृश्यते, तत्संगतिः कथमिति शङ्कते—कथं "सततनैशतमोवृतम्" इति। किरातार्जुनीयकाव्ये इन्द्रकीलपर्वतवर्णनमिदम्—

"तपनमण्डलदीपितमेकतः,
सततनैशतमोवृतमन्यतः।
हसितभिन्नतमिस्रचयं पुरः
शिवमिवानुगतं गजचर्मणा॥"

(इति पूर्णं पद्यम्)

तदर्थश्च—कीदृशं पर्वतमिति प्रसङ्गे—एकतः सूर्याभिमुखभिन्नभागे, सततनैशतमोवृतं—'सर्वदा रात्रिकालिकान्धकाराच्छादितम्, अन्यतः—सूर्याभिमुखभागे, तपनमण्डलदीपितं—सूर्यबिम्बकृतप्रकाशम्। अत्रोपमामाह—पुरः अग्रे, हसितेन हासेन, भिन्नः तमिस्रचयः—अन्धकारसमूहो येन तादृशं, गजचर्मणा-पृष्ठभागस्थितगजासुरकृत्त्या, अनुगतं—सम्बद्धं शिवमिव, हासस्य स्वच्छतयाऽग्रे प्रकाशः, गजचर्मणः कृष्णतया पृष्ठभागेऽन्धकारो यथा शिवस्य भवति, तथाऽयमपि पर्वतोऽत्युच्चतया एकस्मिन् प्रदेश एव सूर्यकिरणयोगीति तत्र प्रकाशवान्, अन्यप्रदेशे च सूर्यकिरणासम्बन्धाद् रात्रिकृतान्धकारवानिति। अत्र तमसा वृतमिति विग्रहे तमोवृतमिति टो लुप् कथमिति शङ्का। समाधत्ते—**उत्तरपदशब्दस्य सम्बन्धिशब्दत्वादिति** उत्तरपदमवश्यं कस्मादप्युत्तरं भवितुमर्हति, तच्चावधिभूतं पूर्वपदमेव, तथा च पूर्वपदभूतस्यैव तमः-शब्दस्य सम्बन्धी टो लुप् निषिध्यतेऽनेन, अत्र च सततं नैशेन तमसा वृतमिति विग्रहे, तमःपदं मध्यमपदमिति पूर्वपदत्वाभावेन तत्सम्बन्धिनष्टो लुप् भवत्येवेति भावः-तदाह—**यत्र तु पदान्तरेण समस्तस्तत्र न प्रतिषेध** इति, अयमाशयः—अत्र हि समासत्रयम्, तथाहि—निशायां भवं नैशम्, नैशं च तत् तमो नैशतमः, सततं च नैशतमः-सततनैशतमः, सततनैशतमसा वृतं—सततनैशतमोवृतमिति, एवं च तमः-शब्द इहोत्तरपदमपि, न तु केवलं पूर्वपदमिति तत्सम्बन्धिनष्टो लुप् न भवति। अन्ये तु "वृत इति घञर्थे कप्रत्ययान्तः, तद्योगे च षष्ठीति षष्ठ्यन्तस्य समासोऽयं न तु तृतीयासमासः" इत्याहुः, तन्न रोचयामहे, तथा समासे पर्वतविशेषणत्वानुपपत्तेः, कप्रत्ययस्य घञर्थे विधानाद् भावप्रत्ययान्तत्वेन वरणपरत्वम्, तथा च नैशतमसो वृतो वरणमाच्छादनं यत्रेत्यर्थे विवक्षिते मत्वर्थीयेनापि भाव्यम्, अथवा नैशतमः वृतं यत्र तं नैशतमोवृतमिति बहुव्रीहिर्विधेयः। यद्यपि स्वमतेऽपि समाधानान्तरमेव मृग्यम्, यतः पदकार्ये प्रकृतिकार्ये च तदन्तविधेरिष्टत्वात् तमःशब्दान्तस्य पूर्वपदस्य सम्बन्धिनष्टो लुप् भवतीत्यर्थे प्रकृते लुब्निषेधो दुर्वार एव, न च तादृशतदन्तविधौ न मानमिति वाच्यम्, 'परमहृल्लेखः' इत्यादौ "हृदयस्य हृल्लासलेखाण्ये" (३।२।९४) इति सूत्रेण हृदादेशविधानेन पूर्वपदे तदन्तविधेरावश्यकत्वात्। तथा च कवीनां निरंकुशत्वमेव शरणं समासान्तरं वा विधेयम्। **ट इति किमि**ति तथा चेदं स्यादिलुबधिकार एव पठनीयं सूत्रम्, तस्यैव च निषेधो विधेयः, ओजआदीनां च कर्तृत्व-करणत्वयोरेव संभवात् तृतीयाया एव समासप्रवेशादिति प्रश्नाशयः। उत्तरयति-**ओजसो भाव** इति—न केवलं तृतीयान्तामेवैषां समासे प्रवेश ओजो-भावादिलक्ष्येषु षष्ठ्यन्तस्यापि प्रवेशात् तस्या अपि (षष्ठ्या अपि) लुप् प्रतिषिध्येतेति समाधानाशयः। **तमसो नेच्छन्त्येके** इति, तथा च तमसा वृतमित्यादि तेषां मते व्यस्तप्रयोग एव, न समस्तः। **तपसोऽन्ये** इति—एतच्च पाणिनीयमतम्, तथाहि—तदीयं सूत्रम् "ओजःसहोऽम्भस्तमसस्तृतीयायाः" (६।३।३) इति, अत्र तपोग्रहणं न दृश्यते, तन्मते च तपसा कृतमित्यादिप्रयोगा व्यस्ता एव। किमत्र युक्तमिति लक्ष्यैकचक्षुष्कैरेव निर्णेयमिति॥३.२.१२॥

## पुं-जनुषोऽनुजाऽन्धे। ३. २. १३॥

**त० प्र०—पुम्स्शब्दाज्जनुःशब्दाच्च परस्य टावचनस्य यथासंख्यमनुजशब्देऽन्धशब्दे चोत्तरपदे परे लुब् न भवति। पुंसा करणेनानुजः—पुंसानुजः, जनुषा जन्मनाऽन्धः, जनुषान्धः, अविकृताक्षो जात्यन्ध उच्यते। अन्ये तु जतुःशब्दात्तकारश्रुतेरिच्छन्ति। ट इत्येव—पुमांसमनुजाता पुमनुजा॥ १३॥**

**श० म० न्यासानुसन्धानम्—पुञ्जनु०।** पूर्वोत्तरपदयोः समसंख्याकतया संख्याक्रमेणैव सम्बन्ध इत्याह—**यथासंख्यमनुजशब्देऽन्धशब्दे चेति**—पुंशब्दात् पूर्वपदात् परस्य टा-

"Aho Shrutgyanam"

वचनस्यान्धशब्दे उत्तरपदे लुप् नेति भावः । पुंसोऽनुजेन सह सम्बन्धे कथं तृतीयेति शङ्कामपाकुर्वन्नाह **पुंसा करणेने**ति—अनुजत्वे पुंसः करणत्वविवक्षया तृतीया भविष्यतीति भावः । योऽसौ पुमान् पूर्वं जातस्तेनैवास्यानुजत्वं कृतमिति तात्पर्यात् । जनुःशब्दस्य "जनुर्जननजन्मानि" इति कोशाज्जन्मपर्यायत्वमित्याह–'**जनुषा जन्मने**ति । **अविकृताक्ष** इति–यो जन्मना दृक्शक्तियुक्तः केनचिदक्षिविकारेणान्धतां याति, नासौ जनुषान्धः कथ्यते तस्य विकृताक्षत्वात्, यश्च जन्मनैव दृक्शक्तिहीनो भवति स एवमुच्यत इति भावः । **अन्ये तु जतुशब्दादि**ति लेखकप्रमादात् क्वापि जनुशब्दनकारस्तकारत्वेन श्रुत इति जतुनान्ध इति तन्मते रूपम्, किन्तु नकारे तकारभ्रमसत्त्वेऽपि जनुषइति षघटितपाठेन तन्निवृत्तिसंभवान्न जतुशब्दात् परस्य टो लुपो निषेधसंभव इति ज्ञेयम् । **ट इत्येवे**ति—न तु स्यादिमात्रस्येत्येवकारार्थः । व्यावर्त्यमाह—**पुमांसमनुजाते**ति—साप्यादपि—"[ ५. १. ९ ] इति कर्तरि क्ते कर्मणि द्वितीयेति तदन्तस्य समासे स्यादेर्लुब् भवत्येवेति ।।३.२.१३.।।

## आत्मनः पूरणे । ३. २. १४ ।।

**त० प्र०–आत्मनः परस्य टावचनस्य पूरणप्रत्ययान्ते उत्तरपदे परे लुप् न भवति । आत्मनाद्वितीयः, आत्मनातृतीयः, आत्मनाचतुर्थः, आत्मनापञ्चमः, आत्मनाषष्ठः, आत्मनैकादशः, पूर्वादित्वात् समासः । कथं 'जनार्दनस्त्वात्मचतुर्थ एव'इति ? आत्मा चतुर्थोऽस्येति बहुव्रीहिः ।। १४ ।।**

**श०. म०. न्यासानुसन्धानम्–आत्मनः०** । पूरणशब्देन पूरणार्थप्रत्यय उच्यते, केवलस्य पूरणार्थप्रत्ययस्य चोत्तरपदत्वासंभवेन पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थो लभ्यते । अन्यथा "हृदयस्य हृल्लासलेखाण्ये" [ ३. २. ९४. ] इति सूत्रे लेखग्रहणेन 'उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्' इति ज्ञापनादिह पूरणार्थप्रत्ययान्त–इति नार्थो लभ्येत, तथा च सूत्रवैयर्थ्यापत्त्यैव तन्न्यायबाध इति विज्ञेयम् । वस्तुतस्तु यत्र प्रत्ययस्य स्वरूपेण ग्रहणं तत्रैवोक्तन्यायप्रवृत्तिर्ज्ञापकसाजात्यादिति नात्र तत्प्रवृत्तिरिति पूरणार्थप्रत्ययान्ते इत्यर्थो निर्बाध एव । **आत्मना द्वितीय** इति—अत्र करोतिक्रियापेक्षमात्मनः करणत्वमिति करणे तृतीया, आत्मना कृतो द्वितीय इत्यर्थावगमात्, अथवाऽत्राभेदे तृतीया, यथा–प्रकृत्या चारुरित्यादौ, तथाहि सूत्रम्–"यद्भेदैस्तद्वदाख्या" [२.२.४६] इति, गम्यमानापि क्रिया कारकविभक्तीनां प्रयोजिकेति स्वीकारात् करोतिक्रियाध्याहारेण कारकविभक्तिरेवैषेति पूर्वोक्तसमाधानमेव चारु । एषु सर्वत्र 'पूर्वादित्वात् समासः' इति वृत्त्युल्लेखादपि कारकविभक्तित्वमेव न्याय्यम्, अभेदे तृतीयापक्षे च बाहुलकात् समासः साधनीयः स्यादिति गौरवम् । क्वचित् पूरणप्रत्ययान्तेऽपि कविभिर्लुप् प्रयुज्यते, तदसंगतिं शङ्कते—कथं **"जनार्दनस्त्वात्मचतुर्थ एव"** इति, अयमाशयः–पाञ्चरात्रमते चतुर्व्यूहो विष्णुः, जनार्दनसंकर्षण-प्रद्युम्नाऽनिरुद्धात्मको विष्णुः, तत्र संकर्षणादयस्त्रयस्तस्य व्यूहा जनार्दनस्तु स्वरूपमेवेति पौराणिकसम्प्रदायप्रसिद्धिरिह वर्णिता, जनार्दनस्त्वात्मनैव चतुर्थ इत्यर्थात्, तत्रात्मना चतुर्थ इति विग्रहे लुप् न युक्तेति प्रश्नाशयः । **समाधत्ते आत्मा चतुर्थोऽस्येति बहुव्रीहिरि**ति, तथा च न तृतीयासमास इति न दोषः । यद्यपि बहुव्रीहौ वर्तिपदार्थभिन्नेनान्यपदार्थेन भाव्यमिह च य एव वर्तिपदार्थो जनार्दनः [तस्यैवात्मशब्दाभिधेयत्वात्] स एवान्यपदार्थोऽपि तस्यैव समासप्रतिपाद्यत्वादिति न बहुव्रीहिसम्भव इत्याशङ्का समुदेति, तथापि एकस्मिन्नप्युपाधिभेदेन परिकल्पितस्य भेदस्य शिलापुत्रकस्य शरीरमित्यादौ प्रसिद्धत्वात्, इहापि चतुष्टयात्मकस्य तस्यान्यपदार्थत्वं जनार्दननाम्ना ख्यातस्य व्यूहस्य च वर्तिपदार्थत्वमिति भेदकल्पनसंभवान्न कापि शंकेति विज्ञेयम्, एवम्भूतस्थले सर्वैरपि तथैव समाधानादिति ।। ३. २. १४. ।।

## मनसश्चाऽऽज्ञायिनि । ३. २. १५ ।।

**त० प्र० मनःशब्दादात्मशब्दाच्च परस्य टावचनस्याऽऽज्ञायिन्युत्तरपदे परे लुप् न भवति । मनसा ज्ञातुं शीलमस्य मनसाज्ञायी, एवमात्मनाज्ञायी । आत्मनो नेच्छन्त्येके ।। १५ ।।**

**श० म० न्यासानुसन्धानम्– मनस०** । आज्ञातुं शीलमस्येत्यर्थे आङ्पूर्वकात् ज्ञाधातोः "अजातेः शीले" [ ५. १. १५४ ] इति णिनि आज्ञायीति, चकारेण पूर्वसूत्रोक्त आत्मशब्दोऽनुकृष्यते, ततश्च योऽर्थः सम्पन्नस्तमाह—**मनःशब्दादि**त्यादिना । अनेन लुपि निषिद्धेऽपि सकारस्याकारेण योगाद् रूपे विशेषाभावाल्लुप् कुतो निषिध्यत इति न शङ्कनीयम्, लुपि सति प्रत्ययलक्षणेन पूर्वस्य पदत्वात् पदान्तस्य सस्य रुत्वे "रोर्यः" [१. ३. २६.] इति यत्वे यलोपे च मनआज्ञायीति रूपापत्तेः । उदाहरति—**मनसाऽऽज्ञातुमि**ति—मनसैवाज्ञापयति न तु वचः प्रयुङ्क्ते यः

"Aho Shrutgyanam"

सोऽनेन शब्देनाभिधीयते । एकं विग्रहं प्रदर्श्यान्यत्र तमतिदिशति—**एवमात्मनाज्ञायी**ति । मतान्तरमाह—**आत्मनो नेच्छन्त्येके** इति, पाणिनेर्मतमिदम् , तथाहि तदीयः सूत्रक्रमः—"मनसः संज्ञायाम्," [ पा० सू० ६. ३. ४. ] "आज्ञायिनि च" [ पा० सू० ६. ३. ५. ] मनस इत्येवेति व्याख्यातारः, ततः "आत्मनश्च" [ पा० सू० ६. ३. ६. ] पूरण इति वक्तव्यमिति वार्त्तिकमिति, एवं च "आज्ञायिनि च" इति सूत्रे आत्मशब्दासम्बन्धः स्पष्टः । स्वमते तु आत्मशब्दस्यापि पूर्वसूत्रादनुकर्षणमिष्टमिति भावः । अत्र च तथा लक्ष्यदर्शनमेव हेतुः, सति च तथा लक्ष्यदर्शने तत्रापि 'आत्मनश्च' [ पा. सू. ६. ३. ६. ] इति सूत्रे चकारेण 'आज्ञायिनि' इत्यस्यापि सम्बन्धः शक्यते कर्तुम्, किन्तु तद्व्याख्यातृपतञ्जल्यादिभिस्तथा न व्याख्यातम् । आचार्यैस्तथालक्ष्यदर्शनं कृतमिति स्पष्टमेव सूत्रं तद्व्याख्यानं च कृतमिति ॥ ३. २. १५. ॥

## नाम्नि । ३. २. १६ ॥

**त० प्र० मनसः परस्य टावचनस्योत्तरपदे परे नाम्नि संज्ञायां विषये लुप् न भवति । मनसादेवी, मनसागुप्ता, मनसादत्ता, मनसासंगता, एवंनामा काचित् । नाम्नीति किम् ? मनोदत्ता कन्या ॥ १६ ॥**

**श० म० न्यासानुसन्धानम्, नाम्नि०** । आज्ञायिनीति न सम्बध्यते योगविभागसामर्थ्यात् आत्मशब्दोऽपि न सम्बध्यते *चानुकृष्टं नोत्तरत्र* इति न्यायात् । तथा चोत्तरपदे इत्येव निमित्तमिति नोत्तरपदविशेषप्रतिबन्ध इति प्रसिद्धानि नामान्युदाहरति **मनसादेवी**त्यादिना, अयं च स्त्रियां प्रयोगो न तु णिनन्तः, तथा च मनसा दीव्यादित्याशास्यमानेत्यर्थे "तिक्कृतौ नाम्नि" ( २५. १. ७१ ) इति सूत्रसहकारेण लिहादित्वादचि देवशब्दे निष्पन्ने गौरादित्वान्ङीः "कारकं कृता" (३१. ९.६८.) इति समासे स्यादेर्लुपि प्राप्तेऽनेन निषेधः । **मनसागुप्ते**त्यादौ च भूते क्तान्तेन सह स एव समासः, शेषं पूर्ववत् । संज्ञात्वं स्पष्टयति **एवंनामा काचिदि**ति-नाममात्रं श्रूयते न तु संज्ञिनी विशिष्य परिचीयत इति भावः । **नाम्नीति किमि**ति-"अन्यत्रापि" इति सामान्येनैव विधीयतां सूत्रमिति भावः, न तु सूत्रमेव किमर्थमिति, मनसादेवीत्यादीनामसिद्धयापत्तेः । **मनोदत्ते**ति मनसैव कस्मैचन वराय दत्ता, न तु वाचा तद्दानं प्रकाशितमिति तदभिप्रायः, इह च टावचनस्य लुबिष्ट एव, सति सामान्यसूत्रे स न स्यादिति नाम्नीति विधेयमेव । न चेदं नामापि तु यौगिकः शब्दो विशेषणार्थं प्रयुज्यत इति न निषेधो भवतीति भावः ॥ ३. २. १६. ॥

## पराऽऽत्मभ्यां ङेः । ३. २. १७ ॥

**त० प्र० परा-ऽऽत्मशब्दाभ्यां परस्य ङेश्चतुर्थ्येकवचनस्योत्तरपदे परे नाम्नि विषये लुप् न भवति परस्मैपदम्, परस्मैभाषा; आत्मनेपदम्, आत्मनेभाषा; "तादर्थ्ये" [ २. २. ५४. ] चतुर्थी, हितादित्वात् समासः । नाम्नीत्येव—'परहितम् आत्महितम् । कथं परहितो नाम कश्चित् ? नेयमनादिसंज्ञा । १७ ॥**

**श० म० न्यासानुसन्धानम् परा०** । नाम्नीति पूर्वसूत्रे आत्मशब्दसम्बन्धस्य विच्छिन्नत्वादिह पुनरात्मशब्द उपात्तः । **ङेरि**ति षष्ठ्येकवचने रूपं, तच्च चतुर्थ्येकवचन-सप्तम्येकवचनयोः साधारणमिति कस्येह ग्रहणमिति सन्देहमपाकुर्वन्नाह चतुर्थ्येकवचनस्येति, एतच्च क्रमन्यायतोऽपि लब्धम्, पूर्वत्र टस्तृतीयैकवचनस्यालुब्विधानात् क्रमप्राप्तस्यैव चतुर्थ्येकवचनस्य ग्रहणमि भावः । परस्मैपदमिति परस्मै पद्यते प्रयुज्यत इति परस्मैपदम्, उभयपदिनो धातोः कर्तृगामिनि क्रियाफले आत्मनेपदं विधीयते, परिशेषात् परगामिनि क्रियाफले परस्मैपदं भवति एवं विधिसूत्रानुरोधादेवैतयोः परस्मैपदात्मनेपदसंज्ञे अन्वर्थे भवतः । परस्मैपदस्यैव परस्मैभाषेति यौगिकी संज्ञा, आत्मनेपदस्य **चात्मनेभाषे**ति । अत्र च चतुर्थीनिमित्ततया प्रसिद्धस्य सम्प्रदानत्वस्यादर्शनात् कथं चतुर्थीति शङ्कामपाकुर्वन्नाह **"तादर्थ्ये" चतुर्थी**ति तादर्थ्यं चेह तस्मै प्रयुज्यमानत्वमेव । **हितादित्वात् समास** इति "हितादिः" (३. १. ७१.) इति सूत्रेणेति शेषः । नाम्नीति पूर्वसूत्रसम्बन्धस्यावश्यकत्वमित्याह **नाम्नीत्येवे**ति तद्व्यावर्त्यमाह-**परहितमि**त्यादि,इदं च विशेषणत्वेन प्रयुज्यते तत्र न चतुर्थ्येकवचनस्यालुबिष्ट इति भावः । क्वचिन्नाम्न्यपि न भवत्यलुप्, तत् कथमिति शङ्कते-**कथं परहितो नाम कश्चिदि**ति अत्र नामत्वे सत्यपि कथं नालुबिति शङ्कार्थः । उत्तरयति-**नेयमनादिसंज्ञे**ति-अनादिकालविज्ञातैव संज्ञेह संज्ञाशब्देन गृह्यते, आधुनिकसङ्केतस्य च संज्ञात्वेन ग्रहणेऽनवस्था स्यात्, पुरुषेच्छाया अनियतत्वेन संज्ञानामानन्त्यापत्तेः । यद्यपि परस्मैपदमित्याद्यपि नानादिसंज्ञा, तादृशसंज्ञायाः तत्तत्क-

"Aho Shrutgyanam"

त्कर्तृविशेषकृतत्वस्य प्रसिद्धत्वात् तथापि तत्तद्व्याकरणादिकर्तृभिर्नेयं संज्ञा स्वकल्पिता कृताऽपि तु अनादिपरम्पराप्राप्तैव स्वीकृतेति न दोषः, दृश्यते हि पाणिन्यादितोऽपि पूर्वतरेऽग्निपुराणादौ तदुल्लेखः । अन्ये वैयाकरणास्तु वैयाकरणाख्यायामेव परात्मशब्दाभ्याम्परस्य चतुर्थ्येकवचनस्यालुपमाहुः; तथाहि-पाणिनीये सूत्रे 'वैयाकरणाख्यायां चतुर्थ्याः' (पा. सू. ६. ३. ७.) आत्मन इत्येव "परस्य च" (पा. सू. ६. ३. ८.) इति । अत्र यद्यपि परस्मैपदात्मनेपदशब्दयोरेव वैयाकरण–(व्याकरणे-सूत्ररूपे भवा संज्ञा) संज्ञात्वेन प्रसिद्धिः, तथा च 'परस्मैभाषा आत्मनेभाषा' इति शब्दयोर्न तादृशसंज्ञात्वमिति तत्र नालुप् प्राप्नोति, तथापि वैयाकरणानामाख्या वैयाकरणाख्येति विग्रहेणान्यत्रापि वैयाकरणैः संज्ञात्वेन व्यवहृतानां वैयाकरणाख्यात्वं भवति, दृश्यते च 'परस्मैभाषा, आत्मनेभाषा' इति पदयोरपि तत्र तत्र धातुपाठादौ संज्ञात्वेन व्यवहारः । सर्वमिदं प्रकृतसूत्रयोः महाभाष्य-कैयटादिषु स्पष्टीकृतम्, तथा च तन्मते परहितो नाम कश्चिदित्यादौ न दोषाशङ्का । स्वमते तु नामत्वेनानादिनाम्न एव ग्रहणमिति व्याख्याने क्षत्यभावादेव परहिताद्याधुनिकनाम्नां व्यावृत्तिसिद्धौ लाघवानुरोधेन वैयाकरणाख्याया विशिष्य ग्रहणं न कृतम्, तत्रैव चेदृशानां शब्दानामनादिसंज्ञात्वेनातिप्रसङ्गाभावात्, भवति हि तेषां विशिष्य तादृशसंज्ञाग्रहणे गौरवमिति ॥ ३. २. १७.॥

## अद्-व्यञ्जनात् सप्तम्या बहुलम् । ३. २. १८

**त० प्र० अकारान्ताद् व्यञ्जनान्ताच्च परस्याः सप्तम्या बहुलं लुप् न भवति, नाम्नि विषये । अदन्त–अरण्येतिलकाः, अरण्येमाषकाः, वनेकशेरुकाः, वनेबल्वजाः, वनेकिंशुकाः, वनेहरिद्रुकाः, कूपेपिशाचिकाः, पूर्वाह्णेस्फोटकाः, मध्याह्नेस्फोटकाः; व्यञ्जन–युधिष्ठिरः । बहुलवचनात् क्वचिद् विकल्पः–त्वचिसारः, त्वक्सारः; क्वचिद् भवति–जलकुक्कुटः, ग्रामसूकरः । अद्व्यञ्जनादिति किम् ? भूमिपाशः, नदीकुक्कुटिका । नाम्नीत्येव–'तीर्थकाकः, नगरवायसः, अक्षशौण्डः । कथं गविष्ठिरः ? बिदादिपाठात्, गवि-युधेः स्थिरस्य" । [ २. ३. २५. ] इति निर्देशाद् वा भविष्यति । नन्वन्तरङ्गत्वादवादेशे कृते व्यञ्जनान्तत्वादेव सिद्धं, किं बिदादिपाठाश्रयणेन ? नैवम्–*अन्तरङ्गानपि हि विधीन् बहिरङ्गाऽपि लुप् बाधते * इत्युक्तम्, अन्यथा नदीकुक्कुटिकादिष्वप्यन्तरङ्गत्वाद्यत्वे सत्यलुप् प्रसज्येतेति ॥ १८ ॥**

**श० म० न्यासानुसन्धानम्–अद्व्यञ्जनात्० ।** अच्च व्यञ्जनं चेत्यनयोः समाहारः, तस्मात्, एतच्च विशेषणपदम्, सप्तमीसम्बन्धयोग्यं च नाम समाक्षिप्तं विशेष्यम्, "विशेषणमन्तः" (७. ४. ११३. ) इति परिभाषया तदन्तविज्ञानादकारान्ताद् व्यञ्जनान्ताच्चेत्यर्थलाभः, यद्यपि समाहारनिर्दिष्टस्य समुदितरूपेणैव विशेषणत्वमुचितं तथापि एकस्य नाम्नोऽकारान्तत्वव्यञ्जनान्तत्वयोरसंभवात् प्रत्येकस्य विशेषणत्वमवसीयते । क्रमश उदाहर्तुमवतारयति **अदन्तेति** अत्र-स्वरूपनिर्देशमात्रमुचितम्, अपदं न प्रयुञ्जीतेति निषेधस्तु क्रियाकारकादिसम्बन्धप्रतिपिपादयिषया प्रयुज्यमानशब्दविषयः, दृश्यते च भाष्यकारादीनामपीदृशनिर्देशस्थले निर्विभक्तिक एव प्रयोगः । **अरण्ये तिलकाः** इति–विग्रहवाक्यमपीदृशमेव, संज्ञात्वात् समासो नित्य इति त्वन्यत्, "नाम्नि" ( ३. १. ९४.) इति समासः; एवं सर्वत्र । व्यञ्जनान्तमुदाहरति–**युधिष्ठिरः** इति–पूर्ववत् समासे सप्तम्या अलुपि "भवियुधः स्थिरस्य" (२.३.२५) इति षत्वम् । एषु नित्यमेवालुप् । बहुलवचनस्य प्रयोजनमाह–बहुलवचनात् क्वचिद् विकल्प इति ।

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद् विभाषा क्वचिदन्यदेव ।"

इति बाहुलकफलस्याभियुक्तैरुक्तत्वादिति भावः । **त्वचिसारः** इति–बहुव्रीहिरयं व्यधिकरणः, उभयथापि प्रयोगदर्शनाद् विकल्प इष्टः, अन्यथा नाम्नः स्वरूपभेदानौचित्यान्नित्यमेवालुप् स्यात् । क्वचिन्नाम्न्यपि सूत्राप्रवृत्तिं बाहुलकलभ्यामाह–**क्वचिद् भवती**ति–लुबिति शेषः । क्वेत्याह–**जलकुक्कुटः, ग्रामसूकरः** इति जले कुक्कुटः, ग्रामे सूकर इति विग्रहमभिप्रेत्येदम्, यदि च सम्बन्धसामान्यविवक्षायां षष्ठीमाश्रित्य समासो विधीयते तर्हि नायमेतत्सूत्रविषयः । न चैवम् 'अरण्येतिलकाः' इत्यादावपि षष्ठीसमासे कृतेऽरण्यतिलका इत्यपि स्यादिति वाच्यम्, तत्र तेनैव रूपेण संज्ञात्वात् कामचाराभावात्, इह च संज्ञास्वरूपे विभक्तेरश्रूयमाणत्वेन प्रकृतसूत्रानुरोधेन षष्ठीसमासेनापि समाधातुं शक्यत्वादीदृशविचारोल्लेखः, किन्तु आचार्यवचनप्रामाण्यात् सप्तमीसमासस्यैव स्वीकर्तुमौचित्यमित्यन्यत् । नाम्नीति सम्बन्धस्यावश्यकत्वमाह–



"Aho Shrutgyanam"

**नाम्नीत्येवे**ति। व्यावर्त्यमाह--**तीर्थकाकः** इति--तीर्थे काक इवेति विग्रहः। "काकाद्यैः क्षेपे" (३.१.९०.) इति समासः, संज्ञात्वाभावात् प्रकृतसूत्राप्रवृत्त्या सप्तम्या लुप्, नाम्नीत्यस्यासम्बन्धे तु सा न स्यात्। नगरवायसः इत्यत्रापि स एव समासः। **अक्षशौण्डः** इति—अक्षेषु शौण्ड, इति विग्रहः, "सप्तमी शौण्डाद्यैः" (३.१.८८.) इति समासः, अत्रापि संज्ञात्वाभाव एवेति भवत्येव लुप्। **सप्तम्या इति कि**मिति--नाम्नि सप्तम्यन्तस्यैव विशिष्य संज्ञाविधानात् सप्तम्या इत्यस्याभावेऽपि न क्षतिरिति शङ्काशयः, यद्यपि "नदीभिर्नाम्नि" (३.१.२७.) इत्यनेनापि संज्ञायां समासो विधीयते, तथापि तत्र विभक्त्यन्तस्योत्तरपदत्वेनोत्तरपदपरत्वाभावान्न दोष इति तदभिप्रायः। प्रत्युदाहरति--**गौरखरः** इति, अयमाशयः--नेह नाम्नि विहितः समासो निमित्ततयाऽऽश्रीयतेऽपि तु समस्तस्य नामत्वमाश्रितमिति लक्षणप्रतिपदोक्तन्यायावसराभावात् नाम्नि विहितसमासस्यैव ग्रहणमिति नियन्तुमशक्यत्वात्, इह **गौरखरः** इत्यादौ विशेषणसमासेऽपि नामत्वस्य सत्त्वात् प्रथमायाः पूर्वपदस्थाया अलुप् स्यात्, तन्माभूदिति सप्तमीग्रहणमावश्यकम्। अन्यत्रापि प्रवृत्तिं शङ्कते--**कथं गविष्ठिरः** इति -- गोशब्दस्याकारान्तत्व-व्यञ्जनान्तत्वयोरभावेऽपि कथमत्र सप्तम्या अलुबिति शङ्कार्थः। द्विधा निपातनमाश्रित्योत्तरयति--**बिदादित्वादित्या**दिना, बिदादिगणे गविष्ठिरशब्दस्य पाठात् सप्तम्यलुप् निपात्यतेऽथ च "गवियुधेः स्थिरस्य" (२.१.२५.) इति सूत्रे गवीत्यतः परस्य स्थिरस्य षत्वविधानश्रुतेः सप्तम्या अलुबिति भावः। अन्यथापि प्रकृतप्रयोगसिद्धिं शङ्कते--**नन्वन्तरङ्गत्वादि**ति-पदद्वयसम्बन्धनिमित्तकैकार्थ्याश्रिता विभक्तिलुप् बहिरङ्गा, एकपदनिष्ठवर्णद्वयाश्रितोऽवादेशोऽन्तरङ्ग इति असिद्धं बहिरङ्गमन्तरङ्गे इति न्यायात् पूर्वमवादेशे व्यञ्जनान्तत्वसम्पत्त्या प्रकृतसूत्रप्रवृत्तौ बाधकाभावात् न्यायसिद्धैवालुबिति बिदादिपाठसामर्थ्याश्रयणमनावश्यकमिति शङ्काशयः। न्यायान्तरविरोधेनोत्तरयति--**नैव**मित्यादिना, तथा च लुपः प्राबल्येन पूर्वमेव प्रवृत्तिरिति तदवस्थायां व्यञ्जनान्तत्वाभावान्न प्रकृतसूत्रप्राप्तिरिति निपातनाश्रयणमावश्यकमिति भावः। लक्ष्यानुरोधात् प्रकृते अन्तरङ्गानपीति न्यायानाश्रयणमिति कथने दण्डमाह--**अन्यथा नदीकुक्कुट**-इति। 'नदी-इ' इत्यवस्थायां ङेरामि कृते यादेश-लुपोः प्राप्तावन्तरङ्गत्वाद् यादेशो व्यञ्जनान्तत्वनिमित्तो लुब्निषेधः स्यादिति भावः। यद्यपि जलकुक्कुटादिवत् क्वचिदप्रवृत्त्या नदीकुक्कुटादीनां सिद्धिः सम्भवति, किञ्च 'नदी इ कुक्कुट स्' इत्यवस्थायां समासानन्तरमेव लुपः प्राप्तिः, यादेशस्तु आमि सति प्राप्त इति पूर्वोपस्थितनिमित्तत्वरूपमन्तरङ्गत्वं लुप एवेतीह दोषाभावः, तथापि नदीशब्दात् ङेरुत्पत्तिवेलायामेवामादेशोऽन्तरङ्गत्वात् कृते पश्चात् समास इति यादेश-लुपोः समकालप्राप्तिकत्वमेव। बाहुलकादप्रवृत्तिकल्पनं त्वगतिकगतिरिति सत्यां गतावाश्रयितुमयुक्तमिति न्यायाश्रयणमेव युक्तमिति भावः॥ ३.२.१८.॥

## प्राक्कारस्य व्यञ्जने। ३.२.१९.॥

**त० प्र० राजलभ्यो रक्षानिर्वेशः कारः, प्राचां देशे यः कारस्तस्य नाम्नि-'संज्ञायां गम्यमानायामद्-व्यञ्जनात् परस्याः सप्तम्या व्यञ्जनादावुत्तरपदे परे लुप् न भवति। मुकुटे मुकुटे कार्षापणो दातव्यः-मुकुटेकार्षापणः, एवं-'स्तूपे शाणः, हलेद्विपदिका; हलेत्रिपदिका। व्यञ्जन-दृषदिमाषकः, समिधिमाषकः, वृत्तौ वीप्साया दानस्य चान्तर्भावः। प्रागिति किम्? यूथे यूथे देयः पशुः-यूथपशुः, एवं-'यूथवृषः, उदीचां देशे कारोऽयम् न प्राचाम्। कार इति किम्? अभ्यर्हितेऽभ्यर्हिते देयः पशुः-अभ्यर्हितपशुः, प्राचां देशे कारादन्यस्य देयस्य नामैतत्। व्यञ्जन इति किम्? अविकटेऽविकटे उरणो दातव्यः-अविकटोरणः, अविकटोऽविसमूहः। अद्-व्यञ्जनादित्येव-नद्यां नद्यां दोहो दातव्यः-नद्यीदोहः। पूर्वेणैव सिद्धे नियमार्थोऽयं योगः, त्रिविधश्चात्र नियमः-प्राचामेव, कारस्यैव नाम्नि, व्यञ्जनादावेवेति, तथा च प्रत्युदाहृतम्॥ १९॥**

**श० म० न्यासानुसन्धानम्—प्राक्कारस्य०।** प्राचां कारः--प्राक्कारः, तस्य प्राक्कारस्य, प्राचामिति देशस्वामिपरम्, कारशब्दोऽज्ञातार्थ इति तदर्थमाह-**राजलभ्यो रक्षानिर्वेशः** इति-राजा राष्ट्रं रक्षति, राज्ञा रक्षिते च राष्ट्रे कृषिपाशुपाल्यवाणिज्यादयः समुचितरूपेण सम्भवन्ति, राजा च न स्वशरीरमात्रेण सर्वं राष्ट्रं पालयितुं क्षम इति तत्पालनाय रक्षाधिकृतपुरुषा नियुज्यन्ते, ते च सवेतना भवन्ति, तदुपकरणान्यपि च मूल्यलभ्यानीति तदर्थं राजा प्रजाभ्यस्तत्रतत्रायस्थानेषु नियतं षष्ठांशादिरूपं करं गृह्णाति स एव च करः स्वार्थिकाणप्रत्ययसम्बन्धेन कारोऽभिधीयते,

"Aho Shrutgyanam"

स च राजलभ्योऽपि रक्षानिर्वेशः–[ निष्क्रय ] रूपोपि । किंचासौ न सर्वदेशेष्वेकरूपः, क्वचित् कस्मिंश्चिदायस्थाने षष्ठभागरूपः क्वचिन्न्यूनः क्वचिदलरः क्वचिच्चान्यप्रकार एवेत्यनेकरूपो भवति, तत्र प्राचां देशे यत् कारनाम तत्रेदं सूत्रं प्रवर्त्तते, तदाह–**प्राचां देशे यः कारः** इति । **मुकुटेमुकुटे** इति–प्रतिमुकुटमित्यर्थः, मुकुटनिर्माणे तस्य विक्रेयतया निर्मात्रा विक्रेत्रा वा [ यथानियमम् ] कार्षापणो रूप्यकचतुर्थांशो राजलभ्यद्रव्यरूपेण देय इति भावः । एषु सर्वत्र "नाम्नि" [ ३-१-९४० ] इति समासः, नाम्नि च समासः प्रायेण नित्यो भवति, तत्र विग्रहप्रदर्शनमर्थनिर्देशमात्रम्, नित्यसमासस्याविग्रहत्वादस्वपदविग्रहत्वाद् वा । **स्तूपेशाण;** इति–"स्तूप आयतनविशेषः" इति पुल्लिङ्गानुशासनवृत्तावाचार्याः, "स्तूपः, स्तूपम्–मृदादिकूटः, बोधिसत्त्वभवनम्, उपायतनं च कश्चित्" इति पुंनपुंसकलिङ्गानुशासनवृत्तौ त एवाहुः । स्तूपोराशिरिति **लघुन्यासकाराः।** तत्रायतनविशेष एवेहार्थतया स्वीकार्य इति प्रतीयते, यतः–अनुपपदो राशिर्न कारविषयः, आयतनविशेषस्त्वायस्थानत्वात् कारविषयो भवितुमर्हति । शाणो यद्यपि मण्यादितेजनचक्रविशेषे प्रसिद्धः, तथापीह तस्य कारत्वासम्भवेन, कर्षचतुर्थभागरूपो मुद्राविशेषः सौवर्णः शाणशब्देन ग्राह्यः । **हलेद्विपदिकेति**–प्रतिहलं द्वौ द्वौ पादौ ददातीति समासार्थः, पादशब्दश्चाणकचतुर्थभागवाचक इहेति प्रतीयतेः, 'पाई, पैसा' इति शब्दाभ्यां तस्य यथादेशं प्रसिद्धेः । एवं–**हलेत्रिपदिके**ति विज्ञेयम् । व्यञ्जनान्तमुदाहर्त्तुम् प्रतीकरूपमाह–**व्यञ्जनेति दृषदि माषकः** इति–अत्र 'दृषद्'–शब्दो निष्पेषणशिलावाचकः, तन्निर्मात्रा माषकः–माषपरिमितो मुद्राविशेषः कारत्वेन देयः । एवं–**समिधि माषकः** इत्यत्र ज्वालनकाष्ठविक्रेत्रा माषको देय इति बोध्यम् । 'समिध्' शब्दस्तदापणे लाक्षणिकः स्वीकार्यः, वीप्सया विग्रहः प्रदर्शितः, वीप्साबोधकप्रत्ययाद्यभावात् कथं तदवगतिरित्याशङ्कायामाह वृत्तौ–**वीप्सायां दानस्य** चेति–नाम्नि समासविधानात् तन्नामवाच्यः सकलोऽप्यर्थस्तेन समासेन बोध्य इति समासरूपवृत्तावेव वीप्साया दानस्य च गतार्थत्वमेष्टव्यम्, यतो यत् प्रतीयते स तद्वाचक इति सिद्धान्तात्, तथा च तद्बोधनाय न वृत्त्यन्तरस्यावश्यकतेति भावः । कारस्य सर्वत्र नामैक्यमेवेति विशिष्य प्राक्पदसहितस्य निर्देशो व्यर्थ इति शङ्कते–**प्रागिति किमिति** । न सर्वत्र देशे कारनामैक्यम्, कारस्य लाभविशेषमूलकत्वेन यत्र यस्य वस्तुनो यथालाभप्रदत्वं तदनुसारमेव तस्य कारनिर्धारणमिति प्राक्कारादन्यत्र तदप्रवृत्त्यर्थं प्राग्ग्रहणमावश्यकमिति प्रत्युदाहरणमुखेनोत्तरयति–**यूथे यूथे** इति । व्यावृत्तिप्रकारं दर्शयति–उदीचां, देशे कारोऽयं न प्राचामिति–तथा चात्र भवत्येव सप्तम्या लुप्, प्रागित्यस्याभावे तु न स्यादिति भावः । कार इति किमिति–तथा च "प्राचां व्यञ्जने" इत्येव सूत्रमस्तु, प्राचामिति च नाम्नीत्यनेन सम्बद्धम्, तथा च प्राचां देशे यन्नाम तत्रैवालुप् स्यादिति स्वीक्रियतामित्याशयः । **अभ्यर्हितपशुरि**ति, कारत्वाभावेऽपि नामत्वं साधयति **प्राचां देशे कारादन्यस्ये**ति । व्यञ्जनादाविति विशेषणमुत्तरपदस्य किमर्थमिति शङ्कते–**व्यञ्जने इति किमिति**, सामान्यत उत्तरपदेऽलुपो विधाने स्वरादावपि स्यादित्याह–**अविकटोरणः** इति, अविकट इत्यस्य विकटाभाव इत्यर्थो माऽऽशङ्कीति तदर्थमाह–**अविकटोऽविसमूहः** अवीनां संघात इत्यर्थे "अवेःसङ्घातविस्तारे कटपटम्" (७.१.१३२.) इतिकटप्रत्ययः, उरणो मेषः, अविसङ्घातपालकेन प्रतिसङ्घातमेक उरणः काररूपेण देय इति तदर्थः, अत्र सप्तम्या अलुपं वारयितुं व्यञ्जनादाविति सार्थकमिति भावः । अद्-व्यञ्जनादिति पूर्वसूत्रादनुवर्त्तनीयमेवेत्याह–**अद्-व्यञ्जनादित्येवे**ति । व्यावर्त्यमाह–**नध्र्यां नध्र्यामि**ति–नध्री चर्ममयी हलादियोजनरज्जुः, नह्यतेऽनयेति व्युत्पत्तेः, तस्यां विक्रयार्थं प्रस्तुतायां, दोहः–एकपशुदोहनलभ्यदुग्धं देयमित्यर्थः प्रतिभाति, स च न बुद्धिपथमारोहति, सिद्धान्तकौमुद्यादौ च नदीदोह इति प्रत्युदाहरणं दृश्यते, तच्चेत्थं व्याख्यायते–दुग्धदातृपशोर्नदीतारणे तच्छुल्करूपेण तदीय एको दोहः–एकसमयदोहनलभ्यं दुग्धं देयमिति, बहूनामक्षराणां साम्यादर्थसामञ्जस्याच्चात्रापि तदेव प्रत्युदाहरणं भवेदित्यनुमीयते, अस्तु वाऽविज्ञातार्थमेवेदं प्राग्देशप्रसिद्धस्य कस्यापि कारस्य नाम, अद्-व्यञ्जनान्तत्वाभावश्च स्पष्ट एवोभयत्र, ततश्चात्र सप्तम्या लुबेव भवति, नानेन निषेधः, तदर्थमद्-व्यञ्जनादित्यस्यावश्यकत्वमिति भावः ।

**श० म० सूत्रस्य त्रिधा नियामकत्वं व्याख्यातुमाह–पूर्वेणैव सिद्धे** इति, अयमाशयः–"अद्व्यञ्जनात् सप्तम्या बहुलम्" ( ३. २. १८. ) इति सूत्रे बहुलग्रहणेनानिष्टस्थलव्यावृत्तिसिद्धाविष्टस्थले च तेनैवालुपः सिद्धिरिति सूत्रमिदं व्यर्थम्, तथा चास्य किमपि विशिष्टं फलमुचितमिति तन्नियमरूपेण प्रतीयते, सिद्धे सत्यारभ्यमाणस्य विधेर्निय-

"Aho Shrutgyanam"

मार्थत्वस्यौचित्यात् । नियमस्वरूपं विवरीतुं पूर्वं तस्य प्रकारमाह-**त्रिविधश्चात्र नियमः** इति- सूत्रस्थपदत्रयस्य त्रिधा नियामकत्वान्नियमत्रैविध्यमिति भावः । स्वरूपमाह- **प्राचामेवे**त्यादिना, तथा च तत्स्वरूपमित्थं विज्ञेयम्--व्यञ्जनादावुत्तरपदे कारस्य नाम्नि सप्तम्या अलुप् चेत् प्राचामेव१, व्यञ्जनादावुत्तरपदे नाम्नि सप्तम्या अलुप् चेत् प्रावकारस्यैव२, प्राचां कारस्य नाम्नि उत्तरपदे सप्तम्या अलुप् चेत् व्यञ्जनादावेवोत्तरपदे३ इति । नियमव्यावर्त्याकाङ्क्षायामाह-- **तथा च प्रत्युदाहृतमि**ति--प्राचामेवेत्यनेन यूथपश्वादय उदक्कारा:, कारस्यैवेत्यनेनाभ्यर्हितपश्वादयः कारादन्ये ज्ञेयाः, व्यञ्जनादावेवेत्यनेन च अविकटोरणादयः स्वराद्युत्तरपदका व्यावर्त्याः पूर्वमेव प्रदर्शिता इति भावः । पातञ्जले महाभाष्ये च द्विविध एव नियमः "कारनाम्नि च हलादौ प्राचाम्" ( पा० सू० ६. ३. १. ) इति सूत्रे प्रदर्शितः-प्राचामेवेति व्यञ्जनादावेवेति च । तत्रोक्तं नागेशेन---अभ्यर्हितपश्वादयो न नामानि तथा च नाममात्रेणैव तद्व्यावृत्तिरिति कारस्यैवेति न नियम्यम्, परन्तु तन्मतेऽस्याप्राप्तविभाषात्वस्वीकारः, इह च स्वमतेऽस्य नित्यविधित्वं, प्राप्ते आरभ्यमाणत्वं चेति समुचितमेव नियमत्रैविध्यम्, प्रक्रियाभेदस्य सूत्रव्याख्याभेदेनैव निर्वाह्यत्वात्, तत्रत्यप्रक्रियाया भेदेऽपि न फले भेदो व्यवस्थितविभाषाश्रयणादिति प्रकृतेऽनावश्यकत्वात् तदुल्लेखो न कृतः ॥ ३.२. १९. ॥

## तत्पुरुषे कृति । ३. २. २० ॥

**त० प्र० अद्व्यञ्जनात् परस्याः सप्तम्याः कृदन्ते उत्तरपदे परे तत्पुरुषे समासे लुब् न भवति, नाम्नीति निवृत्तम् । स्तम्बे रमते-स्तम्बेरमः एवं-कर्णेजपाः, पात्रेसमिताः, प्रवाहेमूत्रितम्, उदकेविशीर्णम्, अवतप्तेनकुलस्थितम्; व्यञ्जन-भस्मनिहुतम्, भस्मनिमीढम् । बहुलाधिकारात् क्वचिदन्यतोऽपि-गोषुचरः, क्वचिन्निषेधो न भवति-मद्रचरः, ग्रामकारकः; क्वचिद् विकल्पः-खेचरः, खचरः; वनेचरः, वनचरः; पङ्केरुहम्, पङ्करुहम्; सरसिरुहम् सरोरुहम्; दिविषत्, द्युसत्, क्वचिदन्यदेव-हृदयं स्पृशति-हृदिस्पृक्, द्वितीयार्थेऽत्र सप्तमी, एवं-दिविस्पृक् ।**

**तत्पुरुष इति किम् ? धन्वनि कारका यस्य स-धन्वकारकः. एवं-कल्याणाभिनिवेशः, धर्मरुचिः । कृतीति किम् ? अक्षशौण्डः, अक्षकितवः । अद्व्यञ्जनादित्येव-कुरुषु चरति-कुरुचरः, एवं-रात्रिचरः, नदीचरः । कथं 'परमे कारके, उत्तमे कारके' इति विग्रहे परमकारके उत्तमकारके तिष्ठतीत्यत्र सप्तम्या लुब् भवति ? उच्यते-अन्तरङ्गत्वात् प्रथमान्तयोरेव परमोत्तमशब्दयोः कारकशब्देन समास इति ताभ्यां सप्तम्येव नास्ति; यद्वा कृतीति कृन्निमित्ताया एव सप्तम्या लुप्प्रतिषेधः, इह तु तिष्ठत्यादिक्रियापेक्षेति लुप् भवत्येव ॥ २० ॥**

**श० म० न्यासानुसन्धानम्— तत्पुरुषे०** । **तत्पुरुषे** इति समुदायविशेषणम्, **कृति** इति चोत्तरपदमात्रस्य व्याख्यानाल्लक्ष्यानुरोधाच्च । **कृती**ति च कृत्प्रत्ययपरमिति, केवलस्य प्रत्ययस्योत्तरपदत्वायोगात् तदन्तपरमित्याह-- **कृदन्ते उत्तरपदे** इति । **नाम्नीति निवृत्तमि**ति--तत्पुरुषग्रहणात् पृथक्सूत्रारम्भाच्च, अयमाशयः---नाम्नि प्रायस्तत्पुरुषसमास एवेति तत्पुरुषग्रहेण नाम्नीत्यस्यासम्बन्धः सूच्यते । किञ्च तत्सम्बन्धसत्त्वे "अद्व्यञ्जनाद्" इति पूर्वसूत्रेणैव सिद्धिरिति पृथगस्य सूत्रस्यावश्यकत्वं न स्यादिति पृथक् सूत्रारम्भादपि नाम्नीत्यस्य निवृत्तिरनुमीयते । **स्तम्बे रमते** इति---एतत् कृदन्तप्रत्ययोत्पत्त्यर्थं विग्रहवाक्यम्, समासस्तु 'स्तम्बे-रम' इति पदयोरेव, उत्तरपदे च विभक्त्युत्पत्तेः पूर्वमेव समासः, गति-कारक-ङस्युक्तानां कृद्भिः स्याद्युत्पत्तेः पूर्वमेव समासस्य न्यायसिद्धत्वात् । इह च ङस्युक्तसमासोऽन्यमते, स्वमते च "शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजप० ( ५० १. १४. ३. ) इति सूत्रे निपातनादेव समासः । यद्यपि निपातनादेव तत्र सप्तम्या अलुबपि भविष्यत्येवेति नेदमस्य दृढतरमुदाहरणं तथापि यावानर्थो लक्षणैरप्राप्तस्तावानेव निपात्य इति सप्तम्यलुपोऽनेन प्राप्तत्वान्न निपातनस्य तत्रांशे व्यापार इति स्वीकरणीयम्, पूर्वपदस्य च ङस्युक्तत्वाभावेन समासो निपातनादेव स्वीकरणीयः स्यात्, स्तम्बो व्रीह्यादिदण्डभागः, तत्र रमते तदास्वादने सुखमनुभवति, तथाभूताश्चान्येऽपि पशवो यद्यपि भवन्ति, तथापि हस्त्यर्थे निपातनात् स एव बोध्यते, तद्बोधादेव तदर्थे निपातनमिति वा । एवं- **कर्णेजपः** सूचकः ( पिशुनः ) एव, नान्ये कर्णमन्त्राद्युपदेष्टारो गुर्वादयः, तत्रैवा ( सूचक एव ) स्य शब्दस्य रूढत्वात् । **पात्रेसमितः** इत्यत्र "पात्रेसमितेत्यादयः" ( ३. १. ३१. ) इति समासः, तत्रापि यद्यपि निपातनादेव सप्तम्यलुप् सिद्धा, तथापि प्रकृतसूत्रोदाहरणत्वसम्भवे निपातनं नाश्रितम्, पात्रेसमितो

"Aho Shrutgyanam"

यो भोजनसमये एव संगतो न तु कार्ये, स उच्यते, तथा च विशेषणभूतोऽयमिति नामत्वाभावः । **प्रवाहेमूत्रितमित्या**दयः क्षेपार्थाः कार्यस्य अस्थानकृतत्वसूचकाः, तथा च तत्र "क्तेन" (३. १. ९२) इति समासः । अकारान्तादुदाहृत्य व्यञ्जनान्तादुदाहर्तुं प्रतीकमाह—**व्यञ्जने**ति । भस्मनिहुतम् निरर्थकं कर्म, हवनस्याग्निमध्ये एव सार्थकत्वात् भस्मनि तत्करणस्य निष्फलत्वं स्पष्टमेव, पूर्ववत् समासः । एवं सूत्रोपात्तादकारान्ताद् व्यञ्जनान्ताच्चोदाहृत्य, प्रयोगव्यस्यान्येभ्योऽपि सप्तम्यलुप्सहितस्य दृष्टत्वात् तत्साधनामाह—**बहुलाधिकारादि**ति—"अद्-व्यञ्जनात् सप्तम्या बहुलम्" इति सूत्रस्थस्य बहुलमित्यस्याधिकारादित्यर्थः । बहुलशब्दार्थश्च "क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद् विकल्पः क्वचिदन्यदेव ।" इत्याद्युक्तप्रकारेण प्राचीनैरुक्तः, तत्रान्त्यमेव प्रकारं पूर्वमुदाहर्तुमाह—**क्वचिदन्यतोऽपी**ति—अद्-व्यञ्जनाभ्यामन्यतोऽपि परस्याः सप्तम्याः क्वचिदनेन सूत्रेण लुप् निषिध्यत इति भावः क्वेत्याह—**गोषुचरः** इति—"चरेष्टः" ( ५. १. १३९. ) इति टः, "ङस्युक्तं कृता" (३.१.४९.) इति समासः, अत्रौकारान्तादपि परस्याः सप्तम्या न लुप् । क्वचिदप्रवृत्तिमाह—**क्वचिन्निषेधो न भवती**ति । क्वेत्याह—**मद्रचरः** इत्यादि, एषु अकारान्तादपि सप्तम्याः कृति लुप् भवत्येव । **क्वचिद् विकल्पः** इति, तृतीयं प्रकारमुदाहरति—**खेचरः, खचरः** इति—उभयथापि प्रयोगस्य साधुत्वमिति भावः । चतुर्थं बाहुलकप्रकारमुदाहरति—**क्वचिदन्यदेवे**ति । क्वेत्याह—**हृदिस्पृगि**ति । किमत्रान्यदित्याह—**द्वितीयार्थेऽत्र सप्तमी**ति—तथा च सप्तम्या लुपो निषेधकेनानेनेह द्वितीयार्थे कर्मणि सप्तमी विहिता, तस्याश्च लुपो निषेधोऽपीति भावः । अन्यत्राऽप्युक्तं प्रकारमतिदिशति—**एवं-दिविस्पृगि**ति—दिवं स्पृशतीति विग्रहः, अत्रापि पूर्ववत् कर्मणि सप्तमीति भावः । पदकृत्यमाह—**तत्पुरुष इति किमि**त्यादि—बाहुलकेनेष्टस्थले प्रवृत्तेरन्यत्र चाप्रवृत्तेः साध्यतया तत्पुरुषग्रहणाभावेऽपि तत्पुरुषे एव स्यात्, किं तद्ग्रहणेनेति प्रष्टुराशयः, यदिह सूत्राक्षरैरनुपात्तं लक्ष्यसंस्कारार्थं चावश्यकं तदेव बाहुलकप्राप्यम्, यत्र चानुगमः कृतस्तत्र च तदनुकूलमेव व्यवस्थोचितेति तत्पुरुषे इत्युक्ततया न ततोऽन्यत्रास्य प्रवृत्तिरिष्टेति बहुव्रीह्यादिव्यावृत्तये तस्यावश्यकत्वम्, अथवा सप्तम्यन्तस्य तत्पुरुषसमास एव पूर्वपदत्वेन प्रवेशः, यतः—अव्ययीभावेऽव्ययस्यैव पूर्वपदत्वम्, बहुव्रीहौ समानाधिकरणानामेव प्रवेश इति प्रथमान्तयोरेव स समासः, द्वन्द्वोऽपि तथैवेति परिशेषात् तत्पुरुष एव भविष्यतीति तत्पुरुषग्रहणमव्यावर्त्तकमिति प्रष्टुराशयः । न केवलं तत्पुरुषे एव सप्तम्यन्तस्य पूर्वपदत्वेन प्रवेशोऽपि तु उष्ट्रमुखादिगणे कण्ठेकालादीनामपि पाठाद्, सप्तम्यन्तस्य बहुव्रीहौ पूर्वप्रयोगनिषेधक—"न सप्तमीन्द्वादिभ्यश्च" (३. १. १५५) इत्यादिसूत्ररूपज्ञापकाद् वा बहुव्रीहावपि सप्तम्यन्तस्य प्रवेशेन तत्र लुपो निषेधो मा भूदित्येतदर्थं तत्पुरुषग्रहणमावश्यकमित्याह—**धन्वनि कारका यस्ये**ति—ज्ञापकादुष्ट्रमुखादित्वाद् वा समासः । अत्र पूर्वोक्तज्ञापकेन सप्तम्यन्तस्यापि बहुव्रीहिसमासे प्रवेशस्यानुमतत्वेन सप्तम्याः कृदन्ते उत्तरपदे सत्यपि लुप् भवति, 'तत्पुरुषे' इत्यस्याभावे न स्यात् । प्रत्युदाहरणान्तराण्यप्याह—**कल्याणाभिनिवेशः** इत्यादिना, कल्याणे शुभकर्मणि, अभिनिवेशः—आग्रहो यस्येति विग्रहः । एवं-**धर्मरुचिरि**त्यत्र धर्मे रुचिर्यस्येति विग्रहः, सर्वत्र सप्तम्या लुप् प्रतिषिध्येतासति तत्पुरुषग्रहणे । कृतीत्यस्य कृत्यमवतारयितुं पृच्छति—**कृतीति किमि**ति । **अक्षशौण्डः** इति—अक्षेषु शौण्ड इति विग्रहः, शौण्डो व्यसनी दक्षश्च, "सप्तमी शौण्डाद्यैः" (३. १. ८८.) इति समासः, शुण्डायां-सुरायां चतुरकर्मणि वाऽभिरतः—शौण्ड इति व्युत्पत्त्या शौण्डशब्दस्तद्धितान्तो न तु कृदन्त, इति तत्रोत्तरपदे लुप् न निषिध्यते । अद्व्यञ्जनादित्यप्यावश्यकमेवेत्याह—**अद्-व्यञ्जनादित्येवे**ति । तद्व्यावर्त्यमाह—**कुरुषु चरती**ति—"चरेष्टः" (५. १. १३७) इति टप्रत्ययः, अत्रोकारान्तात् परा सप्तमीति तस्या लुब् न निषिध्यते । अन्यान्यपि व्यावर्त्यान्याह—**एवं-रात्रिचरः** इति—रात्रौ चरतीति विग्रहः, पूर्ववत् टः, "न वाऽखित्कृदन्ते रात्रेः" (३. १. ११५.) इति विकल्पेन मोऽन्तादेशविधानात् तदभावः । **नदीचरः** इति—नद्यां चरतीति विग्रहः, एषु सर्वत्र ( कुरुचरादिषु ) "ङस्युक्तं कृता" (३. १. ४१) इति समासः । क्वचित् सर्वोपाधिसत्त्वेऽपि लुप् न निषिध्यते, तत् कथमिति पृच्छति—**कथं परमे कारके उत्तमे कारके इति विग्रहे** इति—अत्र विशेषणसमासः "सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" (३.१. १०७) इति, तत्र च (कर्मधारयसमासे) पक्षद्वयम्—प्रथमान्तेन परिनिष्ठितविभक्त्यन्तेन वा समास इति, प्रथमान्तेन समासे तु परमश्चासौ कारक इति परमकारकस्तस्मिन्निति विग्रहः; परिनिष्ठितविभक्त्या समासपक्षे परमे कारके इति विग्रहः, तत्र सप्तम्याः कृत्युत्तरपदे लुप् कुतो न निषिध्यत

"Aho Shrutgyanam"

इति शङ्का। यद्यपि पूर्वं 'मद्रचरः, ग्रामकारकः' इत्यादौ बाहुलकादेव समाहितम्, तच्च समाधानमिहापि सुकरम्, तथापि न्याससिद्धेऽर्थेऽगतिकगतिरूपं बाहुलकात् समाधानमनुचितमिति न्याय्यं समाधानं प्रकटयितुं शङ्कावतारः कृतः। तत्र प्रथमं पक्षमाश्रित्य समाधानमाह---**अन्तरङ्गत्वादिति**---समानाधिकरणसमासोऽयम्, सामानाधिकरण्यं च समानविभक्तिकयोर्भवति, तत्र यद्यपि परिनिष्ठितविभक्तावपि सामानाधिकरण्यं संभवति, तथापि प्रथमा प्रथमोपस्थितत्वादन्तरङ्गेति प्रथमान्तेनैव विग्रहो न्याय्यः, एवं च कारके उत्तरपदे सप्तम्यन्तस्याभावेन नात्र लुपः प्रतिषेधस्य प्राप्तिरिति भावः। पूर्वं प्रथमान्तेन विगृह्य ततः सप्तम्यन्ततासम्पादने ज्ञानगौरवमिति परिनिष्ठितविभक्त्यैव समास उचित इत्यभिनिविष्टानां मते समाधानान्तरमाह--**यद्वा कृतीति कृन्निमित्ताया एवेति**---कृति सप्तमी न लुप्यते इति सूत्राक्षरस्वारस्येन कृतीत्यस्य यथा लुब्निषेधनिमित्तत्वं प्रतीयते तथा प्रत्यासत्त्या सप्तमीनिमित्तत्वमपि प्रतीयत इति कृद्वाच्य (कृदन्तप्रकृतिवाच्य) क्रियानिमित्ताया एव सप्तम्या लुपो निषेधः। इह तर्हि किन्निमित्ता सप्तमीत्याकाङ्क्षायामाह---**इह त्विति**---तिष्ठत्यादिक्रियाधारत्वमेव परमकारकशब्दस्येति तदाधारनिमित्तैव सप्तमीति तस्या लुपो न निषेध इति भावः। "तत्पुरुषे कृति बहुलम्" (पा० सू० ६. ३. १४) इति पाणिनीयसूत्रे महाभाष्ये तु प्रकृते बाहुलकेनैव समाधानमुक्तम्, **कैयटेन** च विशेष उक्तः, तथाहि---"न्यायोऽप्यत्रास्ति, अन्तरङ्गा कृदन्तवाच्यक्रियानिमित्ता सप्तमी गृह्यते, इह तु क्रियान्तरनिमित्तेति।" प्रथमं समाधानम्-(अन्तरङ्गत्वात् प्रथमान्तेनैव विग्रह इति) तु नोक्तम्, परिनिष्ठितविभक्त्या समासवादिना कृतस्य प्रश्नस्य तन्मतानुसारेणैव समाधानस्यावश्यकत्वादिति द्वितीयं समाधानमेव तत्र दृढमित्याशयेन। कृन्निमित्तायाः सप्तम्या ग्रहणे हेतुश्चान्तरङ्गत्वमुक्तम्, तस्या अन्तर्भूतोत्तरपदप्रकृतिधातुवाच्यक्रियानिमित्तत्वात्, प्रत्यासत्तिन्यायोऽप्यत्रानुकूल इति त्वन्यत्। एवं चोभयोस्तन्त्रयोः साम्यमेव समाधानांशे इति बोध्यम् ॥ ३. २. २० ॥

---

## मध्या-ऽन्ताद्गुरौ। ३. २. २१ ॥

**त० प्र० मध्यान्तशब्दाभ्यां परस्याः सप्तम्या गुरुशब्दे उत्तरपदे परे लुप् न भवति। मध्येगुरुः, अन्तेगुरुः। मध्यगुरुः, अन्तगुरुरित्यप्यन्ये ॥ २१ ॥**

---

**श० म० न्यासानुसन्धानम्— मध्या०।** अद्व्यञ्जनादित्यधिकृत्य सामान्यतोऽदन्तव्यञ्जनान्ताभ्यां सप्तम्या लुपं निषिध्य, विशिष्य तत्तच्छब्दात् परस्यास्तस्या लुपो निषेधमाख्यातुं विशेषसूत्राण्यनुक्रमते। **गुराविति** युक्तत्वात् कृतीति न सम्बध्यते, पृथग्योगाच्च 'तत्पुरुषे' इत्यपि नेति सामान्यत एवोत्तरे पदे निषेधोऽयम्, तेन बहुव्रीहावपि स्यादेव, तथा च मध्ये गुरुर्यस्येत्यपि विग्रहः शक्यते कर्तुम्। अत्र च सप्तम्या अलुब्विधानसामर्थ्यादेव सप्तमीतत्पुरुषः, विशिष्य समासविधायकसूत्राभावात् "सप्तमी शौण्डाद्यैः" (३. १. ८८.) इति सूत्रे बहुवचननिर्देशेन वा गुरुशब्दोऽपि तत्र द्रष्टव्यस्तेनैव समासः। अत्रापि बहुलमित्यस्य सम्बन्धात् विकल्पेन निषेध इति मतान्तरमाह--- **मध्यगुरुः, अन्तगुरुरित्यप्यन्ये** इति--- लक्ष्यानुसारित्वाल्लक्षणानां सति तादृशप्रयोगे तदपि साधुतया स्वीकार्यमिति भावः। पाणिनीये च विकल्पो दृश्यते, तथा च तदतिरिक्ता एव केचिदन्यपदेन ग्राह्या वैयाकरणानामनेकत्वात् ॥ ३. २. २१ ॥

---

## अमूर्ध-मस्तकात्स्वाङ्गादकामे। ३. २. २२।

**त० प्र० मूर्ध-मस्तकशब्दवर्जितात् स्वाङ्गवाचिनोऽद्व्यञ्जनान्ताच्छब्दात् परस्याः सप्तम्याः कामशब्दादन्यस्मिन्नुत्तरपदे परे लुब् न भवति। कण्ठे कालोऽस्य–कण्ठेकालः, उदरेमणिः, वहेगडुः, पुतेवलिः, उरसिलोमा, शिरसिशिखः। अमूर्धमस्तकादिति किम् ?,–मूर्धशिखः, मस्तकशिखः। स्वाङ्गादिति किम् ?,–अक्षशौण्डः, मुखपुरुषा शाला। अकाम इति किम् ? मुखकामः। अद्व्यञ्जनादित्येव–अङ्गुलिव्रणः, जङ्घावलिः। बहुलाधिकारात् 'करकमलम्, गलरोगः, गलव्रणः' इत्यादि सिद्धम् ॥ २२ ॥**

---

**श० म० न्यासानुसन्धानम्— अमूर्ध०। अमूर्धमस्तकादिति** पर्युदासेनाङ्गलाभेऽपि स्वाङ्गपदार्थस्य विशिष्य परिभाषितत्वेन तादृशार्थस्यैव लक्ष्यानुसाराद् विवक्षितत्वेन **स्वाङ्गादि**ति विशिष्योक्तम् अत्र मूर्धमस्तकशब्दयोः समानार्थत्वेऽपि शब्दस्वरूपपरत्वेनार्थभेदादेव नैकशेषः, अन्यथा "समानानामर्थेनैकः शेषः" (३. १. ११८.) इत्येकशेषः स्यात्। पूर्वसूत्रेऽद्व्यञ्जनान्तादित्यनुवृत्तमपि न विशेषणतया गृहीतमव्यभिचारादसंभवाच्च, मध्यशब्दस्यादन्तत्वमव्यभिचरितं व्यञ्जनान्तत्वं चासंभावितमिति 'संभवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्' इति न्यायान्न तत् सूत्रार्थे

"Aho Shrutgyanam"

गृहीतम् । इह च स्वाङ्गवाचिनामदन्तव्यञ्जनान्तानां तद्भिन्नानां च सत्त्वेन सम्भवव्यभिचारयोरुभयोः सम्भवाद् वृत्तौ तदुल्लिखति— **अद्व्यञ्जनान्ताच्छब्दादि**ति मूर्ध-मस्तकशब्दवत् कामशब्दोऽपि स्वरूपपर एवोत्तरपदे इत्यनेन सामानाधिकरण्यादिति स्फोरयति— **कामशब्दादन्यस्मिन्नुत्तरपदे** इति । **कण्ठे कालोऽस्ये**ति— उष्ट्रमुखादित्वात् समासः । **वहेगडुरि**त्यत्रापि स एव समासः, वहः स्कन्धः, गडुरुच्छ्रितमांसपिण्डम्, यद्यपि "गड्वादिभ्यः" (३. १. १५६.) इति सूत्रेण सप्तम्याः प्राक्प्रयोगो विकल्प्यते, तथा च गडुवह इत्यपि प्रयोगो भवेत्, परमिह बाहुलकान्नित्यमेव सप्तम्यन्तस्य पूर्वप्रयोग इति वहेगडुरित्येव । **पुतेवलिः** पुतशब्दः सास्नावाचक इति तत्रापि वलेः ( चर्मणि रेखाया ) दर्शनात् सर्वत्र स एव समासः । पदकृत्यप्रदर्शनायाह— **अमूर्धमस्तकादिति किमि**ति । ततः परस्याः सप्तम्या लुबेव भवतीत्याह— **मूर्धशिखः** इत्यादि । **स्वाङ्गादिति किमि**ति अमूर्धमस्तकादिति पर्युदासादेवाङ्गवाचकात् परस्या एव सप्तम्या लुब्निषेध इति प्रष्टुराशयः । नाङ्गमात्रात् परस्याः सप्तम्या लुब् निषेध इष्टोऽपि तु स्वाङ्गात् परस्याः, स्वाङ्गं हि परिभाषितमभियुक्तैः—

"अद्रवं मूर्त्तिमत् स्वाङ्गं, प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं च तेन चेत् तत् तथायुतम् ॥" इति ।

एवं च स्वाङ्गशब्देनाङ्गवाचकभिन्नानामङ्गवाचिनामपि पूर्वलक्षणलक्षितभिन्नानां व्यावृत्तिरित्याह— **अक्षशौण्डः, मुखपुरुषा शाले**ति— पूर्वत्राङ्गादपि परत्वं नास्ति, परत्र च प्राणिस्थत्वाभावादङ्गवाचकत्वेऽपि न स्वाङ्गवाचकत्वम् । कामपर्युदासव्यावर्त्यमाह— **मुखकामः** इति— मुखे कामो यस्येति विग्रहः, अयं च क्लीबजीवभेदः, तस्य मुख एव कामजव्यवहारस्य कामशास्त्रे पठितत्वात्, विशेषणतयाऽपीदं प्रयुज्यते, यः किल स्वकामं वक्त्र्येव, न तत्पूरणाय प्रयस्यति स एवं विशेष्यते । अद्व्यञ्जनादित्यस्याप्यावश्यकत्वमित्याह— **अद्व्यञ्जनादित्येवे**ति । व्यावर्त्यमाह— **अङ्गुलिव्रणः, जङ्घावलिरि**ति— उभयत्रार्थानुसारं तत्पुरुष-बहुव्रीह्योः संभवः । क्वचित् सर्वोपाधिसत्त्वेऽपि सूत्रप्रवृत्तिर्न दृश्यते तत्साधुत्वार्थमाह— **बहुलाधिकारात् करकमलमि**त्यादि, यद्यपीदृशाः प्रयोगाः 'करस्थं कमलम्, गलस्थो रोगः, गलस्थो व्रणः' इत्यादिविग्रहेणापि शाकपार्थिवादिवत् साधयितुं शक्यन्ते तथापि यत्र सप्तम्यन्तेन करे कमलमित्यादिरूपेण विग्रहस्तत्रापि प्रकृतरूपसिद्ध्यर्थं बाहुलकमेवाश्रयणीयमिति भावः ॥ ३. २. २२ ॥

## बन्धे घञि नवा । ३. २. २३ ॥

**त० प्र० बन्धशब्दे घञन्ते उत्तरपदे परे अद्व्यञ्जनान्तात् परस्याः सप्तम्या वा लुब् न भवति, स्वाङ्गादस्वाङ्गाच्चायं विकल्पः । हस्ते बन्धो, हस्ते बन्धोऽस्येति वा—हस्तेबन्धः, हस्तबन्धः, चक्रेबन्धः, चक्रबन्धः । बन्ध इति किम् ? पुटपाकः, मनोरोगः । घञीति किम् ? अजन्ते मा भूत्—बध्नातीति बन्धः, चक्रबन्धः, हस्तबन्धः, चारकबन्धः । अद्व्यञ्जनादित्येव—गुप्तिबन्धः, काराबन्धः ॥ २३ ॥**

श० म० **न्यासानुसन्धानम्**— **बन्धे०** । अत्र **घञी**ति प्रत्ययबोधकं पदं, तस्य बन्धेन सह स्वरूपतः सामानाधिकरण्यं न सम्भवतीति तत् तदन्तपरम्, प्रत्ययस्य तदन्तपरत्वस्य न्यायसिद्धत्वादिति 'घञन्ते' इत्यर्थकं तत्, तथा च घञन्ते बन्धशब्दे उत्तरपदे इत्यर्थः सम्पद्यते, तदाह— **बन्धशब्दे घञन्ते** इति— उभयथा हि बन्धशब्दो व्युत्पाद्यते—घञा अचा च, तत्र घञन्ते परे सप्तम्या लुप् निषिध्यतेऽजन्ते च नेति प्रक्रिया, तथा चोदाहरिष्यते । **स्वाङ्गादस्वाङ्गादि**ति— पूर्वसूत्रात् स्वाङ्गग्रहणानुवृत्तिस्वीकारे,— **चक्रेबन्धः** इत्यत्र न प्रवर्तेतेति तदननुवृत्त्या सर्वत्र प्रवृत्तिरस्येति विज्ञायते । अत्र च समासविशेषानुपादानादुभयत्र तत्पुरुषे बहुव्रीहौ चास्य प्रवृत्तिरिति द्विधाऽपि विग्रहमाह— **हस्ते बन्धो, हस्तेबन्धोऽस्ये**ति । पातञ्जले महाभाष्ये तु "तत्पुरुषे कृति बहुलम्" (पा सू० ६. ३. १४) इति प्राप्ते विकल्पार्थमिदमित्येतत्सूत्रस्थानीये "बन्धे च विभाषा" (पा० सू० ६. ३. १३) इति सूत्रे कथितम्, तेनायमपि तत्पुरुषे एव प्रवर्तत इति **केचिद्** वृत्तिकृत आहुः, तन्नोचितमिति **नागेशेन** तत्रैवोद्योते निरूपितम्, तस्य भाष्यस्यान्यतात्पर्यकत्वमिति तदाशयः । तथा च तन्मतेऽप्युभयत्र— तत्पुरुषे बहुव्रीहौ च प्रकृतसूत्रप्रवृत्तिरिति लभ्यते । सामान्यतो घञन्ते एव विधीयतां बन्धग्रहणं व्यर्थमिति शङ्कते— **बन्धे इति किमि**ति । **'पुटपाकः, मनोरोगः'** इत्युभयत्र पाकरोगशब्दयोर्घञन्तत्वेन तत्रापि वैकल्पिको लुपो निषेधः स्यादिति तद्वारणाय बन्ध इति विशिष्य कथनमावश्यकमिति भावः । बन्धशब्दस्य घञन्तस्यैव प्रसिद्ध्या घञीति व्यर्थमिति शङ्कते— **घञीति किमि**ति । न केवलं घञन्त एव

"Aho Shrutgyanam"

बन्धशब्दोऽपि त्वजन्तोऽपीति तद्व्यावर्त्तनाय घञीत्यावश्यकमिति प्रत्युदाहरणमुखेनोत्तरयति—**अजन्ते मा भूदित्या**दि। अथ च चक्रबन्ध इत्यत्र "तत्पुरुषे कृति" (३. २. २०) इति, हस्तबन्ध इत्यत्र "अमूर्धमस्तकात् स्वाङ्गादकामे" (३. २. २२) इति च कुतो लुप् न निषिध्यत इति चेत्? सत्यम्—प्रकृतसूत्रे घञीत्यनेन बन्धे चेद् घञन्त एवेति नियमेनान्येषामपि घञन्तभिन्ने बन्धशब्दे परेऽप्रवृत्तेः, अन्यथा घञीत्यस्य वैयर्थ्यमेव स्यात्। न च घञन्ते विकल्पोऽस्त्वन्यत्र पूर्वेण नित्यमिति घञीत्यस्य फलमिति वाच्यम्, तस्य बहुलग्रहणेनैव सिद्धेः। अद्व्यञ्जनादित्यस्य सम्बन्ध इहाप्यावश्यक इत्याह—**अद्व्यञ्जनादित्येवे**ति, तथा चाद्व्यञ्जनान्तादन्यतः परस्याः सप्तम्या घञन्तेऽपि बन्धशब्दे उत्तरपदे लुप् न निषिध्यते, तदाह—**गुप्तिबन्धः, कारावन्धः** इति—गुप्तौ बन्धः, कारायां बन्ध इति विग्रहः, एषु सप्तमीति योग विभागात् "नाम नाम्ना०" (३. १. १८) इति वा समासः ॥३,२.२३॥

## कालात् तन-तर-तम-काले । ३. २. २४ ॥

**अद्व्यञ्जनान्तात् कालवाचिनः शब्दात् परस्याः सप्तम्यास्तन-तर-तमप्रत्ययेषु कालशब्दे चोत्तरपदे परे वा लुप् न भवति। तन—पूर्वाह्णेतनः, पूर्वाह्णतनः; अपराह्णेतनः, अपराह्णतनः; तर—पूर्वाह्णेतराम्, पूर्वाह्णतरे; अपराह्णेतराम्, अपराह्णतरे; तम—पूर्वाह्णेतमाम्, पूर्वाह्णतमे, अपराह्णेतमाम्, अपराह्णतमे; काल—पूर्वाह्णेकाले, पूर्वाह्णकाले; अपराह्णेकाले, अपराह्णकाले। कालादिति किम्? शुक्लतरे, शुक्लतमे। अद्व्यञ्जनादित्येव—रात्रितरायाम् निशातमायाम्; रात्रिकाले। 'उतरपदाधिकारे प्रत्ययमात्रस्य ग्रहणं न तदन्तस्य' "नवाऽखित्कृदन्ते रात्रेः" (३. २. ११७.) इत्यत्रान्तग्रहणात्, तेनात्र तन-तर-तमप्रत्ययानां स्वरूपेणैव ग्रहणं भवति ॥ २४ ॥**

**श० म० न्यासानुसन्धानम्-कालात्०**। अत्र प्रथमः कालशब्दोऽर्थप्रधानो द्वितीयः शब्दप्रधानः, तत्र चाचार्याणां व्याख्यानमेव मूलम्। पाणिनीये तु प्रकृतसूत्रस्थानीये "घकालतनेषु कालनाम्नः" (पा० सू० ६. ३. १७) इति सूत्रे स्पष्टं कालनाम्न इत्येव पठ्यते। स्वमते चोत्तरपदसमानाधिकरणानां तन-तर-तमानां साहचर्यात् परस्य कालशब्दस्य स्वरूपपरत्वे निर्णीते, पूर्वोत्तरोभयपदत्वं कालशब्दस्य न दृष्टमिति न्यायत एव पूर्वस्य कालशब्दस्यार्थपरत्वं विज्ञास्यत इति बुद्ध्या कालनामग्रहणं न कृतमिति वृत्तिकृत् स्पष्टयति—**कालवाचिनः** इति। क्रमश उदाहर्त्तुं प्रतीकमाह—**तने**ति। पूर्वाह्णे भवः—**पूर्वाह्णेतनः** अह्नः पूर्वो भागः—पूर्वाह्णः, अह्नोऽपरो भागोऽपराह्णः, सप्तम्यन्ताभ्यां कालवाचिभ्यां पूर्वाह्णाऽपराह्णशब्दाभ्यां भवार्थे "पूर्वाह्णाऽपराह्णात् तनट्" (६. ३. ८७) इति तनट्, सप्तम्या ऐकार्थ्यनिमित्तके लोपे प्राप्तेऽनेन निषेधो विकल्पेन। **पूर्वाह्णेतरामि**ति—द्वयोरतिशयेन पूर्वाह्णे इति पूर्वाह्णेतराम्, "द्वयोर्विभज्ये तरप्°" (७. ३. ६) इति तरप्, ततश्च सप्तम्या अलुप्पक्षे सप्तम्यर्थस्योक्ततया समुदायात् प्रथमैव विभक्तिः, तत्र च "कित्याद्यव्ययात्" (६. ३. ८) इत्याम्। यत्र च सप्तमी लुप्यते तत्र सप्तम्यर्थस्य प्रतिपत्त्यर्थं समुदायात् सप्तमी प्रयुज्यते, तदाह—**पूर्वाह्णतरे** इति, एव**मपराह्णेतरामि**त्यादावप्यूह्यम्, यत्र च बहूनां मध्ये विभागो वा प्रकर्षो वा वाच्यस्तत्र "प्रकृष्टे तमप्" (७. ३. ५) इति तमप्, शेषं पूर्ववत्। अथोभयोः बहूनां वा पूर्वाह्णानां मध्ये निर्धारणीये पूर्वाह्णे को विशेषो यः प्रत्ययेन प्रत्याय्येतेति चेत्? सत्यम्—पूर्वपूर्वसमयकृत एव प्रकर्षोऽवधार्यताम्। अयमाशयः—सूर्योदयावधि मध्यंदिनात् पूर्वो भागः पूर्वाह्णः, तत्रोत्तरोत्तरमुहूर्त्तापेक्षया पूर्वपूर्वतरमुहूर्त्तस्य प्रकृष्टं पूर्वाह्णत्वमिति स एव प्रकर्षः प्रत्ययेन प्रत्याय्यते। **पूर्वाह्णे काले** इति—यद्यपि पूर्वाह्णस्य कालत्वमव्यभिचरितमिति न तत्र कालशब्दप्रयोगापेक्षा, तथापि सामान्यविशेषभावेन युज्यत एवोभयोः प्रयोगः, यथा 'तक्षकस्य सर्पस्य, वेदज्ञस्य विदुषः' इत्यादि तथा चात्र परिनिष्ठितविभक्त्या विशेषणसमासः। तनस्य कालवाचकादेव विधानात् कालस्यापि कालवाचकेनैव सामानाधिकरण्यात् तन्मध्यपतितयोस्तरतमयोरपि परतः कालवाचकादेव परस्याः सप्तम्या अलुप् भविष्यतीति कालादिति व्यर्थमिति शङ्कते—**कालादिति किमिति**—विशेषानुक्तौ यतः कुतश्चन परस्याः सप्तम्या अपि लुपो निषेधे बाधकाभाव इति कालवाचकादन्यतोऽपि परस्याः सप्तम्या लुब्निषिध्येतैवेति तद्वारणाय कालादित्यावश्यकमित्याह—**शुक्लतरे शुक्लतमे** इति—द्वयोर्बहूनां वा मध्ये प्रकृष्टे शुक्ले इति विग्रहे प्रत्यय. पूर्ववत्, ऐकार्थ्यनिमित्ता च लुप्, अद्व्यञ्जनादित्यप्यावश्यकमिति स्मारयति—**अद्व्यञ्जनादित्येवे**ति। तद्व्यावर्त्यमाह—**रात्रितरायामि**ति—द्वयोर्बह्वीनां वा प्रकृष्टायां रात्रौ निशायामिति वा विग्रहः, अत्रापि निर्धार्यमाणरात्रौ स्वरूपकृतप्रकर्षाभावेऽपि रात्रिसह-

"Aho Shrutgyanam"

चार्यन्धकारादिगुणप्रकर्षबोधायैव तरतमौ प्रत्ययाविति बोध्यम्। **रात्रिकाले** इति–रात्रौ काले इति विग्रहः, पूर्ववत् सामान्यविशेषभावकृतं सामानाधिकरण्यं बोध्यम्। अत्र सूत्रे तनतरतमाः प्रत्ययाः, यद्यपि तनोतेस्तरतेस्ताम्यतेश्चापि कृते तनतरतमशब्दा अपि सिध्यन्ति, ततश्च तेषामपीह ग्रहणमित्याशङ्कोदेति तथापि ※प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहणम्※ इति न्यायसाहाय्येन प्रत्ययानामेव तेषां ग्रहणमिति निर्णीयते, ततश्च ※प्रत्ययग्रहणे तदन्तस्य ग्रहणम्※ इति न्यायेन तनाद्यन्ते उत्तरपदे इत्येवार्थ उचितः, कथमिह तनतरतमानां केवलानां ग्रहणमित्याशङ्कायामाह––**उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्य ग्रहणं न तदन्तस्येति**––"न नाम्येकस्वरात् खित्युत्तरपदेऽमः" (३.२.९) इति सूत्रादारब्धे उत्तरपदाधिकारे प्रत्ययस्य स्वरूपतो ग्रहणे केवलं तत्स्वरूपस्यैव ग्रहणम्, किन्तु प्रत्ययग्रहणन्यायसहकारेण तत्प्रत्ययान्तस्य ग्रहणं न भवतीति भावः। नियमे बीजमाह––**"नवा खित्कृदन्ते" इत्यत्रान्तग्रहणादिति**–कृत्पदस्य कृदन्तार्थकत्वं स्वत एव भविष्यतीति अन्तग्रहणं व्यर्थमेव, व्यर्थीभूतेन प्रकृतनियमे ज्ञापिते तु तदन्तार्थत्वं न स्यादित्यन्तग्रहणस्य स्वांशे चारितार्थ्यम्। न चैवं "न नाम्येकस्वरात् खित्युत्तरपदेऽमः" (३.२.९) इत्यत्र "तत्पुरुषे कृति" (३.२.२०) इत्यादौ च तदन्तग्रहणाभावे कथं तत्र तत्र तदन्तार्थलाभ इति वाच्यम्, एतादृशेषु खिन्मात्रस्य कृन्मात्रस्य वा उत्तरपदत्वाभावेन सूत्रवैयर्थ्यसंभावनया तदन्तग्रहणस्यावश्यकत्वाल्लक्ष्यानुरोधात् प्रकृतनियमाप्रवृत्तेः, एवं च प्रकृतनियमे सति संभवे इति योजनीयमिति फलति। स्पष्टं चेदं "नवा खित्कृदन्ते" (३.२.११७) इति सूत्रस्य बृहद्वृत्तौ, तथाहि–तत्रोक्तम्–"न नाम्येकस्वरात् खिति०" (३.२.९) इत्यादौ त्वसम्भवात् तदन्तग्रहणमिति, तथा च यत् फलितं तदाह–– **तेनात्रेति। स्वरूपेणैवेति**––न तु तदन्तानामित्येवकारलभ्योऽर्थः ॥३.२.२४॥

## शय-वासि-वासेष्वकालात्। ३.२.२५॥

**त० प्र० अकालवाचिनोऽद्व्यञ्जनान्ताच्छब्दात् परस्याः सप्तम्याः शयादिषूत्तरपदेषु लुप् न भवति वा। बिलेशयः, बिलशयः; खेशयः, खशयः; वनेवासी, वनवासी; अन्तेवासी, अन्तवासी; ग्रामेवासः, ग्रामवासः। बहुलाधिकारान्मनसिशयः कुशेशयमिति नित्यं लुबभावः। 'हृच्छयः चित्तशयः' इत्यत्र तु नित्यं लुप्। अकालादिति किम्? पूर्वाह्णशयः अपराह्णशयः। अद्व्यञ्जनादित्येव–भूमिशयः, गुहाशयः॥ २५॥**

**श० म० न्यासानुसन्धानम्––शय०। अकालादिति** पर्युदासः कालवाचिभिन्नादित्यर्थकः, तत्र चानुवृत्तमद्व्यञ्जनादिति विशेषणतया समन्वेति, तदाह––**अकालवाचिनोऽद्व्यञ्जनादिति**। 'शयादीनां' चोत्तरपदेन सह सामानाधिकरण्यम्, तच्च ( उत्तरपदे इति च ) एकवचनान्तमपि शयादीनां बहुत्वेन तदनुरोधात् बहुवचनान्ततया विपरिणमतीति सर्वत्रेदृशस्थले बोध्यम्। शेते इति शयः। वसतीति तच्छीलो वासी, वसनं– वासः। **बिलेशयः** सर्पः, यद्यपि मूषकादिरपि तथाभूतस्तथापि सर्प एवास्य प्राचुर्येण प्रयोगः। खे–आकाशे शेते–अनायासेन तिष्ठतीति–**खेशयः** आकाशचारी। **अन्तेवासी**––रूढ्या गुरुसमीपवासकर्त्ता शिष्यः। अस्य विकल्पविधित्वेऽपि क्वचिन्नित्यालुपो दर्शनं कथमिति शङ्कायामाह––**बहुलाधिकारादिति**– बहुलमित्यस्य प्रकृतत्वाल्लक्ष्यानुसारात् तस्य व्यवस्थापकत्वमिति क्वचिन्नित्यमपि लुपो निषेधो भवति, यथा–– **मनसिशयः** इति–– कामदेवस्य नामेदम्। **कुशेशयमिति**––कुशे–जले शेते इति व्युत्पत्त्या कमलनामेदम्, अनयोः संज्ञाभङ्गभिया नित्यमेव सप्तम्या अलुप्। एवं- क्वचिल्लुबेव नित्यं, तदपि बहुलग्रहणानुवृत्तिसामर्थ्यादेव साध्यमित्याह–– **'हृच्छयः, चित्तशयः' इत्यत्र त्विति**–– उभयमपि कामदेवनामैव 'हृदि शेते, चित्ते शेते' इति व्युत्पत्त्या। अकालादित्यस्य व्यावर्त्यं बोधयितुमाह–**अकालादिति किमिति पूर्वाह्णशयः** इति–पूर्वाह्णे शेते अपराह्णे शेते इति व्युत्पत्तिः, पूर्वाह्णाऽपराह्णशब्दयोः कालवाचकत्वात् ततः परस्याः सप्तम्या नित्यमेव लुब् भवति, अकालादित्यस्याभावे विकल्पः स्यात्। अद्व्यञ्जनादित्यस्यापि सम्बन्ध आवश्यक एवेत्याह– **अद्व्यञ्जनादित्येवेति**। तद्व्यावर्त्यमाह– **भूमिशयः, गुहाशयः** इति– विशेषणतया प्रयुक्ताविमौ शब्दौ, भूमिशयो भिक्षुः। "गुहाशयानां सिंहानां परिवृत्त्यावलोकितम्" इति **रघुवंशे** चतुर्थसर्गे **कालिदासः**, अद्व्यञ्जनादित्यस्याभावे इहापि भूमौशय इत्यादिप्रयोगः स्यादिति तद्वारणायाद्व्यञ्जनादित्यस्य सम्बन्ध आवश्यक इति॥ ३-२-२५॥

## वर्ष-क्षर-वरा-ऽप्सरः-शरोरो-मनसो जे। ३.२.२६॥

**त० प्र० 'वर्ष, क्षर, वर, अप्, सरस्, शर, उरस्; मनस्' इत्येतेभ्यः परस्याः सप्तम्या जे उत्तरपदे वा लुप् भवति।**

"Aho Shrutgyanam"

वर्षेजः, वर्षजः; क्षरेजः, क्षरजः; वरेजः, वरजः; अप्सुजम्, अब्जम्; सरसिजम्, सरोजम्; शरेजः, शरजः; उरसिजः, उरोजः; मनसिजः, मनोजः ॥ २६ ॥

श० म० न्यासानुसन्धानम्— **वर्ष०** । वर्षक्षरादीनां समाहारो लाघवानुरोधेन । वर्षादीन् सूत्रे सन्धिनिर्दिष्टान् पृथक् पृथगाह स्पष्टार्थम्- **वर्षक्षरवरेत्या**दिना, वर्षणं वर्षः, क्षरतीति क्षरो मेघो जलं च, व्रियते इति वरः श्रेष्ठः, अप्-शब्दो जलवाचितया प्रसिद्धः, सरो जलाशयविशेषः, शृणाति हिनस्तीति शरो बाणस्तृणविशेषश्च, उरो वक्षःस्थलम्, मनो मननक्रियमन्तःकरणम् । एभ्यः सप्तम्यन्तेभ्यः "सप्तम्याः" (५-१-१६८) इति भूतार्थे डः । ङस्युक्तसमासे ऐकार्थ्यनिमित्तलुपोऽनेन वैकल्पिकः प्रतिषेधः॥३-२-२६॥

## द्यु-प्रावृड्-वर्षा-शरत्-कालात् । ३. २. २७ ॥

त० प्र० **योगविभागाद् वेति निवृत्तम्, दिव्प्रभृतिभ्यः परस्याः सप्तम्या जे उत्तरपदे परे लुप् न भवति । दिविजः, प्रावृषिजः, वर्षासुजः, शरदिजः; कालेजः ॥ २७ ॥**

श० म० न्यासानुसन्धानम्--**द्यु०** । अत्रापि समाहारद्वन्द्व एव । 'जे' इति च पूर्वसूत्रात् संबध्यते । नित्यश्चायं विधिरित्याह-**योगविभागाद् वेति निवृत्तमि**ति-पूर्वसूत्राद् विशेषस्य वक्तुमिष्टत्वादेव पृथक् सूत्रमिदमारब्धम्, स च विशेषोऽन्यः कः स्यादृते विकल्पासम्बन्धादिति विभक्तयोगेन विकल्पासम्बन्धोऽनुमीयत इति भावः । द्यौरन्तरिक्षम्, प्रावृड् वर्षर्तुः, वर्षा अपि सैव, शरत् स्वनामख्यात ऋतुः, एभ्यः सप्तम्यन्तेभ्यः "सप्तम्याः" (५-१-१६८) इति भूते डे ङस्युक्तसमासे सप्तमीलुपो निषेधे दिविजादीनां सिद्धिः । 'सप्तमीति' सामान्येनोच्चारणाद् बहुवचनस्यापि लुपो निषेधाद्- **वर्षासुजः** इति, वर्षाशब्दस्यर्तुवाचकस्य बहुवचनान्तत्वं लोकशास्त्रप्रसिद्धम् ॥ ३-२-२७ ॥

## अपो य-योनि-मति-चरे । ३. २. २८ ॥

त० प्र० **अप्शब्दात् परस्याः सप्तम्या यप्रत्यये योनिमतिचरेषु चोत्तरपदेषु लुब् न भवति । अप्सु भवः-अप्सव्यः, दिगादित्वाद् यः, अप्सुयोनिः,अप्सुमतिः; अप्सुचरः ॥ २८ ॥**

श० म० न्यासानुसन्धानम्—**अपो०** । अत्र **य** इति प्रत्ययः, पूर्वोक्तज्ञापकात् तदन्तविध्यभावे स्वरूपमात्रग्रहणम् । योनि-मति-चराः शब्दाः, तेषां च स्वरूपग्रहणमेव 'स्वं रूपम्' इति न्यायात् । **अप्सव्यः** इति--विशेषणतयैव प्रयुक्तोऽयं शब्द इति बोध्यम् । यप्रत्ययस्याप्शब्दाद् विशिष्यानुपलब्धेराह--**दिगादित्वादिति** । **अप्सुयोनिरिति**—अप्सु योनिः उत्पत्तिर्यस्येत्यर्थात् पूर्वप्रयोगसमानार्थक एवायं प्रयोगः, उष्ट्रमुखादित्वाज्ज्ञापकाद् वा समासः । **अप्सुमतिरिति**— अयमपि विशेषणभूत एव ।

पाणिनीये च "अपो योनियन्मतुषु" [पा० सू० वार्त्तिकम् ६-३-१८] इत्यत्र मतिशब्दस्थाने मतुः पठयते, तत्र च मतुप् प्रत्ययो गृह्यत इत्याशयेन "अप्सुमन्तावाज्यभागौ" इत्युदाहृतं **दीक्षितेन**, परं च सप्तम्यन्तान्मतुः क्वापि न दृष्टः । किञ्च "अलुगुत्तरपदे" (पा० सू० ६-३-१) इति सूत्रे महाभाष्ये "अपो योनि-यन्मतिषु चोपसंख्यानम्" इत्येव वार्त्तिकं दृश्यते, तत्र 'अप्सुमतिः' इत्युदाहरणं दत्तम्, तत्र नागेशेनोक्तम्--"वृत्तिकारा **हरदत्तादय**स्तु वार्त्तिके मतुष्विति पठित्वा "अप्सुमन्तावाज्यभागौ" इत्युदाहरन्ति, भाष्येऽप्येवमेव पाठः, दृश्यमानपाठस्तु लेखकप्रमादादिति तदनुयायिनः । "हलोऽनन्तराः" (पा० सू० १-१-७) इति सूत्रे **हरि**ग्रन्थे तु अप्सुमतिरित्येव पाठो दृश्यते, युक्तं चैतत्, एकवच्चेत्यस्यातिप्रसङ्गव्याजेनास्योपन्यासो भाष्ये "नह्यप्सुमन्तावित्यत्रास्यातिप्रसङ्गोऽस्ति, 'अप्सु' इत्यनुकरणाद् ह्ययं मतुप्, नहि तत्राप्शब्दो बह्वर्थः शब्दपरत्वात् शब्दस्य चैकत्वात् । प्रकृतिवदित्यतिदेशोऽपि शास्त्रीयधर्मातिदेशको न त्वस्य लौकिकस्य । किञ्चास्यवामीयमित्यादाविव तत्र लुकः प्राप्तिरेव नेति" इति । अयमाशयः-लक्ष्यं लक्षणं च साधुत्वविज्ञाने मूलम्, लक्ष्यैकचक्षुष्काणामाचार्याणां कृते लक्ष्यदर्शनमस्माकं च कृते लक्षणदर्शनम् । तत्र लक्षणे सन्देहे सति लक्ष्यानुसारेणैव तद्व्यवस्था नेया भवति, तत्र लक्ष्यमुभयविधं दृश्यते, 'अप्सुमन्तावाज्यभागौ' इति याज्ञिकसम्प्रदायस्थम्, अप्सुमतिरिति लौकिकव्यवहारस्थम्, तत्राप्सुमन्तावित्यस्य अप्सुशब्दवन्तावित्येवार्थो याज्ञिकसम्प्रदायप्रसिद्धः । तदर्थश्च—कारीरीयागे 'अप्स्वग्ने सधिष्टव, अप्सुमे सोमो अब्रवीत्' इत्यादी आज्यभागमन्त्रौ स्तः, अत एव तयोराज्यभागयोर्नाम-अप्सुमन्ताविति, ततश्च अप्सु इति शब्दोऽस्त्यनयोरिति, तत्राप्सुशब्दस्य शब्दपरत्वमेवास्थेयम् । एवं सति तस्य न बह्वर्थत्वं, तस्य शब्दस्यैकत्वात् । महाभाष्ये च "अलुगुत्तरपदे" (पा० सू० ६-३-१) इति सूत्रे अलुग्विधिस्थले एकवद्भावो वक्तव्यः, द्विवचनं-बहुवचनान्ताभ्यामपि विग्रहे एकवचनस्यैव प्रयोगो

"Aho Shrutgyanam"

यथा स्यादित्येवमर्थम्, यथा स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्तो वा स्तोकान्मुक्त इत्येव भवेत्। इत्याशङ्कायाम्–'एकवद्वचनमनर्थकम्' (वा०) एकवद्भावश्चानर्थकः। द्विबह्वोरलुक्कस्मान्न भवति ? "द्विबहुष्वसमासः" (वा०) द्विवचनबहुवचनान्तानामसमासः। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते ? 'उक्तं वा' (वा०) किमुक्तम्–अनभिधानादिति। तच्चानभिधानमवश्यमाश्रयितव्यम्' इति प्रकृत्य, एकवद्वचने हि गोषुचरेऽतिप्रसङ्गः (वा०) 'एकवद्वचने हि सति गोषुचरेऽतिप्रसङ्गः स्यात्, गोषुचरः। 'वर्षाभ्यश्च जे' (वा०) वर्षाभ्यश्च जेऽतिप्रसङ्गो भवति। वर्षासुजः, अपोयोनियन्मतिषुचोपसंख्यानम्, अपोयोनियन्मतिषुचोपसंख्यानं कर्तव्यम्, 'जे चरे च (वा०)' जे चरे चातिप्रसङ्गो भवति, अप्सुयोनिः, अप्सव्यम्, अप्सुमतिः, अप्सुजः, अप्सुचरः" इति पाठो दृश्यते। तत्रालुपः स्थले एकवचनान्तस्यैव प्रयोगः स्यादिति वक्तव्यमिति पक्षे दोषप्रदर्शनायैवाप्सुमतिरित्यप्युदाहृतमिति स्पष्टं प्रतीयते। न चाप्सुमन्तावित्यत्राप्सुशब्दो बहुत्वार्थ इति प्रतिपादितपूर्वम्। ततश्च मतुष्विति पाठो न भाष्यप्रकरणानुसारीति मतिष्वित्येव पाठो युक्तिसङ्गत इति निश्चीयते। किंच तस्य शब्दस्वरूपबोधकस्याप्सुशब्दस्य सप्तम्यन्तत्वमपि नास्ति, किन्तु सप्तम्यन्तवाचकत्वम्, प्रकृतिवदनुकरणमिति प्रकृतिवद्भावेन शास्त्रीयधर्मस्यैवातिदेशो भविष्यति, न तु लौकिकस्य स्वरूपगतविशेषस्य सप्तम्यन्तत्वस्य। किञ्च सप्तम्यन्तत्वलाभेऽपि न ततो मतुर्भवितुमर्हति प्रथमान्तादेव तद्विधानात्। तथा च मतुप्रत्ययोत्पत्त्यर्थमपि अप्सुमन्तावित्यस्य शब्दस्वरूपपरत्वमास्थेयमिति न तस्यालुप् प्रकरणोदाहरणत्वसम्भव इत्यलं प्रसङ्गागतविस्तरेणेति ॥ ३-२-२८ ॥

## नेन्-सिद्ध-स्थे । ३. २. २९ ॥

**त० प्र० इन्प्रत्ययान्ते 'सिद्ध स्थ' इत्येतयोश्चोत्तरपदयोः सप्तम्या अलुप् न भवति, भवत्येवेत्यर्थः। इन्–स्थण्डिले वर्तते–स्थण्डिलवर्ती, एवं–स्थण्डिलशायी; सांकाश्यसिद्धः, समस्थः, विषमस्थः। "शय-वासि०" ( ३. २. २५. ) इत्यादियोगद्वयविकल्पः "द्यु-प्रावृड्वर्षा०" ( ३. २. २७. ) इत्यादियोगद्वयविधिरनेन प्रतिषेधश्च "तत्पुरुषे कृति" ( ३. २. २० ) इत्यस्यैव प्रपञ्चः, ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चेति ॥२९॥**

**श० म० न्यासानुसन्धानम्—नेन्०।** अत्र इन् प्रत्ययः, सिद्ध-स्थौ च शब्दौ, तत्र यद्यपि 'उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तु तदन्तस्य" इति ज्ञापकसिद्धं वचनं पूर्वमुक्तम्, ततश्च तदन्तबोधो न स्यात्, तथापि केवलस्येन्प्रत्ययस्य सप्तम्यन्तेन सह सम्बन्धो न संभावित इत्यसंभवादेवेहापि तदन्तग्रहणम्। तथाहि—इन्प्रत्ययो द्विविधः–कृत् तद्धितश्च, तत्र कृत्प्रत्ययो धातोर्विधीयत इति तस्य सप्तम्यन्तात् परत्वासंभवः स्पष्ट एव। तद्धित इन् प्रत्ययो मत्वर्थीयः, स च प्रथमान्तादेवास्यास्तीत्यर्थे विधीयत इति तस्यापि सप्तम्यन्तात् परत्वासंभव एव। अत आह–**इन्प्रत्ययान्त** इति। **भवत्येवेत्यर्थः** इति–लुबिति शेषः, नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वसूचनायैवकारोपन्यासः। **'अलुप् न भवति'** इत्यस्य लुपोऽभावो न भवतीति प्रतिपादकत्वेनावश्यं लुप् भवतीत्यत्रैव पर्यवसानात्। क्रमश उदाहर्तुमाह–**इनिति। स्थण्डिले वर्त्तते।** इति–स्थण्डिलमेकहस्तविस्तृतो द्विहस्तायामको गर्त्तविशेषः, यत्र शयनं भिक्षुकस्य विहितम्, अथ च चत्वरेऽपि स्थण्डिलशब्दः, यज्ञार्थं परिष्कृतस्थाने, होमार्थे कुण्डप्रतिनिधित्वेन वालुकादिभिः कर्त्तव्ये मण्डलभेदे च, तथाहि—

"नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत्।
हस्तमात्रं तु तत् कुर्याद् बालुकाभिः समाचितम् ॥"

इति तन्त्रम्।

तत्र वर्तते (तच्छीलः) **स्थण्डिलवर्त्ती,** एवं–स्थण्डिले चत्वरे पूर्वोक्ते गर्त्तविशेषे वा शेते तच्छीलः–**स्थण्डिलशायी,** उभयत्र "अजातेः शीले" ( ५-१-१५४ ) इति णिन्। सांकाश्ये सिद्धः, काम्पील्ये सिद्ध इत्युभयत्र कृदुत्तरपदः समासः। समे तिष्ठतीति–**समस्थः,** विषमे तिष्ठतीति–**विषमस्थः,** अत्रापि स एव समासः। सर्वत्र "तत्पुरुषे कृति" (३-२-२०) इति अलुप् प्राप्तः, सोऽनेन निषिध्यत इति लुबेव भवति। "शय-वासि०" (३-२-२५) इत्यत आरभ्य प्रकृतसूत्रपर्यन्तं पञ्च सूत्राणि कृदन्तेष्वेवोत्तरपदेषु प्रवर्त्तन्ते, ततश्च "तत्पुरुषे कृति" (३-२-२०) इति सूत्रेणैव सर्वेषां लक्ष्याणां सिद्धिः सम्भवति, यत्र विकल्पो यत्र वा नित्यं यत्र वा निषेध इष्टस्तत् सर्वं बाहुलकादेव सेत्स्यतीति सूत्रपञ्चकं व्यर्थमेवेत्याशङ्कां स्वीकृत्य समाधत्ते–**शय-वासीत्यादियोगद्वयविकल्प** इत्यादिना, अयमर्थः–"शय-वासि-वासेष्वकालात्" (३-२-२५) "वर्ष-क्षर-वर०" (३-२-२६) इति च सूत्राभ्यां विकल्पेनालुप् विधीयते, "द्युप्रावृट्" (३-२-२६) इति "अपो ययोनि०" (३-२-२८) इति च

"Aho Shrutgyanam"

सूत्राभ्यां नित्यमेवालुप् विधीयते, प्रकृतसूत्रेण च निषिध्यते; तत् सर्वं "तत्पुरुषे कृति" (३-२-२०) इति सूत्रविधेयस्यार्थस्यैव मन्दबुद्धिशिष्यबोधाय प्रपञ्चनं, विस्तरेणाख्यानमिति यावत्। तमिममर्थं द्रढयति--**ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चेति**—वै शब्दो हेत्वर्थकः, यतः-येषां विधीनां लक्षणं-संक्षिप्य कथनं, प्रपञ्चो-विस्तरेणाख्यानं च क्रियते, ते विधयः सुसंगृहीताः-शोभनप्रकारेण शिष्यैर्ज्ञाता भवन्ति, केवलसंक्षेपाख्यानेन न सर्वेषां बोद्धृणां हृदयङ्गमो भवति विधिरिति प्रपञ्चरूपेणाख्यानमप्यावश्यकमिति भावः ॥ ३-२-२९ ॥

## षष्ठ्याः क्षेपे । ३. २. ३० ॥

**त० प्र० क्षेपे गम्यमाने उत्तरपदे परे षष्ठ्या लुप् न भवति। चौरस्यकुलम्, दासस्यभार्या, वृषल्याःपतिः। क्षेप इति किम्? ब्राह्मणकुलम्। कथं चौरकुलं? दासभार्या? वृषलीपतिः? तत्त्वाख्यानमेतन्न क्षेपः ॥ ३० ॥**

**श० म० न्यासानुसन्धानम्—षष्ठ्याः०।** क्षिप्यते प्रतिष्ठायाः प्रच्याव्यतेऽनेनेति क्षेपो निन्दा, निन्दया जनः क्षिप्यते—लोकप्रतिष्ठायाः प्रच्युतो भवति, अथवा क्षेपणं—तत एव प्रच्यावनं क्षेपः, तस्मिन् गम्यमाने सति उत्तरपदे परे षष्ठी न लुप्यत इत्यर्थः, स च क्षेपः प्रत्यासत्त्या षष्ठीप्रकृतिसम्बन्धप्रयुक्त एव ज्ञेयः। तथा च नृपस्य पिशुन इति विग्रहे **नृपपिशुन** इत्यादौ न सूत्रं प्रवर्त्तते, षष्ठीप्रकृतिनृपसम्बन्धप्रयुक्तस्य निन्दितत्वस्याभावात्। किंच क्षेपोऽत्र उत्तरपदार्थस्यैव वाच्यः, तस्यैव प्राधान्यात्, क्षेपस्य चानिन्दितस्य निन्दायामेव पर्यवसानम्, यश्च स्वयमेव निन्दितस्तस्य तु नासौ क्षेपः, किन्तु यथार्थकथनमेवेति न भवति तत्र सूत्रप्रवृत्तिः। **चौरस्यकुलमि**ति-चौरसम्बन्धात् कुले निन्दितत्वं प्रतीयते **दासस्यभार्ये**ति-योऽयं दासस्तेन सह स्वामिन्याः [ स्वामिपत्न्याः ] भार्याया व्यवहारादेव तस्येयं भार्या, नतु वस्तुतस्तया सह पतिपत्नीभावः, भार्यात्वेनोक्तताया निन्दा गम्यत एव। **वृषल्याः पतिरि**ति येयं वृषली सा न तस्य पत्नी, किन्तु तया सह तस्य पत्नीवद् व्यवहार इति सोऽपि तस्याः पतिरित्याख्यायते, तथा च नीच-परस्त्रीसंसर्गकृतं तस्य निन्दितत्वमवगम्यते। **क्षेपे किमि**ति--तथा च षष्ठ्या इत्येतावन्मात्रं सूत्रमस्तु, उत्तरपदे परे षष्ठ्या लुप् नेत्येवार्थोऽस्तु इति प्रष्टुराशयः। एवं सति यत्र न निन्दाविवक्षा तत्रापि [ सर्वस्मिन् षष्ठीसमासे ] विभक्तिलुपो निषेधः स्यादिति प्रत्युदाहरणमुखेनाह—**ब्राह्मणकुलमि**ति-अत्रहि कुले ब्राह्मणसम्बन्धान्न क्षेपः प्रतीयते, प्रत्युत प्रशंसैव प्रतीयत इतीह न भवति निषेधः, क्षेपग्रहणाभावेऽत्रापि स्यादेव। चौरकुलादयोऽपि प्रयोगा दृश्यन्ते ते कथमित्याशङ्कते—**कथं चौरकुलमि**त्यादि। उत्तरयति-**तत्त्वाख्यानमेतन्न क्षेप** इति-तत्त्वं यथार्थस्थितिः, तस्याख्यानं कथनमेतच्चौरकुलादि न तु क्षेपः, न निन्दायां तात्पर्यम्। अयमाशयः—यश्चौरत्वेन ख्यात एव, तस्य कुलं न तत्सम्बन्धान्निन्दितमपि तु वस्तुस्थितिरेव तादृशीति न क्षेपः, अनिन्दितस्य निन्दितत्वे क्षेपः। एवं दासस्य स्वीया भार्या न दाससम्बन्धान्निन्दिताऽपि तु तस्याः स्वरूपमेव तत्। वृषल्याः स्वीय एव पतिर्न तु तयासह तस्यानुचितः सम्बन्ध इति न निन्दितत्वमिति ॥ ३-२-३० ॥

## पुत्रे वा । ३. २. ३१ ॥

**त० प्र० पुत्रशब्दे उत्तरपदे क्षेपे गम्यमाने षष्ठ्या लुप् वा न भवति। दास्याः पुत्रः, दासीपुत्रः; वृषल्याःपुत्रः वृषलीपुत्रः। क्षेपे इत्येव-ब्राह्मणपुत्रः। दासीपुत्र इति तु तत्त्वाख्याने। पूर्वेण नित्यं निषेधे प्राप्ते विकल्पः ॥ ३१ ॥**

**श० म० न्यासानुसन्धानम्-पुत्रे०।'** 'क्षेपे' इति पूर्वसूत्रादनुवर्त्तते। विकल्पविधानार्थो योगः, अन्यथा पूर्वेणैव सिद्धेः। **दास्याः पुत्रः** इति-दासस्य नायं पुत्रोऽपि तु दास्याः, तथा चानुचितस्वामिसम्बन्धजातत्वं तस्य प्रतीयत इति क्षेपः। एवं-**वृषल्याः पुत्रः** इत्यत्रापि। **क्षेप इत्येवेति**-'क्षेपे' इत्यस्यानुवृत्तिरावश्यिकैवेत्यर्थः। तद्व्यावर्त्यमाह-**ब्राह्मणपुत्रः** इति-अत्र ब्राह्मणसम्बन्धात् पुत्रे न निन्दाऽपितु प्रशंसैवाथवा तत्त्वकथनमेव। केवलं दासीपुत्र इति प्रयोगोऽपि भवति, तत्र दासीसम्बन्धो नानुचितः पुत्रेऽपि तु वास्तव एवेत्याह **दासीपुत्र इति तत्त्वाख्याने** इति। यद्यपि क्षेपेऽपि निषेधस्य वैकल्पिकत्वेन पाक्षिको दासीपुत्र इति प्रयोगो भवत्येव, तथा च क्व निन्दा क्व तत्त्वाख्यानमिति कथमवगम्येत, तथा चोभयविधः प्रयोगः क्षेप एवेत्येके, वस्तुतो दासीसुतस्याख्याने दासीसुतादय एव शब्दाः प्रयोक्तव्या इति तेषामाशयः, तथापि क्षेपाऽक्षेपयोः प्रकरणगम्यत्वमपि सम्भवतीति क्षेपाभावेऽपि दासीपुत्रप्रयोगो नानुचित इति स्वमतम्। सूत्रप्रयोजनं स्पष्टयति-**पूर्वेण नित्यं निषेधे प्राप्ते** इति-पूर्वसूत्रस्य सामान्यतः क्षेपे प्रवृत्त्या पुत्रशब्दे परेऽपि तस्य प्राप्तिरस्त्येवेति तदपवादरूपोऽयं विकल्पविधिरिति भावः ॥ ३. २. ३१ ॥

"Aho Shrutgyanam"

## पश्यद्-वाग्-दिशो हर-युक्ति-दण्डे ।३. २. ३२॥

**त० प्र० पश्यद्-वाग्-दिक्शब्देभ्यः परस्याः षष्ठ्या यथासंख्यं हर-युक्ति-दण्डेषूत्तरपदेषु लुब् न भवति । पश्यतोहरः, अनादरे षष्ठीयम्, जनं पश्यन्तमनादृत्य हर्तेत्यर्थः; वाचोयुक्तिः, दिशोदण्डः, संबन्धषष्ठ्यौ ॥ ३२ ॥**

**श० म० न्यासानुसन्धानम्–पश्यद्०** । उभयत्र समाहारद्वन्द्वः, स च पूर्वमेकसमूहस्यापरसमूहेन सहान्वयविवक्षारूपसहोक्तिमाश्रित्य विधीयते, पश्चाद् यथासंख्यन्यायबलात् पश्यतः परस्याः षष्ठ्या हरशब्दे उत्तरपदे, वाचः परस्याः षष्ठ्या युक्तिशब्दे उत्तरपदे, दिशः परस्याः षष्ठ्या दण्डशब्दे उत्तरपदे इत्येवंरूपेण लक्ष्यसंस्कारको वाक्यार्थबोधः, तदाह–**यथासंख्यं हर-युक्ति-दण्डेष्विति**–पूर्वमेव प्रत्येकमन्वयविवक्षायां तु न स्यात् समासः, सहोक्त्यभावात् । **पश्यतोहरः** इति–स्वर्णकार एतेन शब्देन ख्यातः, स हि पश्यत एव लोकस्याभूषणादिनिर्माणकर्मणि सुवर्णादिकं धाष्टर्येन हरति, अल्पमूल्यं द्रव्यान्तरं तत्र क्षिप्त्वा बहुमूल्यं सुवर्णादि चोरयतीति प्रसिद्धिः, अत्र बहूनामपि पश्यतां हरणे पश्यतो हर इत्येव प्रयोगोऽभिधानस्वाभाव्यात्, यत्र च बहुत्वं विवक्षितं तत्र समास एव नेत्यपि शब्दशक्तिस्वभावमनुरुध्य कथयितुं शक्यत इति **केचित्** । बहुत्वविवक्षायामपि भवत्येवालुबिति **परे। धाष्टर्यमेव द्योतयति-अनादरे षष्ठीयमिति,** अयमाशयः-पश्यत इत्यत्र षष्ठी न स्वस्वामिभावसम्बन्धे, हरेण सह तस्य तथाविधसम्बन्धाभावादसामर्थ्यात् समासो न स्यात्, तथा च पश्यन्तं लोकमनादृत्य-नायं ज्ञातुं प्रभवति, ज्ञात्वाऽपि न तत् प्रमाणयितुं शक्नोतीत्यादि बुद्धया स हरतीति "षष्ठीवाऽनादरे" [२-२-१०८] इति षष्ठी, तस्याः समासः । अत्रानादरक्रियाऽपि षष्ठ्यर्थ एवान्तर्भूतेति नासामर्थ्यम्, तदाह–**जनं पश्यन्तमनादृत्येत्यर्थः** इति, जनमिति कथनेन निर्मीयमाणाभूषणस्वामिनमन्यं वोदासीनजनं पश्यन्तमप्यनादृत्येत्यर्थो ध्वनितः, अयं च शब्दः स्वर्णकारे प्रायः प्रयुज्यते; **अन्ये** त्वतिचतुरचौरेऽप्ययं प्रयोग इत्याहुः । **वाचोयुक्तिरि**त्यत्र च विषयविषयिभावरूपे सम्बन्धे षष्ठी, वाग्विषय सयुक्तिप्रतिपादनमिति तदर्थः, अथ च वाचा करणभूतया सयुक्तिप्रतिपादनं वाचः स्पष्टत्वमिति वाऽर्थः, **दिशोदण्डः** इति–अत्रापि तात्स्थ्यरूपसम्बन्धे षष्ठी, तदाह–**सम्बन्धषष्ठीति** **३-२-३२।**

## अदसोऽकञायनणोः । ३. २. ३३ ॥

**अदसः परस्याः षष्ठ्या अकञ्प्रत्ययविषये उत्तरपदे आयनण्प्रत्यये च परे लुप् न भवति । अमुष्य पुत्रस्य भावः-आमुष्यपुत्रिका, एवम्–आमुष्यकुलिका, चौरादित्वादकञ्; अमुष्यापत्यम्–आमुष्यायणः, नडादित्वादायनण् । अदसोऽनन्तरमायनणो विधानान्न तत्रोत्तरपदसंभवः ॥ ३३ ॥**

**श० म० न्यासानुसन्धानम्–अदसो०** । अकञ् आयनण् द्वौ प्रत्ययौ, प्रत्ययग्रहणे चोत्तरपदाधिकारे प्रत्ययमात्रस्यैव ग्रहणमिति प्रतिपादितं वृत्तौ, ततश्च यत्र संभवस्तत्र प्रत्ययमात्रस्यैव ग्रहणम्, यत्र न संभवस्तत्र प्रत्ययान्तस्येति व्यवस्था पूर्वमुक्ता अत्र चाकञ्विषये यद्यप्यसम्भवोऽस्ति, नहि अदसः परस्याः षष्ठ्या अकञ्परत्वसंभवः, अदसोऽकञोविधानाभावात्, चौरादित्वाद्धि अकञ् विधीयते, चौरादिगणे च नादसः पाठोऽपित्वमुष्यपुत्रशब्दस्यैव, तथा चाकञ्प्रत्ययान्तमप्युत्तरपदं न संभवति, केवलपुत्रशब्दादकञोऽविधानात् । एवं च प्रत्ययमात्रस्य प्रत्ययान्तस्य चेत्युभयोरसंभवाद् विषयपरतया सप्तमीं व्याख्याति-**अकञ्प्रत्ययविषये उत्तरपदे** इति–यद्यप्युत्तरपदमात्रस्य नाकञ्विषयत्वमपि तु समुदायस्यैव तथापि समुदायद्वाराऽवयवेऽपितद्विषयताऽक्षतैवेति मत्वा 'अकञ्प्रत्ययविषये उत्तरपदे' इति व्याख्यानमङ्गीकृतं वेदितव्यम् । आयनणस्तु केवलस्यापि षष्ठ्यन्ताददसः परत्वसम्भवात् तस्य स्वरूपस्यैव ग्रहणं कर्त्तव्यम्, तदन्तस्य चोत्तरपदस्यापि नास्ति सम्भवोऽदस एव तद्विधानादिति तद्विषये स्वरूपमात्रस्य ग्रहणमित्याह–**आयनण्प्रत्यये च परतः** इति–एतच्चाग्रेऽपि व्याख्यास्यति । **अमुष्यपुत्रस्य** भावः इति, अत्रेदमाशङ्क्यते–चौरादिगणेऽमुष्यपुत्रशब्द-अमुष्यकुलशब्दयोः पाठसामर्थ्यादेवात्र षष्ठ्या अलुब् भविष्यति, एवं च सूत्रेण तद्विधानमनर्थकम्, यतो गणपाठस्याप्याचार्यपरम्पराप्राप्तत्वेन प्रामाणिकत्वं प्रयोगसाधुत्वनिर्णायकत्वं च सर्वैरेव स्वीक्रियते किञ्चामुष्यपुत्रादिशब्दस्य न केवलमकञन्तस्य प्रयोगः स्यात्, किन्तु प्रत्ययान्तरपरस्यापि, यथाऽमुष्यपुत्रस्यापत्यमामुष्यपुत्रिः, अमुष्यकुलस्यापत्यममुष्यकुलीनः, ततोऽपि प्रत्ययान्तरम्, केवलममुष्यपुत्राऽमुष्यकुलशब्दौ समस्तौ व्यस्तौ च प्रयोक्तव्यौ स्यातामिति चेत्? न–यतो गणे पाठस्य केवलमकञ्विषय एव तस्य साधुत्वमित्येतावन्मात्रार्थसाधकत्वमित्येतेन सूत्रेण बोध्यते, तदर्थमेव च सूत्रेण पुनरलुपो विधानमिति न तद्वैयर्थ्यं नवा प्रत्ययान्तरविषयता केवलप्रयोगविषयता च तस्य भवतीति । तदर्थमेवान्यैः प्रयोगस्वरूपमेव

"Aho Shrutgyanam"

निपात्यते, तथाहि–"षष्ठ्या आक्रोशे" [ पा०सू० ६-३-२१ ]इति सूत्रे महाभाष्ये 'आमुष्यायणाऽमुष्यपुत्रिकाऽमुष्यकुलिकेत्युपसंख्यानम्' इत्येव वार्त्तिकमारभ्यते। स्वमतेऽपि सूत्रेण गणपाठप्राप्तमन्यत्र प्रयोगमेव नियमयत्याचार्य इति स्वीकरणीयम्। किञ्च सूत्रगणपाठयोरेकाचार्योपदिष्टत्वेन न तयोः परस्परं प्रामाण्यापक्षेपकत्वमिति लक्षणेनाप्राप्त एवं विषयो गणपाठसामर्थ्यान्निपातितत्वेन स्वीकर्त्तव्यः। यच्च कार्यं सूत्रेणानुशिष्यते तत्र गणपाठसामर्थ्यादन्यतेति न कल्पनीयम्, सूत्रस्य श्रुतिरूपत्वाद् गणपाठानुमितविधेश्च लिङ्गरूपत्वात् "श्रुति-लिङ्गवाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति **मीमांसक**स्वीकृतन्यायात्। अयमाशयः–निरपेक्षो रवः श्रुतिः, तच्चेह सूत्ररूपम्, तस्य स्वविधेये विधौ वचनान्तरानपेक्षत्वात्, गणपाठस्तु लिङ्गरूपः, गणे तथास्थितं पाठं दृष्ट्वा तादृशविधेरनुमानात्, तथाच सूत्रापेक्षया तस्य दौर्बल्यमिति सूत्रानुकूल्येनैव तस्य नेयत्वं सिध्यतीति न कोऽपि संशयः। **चौरादित्वादकञिति**–"चौरादेः" [ ७-१-७३ ] इति सूत्रेण षष्ठ्यन्ताद् भावे अकञिति भावः। **अमुष्यापत्यमिति** इहापि नडादिगणेऽमुष्यशब्दपाठेन यद्यपि षष्ठ्या अलुप्-साधयितुं शक्यते, तथापि तथापाठस्य अमुयोरपत्यममीषामपत्यमित्याद्यर्थे आनयणोऽभावार्थत्वस्य कल्पनान्न षष्ठ्यलुप्-साधकत्वमित्यनेन सूत्रेणापि विज्ञायत इति न तेनैतत्सूत्रानर्थक्यशङ्का कार्या। 'आयनणन्ते उत्तरपदे' इत्येवार्थः कुतो न कृत इत्याशङ्कामपनुदति–**अदसोऽनन्तरमायनणोऽविधानादिति**–षष्ठ्यन्तादद एवायनण् विधीयत इति न तदन्तस्य [आयनणन्तस्य] उत्तरपदस्य सम्भव इत्यायनणन्ते उत्तरपदे इति न व्याख्यातमिति भावः ॥ ३-२-३३ ॥

## देवानांप्रियः । ३. २. ३४ ॥

त० प्र० **देवानांप्रिय इति षष्ठ्या लुबभावो निपात्यते। देवानांप्रियः ॥ ३४ ॥**

**श० म० न्यासानुसन्धानम्–देवानां०**। इदमपि निपातनरूपमेव। अयमृजौ मूर्खे वा दृश्यते, **केचित्** त्वेवमाहुः–'निपातनेनार्थविशेष-विषयता लभ्यते, तथा च मूर्खेऽयं शब्दः प्रयुज्यत इति, तथा च देवशब्दादुत्पन्नषष्ठीबहुवचनस्य प्रियशब्दे उत्तरपदेऽलुप् निपात्यते। 'अज्ञातात्मस्वरूपेऽयं प्रयोगः श्रुत्यादिषु प्रसिद्धः, कालवशान्मर्खे रूढः, मर्खा हि देवानां प्रीतिं जनयन्ति देवैः पशुरूपेणोपभोग्यत्वात् इति **मनोरमायां** प्रतिपादितम्। ब्रह्मज्ञानरहितत्वात् संसारिणो मूर्खाः, ते तु यागादिकर्माण्यनुतिष्ठन्तः पुरोडाशादिप्रदानद्वारा देवानामत्यन्तं प्रीतिं जनयन्ति। ब्रह्मज्ञानिनस्तु न तथा, तेषां यागाद्यनुष्ठानाभावात्। अतो यथा मनुष्यैर्गवादयः स्वोपभोगसम्पादकाः पशवस्तृणादिदानेन पाल्यन्ते तथा देवैरपि स्वपूजकाभोगप्रदानेन पाल्यन्त इति तेषां पशुतुल्यास्ते, इदं च **बृहदारण्यकोपनिषदि** प्रतिपादितं, तद्भाष्यकर्त्रा शङ्कराचार्येण च तस्य विस्तरशो व्याख्यानं कृतमस्ति। देवप्रिय इत्यपि प्रयोगो दृश्यते, तत्र चान्येषां मतेन मूर्खादतिरिक्तेऽर्थे तत्प्रयोगः, यतः स्पष्टमेव ते "देवानां प्रिय इति च मूर्खे" इति वचनमारभन्ते। स्वमते चैकवचनद्विवचनाभ्यां विग्रहे बहुव्रीहौ वा तथा प्रयोग इति बोध्यम् ॥ ३-२-३४ ॥

## शेप-पुच्छ-लाङ्गूलेषु नाम्नि शुनः । ३. २. ३५ ॥

त० प्र० **श्वन्शब्दात् परस्याः षष्ठ्याः शेपादिषूत्तरपदेषु नाम्नि–संज्ञायां विषये लुप् न भवति। शुनः शेपमिव शेपमस्य–शुनःशेपः, एवं–शुनःपुच्छः; शुनोलाङ्गूलः। शेपःशब्दः** सकारान्तोऽप्यस्ति, इह त्वकारान्तस्य **ग्रहणम्। नाम्नीति किम्? श्वशेपम्, श्वपुच्छम्, श्वलालङ्गूलम्। अन्ये तु 'सिंहस्यशेपं, सिंहस्यपुच्छं, सिंहस्यलाङ्गूलम्' इत्यत्रापीच्छन्ति, तन्मतसंग्रहार्थं बहुवचनम्, अनाम्न्यपि विध्यर्थम् ॥ ३५ ॥**

**श०म० न्यासानुसन्धानम्–शेप०**। शेपादीनामितरेतरयोगद्वन्द्वः, समाहारं विहायेतरेतरयोगस्य ग्रहणे फलं वक्ष्यत्यग्रे। शेपशब्दो यद्यपि पुंस्येवानुशिष्टस्तथापीह तस्य नपुंसकत्वेन विग्रहवाक्ये निर्देशान्नपुंसकत्वमपि विज्ञेयम्, अयं च शब्दः पुंलिङ्गस्य मेढ्रस्य वाचकः, शुनः शेपादयस्त्रयोऽपि ऋषिविशेषाणां नामानि। **शेपस्शब्दःसकारान्तोऽपीति**–तथा **चामरकोषे** पठ्यते–"गौलिङ्गं चिह्नशेपसोः" इति क्वचित् तु 'गौलिङ्गं चिन्हशेफयोः' इति पठ्यते, तथा च न तेनास्य सकारान्तत्वसिद्धिरिति मूलान्तरमन्वेष्यम्, स्वमते च "शीङः फश्च" [ उणा० ९८२ ] इत्युणादिसूत्रेण शेपस्शब्दसिद्धिः, प्रकृते चाकारान्तस्यैव ग्रहणं तथैव सूत्रे पाठात्, तथा च सकारान्ते परे लुबेव भवति। प्रायो नाम्न्येव एषां प्रयोगान्नाम्नीति व्यर्थमिति शङ्कते–**नाम्नीति किमिति**। अन्यत्रापि समासोऽयं प्रयुज्यते, तत्र लुपो निषेधाभावाय नाम्नीत्यावश्यकमित्याह–**श्वशेपमिति** अत्र षष्ठीतत्पुरुः।

"Aho Shrutgyanam"

बहुवचननिर्देशस्यार्थान्तरसाधकत्वं दर्शयितुं मतान्तरमवतारयति–**अन्ये त्विति** । सिंहस्य शेपमित्यादीनां व्यस्तानामपि प्रयोगे फले भेदाभावेन समस्ता एवैते शब्दा इत्यत्र विनिगमकाभावेन तेषामसंग्रहेऽपि दोषाभाव इत्यरुचिसूचकस्तुशब्दः । स्वसम्मतं बहुवचनस्य फलमाह–**अनाम्न्यपि विध्यर्थमिति**, अयमाशयः–बहुवचनस्य व्याप्त्यर्थत्वसम्भवेऽपि यत्र बहुवचनं तदंशे एव व्याप्तिः स्यादिति शेपादिभ्योऽन्यत्राऽप्युत्तरपदे तत्प्रवृत्तिः स्यात्, न तु शुनोऽन्यस्य पूर्वपदस्य ग्रहणं स्यात्, शेपादिऽभ्योऽन्यत्र चोत्तरपदे प्रवृत्तिरनिष्टेति बहुवचनसार्थक्यायान्यत्रापि–नामभिन्नेऽपि विषये सूत्रस्य प्रवृत्तिरित्येव कल्पनं वरमिति । **अन्येच** वैयाकरणा नाम्नीति न पठन्ति, तन्मतसंग्रहोऽत्र पक्षे बोध्यः । एवं च सर्वमतसंग्रहार्थमेव बहुवचनं वेदितव्यमिति ॥ ३-२-३५ ॥

## वाचस्पति-वास्तोष्पति-दिवस्पति-दिवोदासम् । ३. २. ३६ ॥

**त० प्र० वाचस्पत्यादयः शब्दाः षष्ठीलुबभावे निपात्यन्ते, नाम्नि विषये । वाचस्पतिः, वास्तोष्पतिः, दिवस्पतिः, दिवोदासः । नाम्नीत्येव–वाक्पतिः, वास्तुपतिः, द्युपतिः, द्युदासः ॥ ३६ ॥**

**श० म० न्यासनुसन्धानम्–वाच०** । पृथक् पूर्वोत्तरपदयोर्निर्देशेन विधाने सूत्रभेदोपपत्तिरिति सहैव निपातनरूपेण-वाचस्पत्यादयः पठिताः, तथा चैते निपात्यन्ते इति लभ्यते, किञ्च निपातनेन सत्वमपि लभ्यते । एतानि च नामानीति नाम्नीत्यस्यापि सम्बन्ध आवश्यक एवेति वक्ष्यति । **वाचस्पतिरिति**–बृहस्पतेर्नामिदम् । **वास्तोष्पतिरिति**–इन्द्रस्य वास्तुभूमिसाक्षिणो देवस्य च नामेदम् । **दिवस्पतिरिन्द्रः** । **दिवोदासः** पुराणप्रसिद्धो राजा, स च चन्द्रवंशीयः काशिराजः । नाम्नीत्यस्य व्यावर्त्यमाख्यातुं तत्सम्बन्धावश्यकतां सूचयति–**नाम्नीत्येवेति** । तथा चान्यत्र नालुप्, तदाह वाक्पतिरित्यादि ॥ ३-२-३६ ॥

## ऋतां विद्यायोनिसंबन्धे । ३. २. ३७ ॥

**त० प्र० ऋकारान्तानां शब्दानां विद्याकृते योनिकृते च संबन्धे निमित्ते सति प्रवर्तमानानां संबन्धिन्याः षष्ठ्या विद्या-योनिसंबन्धे एव निमित्ते सति प्रवर्तमाने उत्तरपदे लुप् न भवति । होतुःपुत्रः, होतुरन्तेवासी; पितुःपुत्रः; पितुरन्तेवासी । ऋतामिति किम् ? आचार्यपुत्रः, मातुलान्तेवासी । बहुवचनं 'विद्यासंबन्धनिमित्ते योनिसंबन्धनिमित्ते' इति यथासंख्यप्रतिपत्त्युदासार्थम् । ऋद्भ्य इति निर्देशे प्राप्ते षष्ठीनिर्देश उत्तरार्थः । विद्या-योनिसंबन्ध इति किम् ? भर्तृगृहम् । पूर्वपदविशेषणं किम् ? भर्तृशिष्यः, भर्तृपुत्रः । उत्तरपदविशेषणं किम् ? होतृधनम्, पितृगृहम् ॥ ३७ ॥**

**श० म० न्यासानुसन्धानम्–ऋतां०** । अत्र विद्यायोन्योर्द्वन्द्वे योनिशब्दस्येदतन्त्वेन तस्यैव पूर्वनिपाते प्राप्ते विद्याकृतस्य सम्बन्धस्य योनि सम्बन्धापेक्षयाऽर्च्यत्वेन विद्याया एव पूर्वनिपातः । एवं च तदर्थं निर्देशसामर्थ्य-धर्मादित्वकल्पनादिकं नावश्यकमिति प्रतीयते, दृश्यते हि योनिवंशापेक्षया विद्यावंशस्य प्राबल्यं शास्त्रे बहुधेति विद्याया अर्च्यत्वं निर्विवादम् । अत्र **विद्यायोनिसम्बन्धे** इति पदं द्विधा सम्बध्यते–'ऋताम्' इत्यनेन उत्तरपदे इत्यनेन च देहलीदीपन्यायादावृत्त्या वा । तथा च व्याख्याति–**विद्याकृते योनिकृते च सम्बन्धे वर्त्तमानानामिति, विद्यायोनिसम्बन्धे एव निमित्ते सति वर्त्तमाने उत्तरपदे** इति च । अयमाशयः–यत्र विद्यायोनिसम्बन्धिवाचकानामेव पूर्वोत्तरपदभावेन समासस्तत्र ऋकारान्तात् पूर्वपदात् परस्याः षष्ठ्याः अलुप् भवतीति । **'होतुः पुत्रः'** इत्यत्र योनिकृते सम्बन्धे उभयोः पदयोर्वृत्तिः, **'होतुरन्तेवासी'** इत्यत्र च विद्याकृते सम्बन्धे उभयोः पदयोर्वृत्तिः, **'पितुः पुत्रः** इत्यत्र योनि सम्बन्धे उभयोः पदयोर्वृत्तिः, **'पितुरन्तेवासी'** इत्यत्र विद्यासम्बन्धे । यद्यपि 'होतुःपुत्रः, पितुरन्तेवासी' त्यत्र क्रमेण पूर्वपदस्य विद्यायोनिसम्बन्धवाचकत्वमेव विद्यते, होतृत्वस्य विद्याधीनत्वात्, पितृत्वस्य च योनिसम्बन्धाधीनत्वात्, तथापि तत्पुरुषे उत्तरपदस्यैव प्राधान्येन तन्निरूपितसम्बन्धस्यैव प्राधान्यात् तेनैव व्यपदेशो युक्तः । तथा च होतुः पुत्र इत्यत्र पुत्रेण योनिसम्बन्ध एव निरूप्यते, पितुरतेवासीत्यत्रान्तेवासिना विद्यासम्बन्ध एव निरूप्यत इति तस्यैव प्राधान्यम् । न चोभयसम्बन्धव्यपदेशः शक्यः कर्त्तुम्, सम्बन्धस्य द्विष्ठत्वेन एकेन तस्य निरूपणासम्भवात्; अथवा तादृशसम्बन्धस्य प्रवृत्तिनिमित्तत्वमेव विवक्षितं परस्परसम्बन्धे नाग्रहः, एवंच पित्रादिशब्दानां सर्वत्र योनिसम्बध-निमित्तत्वमेव होत्रादिशब्दानां विद्यासम्बन्धनिमित्तमेवेति बोध्यम् । **ऋतामिति किमिति**-तथा च सामान्येन विद्यायोनिसम्बन्धे सति षष्ठ्या अलुप् इत्येवोच्यतामिति भावः । व्याव-

"Aho Shrutgyanam"

र्थमाह—**आचार्यपुत्रः, मातुलान्तेवासी**ति—आचार्यमातुलशब्दयोर्विद्यायोनिसम्बन्धनिमित्तकत्वेऽपि ऋदन्तत्वाभावान्न भवति षष्ठ्या अलुप्, ऋतामित्यस्याभावे तु तत्रापि स्यादेव। ऋत इत्येकवचनेनैव जातिवादेन बहूनामृदन्तानां सङ्ग्रहे सम्भवति बहुवचनं व्यर्थमित्याशङ्कायामाह—**बहुवचनं विद्यासम्बन्धनिमित्ते योनिसम्बन्धनिमित्ते इति यथासंख्यप्रतिपत्तेर्व्युदासार्थ**मिति। अयमाशयः—'विद्यायोनिसम्बन्धे' इति पदं लक्ष्यार्थबोधकाले विभज्यैवार्थबोधकं भवति, तथा च विद्यासम्बन्धनिमित्ते योनिसम्बन्धनिमित्ते च वर्त्तमानानां तादृशे निमित्ते वर्त्तमाने उत्तरपदे परतः षष्ठ्या अलुबिति शाब्दबोधो भवति, तत्र यदि यथासंख्यन्यायावतारो भवेत् तर्हि विद्यासम्बन्धनिमित्ते वर्त्तमानस्य सम्बन्धिन्याः षष्ठ्या विद्यासम्बन्धनिमित्ते एवोत्तरपदे अलुप् स्यात्, योनिसम्बन्धनिमित्ते वर्त्तमानस्य सम्बन्धिन्याः षष्ठ्याश्च योनिसम्बन्धनिमित्ते एवालुप् स्यादिति 'होतुः पुत्रः, पितुरन्तेवासी' इत्यादौ न स्यात्, पूर्वोत्तरपदयोरेकसम्बन्धनिमित्ते वर्त्तमानत्वाभावात्। तथा च यथासंख्यशास्त्रबाधनार्थमेव बहुवचनं कृतम्, बहुवचने च सति ऋतां बहुत्वादुभाभ्यां यथासंख्यं न संदिह्यते। यद्यपि प्रातिस्विकरूपेण पृथक् पृथक् सम्बन्धनिमित्तत्वेऽपि ऐकपद्ये सति एकविधसम्बन्धनिरूपकत्वमेवोभयोरित्यावेदितं पूर्वम्, तथापि प्रक्रियादशास्थितं प्रातिस्विकं सम्बन्धमादायैव तन्निमित्तमिति तदाश्रित्यैव शङ्का समाधी वेदितव्यौ। किंचैकवचने सत्यपि न यथासंख्यशङ्का, संख्याभेदस्य तत्रापि सत्त्वादिति नेदं बहुवचनस्यासाधारणं व्यावर्त्यम्, दृश्यते च व्याकरणान्तरे एकवचनेनापि निर्देशः "ऋतो विद्या-योनिसम्बन्धेभ्यः" [पा० सू० ६-३-२३-] इति। यद्यपि तत्र विद्यायोनिसम्बन्धेभ्य इत्यत्रैव बहुवचननिर्देशेन यथासंख्यनिवृत्तिः कल्पयितुं शक्यते, तथापि संख्याभेदस्यैव तद्व्यावर्त्तकत्वे एकवचन-बहुवचनयोः साम्यमेवेति वक्तुं शक्यते, एवञ्च स्थितस्य गतिरूपेणेदमुक्तमिति नात्र शङ्का कार्या। परम्परया पञ्चम्यन्तेनैव निर्देश आयाति षष्ठ्यन्तनिर्देशे किं फलं मूलं वेति शङ्कायामाह—**ऋद्भ्य इति निर्देशे प्राप्ते षष्ठीनिर्देश उत्तरार्थः** इति—उत्तरत्र "आ द्वन्द्वे" [३-२-३९] इति सूत्रे ऋतामिति षष्ठ्यन्तस्यैव सम्बन्धस्य युक्तत्वात् षष्ठीनिर्देश एव कृत इत्यर्थः। अयमाशयः—अत्र सूत्रे विभक्तेः प्रकृत्या सह सम्बन्धमात्रप्रतिपादनेनापि लक्ष्यसिद्धौ बाधकाभावात् षष्ठीनिर्देश एव कृतो लाघवानुरोधाच्च, ऋद्भ्य इति कृते तु "आ द्वन्द्वे (३-२-३९) इत्यत्र तत्सम्बन्धासम्भवः, आदेशविधौ स्थानार्थिकायाः षष्ठ्या एवौचित्यात्, तथा चोभयसूत्रसम्बन्धार्हेण षष्ठ्यन्तेनैव निर्देश उचित इति। पूर्वोत्तरपदयोरुभयोः प्रत्येकस्य च विद्या-योनिसम्बन्धविशेषणमिह किमर्थमिति क्रमशः पृच्छति—**विद्यायोनिसम्बन्ध इति किमिति**—इह चैतत्पदग्रहणमेव व्यर्थमित्याशङ्का। व्यावर्त्यमाह **भर्तृगृहमिति**—भर्तुर्गृहस्य च न विद्यया नवा योन्या सम्बन्धो निमित्तम्, तथा चात्र षष्ठ्या लुबेव भवति, 'विद्यायोनिसम्बन्धे' इत्यस्याभावे च ऋतः सम्बन्धिन्याः षष्ठ्या लुपोऽत्रापि निषेधः स्यात्। **पूर्वपदविशेषणं किमिति**—'विद्यासम्बन्धनिमित्ते योनिसम्बन्धनिमित्ते चोत्तरपदे' इत्येवोच्यताम् ऋतां तत्सम्बन्धनिमित्ते वर्तमानत्वं विशेषणं न देयमिति भावः। व्यावर्त्यमाह—**भर्तृशिष्यः** इति-शिष्यस्य विद्यासम्बन्धनिमित्ते वर्त्तमानत्वेऽपि पूर्वपदस्य भर्तुर्न विद्यासम्बन्धनिमित्तत्वं नवा योनिसम्बन्धनिमित्तत्वमिति न भवत्यलुप्, तद्विशेषणाभावे तु तत्रापि स्यादेवालुप्। **उत्तरपदविशेषणं किमि**ति—भर्तृशिष्य इत्यादिव्यावृत्त्यर्थं पूर्वपदमेव तेन तेन सम्बन्धेन विशेष्यतामुत्तरपदं न विशेष्यतामिति भावः। व्यावर्त्यमाह—**होतृधनं, पितृगृहमि**ति—होतुः पितुश्च क्रमशो विद्यायोनिसम्बन्धनिमित्तत्वेऽपि उत्तरपदयोर्धनगृहयोस्तत्सम्बन्धशून्यत्वान्न भवत्यत्र षष्ठ्या अलुप् तदभावे तु स्यादेवेति भावः॥ ३-२-३७॥

## स्वसृ-पत्योर्वा। ३. २. ३८॥

**त० प्र० विद्या-योनिसंबन्धे निमित्ते सति प्रवर्तमानानामृकारान्तानां शब्दानां संबन्धिन्याः षष्ठ्याः स्वसृ-पत्योरुत्तरपदयोर्योनिसंबन्धनिमित्तयोः पदयोर्लुब् वा न भवति।** होतुःस्वसा, होतृस्वसा; पितुःष्वसा, पितुःस्वसा, पितृष्वसा; मातुःस्वसा, मातुःष्वसा, मातृष्वसा; दुहितुःपतिः, दुहितृपतिः; स्वसुःपतिः, स्वसृपतिः; ननान्दुःपतिः, ननान्दृपतिः। **विद्यायोनिसंबन्ध इति पूर्वपदविशेषणं किम्? भर्तृस्वसा। उत्तरपदविशेषणं किम्? होतृपतिः। पूर्वेण नित्यं प्रतिषेधे प्राप्ते विकल्पोऽयम्॥ ३८॥**

**श० म० न्यासानुसन्धानम्-स्वसृ०।** पूर्वसूत्रं सर्वमनुवर्त्तते, तत्र स्वसृपत्योरिति द्विवचनापेक्षयोत्तरपदे इत्येकवचनान्तमपि द्विवचनान्ततया विपरिणमते, तत्र विद्यासम्बन्धांशः स्वसृपत्योर्न सम्बध्यतेऽसंभवात्, तथा च योनिसम्बन्धांशमात्रं तत्र संबध्यते। यद्यपि स्वसुर्योनिसंबन्धस्याव्य-

"Aho Shrutgyanam"

भिचारात् तत्र न तत्सम्बन्धो युक्तः, पत्या सहापि न तत्सम्बन्धसंभवः, योनिसंबन्धे सति पतिपत्नीभावस्यैवासंभवात्, योनिसंबन्धो हि जन्मना संबन्धः, जन्मना च संबन्धे सति पतिपत्नीभावस्य गर्हितत्वमेवेति सर्वथा उत्तरपदांशेऽत्र 'विद्या-योनिसंबन्धे' इति पदस्यासंबन्ध एव युक्तः, तथापि उत्तरपदेन सह तत्सम्बन्धस्य पूर्वसूत्रे स्वीकृतत्वेनात्रापि यावदंशे संभवस्तावदंशे तत्संबन्धे कृते क्षत्यभाव इत्याशयेन वृत्तौ तत्सम्बन्धः कृतः; पत्या सह पूर्वं योनिसम्बन्धाभावेऽपि पुत्रादिद्वारा तत्सम्बन्धस्य भावित्वादस्त्येव सम्भव इत्याशयेन वा तत्सम्बन्धः कृतो बोध्यः । अत्र स्वसृपत्योरिति द्वन्द्वे यद्यपि पतिशब्द इकारान्त इति तस्यैव पूर्वनिपातो युक्तः, तथापि धर्मादित्वात् स्वसुरिह मातृपितृसम्बन्धविशिष्टाया बुद्धिविषयत्वात्, तस्याश्च लोकव्यवहारदृष्ट्या पत्युरपेक्षया अर्च्यत्वाद् वा स्वसृशब्दस्यैव पूर्वनिपातः कृतः । तथा च सूत्रार्थमाह—**विद्या-योनिसम्बन्धे निमित्ते सती**त्यादि । **होतुःस्वसे**ति विद्यासम्बन्धनिमित्ते प्रवर्त्तमानऋदन्तपूर्वपदोदाहरणम्, अलुपोऽभावे लुपि **होतृस्वसे**ति । **पितुःस्वसे**ति योनिसम्बन्धनिमित्ते प्रवर्त्तमानऋदन्तपूर्वपदोदाहरणम्, अत्र चालुप्पक्षे "अलुपि वा" [ २-३-१९ ] इति विकल्पेन षत्वम्, लुपि तु "मातृ-पितुः स्वसुः" [ २-३-१८ ] इति नित्यं षत्वमिति त्रैरूप्यम् । एवं—**मातुःस्वसे**त्यत्रापि । अथ पतिरूपे उत्तरपदे उदाहरति—**दुहितुःपतिरि**ति—विद्यासंबन्धिनः पतिशब्देन सह संबन्धासंभवाद् योनिसंबन्धिन एव पूर्वपदस्योदाहरणम् । पूर्वपदस्योत्तरपदस्य च विशेषणवैयर्थ्यं शङ्कते **विद्या-योनिसम्बन्ध इति पूर्वपदविशेषणं किमिति**—पूर्वपदस्य चोभयसंबन्धनिमित्तत्वसम्भवादुभयसम्बन्धेन सह विशेष्यविशेषणभावः कृतः, स न कर्त्तव्य उत्तरपदविशेषणमात्रेण पूर्वपदस्यापि तथाविधसम्बन्धनिमित्तकस्यैव ग्रहीतुमौचित्यादिति शङ्कितुराशयः । **भर्तृस्वसे**ति—अत्र हि योऽस्या भर्ता तस्येयं स्वसेति प्रतीतेः स्वसुर्योनिसम्बन्धसत्त्वेऽपि भर्तृशब्दस्य भरणकर्तृत्व [ पालकत्व ] रूपार्थनिमित्तकस्य विद्यायोनिसम्बन्धनिमित्तकत्वाभावान्न भवत्यलुप् पूर्वपदस्य सामान्यतो ग्रहणे हि स स्यादेव । अथास्तु पूर्वपदविशेषणतयैव तस्य सम्बन्धः, उत्तरपदयोरपि स्वसृपत्योर्योनिसम्बन्धनिमित्तत्वविशेषणं यत् कृतं तद् व्यर्थमिति शंकते—**उत्तरपदविशेषणं किमिति** । **होतृपतिरि**ति—तत्र स्वसृशब्दस्य योनिसम्बन्धनिमित्तत्वाव्यभिचारात् तदंशे प्रत्युदाहरणासंभवात् पतिशब्दांशमात्रे प्रत्युदाहरणमाह—होतृपतिरिति, अत्र पूर्वपदस्य विद्यासम्बन्धनिमित्तकत्वे सत्यपि उत्तरपदस्य योनिसम्बन्धनिमित्तत्वाभावात् स्वस्वामिभावसम्बन्धनिमित्तत्वमेवेति न भवति लुपो निषेधः । अत्रापि सूत्रे यथाकथंचिदुभयपदयोर्विद्या-योनिसम्बन्धनिमित्तकत्वमेव ग्राह्यं पूर्वपदस्य च ऋकारान्तत्वमेवेति पूर्वसूत्रेणैव गतार्थमिदं सूत्रमित्याशङ्क्याह—**पूर्वेण नित्यं प्राप्ते** इति—तथा च विकल्पविधानमात्रमेतत्सूत्रप्रयोजनमिति भावः ।।३-२-३८।।

## आ द्वन्द्वे । ३. २. ३९ ।।

त० प्र०—**विद्यायोनिसंबन्धे निमित्ते सति प्रवर्तमानानामृतां यो द्वन्द्वस्तस्मिन्सत्युत्तरपदे परे पूर्वपदस्याकारोऽन्तादेशो भवति । होता च पोता च—होतापोतारौ, नेष्टोद्गातारौ, प्रशास्ताप्रतिहर्तारौ, मातादुहितरौ, ननान्दायातरौ । अथेह प्रथमयोः कस्मान्न भवति—होतृपोतृनेष्टोद्गातार इति ? अन्त्यस्यैवोत्तरपदत्वात् । कथं तर्हि होतापोतानेष्टोद्गातार इति ? द्वयोर्द्वयोर्द्वन्द्वे भविष्यति । यदा च होता च पोता च नेष्टोद्गातारौ चेति विग्रहस्तदा होतृपोतानेष्टोद्गातार इति । ऋतामित्येव—गुरुशिष्यौ । ऋतां द्वन्द्व इति किम् ? पितृपितामहौ । विद्यायोनिसंबन्ध इत्येव—कर्तृकारयितारौ । विद्यायोनिसंबन्धश्चेह प्रत्यासत्तेः समस्यमानानामृदन्तानामेव परस्परं द्रष्टव्यो न येन केनचित्, तेनेह न भवति—चैत्रस्य स्वसृदुहितरौ, नात्र स्वसृ-दुहित्रोः परस्परं संबन्धः, न हि स्वसा चैत्रस्य स्वसा भवन्ती दुहितरमपेक्षते दुहिता वा स्वसारमिति । यद्येवं कथं चैत्रस्य पितृभ्रातराविति, अस्ति ह्यत्र परस्परसंबन्धः, उच्यते—यद्यपि चैत्रस्य भ्राता भ्राता भवन् पितरमपेक्षते चैत्रपितृजनितस्यैव चैत्रभ्रातृत्वात्, तथापि पिता पिता भवन्न भ्रातरमपेक्षते । यद्येवं कथं मातापितरौ ? होतापोतारौ ? न ह्यत्र परस्परापेक्षस्तथाभावोऽपि तु पुत्रयजमानापेक्षः, नैवम्—अत्रापि मात्रादीनां परस्परसंबन्धात्, ते हि स्वकर्मणि प्रजने यागे च सहिता एव वर्तन्ते, तत्कर्मनिमित्तश्चायं तेषां व्यपदेश इत्यदोषः । केचित् तु 'स्वसादुहितरौ' इत्यत्रापीच्छन्ति ।। ३९ ।।**

श० म० **न्यासानुसन्धानम्**—आ० । "ऋतां विद्यायोनिसम्बन्धे" इति सूत्रं सर्वमनुवर्त्तते, 'उत्तरपदे' इति च, तथा सति योऽर्थः सम्पन्नस्तमाह—**विद्या-योनिसम्बन्धनिमित्ते सती**त्यादि । ऋतामिति चेह न पूर्वपदमात्रस्य



"Aho Shrutgyanam"

विशेषणमपि तु द्वन्द्वस्येत्याह—**ऋतां यो द्वन्द्व** इति । उत्तरपदे परे इत्यर्थे सति सामर्थ्यादेव पूर्वपदस्येति लभ्यत इति सिद्धवदाह—**पूर्वपदस्ये**ति, पूर्वपदं च नेह समासस्याद्यावयवभूतपदम्, अपि तूत्तरपदाव्यवहितपूर्वमात्रपरमित्यग्रे स्पष्टीभविष्यति । **आकारोऽन्तादेशः** इति—"षष्ठ्याऽन्त्यस्य" [७-४।१०६] इति परिभाषयेति भावः । होता—हवनकर्ता, पोता-पुनातीति पावनकर्मा ऋत्विग्विशेषः, उणादिषु निपातनादिड्भावः, तयोर्द्वन्द्वे ऋतां द्वन्द्वसत्त्वात् पोतृरूपे उत्तरपदे होतुरन्त्यस्य ऋकारस्याकारे कृते—**होतापोतारावि**ति । नेष्टा-नायकः, सोऽपि ऋत्विग्विशेष एव, उद्गाता-उच्चैर्गानकर्ता यज्ञे सामवेदसम्बन्धिकर्मकर्त्ता च, तयोर्द्वन्द्वे आकारान्तादेशे—**नेष्टोद्गातारौ ।** प्रशास्ताऽपि याज्ञिकविशेष एव, यस्याज्ञयाऽन्ये ऋत्विजः कर्म कुर्वन्ति, प्रतिहर्ताऽपि ऋत्विग्विशेष एव, तयोर्द्वन्द्वे पूर्ववदाकार इति । विद्यासम्बन्धिनामृतां द्वन्द्वानुदाहृत्य योनिसम्बन्धिनामुदाहरणमाह—**मातादुहितरावि**ति—माता च दुहिता चेति विग्रहः, उभयोर्योनिसम्बन्धः प्रसिद्ध एव । **मातापितरावि**ति—इहाप्युभयोः पुत्रद्वारा तत्सम्बन्धः । ननान्दा-पत्युः स्वसा, याता-पतिभ्रातृपत्नी, अनयोश्च पतिद्वारा योनिसम्बन्धनिमित्तकत्वम् । एवं पदद्वयद्वन्द्वे सूत्रप्रवृत्तिमुदाहृत्य पदचतुष्टयद्वन्द्वे कीदृशी व्यवस्थेति विवेचयितुं शङ्कते-अथेह प्रथमयोः कस्मान्न भवति—**होतृपोतृनेष्टोद्गातारः** इति—इह हि होता च पोता च नेष्टा चोद्गाता चेति विग्रहे चतुर्णां समासः, तत्र तृतीयस्यैवात्वं दृश्यते, प्रथमद्वितीययोर्न दृश्यते, तत् कथं भवति तयोरपि पूर्ववर्तित्वेन पूर्वपदत्वस्याक्षतेरिति शङ्कार्थः । उत्तरयति—**अन्त्यस्यैवोत्तरपदत्वात्** इति, अयमाशयः—उत्तरपदशब्दः समासचरमावयवभूते पदे रूढः, उत्तरपदत्वस्य च पूर्वत्र सति यस्मात् परं नास्ति तत्त्वमेव प्रवृत्तिनिमित्तं, न तु समासाद्यवयवभूतपदात् परत्वमिति बहुपदसमासे मध्यमपदात् परत्वेऽपि तस्य [उत्तरपदस्य] उत्तरपदत्वानपायान्न भवति तेन समासाद्यवयवरूपपूर्वपदाक्षेप इति उत्तरपदाव्यवहितपूर्वस्यैव पदस्यात्वं भवति, न तु तद्व्यवहितस्येति प्रथमयोर्नात्वं भवति, वृत्तौ पूर्वपदस्येति कथनमपि उत्तरपदाव्यवहितपूर्वपदपरं न तु समासाद्यवयवरूढपूर्वपदपरमिति । क्वचित्त्रयाणामपि पदानामात्वं दृश्यते तत् कथमिति शङ्कते—कथं तर्हि **होतापोतानेष्टोद्गातारः** इति—अत्र त्रयाणामपि पदानामात्वं साध्वसाधु वा, यदि साधु तर्हि पूर्वोदाहृतस्थलेऽपि तथैव भवतु, यद्यसाधु तर्ह्यत्रापि न भवत्विति शङ्कितुराशयः । उत्तरयति—**द्वयोर्द्वयोर्द्वन्द्वे भविष्यती**ति, अयमर्थः—पूर्वं होता च पोता च—होतापोतारौ, नेष्टा चोद्गाता च—नेष्टोद्गातारावि ति द्वयोर्द्वयोर्द्वन्द्वं विधाय ततो होतापोतारौ च नेष्टोद्गातारौ चेति विगृह्य द्वन्द्वे कृते मध्यमस्य पोतृशब्दस्याप्युत्तरपदभूतनेष्टोद्गातृशब्दाव्यवहितपरत्वमिति तस्याप्यात्वे त्रयाणामप्यात्वं सम्पद्यत इति । अथ क्वचिन्मध्यमयोरेवात्वं दृश्यते न प्रथमस्य, तत्र का प्रक्रियेति शंकायामाह—**यदा च होता च पोता च नेष्टोद्गातारौ चेति विग्रहः** इति, अयमर्थः—अत्र विग्रहे हि पदत्रयस्यैकदा द्वन्द्व इति मध्यमपदभूतस्य पोतृशब्दस्यैवोत्तरपदाव्यवहितपूर्वत्वमिति तस्यैवात्वं भवति न तु प्रथमस्य, मध्यमेन व्यवधानादिति **होतृपोतानेष्टोद्गातारः** इत्येव प्रयोगः। अथ पदकृत्यमाह—**ऋतामित्येवे**ति—अतिप्रसङ्गवारणाय ऋतामिति पदमिहापि सम्बन्धनीयमेवेति भावः । क्वातिप्रसङ्ग इत्याह—**गुरुशिष्यावि**ति—अत्र विद्यासम्बन्धनिमित्तकत्वेऽप्युभयोः पदयोर्न भवत्यात्वम् ऋदन्तत्वाभावात् । अस्तु तर्हि ऋतामिति पूर्वपदमात्रविशेषणम्, ऋदन्तस्य पूर्वपदस्याकारोऽन्तादेश इत्यर्थेऽपि गुरु-शिष्यावित्यादावतिप्रसङ्गाभावादिति तस्य द्वन्द्वविशेषणत्वं व्यर्थमिति शङ्कते—**ऋतां द्वन्द्व इति किमि**ति । उभयोः पदयोः सर्वेषां वा पदानामृदन्तत्व एवात्वप्रवृत्तिरिष्टा, तद्वारणाय ऋतामित्यस्य द्वन्द्वविशेषणत्वमावश्यकमिति । व्यावर्त्यप्रदर्शनमुखेनाह—**पितृपितामहावि**ति—अत्र पितुरल्पस्वरत्वेन पूर्वनिपातः, यद्यपि पित्रपेक्षया पितामहस्याचर्यत्वेन तस्यैव पूर्वनिपातो युक्तस्तथापि अर्च्यत्वतारतम्ये प्रयोजकाभावात् तन्नाश्रितमिति बोध्यम् । 'विद्यायोनिसम्बन्धे' इत्यस्य सम्बन्धोऽप्यावश्यक इत्याह—**विद्या-योनिसम्बन्ध इत्येवे**ति, क्व मा भूत् ? इत्यत आह—**कर्तृ-कारयितारावि**ति—उभयोरृदन्तत्वेऽपि तादृशसम्बन्धप्रवृत्तिनिमित्तकत्वाभावान्न भवत्यात्वम् तदभावे स्यादेव । 'विद्यायोनिसम्बन्धे' इति पदं विद्यायोनिसम्बन्धे निमित्ते सति प्रवर्त्तमानानामित्यर्थपरतया पूर्वं व्याख्यातं तेनेहापि विद्यासम्बन्धो योनिसम्बन्धो वा येषां प्रवृत्तिनिमित्तं तादृशानामृदन्तानामित्याद्यर्थो व्याख्यातः, परमसौ विद्याकृतो योनिकृतो वा सम्बन्धः कस्यापेक्षयेति न स्पष्टीकृतम्, तेन यथाकथंचित् विद्यायोनिसम्बन्धप्रवृत्तिनिमित्तकाः शब्दा उदाहरणत्वेन पूर्वं प्रतिपादिताः, इह च सम्बन्धनिरूपकस्यापि निर्णयः कर्त्तव्योऽतिप्रसङ्गनिरासा-

"Aho Shrutgyanam"

येत्याह—**विद्यायोनिसम्बन्धश्चेहे**ति इहेति कथनादितः पूर्वं "स्वसृ-पत्योर्वा" [३०. २०. ३८] इत्येतत्पर्यन्तं नायं विवेक इति ध्वन्यते, तत एव ननान्दुः—पतिरित्यादयः समदाहृताः, तत्र हि ननान्दुः पत्या सह नास्ति तादृशः सम्बन्ध इति प्राचामाशयः। वयं तु ब्रूमः—तत्रापि पुत्रादिद्वाराऽस्त्येव योनिकृतः सम्बन्धः परस्परमपीति वक्ष्यमाणनियमव्यभिचारस्थलत्वेन पितुरन्तेवासी होतुः पुत्र इत्यादयः समुदाहरणीयाः। विवेचितं चैतत् पूर्वमपि, प्रातिस्विकं तत्तत्सम्बन्धप्रवृत्तिनिमित्तत्वं चाश्रित्य समाहितमपि, तथा च इह प्रकृतसूत्रे विद्यायोनिसम्बन्धश्च समस्यमानानामृदन्तानाम्[समस्यमानऋदन्तशब्दवाच्यानाम्] एव परस्परं द्रष्टव्यः, कुत इत्याह **प्रत्यासत्तेः इत्यन्वयः**। अयमाशयः—विद्यया सम्बन्धो विद्यासम्बन्धः, योन्या सम्बन्धो योनिसम्बन्धः, सम्बन्धश्च द्वयोर्भवत्येकत्र तदभावात्, एवं च स सम्बन्धः कयोर्द्वयोर्ग्राह्य इत्यपेक्षायां समस्यमानपदयोरेव, प्रत्यासन्नत्वात् तयोरेव तेषामेव वा ग्राह्यः। पदयोः पदानां वा न स सम्बन्धः सम्भवति ततश्च तदर्थानामिति बोध्यम्,तथा च यत्र समस्यमानयोः समस्यमानानां ऋतां परस्परं विद्यासम्बन्धो योन्या वा संबन्धस्तत्रैवानेनात्वमिति फलति। इत्थं व्याख्यानेन यद् व्यावर्त्यं तत् प्रदर्शयितुमाह—**तेनेह न भवती**ति, तेन पूर्वोक्तसम्बन्धनिरुपकनिरूपणेन, इह—वक्ष्यमाणलक्ष्ये, आत्वं न भवतीत्यर्थः-क्वेत्याह—**चैत्रस्य स्वसृदुहितरा**विति कुत इत्याह—**नात्र स्वसृदुहित्रोः परस्परं सम्बन्ध** इति। तदेवोपपादयति—**नहि स्वसा चैत्रस्य स्वसा भवन्ती दुहितरमपेक्षते दुहिता च स्वसारमि**ति, अयमाशयः—इदं सूत्रं द्वन्द्वे प्रवर्त्तते द्वन्द्वश्च सहोक्तिमापन्नानामेव, सहोक्तिश्च यथाकथंचित् परस्परसम्बन्धे सत्येव, स च सम्बन्धोऽन्यत्र यादृशस्तादृशोऽस्तु प्रकृते विद्याकृतो योनिकृतो वा ग्राह्य इत्येव विवक्षितम्, इह च स्वसृदुहितरावुभे अपि चैत्रमेवापेक्षेते तस्यैव स्वसा, तस्यैव च दुहिता, नहि दुहितुरियं स्वसा नवा स्वसुरियं दुहितेति तयोः परस्परमसम्बन्धात् प्रकृतसूत्राप्राप्त्या नात्वमिति। अत्राह-प्रकृते स्वसृदुहित्रोः परस्परमसम्बन्धेऽपि यत्र समस्यमानपदयोरस्तिपरस्परसम्बन्धसम्भावना तत्रापि न दृश्यते आत्वं तत् कथमिति—**यद्येवं कथं चैत्रस्य पितृभ्रातरा**विति, कुतोऽत्र विशेषतः शङ्क्यते, तदाह—**अस्ति ह्यत्र परस्परसम्बन्धः** इति, अयमाशयः—अत्र यद्यपि पिता भ्राता च चैत्रमपेक्षेते तथापि पितृ-भ्रात्रोरप्यस्त्येव परस्परं जन्यजनकभावः स्वाभाविकः, ततश्च परस्परसम्बन्धे सत्यपि कथं नात्वमिति। उत्तरयति—**उच्यते** इति कथं नात्वमिति कथ्यत इति भावः। तदेवाह—**यद्यपी**त्यादिना, चैत्रस्य योऽत्र भ्राता स चैत्रनिरूपितभ्रातृत्वद्वारैव पितरं स्वजनकत्वेनापेक्षते; न तु स्वतः, केवलस्य भ्रातृत्वस्य पितृनिरूप्यत्वाभावात्, तदेवाह—**तथापि पिता पिता भवन्नि**ति—पिता पितृत्वेन न भ्रातरमपेक्षते, पितृत्वस्य पुत्रनिरूप्यताया एव सत्त्वात् तस्यायं पुत्र इति कथिते स्वत एव सोऽयं पितेति भवतीति नास्ति पितृभ्रात्रोः निरूप्यनिरुप्यकभाव इति भावः। इत्थं प्रकृतसूत्रस्य समस्यमानानामृतां परस्परं विद्यायोनिसम्बन्धे सत्येव प्रवृत्तिरित्यर्थे निर्णीते व्यभिचारं शङ्कते—**यद्येवं कथं मातापितरौ, होतापोतारा**विति। शङ्काबीजमह—**नह्यत्र परस्परापेक्षस्तथाभावोऽपि तु पुत्रयजमानापेक्ष** इति, अयमाशयः—मातापितरावित्यत्र मातृत्वं न पितृनिरूप्यं न वा पितृत्वं मातृनिरूप्यम्, किन्तु उभयमपि पुत्रनिरूप्यमेव, पुत्रस्यैव माता, तस्यैव च पितेति मातापित्रोः परस्परं सम्बन्धाभावे सत्यपि कथमात्वप्रवृत्तिः; एवं होताऽपि यजमानस्यैव इति तेनैव तस्य विद्यया सम्बन्धः, पोताऽपि ऋग्विविशेषत्वाद् यजमानसम्बद्ध एवेति तयोः परस्परमसम्बन्धेऽपि कथमात्वम्, यदि चेहात्वं स्वीक्रियते तर्हि पूर्वोक्तनियमे व्यभिचार इति। शङ्कां प्रत्याचष्टे—**नैवमि**ति, कुत इत्याह—**अत्रापि मात्रादीनां परस्परसम्बन्धादि**ति, तमेव सम्बन्धं स्पष्टयति—**ते हि स्वकर्मणि प्रजने यागे** चेत्यादि, अयमर्थः—मातापित्रोः पुत्रस्योत्पादनं तद्भरणादिकं च स्वभावनियतं कर्म, तत्र तयोः सहभावेन प्रवर्त्तनादेककर्मकारित्वरूपः सम्बन्धः परस्परमस्त्येव; एवं होतापोत्रोः कर्म यागः, तत्र च तौ सहैव प्रवर्त्तेते इति तयोरपि परस्परमेककर्मकारित्वरूपः सम्बन्धोऽस्त्येवेति न तत्र पूर्वप्रतिपादितनियमव्यभिचारः, तेषां च तत्तच्छब्दप्रतिपाद्यत्वमपि तत्कर्मनिमित्तमेवेति स्वप्रवृत्तिनिमित्तस्यैक्यरूपः सम्बन्धोऽपि तेषामस्त्येवेति न पूर्वोक्तदोषशङ्का।

मतान्तरमाह—**केचित् त्वि**ति, अयं हि तेषामाशयः—पूर्वत्र विद्यायोनिसंबंधे इति पदेन सामान्यत एव विद्याकृते योनिकृते च सम्बन्धे प्रवृत्तिनिमित्ते सति इत्यर्थबोधकं स्वीकृतं तदेव च पदमिहाप्यनुवृत्तम् तत्र तादृशः सम्बन्धोऽपि तथैव ग्रहीतव्यो यथा पूर्वत्र गृहीतः, पूर्वत्र च ननान्दुःपतिरित्याद्युदाहरणेन समस्यमानपदार्थानामेव परस्परं तादृशः सम्बन्धो न गृहीत इति निश्चितम्, इति प्रकृतसूत्रेऽपि तथा न ग्रहीतव्यः, एकस्य शब्दस्य सूत्रभेदेनार्थ-

"Aho Shrutgyanam"

भेदस्यानौचित्यात् । न च शब्दाधिकाराश्रयणे तथा भवितुमर्हति, शब्दाधिकारे हि स शब्द एवाधिक्रियते न तु तदर्थः तदर्थश्च प्रकृतोपयोगितया भिन्नोऽपि क्रियते, यथा प्रकृत एव ऋतामिति शब्दः संबंधसामान्यषष्ठ्या पूर्वैर्व्याख्यातः, प्रकृतसूत्रे च स्थानषष्ठ्या, तथैव विद्या-योनि सम्बन्धोऽपि प्रकृतोपयोगितया व्याख्यास्यत इति वाच्यम्, यत ऋतामित्यस्य पूर्वैःसामान्यसंबंधार्थकत्वं षष्ठ्यपेक्षया कृतम्, अन्यथा तयोरन्वयासंभवादिह च संबन्धार्थकत्वे आकारादेशेन न तदन्वयसंभवः । स्वमते च तस्येहापि संबन्धसामान्यार्थकतयैव द्वन्द्वविशेषणत्वेन व्याख्यानम्, तथा च यत्रासंभवात् पूर्वत्र गृहीतोऽर्थः प्रकृते न संभवति तत्र प्रामाणिकलक्ष्यानुरोधाच्छब्दाधिकारमाश्रित्यार्थान्तिरकरणेऽपि प्रकृते तादृशप्रामाणिकलक्ष्याभावेन तदाश्रयणे मानाभावात्, तथा च स्वसादुहितरावित्येव रूपं युक्तम्, अस्ति चेहाप्येकसंबन्धिनिरूप्यत्वरूपः परस्परं तयोः संबन्धः चैत्रनिरूपितमेव हि स्वसृत्वं दुहितृत्वं चेति, यथा पुत्रनिरूपितमातृत्वपितृत्वयोः परस्परं स संबंधः स्वीक्रियते तथा प्रकृतेऽपि स्वीकारे बाधाभावादिति । अत्र 'केचित् तु' इति तुनाऽरुचिः सूचिता, तद्धेतुतुश्चायम्-यथा तव मते किमपि प्रामाणिकं लक्ष्यं मदुक्तनियमप्रातिकूल्ये नास्ति, तथा ममापि मते पूर्वोक्तार्थस्य नेह ग्रहणम्, अपि तु परस्परसम्बन्धार्थकस्यैवेति स्वीकारे प्रामाणिकं लक्ष्यं माऽस्तु, तथापि यथा ऋतामिति पदं पूर्वपदमात्रविशेषणमपि प्रकृते लक्ष्यानुरोधात् द्वन्द्वविशेषणतया स्वीकृतं तथा विद्यायोनिसम्बन्धे इत्यपि पदं परस्परसम्बन्धपरतया स्वीकार्यम् । यदि पितृपितामहाविति लक्ष्यं तत्र गमकं तदा स्वसृदुहितरावितीहापि, प्रामाणिकत्वमप्रामाणिकत्वं वोभयोरनिर्णीतिमेव एकसम्बन्धिनिरूप्यत्वरूपः परस्परसम्बन्धोऽपि न युक्तः, एकसम्बन्धिनिरूप्यत्वेऽपि सम्बन्धगतरूपस्य भेदात्, पूत्रेण हि मातापित्रोर्जनकत्वसम्बन्धस्यैकरूपस्यैव निरूपणमिह तु विभिन्नरूपस्येति । पाणिनीये मते "आनङ् ऋतो द्वन्द्वे" (पा० सू० ६. ३. २५. ) इति सूत्रे महाभाष्ये पितृपितामहावित्यादावात्वाभावाय ऋत इत्यस्य द्वन्द्वविशेषणत्वं तु स्वीकृतम्, किन्तु स्वसृदुहितरावित्यस्य चर्चा न कृताऽस्ति, न वा परतः कैयटादिभिरप्ययमर्थः स्पृष्ट इति तन्मते स्वसादुहितरावित्येव रूपं स्यादिति प्रतीयते ।। ३. २. ३९. ।।

## पुत्रे । ३. २. ४० ।।

**त० प्र०--पुत्रशब्दे उत्तरपदे द्वन्द्वे समासे विद्या-योनिसंबन्धे निमित्ते सति प्रवर्तमानानामृकारान्तानामाकारोऽन्तादेशो भवति । मातापुत्रौ, पितापुत्रौ, होतापुत्रौ ।। ४० ।।**

श० म० न्यासानुसन्धानम्--पुत्रे । पूर्वसूत्रस्य ऋकारान्तानामेव द्वन्द्वे प्रवृत्त्या पितापुत्रौ इत्यादिषु तदप्रवृत्तिरिति तादृशलक्ष्यसंस्कारायेदं सूत्रमारब्धम् । "ऋतां विद्यायोनिसम्बन्धे:" "आद्वन्द्वे" इति सूत्रद्वयं सम्बध्यत एव तथा च योऽर्थः सम्पन्नस्तमाह--**पुत्रशब्दे उत्तरपदे** इत्यादिना इह च समस्यमानानां पदानां विद्या-योनिसम्बन्धः परस्परमित्यर्थो न स्वीकृत इति प्रतिभाति, होतापुत्रौ इत्युदाहरणात्, अत्र हि होतुः पुत्रस्य च न परस्परं विद्यासम्बन्धो न वा योनिसम्बन्ध इति पूर्वत्रापि तादृशोऽर्थो न युक्त इति प्रतिभाति, परमत्राचार्यवचनमेव प्रमाणमिति लक्षणैकचक्षुष्कैरिदमनिर्णयमेव । यद्यपि पितापुत्रादीनामिव होतापुत्रावित्यस्य प्रयोगस्य लोकविश्रुतत्वं न प्रतीयते तथाप्याचार्योदाहरणेन लक्षणानुसारेण च तस्य सत्त्वे विसंवादस्यानाशङ्कनीयत्वमेवेति ।। ३. २. ४० ।।

## वेदसहश्रुतावायुदेवतानाम् । ३. २. ४१ ।।

**त० प्र०--वेदे सहश्रुतानां वायुवर्जितदेवतानां द्वन्द्वे पूर्वपदस्योत्तरपदे परे आकारान्तादेशो भवति । इन्द्रासोमौ, इन्द्रावरुणौ, इन्द्रापूषणौ, इन्द्राबृहस्पती, शुनासीरौ, अग्नामरुतौ, अग्नेन्द्रौ, अग्नाविष्णू, सोमारुद्रौ सूर्याचन्द्रमसौ, मित्रावरुणौ वेदेति किम् ? शिववैश्रवणौ, स्कन्दविशाखौ; ब्रह्मप्रजापती सहेति किम् ? विष्णुशक्रौ । श्रुतेति किम् ? चन्द्रसूर्यौ, दिवाकरनिशाकरौ । वायुवर्जनं किम् ? अग्निवायू, वाय्वग्नी देवतानामिति किम् ? यूपचषालौ, उलूखलमुशले ।। ४१ ।।**

श० म० न्यासानुसन्धानम्--वेद० । "आद्वन्द्वे" इति सूत्रम् उत्तरपदे इति चानुवर्त्तते, "ऋतां विद्यायोनिसम्बन्धे" इति निवृत्तम् । इदं चैकपदं सूत्रम्, तत्र पूर्वं वेद-सहश्रुतशब्दयोः सप्तमीतत्पुरुषः, वायुर्नञा समस्यते बहुव्रीहौ, न विद्यते वायुर्यासु ता अवायवः, अवायवश्च ता देवताः--अवायुदेवताः, वेदसहश्रुता अवायुदेवताः--वेदसश्रुतावायुदेवताः, तासामिति । तथा चार्थमाह-**वेदे सहश्रुतानामि**त्यादि ।

"Aho Shrutgyanam"

उदाहरति **इन्द्रासोमावि**त्यादिना इन्द्रश्च सोमश्चेति विग्रहः । एवम् **इन्द्रावरुणावि**त्यादौ । **शुनासीरावि**ति-शुनश्च सीरश्चेति विग्रहः, शुनो वायुः, सीरः सूर्यः, हरदत्तस्तु-"शुनासीरशब्द इन्द्रगुणविशेषवाची, तथा च मन्त्रः "इन्द्रं वयं शुनासीरमस्मिन् यज्ञे हवामहे" इति" इति केचिन्मन्यन्त इत्याह, तत्रासौ शुनासीरशब्दोऽन्य एव इह च द्विवचनान्तोऽन्य एवेति युक्तः पन्थाः प्रतीयते । **वेदेति किमि**ति-देवतानां प्रायो वेद एव श्रवणाद् वेदग्रहणमव्यावर्त्तकमिति प्रष्टुराशयः । व्यावर्त्यमाह-**शिव-वैश्रवणावि**ति-शिवः प्रसिद्धः स्वनाम्नैव, वैश्रवणः कुबेरः, उभयोरेकत्र कैलासे वासस्य पुराणादौ प्रसिद्धत्वात् तत्र तयोः सख्यस्य सहचरणस्य वर्णितत्वात् सहश्रुतत्वसत्त्वेऽपि न भवत्यात्वं वेदे सहश्रुतत्वाभावात्, वेदे सह श्रवणं चैकहविर्भागित्वेनान्यथा वा क्वचित् प्रसिद्धं साहचर्यं वैदिके कार्ये, तथैतयोर्नेति भावः । **स्कन्द-विशाखौ** इति-स्कन्दः कार्त्तिकेयः, विशाखोऽपि तदीयमूर्तिभेद एव विशाखानक्षत्रे प्राकट्यं गतः, एतयोश्च क्वापि सहश्रवणायोग एव किं पुनर्वेदे । **ब्रह्म-प्रजापती** ब्रह्मण एव मानसिकाः पुत्राः प्रजापतित्वेन प्रसिद्धाः, ब्रह्मापि प्रजापतिनाम्ना प्रसिद्धः "स्रष्टा प्रजापतिर्वेधाः" इत्याद्यमरकोशात्, अनयोरपि न वेदे सहश्रवणम् । अस्तु तर्हि वेदश्रुता इत्येव सहग्रहणं किमर्थमिति शङ्कते-**सहेति किमि**ति । **विष्णुशक्रावि**ति-एतौ वेदे पृथक् पृथग्घविर्भागित्वेन श्रुतौ न तु सहहविर्भागित्वेनेति न भवत्यात्वम्, सहग्रहणाभावे च स्यादेवेति तद्व्यावृत्त्यर्थं सहग्रहणमावश्यकम् । **श्रुतेति किमि**ति, अयमाशयः—वेदसहख्याताः' इत्यादिशब्देन कथनीयं, न तु श्रुतशब्देनैवेति । प्रत्युदाहरति-**चन्द्र-सूर्यावि**ति-एतौ वेदे सहख्यातावपि नैवंरूपेण श्रुतावपि तु सूर्याचन्द्रमसावित्यादिरूपेणैवेति न भवत्यात्वम्, श्रुतग्रहणाभावे च स्यादेव । एवं-**दिवाकर-निशाकराव**पि सूर्याचन्द्रमसावेव, किन्तु नैवंरूपेण श्रुताविति नात्वं भवति, तद्वारणाय श्रुतग्रहणमावश्यकमिति भावः । वायुवर्जनेन किं व्यावर्त्यमिति पृच्छति-**वायुवर्जनं किमि**ति-वायुवर्जनं च सामान्येन द्वन्द्वस्यैव विशेषणम्, वायुवर्जिततादृशदेवतानां द्वन्द्वे इत्युक्त्या वायोः पूर्वपदत्वे उत्तरपदत्वे वोभयथापि नात्वप्रवृत्तिः, पूर्वपदभावेनोत्तरपदभावेन वा वायुरहितदेवताद्वन्द्वे एव प्रवृत्तेः, तत्र वायोरुत्तरपदत्वे **अग्निवायू** इति, पूर्वपदत्वे च **वाय्वग्नी** इति, उभयत्राप्यात्वाभावाय वायुवर्जनमावश्यकमिति भावः । **देवतानामिति किमि**ति-प्रायस्तासामेव वेदे सहश्रुतत्वेन देवतापदमव्यावर्त्तकमिति प्रष्टुराकूतम् । न देवतानामेव सहश्रवणं, यज्ञाङ्गानामन्येषामपि सहश्रवणात् यथा **यूपचषालावि**त्यादि, यूपो यागसमाप्ति-चिह्नभूतः स्तम्भविशेषः खदिरादिनिर्मितः, चषालो वलयाकारो लौहमयः काष्ठमयो वा यूपमध्ये देयः पदार्थः, एतावपि वेदे सहश्रुतौ किन्तु देवतात्वान्नात्र भवत्यात्वप्रवृत्तिरिति देवतानामित्यावश्यकम् । एवम्-**उलूखल-मुशले** अपि यज्ञाङ्गत्वेन वेदे सहश्रुते, परं तु देवतात्वाभावान्न भवति तत्रात्वमिति, देवतानामित्यस्याभावे तु स्यादेवेति तद्वारणाय देवतानामित्यावश्यकमिति ॥ ३-२-४१ ॥

## ई : षोम-वरुणेऽग्नेः । ३. २. ४२ ॥

**त० प्र०—वेदसहश्रुतावायुदेवतानां द्वन्द्वे षोम-वरुणयोरुत्तरपदयोरग्निशब्दस्य इकारोऽन्तादेशो भवति, षोमेति निर्देशादीकारसंनियोगे षत्वं च निपात्यते । अग्नीषोमौ, अग्नीवरुणौ । षोमवरुणेति किम् ? अग्नेन्द्रौ । देवताद्वन्द्व इत्येव—'अग्निसोमौ माणवकौ, ईकारसंनियोगे विधानादिह षत्वमपि न भवति ॥ ४२ ॥**

**श० म० न्यासानुसन्धानम्-ईः षोम०** । पूर्वसूत्रमनुवर्त्तते, "आ द्वन्द्वे" इत्यतः केवलं 'द्वन्द्वे' इति पदम्, 'आ' इति हि विधेयः, तत्स्थाने चेह 'ई' पठित एव । तथा च सूत्रार्थमाह-**वेदसहश्रुतेत्या**दिना । अत्र सोमशब्द एव कृतषत्वतया निर्दिष्टो न षोमशब्दोऽन्यः कश्चिदित्याह **षोमेति निर्देशादि**ति विशिष्य षत्वविधाने वाक्यभेदापत्तेः, पृथक्सूत्रविधाने च स्पष्टमेव गौरवमिति कृतषत्वनिर्देश एवाश्रितः, तच्चेदं षत्वमीकारादेशसन्नियोगशिष्टं तत्सत्त्व एव भवति, तदभावे न भवति * सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः* इति न्यायात् । **अग्निषोमावि**ति-अग्निश्च सोमश्चेति विग्रहे इतरेतरयोगद्वन्द्वेऽनेन ईत्वे षत्वे च रूपनिष्पत्तिः । एवम्-**अग्नीवरुणावित्य**त्रापि षत्ववर्जम्, एते द्वन्द्वे वेदे प्रसिद्धे । **षोमवरुणे इति किमि**ति—सामान्येनैवाग्नेरीत्वं विधीयतामित्याशयः । व्यावर्त्यमाह—**अग्नेन्द्रावि**ति—अत्र पूर्वसूत्रेणात्वमेव भवति 'षोमवरुणे' इत्यस्याभावे च प्रकृतसूत्रेणेत्वमेव स्यात् परत्वाद् विशेषविहितत्वाच्चेति तद्वारणाय 'षोमवरुणे' इत्यावश्यकमिति भावः । पूर्वसूत्रानुवृत्तिमपि द्रढयति—**देवताद्वन्द्व इत्येवे**ति, अत्र 'वेदसहश्रुतावायु' इत्यव्यावर्त्त-

"Aho Shrutgyanam"

कमेव, अग्नीषोमयोरग्नीवरुणयोश्च वेदसहश्रुतत्वस्य वायुभिन्नत्वस्य चाव्यभिचरितत्वात्, केवलं संभवांशमादायैव वृत्तौ तदुल्लेखः कृतः, तथा च देवतानां द्वन्द्वे' इत्येतावदेवातिप्रसङ्गवारणायादरणीयमिति तावन्मात्रस्यैव फलमिदं निर्दिश्यते-**अग्निसोमौ माणवकाविति**-एकोऽग्निनामाऽपरश्च सोमनामा माणवकः, तयोरिह द्वन्द्वः, तथा च नायं देवताद्वन्द्वोऽपि तु मनुष्यद्वन्द्व इति न भवतीत्वम्, 'देवताद्वन्द्वे' इत्यस्याभावे च स्यादेवेति तद्वारणाय तदावश्यकमिति भावः । षत्वस्य सन्नियोगशिष्टत्वं यदुक्तं तत्फलमाह-**ईकारसन्नियोगे विधानादिह षत्वमपि 'न' भवती**ति-सन्नियोगशिष्टस्येत्वस्य निवृत्तौ षत्वमपि न प्रवर्त्तत इति भावः ॥३.२.४२.॥

## इर्वृद्धिमत्यविष्णौ । ३. २. ४३ ॥

**त० प्र०—विष्णुवर्जिते वृद्धिमत्युत्तरपदे परे देवताद्वन्द्वेऽग्नेरिकारोऽन्तादेशो भवति, ईकाराऽऽकारयोरपवादः । अग्नीवरुणौ देवता अस्या—आग्निवारुणीमनड्वाहीमालभेत, अग्नीषोमौ देवताऽस्य—आग्निसौमं कर्म, एवम्-आग्निमारुतं कर्म । वृद्धिमतीति किम् ? अग्नीवरुणौ, अग्नामरुतौ, आग्नेन्द्रं कर्म "आतो नेन्द्रवरुण" [७. ४. २९] इति वृद्धिनिषेधः । अविष्णाविति किम् ? अग्नाविष्णू देवतास्य—आग्नावैष्णवं चरुं निर्वपेत् ॥ ४३ ॥**

**श० म० न्यासानुसन्धानम्-इर्वृद्धि०** । **इरि**ति विधेयनिर्देशः, **वृद्धिमत्यविष्णावित्यु**त्तरपदविशेषणे, 'देवताद्वन्द्वेऽग्नेः' इति पूर्वतः समनुवर्त्तत एवेति योऽर्थः सम्पन्नस्तमाह **विष्णुवर्जिते** इत्यादि । ननु अग्निशब्दे इकारः स्वत एवास्ति तस्य पुनरिकारविधानं किमर्थमित्याशङ्कायामाह-**ईकाराऽऽकारयोरि**ति 'आग्निवारुणम्' इत्यादावीकारस्य आग्निमारुतम् इत्यादावाकारस्य **च** यथायथं प्राप्तस्यापवादोऽयमिकारादेश इति तयोर्निवृत्तिरेवैतद्विधानस्य फलमिति भावः। यद्यपि प्रकृतसूत्रेणेकारो वृद्धिमत्युत्तरपदे विधीयते, वृद्धिमच्चोत्तरपदं तद्धितोत्पत्तेः पश्चात्, तद्धितोत्पत्तिपूर्वमेव च अग्निश्च वरुणश्च मरुच्चेति विग्रहे एव समासेऽलौकिकप्रक्रियावाक्ये प्रत्ययोत्पत्तितः पूर्वमेव वा ईत्वमात्वं वा प्राप्नोति, प्रकृतसूत्रस्य च तद्धितप्रत्ययनिमित्तकवृद्धिनिमित्तकत्वेन बहिर्भूतनिमित्तकत्वाद् बहिरङ्गत्वमिति तदपेक्षयाऽन्तरङ्गयोरीकाराऽऽकारयोः प्रवृत्तौ नास्त्यस्य सूत्रस्यावकाश इति शङ्कितुं शक्यते, तथापि* उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते* इति न्यायेन* परित्यज्यापवादविषयमुत्सर्गोऽभिनिविशते* इति न्यायेन वा न पूर्वमीकाराऽऽकारयोः प्रवृत्तिरिति विज्ञेयम् । **अग्नीवरुणौ देवता अस्या** इति । अत्रेदं लौकिकं वाक्यमात्रम्, किन्तु समास-तद्धितयोः सहैव विग्रहो वास्तविकः, तथा च अग्निश्च मरुच्च देवते अस्या इति विग्रह एव समासानन्तरं वाक्यावयवविभक्तेर्लुप्यैकपद्ये सति देवतार्थे तद्धितप्रत्यये उभयपदवृद्धौ सत्यामनेनाग्निशब्देकारस्येकार इत्येव साध्वी प्रक्रिया, अन्यथा अग्नीवरुणाविति कृते ईकारप्रवृत्तौ जातायां कथं तदपवादत्वोक्तिः संगच्छेत, एवमाग्निसौममाग्निमारुतमित्यादावपि विज्ञेयम् । पदकृत्यमाह-**वृद्धिमतीति किमि**त्यादिना, तथा च 'इः अविष्णौ' इत्येवसूत्रं स्यादिति विष्णुभिन्ने उत्तरपदे देवताद्वन्द्वेऽग्नेरिर्भवतीत्यर्थात् 'अग्नीवरुणौ इत्यादावपीदमेव सूत्रं प्रवर्त्तिष्यत इत्याह-**अग्नीवरुणाविति । अग्नामरुताविति** मरुच्छब्दे परे ईत्वस्याप्रवृत्त्या "वेदसहश्रुतावायुदेवतानाम्" [ ३.२.४०. ] इत्यात्वमेव स्यात्, इत्थं च पूर्वं अग्नीवरुणौ इति प्रत्युदाहरणमीत्वविषये परत्वात् प्रवृत्त्यापत्तिप्रदर्शकमिति विज्ञेयम्। पूर्वपदवृद्धौ सत्यामपि न प्रवर्त्तत इति प्रदर्शयति-**आग्नेन्द्रं कर्मे**ति-अग्नेन्द्रौ देवताऽस्येति विग्रहे समासतद्धितयोः कृतयोरुभयपदवृद्धिः "देवतानामात्वादौ" [७.४.२८] इति सूत्रेण प्राप्ता "आतो नेन्द्रवरुणस्य" [७.४.२९] इति निषिध्यते, तथा च न वृद्धिमदुत्तरपदम्, वृद्धिमतीत्यस्याभावे च सर्वत्र परत्वादिदं प्रवर्त्तिष्यते, तद्वारणाय वृद्धिमतीति वक्तव्यमेवेति भावः । **अविष्णाविति किमि**ति अग्निना सह विष्णोर्न सह श्रवणमित्यभिमानेन प्रश्नः । प्रत्युदाहरति **अग्नाविष्णू देवताऽस्येति- आग्नावैष्णवमि**ति- अत्र वृद्धिमत्युत्तरपदे सत्यपि न भवत्यात्वमविष्णाविति पर्युदासात्, तदभावे च स्यादेव, **"आग्नावैष्णवं चरुं निर्वपेत्"** इति समुदितः पाठो वेदे सहश्रुतत्वख्यापनार्थः ॥३.२.४३.॥

## दिवो द्यावा । ३. २. ४४ ॥

**त० प्र०—देवताद्वन्द्वे दिवशब्दस्योत्तरपदे परे 'द्यावा' इत्ययमादेशो भवति । द्यौश्च भूमिश्च—द्यावाभूमी, द्यावाक्षमे द्यावानक्ते, नक्तशब्दोऽकारान्तोऽप्यस्त्यनव्ययम् ॥ ४४**

"Aho Shrutgyanam"

**शा० म० न्यासानुसन्धानम्**–दिवो० । अन्तादेशप्रकरणं परिसमाप्य सर्वादेशप्रकरणमारभते । 'देवताद्वन्द्वे' 'उत्तरपदे' इति च पूर्वतः समनुवृत्तम्, तथा च निष्पन्नं सूत्रार्थमाह– **देवताद्वन्द्वे** इत्यादिना । दिवो भूम्यादेश्च तत्तल्लोकवाचकत्वेऽपि देवतात्वेन हविस्त्यागोद्देश्यत्वेन वेदे श्रवणान्न देवताद्वन्द्वत्वहानिः । द्यौरन्तरिक्षम्, भूमिः प्रसिद्धैव मर्त्यनिवासभूता, तयोर्द्वन्द्वे दिवो द्यावादेशे– **द्यावाभूमी** इति । द्यावाक्ष्मे इति क्ष्मापि पृथिवी, क्षमतेरकारस्य पृषोदरादित्वाल्लोपे क्ष्मेति पदम् । क्वचिद् **द्यावाक्षमे** इति पाठो दृश्यते, तत्र क्षमापि पृथिव्येव **द्यावानक्ते** इति–नक्तमिति मान्तमव्ययं पठ्यते, ततः कथमत्र मकारलोप इत्याशङ्कायामाह– **नक्तशब्दोऽकारान्तोऽप्यस्त्यनव्ययमिति**- नक्तव्रतम्, नक्तचारी, इत्यादौ तस्य प्रयोगबाहुल्येन न तत्सत्त्वे विसंवादः ॥ ३.२.४४.॥

## दिवस् दिवः पृथिव्यां वा । ३, २, ४५ ॥

**त० प्र०––दिव्शब्दस्य पृथिव्यामुत्तरपदे परे देवताद्वन्द्वे दिवस्' इति दिव इत्येतावादेशौ वा भवतः । दिवस्पृथिव्यौ; दिवःपृथिव्यौ, द्यावापृथिव्यौ । दिव इति विसर्गान्तस्य निर्देशात् 'दिवस्' इति सकारस्य रुत्वं न भवति ॥ ४५ ॥**

**शा० म० न्यासानुसन्धानम्—दिवस् ०।** 'दिव' इत्यनुवर्त्तते, 'देवताद्वन्द्वे' 'उत्तरपदे' इति च तथा च निष्पन्नमर्थमाह- **दिव्शब्दस्ये**त्यादि । अत्र 'दिवस्' इत्येक एवादेशो द्विधा–सकारान्तत्वेन विसर्गान्तत्वेन च पठ्यते, तत्फलं वक्ष्यति विकल्पविधानाच्च पक्षे द्यावादेशोऽपि पूर्वसूत्रेण, तथा च त्रैरूप्यम् तदाह-**दिवस्पृथिव्यौ** इत्यादिना दिवस्-पृथिव्यावित्यत्र सकारस्य पदान्तस्य कथं न विसर्ग इति शङ्कायामाह– **दिव इति विसर्गान्तस्य निर्देशादि**त्यादिना, अयमाशयः––यदीहापि विसर्गः स्यादेव तर्हि पृथक् दिवः इति विसर्गान्त आदेशः किमर्थं विहितः, तथा च विसर्गान्तादेशविधानसामर्थ्यात् सकारस्य रुत्वं नेष्टमिति कल्पनीयमेव । **परे** च––'दिवस' इत्यकारान्तमादेशं विधाय अकारस्योच्चारणमात्रप्रयोजनत्वेनाप्रयोगित्वमास्थाय तस्येत्संज्ञया लोपं विधाय च विसर्गे प्राप्तेऽकारलोपस्य स्थानिवद्भावेन तद्वारणं कुर्वन्ति । वेदे च सर्वत्र सकारसहित एव पाठः इत्याचक्षते । यद्यपि वृत्तिकाराः पदकाराश्च 'दिवःपृथिव्योः' इत्यादिविसर्गान्तिपाठमपि पठन्ति, तथापि तत् 'छन्दसि दृष्टानुविधिः' इति सिद्धान्तात् समाधेयमित्याहुः । किञ्च छन्दसि 'द्यावाचिदस्मै पृथिवी सन्तमेते' इति व्यस्तेऽपि प्रयोगे पृथिवीशब्दे व्यवहिते द्यावाशब्दो दृश्यते, सोऽपि तथैव साधनीयः एवं च पृथक् 'दिवः' इति विसर्गान्तिपाठं ते नाद्रियन्ते । स्वमते च ज्ञानगौरवापेक्षया शब्दोच्चारणगौरवस्य लघीयस्त्वमित्याशयेन 'दिवः' इति विसर्गान्त एवादेशः स्वीकृत इति बोध्यम् ॥ ३. २. ४५. ॥

## उषासोषसः । ३, २, ४६ ॥

**त० प्र०––'देवताद्वन्द्वे उत्तरपदे परे उषस्शब्दस्यउषासा' इत्ययमादेशो भवति । उषश्च सूर्यश्च–उषासासूर्यम्, उषासानक्तम्, उषासानक्ते । केचित्तु सूर्यशब्दस्यापीच्छन्ति–सूर्यश्च सोमश्च–उषासासोमौ ॥ ४६ ॥**

**शा० म० न्यासानुसन्धानम्**—उषा० । 'उषस्' इति सान्तं क्लीबं प्रत्यूषवाचि, तदपि देवतात्वेन वेदे प्रसिद्धमिति न देवताद्वन्द्वहानिः । 'देवताद्वन्द्वे.' 'उत्तरपदे' इति च पदद्वयमनुवर्त्तते उषाश्च सूर्यश्चेति समाहारे उषासादेशे–– **उषासासूर्यमिति, तत्त्वबोधिन्यां** तु–उषाश्च सूर्यश्चेति कृतदीर्घेणोषस्शब्देन विग्रहो दत्तः, स च स्त्रीलिङ्गपरो द्रष्टव्यः, उषस्शब्दस्य सन्ध्यार्थस्य नपुंसकलिङ्गत्वेन लिङ्गानुशासने पाठात् । **उषासानक्त**मिति समाहार; **उषासानक्ते** इतीतरेतरयोगः, नक्तशब्दस्यानव्ययत्वप्रदर्शनार्थमप्युभयोरुदाहरणम् । मतान्तरमाह– **केचित् तु सूर्यशब्दस्यापीच्छन्तीति** । तन्मतानुसारिलक्ष्यमाह––**उषासासोमा**विति–– सोमश्चन्द्रस्तेन सह सूर्यस्यैव प्रयोग उचितः, प्रसिद्धसाहचर्यादिति तदाशयः ॥ ३. २. ४६. ॥

## मातरपितरं वा । ३, २, ४७ ॥

**त० प्र०––मातृपितृशब्दयोः पूर्वोत्तरपदयोर्द्वन्द्वे मातरपितरेति ऋकारस्य अर इति निपात्यते वा । माता च पिता च मातरपितरौ, मातरपितराभ्याम्, मातरपितरयोः, पक्षे– मातापितरौ, मातापितृभ्याम्, मातापित्रोः; एकशेषे तु**

"Aho Shrutgyanam"

**पितरौ । शब्दरूपापेक्षो नपुंसकैकवचननिर्देश उत्तरपदस्य अरभावाभिव्यक्त्यर्थः । उत्तरपदस्यारं नेच्छन्त्यन्ये ।।४७।।**

**श० म० न्यासानुसन्धानम्–मातर० । मातरपितरमि**ति कृतपूर्वोत्तरपदाऽरादेशस्य मातृपितृशब्दस्य स्वरूपबोधकः क्लीबनिर्देशः, तथा च निपातनपरमेवेदंसूत्रम्, तथापि प्रक्रियापुरस्कारेण सूत्रार्थं व्याचष्टे- **मातृपितृशब्दयोरि**त्यादिना । विकल्पपक्षे च **मातापितरौ**, एकशेषपक्षे च **पितरावि**ति त्रैरूप्यम् । **मातरपितराभ्यामित्या**दि विभिन्नविभक्तिकरूपनिर्देशश्चा-ऽरादेशस्योभयपदविषयत्वप्रदर्शनार्थः केवलमौकारविभक्तौ च 'अर्ङौ च" [१.४.४९] इत्यरादेशोऽपि सम्भाव्येत । अरादेशाभावपक्षे रूपाण्याह-**पक्षे मातापितरावि**त्यादिना अत्र **मातरपितरमि**ति नपुंसकनिर्देशोऽयुक्तः, इहेतरेतरयोगद्वन्द्वस्येष्टत्वात् तत्र च परपदवल्लिङ्गस्यैव विधानात् पुल्लिङ्ग-निर्देश एव युक्त इति शङ्कां मनसि निधाय तत्समाधानायाह-**शब्दरूपापेक्षो नपुंसकैकवचननिर्देश उत्तरपदस्यारभावाभिव्यक्त्यर्थः** इति- तथा चात्र न तच्छब्दगतलिङ्गवचने विवक्षिते अपि तु शब्दस्वरूपमात्रविवक्षा, शब्दस्वरूपविवक्षणे च सामान्ये नपुंसकमिति नियमान्नपुंसकं प्रथमोपस्थितत्वाच्चैकवचनं युक्तमेव निर्देष्टुमिति नासौ शङ्का युक्ता । ननु सर्वत्र यथाप्रयुक्त एव शब्दो निर्दिश्यतेऽत्र किमिति शब्दस्वरूपपरो निर्देशः क्रियत इत्याशङ्कायामाह–**उत्तरपदस्यारभावाभिव्यक्त्यर्थः** इति, अयमाशयः– "मातरपितरौ वा" इति स्वाभाविके निर्देशे सति किमिदम् "अर्ङौ च" [ १.४.४९.] इत्यारादेशेन रूपमुत तदंशेऽपि निपातनमेवेति निर्णयो न स्यात् तन्निर्णयाय अरादेशस्य स्पष्टीकरणायेत्थं निर्देश इति । मतान्तरमाह–**उत्तरपदस्यारं नेच्छन्त्यन्ये** इति एतच्च कैयटादीनां मतम् तथाहि-"मातरपितरावुदीचाम्" [पा. सू. ६.३.२३.] "पितरामातरा च छन्दसि"[६.३.३३.] इति सूत्रयोः सम्मिलिते महाभाष्ये– "किं निपात्यते ? पूर्वपदोत्तरपदयोर्ऋकारस्यारारौ, पूर्वोत्तरपदयोर्ऋकारस्यारारौ निपात्येते" इत्युक्तम् । तत्र **कैयट** आह–पूर्वोत्तरपदयोरिति सप्तम्यन्तमेतत् तत्र मातरपितरावित्यत्र पूर्वपदस्याऽरशब्दोऽन्तादेशो निपात्यते, उत्तरपदस्य तु ऋतो ङिसर्वनामस्थानयोः" [पा.सू. ७.४.११०.] इति गुणो रपरत्वं च इति । तथा चैतन्मतेन केवलं पूर्वपदस्यैवारशब्दोऽन्तादेशतया निपात्यत इति लभ्यते । तत्र नागेशेन भ्यामादिविषये उत्तरपदे नायमादेश इति स्पष्टीकृतम् तथाहि–ननु भाष्ये पूर्वोत्तरपदयोरित्युक्त्या उभयोरप्यृकारस्यारारौ निपात्येते इत्यर्थो भाति तेन भ्यामादावपि मातरपितराभ्यामित्येवेति चेत् ? न औरूपद्विवचनाविक्षणे मानाभावेनान्यत्र निपातनाभावादिति । अस्यायमाशयः– "मातरपितरावुदीचाम्" [पा.सू. ६.३.३२.] इति हि सूत्रम्, तत्र प्रथमाद्वितीयाद्विवचनरूपौकारान्तनिर्देशः कृतः, तेन औकारविभक्तावेव परत इदं निपातनं नान्यत्र, औकारविभक्तौ तु उत्तरपदांशे निपातनाभावेऽपि "अर्ङौ च" [१.४.४८.] इति सूत्रेणैव अरादेशे रूपसिद्धिरस्त्येवेति तत्रारादेशनिपातने न किमपि फलमिति । अग्रे च कैयटग्रन्थं व्याख्याय "अन्ये तु प्रयोगद्वयेऽपि [पितरामातरा इति द्वितीयः प्रयोगः] पूर्वोत्तरपदयोर्निपातनम्, तेन मातरपितराभ्यामित्येव उत्तरत्रापि [पितरामातरा इत्यत्र] ++++ 'अरा' आदेशविधानमिति भाष्यार्थमाहुः । स्यादयमर्थो यदि तथा लक्ष्यं प्रमितमस्ति, इति बहुदर्शिनो निर्णयन्तु"इत्युक्तम् । तथा च भाष्यस्य क आशय इति लक्ष्यानुसारमेव निर्णेयमिति तदाशयः । भाष्यकृता च मातरपितरौ भोजयतः मातरपितरावानय इत्युदाहरणद्वयं प्रदर्शितमित्यौकारविभक्तौ परत इदं निपातनमभिप्रेतं भाष्यकृतः, तत्र चोत्तरपदे विनापि निपातनं रूपसिद्धिरिति कैयटोक्तिबीजम् । **अन्ये** तु न चोदाहरणमादरणीयमिति भाष्यकृतैव कथनात् सति प्रमिते प्रयोगेऽन्यत्राप्यरादेशनिपातने न भाष्यं प्रतिकूलमित्यभिप्रयन्ति । किमन्यमतविचारविस्तरेण, स्वमतं तु स्पष्टमेवेति ।।३.२.४७।।

## वर्चस्कादिष्ववस्करादयः । ३, २, ४८ ।।

त० प्र०––**कुत्सितं वर्चो वर्चस्कम् तदादिष्वर्थेष्ववस्करादयः शब्दाः कृतशषसाद्युत्तरपदाः साधवो भवन्ति । 'वर्चस्केऽवस्करम्' अवकीर्यतेऽवस्करः–अन्नमलम् , तत्संबन्धात्तद्देशोऽप्यवस्करः, अवकरोऽन्यः । 'अपस्करो रथाङ्गे' अपकरोऽन्यः । कुत्सिता तुम्बुरुः 'कुस्तुम्बुरुरोषधिजातौ' तत्फलान्यपि कुस्तुम्बुरूणि, अन्यत्र कुतुम्बुरुस्तिन्दुकवृक्षः । 'अवरस्परा अपरस्परा वा क्रियासातत्ये' अवरस्पराः सार्था गच्छन्ति, सततं गच्छन्तीत्यर्थः, अन्यत्रावरपराः सार्था गच्छन्ति, अवरे च परे च सकृदेव गच्छन्तीत्यर्थः । 'आस्पदं प्रतिष्ठायाम्' प्रतिष्ठा स्थानमात्मयापनापदम् ,**

"Aho Shrutgyanam"

अन्यत्र आ ईषत् पदम्, आ पदाद् वा–आपदम्।' 'आ-श्चर्यमद्भुते' आश्चर्यं नीला द्यौः, अन्यत्र आचर्यं कर्म शोभनम् । 'प्रतिष्कशः सहाये'–पुरोयायिनि दूते वा, 'ग्राममध्ये प्रवेक्ष्यामि, भव मे त्वं प्रतिष्कशः' । अन्यत्र कशां प्रतिगतः–प्रतिकशोऽश्वः । 'प्रस्कण्वहरिश्चन्द्रावृषी'–प्रगतं कण्वं पापमस्मादिति-प्रस्कण्वः, हरिश्चन्द्र इवाह्लादको यस्य–हरिश्चन्द्रः, ऋषेरन्यत्र प्रकण्वो देशः, हरिचन्द्रो माणवकः । 'मस्करो वेणुदण्डयोः'–मा क्रियते प्रतिषिद्ध्यतेऽनेनेति–मस्करः, मकरशब्दस्य वाऽव्युत्पन्नस्य मस्कर इति रूपम्, अन्यत्र मकरो ग्राहः । 'मस्करी परिव्राजके' माकरणशीलो मस्करी, स ह्याह–मा कृषत कर्माणि शान्तिर्वः श्रेयसीति, मकरिन्शब्दस्य वा मस्करीति रूपम्, अन्यत्र मकरीति समुद्रः । 'कास्तीराऽजस्तुन्दे नगरे'–ईषत् तीरम्, अजस्येव तुन्दमस्येति व्युत्पत्तिमात्रम्, कास्तीरमजस्तुन्दं च नगरम्, अन्यत्र कातीरम्, अजतुन्दम् । 'कारस्करो वृक्षे'–कारं करोति किल कारस्करो वृक्षः, कारकरोऽन्यः । 'वनस्पतिः पुष्पं विना फलवति वृक्षे' सर्वो हरितकायो वनस्पतिरित्यन्ये, वनपतिरन्यः । 'पारस्करो देशे'–पारं करोति पारस्करो देशः, पारकरोऽन्यः । 'करस्करो गिरि-वृक्षयोः' करं करोतीति करस्करो नाम गिरिः, करस्करो वृक्षः, करकरोऽन्यः । 'रथस्पा नद्याम्' रथं पाति पिबति वा रथस्पा नाम नदी, रथपाऽन्या । 'किष्कुरुः प्रहरणे'–कस्य कुरुः–किष्कुरुः नाम प्रहरणम्, किमो मकारस्य च षकारादेशः । 'किष्कुः प्रमाणे' किमपीषत्परिमेया कुभूमिरस्य किष्कुः–वितस्तिर्हस्तो वा, किं करोतीति वा–किष्कुः, करोतेर्डुप्रत्ययः किमो मकारस्य च षकारः, कार्यं करोतीति वा–किष्कुः, डुप्रत्ययः, कार्यशब्दस्य च किष्भावः । 'किष्किन्ध इति गुहा-पर्वतयोः' किम प्यन्तर्दधाति किष्किन्धा नाम गुहा, किमो द्विर्वचनं पूर्वस्य च मकारस्य षकारः, किं किं दधाति किष्किन्धः पर्वतः । 'आस्कथं नगरे' आहृताः कथा अस्मिन्नित्यास्कथं नाम नगरम् । 'तस्करश्चौरे'–तत् करोति तस्करश्चौरः । 'बृहस्पतिर्देवतायाम्' बृहतां पतिः, बृहन् पतिरिति वा–बृहस्पतिः, उभयत्र तकारस्य सकारः, अन्यत्र तत्करः बृहत्पतिः । 'प्रायश्चित्तप्रायश्चित्ती अतीचारशोधने' प्रकर्षेणैत्यागच्छत्यस्मादाचारधर्मं इति प्रायो मुनिलोकः, चिन्त्यते–स्मर्यते इति चित्तम्, चित्तिश्च व्रतम्, प्रायैश्चित्तं चिन्तितं किल्बिषविशुद्धये प्रायश्चित्तमतिचारशोधनम् आलोचनप्रतिक्रमणादि, एवं प्रायश्चित्तिः, पक्षे विसर्जनीयपूर्वः शकार इत्यन्ये, प्रायश्चित्तम्, प्रायःश्चित्तिः; अन्ये तु प्रायणं प्रायः, तस्य चित्तं-प्रायश्चित्तं, प्रायश्चित्तिरित्यपि मन्यन्ते 'शष्कुली कृतान्ने' शष्कुलशब्दाद् गौरादित्वात् ङीः, कृतान्नादन्यत्र शकुली मत्सीविशेषः, गोष्पदं 'गोसेविते प्रमाणे च' यत्र गावः पद्यन्ते स गोभिः सेवितो ग्रामसमीपादिर्देश उच्यते; प्रमाणे गोष्पदपूरं वृष्टो देवः, गोष्पदमात्रं क्षेत्रम्, अत्र गोः पदमन्यस्येयत्तां परिच्छेत्तुमुपादीयमानं प्रमाणं भवति, अन्यत्र गोपदम् । 'अगोष्पदं सेवारहिते' न विद्यते गोः पदं येषु तान्यगोष्पदान्यरण्यानि, "अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान्" । ननु गोष्पदप्रतिषेधादगोष्पदमिति सिध्यति, सत्यम्–किं तु यत्र गवां प्रसङ्गो, न ताभिः सेवितस्तत्रैव स्यात्, यथा–यत्र शुक्लगुणप्रसङ्गः, स एवाशुक्ल इति भवति, नात्माऽऽकाशादिः, यत्र तु गवामत्यन्तासंभवस्तत्र न स्यात्, तत्रापि यथा स्यादित्येवमर्थं निपातनम्, न विद्यते गोः पदं यत्रेति त्रिपदबहुव्रीहिविवक्षायां रूपान्तरनिवृत्त्यर्थं च । बहुवचनमाकृतिगणार्थम्, तेनाचोवच-परोवरादयोऽपि द्रष्टव्याः ॥ ४८ ॥

---

**श० म० न्यासानुसन्धानम्—वर्च०** । अत्र प्रकरणे बहुषु लक्ष्येषु निपातयितव्येषु लाघवानुरोधेनादिशब्देनार्थान् लक्ष्याणि च संगृह्णाति तत्र वर्चस्कशब्दार्थं ग्राहयति––**कुत्सितं वर्च** इति–वर्चस्शब्दात् कुत्सार्थे संज्ञायां कप् विष्ठा–यामयं रूढः । **तदादिष्वर्थेष्वि**ति—सोऽर्थ आदौ प्रथमो येषामर्थानां रथाङ्गादीनां तेष्वर्थेष्वित्यर्थः 'तद्गुणसंविज्ञानाद् वर्चस्कार्थोऽपि गृह्यत एव । **अवस्करादयः** अवस्करा-ऽपस्कर प्रभृतयो वक्ष्यमाणाः, **कृतशषसाद्युत्तरपदाः** कृताः श-ष-सा आदौ येषां तानि कृतशषसादीनि, तथाभूतान्युत्तरपदानि येषु ते कृतषसाद्युत्तरपदाः, एषु क्वचिदुत्तरपदस्यादौ शः, यथा प्रायश्चित्ते, क्वचित् षः, यथा-किष्किन्धायाम्, क्वचित् सः, यथा- अवस्करे, निपात्यत इत्यर्थः, तथाभूतानां च तेषां साधुत्वमनेन सूत्रेणानुशास्यते । क्रमशो गणसूत्रनिर्देशपुरःसरमुदाहरति–**वर्चस्केऽवस्करम्** इति- अवपूर्वात् करोतेरलि गुणेऽनेन सकार उत्तरपदस्यादौ विधीयते वर्चस्के वाच्ये इति गणसूत्रार्थः । व्युत्पत्तिमाह–**अवकीर्यते** दूरं विक्षिप्यते इत्यवस्करः, स च क इत्याह–**अन्नमलमि**ति–भुक्तस्यान्नस्य रसादिषु वह्निना शरीरसात्कृतेषु यद् बहिः क्षिप्यते

६

"Aho Shrutgyanam"

तदेवान्नमलम्, तत्र चार्थे मुख्यस्तस्य प्रयोगः, क्वचिद् गौणोऽपि तदाह—**तत्सम्बन्धात् तद्देशोऽपी**ति—तस्यावस्करस्य सम्बन्धादाधारत्वात् तद्देशः—यत्र देशे तस्य सम्बन्धः स देशोऽप्यवस्करशब्देनोच्यत इति भावः, तथा च तस्य तत्र लाक्षणिकः प्रयोगः, लक्षणा हि शक्यसम्बन्ध एव, 'लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" इति मम्मटोक्तलक्षणात्। किञ्च—

"तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥"

इति लक्षणाबीजेषु तत्सम्बन्धोऽपि कथितोऽभियुक्तैः, तदित्यनेन शक्यार्थ एव गृह्यते, एतदुदाहरणान्यन्यत्र विस्तृतानीति प्रकृतानुपयोगादिह नोल्लिख्यन्ते। **अवकरोऽन्यः** इति—वर्चस्कादन्योऽवकीर्यमाणो गृहान्निःसारितोऽपद्रव्यसमूहोऽवकर इत्येवेत्यर्थः, तत्र नोत्तरपदे सकार इति भावः। **'अपस्करो रथाङ्गे'** इति—रथोपकारिणि काष्ठे अपस्कर इति निपात्यत इत्यर्थः, रथाङ्गपदेनेह चक्रभिन्नं रथोपकारि द्रव्यं काष्ठं वा गृह्यत इति कोशटीकाकृतः, अपकीर्यते—स्वस्वस्थाने क्षिप्यत इत्यपस्करः, अपपूर्वात् करोतेः पूर्ववत् अल्प्रत्ययादिः; अन्यो रथाङ्गादितरोऽपकर एवेत्याह—**अपकरोऽन्य** इति। **'कुस्तुबुरुरौषधिजातौ'** इति गणसूत्रम्, **कुत्सिता तुम्बुरुरि**ति विग्रहप्रदर्शनम्, तत्र तुम्बुरुशब्दो धान्याक [ धनिया ] वाची पुंल्लिग एव, 'कुत्सिता' इति स्त्रीलिङ्गविशेषणात् तस्य स्त्रीत्वमाम्नातम्, कुस्तुम्बुरुः क्षुद्रधान्याकवृक्षे, तद्भवत्वात् **तत्फलान्यपि कुस्तुम्बुरूणि; अन्यत्र कुतुम्बुरुस्तिन्दुकवृक्षः** इति—ओषधिजातेरन्यत्र सकारागमाभावात् तत्र कुतुम्बुरुरित्येव रूपम्, तच्च तिन्दुकवृक्षवाचीत्यर्थः, पाणिनीये चेह विग्रहो न प्रदर्शितः, तदाशयश्चात्रावयवार्थाप्रतीतिरेवेति। **'अवरस्परा अपरस्परा वा क्रियासातत्ये'** इति—क्रियायाः सातत्ये-अविच्छेदे सति द्वावेतौ निपात्येते इत्यर्थः, समन्तात् सम्यग् वा ततं व्याप्तं-सततं सन्ततं वा, सन्ततमित्यत्र मकारस्य लोपो वैकल्पिकः, समो वा हिततयोरिति स्मरणात्, सततस्य भावः—सातत्यमविच्छेद इत्यर्थः, अवरे च परे चेति पूर्वत्र विग्रहः, अपरे च परे चेत्यपरत्र, अवरपरशब्दस्य अपरपरशब्दस्य वा सकार उत्तरपदादौ विधीयते, सार्थाः-वणिक्समुदायाः, अपरस्पराः—एकः सार्थोऽग्रे गच्छति, तदविच्छेदेनैवापरेऽपि गच्छन्ति, समानोऽर्थः प्रयोजनं येषां ते सार्थाः, ते चेह वणिज एव, तेष्वेव प्रसिद्धेः, ते हि पूर्वं वणिज्याप्रसङ्गेन बहवो मिलिता देशाद् देशान्तरं गच्छन्ति स्मेति प्रसिद्धिः, एकमेव च वणिज्ययाऽर्थोपार्जनं सर्वेषां प्रयोजनमासीदिति सार्थशब्दस्तत्समुदाये रूढ इव। प्रयोगार्थमाह—**सततं गच्छन्तीत्यर्थः** इति, गमनक्रियायाः सातत्यं सकारविशिष्टेन प्रयोगेण प्रतीयते, तद्रहितेन च नेत्याह—**अन्यत्रावरपराः सार्था गच्छन्ति**, एतत्प्रयोगार्थमप्याह—**अवरे च परे च सकृदेवेति**—गमनक्रियायामविच्छेदो न गम्यते, केवलं गमनं प्रतीयते, तच्च स्वभावत एकवारमेवेति स्वभावसिद्ध एवार्थः सकृदेवेत्यनेन कथ्यते, न त्वेवकारबोध्यनियमस्य प्रकृते प्रतीतिः। **'आस्पदं प्रतिष्ठायाम्'** इति गणसूत्रम्, प्रतिष्ठायामास्पदमिति निपात्यत इत्यर्थः, तत्र प्रतिष्ठा कः पदार्थ इत्याकाङ्क्षायामाह—**प्रतिष्ठा—स्थानमात्मयापनापदमि**ति—प्रतितिष्ठत्यस्यामिति व्युत्पत्त्या आत्मनः शरीरस्य [ व्यवहारे तस्याप्यात्मत्वेन प्रतीतेः ] यापनाया निर्वहणस्य पदमेव प्रतिष्ठेति कथ्यते, यदिह स्थानपदेनापि व्यवह्रियते 'लब्धं स्थानमेतेन' 'अत्र प्रतिष्ठितोऽयम्' इत्यादिव्यवहारात्, तथा चात्मयापनस्य आत्मनिर्वाहेण सह कालयापनस्य वा स्थाने आस्पदमिति निपात्यत इत्यर्थः पर्यवस्यति, आ—सर्वतोभावेन पद्यते—प्राप्यत इत्यास्पदम्, आङ्पूर्वात् पद्यतेरलि सकारादित्वमुत्तरपदस्य निपातितमनेन। **अन्यत्र** प्रतिष्ठार्थादितरत्र. **आ—ईषत् पदमि**ति—आङ ईषदर्थत्वं मर्यादार्थत्वं वा, न तु तत्र सागम इति भावः। **'आश्चर्यमद्भुते'** इति गणसूत्रम्, अद्भुते—विस्मयनीये विषये आश्चर्यमिति निपात्यत इत्यर्थः, आङ्पूर्वाच्चरतेः कर्मणि यः कृत्यः, अनेन च शकारादित्वमुत्तरपदस्य क्रियते। **आश्चर्यं नीला द्यौरि**ति—अनीलाया अपि दिवो नीलरूपवत्त्वं यत् प्रतीयते तदाश्चर्यमद्भुतमित्यर्थः। **अन्यत्र आचर्यं कर्म शोभनमि**ति—शोभनं कर्म-आचरणीयं कर्त्तव्यमित्यर्थः, "चरेराङस्त्वगुरौ" [५.१.३१.] इति य उभयत्र, अद्भुते शकारादित्वमुत्तरपदस्यात्र नेति विशेषः। **'प्रतिष्कशः सहाये'** इति गणसूत्रम्, सहायेऽर्थे प्रतिष्कश इति निपात्यत इत्यर्थः, सहायः क इति जिज्ञासायामाह—**पुरोयायिनि दूते वेति**—पुरोयायी राजादीनामग्रतो गन्ता कश्चिदनुचरो भवति, तस्मिन् तेषामेव प्रेष्ये—दूते वेदं निपातनम्, कशधातुर्गतिशासनयोः पठ्यते, तस्यैवाच्प्रत्ययान्तस्य प्रतिपूर्वस्य रूपमिदम्, अत्रोत्तरपदस्य षकारादित्वं निपात्यते, प्रामाणिकेन प्रयोगेण पुरोयायित्वं प्रवृत्तिनिमित्तमुदाहरति—**'ग्राममध्ये प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः**। इति—

"Aho Shrutgyanam"

अहं ग्राममध्ये प्रवेक्ष्यामि–ग्रामं गमिष्यामि, त्वं मे प्रतिष्कशोऽग्रयायी भवेति कश्चिन्नियुज्यते, **अन्यत्र** सहायादितरत्र, **प्रतिगतः कशामिति**–कशा–अश्वताडनार्था रज्जुः, तां प्रतिगतः प्राप्तः–प्रतिकशः, सचाश्वः, तस्यैव कशाप्राप्तिकर्तृत्वात्, तथा चात्र न षकारादित्वमुत्तरपदस्य । **'प्रस्कण्व हरिश्चन्द्रावृषौ'** इति गणसूत्रम्, अत्र प्रत्येकमृषिशब्दस्य न सम्बन्धः, तथा सति ऋष्योरिति द्विवचनस्यैवौचित्यं स्यात्, किन्तु ऋषौ वाच्ये प्रस्कण्व-हरिश्चन्द्रशब्दौ कृतसकारशकारावुत्तरपदौ निपात्येते इति सूत्रार्थः । प्रस्कण्वशब्दं व्युत्पादयति–**प्रगतं कण्वं पापमस्मादिति**–योगार्थस्यान्यत्र सत्त्वेऽपि रूढ्या ऋषिविशेष एवानेनाख्यायते । **हरिश्चन्द्र इवेति**–हरिर्विष्णुरिन्द्रो वा चन्द्र इव यस्येति विग्रहः, चन्द्रेण सहोपमया च चन्द्रगताह्लादकत्वं प्रत्याययितुमिष्टमित्याह–**आह्लादको यस्येति**–अयं च पौराणिको राजर्षिः, यस्य सत्यं परीक्षितुमिन्द्रेण बहुधा कष्टं दत्तम्, पश्चाच्च सर्वथा सत्ये स्थिरं ज्ञात्वा महता श्रेयसा आह्लादितोऽसाविति पौराणिकी प्रसिद्धिः । ऋषेरन्यत्र सकार-शकारादित्वमुत्तरपदस्य नेति प्रकण्वहरिचन्द्रावेव, तत्र प्रथमः कश्चिद् देशविशेषो द्वितीयश्च तन्नामा माणवकः कश्चिदित्याह–**ऋषेरन्यत्र प्रकण्वो देशः, हरिचन्द्रो माणवकः** इति, तथा चार्थविशेषनियत एवायं विधिरिति। **'मस्करो वेणुदण्डयोः'** इति गणसूत्रम्, वेणुदण्डयोरर्थयोर्मस्कर इति निपात्यत इति तदर्थः । मस्करशब्दं व्युत्पादयति–**मा क्रियते** इत्यादि, 'मा क्रियते' इत्यस्यैवार्थः–**प्रतिषिध्यत** इति, वेणुना दण्डेन वा कश्चित् किञ्चित् कुर्वन् प्रतिषिध्यत इत्यर्थः, माङुपपदात् करोतेः "पुन्नाम्नि घः" [ ५-३-१३० ] इति घः, "नाम नाम्ना०" [ ३. १. १८० ] इति समासे पृषोदरादित्वान्माङो ह्रस्वेऽनेनोत्तरपदस्य सकारादित्वं निपात्यते । अन्यथापि मस्करशब्दस्य सिद्धिमाह–**मकरशब्दस्य वाऽव्युत्पन्नस्येति**–यथा कथंचिद्रूपं साध्यमवयवार्थप्रतीत्यभावेन न व्युत्पत्तावाग्रहः कार्य इति भावः । अन्यत्र वेणुदण्डाभ्यामितरस्मिन्नर्थे सागमाभावात् मकर इत्येव रूपं, तच्च ग्राहे रूढमित्याह–**अन्यत्र मकरो ग्राह** इति । **'मस्करी परिव्राजके'** इति गणसूत्रम्, परिव्राजके-संन्यासिन्यर्थे मस्करीति निपात्यत इत्यर्थः, अस्यापि पूर्ववद् व्युत्पत्तिमाह–**माकरणशीलो मस्करीति**–माङ्पूर्वकात् करोतेः शीले णिन् सागमश्चानेन । पूर्वमुक्तं माकरणशीलत्वं दर्शयति–**सह्याह–मा कृषत कर्माणि, शान्तिर्वः श्रेयसीतीति**–स परिव्राजकः,हि-यतः, सर्वान् इत्थमुपदिशति-यत् कर्माणि-काम्यानि यागादीनि, मा कृषत-न कुरुध्वम्, यतः शान्तिः-अन्तरिन्द्रियनिग्रह एव,वो-युष्माकं,श्रेयसी-सर्वकर्मभ्यः प्रशस्यतरेति । मस्करशब्दादपि मस्करीति यद्यपि सिध्यति मत्वर्थीयेनेना, तथापि सर्वेषां परिव्राजकानां दण्डित्वाभावात् प्रकृतार्थबुबोधिषया वा पृथगेव निपातनमाश्रितम् । "मस्करमस्करिणौ वेणुपरिव्राजयोः" [पा. सू. ६-१-१५४.] इति सूत्रे भाष्येऽपि मत्वर्थीयेनेना मस्करीति रूपसिद्धिमाशङ्क्येत्थमेव समाहितम्, तथाहि तत्रत्यं भाष्यम्–"मस्करिग्रहणं शक्यमकर्तुम् । कथं मस्करी परिव्राजक इति ? इनैतन्मत्वर्थीयेन सिद्धम् मस्करोऽस्यास्तीति मस्करी परिव्राजकः । किं तर्हि, मा कृत कर्माणि, मा कृत कर्माणि शान्तिर्वः श्रेयसीत्याहातो मस्करी परिव्राजक" इति । मा कृतेति प्रतीकमुपादाय कैयटः "अयं मा कृत, अयं मा कृत इत्युपक्रम्य शान्तितः काम्यकर्मपरिहाणिर्युष्माकं श्रेयसीत्युपदेष्टा मस्करीत्युच्यत" इत्याह । अस्यायमाशयो नागेशेनोक्तः–"अयं त्यक्तवानयं त्यक्तवान् कर्माणीत्युपक्रम्य स्वयं कर्माणि परित्यज्य परान् प्रत्येवमुपदेष्टेत्यर्थः, कर्मशब्देन काम्यकर्माण्युच्यन्ते, नित्यनैमित्तिकानि तु मुमुक्षोरपि कर्त्तव्यान्येव, अत एव "काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः इति गीतायामुक्तम्" इति । एतेन सन्दर्भेण स्वयं मा कृत, अन्यानपि मा कृतेत्युपदेष्टा च मस्करीति लभ्यते । मस्करशब्दवदस्यापि साधनान्तरमाह–**मकरिन्शब्दस्य वेति**, तथा च मत्वर्थीयेनेनैव रूपं साधनीयमिति लभ्यते । अन्यत्र-परिव्राजकादन्यस्मिन्नर्थे मकरीति रूपम्, तेन च समुद्रोऽभिधीयत इत्याह–**अन्यत्र मकरीति समुद्रः । 'कास्तीराऽजस्तुन्दे नगरे'** इति गणसूत्रम्, नगरे वाच्ये कास्तीरमजस्तुन्दमिति च निपात्यत इत्यर्थः । उभयोः स्वरूपप्रतिपत्त्यर्थं व्युत्पत्तिमाह–**ईषत् तीरम् अजस्येव तुन्दमस्येति व्युत्पत्तिमात्रमिति**–कास्तीरशब्दस्य ईषत् तीरमस्येति व्युत्पत्तिः, अजस्तुन्दशब्दस्याजस्येव तुन्दमस्येति व्युत्पत्तिः, सा केवलं पूर्वपदोत्तरपदस्वरूपज्ञानार्था, न तु प्रयोगार्थपरिचायिका, 'अन्यद्धि शब्दानां प्रवृत्तिनिमित्तमन्यद्धि व्युत्पत्तिनिमित्तम्' इति प्रामाणिकोक्तेः । अयमाशयः-नगरविशेषौ हि कास्तीराऽजस्तुन्दशब्दाभ्यामभिधेयौ, न तावत् तयोः प्रथमस्येषत् तीरम्, तीरं हि नद्या भवति, न तु नगरस्य, न वा द्वितीयस्य छागस्येव तुन्दमुदरम्, नगरे तदभावादिति न तत्र यौगिकोऽर्थो घटते; अपि तु समुदायवेतौ नगरविशेषवाचकाविति स्वीकरणीयमिति । अत्र बहुव्रीहिसमासे

"Aho Shrutgyanam"

अल्पार्थकस्य कुशब्दस्य "अल्पे" [ ३. २. १३६. ] इति काऽऽदेशः, अनेन सागमः, अजस्तुन्दमित्यत्र उष्ट्रमुखादित्वात् समासः सागमश्च। नगरादन्यस्मिन्नर्थे कातीरमजतुन्दमित्येव, तत्र न सागम इत्याह-**अन्यत्र कातीरमजतुन्दमिति। 'कारस्करो वृक्षे'** इति गणसूत्रम्, वृक्षविशेषे कारस्कर इति निपात्यते इत्यर्थः। तत्र व्युत्पत्तिमाह-**कारं करोति किले**ति, कारपूर्वकात् करोतेस्ताच्छील्ये टः, अच् वा कर्तृसामान्ये, समासेऽनेन सागमे च कारस्करः किंपाकवृक्षः, अन्यश्च कारकर इत्येव। **'वनस्पतिः पुष्पं विना फलवति वृक्षे** इति गणसूत्रम्, यस्मिन् वृक्षे पुष्पोत्पत्तिं विनैव केवलं फलमेव भवति, तत्राभिधेये वनस्पतिरिति निपात्यत इत्यर्थः, वनस्य पतिरिति विग्रहे समासे सागमः, अमरकोषेऽपि "वानस्पत्यः फलैः पुष्पात् तैरपुष्पाद् वनस्पतिः।" इत्युक्तम्, विनैव पुष्पं फलवन्तश्च वृक्षा अश्वत्थोदुम्बरपनसादयः। मतान्तरमाह-**सर्वो हरितकायो वनस्पतिरित्यन्ये** इति-हरितकाय इत्यनेन जन्मतो हरितवर्णपत्राद्यावेष्टितशरीरः, पश्चाद् वर्णभेदेऽपि स एवायमिति प्रत्यभिज्ञायमानत्वाद्धरितकाय एवासौ, तथा च सर्वस्तृण-गुल्म-लता-वृक्षादिर्हरितकायपदेन ग्राह्यः। **'पारस्करो देशो'** इति गणसूत्रम्, देशविशेषे पारस्कर इति निपात्यत इत्यर्थः, अस्यापि व्युत्पत्तिं पूर्ववदेवाह-**पारं करोती**ति। **'कारस्करो गिरिवृक्षयोः** इति गणसूत्रम्, गिरिविशेषे वृक्षविशेषे चाभिधेये करस्कर इति निपात्यते, पूर्ववद् व्युत्पत्त्यादिः। **'रथस्पा नद्याम्'** इति गणसूत्रम्, रथस्पाशब्दो निपात्यते नदीविशेषे वाच्ये, तद्व्युत्पत्तिमाह-**रथं पाति पिबति वे**ति, यद्यपि पाती रक्षणार्थः पिबतिः पानार्थ इत्युभयोरेकत्र प्रयोगे कथं सामञ्जस्यसम्भव इति शङ्कितुं शक्यते, तथापि एषु न योगार्थावगतिः, केवलं पूर्वोत्तरपदपरिज्ञानाय प्रक्रियानिर्देश इति पूर्वमुक्ततया धात्वर्थभेदप्रयुक्तो न कश्चिद् भेद इति बोध्यम्, वस्तुतस्तु अखण्डा एवैतदादयः शब्दा अर्थविशेषनियताः साधुतयाऽनेन सूत्रेणानुशास्यन्ते। नद्या इतरत्र नेदं निपातनमित्याह-**रथपाऽन्या,** अत्र रथं पाति रक्षतीति व्युत्पत्तौ रथरक्षिका काचित् प्रतीयते, पानार्थस्य पिबतेस्तु रथेन सह न सामर्थ्यम्। **'किष्कुरुः प्रहरणे'** इति गणसूत्रम्, प्रहरणं प्रहारसाधनम्, तस्मिन्नर्थे निपातनमिदम्। स्वरूपपरिज्ञानाय व्युत्पत्तिमाह-**कस्य कुरुरिति**-कुरुशब्दो देशविशेषादौ प्रसिद्ध इह चानर्थक एवावयवार्थाभावात्, षष्ठीसमासे उत्तरपदे किमो मस्य षः, अन्यस्यात्रत्यपदद्वयप्रतिपाद्यस्याभावात् प्रत्युदाहरणं न दत्तम्। **'किष्कुः प्रमाणे'** इति गणसूत्रम्, प्रमीयतेऽनेनेति व्युत्पत्त्या मानसाधने वाच्ये किष्कुरिति निपात्यते,तच्च मानमायामविषयम्,तथैव प्रसिद्धेः। पूर्वोत्तरपदपरिज्ञानाय व्युत्पत्तिमाह-**किमपीषदि**ति-किंशब्द इहेषदर्थ इति भावः, भूमिपरिमाणतया कथनं केवलं व्युत्पादनमात्रम्, किष्कुशब्दवाच्यस्य वितस्तेर्हस्तस्य वा भूमिमात्रपरिच्छेदकत्वाभावात्। व्युत्पत्त्यन्तरमाह-**किं करोतीति वे**ति, सिद्धिप्रक्रियामाह-**करोतेर्डुप्रत्ययः** इति-डुप्रत्यये च सति अन्त्यस्वरादेर्लोपे सति कुरिति, किमो मकारस्य च षकारः। तृतीयां व्युत्पत्तिमाह-**कार्यं करोतीति वे**ति। उत्तरपदस्य पूर्ववत् सिद्धिः, पूर्वपदमात्रे भेद इत्याह-**डुप्रत्ययः कार्यशब्दस्य किष्भावः** इति, एवं व्युत्पत्तित्रयप्रदर्शनेन व्युत्पत्तावनाश्वासो ध्वनितः। **"किष्किन्धइति गुहा-पर्वतयोः"** इति गणसूत्रम्, गुहायां पर्वते च वाच्ये किष्किन्ध इति निपात्यत इत्यर्थः, किष्किन्ध इत्यत्र पुंस्त्वमविवक्षितं गुहायां तदभावात्। व्युत्पत्तिमाह-**किमप्यन्तर्दधाती**ति-अन्तरिति गुहास्वभावाल्लभ्यं न तु शब्दप्रतिपाद्यम्, किमो दधातेः प्रत्ययस्य वा तादृशार्थे शक्त्यभावात्, अत्र किंपूर्वकाद् दधातेरप्रत्ययः। प्रकृतसूत्रविधेयमाह- **किमो द्विर्वचनमि**ति, तत्रोत्तरः किंशब्दः स्वरूपेणैव तिष्ठति, पूर्वस्य मकारस्य षकारादेशोऽपि निपात्यते। पर्वतेऽर्थेऽन्यां व्युत्पत्तिमाह-**किं किं दधाती**ति-किं किमित्यनेनाज्ञातानेकवस्तूनि बोध्यन्ते, एषु सर्वत्र प्रकृतनिपात्यभिन्नरूपस्याप्रयुज्यमानत्वेन न प्रत्युदाहरणानि दत्तानि। **'आस्कथं नगरे** इति गणसूत्रम्, नगरविशेषे वाच्ये आस्कथमिति निपात्यते। व्युत्पत्तिमाह-**आहृताः कथा यस्मिन्निति** बहुव्रीहिसमासः, तथा चाहृतकथमित्यत्र हृतशब्दस्य लोपः, उत्तरपदस्य सागमः, आहृतशब्दस्य आस् आदेशो वा। **'तस्करश्चौरे'** इति गणसूत्रम्। चौरेऽभिधेये तस्कर इति निपात्यते, **तत् करोती**ति-तदिति पदेन प्रसिद्धं चोरकर्म चौर्यमुच्यते, तदो बुद्धिस्थप्रसिद्धाद्यर्थपरामर्शकत्वात्, तत्पूर्वकात् करोतेः शीले टः, तदो दस्य सादेशः, चौरादन्यत्र तत्कर इत्येवेति वक्ष्यति। **'बृहस्पतिर्देवतायाम्'** इति गणसूत्रम् देवताविशेषे वाच्ये बृहस्पतिरिति निपात्यते इति तदर्थः। **बृहतां बृहन् वे**ति-बृहतां-वाचां [ यद्यपि बृहतीशब्दः स्त्रीलिङ्ग एव वागर्थे दृश्यते, तथापि प्रकृतप्रयोगात् पुंल्लिगताऽपि विज्ञेया, अथवा बृहतामिति महतामित्यर्थकम्, सन्दिग्धतयैव वा बृहन् पतिरिति व्युत्पत्त्यन्तरमुक्तम् ] यद्यपि बृहतां पतिरित्यपि बृहस्पत्यर्थबोधकतया प्रसिद्धम्, तथाहि- "......" "शिष्याय बृहतां पत्युः" इति शिशुपालवधे द्वितीये सर्गे

"Aho Shrutgyanam"

माघकविः प्रायुङ्क्त, तथापि तत्रापि वागर्थत्वे प्रमाणाभाव एव, अत्रापि षष्ठीसमासे सति तकारस्य सकारः । अन्यैस्तु तदो दस्य तस्कर इत्यत्र, बृहतस्तस्य बृहस्पतिरित्यत्र लोपः क्रियते, सकारश्चागमत्वेन विधीयते, पदच्छेदे विशेषः, रूपं तु समानमेव ।गणसूत्रद्वयव्यावर्त्यमाह–**अन्यत्र तत्करो बृहत्पतिरि**ति। **"प्रायश्चित्तप्रायश्चित्ती अतीचारशोधने"** इति गणसूत्रम्, प्रायश्चित्तप्रायश्चित्तिशब्दौ, अतीचारस्य–अतिक्रम्य धर्मादिशासनमुल्लङ्घ्याचरणस्य, शोधने-प्रतिक्रियारूपे कर्मणि निपात्येते इत्यर्थः। पदद्वयस्य पृथग्व्युत्पादन–द्वारा समुदायं व्युत्पादयति––**प्रकर्षेणैती**त्यादि––यस्मान्मुनिलोकादाचारधर्मः परम्परयाऽद्यपर्यन्तं प्रकर्षेण समादृतरूपेण एति––आगच्छति स मुनिलोकः प्राय इति निगद्यते, प्र-आङ्पूर्वकादेतेरपादाने घञ् बाहुलकात् । चित्तमिति व्युत्पादयति–– **चिन्त्यते स्मर्यते** इति––चिन्तेः क्तेनिपातनादिडभावे—चित्तमिति, क्तौ च चित्तिरिति ततस्तृतीयातत्पुरुष इत्याह––**प्रायैश्चित्तं चिन्तितमि**त्यादि, चिन्ताप्रयोजनमाह––**किल्बिषविशुद्धये** इति–अतीचारप्रादुर्भूतपापापनुत्तये इत्यर्थः । अतिचारशोधनरूपं कर्मैव प्रायश्चित्तपदेनाभिधीयते,तत् किमित्याह––**आलोचन-प्रतिक्रमणादी**ति। आदिपदेनागमबोधितानामन्येषां शोधनकर्मणां सङ्ग्रहः । प्रायश्चित्तिशब्दोऽपि समानार्थकः समानप्रक्रियश्चेत्यतिदिशति––**एवं—प्रायश्चित्तिरि**ति । मतान्तरमाह––**पक्षे विसर्जनीयपूर्वः शकार इत्यन्ये** इति-प्रायस्शब्दः सकारान्तोऽव्ययमेवेह, चित्तशब्दस्य च शकारागम इति तेषामाशयः, परमेतादृशप्रयोगो नोपलभ्यते । तदनुसारं रूपमाह–– **प्रायःश्चित्तं प्रायःश्चित्तिरि**ति । स्वमतं प्रतिपाद्य मतान्तरमाह—**अन्ये तु प्रायणं प्राय** इति—प्रकर्षगतिमात्रं प्रायशब्दवाच्यम्, सा च प्रकृष्टा गतिरुभयविधापि तपोरूपा पापानुगामिनी च, उभयथापि तस्य स्मृतिषु प्रकथनात्, तथाहि––"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।" इत्येका स्मृतिः प्रायशब्दस्य तपोवाचकत्वख्यापिका, अपरा च "प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनम् ।" इति, एतया च प्रायशब्दस्य पापवाचकत्वमायाति, तथा च प्रथमा स्मृतिः प्रायश्चित्तशब्दस्य अतीचारोन्मूलकतपोनिश्चयवाचकत्वे प्रमाणं, द्वितीया—पापशोधनरूपकर्मवाचकत्वे प्रमाणम्, चित्तिशब्दोऽपि चित्तशब्दसमानार्थक एवोभयमते, कापि व्युत्पत्तिरस्तु, अतीचारशोधनत्वं तु सर्वथा तदीयप्रवृत्तिनिमित्तमायात्यवेति न कापि क्षतिः, व्युत्पत्तावनाग्रहस्य बहुशः सूचितत्वात् **'शष्कुली कृतान्ने'** इति गणसूत्रम्, कृतं प्रक्रियाविशेषेण सम्पादितमन्नं कृतान्नं, तस्मिन्नर्थे शष्कुलीशब्दो निपात्यत इत्यर्थः, तथा "कुमुल०" [ उणा० ४८७ ] इति शष्कुलीशब्द उलप्रत्ययान्तो निपात्यते तत्राह—शकेः स्वरात् षोऽन्तश्च, शष्कुली भक्ष्यविशेषः कर्णावयवश्च कृतान्नादन्यत्र शकेः "ऋषि०" [ उणा० ४८५० ] इत्युले गौरादित्वाद् ङ्यां च शकुली मत्सीविशेषः, तदाह––**कृतान्नादन्यत्र शकुली मत्सीविशेषः** इति **'गोष्पदं गोसेविते प्रमाणे च'** इति गणसूत्रम्, गोभिः सेविते-आहारविहाराद्यर्थमाश्रिते देशे, प्रमाणे–परिच्छेदे च गोष्पदमिति निपात्यत इति सूत्रार्थः । पूर्वोत्तरपदसामर्थ्यं द्योतयितुं व्युत्पत्तिमाह–**यत्र गावः पद्यन्ते** इत्यादिना, यत्र गावो गच्छन्ति तन्मात्रस्य न गोष्पदशब्दप्रवृत्तिनिमित्तत्वमपि तु ताभिराश्रितत्वमपीत्याह––**स गोभिः सेवितो ग्रामसमीपादिदेश उच्यते** इति––बहिश्चरित्वा दिनावसाने गावो ग्रामसमीप आगत्योपविशन्ति, दिनं यावत् कृतस्याहारस्य पुनश्चर्वणरूपं रोमन्थं कुर्वन्तीति तासां जातिस्वभावः, तदेव स्थानं गोष्पदशब्देनोच्यत इति समुदितार्थः । सेवितोदाहरणं प्रदर्श्य प्रमाणार्थमुदाहरति––**'गोष्पदपूरमि**ति––गोष्पदं पूरयित्वा वृष्टो देव इत्यर्थे "वृष्टिमान ऊलुक् चास्य वा" [५. ४. ५७.] इति णम् भवति, तत्र गोष्पदशब्दस्य न गोसेवितरूपार्थपरत्वम्, अपितु प्रमाणार्थपरत्वमेव,प्रमाणं च तत्राल्परूपम्, तावदल्पं वृष्टो देवो यावत् गोष्पदम्–अल्पं गर्तस्थानं पूर्यते इति तात्पर्यात्, तथा च न गोसेवितार्थपरत्वमिह गोष्पदशब्दस्येति प्रमाणे पृथगेव निपातनमाश्रितम् । **गोष्पदमात्रं क्षेत्रमि**ति–गोष्पदं प्रमाणमस्येति विग्रहे "मात्रट्" [७. १. १४५.] इति मात्रट्, अत्रापि गोष्पदशब्दस्य न स्वार्थपरत्वमपि तु क्षेत्रप्रमाणविशेषपरत्वमेव, न केवलं गवां पदमात्रं क्षेत्रमपित्वल्पपरिमाणं क्षेत्रमिति प्रतीयते। तदेव स्पष्टयति––**अत्रगोः पदमित्या**दिना, अन्यस्य–पूर्वप्रयोगे वृष्टेः, परत्र क्षेत्रस्य च, इयत्तां––परिच्छेदं, परिच्छेत्तुं––निर्णेतुम्, उपादीयमानं–प्रयुज्यमानं सत् प्रमाणं भवति–प्रमाणतां प्रतिपद्यत इत्यर्थः । **अन्यत्र** गोसेवितात् प्रमाणाच्चान्यस्मिन्नर्थे **गोपदमि**त्येव, गवां पदं स्थानमिति तदर्थः । **'अगोष्पदं सेवारहिते'** इति गणसूत्रम् । गोसेवारहिते सर्वथा गोसेवायोग्यताशून्ये स्थाने अगोष्पदमिति निपात्यत इत्यर्थः, विग्रहमाह–**न विद्यते गोः पदं येषु तानी**ति–यत्र गवां पदचिह्नस्य स्थितेर्वा सम्भावनापि नास्ति तथा-

"Aho Shrutgyanam"

भूतानीत्यर्थः, तथा च पूर्वत्र तत्पुरुषसमासः इह बहुव्रीहिरिति विशेषः सूचितः। प्रकृतप्रयोगे शिष्टप्रयुक्तत्वं प्रकटयति––**"अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान्।"** इति–अगोष्पदपदेनेह ग्रामादिसम्बन्धशून्यत्वं सूच्यते, तथा च ग्रामादिसम्बन्धशून्येषु-सर्वथाजनसंचाररहितेषु व्याघ्रादिश्वापदसेवितेष्वरण्येष्वपि, विश्वासं-निर्भयस्थितिमुपजग्मिवान्-प्राप्त इति कश्चिदत्यन्ताहिंसाप्रतिष्ठो मुनिर्वर्ण्यते, "अहिंसाप्रतिष्ठायां तत्सन्निधौ सर्ववैरत्यागः" इति हि पातञ्जलं सूत्रम्, यः किल ध्यानधारणासमाधिभिरहिंसायां स्थिरो भवति तत्सन्निधौ हिंसका अपि जीवाः परस्परं निर्वैरा निवसन्ति, तस्यात्मव्यापत्तिविषये कुतः शङ्का स्यात्, अत एव स तत्रापि सततं हिंस्रजन्तुपूर्णेऽपि स्थाने समाश्वस्तस्तिष्ठति, न भीतो भवति। गोसेविते गोष्पदशब्दस्य पूर्वनिपातितत्वात् तेनैव नञा समस्तेनागोष्पदशब्दस्यापि सिद्धौ सत्यामगोष्पदमित्यस्य पृथङ्निपातनमनर्थकमिति शङ्कते–**ननु गोष्पदप्रतिषेधादि**त्यादि। गोष्पदस्य प्रतिषेधो नञा तदभावबोधनं तस्मादगोष्पदमिति प्रयोगः सिध्यतीति पृथक् तस्य निपातनं व्यर्थमिति शङ्कार्थः। स्वीकरोति–**सत्यमि**ति–यथा शङ्कसे तथा तस्य सिद्धिः सम्भावितैवेति तदाशयः। तथापि तदावश्यकतैवेति प्रतिपादयति–**किन्त्वि**ति, अयमाशयः–*नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः* इति न्यायेन नञ्युक्तं पदं तद्भिन्नं तत्सदृशं बोधयति, एवं च अगोष्पदशब्देन वस्तु गोष्पदभिन्नमपि गोष्पदसदृशं गोभिः सेवायोग्यं स्थानं बोधयितुं शक्यते, तद्योग्यतया च तत्प्रसक्तिः संभाव्यते, किञ्च प्रसक्तस्यैव प्रतिषेधो भवतीति सर्वसिद्धान्तेन यत्र गवां प्रसङ्गः, यस्य स्थानस्य गोसेवितत्वसंभावना, तस्यैव तद्रहितत्वेऽगोष्पदशब्दप्रयोगः स्यादिति भावः, प्रसङ्गे सत्येव तदभावो नञा बोध्यत इतीममर्थं दृष्टान्तेन द्रढयति–**यथा-यत्र शुक्लगुणप्रसङ्गः** इति, अयमाशयः–शुक्लो गुणो यत्र संभाव्यते तत्रैव तदभावः प्रतिपाद्यते, तत्सम्भावना च रूपवति द्रव्य एव, आत्माऽऽकाशो वा न रूपवद् द्रव्यमिति तत्र रूपसामान्याभावस्य सिद्धत्वेन रूपविशेषशुक्लाभावप्रतिपादनं न भवति। एतेन किमायातमित्याह–**यत्र तु गवामत्यन्तासंभवः** इति, अयमाशयः–पूर्वोक्तयुक्त्या यत्र स्थाने गोष्पदत्वसंभावना तत्रैवागोष्पदप्रयोगः स्यात्, तत्सम्भावनाशून्येष्वरण्येषु तस्य प्रयोगो न स्यात्; एवं च तत्रापि अगोष्पदशब्दस्य प्रयोगार्थमिदं गणसूत्रमावश्यकमिति भावः। किञ्चास्तु नाम गोष्पदप्रतिषेधेनाप्यगोष्पदपदसिद्धिः, किन्तु न विद्यते गोः पदं यत्रेत्यर्थे बहुव्रीहौ सति अगोपदमित्यपि स्यादेवेति तन्निवृत्त्यर्थमपि प्रकृतगणसूत्रेणागोष्पदशब्दस्य निपातनमावश्यकमेवेत्याह–**न विद्यते गोः पदं यत्रेति त्रिपदबहुव्रीहिविवक्षायामि**ति, **रूपान्तरनिवृत्त्यर्थं चे**ति–रूपान्तरमगोष्पदादन्यद्रूपमगोपदमिति, तन्निवृत्त्यर्थं तथाविधबहुव्रीहिसमासनिष्पन्नरूपनिवृत्त्यर्थं, निपातनमिति पूर्वतः सम्बध्यते। ननु प्रकृतसूत्रेऽर्थकोटौ निपात्यरूपकोटौ चाऽऽदिपदेनैव तद्गणपठितानां सर्वेषां संग्रहे सिद्धे 'वर्चष्कादिषु' 'अवस्कारादयः' इत्येवमुभयत्र बहुवचनपरिग्रहो व्यर्थ इत्याशङ्कायामाह–**बहुवचनमाकृतिगणार्थमि**ति––एवमाद्याकृतयोऽन्येऽप्यत्रैव गणे द्रष्टव्या इत्येवंरूपेणाकृत्यैव गणे पठितत्वपरिज्ञानार्थमिति भावः। तत्फलमाह–**तेनाचोवचपरोवरादयोऽपी**ति, यद्यपि मुद्रितबृहद्वृत्तौ **आवोवचे**ति पाठः प्रतीयते, तथापि लघुन्यासधृतप्रतीकानुसारमाचोवचेति पाठः स्वीकृतः, आ–अञ्चतीत्याङ्, अवाञ्चतीत्यवाङ् आङ्चावाङ्चेति द्वन्द्वे "चवर्ग-द-ष-हः समाहारे" [ ६०. ३०, ९८०. ] इत्यति आचवचमिति प्राप्ते अत्र निपातनादवाच आद्यकारस्योकारः, एवं च परश्चावरश्चेति द्वन्द्वेऽवरस्यादेरकारस्योकारादेशः, परोवरशब्दः "परोवरीणपरम्परीण-पुत्रपौत्रीणम्" [ ६. १. ९९. ] इति सूत्रे पठितः। आचोवचमित्यपठितोऽपि आचार्यवचसा तत्प्रयोगोऽनुमेयः। पाणिनीये च आचोवचमिति मयूरव्यंसकादिषु पठ्यते, तत्रैव च तन्निपातनमभ्युपेयते, परोवरशब्दस्तु सूत्रपाठादेव साधुतया स्वीक्रियते। स्वमते चानेन बहुवचनेनैतदादीनां सङ्ग्रहो बोध्य इति तत्त्वम्॥ ३. २. ४८.॥

## परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्। ३. २. ४९.॥

**त० प्र०––परतो-विशेष्यवशाद् यः शब्दः स्त्रीलिङ्गः, स स्त्रियां वर्तमाने एकार्थे–तुल्याधिकरणे उत्तरपदे परे पुंवद् भवति, अनूङ्–न चेदूङन्तो भवति। दर्शनीया भार्या यस्य स–दर्शनीयभार्यः, एवं–पटुभार्यः, कल्याणभार्यः, शोभनभार्यः, प्रसूतभार्यः, प्रजातभार्यः; एनी भार्या यस्य स–एतभार्यः, एवं–श्येतभार्यः, युवतिर्जायाऽस्य–युवजानिः; कल्याणी चासौ पञ्चमी च–कल्याणपञ्चमी; पट्वी च मृद्वी च–पट्वीमृद्व्यौ, ते भार्ये अस्य–'पट्वीमृदुभार्यः, अत्र द्वन्द्वपदानां परस्परार्थसंक्रमात् द्व्यर्थस्य मृदुशब्दस्य द्व्यर्थेन भार्याशब्देन सामानाधिकरण्यमिति पुंवद्भावः, पूर्वस्य तु व्यवधानान्न भवति।**

"Aho Shrutgyanam"

परत इति किम्? द्रुणीभार्यः, वरटाभार्यः, वडवाभार्यः, अत्र पुंवद्भावे अर्थतः प्रत्यासन्नाः कूर्म-हंसा-ऽश्वशब्दाः प्राप्नुयुः; द्रोणीभार्यः, कुटीभार्यः; पात्रीभार्यः, अत्र पुंवद्भावे शब्दतः प्रत्यासन्ना द्रोण-कुट-पात्रशब्दाः प्राप्नुयुः। स्त्रीति किम्? ग्रामणि कुलं दृष्टिरस्य-'ग्रामणिदृष्टिः, खलपुदृष्टिः। स्त्र्येकार्थे इति किम्? कल्याण्या वस्त्रम्-कल्याणीवस्त्रम्। स्त्रीग्रहणं किम्? कल्याणी प्रधानमेषाम्-कल्याणीप्रधानाः, गृहिणीनेत्राः। एकार्थ इति किम्? कल्याण्या माता-कल्याणीमाता, दर्शनीयामाता। अनूङिति किम्? ब्रह्मबन्धूभार्यः, करभोरूभार्यः। अनूङिति प्रसज्यप्रतिषेधात् इडविडोऽपत्यं स्त्री अञ्, तस्य लुप्, इडविड् सा चासौ भार्या च-ऐडविडभार्येत्यादिषु उत्तरेण पुंवद्भावः। पर्युदासे हि ऊङःसदृशप्रत्ययान्तस्यैव पुंवद्भावः स्यादिति ॥ ४९ ॥

---

श० म० न्यासानुसन्धानम्—परत०। परतः इति स्त्रिया विशेषणं तदाह—**परतो विशेष्यवशादि**ति, अयमाशयः—यो न स्वतः स्त्रीलिङ्गः शब्दः किन्तु विशेष्यपारवश्यादेव स्त्रीत्वमापन्नः सः 'उत्तरपदे' इत्यनुवृत्तं तस्यैव विशेषणं—**स्त्र्येकार्थे** इति—स्त्रियामेकार्थे–समानार्थे स्त्रीलिङ्गे विद्यमानं समानाधिकरणं तस्मिन्नित्यर्थः, तदाह—**तुल्याधिकरणे** इति—शब्दस्याधिकरणमर्थः, अर्थे शब्दस्य वृत्तेः, स तस्याधिकरणं, तदेव तुल्यं यस्य तत् तुल्याधिकरणं, तथाभूते उत्तरपदे परे **पुंवद् भवति** पुंसि यथा रूपं तादृशेन रूपेण युक्तं भवति। किमविशेषेण सर्वः शब्दः पुंवद् भवति। नेत्याह—**अनूङि**ति। तदेव पदं व्याचष्टे—**नचेदूङन्तो भवती**ति—"उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ्" [ २. ४. ७३. ] इति प्रकरणे विहितमूङन्तं वर्जयित्वेत्यर्थः। उदाहरति—**दर्शनीया भार्या यस्ये**ति—अत्र दर्शनीयशब्दो विशेष्यनिघ्नो नित्यस्त्रीलिङ्गभार्याशब्दरूपविशेष्यपारतन्त्र्यादेव स्त्रीत्वमापन्न इति तस्य समानाधिकरणमुत्तरपदं भार्याशब्दस्तस्मिन् परे पुंवद्रूपमभूत्, समासश्च "एकार्थं चानेकं च" [ ३. १.-२२. ] इति सूत्रेणैव, "गोश्चान्ते०" [ २. ४. ९६. ] इति भार्याशब्दस्य ह्रस्वः। अन्यत्रापि प्रकृतविग्रहादिकमतिदिशति—**एवं पटुभार्यः** इति—पट्वी कल्याणी, शोभनेत्यादयः शब्दा विशेष्यवशादेव स्त्रीत्वमापन्ना न स्वतस्त्रिलिङ्गत्वाद् विशेष्यनिघ्नत्वाद् वा, तथा चेदृशाः शब्दा इहोदाहरणतामर्हन्त्येव।

**प्रसूतभार्यः, प्रजातभार्यः** इति—प्रसूता भार्या यस्य, प्रजाता भार्या यस्येति विग्रहः, अत्र प्रसूताप्रजाताशब्दौ कर्तृक्तप्रत्ययान्तौ सति संभवे पुंस्यपि प्रयुक्तौ स्यातामिति संभावनया तयोरिह पुंवद्रूपमुदाहृतम्, अत्र प्रसूता-प्रजाताशब्दयोर्गर्भविमोचनं प्रवृत्तिनिमित्तं, तच्च स्त्रीनियतमेव, न पुंसि गर्भविमोचनसंभावनाऽस्ति, पुंसि कदाचित् प्रयुक्तावपि गर्भाधानरूपमेव प्रवृत्तिनिमित्तमाश्रयत इति तत्र प्रवृत्तिनिमित्तभेदकृतमेव स्त्रीत्वं न तु केवलं विशेष्यपारवश्यनिबन्धनमेवेति कथमत्र स्त्रीलिङ्गयोः प्रसूत-प्रजातशब्दयोः पुंवद्रूपमिति संदिहन्ति। "स्त्रियाः पुंवद्भाषित०" [ पा० सू० ६. ३. ३४. ] इति सूत्रे भाष्येऽपि—"अस्तु तर्हि समानायामाकृतौ यद्भाषितपुंस्कमिति" स्वीकृत्य शङ्कितम्—'कथं गर्भिभार्यः प्रजातभार्यः प्रसूतभार्य इति? तत्रोत्तरमाह—"कर्त्तव्योऽत्र यत्नः" इति। सन्दिग्धमेव समाधानमुक्तम् तत्र कैयट आह—"गर्भिशब्दस्य गर्भसम्बन्धः प्रवृत्तिनिमित्तं पुंसि स्त्रियां च समानम्, अवान्तरभेदस्त्वविवक्षितः, प्रसूत-प्रजातशब्दयोरपत्यापत्यवत्सम्बन्धः समानं प्रवृत्तिनिमित्तमस्तीति दोषाभावः इति, अयमाशयः—गर्भो द्विविधोऽवयवभूतोऽनवयवभूतश्च, तत्रावयवभूतो गर्भो व्रीह्यादौ; तथा च गर्भी व्रीहिरिति प्रयोगः, अनवयवभूतो गर्भः स्त्रियामेव, तथा प्रसूत-प्रजातशब्दयोस्तु न प्रवृत्तिनिमित्तद्वैविध्यं, स्त्रियामेव तथाप्रयोगात्, तथा च गर्भिणी-प्रसूताशब्दानां न विशेष्यपारतन्त्र्यनिबन्धनं स्त्रीत्वमिति तेषां पुंवद्भावार्थं यत्नः कर्तव्य इति भाष्योक्तेरयमर्थो यत्—गर्भिणीशब्दस्य गर्भसम्बन्धमात्रं प्रवृत्तिनिमित्तं, प्रसूतप्रजातशब्दयोश्चापत्यसम्बन्धमात्रं प्रवृत्तिनिमित्तं, तच्च पुंसि स्त्रियां च समानमिति विशेष्यपारवश्यादेव पुंस्त्वं स्त्रीत्वं वा प्रतीयत इति स्वीकरणीयमित्येव समाधानमाश्रयितव्यमिति। नागेशेन चात्र विशेष उक्तः, तथाहि-एवं हि [ प्रसूतादिशब्दानां पुंसि स्त्रियां च समानप्रवृत्तिनिमित्तत्वे ] 'पुंयोगादाख्यायाम्' [ पा० सू० ४. १. ४८. ] इति सूत्रस्थभाष्यविरोधः, तत्र हि प्रसूतादेः पुमाख्यत्वं नेत्युक्तम्, तस्माद् 'गर्भिणो दाराः प्रसूता दाराः' इत्यादौ समानायामाकृतौ भाषितपुंस्कत्वमिति वक्तुं युक्तम्" इति, अयमाशयः—"पुंयोगादाख्यायाम्" [ पा० सू० ४. १. ४८. ] इति सूत्रस्थभाष्यरीत्या प्रसूता-प्रजाताशब्दयोर्गर्भविमोचनवत्स्त्रीत्वं प्रवृत्तिनिमित्तं, तस्य च पुंसि स्त्रियां च तुल्यत्वं 'गर्भिणो दाराः, प्रसूता दाराः, प्रजाता दाराः' इत्यादौ लिङ्गेनापि सामानाधिकरण्यदर्शना-

"Aho Shrutgyanam"

दुभयत्र प्रवृत्तिनिमित्तैक्यं प्रतिपादनीयमिति । एवं च "कर्त्तव्योऽत्र यत्नः" इति भाष्यस्य 'यथा समानायामाकृतौ [ प्रवृत्तिनिमित्तैक्ये ] भाषितपुंस्कत्वं भवति तथा यत्नः कार्य इत्यर्थ इति । तदग्रे च–'परे तु––शब्दार्थसम्बन्धस्य नित्यताहान्या शब्दप्रवृत्तिनिमित्तं न यत्नसाध्यम्, गर्भिणी-प्रसूतादौ पूर्वपक्ष्युक्तप्रवृत्तिनिमित्तभेद एव युक्तः, तत्र पुंवत्त्वार्थं वचनमेव कार्यमिति भाष्यार्थः । एवं चानवयवभूत-गर्भसम्बन्धे गर्भिणीशब्दो नित्यस्त्रीलिङ्ग इति 'गर्भिण्यो दाराः' इत्येव, प्रसतादिशब्दा अपि गर्भविमोचने प्रवृत्तिनिमित्ते नित्यस्त्रीलिङ्गा एवेत्याहुः" इति रीत्या स्वमतं प्रतिपादितं तेनैव, तथा च प्रसूतादिशब्दानामनेन पुंवद्भावो नोचित इत्यायाति, किन्तु भवतीह पुंवद्भाव इति तु सर्वसम्मतम्, भाष्यकृताऽपि पुंवद्भावस्य प्रयुक्तत्वात्, एवं सति पुंवद्भावविधायकवचनान्तरकल्पनापेक्षया कैयटोक्तरीत्या प्रसूतादिशब्दानां पुंस्त्रियोः समानमेव प्रवृत्तिनिमित्तमित्याश्रयणीयम् "पुंयोगादाख्यायाम्" [ पा० सू० ४. १. ४८. ] इति सूत्रस्थं प्रसूतादेः पुमाख्यत्वप्रतिषेधपरं भाष्यं तु प्रवृत्तिनिमित्तभेदपरमिति विज्ञेयम् । तथैव च स्वमतमपि । यथाकथंचिदिष्टप्रयोगसिद्धिरेव हि लक्षणकाराणां मुख्यं प्रयोजनम्, पक्षद्वये शास्त्रसम्मते एकेन पक्षेणेष्टप्रयोगनिर्वाहे सति द्वितीयेनानिष्टापादनस्य शास्त्रकारैरनादृतत्वादित्यलं प्रसङ्गागतविचारपल्लवनेनेति विरमामः ।

**एनी भार्या यस्य स-एतभार्यः** इति—एतशब्दस्य स्त्रियामेनीति रूपं, तस्य पुंवद्भावे कृते स्त्रीप्रत्ययेन सह तत्सन्नियोगशिष्टो नकारोऽपि निवर्त्तते, पुंवदित्यनेन पुंसि यादृशं रूपं तादृशमेव रूपमतिदिश्यत इति पुंसि नकारस्याश्रवणादिहापि नकारो न श्रूयते । अत्रेयं विचारणा-स्त्री पुंवद् भवतीत्युच्यते, तत्र स्त्रीशब्देन किं स्त्रीप्रत्ययग्रहणम्-अथवा स्त्रीशब्दस्य उत स्त्रीरूपस्यार्थस्य ?, स्त्रीप्रत्ययग्रहणे च स्त्र्यधिकारविहितानामाबादीनां ग्रहणं भवति, यदा स्त्र्यर्थवाची शब्दः स्त्रीशब्देनोच्यते तदा शब्दग्रहणं भवति, यदा स्त्रीत्वयुक्तं वस्तु स्त्रीशब्देनोच्यते तदाऽर्थग्रहणं भवति । अत्र प्रथमे पक्षे—स्त्रीप्रत्ययः पुंवदित्यर्थे यथा पुंसि स्त्रीप्रत्ययो न भवति तथा समानाधिकरणे उत्तरपदे परतोऽपि स्त्रीप्रत्ययो न भवतीत्यर्थः, एवं सति एनी भार्या यस्येत्यर्थे एतभार्य इति रूपं न स्यात्, किन्तु एनभार्य इत्येव रूपं स्यात्, स्त्रीप्रत्ययमात्रनिवृत्तिः पुंवदित्यनेन क्रियते, न तु स्त्र्यर्थस्य, तत्रेकारमात्रनिवृत्तौ नकारः श्रूयेत । न च सन्नियोगशिष्टत्वादीकारनिवृत्तौ नकारोऽपि निवर्त्तेतेति वाच्यम् उत्तरपदे परे पुंवद्विधानेन तस्य परनिमित्तत्वसिद्ध्या तन्निवृत्तेकारस्य स्थानिवद्भावेन नकारस्थित्यापत्तेः । अतश्च स्त्रीशब्दः स्त्रीवाचकशब्दपर इत्येव स्वीकार्यम्, तथा च स्त्रीवाचकशब्दस्य पुंवद् रूपं भवतीत्यर्थात् पुंसि नकारस्याभावादिहापि नकारो न तिष्ठति, अत एव वृत्तौ स्त्रीलिङ्गः शब्द इत्युक्तम् । अर्थग्रहणपक्षः [ स्त्र्यर्थः पुंवद् भवतीति पक्षः ] तु न युक्तः, अर्थेन सहोत्तरपदस्य पूर्वापरीभावासंभवादिति । अस्य च विचारः "स्त्रियाः पुंवत्" [ पा० सू० ६. ३. ३४. ] इति सूत्रे भाष्य-कैयटादौ बहुविस्तरेण कृत इतीह दिङ्मात्रं प्रदर्शितः । स्वमते तु सर्वमालोच्यैव शब्दग्रहणपक्ष एवाश्रितः, स एव च तत्रापि स्थिरीकृतः ।

**युवजानिरिति**-युवतिर्जाया यस्येति विग्रहे बहुव्रीहिसमासेऽनेन युवतिशब्दस्य पुंवद्भावे नलोपे कृते "जायाया जानिः" [ ७-३-१६४ ] इति जायाशब्दस्य जान्यादेशे रूपसिद्धिः । **कल्याणी चासौ पञ्चमी चेति**-अत्र कर्मधारयसमासः, अत्र च यद्यपि "पुंवत् कर्मधारये" [ ३-२-५७ ] इत्यनेनापि पुंवद्भावः सिद्धस्तथापि प्रकृतसूत्रस्यापि प्राप्तिसत्त्वादिहाप्युदाहृतम् "पुंवत् कर्मधारये" [ ३-२-५७ ] इति सूत्रस्य प्रतिषिद्धपुंवद्भावविषयकत्वस्य वक्ष्यमाणत्वेनात्र प्रतिषेधविषयत्वाभावात् द्विपदसमासमुदाहृत्य त्रिपदसमासे पुंवद्भावव्यवस्थां दर्शयितुं तदुदाहरणमवतारयति-**पट्वी च मृद्वी चेति**-पूर्वमेतयोर्द्वन्द्वे कृते सति **पट्वीमृद्व्यौ,** ते भार्ये यस्येत्यर्थे बहुव्रीहिः, तत्र मृद्वीशब्दस्यैवोत्तरपदाव्यवहितत्वात् पुंवद्भावः, तथा च **पट्वीमृदुभार्य** इति । अत्र शङ्क्यते समानाधिकरणे उत्तरपदे परे पुंद्भावो विधीयमानस्तुल्यन्यायात् सामानाधिकरणस्यैव पूर्वपदस्य स्यात्, सामानाधिकरण्यं च पट्वी-मृद्वीति समुदायस्यैव भार्याशब्देन द्विवचनान्तेन, न तु केवलं मृद्वीशब्दस्येति कथं तस्य पुंद्भाव इति, तत्राह-**द्वन्द्वपदानां परस्परार्थसङ्क्रमादिति,** अयमाशयः–द्वन्द्वे सहोक्तिसत्त्वे एव समासः, सहोक्तिश्च-अनेकार्थस्य संभूयवचनम्, तत्रानेकानि पदानि परस्परार्थसङ्क्रमात् प्रत्येकमनेकार्थाभिधायीनि भवन्तीति पूर्वमुपपादितं "चार्थे द्वन्द्वः सहोक्तौ" [ ३. १. ११७ ] इति सूत्रे तथा च मृद्वीशब्दोऽपि पट्वी-मृद्वीति समुदायार्थबोधक इति तस्य द्विवचनान्तेन भार्याशब्देन सह सामानाधिकरण्यमक्षतमिति । नन्वेवं पट्वीशब्दोऽपि द्व्यर्थाभिधायीति तस्यापि भार्याशब्देन सह सामानाधिकरण्यमस्त्येवेति तस्य कुतो न

"Aho Shrutgyanam"

पुंवद्भाव इति चेत् ? अत्राह-**पूर्वस्य तु व्यवधानान्न भवतीति**, अयमर्थः-अवश्यं पट्वीशब्दोऽपि भार्यया सह समानाधिकरणः, किन्तु "उत्तरपदे" इत्यत्र सप्तम्याऽव्यवहितपूर्वस्य कार्यं बोध्यते "सप्तम्या पूर्वस्य" [ ७. ४. १०५ ] इति परिभाषया, पट्वीशब्दश्च मृद्वीशब्देन व्यवहित इति तस्य न भवति पुंवद्भावः । अथ पदकृत्यं प्रदर्शयितुमारभते-**परत इति किमिति**-केवलं "स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्" इत्येवोच्यताम्, या स्वतः स्त्री तद्वाचकस्य शब्दस्य पुंसि रूपाभावादेव पुंवद्भावो न स्यादिति परत इति व्यर्थमिति । परत इत्यस्यानुक्तौ स्त्री पुंवदिति कथिते प्रकृतशब्दस्य पुंसि रूपाभावेऽपि अन्य एव कश्चित् पुंलिङ्गः शब्दस्तत्र प्रयुज्येत, तत्र "आसन्नः" [ ७. ४. १२० ] इति परिभाषया स्वरूपतः प्रत्यासन्नस्य शब्दस्यालाभेऽर्थतः प्रत्यासान्नास्तदर्थका अन्ये शब्दा एव पुंलिङ्गास्तस्य स्थाने प्रयुज्येरन्, तथा च 'द्रुणीभार्यः, वरटाभार्यः, वडवाभार्यः' इत्यादौ द्रुण्यादीनां पुंसि रूपाभावात् तदर्थकाः कूर्म-हंसा-ऽश्वशब्दाः प्रयुञ्जीरन् । अत्र केचिदेवमाहुः-'द्रुणीभार्यः' इत्यस्य स्थाने 'डुलीभार्य' इति प्रत्युदाहरणमन्यतन्त्रे दृश्यते, तदेव चोचितमिति प्रतिभाति; डुलीशब्दोऽपि कूर्मस्त्रीवाचकः, स च केवलं स्त्रियामेव प्रयुज्यते, द्रुणशब्दस्तु पुंसि स्त्रियां चेति, तस्य प्रकृतोपयोगित्वाभावात् । द्रुणशब्दस्य पुंस्त्वं न वैयाकरणसम्मतमिति समाधानं तु न साधु, लिङ्गस्य लोकाश्रितत्वात्, दृश्यते च लिङ्गविषये लोकव्यवहारस्यैवादरः शास्त्रकृद्भिः कृतः इति । तथाहि पातञ्जलं भाष्यम्-'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिंगस्ये'ति । उक्तं चैतदाचार्येणापि-

"नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ।
पदं वाक्यमव्ययं चेत्यसंख्यं च तद्बहुलम् ॥" इति

लिङ्गानुशासनीयकारिकान्तस्थबहुलशब्दं व्याचक्षाणेन ।

"द्रुणं चापे च खड्गे च द्रुणो वृश्चिक-भृङ्गयोः ।
द्रुणी कच्छपिकायां च जलद्रोण्यामुदाहृता ॥"

इति लिङ्गानुशासनवृत्तिः । तथा च स्त्रीमात्रनियताभ्यां वरटा-बडवाशब्दाभ्यां साजात्येन डुलीशब्द एवेह पठितो लेखकप्रमादाद् द्रुणीति पाठः समागत इति । अपरे त्वेवमाहुः-डुलीशब्दो नाचार्येण कोशादौ दर्शितः अभिधानचिन्तामणौ हि "कच्छपी दुली" इति दुलीशब्दः कच्छपस्त्रीवाचको दर्शितः उणादौ च "दुलिः कच्छपः" इति पुंस्यपि दर्शितः स एव ङ्यां दुलीति भवति । किञ्च कच्छपार्थे द्रुणशब्दो स्त्रीतोऽन्यत्र वर्तत एव न, तथा च द्रुणीभार्य इति पाठः साधुरेवार्थतः प्रत्यासत्तिप्रसङ्गादिति । न केवलमर्थतः प्रत्यासत्तिकृत एव दोषोऽपि तु शब्दतः प्रत्यासत्तिकृतोऽपीति तदनुकूलं दृष्टान्तमाह-**द्रोणीभार्यः, कुटीभार्यः, पात्रीभार्यः** इति—द्रोणीशब्दः कुल्यावाचको नित्यस्त्रीलिङ्गः, कुटीशब्दः क्षुद्रगृहवाचको नित्यस्त्रीलिङ्गः, पात्रीशब्दो भाजनविशेषार्थे नित्यस्त्रीलिङ्गः, यद्यप्येषां भार्याशब्देन पत्नीवाचकेन सह नैकार्थ्यसम्भावना, तथापि तास्वौपचारिकं भार्यात्वमारोप्य व्यवहारः समाधेयः, एषां न परतः स्त्रीत्वमपि तु स्वत एवेति परत इत्यस्याभावेऽत्रापि पुंवत्त्वप्रवृत्तौ सत्यां तत्तत्प्रवृत्तिनिमित्तकस्य शब्दस्य पुंस्त्वाभावेऽपि भिन्नप्रवृत्तिनिमित्तकस्यापि समानाकृतेः शब्दस्य प्रयोगः स्यात् । तथा च द्रोणीभार्य इत्यत्र द्रोणीशब्दस्य स्थाने काकाढकचतुष्टयादिवाची द्रोणशब्दः प्रयुज्येत, कुटीशब्दस्य स्थाने घटवृक्षादिवाची कुटशब्दः प्रयुज्येत, पात्रीशब्दस्य स्थाने पात्रसामान्यवाचकपात्रशब्दश्च प्रयुज्येत । यद्यपि पात्रसामान्यवाचकः पात्रशब्दो न पुंल्लिङ्गो नपुंसक एव तस्य प्रयोगात्, तथापि अर्धर्चादिगणे तस्य पाठस्य दृष्टत्वात् पुंल्लिङ्गत्वमपि तस्यास्त्येवेति स्वीकार्यम् । एवं चषु "आसन्नः" [ ७. ४. १०५. ] इति परिभाषया शब्दस्वरूपतः प्रत्यासन्नानां शब्दानामपि प्रयोगो मा भूदित्येतदर्थमपि परत इति कथनीयमित्याह—**अत्र पुंवद्भावे शब्दतः प्रत्यासन्ना** इत्यादिना । **स्त्रीति किमि**ति—स्त्रियां वर्तमानेन सहैकार्थः स्त्रीवाचक एव शब्दः स्यादिति स्त्रीवाचकशब्दोपस्थापकं स्त्रीतिपदमव्यावर्त्तकमिति प्रष्टुराशयः । प्रत्युदाहरणेनोत्तरमाह—**ग्रामणि कुलं दृष्टिरस्ये**ति—कुलमिति ग्रामणीशब्दस्य नपुंसकत्वं द्योतयितुम्, अत्र नपुंसकेन ग्रामणीशब्देन सह स्त्रीलिङ्गस्य दृष्टिशब्दस्य सामानाधिकरण्यं स्पष्टमेव, तथा चात्र पुंवद्भावे सति क्लीबत्वप्रयुक्तो ह्रस्वो निवर्त्तेतेति ग्रामणीदृष्टिरिति स्यात् । एवं—खलपूशब्दोऽपि क्लीबे वर्त्तमानो दृष्टया सह समानाधिकरणो भवतीति तस्यापि पुंवद्भावे दीर्घान्तस्यैव खलपूशब्दस्य श्रवणं स्यात्, तद्वारणाय स्त्रीग्रहणमावश्यकमिति भावः । **स्त्र्येकार्थे इति किमिति**— स्त्रियां वर्त्तमानं सद् यत् स्त्रीवाचकपूर्वपदस्य समानाधिकरणमुत्तरपदं तस्मिन्नित्यर्थकं 'स्त्र्येकार्थे' इति पदं किमर्थम्? सामान्येनोत्तरपदे एवं प्रवर्त्ततामिति प्रश्नाशयः । उत्तरयति **कल्याण्या वस्त्रं-कल्याणीवस्त्रमि**ति अत्र षष्ठीतत्पुरुषेऽपि पुंवत्त्वं स्यादिति तद्वारणाय 'स्त्र्येकार्थे इत्यावश्यकमिति



"Aho Shrutgyanam"

भावः । नन्वेतादृशातिव्याप्तिवारणाय 'एकार्थे' इत्येवोच्यताम्, स्त्रियां विद्यमानमित्यर्थबोधकं स्त्रीपदं तत्र कुतो निवेश्यते? कल्याणीवस्त्रमित्यत्र चैकार्थे इत्यनेनैव वारितं स्यात्, षष्ठीतत्पुरुषे उत्तरपदेन सह सामानाधिकरण्याभावादिति पृच्छति—**स्त्रीग्रहणं किमिति** । उत्तरयति—**कल्याणी प्रधानमेषां—कल्याणीप्रधाना** इति—अत्र प्रधानशब्दः समानाधिकरणमुत्तरपदं, स च क्लीबलिङ्ग इति तत्र पुंवत्त्वं नेष्टम्; स्त्रीग्रहणाभावे च तत्रापि तत्प्रवृत्त्यापत्तिरिति तद्वारणाय स्त्रीग्रहणमावश्यकमित्यर्थः । **अनूङिति किमिति**—ऊङन्तस्य पुंवद्भावप्रतिषेधः किमर्थः? इति प्रश्नः । **ब्रह्मबन्धूभार्यः** इति—"उतोऽप्राणिनः०" [२. ४. ७३.] इत्यूङ्प्रत्ययान्तो ब्रह्मबन्धूशब्दः, तस्य भार्यया सह बहुव्रीहिः, अत्र पुंवत्त्वे 'ब्रह्मबन्धुभार्यः' इति स्यात्, एवं—'**करभोरूभार्यः**' इत्यत्रापि; अनूङित्युक्ते च न भवति । अथ अनूङिति पर्युदास एवाश्रीयतां लाघवात्, प्रसज्यप्रतिषेधे हि वाक्यभेदो भवति, पर्युदासे हि—ऊङन्तभिन्नः परतः स्त्रीलिङ्गः शब्दः स्त्र्येकार्थे उत्तरपदे पुंवदित्येकमेव वाक्यं भवतीति लाघवम्, प्रसज्यप्रतिषेधे चाविशेषेण पुंवत्त्वं विधाय पश्चादूङन्तस्य निषेधो विज्ञायत इति गौरवमित्याशङ्कायामाह—**अनूङिति प्रसज्यप्रतिषेधादि**ति, अयमाशयः—फलमुखगौरवस्याकिञ्चित्करत्वेन वक्ष्यमाणफलसत्त्वादिह प्रसज्यप्रतिषेधाश्रयणमावश्यकम् । तदेव फलमाह—**इडविडोऽपत्यं स्त्री**ति । अयमाशयः—प्रसज्यप्रतिषेधाभावे पर्युदासः स्यात्, तथा च ऊङन्तभिन्नस्य तत्सदृशस्य स्त्रीप्रत्ययान्तस्यैव पुंवद्भावः स्यात्, एवं चेहापत्यार्थप्रत्ययस्य स्त्रियां लुपि सति प्रत्ययान्तभिन्न एवेडविड्शब्दः, तस्य पुंवद्भावो न स्यादित्यैडविडभार्या इति रूपं न स्यात्, किन्तु इडविड्भार्येति, अत्र हि "पुंवत् कर्मधारये" [३. २. ५७] इति पुंवद्भावो भवति, तत्राऽप्यनूङित्यस्य सम्बन्धोऽस्त्येवेति यद्यत्र पर्युदासः स्यात् तर्हि तत्रापि पर्युदास एव स्यात् । तदेव स्पष्टयति—**पर्युदासे हि ऊङ्सदृशप्रत्ययान्तस्यैव ही**ति, अयमर्थः—*नञिवयुक्तमन्यसदृशार्थे तथा ह्यर्थगतिः* इति न्यायेन पर्युदासस्थले पर्युदस्यमानभिन्नतत्सदृश एव गृह्यते, अब्राह्मणमानयेत्युक्ते ब्राह्मणभिन्नो मनुष्य एवानीयते न तु पश्वादिः काष्ठादिर्वा, तथा च ऊङ्भिन्न ऊङ्सदृशो गृह्येत, सादृश्यं च स्त्रीप्रत्ययत्वेन सामान्यतः प्रत्ययत्वेन वा ग्राह्यम्, उभयथापि प्रकृते दोष एव, इडविड्शब्दो न स्त्रीप्रत्ययान्तो नवा किञ्चित्-प्रत्ययान्तः, प्रत्ययस्येह लुप्तत्वात्, एवं चेदृशलक्ष्यसिद्ध्यर्थं प्रसज्यप्रतिषेधाश्रयणमावश्यकमिति समुदितार्थः ।। ३. २. ४९. ।।

## क्यङ्मानिपित्तद्धिते । ३. २. ५० ।।

त० प्र० क्यङि प्रत्यये मानिनि शब्दे चोत्तरपदे पिति तद्धिते च प्रत्यये परे परतः स्त्रीलिङ्गशब्दोऽनूङ् पुंवद् भवति । क्यङ्–श्येनीवाचरति–श्येनायते; मानिन्–दर्शनीयां मन्यते दर्शनीयमानी अयमस्याः, दर्शनीयमानिनीयमस्याः, मानिन्ग्रहणमस्त्र्युत्तरपदार्थम्–समानाधिकरणार्थं च, दर्शनीयामात्मानं मन्यते–दर्शनीयमानिनीति तु सामानाधिकरण्ये पूर्वेणैव भवति; पित्तद्धित–थ्यप्, अजायै हितम्–अजथ्यं यूथम्, पित्तिथट्–बह्वीनां पूरणी–बहुतिथी, पूचरट्–भूतपूर्वा पट्वी–पटुचरी, पित्तस्–बह्वीभ्यो–बहुतः, त्रप्–बह्वीषु–बहुत्र, प्शस्–बह्वीभ्यो देहि–बहुशो देहि, अल्पाभ्यो देहि–अल्पशो देहि, पाशप्–निन्द्या दर्शनीया–दर्शनीयपाशा, तमप्–इयमासामतिशयेन पक्वा–पक्वतमा, तरप्–इयमनयोरतिशयेन पक्वा–पक्वतरा, रूपप्–प्रशस्ता दर्शनीया–दर्शनीयरूपा, कल्पप्–ईषदसमाप्ता दर्शनीया–दर्शनीयकल्पा, देश्यप्–एवं दर्शनीय-देश्या, कप्–ह्रस्वा दर्शनीया–दर्शनीयका, कुत्सिता दरद्–दारदिका । कथं पट्विका? मृद्विका? "ङ्यादीदूतः के" [२. ४. १०४] इत्यत्र ङीग्रहणं पुंवद्भावबाधनार्थमित्युक्तम्, तेनात्र ह्रस्वो भवति ।

पिद्ग्रहणं किम्? पट्वीरूप्यम्, पट्वीमयम्, तन्वीं तन्वीं खनति–तन्वीशः खनति,–"संख्यैकार्थाद् वीप्सायां शस्" [७. २. १५१] इति शस् । तद्धित इति किम्? पट्वीषु, बह्वीषु, कुमारीवाचरति क्विप्–कुमारयति, कुमारीयतेः क्विप्–कुमारी ब्राह्मणः । पञ्चभिर्गार्गीभिः गार्ग्यायणीभिर्वा क्रीतः–पञ्चगर्गः, दशगर्गः, अत्रेकणः "अनाम्न्यद्विः प्लुप्" [६. ४. १४१] इति प्लुप्, पित्वात् पुंस्त्वम्, ततो "यञञोऽश्या०" [६. १. १२६] इत्यादिना यञञोः लुप् भवति, गतगतेत्यात्रापि प्लुप् चादावेकस्य स्यादेरित्यनुवर्तमाने "आबाधे" [७. ४. ८५] इति द्विर्वचने आदेः स्यादेर्लुपः पित्वात् पुंस्त्वम् ।। ५० ।।

श० म० न्यासानुसन्धानम्–क्यङ्० । 'अत्र परतः स्त्री अनूङ्, उत्तरपदे' इत्यनुवर्त्तते; 'स्त्र्येकार्थे' इति च

"Aho Shrutgyanam"

निवृत्तम्, तत्रोत्तरपदे इत्यस्य यथासंभवं मानिनैव सम्बन्धो न त्वन्यैःअयोग्यत्वात् । तथा चार्थमाह–**क्यङि प्रत्यये** इत्यादिना । क्रमश उदाहरति **क्यङि**त्यवतरणेन– **श्येनीवाचरती**ति, श्येतशब्दो वर्णवाची, तस्य च वर्णविशिष्टार्थत्वमपीति स्त्रीलिङ्गे तस्य श्येनीति रूपं भवति, सा इवाचरतीत्यर्थे "क्यङ" [ ३. ४. २६. ] इति क्यङि अनेन पुंवत्त्वे, दीर्घे च–श्येतायते इति । मानिनिति नाममात्रं निर्दिष्टम्; नामग्रहणे च लिङ्गविशिष्टस्यापि ग्रहणं भवतीति पुंसि स्त्रीलिङ्गे चोदाहरणमाह–**दर्शनीयमानी अयमस्याः, दर्शनीयमानिनीयमस्याः** इति–दर्शनीयामिति कर्मणः परात् मन्धातोः "मन्याण्णिन्" [५.१.११६] इति णिन्, उपान्त्यवृद्धौ मानिन् शब्दः सम्पद्यते, तत्र ङस्युक्तसमासे सति प्रकृतसूत्रेण दर्शनीयायाः पुंवद्भावः, यत्र कश्चित् पुरुषः कांचित् स्त्रियं दर्शनीयां मन्यते तत्र दर्शनीयमानीति, यत्र च काचित् स्त्र्येव कांचिद् दर्शनीयां मन्यते तत्र दर्शनीयमानिनीति, अत्रोभयत्र न पूर्वेण सिद्धिः, स्त्र्येकार्थकोत्तरपदाभावात्, पूर्वत्र हि न स्त्रियां वर्त्तमानमुत्तरपदं नवा समानाधिकरणम्, परत्र च स्त्रियां वर्त्तमानत्वेऽपि सामानाधिकरण्यं नास्ति, अन्या हि दर्शनीया तन्मानिनी चान्या इति मानिन्शब्दे परे विशिष्य पुंवद्भावविधानमावश्यकम् । तदाह–**मानिन्ग्रहणमस्त्र्युत्तरपदार्थमसमानाधिकरणार्थं चे**ति । अस्ति च पूर्वसूत्रस्यापि मानिन्शब्दे परे प्रवृत्तिविषयता, तां दर्शयति–**दर्शनीयामात्मानं मन्यते** इति, अयमाशयः–या दर्शनीया सैवेह मानिनीति स्त्रीत्वं सामानाधिकरण्यं चेत्युभयमिह भवतीति स्त्रीलिङ्गे एकार्थे उत्तरपदे सति पूर्वेणैव पुंवत्त्वं तत्र भवति, वस्तुतस्तु–'दर्शनीयमान्ययमस्याः, दर्शनीयमानिनीयमस्याः' इत्याद्यर्थं कृतेऽस्मिन् सूत्रे, दर्शनीयामात्मानं मन्यते इति–दर्शनीयमानिनीत्यत्रापि प्रकृतसूत्रस्यैव प्रवृत्तिरुचिता, परत्वात् प्रतिपदोक्तत्वाच्च, एवं च **'पूर्वेणैव भवति'** इत्यस्य स्थाने पूर्वेणापि भवतीति पाठो युक्तः, तथा च पूर्वेणैव भवतीति ग्रन्थ 'एतत्सूत्रे मानिन्ग्रहणाभावे' इति वाक्यशेषेण योजनीयः, तत्रैवाचार्याणां तात्पर्यात् । तथा च पूर्वेण सिद्धत्वमात्रे एव तात्पर्यं न तु प्रकृतसूत्रे सत्यपि पूर्वेणैवेह पुंवत्त्वं भवतीत्यत्र । "क्यङमानिनोश्च" [ पा. सू. ६. ३. ३६. ] इतिसूत्रे भाष्येऽपि मानिन्ग्रहणस्य सार्थक्यमेवमेवोपपादितम्, तद्भाष्यव्याख्यावसरे च कैयटेन स्पष्टमिदं प्रतिपादितम्–स्त्रीलिङ्गे समानाधिकरणे उत्तरपदे पूर्वेण सिद्धत्वात्, यथा दर्शनीयामात्मानं मन्यते–दर्शनीयमानिनी देवदत्तेति । "अत्र ह्येकस्या एव कर्मत्वात् कर्त्रीत्वाच्चास्ति सामानाधिकरण्यं" इति । तथा च पूर्वेण सिद्धत्वादित्येव तदीयमपि मतं न तु पूर्वेणैव भवतीति । पित्तद्धितमुदाहरति–**थ्यप्–अजायै हितम्–अजथ्यं यूथमि**ति–अजाशब्दात् हितार्थे "अव्यजात् थ्यप्" [७. १. ३८.] इति थ्यप्, अनेन पुंवद्भावः। **बह्वीनां पूरणी–बहुतिथी**ति–अत्र "पित्तिथट् बहु-गण-पूग-सङ्घात्" [७. १. १६०.] इति पित् तिथट्, अनेन च पिति तद्धिते पुंवद्भावः । **भूतपूर्वा पट्वी–पटुचरी**ति–अत्र "भूतपूर्वे प्चरट्" [७. २. ७२.] इति प्चरट्, पट्वीशब्दस्य पुंवद्भावः । एवं–**"बह्वीभ्यो– बहुतः"** इत्यादावपि पित्तद्धिते पुंवत्त्वं ज्ञेयम् । **दर्शनीयके**ति–अत्र कपि पुंवद्भावः, तत्र यद्यपि "अस्यायत्तत्क्षिपकादीनाम्" [ २. ४. १११. ] इतीत्वं विधेयम्, तथापि पुंवद्भावस्य रूपं स्पष्टयितुं तथा नोदाहृतम्, किन्तु प्रक्रियादशारूपमेव दत्तम्, तथा च नेदं परिनिष्ठितं रूपम्; पुंवद्भावाभावेऽपि "स्वज्ञाऽज०" [ २. ४. १०८. ] इति विकल्पेनेत्त्वमापः स्थाने स्यादेवेति इत्वनिर्देशे न पुंवद्भावकृतो विशेषो विज्ञातुं शक्यतेति नित्योऽपीत्वविधिरत्र न दर्शितः शिष्यसन्देहनिरासार्थमिति विज्ञेयम् । **कुत्सिता दरद्–दारदिके**ति–दरदां राज्ञीत्यर्थे "पुरु-मगध०" [६.१.११६.] इति द्रिरण्, तस्य "द्रेरणोऽप्राच्यभर्गादेः" [६.१.१२३.] इति लुप्, ततः कुत्सार्थे कप्, तस्मिन् सत्यनेन पुंवद्भावात् दारदेत्यकारान्तं रूपं भवति, ततः "अस्यायत्तत्०" [२.४.१११,] इतीत्वे–दारदिकेति रूपम्, दरदोऽपत्यं स्त्रीत्यर्थे तु गोत्रापत्यस्य "गोत्रं च चरणैः सह" इति परिभाषणात् जातित्वेन "स्वाङ्गाङ्ङीर्जातिश्चामानिनि" [ ३.२.५६.] इति पुंवद्भावप्रतिषेधः स्यात्, यदि च दरदोऽनन्तरापत्यं [युवापत्यं] विवक्ष्यते तदाऽपत्यार्थेऽपि न दोष इति विभावनीयम्। केचित् तु–"पुरुमगध०" [६.१.११६] इत्यादिभिः सूत्रैर्न केवलं राज्ञि नवाऽपत्ये प्रत्ययो भवति किन्तु राजापत्येऽर्थे, तथा च तत्र गोत्रत्वाविवक्षणान्न जातित्वमिति नास्ति दरदामपत्यं राज्ञीत्यर्थेऽपि निषेधाशङ्का पुंवद्भावस्य"इति प्राहुः । यदि च 'राजापत्ये' इति समाहाराश्रयणेन निर्देश इति राज्ञि अपत्यार्थे च पृथगेव प्रत्ययः, तथा च यदा राजार्थे प्रत्ययस्तदा गोत्रत्वविवक्षा मास्तु, अपत्यार्थे प्रत्ययविधाने तु तद्विवक्षाऽवश्यमाश्रयणीयेत्युच्येत, तदाऽस्तु केवलं राज्ञीत्यर्थे एव प्रत्ययः । न च वाच्यं तत्र पुंलिङ्ग–

"Aho Shrutgyanam"

निर्देशेन स्त्रीत्वविशिष्टे राजनि वाच्ये न स्यात् प्रत्यय इति, तत्र नाममात्रनिर्देशात्, नामग्रहणे च लिङ्गविशिष्टस्यापि ग्रहणस्य न्यायसिद्धत्वात्, उभयलिङ्गनिर्देशस्याशक्यत्वेन गौरवपराहतत्वेन च नाममात्रनिर्देशादरस्य अवश्यस्वीकरणीयत्वात्। कपि पुंवद्भावमुदाहृत्य क्वचित् कपि तदभावोऽपि दृश्यते स कथमिति शङ्कते—**कथं पट्विका मृद्विकेति**—अत्र कुत्सार्थे कपि "ङ्यादीदूतः के" [२.४.१०३.] इति ह्रस्वो भवति, कपि परे पुंवद्भावेन भाव्यं तत् कथं नेति शङ्कार्थः। तत्रोत्तरमाह—**"ङ्यादीदूतः के" [२.४.१०३] इत्यत्र ङीग्रहणं पुंवद्भावबाधनार्थमित्युक्तं, तेनात्र ह्रस्वो न भवती**ति, अयमाशयः—पट्विकेत्यादावीदन्तत्वेनैव ह्रस्वे सिद्धेऽत्र सूत्रे ङीग्रहणं व्यर्थमित्याशङ्कायां तस्य पुंवद्भावबाधनार्थत्वमित्युक्तमेव तत्सूत्रव्याख्यायाम्, तथा च पुंवद्भावं प्रबाध्य ह्रस्व एव भवति, बाधितश्च पुंवद्भावः कथं प्रवर्त्ततां तत्प्रवृत्तौ ह्रस्वप्रवृत्तेर्वैयर्थ्यात्, सकृद्गतिन्यायाच्च। **पिद्ग्रहणं किमि**ति—केवलं 'तद्धिते' इत्येवोच्यतामिति भावः। अविशेषात् सर्वत्र तद्धिते पुंवद्भावप्रवृत्तौ दोषानाह—**पट्वीरूप्यमि**त्यादि—तथा च 'पटुरूप्यम्, पटुमयम्' इत्यापत्तिरिति तद्वारणार्थं पिद्ग्रहणमावश्यकम्; एवं—**तन्वीशः खनती**त्यत्रापि द्रष्टव्यम्। पितीत्येवोच्यतां तद्धित इति त्यज्यतां, तावताऽपि पट्वीरूप्यं पट्वीमयमित्यादिसिद्धेरिति पृच्छति—**तद्धित इति किमिति। पट्वीषु बह्वीष्वि**ति—'तद्धिते' इत्यस्यानुक्तौ स्यादौ पित्यपि पुंवद्भावः स्यादिति भावः। न केवलं स्यादावेव पिति दोषोऽपि तु कृदन्तेऽपीत्याह—**कुमारीवाचरती**त्यादिना, तथा च कुमारी ब्राह्मण इत्यत्र कुमारीशब्दः क्विबन्त इति क्विपः स्थानिवद्भावेन पित्परत्वादत्रापि पुंवत्त्वे कुमारो ब्राह्मण इति स्यादिति भावः। ननु क्विपोऽप्रयोगित्वेन तस्य परत्वरूपनिमित्तत्वं कथं स्यादिति चेदत्र दृष्टान्तद्वारा दार्ढ्यं साधयति—**पञ्चभिर्गार्गीभि**रित्यादिना, तथा च क्रीतार्थप्रत्ययस्य विहितः प्लुप् अपि अप्रयोग्येव, तथापि पित्त्वविधानसामर्थ्यादेव यथा तं निमित्तीकृत्य **पञ्चगर्ग** इत्यादौ पुंवद्भावो भवति, तस्मिंश्च सत्येव "यञञोश्या०" [६.२.१२६] इति सूत्रेणास्त्रियां विहितो लुबपि भवति, अन्यथा न स्यादेव, एवं क्विपोऽप्रयोगित्वेऽपि तस्मिन् परे कुमारी ब्राह्मण इत्यत्रापि स्यादिति भावः। "अनाम्न्यद्विः प्लुप्" [६.४.१४६] इति विहितः प्लुप् च तद्धितस्थानीयत्वेन तद्धित एव, अयं क्विप् कृत्प्रत्यय इति विशेषः। एवमसत्यपि परत्वे स्थानिस्थितं परत्वमादायाप्रयोगिन्यपि पुंवद्भावविधिमन्यत्राप्युदाहरति—**गतगतेत्यत्रापी**ति—काचिद् गता तदीयगमनपीडितस्योक्तौ गताशब्दस्य सविभक्तिकस्य द्वित्वं भवति, पूर्वभागस्थायाः स्यादिविभक्तेश्च पिल्लुप् विधीयते "आबाध" [७.४.८५] इति सूत्रेण, एवं चात्र प्लुपस्तद्धितस्थानीयत्वाभावेऽपि पित्त्वसामर्थ्यादेव पुंवत्त्वम्, क्विपि पित्त्वं त्वन्यकार्यार्थं चरितार्थम्—कर्म करोतीति कर्मकृदित्यादिरूपसिद्ध्यर्थमिति न तत्र पित्त्वस्य सामर्थ्यम्, एवं च पित्त्वात् पुंस्त्वमित्यस्य पित्त्वसामर्थ्यात् पुंवद्भाव इति भावः॥ ३.२.५०॥

## जातिश्च णि-तद्धितय-स्वरे ३. २. ५१॥

**त० प्र०—अन्या परतः स्त्री जातिश्च णिप्रत्यये यकारादौ स्वरादौ च तद्धिते विषयभूते-उत्पत्स्यमाने तद्विवक्षायामेव पुंवद् भवति, अनूङ्। णि—'पट्वीमाचष्टे'—पटयति, लघयति, एवम्—एतयति, श्येतयति। तद्धितय—एन्यां साधुः—'एत्यः, एवं—श्येत्यः; एन्या भावः—ऐत्यम्, एवं—श्यैत्यम्, लौहित्यम्। तद्धितस्वर—भवत्या इदं—भावत्कम्, भवदीयम्, इयमासामतिशयेन पट्वी—पटिष्ठा, पटीयसी। जाति—तद्धितय—दरदोऽपत्यं स्त्री अण् लुप्—दरत्, तस्यां साधुः—दारद्यः, एवम्—औशिज्यः, पुंवद्भावादणो लुप् निवर्तते। तद्धितस्वरे—गार्ग्यायण्याः कुत्सितमपत्यं—गार्गः, गार्गिकः, हस्तिनीनां समूहो—हास्तिकम्। जातिग्रहणं जातिलक्षणप्रतिषेधनिवृत्त्यर्थम्, सति तस्मिन् चकारोऽन्यार्थः—जातिः परतः स्त्री, अन्या च परतः स्त्री पुंवद्भवतीत्यर्थः, अकृते हि चकारे जातेरेव पुंवद्भावः स्यात्।**

**तद्धितेति किम्? हस्तिनीमिच्छति—हस्तिनीयति, हस्तिन्यः; एनीयति, एन्यः। कथं यौवतम्? भिक्षादौ युवतीति स्त्रीलिङ्गपाठात्, कौण्डिन्य इति तु "कौण्डिन्यागस्त्ययोः०" [६.१.१२७.] इति निदर्शन पुंवद्भावस्यानित्यत्वात्, अत एव मानाय्य इत्यत्रापि न भवति; सापत्न इत्यपि "पत्न्यादौ" [२.४.५०] इति सूत्रे सपत्नीति समुदायनिपातनात्, अत एव सपत्नीभार्य इत्यत्रापि न भवति; सपत्नस्यायं सापत्न इति वा भविष्यति। तद्धितयस्वर इति विषयसप्तम्याश्रयणं किम्? पट्व्या भावः—पाटवम्, अत्र प्रत्ययोत्पत्तेः पूर्वमेव पुंवद्भावे लघ्वादि-**

"Aho Shrutgyanam"

त्वात् "य्वृवर्णाल्लघ्वादेः" [ ७. १. ६९ ] इत्यण् भवति, परसप्तमीसमाश्रयणे तु पट्वीशब्दस्य लघ्वादित्वाभावात् ततोऽण् न स्यादिति । यस्वर इति किम् ? पट्व्या आगतम्–पट्वीरूप्यम्, पट्वीमयम् ॥ ५१ ॥

---

**श० म० न्यासानुसन्धानम्–जाति० ।** जातिश्चेति चकारेण परतः स्त्रीति पदं द्विधा सम्बध्यते, तथा च जातिव्यतिरिक्ता परतः स्त्री, जातिश्च परतः स्त्रीत्यर्थौ लभ्यते, तदाह—**अन्या– परतः स्त्री जातिश्चे**ति, अग्रेऽन्येत्यर्थलाभोपायं स्पष्टयिष्यति । **णि–तद्धितय–स्वरे** इति सप्तमी विषयार्था, तथा च ण्यादीनां विवक्षायामेव पुंवत्त्वं-भवति, तत्फलं च वक्ष्यति, तदेवाह— **विषयभूते** इति । अस्यैवार्थमाह—**उत्पत्स्यमाने** इति, तदेव स्पष्टयति— **तद्विवक्षायामेवे**ति— एवकारेण तत्परत्वस्य व्यावृत्तिः । प्रथमोपस्थितत्वादन्यामेव स्त्रियं क्रमशो ण्यादिषूदाहरति— **णि– पट्वीमाचष्टे** इति, अत्राख्यानेऽर्थे णिचि विवक्षित एव पुंवद्भावादुकारस्य "नामिनोऽकलिहलेः" [ ४. ३. ५१. ] इति वृद्धौ "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यन्त्यस्वरादिलोपे तस्य स्थानिवद्भावादुपान्त्यवृद्ध्यभावे धातुत्वादौ– **पटयतीति** रूपम्, अद्यतन्यामपीपटदिति, वृद्धेः पूर्वमन्त्यस्वरादिलोपे च समानलोपित्वेनेत्त्वं न स्यात्, एवं– **लघ्वीमाचष्टे– लघयती**त्यादावपि विज्ञेयम् । एनीमाचष्टे–एतयति, श्येनीमाचष्टे–श्येतयतीत्याद्यपि णौ पुंवत्त्वस्योदाहरणमित्याह— **एवमेतयती**त्यादि । णावुदाहृत्य तद्धितयकारे पुंवत्त्वमन्यस्याः परतः स्त्रिया उदाहरति– **तद्धितय– एन्यां साधुरि**ति–एनीशब्दात् साध्वर्थे ये विवक्षिते पुंवद्भावादेतशब्दाद् ये– **एत्यः** इति । एवं– श्येन्यां साधुः– **श्येत्यः** इति । एन्या भाव इत्यर्थे "वर्णदृढादिभ्यः" [ ७. १. ५९. ] इति टयणि विवक्षिते पुंवत्त्वे ततष्टयणि— **ऐत्यमि**ति । एवं– श्येन्या भावः- **श्यैत्यम्**, लोहिन्या भावो– **लौहित्यम्** । तद्धितस्वरे उदाहरति– **भावत्कमि**ति– इकणि विवक्षिते पुंवत्त्वे इकणि इकारलोपे आदिवृद्धौ– भावत्कमिति, ईये— **भवदीयमि**ति । **पटिष्ठा पटीयसी**त्यादाविष्ठेयसोरन्त्यस्वरादिलोपः । अन्यां परतः स्त्रियमुदाहृत्य जातिं परतः स्त्रियमुदाहरति; तत्र णौ पुंवद्भावकृतविशेषाभावात् तद्धितये उदाहरति—**दरदोऽपत्यं स्त्री**ति— अत्र गोत्रापत्येऽपि प्रत्यये जातित्वे सत्यपि जातिग्रहणसामर्थ्यान्न "स्वाङ्गात्०" [ ३. २. ५६ ] इति निषेधः । स्त्र्यपत्ये वाच्ये च "द्रेरञणः" [ ६. १. १२३. ] इति अणो लुप्, तस्यां साधुरित्यर्थे ये विवक्षित एव पुंवत्त्वे सति अणन्त एव दारदशब्दः समायाति, तस्यान्त्यस्याकारस्य लोपे— **दारद्यः** इति । औशिज्येऽपि राजापत्याण एव स्त्रियां लुकि— उशिगिति, ततः साध्वर्थे ये विवक्षिते पुंवत्त्वे यप्रत्यये च– औशिज्य इति रूपमित्याह— **एवम्–औशिज्यः** इति । दरदउशिज्शब्दयोः स्त्रीप्रत्ययस्यादर्शनात् पुंवद्भावेन किमिह फलमिति शङ्कां निरस्यति– **पुंवद्भावादणो लुप् निवर्त्तते**— इति– निवृत्तिश्चेह पूर्वमप्रवृत्तिरेव जातस्य निवृत्त्ययोगात्, इदमपि विषयार्थसप्तम्याश्रयणस्य फलम् । तद्धितये उदाहृत्य तद्धिस्वरे उदाहरति —**गार्गीयणाः** इति– कुत्सितापत्यार्थे वृद्धप्रत्ययान्ताद् गार्ग्यायणीशब्दाद् "वृद्धस्त्रियाः क्षेपे णश्च" [ ६. १. ८७. ] इति णे विवक्षिते पुंवद्भावे गार्ग्यशब्दस्य यलोपे– गार्गः इति, इकणि च–गार्गिकः इति, **हस्तिनीनां समूहः** इति—अत्रापि समूहार्थे "कवचिहस्त्यचित्ताच्चेकण्" [ ६. २. १४ ] इतीकणि विवक्षिते पुंवत्त्वे इकणि सति "नोऽपदस्य तद्धिते" [ ७. ४. ६१. ] इत्यन्त्यस्वरादिलोपः । ननु परतः स्त्रीत्येतदनुवृत्त्यैव सिद्धे जातिग्रहणं व्यर्थमित्याशङ्कायामाह—**जातिग्रहणं जातिलक्षणप्रतिषेधनिवृत्त्यर्थमि**ति, अयमाशयः—असति जातेरिह विशिष्योपादाने दारद्य इत्यादिप्रयोगाणामसिद्धिः स्यात्, तत्र हि "स्वाङ्गान्ङीर्जातिश्चामानिनि" [ ३. २. ५६. ] इति पुंवद्भावप्रतिषेधापत्तेः, कृते च जातिग्रहणे तस्यानवकाशत्वेनापवादत्वात् प्रतिषेधो निवर्त्तते, तथा चानेन सूत्रेण जातिवाचकस्त्रिया एव पुंवद्भावः स्यान्नान्यस्त्रिया इति तस्या अपि संग्रहार्थं चकारोऽप्यावश्यक इत्याह—**सति तस्मिन् चकारोऽन्यार्थः** इति—जातिग्रहणे सति जातिमात्रे प्रवृत्तिर्मा भूदित्येतदर्थमन्यस्त्रीसंग्रहार्थश्चकार इति भावः । तथा च यादृशार्थलाभस्तमाह स्पष्टतार्थं—**जातिः परतः स्त्री, अन्या च परतः स्त्री**ति, चकाराभावेऽस्यार्थस्य न प्राप्तिरिति शेषः, समानाधिकरणे [ स्त्र्येकार्थे ] उत्तरपदे तु पूर्वेण सिद्धेऽपि णितद्धितयस्वरेऽपि पुंवद्भावार्थमत्र चकारकरणमिति समुदितार्थः । नामभ्यः स्याद्यन्तेभ्यो वा तद्धितप्रत्यय एव दृश्यत इत्यन्यस्या जातेर्वा परतः स्त्रियोऽवश्यमेव तद्धित एव य-स्वरादयः प्रत्ययाः परतो भविष्यन्तीति तद्धितग्रहणमव्यावर्त्तकमिति शङ्कते— **तद्धितेति किमि**ति—य-स्वरयोः

"Aho Shrutgyanam"

प्रत्यययोर्विशेषणतया तद्धितग्रहणमनावश्यकमिति भावः। न केवलं तद्धितीया एव प्रत्यया नामतो भवन्ति, अपि तु नामधातुसम्बन्धीया अपि। किञ्च तद्धितग्रहणाभावे केवलं प्रत्ययस्य यस्य स्वरस्य वा ग्रहणमिति स्यादावपि स्वरादौ पुंवद्भावः स्यादित्याह–**हस्तिनीमिच्छती**त्यादि, हस्तिनीशब्दादिच्छार्थे "अमाव्ययात् क्यन् च" [३.४.२३.] इति क्यनि हस्तिनीयेत्यस्य धातुत्वादौ–**हस्तिनीयती**ति रूपं भवति, अत्र नामधातुसम्बन्धिन्यपि यकारे पुंवद्भावः स्यात्। **हस्तिन्यः** इति हस्तिनीशब्दस्य प्रथमाबहुवचने रूपम्, अत्र स्वरादिः प्रत्ययोऽसिति तस्मिन् परतोऽपि पुंवत्त्वं स्यात्, एवम्–**एनीयति, एन्यः** इति रूपद्वयमपि प्रत्युदाहार्यम्, तद्धितग्रहणे कृते च न दोषः। **कथं यौवतमिति**–युवतिशब्दात् समूहार्थे [युवतीनां समूह इत्यर्थे] अणि रूपमिदम्, तत्र पुंवद्भावे सति यौवनमिति रूपमुचितमिति प्रश्नाशयः। **भिक्षादौ युवतीति स्त्रीलिङ्गपाठादि**ति, अयमाशयः– भिक्षादिषु युवन्शब्दः पुंलिङ्ग एव पठितव्यः स्यात्, ततश्च *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* इति न्यायेन युवतीशब्दादपि स्यादेव प्रत्यय इति स्त्रीत्वविशिष्टयुवन्-शब्दस्य पाठो व्यर्थः सन् अस्य प्रत्यये परत एवमेव रूपमिति ज्ञापयति, तथा च पुंवद्भावो न भवति, एवं च न तत्र सूत्राव्याप्तिदोष इति भावः। पाणिनीये तन्त्रे च यौवनं यौवतमिति रूपद्वयमपि साधुतया स्वीक्रियते, तत्र यौवनमिति युवन्शब्दस्य तिप्रत्ययान्तस्य पुंवद्भावेन रूपम्, यौवतमिति तु युधातोः शत्रन्तस्थ स्त्रियां युवतीति संसाध्य ततः समूहार्थेऽणि कृतेऽपि पुंवत्त्वे यौवतमित्येवरूपमिति प्रक्रिया सिद्धान्तकौमुद्यां प्रदर्शिता दीक्षितेन। अथापरमव्याप्तिस्थलमाशङ्क्य समाधत्ते–**कौण्डिन्य इति तु "कौण्डिन्यागस्त्ययोः०"** [६.१.१२७.] इति **निर्देशेन पुंवद्भावस्यानित्यत्वादि**ति, अयमाशयः–कुण्डिनीशब्दादपत्येऽर्थे यञि तत्र पुंवद्भावे सति "नोऽपदस्य०" [७.४.६१.] इत्यन्त्यस्वरादिलोपे कौण्डय इति रूपं युक्तम्, कथं 'कौण्डिन्य' इति। तत्रोत्तरमिदं–सूत्रे 'कौण्डिन्य' इति निर्देशेन पुंवद्भावोऽनित्य इति विज्ञायते, तथा चात्राप्रवृत्तौ सत्यां रूपसिद्धौ बाधकाभाव इति नेदमपि प्रकृतसूत्राव्याप्तिदोषस्थलम्। अनित्यत्वज्ञापनस्य स्वांशे चारितार्थ्यमात्रमेव न प्रयोजनमपि तु फलान्तरमपि तत्रापेक्ष्यते, स्वसार्थक्यमात्राय ज्ञापनस्यानौचित्यादिति ज्ञापनस्य फलान्तरमप्याह–**अत एव मानाय्य इत्यत्रापी**ति–मनोरपत्यं स्त्री–मनायी "मनोरौ च वा" [२.४.६१.] इति ङ्यामैकारादेशे आयि च–**मनायी**ति रूपम्, तस्या **अपत्यमित्यर्थे** गर्गादित्वाद् यञि–मानाय्य इति रूपं भवति, अत्र पुंवद्भावे सति तु 'मानव' इत्येव रूपं स्यात्, मनुशब्दस्य गर्गादौ पाठाभावात्, प्रत्यये च विवक्षित एव पुंवद्भावप्रवृत्तेः, तदुत्तरमपि प्रवृत्तौ पुंवद्भावे मानव्य इति रूपं स्यान्न तु मानाय्य इति, इदं तु रूपं पुंवद्भावस्यानित्यत्वे एव सिद्ध्यतीति तत्फलमिदं साध्वेवेति। क्वचिदन्यत्रापि पुंवद्भावाप्रवृत्तिर्दृश्यते साऽपि तस्यानित्यत्वेनैव साधनीयोतोपायान्तरेणेति विचारे, सति संभवे उपायान्तरमेवाश्रयणीयं न त्वनित्यत्वाश्रयणमिति मनसिकृत्याह–**सापत्न इत्यापि "सपत्न्यादौ" [२.४.५०.] इति सूत्रे सपत्नीति समुदायनिपातनादिति,** अयमाशयः–समानः पतिर्यस्या इत्यर्थे स्वामिपर्यायं पतिशब्दमाश्रित्य यदि सपत्नीशब्दः साध्यते तर्हि तादृशसपत्नीशब्दस्य सपतिशब्दप्रभवत्वात् सपतित्वस्य [समानस्वामिकत्वस्य] पुरुषादिसाधारणत्वादयं शब्दः परतः स्त्रीलिङ्ग एवेति तस्येह स्वरादौ तद्धिते [अपत्यार्थे "शिवादेरण्" ६.१.६० इत्यणि] परेऽनेन पुंवद्भावेन सता सापत इत्येव रूपं स्यादिति सापत्न इति रूपं कथमिति शङ्का; तत्र "सपत्न्यादौ" [३.४.५०] इति सूत्रे सपत्नी शब्दस्य निपातनेन तस्य नित्यं स्त्रीत्वं सिध्यतीति न पुंवद्भाव इत्युत्तरम्। यद्यपि 'मानाय्य' इत्यत्रापि मनायीशब्दो गर्गादिगणे पठित इति भिक्षादौ युवतिशब्दवत् "सपत्न्यादौ" इति सूत्रे च सपत्नीशब्दवद् वा निपातित एवेति न तत्रापि पुंवद्भावानित्यत्वस्य फलमिति नास्ति तज्ज्ञापने किमपि फलं, स्वसार्थक्यं विहायेति वक्तुं शक्यत एव, तथापि मनायीशब्दस्य गर्गादिगणे पाठोऽणेकणोर्बाधनार्थ इति तत्र निवेदितत्वेन न तस्य पाठस्यार्थान्तरसाधकत्वं सम्भवतीति मानाय्य इत्यनित्यत्वोदाहरणमेव, "सपत्न्यादौ" इत्यत्र च सपत्नीति निपातनस्य नान्यत् किमपि फलमृते तस्य नित्यं तादृशरूपवत्त्वविज्ञापनादिति स निर्देशः पुंवद्भावाभावसाधको भवितुमर्हत्येव। तत्फलान्तरमप्याह–**अत एव सपत्नीभार्य इत्यत्रापि न भवती**ति–सपत्नी भार्या यस्येत्यर्थे बहुव्रीहौ प्रकृतनिपातनादेव पुंवद्भावाभाव इति भावः। यद्यपि समानः पतिर्यस्याः सैव सपत्नी, सा च भार्यान्तरस्य कृते तेन शब्देन वाच्या, एकपतिकयोर्द्वयोः परस्परं सपत्नीशब्दव्यवहार्यत्वात्, न तु पत्युः कृते सा सपत्नी, तथा च सपत्नी भार्या यस्येत्यर्थे कथं सामर्थ्यमिति शङ्कितुं शक्यते, तथापि या काचित् कयाचित् सह समानपतिका सा सपत्नी शब्दवाच्येति

"Aho Shrutgyanam"

निष्प्रतियोगिकत्वं तस्याश्रित्यैवं विग्रहः कृत इति तया रीत्याऽत्र सामर्थ्यमवधारणीयम् । सापत्न इत्यस्य रूपस्य सिद्धावुपायान्तरमप्याह--**सपत्नस्यायं-सापत्न इति वा भविष्यती**ति, तथा च सपत्नशब्दादेवाणि रूपमिदं न तु सपत्नीशब्दादिति न पुंवद्भावप्रवृत्त्यवृत्तिशङ्केति भावः । अत्रेदं विचार्यते-यद्यपि सपत्नशब्दात् सापत्न इति रूपं निर्बाधं तथापि सपत्नीशब्दादणि कीदृशं रूपमिति तु न निर्णीतम्, तादृशसन्देहेनैव च प्रकृतविचारप्रारंभ इति स सन्देहो नानेन समाधानेनापैतीति प्रथमप्रोक्तं सपत्नीशब्दनिपातनरूपमेव समाधानं वरम् । अथवा सपत्नस्यायं सापत्न इतीति ग्रन्थस्य सपत्नशब्दस्य यत् स्त्रियां सपत्नीति रूपं ततोऽपत्यार्थेऽणि अयं सापत्नशब्द इत्यर्थः, तथा च न सपत्नीशब्दविषयः सन्देहोऽनिर्णीत इति विज्ञेयम् ।

अन्ये च वैयाकरणाः सपत्नीशब्दं त्रिधा व्युत्पादयन्ति, शत्रुपर्यायात् सपत्नशब्दात् तन्मते "शार्ङ्गरवादि" [ पा० सू० ४-१-७३. ] इति ङीनि [ स्वमते गौरादित्वकल्पनया ङ्यां ] सपत्नीशब्द एकः, विवाहजन्यसंस्कारविशेषविशिष्टे रूढं पतिशब्दमाश्रित्य समानः पतिर्यस्या इति विग्रहे सपत्नीशब्दो द्वितीयः, अयं च नित्यस्त्रीलिङ्गः, स्वामिपर्यायं पतिशब्दमाश्रित्य स्त्रीपुंनपुंसकसाधारणः सपतिशब्दनिष्पन्नः सपत्नीशब्दस्तृतीयः । तत्र आद्ययोः शिवादित्वादणि पूर्वस्य पुंवद्भावे सत्यपि सापत्न इत्येव रूपम्, यतः प्रथमस्य परतः स्त्रीत्वेऽपि पुंवद्भावेन 'सपत्न' इत्येव रूपमतिदिश्यते, द्वितीयस्य च स्वतः स्त्रीत्वात् पुंवद्भावाभाव एव, तृतीयस्य च *नामग्रहणे लिङ्गविशिष्टस्यैव ग्रहणम् * इति न्यायेन, यादौ स्वरादौ वा प्रत्यये विवक्षित एव पुंवद्भावात् पत्युत्तरपदत्वमाश्रित्य तन्निबन्धनो ञ्य एव "अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः" [ ६-१-१५ ] इति सूत्रेणेति सापत्य इत्येव रूपं न तु शिवादित्वादणि सापत इति, शिवादौ रूढयोरेव ग्रहणस्येष्टत्वादिति । भाष्यकृता च "स्त्रियाः पुंवद्" [पा० सू० ६-३-३५ ] इति सूत्रे पुंवद्भावातिप्रसक्तिस्थलवर्णनप्रसङ्गे "इह च प्राप्नोति + + + सापत्न इति" इति शङ्कायाम् "सापत्नः प्रकृत्यन्तरत्वात्" "सपत्नशब्दः प्रकृत्यन्तरमस्ति" इत्युत्तरितम् । तस्य चाशयः कैयटादिभिरित्थमवधारितो यत्--सपत्नीशब्दोऽयं सपत्नशब्दप्रकृतिकः, शिवादौ वा सपत्नशब्द एव पठ्यते, *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् * इति न्यायेन च सपत्नीशब्दोऽपि तत्र गृह्यत इत्यण् भवति, पुंवद्भावे च सत्यपि सापत्न इत्येव रूपमिति न तदर्थं पुंवद्भावानित्यत्वाश्रयणमावश्यकमिति ।

'णि तद्धितयस्वरे' इति सप्तम्याः परसप्तमीत्वेन नेहाश्रयणमपि तु विषयसप्तमीत्वेनेति ण्यादीनां प्रवृत्तौ विवक्षितायामेव पुंवद्भावो भवतीति पूर्वमुक्तं, तस्य फलमुपदर्शयितुं पृच्छति--**विषयसप्तम्याश्रयणं किमि**ति--परत्वार्थिका सप्तमी तु "सप्तम्या पूर्वस्य" [ ७. ४. १०५. ] इति परिभाषातो लभ्यते, इति विषयसप्तमीसमाश्रयणं किमपि विशिष्टं फलं चेन्न साधयति तर्हि कुतः समाश्रीयत इति भावः । प्रत्युदाहरणेनोत्तरयति--पट्व्या भावः इति । अत्र किं फलमिति दर्शयति-**अत्र प्रत्ययोत्पत्तेः पूर्वमेवे**ति, अयमाशयः--पट्व्या भाव इत्यर्थे पट्वीशब्दस्य गुणाङ्गप्रवृत्तिनिमित्तत्वेन ततः "पतिराजान्तगुणाङ्ग०" [ ६. १. ६०. इति टयण्, प्राप्तस्तस्मिन् विवक्षिते एव पुंवद्भावप्रवृत्त्या तस्योवर्णान्तत्वलघ्वादित्वयोः सम्पत्त्या परत्वादुवर्णान्तत्वप्रयुक्तः "य्वृवर्णाल्लघ्वादेः [ ७. १. ६९. ] इति अण् भवतीति पाटवमिति सिद्धयति । ननु मास्तूवर्णान्तत्वप्रयुक्तप्रत्ययोत्पत्तिरिवर्णान्तत्वप्रयुक्तैवास्तु सेति चेदत्राह--**परसप्तम्याश्रयणे तु पट्वीशब्दस्य लघ्वादित्वाभावादि**ति, अयमर्थः—परिनिष्ठितस्यैवान्यार्थसम्बन्धयोग्यतया पूर्वं पटुशब्दस्य स्त्रियां पट्वीति रूपं साध्यं, ततश्च संयोगे परे पूर्वस्य गुरुत्वात् पट्वीशब्दो न लघ्वादिरिति ततोऽण् न स्यात्, सति चान्यस्मिन् प्रत्यये पुंवद्भावे सत्यपि पुनरणोऽवसरभ्रष्टत्वान्न प्रवृत्तिः, परसप्तमीपक्षे प्रत्ययोत्पत्तेरावश्यकतया तदुत्पत्तेः पूर्वं पुंवद्भावाप्राप्तेरिति । 'तद्धिते' इत्येवोच्यतां, 'यस्वरे' इति व्यर्थमिति शङ्कते--**यस्वरे इति किमि**ति । तदभावेऽन्यत्रानिष्टस्थलेऽपि प्रवृत्तिः स्यादित्याह **पट्व्या आगतमि**ति—अत्र हेतुत्वेन विवक्षितात् पट्वीशब्दात् "नृहेतुभ्यो रूप्यमयटौ वा" [ ६. ३. १५६. ] इति रूप्य-मयटोः सतो रूपद्वयं भवति, उभयत्रापि पुंवत्त्वे पटुरूप्यं पटुमयमिति स्यात्, तच्च नेष्टमिति 'यस्वरे' इत्यावश्यकमिति भावः ॥ ३. २. ५१. ॥

## एयेऽग्नायी । ३. २. ५२ ॥

**त० प्र०—तद्धिते एयप्रत्यये परे अग्नाय्येव परतः स्त्री पुंवद् भवति । अग्नाय्या अपत्यम्—आग्नेयः, अग्नायी देवताऽ-**

"Aho Shrutgyanam"

**स्य–आग्नेयः स्थालीपाकः । पूर्वेण सिद्धे नियमार्थं वचनम्, तेन–श्यैनेयः, रौहिणेयः, अत्र पूर्वेणापि पुंवद्भावो न भवति ॥ ५२ ॥**

**श० म० न्यासानुसन्धानम्**––रायेऽ । अत्र पूर्वसूत्रात् 'णितद्धितयस्वरे' 'जातिश्च' इति च नानुवर्त्ततेऽप्रयोजनत्वात्, केवलं परतः स्त्रीत्येवानुवर्त्तते । यद्यपीह वृत्तौ 'तद्धिते एय प्रत्यये' इत्युक्तम्, तथा च तद्धितांशमात्रं पूर्वसूत्रादनुवृत्तमिति प्रतीयते, तथापि तदव्यावर्त्तकत्वादनावश्यकमिति स्वभावसिद्धत्वेनैव निर्दिष्टम्, एयप्रत्ययस्य तद्धितेष्वेव पाठात्, तत्र 'तद्धिते' इति विशेषणस्याकिञ्चित्करत्वात् । **अग्नाय्येवे**ति––एवकारोऽन्यस्याः परतः स्त्रिया एये–पुंवत्त्वव्यावर्त्तनार्थः, तल्लाभोपायश्चाग्रे वक्ष्यते । अग्नेः स्त्रीत्यर्थे धवयोगे "पूतक्रतु-वृषाकप्यग्नि-कुसित-कुसीदादै च" [२० ४० ६०] इति ङीः, अन्तस्यैः, आयादेशे चाग्नायीति रूपम्, तस्या अपत्यमित्यर्थे "कल्यग्नेरेयण्" [ ६. १. १७. ] इत्येयणि, अनेन पुंवद्भावे आदिवृद्धौ च––**आग्नेयः** इति रूपम् । एवं देवतार्थेऽपि स एव प्रत्यय इत्याह––**अग्नायी देवताऽस्येति**·अस्य-स्थालीपाकस्य, गव्यदुग्धेनौदनं स्थाल्यां पच्यते, तद्विधानं गृह्यसूत्रादौ विस्तरशः प्रतिपादितम्, स च स्थाल्यांपाको देवताविशेषमुद्दिश्याग्नौ हूयते, तत्र योऽग्नायीमुद्दिश्य दीयते [ हूयते ] असौ––**'आग्नेयः'** इत्युच्यते । यद्यपि आग्नेयीशब्दः स्वत एव स्त्रीलिङ्गो न तु विशेष्यवशात्, तथापि धवयोगनिमित्तत्वादस्य परतः स्त्रीत्वमक्षतमेव, परतः स्त्रीत्यस्य विशेष्यवशादित्युपलक्षणमात्रं नियतस्त्रीलिङ्गशब्दव्यावर्त्तनाय, यद्यप्यग्नायीशब्दोऽपि नियतस्त्रीलिङ्ग एव, तस्य पुंसि रूपाभावात्, तथापि तस्याग्निशब्दप्रकृतिकत्वादस्त्येव पुंस्यपि रूपमिति न परतः स्त्रीत्वहानिः, अग्निशब्द एव हि धवयोगरूपनिमित्तवशात् स्त्रियां प्रयुज्यत इत्यग्नित्वारोपेणैव तत्राग्निशब्दप्रयोग इति वैयाकरणानां सिद्धान्तात्, स्पष्टं चेदं "स्त्रियाः पुंवत्" [ ६. ३. ३५. ] इति सूत्रे उद्योते । अग्नाय्येवेति नियमो वृत्तौ प्रदर्शितस्तस्य कथं लाभ इत्याह––**पूर्वेण सिद्धे नियमार्थं वचनमि**ति–– अग्नायीशब्दस्य पूर्वोक्तदिशा परतः स्त्रीत्वे एयस्य स्वरादितद्धितत्वेन "जातिश्च णितद्धितयस्वरे" [ ३. २. ५१. ] इति सूत्रेणैव पुंवद्भावः सिद्ध एवेति* सिद्धे सत्यारभ्यमाणो विधिर्नियमार्थः* इत्यग्नाय्येव एये पुंवद भवति नान्य इति श्यैनेय इत्यादौ न भवति । श्येन्या अपत्यं––**श्यैनेयः**, रोहिण्या अपत्यं––**रौहिणेयः** इति–– पूर्वत्र "द्विस्वरादनद्याः" [ ६. २. ७. ] इत्येयण् परत्र च "ङ्याप्त्यूङः" [ ४. १. ७०. ] इत्येयण्, अत्र हि पूर्वसूत्रेण पुंवत्त्वे 'श्यैतेयः, रौहितेयः' इति रूपे स्याताम्, तदाह––**अत्र पूर्वेणापि पुंवद्भावो न भवती**ति । अत्रेदं विचार्यते एये एवाग्नायीशब्दः पुंवदित्येवं विपरीतनियम एव कुतो नाश्रीयते, तथा सति एयभिन्ने निषेधस्य फलिततया निषेधप्रकरण एव–"अग्नायी अनेये" इति, अथवाऽत्रैव "आग्नेयः" इति निपात्यताम्, तच्च निपातनं नियमार्थं भविष्यति, एये एवाग्नायीशब्दस्य पुंवत्वं नान्यत्रेति, तदुभयमकृत्वा "एयेऽग्नायी" इति करणेन विपरीतनियमाभावविज्ञानात्, तेन–अग्नाय्यै हितमित्यर्थे ईये 'जातिश्च०" [ ३. २. ५१. ] इति पुंवद्भावे–अग्नीय इति रूपं भवति, अन्यथा ( विपरीतनियमाश्रयणे ) अग्नायीय इति स्यात्, अत आचार्येण विपरीतनियमो न स्वीकृतः ॥ ३. २. ५२ ॥

## नाऽप्-प्रियादौ । ३. २. ५३ ॥

**त० प्र०–पूरण्यप्प्रत्ययान्ते स्त्र्येकार्थे उत्तरपदे प्रियादौ च परे परतः स्त्री पुंवन्न भवति । अप्–कल्याणी पञ्चमी आसां–कल्याणीपञ्चमा रात्रयः, एवं–कल्याणीदशमाः 'पूरण्यबन्तस्य ग्रहणादिह' पुंवद्भावो भवत्येव–बह्वय ऋचो यस्य स–बह्वृचश्चरणः । प्रियादि–कल्याणी प्रिया अस्य–कल्याणीप्रियः, एवं–भव्याप्रियः, भव्यामनोज्ञः, प्रियाकल्याणीकः, प्रियासुभगः, कल्याणीदुर्भगः, कल्याणीस्वः, प्रियाक्षान्तः, दर्शनीयाकान्तः, प्रियावामनः, दर्शनीयासमः, प्रियासचिवः, प्रियाचपलः, प्रियाबालः, कल्याणीतनयः, कल्याणीदुहितृकः, कल्याणीभक्तिः, गिरितनया भक्तिरस्य–गिरितनयाभक्तिः ।**

**कथं दृढभक्तिः स्थिरभक्तिः परिपूर्णभक्तिरित्यादि ? दृढं भक्तिरस्येत्येवमस्त्रीपूर्वपदस्य विवक्षितत्वात् । अप्प्रियादाविति किम् ? कल्याणी पञ्चमी अस्मिन्–कल्याणपञ्चमीकः पक्षः, कल्याणी प्रमाणी येषां ते–कल्याणप्रमाणाः । १ प्रिया २ मनोज्ञा ३ कल्याणी ४ सुभगा ५ दुर्भगा ६ स्वा ७ क्षान्ता ८ कान्ता ९ वामना १० समा ११ सचिवा १२ चपला १३ बाला १४ तनया १५ दुहितृ १६ भक्ति इति प्रियादिः । वामेत्यप्यन्ये–प्रियावामः ॥ ५३ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—नाऽप्रि०।** 'न अप्-प्रियादौ' इति च्छेदो व्याख्यानात्, 'अप्' इति प्रत्ययो गृह्यते * प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहणम्* इति न्यायाद् व्याख्यानाच्च, अत्र अप्प्रत्ययो यद्यपि चतुरादिशब्दान्ताद् बहुव्रीहेरपि भवति तथापीह स्त्रीवाचकसमानाधिकरण एवाप्प्रत्ययान्तो ग्रहीतव्यः, तस्मिन् परे एव पुंवद्भावप्राप्तेरिति, तादृशश्चाप्प्रत्ययान्तः शब्दः पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्द एव, तस्मादेव "पूरणीभ्यस्तत्प्राधान्येऽप्" ] ७. ३. १३०.] इत्यप्-विधानात्, अत आह—**पूरण्यप्प्रत्ययान्ते** इति—यद्यपि ऋक्शब्दोऽपि परतः स्त्रीसमानाधिकरणः सम्भवति तस्य स्त्रीलिङ्गत्वात् "नञ् बहोर्ऋचो माणव-चरणे" [ ७. ३. १३५.] इत्यप्प्रत्ययान्तत्वाच्च, तस्यापि ग्रहणं सम्भवति, तथापि अप्प्रकरणे प्रथमोपात्तत्वात् पूरण्यप्प्रत्ययान्त एव गृह्यते। लघुन्यासकारैश्च पूरण्यप्प्रत्ययान्तस्य ग्रहणे युक्तिद्वयमुक्तम्—प्रियादिसाहचर्यात् स्वरान्तस्यैव अप्प्रत्ययान्तस्यग्रहणं तादृक् पूरण्येव, यद्वा यत्राप्शब्दतो निर्दिष्टः स एव गृह्यते, यत्र चाधिकारानुमितस्तस्य न ग्रहणं* श्रुताऽनुमितयोः श्रुतस्यैव ग्रहणम्* इति न्यायादिति। सर्वमेतन्मनसिकृत्यैवोक्तं—**पूरण्यप्प्रत्ययान्ते उत्तरपदे** इति। क्रमश उदाहरति **अप्—कल्याणी पञ्चमी आसामि**ति—अत्र यैव पञ्चमी तज्जातीयाया एव रात्रेरन्यपदार्थत्वात् प्राधान्यमिति समासोत्तरं "पूरणीभ्यस्तत्प्राधान्येऽप्" [ ७. ३. १३०.] इत्यप्प्रत्यये अवर्णेवर्णस्य" [ ७. ४. ६८. ] इतीकारलुकि स्त्रीत्वादापि—पञ्चमा इति, अत्र "परतः स्त्रीपुंवत्" [ ३. २. ४९. ] इति पुंवद्भावः प्राप्तोऽनेन निषिध्यते। प्रकृतं प्रकारमन्यत्रापि निर्दिशति—**एवं-कल्याणीदशमाः** इति—कल्याणी दशमी यासां रात्रीणां ता इत्यर्थः। अबित्यस्य पूरण्यबन्तपरत्वेन व्याख्यानस्य फलमाख्याति—**पूरण्यबन्तस्य ग्रहणादि**ति—यतः पूरणीसम्बन्धोऽप्-प्रत्ययो विवक्षितस्तत इति भावः। **बह्वृचचरणः** इति—चरणशब्दः शाखावाची, अत्र "नञ्-बहोर्ऋचो माणव-चरणे" [ ३. ३. १३५. ] इत्यप्प्रत्ययः तथा च सत्यप्यप्-प्रत्ययान्ते उत्तरपदे नात्र प्रकृतसूत्रेण पुंवद्भावनिषेध इति "परतः स्त्री०" [ ३. २. ५१ ] इति पुंवद्भावो भवत्येव, अप्प्रत्ययान्तत्वप्रयुक्तो निषेधो न भवतीति भावः। अप्-प्रत्ययान्ते उदाहृत्य प्रियादौ निषेधमुदाहर्तुमाह—**प्रियादि-कल्याणी प्रिया अस्ये**ति—अत्र समासे पुंवत्त्वे प्राप्तेऽनेन निषेधे "गोश्चान्ते०" [ २. ४. ९६. ] इति ह्रस्वे—**कल्याणीप्रियः** इति। एवं—**भव्याप्रियः** इत्यादावपि बोध्यम्। अत्र गणे [ प्रियादौ ] क्षान्ताकान्ताशब्दावपि पठ्येते, तयोश्च द्विधा सिद्धिः—क्षाम्यतीति क्षान्ता, कमते कामयते वेति कान्तेति कर्त्तरि क्तप्रत्यये, क्षान्तिरस्या अस्तीति क्षान्ता, कान्तिरस्या अस्तीति कान्तेति चाऽभ्रादित्वान्मत्वर्थीयेऽच् प्रत्यये, तत्र पूर्वत्र पक्षे बहुव्रीहौ क्तान्तस्य "क्तः" [ ३. १. १५१ ] इति नित्यं प्राक् प्रयोगः स्यादिति परं पक्षमेवाद्रियन्ते। **गिरितनया भक्तिरस्ये**ति—अत्र भवितरिति कर्मणि वितः, यद्यपि प्रायो भावे वितर्विधीयते तथापि बाहुलकात् कर्मणि प्रवृत्तिः, अथवा "भावाऽकर्त्रोः" इत्यधिकारे तस्य सत्त्वेन कर्मण्यप्याञ्जस्येनैव प्रवत्तिः। बहुषु भक्तिशब्दे परेऽपि पुंवत्त्वमुपलभ्यते। तत् कथमिति शङ्कते—**कथं दृढभक्तिरि**त्यादि। समाधत्ते—**दृढं भक्तिरस्ये**ति, अयमाशयः—नात्र दृढशब्दो भक्तेर्विशेषणमपि तु भजधात्वर्थक्रियाविशेषणम्, क्रियाविशेषणानां च क्लीबत्वं सकलतान्त्रिकसम्प्रदायस्वीकृतम्, एवं चेह दृढादिशब्दा अदाढर्यादिनिवृत्तिपरा न तु भक्तेर्विशेषणम्, यत्र हि उत्तरपदेन सह सामानाधिकरण्यं विवक्षितं तत्रैव समानलिङ्गत्वस्यावश्यकत्वात्, एवं चेह पूर्वपदे स्वाभाविकमेवास्त्रीत्वं न तु पुंवद्भावकृतमिति। पदकृत्यमाह-**अप्-प्रियादाविति किमि**ति—पूरण्यप्प्रत्ययान्ते प्रियादौ च पुंवद्भावः कुतो निषिध्यत इति प्रश्नः, तथा च सूत्रमेवेदं न कार्यमुत्तरसूत्र एव नकारो निषेधार्थः पठनीय इत्यायाति। अप्प्रत्ययान्तभिन्नायां पूरण्यां प्रियादिभिन्ने च समानाधिकरणे पुंवत्त्वमिष्टं यथा **कल्याणी पञ्चमी** [ रात्रिः ] **अस्मिन्** पक्षे इत्यर्थे समासे "ऋन्नित्यदितः" [ ७. ३. १७१. ) इति कचि—**कल्याणपञ्चमीकः** इति, अत्र पूरण्याः प्राधान्याभावात् अप्प्रत्ययो न भवतीति पुंवद्भावो भवति; एवं—**कल्याणी प्रमाणी येषामि**त्यर्थे समासे "प्रमाणीसंख्याड्डः"[७.३.१२८] इति डे ईकारलुकि—**कल्याणप्रमाणाः** इति, इहापि पूर्वसूत्रेण पुंवद्भावो भवति; एवं कल्याणीपञ्चमा रात्रयः, 'कल्याणीप्रियः' इत्यादावपि स्यादिति "अप्प्रियादौ" इत्यावश्यकमित्यव्याप्तिवारणार्थमेव सूत्रं न त्वतिव्याप्तिवारणार्थमिति प्रत्युदाहरणेन विपरीतलक्षणयोदाहरणासिद्धिरेवाचार्यैः कथयितुमिष्टेति प्रतीयते। अन्यथा "अप्प्रियादौ" इत्यस्याभावे केवलं नेत्येतावतः सूत्रस्यागमकत्वेन कथंचिद् गमकत्वेऽप्यग्रिमपुंवद्भावनिषेधप्रकरणस्य च वैयर्थ्येन च शङ्का-



"Aho Shrutgyanam"

समाधी निरालम्बनौ स्याताम्। प्रियादिगणं पठति–**प्रिया मनोज्ञे**त्यादिना, तत्र वामाशब्दोऽपि कैश्चिदिष्यते, तदाह–**वामेत्यप्यन्ये** इति, तथा च तेषां मते–**प्रियावामः** इत्येवरूपम् ॥ ३. २. ५३ ॥

## तद्धिताककोपान्त्यपूरण्याख्याः । ३. २. ५४ ॥

**त० प्र०–तद्धितप्रत्ययस्याकप्रत्ययस्य च यः कः स उपान्त्यो यासां तास्तद्धिताककोपान्त्याः, पूरणीप्रत्ययान्ताः, आख्याः–संज्ञास्तद्रूपाश्च; परतः स्त्रियः पुंवन्न भवन्ति। तद्धित–मद्रिकाभार्यः, वृजिकाभार्यः, लाक्षिकीभार्यः, लाक्षिकीबृहतिकः, लाक्षिकीदेश्या, रौचनिकीचरी, मद्रिकायते, वृजिकामानिनी। अक–कारिकाभार्यः, हारिकाभार्यः, विलेपिकाया धर्म्यं–वैलेपिकम्, आनुलेपिकम्, कारिकाकल्पा, पाचिकारूपा, कारिकायते, पाचिकामानिनी। पूरणी–द्वितीयाभार्यः, पञ्चमीभार्यः, द्वितीयाकल्पा, पञ्चमीदेश्या, पञ्चमीयते, षष्ठीमानिनी। आख्या–दत्ताभार्यः, गुप्ताभार्यः, दत्तारूपा, गुप्तापाशा, गुप्तामानिनी। कस्य तद्धिताकविशेषणं किम्? पाकभार्यः, मूकभार्यः, जल्पाकभार्यः, कामुककल्पा, जागरूकरूपा, लुण्टाकायते, कुट्टाकायते, कुट्टाकमानिनी ॥ ५४ ॥**

**श० म० न्यासानुसन्धानम्–तद्धिता०।** तद्धिताककोपान्त्यशब्दोऽनेकधा व्याख्यातुं शक्यत इति का व्याख्या स्वाभिमतेति प्रदर्शनाय तं पदशो व्याख्याति–**तद्धितप्रत्ययस्याकप्रत्ययस्य च यः कः** इत्यादिना, तथा चेहेदृशः समासोऽभिप्रेतः–तद्धितश्चाकश्च-तद्धिता-ऽकौ, तयोः कः–तद्धिताककः, स उपान्त्यो येषां ते–तद्धिताककोपान्त्याः, तादृशाश्च, पूरण्यश्च आख्याश्च शब्दास्तद्धिताककोपान्त्यपूरण्याख्या इति; वृत्तौ यासामिति प्रदर्शनं परतः स्त्रीणामपेक्षया, परं तु तथा सति सामानाधिकरण्याभावेनेह पुंवत्त्वं न स्यादिति "तद्धिताककोपान्त्यापूरण्याख्याः" इति सूत्रस्वरूपं स्यात्, तथा च किं सूत्रपाठ एव ह्रस्वपाठः, लेखकप्रमादकृतो वा, वृत्तिस्थं विग्रहवाक्यमार्थिकान्वयापेक्षया, न तु सूत्रस्थपदसाधुत्वप्रयोजकविग्रहप्रदर्शनार्थमिति स्वीकरणीयम्। क्रमश उदाहरति–**तद्धित**–इति। **मद्रिकाभार्यः** इति–मद्रिकाशब्दः "वृजिमद्राद् देशात् कः" [ ६. ३. ३८. ] इति शैषिककप्रत्ययान्तः परतः स्त्रीलिङ्गः, सा भार्या यस्येत्यर्थे बहुव्रीहिः, "परतः स्त्र्येकार्थे०" [ ३. २. ४९. ] इति पुंवत्त्वं प्राप्तमनेन प्रतिषिध्यते; एवं-वृजिकाशब्दोऽपि शैषिककप्रत्ययान्त एव, मद्र-वृजिशब्दयोर्देशवाचकत्वात्। लाक्षया रक्ता-लाक्षिकी, "लाक्षा-रोचनादिकण्" [ ६. २. २. ] इतीकणि सिद्धयति, लाक्षा पण्यमस्य इत्यर्थेऽपि लाक्षिकीति रूपम्, **लाक्षिकीभार्यः** इत्यत्र पण्यार्था लाक्षिकीति, **लाक्षिकीबृहतिकः** इत्यत्र रक्तार्था सा, बृहतिका–प्रावरणम्, लाक्षिकी भार्या यस्य, लाक्षिकी बृहतिका यस्येति विग्रहः। **लाक्षिकीदेश्ये**त्यत्र ईषदसमाप्ता लाक्षिकीति विग्रहे "अतमबादेरीषदसमाप्ते कल्पप् देशीय" [ ७. ३. ११. ] इति देश्यप् प्रत्ययः, तत्र परतः "क्यङ्-मानि-पित्तद्धिते' [ ३. २. ५० ] इति पुंवत्वं प्राप्तमनेन निषिध्यते, सामान्यतः सर्वस्यापि पूर्वप्राप्तपुंवद्भावस्य निषेधकत्वात्। **मद्रिकायते** पूर्वोक्तान्मद्रिकाशब्दादाचारार्थे क्यङ, अत्रापि "क्यङ-मानि-पित्तद्धिते" [ ७. ३. ५०. ] इत्यस्यैव प्राप्तिः, अत्र पुंवत्त्वे इकारो न श्रूयत। **वृजिकामानिनी,** अत्र वृजिकामात्मानं मन्यते इति विग्रहे "परतः स्त्री" [ ७. ३. ४९. ] इति वृजिकामन्यां काञ्चिन्मन्यत इत्यर्थे च "क्यङमानि०" [७. ३. ५०.] इति च पुंवत्त्वं प्राप्तं प्रतिषिध्यते, अथवोभयत्रापि "क्यङमानि०" इत्यनेनैव विशेषविहितत्वात् प्राप्तं पुंवत्त्वमनेन प्रतिषिध्यते। एवं तद्धितकोपान्त्यमुदाहृत्याककोपान्त्यमुदाहर्तुमाह–**अक**–इति। **कारिकाभार्यः** इति–करोतीति कारिका, करोतेः कर्तरि अकः, स्त्रीत्वादाप्, इत्वे–कारिकेति, सा भार्या यस्येति विग्रहः, अत्र ककारोऽकप्रत्ययावयव एव कारिकाशब्दस्योपान्त्यः, परतः स्त्रीपुंवद्भावस्य प्राप्तिरनेन निषिध्यते। विलेपिकानुलेपिकाशब्दावप्यकप्रत्ययान्तस्य स्त्रियां रूपे, तयोर्धर्म्यमित्यर्थे "ऋन्नरादेरण्" [६. ४. ५१.] इत्यण्, आद्यस्वरवृद्धिः, "जातिश्च णितद्धितयस्वरे" [ ३. २. ५१. ] इति पुंवद्भावः प्राप्तोऽनेन निषिध्यते, तत्फलं चेकारश्रवणम्। **कारिकाकल्पे**त्यत्र ईषदूना कारिकेत्यर्थे "अतमबादे०" [७. ३. ११] इति कल्पप् "क्यङ्-मानिपित्तद्धिते" [३. २. ५०] इति पुंवद्भावः प्राप्तो निषिध्यते; एवं-**पाचिकारूपे**त्यत्रापि। **कारिकायते** इत्यत्र कारिकेवाचरतीत्यर्थे क्यङ, शेषं पूर्ववत्। **पाचिकामानिनी**त्यत्रोभयथा विग्रहः पाचिकामन्यां मन्यते इति, आत्मानं पाचिकां मन्यते इति च। पूरणीमुदाहरति–**द्वितीयाभार्यः** इत्यादिना, द्वयोः पूरणी–द्वितीया "द्वेस्तीयः" [ ७. १. १६५. ] इति

"Aho Shrutgyanam"

तीयः, द्वितीया भार्या यस्येति बहुव्रीहिः, परतः स्त्रीति पुंवद्भावप्राप्तिः, अनेन पूरणीस्त्रीत्वनिमित्तको निषेधः। **पञ्चमीभार्यः** पञ्चानां पूरणी–पञ्चमी, सा भार्या यस्य, पञ्चन्शब्दात् "नो मट्" [ ७. १. १५९. ] इति मट्, टित्त्वान्ङीः—पञ्चमी, भार्यया सह बहुव्रीहौ पुंवद्भावः पूर्ववत् प्राप्तो निषिध्यते । **द्वितीयाकल्पा पञ्चमीदेश्ये**त्यनयोरीषदसमाप्तौ कल्पप्देश्यपौ, पित्तद्धितनिमित्ता प्राप्तिः पूरणीत्वेन प्रतिषेधः । **पञ्चमीयते** इत्यत्राचारे क्यङ्, तन्निमित्ता पुंवद्भावप्राप्तिः । **षष्ठीमानिनी**ति–षण्णां पूरणी षष्ठी "षट्-कति-कतिपयात् थट्" [ ७. १. १६१. ] इति थट्, टित्त्वान्ङीः, मानिनिमित्ता प्राप्तिः, पूरणीत्वेन निषेधः। आख्यामुदाहरति–**दत्ताभार्यः, गुप्ताभार्यः** इति–ददातीति दत्ता, गोपायतीति गुप्ता, कर्त्तरि क्तः, अथवा दीयते स्म–दत्ता, गोपायति स्म–गुप्तेति, अत्र यद्यप्येतौ स्त्रीविशेषरूढाविति स्वत एव स्त्रीलिङ्गौ, न तु विशेष्यवशात्। तथापि दानक्रियानिमित्तो दत्तशब्दः, गोपायनक्रियानिमित्तो गुप्तशब्दश्च न स्वतः स्त्रीलिङ्गोऽपि तु विशेष्यवशादेवेति तयोः परतः स्त्रीत्वमक्षतमिति "परतः स्त्री०" [ ३. २. ४९. ] इति पुंवत्त्वं प्राप्तमेवानेन निषिध्यते। **दत्तारूपा गुप्तापाशे**त्यनयोः पित्तद्धितनिमित्ता प्राप्तिः, **गुप्तामानिनी**त्यत्र मानिनिमित्ता, अत्र क्यङि पुंवत्त्वे तदभावे च न रूपे विशेष इति न तदुदाहृतम् । पदकृत्यमाह–**कस्य तद्धिताकविशेषणं किमिति**–तद्धितप्रत्ययस्याकप्रत्ययस्य चेति कस्य कुतो विशेषणमिति प्रश्नार्थः। अन्यविधकोपान्त्यस्य पुंवद्भावो भवत्येव, स न स्यादित्याह–**पाकभार्यः, मूकभार्यः** इत्यादिना, पाकशब्दः प्रथमवयोवाची, तस्य चाजादिगणे पाठसामर्थ्यादाप् इति कैयटः, मूकशब्दश्च वाग्विहीनवाची, एतयोः को न तद्धितसम्बन्धी, किन्तु प्रथमे पच्धातोरेव चस्य कः, द्वितीये च बन्धार्थान्मूधातोः कक् औणादिक इति सोऽपि न तद्धितसम्बन्धी, न वा अकसम्बन्धीति नात्र निषेधो भवति, तद्धिताक इति विशेषणाभावे च स्यादेवेति तद्ग्रहणमावश्यकमिति भावः, एवं जल्पाकोदिशब्दाः कृदन्ताः, तत्र जल्पाकः–"वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः" [ ५. २. ७०. ] इति सूत्रेण व्युत्पादितः, कामुकशब्दश्च "शकम् गम०" [५. २. ४०.] इति सूत्रेणोकण्प्रत्ययान्तः, जागरूकशब्दश्च "जागुः" [ ५. २. ४८.] इति सूत्रेणोकप्रत्ययान्तः लुण्टाकः "वृङ्-भिक्षि०" [५. २, ७०] इति टाकप्रत्ययान्तः, कुट्टाकोऽपि तादृश एवेति न कोऽपि तद्धितीयकोपान्त्यो न वाऽकप्रत्ययीयकोपान्त्य इति न भवति–प्रतिषेधः, तदर्थमुक्तविशेषणमावश्यकम्, तत एषु 'पाकभार्यः, मूकभार्यः, जल्पाकभार्यः' इत्येतेषु "परतः स्त्री" [३. २. ४९.] इति, अन्येषु "क्यङ्-मानि-पित्तद्धिते" [ ३. २. ५० ] इति पुंवत्त्वं भवत्येवेति ॥ ३. २. ५४ ॥

## तद्धितः स्वरवृद्धिहेतुररक्त-विकारे । ३. २. ५५॥

त० प्र०–स्वरस्थानाया वृद्धेर्यो हेतुस्तद्धितो रक्ताद् विकाराच्चान्यत्रार्थे विहितस्तदन्तः परतः स्त्री लिङ्गः पुंवन्न भवति।**माथुरीभार्यः, स्रौघ्नीभार्यः वैदिशीभार्यः,वैदर्भीभार्यः, सौतंगमीभार्यः. कार्तवीर्यीभार्यः, माथुरीदेश्या, नादेयीचरी, सौतंगमीयते, वदर्भीमानिनी, स्रौघ्नीमानिनी** । तद्धित इति किम् ? **कुम्भकारी भार्या अस्य स–कुम्भकारभार्यः, एवं–काण्डलावभार्यः** । वृद्धिहेतुरिति किम् ? **अर्धप्रस्थे भवा–अर्धप्रस्था, अर्धप्रस्था भार्या यस्य सः–अर्धप्रस्थभार्यः, शोभनतरभार्यः, मध्यमभार्यः** । स्वरेति किम् ? **वैयाकरणभार्यः** । अन्ये तु वृद्धिमात्रहेतोर्ञ्णितस्तद्धितस्य पुंवत्प्रतिषेधमिच्छन्ति, तन्मते–**वैयाकरणीभार्यः** । अरक्तविकारे इति किम् ? **कषायेण रक्ता–काषायी, सा बृहतिकाऽस्य–काषायबृहतिकः, एवं–माञ्जिष्ठबृहतिकः; लोहस्य विकारो लौही, सा ईषाऽस्य–लौहेषः; एवं–खादिरेषः** ॥ ५५ ॥

श० म० **न्यासानुसन्धानम्**– तद्धितः० । **स्वरवृद्धिहेतुरि**ति तद्धितविशेषणम्, "वृद्धिरादैदौत्" [३.३.१.] इति सूत्रेणादैदौतां वृद्धिसंज्ञा विधीयते, ते च प्रायः स्वरस्यैव स्थाने भवन्ति, क्वचिदनादेशरूपा अप्येत इति तेषां व्यावृत्त्यर्थं स्वरग्रहणम्, तत्र स्वरवृद्धिहेतुरिति पदं व्याचष्टे–**स्वरस्थानाया वृद्धेर्योहेतुरि**ति–स्वरस्थानाया इति कथनेन आदेशभिन्नाया एव व्यावृत्तिः, व्यञ्जनस्थानायास्तस्या अभावात् । **'अरक्तविकारे'** इत्यपि तद्धित इत्यस्यैव विशेषणम्, तदाह–**रक्ताद् विकाराच्चान्यत्रार्थे** इति–"रागाट्टो रक्ते" [ ६. २. १. ] इत्यधिकृत्य रक्तार्थे विहितस्तद्धितः "विकारे" [ ६. २. ३० ] इत्यधिकृत्य च विकारार्थे विहितः सः, तदन्यार्थे विहित इत्यर्थः । तद्धितश्च प्रत्यय इति प्रत्ययग्रहणे तदन्तस्य ग्रहणादाह–**तदन्तः परतः स्त्रीलिङ्गः** इति, शब्द इति विशेष्यमध्या

हार्यम्, तेन "विशेषणमन्तः" [७. ४. ११३.] इति परिभाषया वा तदन्तग्रहणम्' न पुंवदिति च प्रकरणलब्धमेव. **तथा च** सूत्रार्थः सम्पन्नः। मथुरायां भवा–स्त्री, माथुरी, सा भार्या यस्याऽसौ–**माथुरीभार्यः** भवार्थेऽणि मथुराशब्दस्यादेः स्वरस्य स्थाने वृद्धिर्भवतीति स्वरस्थानीयाया वृद्धेर्हेतुस्तद्धितप्रत्ययः, तदन्तः परतः स्त्रीलिङ्गः शब्दो माथुरीशब्दः, तस्य परतः स्त्री०" [३. २. ४९.] इति पुंवद्भावः प्राप्तोऽनेन निषिध्यते। विदिशा नाम नगरी, तस्यां भवा वैदिशी, सा भार्या यस्येति– **वैदिशीभार्यः**। विदर्भो जनपदः, तत्र भवा वैदर्भी, विदर्भाणां राजाऽपि विदर्भः, तस्यापत्यं स्त्री वा वैदर्भी। सुतङ्गमो नाम ऋषिः, तस्यापत्यं स्त्री–सौतङ्गमी, सा भार्या यस्याऽसौ- **सौतङ्गमीभार्यः।** कृतवीर्यस्यापत्यं स्त्री–कार्तवीर्यी। प्रथमसूत्रप्राप्तपुंवद्भावनिषेधमुदाहृत्य पुंवद्भावमात्रस्य [सर्वस्य पूर्वोक्तपुंवद्भावस्य] अयं निषेध इति बोधयितुमुदाहरणान्तराण्यप्याह– **माथुरीदेश्ये**त्यादि, ईषदसमाप्ता माथुरीत्यर्थे देश्यप्। **नादेयीचरी**नि– नद्यां भवा–नादेयी, नादेयी भूतपूर्वा–**नादेयीचरी,** "नद्यादेरेयण्" [६. ३. २.] इत्येयणि ङ्यां–नादेयीशब्दसिद्धिः, तस्माद् "भूतपूर्वे प्चरट्" [७. २. ७८] इति प्चरट्, टित्वान्ङ्यां–नादेयीचरीति, अत्र पित्तद्धितनिमित्तापुंवद्भावप्राप्तिरनेन निषिध्यते। **सौतङ्गमीयते** अत्र सौतङ्गमीवाचरतीत्यर्थे क्यङ्, तन्निमित्तः पुंवद्भावः प्राप्तोऽनेन निषिध्यते। **'वैदर्भीमानिनी, स्रौघ्नीमानिनी'** इत्यनयोर्मानिनि परतः पुंवद्भावप्राप्तिः। सर्वत्रैषु तद्धितः स्वरवृद्धिहेतुरक्तविकारार्थश्च। पदकृत्यमाह–**तद्धित इति किमि**ति–स्वरवृद्धिहेतुत्वस्य तद्धितप्रत्ययेष्वेव प्रायो दर्शनात् तद्धित एव ग्रहीष्यत इत्यभिमानात् प्रश्नः। न केवलं तद्धित एव स्वरवृद्धिहेतुः प्रत्ययोऽपि तु कृत्प्रत्ययोऽपि तादृश इति स्वरवृद्धिहेतुकृत्प्रत्ययान्तस्य पुंवद्भावनिषेधो मा भूदिति तद्धितग्रहणमावश्यकमित्याह– **कुम्भकारी भार्या यस्ये**ति– कुम्भं करोतीति विग्रहे "कर्मणः०" [५. १. ७२.] इत्यणन्तात् कुम्भकारशब्दात् स्त्रियां ङीः, कुम्भकारीशब्दः स्वरवृद्धिहेतुरक्तविकारार्थकभिन्नप्रत्ययान्त इति तस्य भार्याशब्देन बहुव्रीहौ पुंवद्भावः प्रतिषिध्यते। एवं–काण्डं लुनातीति–काण्डलावी, सा भार्या यस्येत्यर्थे **काण्डलावभार्य** इत्यत्रापि पुंवद्भावः प्रतिषिध्येत, तद्वारणाय तद्धितग्रहणमावश्यकमिति भावः। **वृद्धिहेतुरिति किमि**ति–सामान्येनैव, तद्धितान्तस्य पुंवद्भावो विधीयतामिति प्रश्नाशयः। यत्र वृद्धिर्न भवति तादृशतद्धितान्तस्यापि पुंवद्भावनिषेधः स्यात्, तदाह– **अर्धप्रस्थे भवा–अर्थप्रस्थे**ति–अत्र भवार्थेऽण्, तस्मिन् परतो वृद्धिर्न भवति, "अर्धात् परिमाणस्यानतो वा त्वादेः" [७. ४. २०.] इत्यर्धात्परस्य परिमाणार्थस्य प्रस्थशब्दस्य स्वरेष्वादेरतो वृद्धेर्वर्जनात्, आदेश्च विकल्पेन विधानादभावपक्षेऽस्य रूपस्य सत्त्वात्, अत्र च प्रकृतसूत्राप्रवृत्तेर्न पुंवद्भावनिषेधः, वृद्धिहेतुरित्यस्याभावे चेहापि स्यादेव निषेधः। न च मा भूदिह वृद्धिः, तथापि तद्धितस्य वृद्धिहेतुत्वमस्त्येव पर्युदासाभावे, आदेश्च वृद्धिपक्षेऽत्रापि वृद्धेः संभवादिति वाच्यम्, यतो हेतुत्वं द्विधा–'स्वरूपयोग्यत्वं फलोपहितत्वं च, तत्रेह सूत्रे फलोपहितहेतुत्वस्य ग्रहणादिह च वृद्धिरूपकलस्यासत्त्वात्। **शोभनतरभार्यः** इति–अत्र शोभनतरा भार्या यस्येति विग्रहः, तत्र शोभनतराशब्दस्तद्धितप्रत्ययान्तोऽस्ति, किन्त्वसौ तद्धितो न वृद्धिं प्रति स्वरूपयोग्योऽपि हेतुः, किमुत फलोपहित इति न भवति पुंवद्भावनिषेधः, वृद्धिहेतुरित्यस्याभावे चेहापि स्यादेव निषेधः। वृद्धौ स्वरेति विशेषणेन च **वैयाकरणभार्यः** इत्यादौ निषेधो न भवति, तत्र हि "य्वः पदान्तात् प्रागैदौत" [७. ४. ५] इत्यैत् भवति, व्याकरणमधीते वेत्ति वा या स्त्री सा–वैयाकरणी "तद्वेत्त्यधीते" [६. २. ११६.] इत्यण्, आदिस्वरस्य वृद्धिं बाधित्वा ऐद् भवति, अत्र ऐद् यद्यपि वृद्धिस्तथापि न स्वरस्थानीया वृद्धिरिति तस्य तद्धितस्य प्रकृतसूत्रे ग्रहणाभावात् पुंवद्भावस्य प्रतिषेधाभावे सति तस्मिन् वैयाकरणभार्य इति रूपं स्वमते भवति, स्वरेत्यस्याभावे च पुंवद्भावनिषेधात्–वैयाकरणीभार्य इति स्यात्, तच्चान्यमतसंमतमित्याह–**अन्ये तु वृद्धिमात्रहेतोरि**ति, अयमाशयः–ये वृद्धौ स्वरस्थानीयत्वं विशेषणं नाददते तेषां मते इहापि ऐद्रूपवृद्धेः सत्त्वेन निषेधः स्यादेव; यद्यपि पाणिनीयानां मतेऽपि प्रकृतसूत्रस्थानीये "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" [६. ३. ३८.] इति सूत्रे वृद्धौ स्वरस्थानीयत्वरूपं विशेषणं न दीयते, तथापि वृद्धेस्तद्धितस्येत्युक्तावपि षष्ठ्या निमित्तार्थत्वसंभवात् निमित्तपदेन वृद्धिशब्देन फलोपहितनिमित्तत्वं गृह्यत इति व्याख्यानादिह पुंवद्भावो न निषिध्यते, तथा च अन्ये त्विति शब्देन तदन्य एव केचन वैयाकरणा ग्राह्याः। **अरक्त-विकारे इति किमि**ति– रक्तार्थक-विकारार्थकतद्धितवर्जनं किमर्थमिति प्रश्नाशयः

"Aho Shrutgyanam"

**कषायेण 'रक्ता-काषायी**'ति-कषायशब्दात् "रागाट्टो रक्ते" [६. २. १.] इत्यणि वृद्धौ ङ्यां च-काषायी, **सा बृहतिकाऽस्येति-काषायबृहतिकः** इति-अत्र काषाय्या बृहतिकया समासे सति पुंवद्भावो भवत्येव, प्रकृतसूत्रे रक्तार्थपर्युदासाभावे च न स्यात्; एवं-मञ्जिष्ठया रक्ता बृहतिका-माञ्जिष्ठी, सा यस्य स- **माञ्जिष्ठबृहतिक** इत्यत्रापि पुंवद्भावो भवत्येव । रक्तार्थं प्रत्युदाहृत्य विकारार्थं प्रत्युदाहरति- **लोहस्य विकारो-लौही**ति, अत्र "विकारे" [६. २. ३०.] इत्यण्, ईषा-हलयुगयोर्मध्यस्थितो दण्डः, लौही ईषा यस्य स- **लौहेषः,** अत्र पुंवद्भावो भवति, विकारार्थपर्यदासाभावे च न स्यात्, तथा च 'लौहीषः' इति स्यात् । एवं- खदिरस्य विकारः- खादिरी, सा ईषाऽस्य-**खादिरेषः** इत्यत्रापि पुंवत्त्वं भवत्येव, तदर्थमरक्तविकारे इत्यावश्यकम् ॥ ३. २. ५५ ॥

## स्वाङ्गान्ङीर्जातिश्चामानिनि । ३. २. ५६ ॥

**त० प्र०--स्वाङ्गाद् यो विहितो ङीस्तदन्तो जातिवाची च यः शब्दः परतःस्त्री स पुंवन्न भवति, अमानिनि-मानिन्शब्दश्चेत् परो न भवति । दीर्घकेशीभार्यः, चन्द्रमुखीभार्यः कलकण्ठीदेश्या, तनुगात्रीचरी, चन्द्रमुखीयते । जाति- कठीभार्यः, बह्वृचीभार्यः, कठीदेश्या, बह्वृचीचरी शूद्राभार्यः, क्षत्रियाभार्यः, शूद्रापाशा, क्षत्रियादेश्या;**

**आकृतिग्रहणा जातिरत्रिलिङ्गा च यान्विता ।**
**आजन्मनाशमर्थानां सामान्यमपरे विदुः ॥ १ ॥**

**अत्र प्रथमजातिलक्षणानुसारेण-'कुमारीभार्यः, किशोरीभार्य इति भवति, द्वितीयजातिलक्षणानुसारेण-'कुमारभार्यः, किशोरभार्य इति भवति, नहि कुमारत्वादि उत्पत्तेः प्रभृत्याविनाशमनुवर्तते । स्वाङ्गादिति किम् ? पटुभार्यः । ङीरिति किम् ? सकेशभार्यः । अमानिनीति किम् ? दीर्घकेशमानिनी, कठमानिनी । असमासनिर्देशः सुखार्थः ॥५६॥**

श० म० **न्यासानुसन्धानम्-स्वाङ्गा०** । पुंवत् नेति प्रकरणप्राप्तम्, तथा चार्थमाह-**स्वाङ्गाद् यो विहित** इति- "असह-नञ्-विद्यमान०" [२. ४. ३८.] इति सूत्रेण विहित इत्यर्थः, तत्र हि न स्वमङ्गं स्वाङ्गमपि तु-

"अविकारोऽद्रवं मूर्त्तं, प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥" इति

कारिकया तत्रैव सूत्रे लक्षितमेव गृह्यते, लक्षणव्याख्या च तत्र सूत्रे कृतपूर्वा, तथा चोक्तलक्षणलक्षितात् स्वाङ्गवाचकात् सपूर्वपदाद् विहितो यो ङीस्तदन्तः परतः स्त्रीवाचकः शब्दः पुंवन्न भवति मानिन्भिन्ने उत्तरपदे; जातिरपि तथेति सूत्रार्थः । **दीर्घकेशीभार्य** इति-दीर्घाः केशा यस्याः सा- दीर्घकेशी, सा भार्या यस्येति बहुव्रीहिगर्भो बहुव्रीहिः, भार्यारूपे उत्तरपदे पुंवत्त्वं प्राप्तमनेन निषिद्धम्, केशस्योक्तलक्षणलक्षितस्वाङ्गत्वेन ततो विहितो ङीरिहास्त्येव । **चन्द्रमुखीभार्यः** इति-चन्द्र इव मुखं यस्याः सा-चन्द्रमुखी, सा भार्येत्यादि पूर्ववत् । **कलकण्ठीदेश्या** कलः- कलान्वितोऽव्यक्तमधुरो वा, कण्ठध्वनिर्यस्याः सा-कलकण्ठी कोकिला, तत्र च जातित्वादेव ङीरिति तदिह स्वाङ्गात् ङीप्रकरणे नोदाहार्यमिति कलकण्ठीपदमिह यौगिकमेव स्वीकार्यम्, तथा च कण्ठशब्दस्य स्वाङ्गत्वेन स्वाङ्गान्ङीप्रकरणे तदुदाहरणसङ्गतिः, ईषदूना कलकण्ठी कलकण्ठीदेश्या, पित्त्वनिमित्तकः पुंवद्भावः प्राप्तोऽनेन वार्यते । केचित्त्वेवमाहुः- कलकण्ठीपदस्येह कोकिलापरत्व एव प्रयोगार्थसामञ्जस्यम्, काचिन्नारी कलकण्ठीसाम्येनेह बुबोधयिषितेति प्रयोगस्वारस्यं प्रतीयते, न च कलकण्ठी काचिदन्या नारी, तया साम्यमिह विवक्षयितुं युज्यत इति जातिप्रकरणे एवेदमुदाहार्यमिति । **तनुगात्रीचरी**ति-तनु-कृशं गात्रमस्याः सा- तनुगात्री, भूतपूर्वा सा-तनुगात्रीचरी, या किल पूर्वं कृशशरीराऽऽसीत् सम्प्रति समुपचितदेहा जाता सैवमुच्यते, इहापि पिन्निमित्ता प्राप्तिः । **चन्द्रमुखीयते** चन्द्रमुखीवाचरतीत्यर्थे क्यङ्, तन्निमित्तैव पुंवद्भावप्राप्तिरनेन प्रतिषिध्यते । जातिस्त्रियमुदाहरति-**जाति-** इत्यादिना । **कठीभार्यः** कठेन प्रोक्तमधीते या सा कठी, अत्र प्रोक्तार्थप्रत्ययस्य "कठादिभ्यो वेदे लुप्" [६. ३. १८३.] इति लुप्, अध्ययनार्थप्रत्ययस्य च "प्रोक्तात्" [६. २. १२९.] इति लुप्, तथा च वेदशाखावाचित्वात् "गोत्रं च चरणैः सह" इत्युक्तेर्जातित्वमिति "जातेरयान्त०" [२. ४. ५४.] इति ङीः, सा भार्या यस्येत्यर्थे बहुव्रीहौ प्राप्ते पुंवत्त्वमनेन निषिध्यते । एवं-**बह्वृचीभार्यः** इत्यत्रापि । **कठीदेश्ये**ति-ईषदूना कठी, पित्त्वनिबन्धना प्राप्तिः । **शूद्राभार्यः** इत्यादौ शूद्रादिशब्दानां सकृदाख्यातनिर्ग्राह्यत्वे सत्यसर्वलिङ्गत्वरूपं जातित्वं बोध्यम् । पूर्वं

"Aho Shrutgyanam"

"जातेरयान्त०" [ २. ४. ५४. ] इति सूत्रबृहद्वृत्तौ जातिलक्षणत्रैविध्यमुक्तम्, तथाहि– "तत्र जातिः काचित् संस्थानव्यङ्ग्या, यथा–गोत्वादिः । सकृदुपदेशव्यङ्ग्यत्वे सत्यत्रिलिङ्गाऽन्या, यथा–ब्राह्मणत्वादिः । + + + + + गोत्रचरणलक्षणा च तृतीया । यदाहुः–

"आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥" इति ।

सम्प्रति कठीभार्य इत्यादितृतीयजातिलक्षणानुसारमुदाहृतम्, शूद्राभार्य इत्यादिद्वितीयजातिलक्षणानुसारम्, आकृतिग्रहणायाः–अनुगतसंस्थानव्यङ्ग्याया जातेः 'तटी' इत्यादौ प्रसिद्धाया उदाहरणमिह नोपन्यस्तम् ।

केचिज्जातिलक्षणमपरमाहुः, तदपीह समुपन्यस्यति– **आकृतिग्रहणा जातिरि**त्यादिना, तत्र 'आकृतिग्रहणा' इत्यंशः पूर्वत्रापि लक्षणे समान एवेति प्रथमं जातिलक्षणमुभयसंमतम्, 'अत्रिलिङ्गा च' इत्यारभ्य द्वितीयम्, तस्य चायमर्थः–या अत्रिलिङ्गा सती अर्थानां प्रादुर्भाव-विनाशावभिव्याप्य सम्बद्धा सा जातिः, 'सामान्यमपरे' इति च तृतीयं लक्षणम् । एवं च "जातेरयान्त०" इति [ २. ४. ५४. ] सूत्रोक्ते द्वितीयलक्षणे सकृदुपदेशव्यङ्ग्यत्वे सत्यसर्वलिङ्गत्वरूपेऽयं भेदः, स च केवलं स्वरूपे, लक्ष्यं तूभयोरपि ब्राह्मणत्वाद्येव; "सामान्यमपरे विदुः" इति लक्षणेऽपि "आजन्मनाशमर्थानाम्" इति सम्बध्यते, तथा चार्थानामुत्पत्तेः प्रभृति विनाशपर्यन्तं सामान्यं जातिरिति, इदमेव च जातिलक्षणमग्रे द्वितीयजातिलक्षणत्वेनोक्तमाचार्यैः । इदं च लक्षणं "जातेरयान्त०" इति सूत्रस्थद्वितीय-तृतीयलक्षणयोः संग्राहकम्, तेन कठत्वादीनामपि जातित्वं सिध्यति, तत्तच्छाखाध्येतृत्वस्याजन्मनाशं सामान्यतयाऽन्वितत्वाभावेऽपि शाखाध्येतृत्वयोग्यताया वंशपरम्पराप्राप्ततया तथाभूतत्वमक्षतम् । तत्रत्यं ["जातेरयान्त०" इति सूत्रस्थं ] प्रथमं जातिलक्षणं चाप्यत्रत्येनान्तिमलक्षणेन वस्तुतो सङ्गृहीतमेव, अनुगतसंस्थानव्यङ्ग्यत्वमपि तटादिषु आजन्मनाशं तिष्ठत्येव । तथा चानेन नवीनेन लक्षणेन को विशेष इति चेदत्राह–**अत्र प्रथमजातिलक्षणानुसारमि**ति– आकृतिग्रहणत्वरूपं जातित्वं कुमार्यादावप्यस्ति, कौमारस्य कैशोरस्य वा देहिन आकृतिविशेषेणैव ग्राह्यत्वात्, इति तेन लक्षणेन कुमार्यादीनामपि जातिस्त्रीत्वं भवतीति तत्रानेन सूत्रेण पुंवत्त्वं निषिध्यते । अपरेषां सम्मते द्वितीयलक्षणे च न तेषां जातित्वमित्याह–**द्वितीयजातिलक्षणानुसारेणे**ति– द्वितीयत्वं तस्य लक्षणस्य द्वितीयमतानुसारित्वात् । केचित् तु आकृतिग्रहणेत्यस्यैवात्रिलिङ्गेति विशेषणमाहुः, तत् तु न युक्तम्, तटीत्यादेरजातित्वप्रसङ्गात् । सर्वथा–आकृतिग्रहणेति अत्रिलिङ्गेति च भिन्नमेव लक्षणद्वयम् । आजन्मनाशमर्थानामन्विता, आकृतिग्रहणा च जातिरित्थमपि केचित् सम्बन्धं कुर्वन्ति, तन्मतेऽपि कुमारत्वादेर्न जातित्वम्, कुत इत्याह– **न हि कुमारत्वादी**ति, हि–यतः, कुमारत्वादि जातित्वेन ग्रहीतुमिष्टं वस्तु उत्पत्तेः प्रभृति विनाशमभिव्याप्य नानुवर्त्तत इति सम्बन्धः । कुमारशब्दः प्रथमवयोवाची, प्रथमं च वयो यौवनात् पूर्वम्, तच्च न वार्धकेऽनुवर्त्तते, तथा च न तत्र पुंवद्भावनिषेध इति कुमारभार्य इत्याद्येव ।

पदकृत्यमाह–**स्वाङ्गादिति किमि**ति–ङीर्जातिश्चामानिनीत्येव सूत्रमस्त्विति भावः । उत्तरमाह–**पटुभार्यः** इति, अयमाशयः– तथा सति सर्वा ङ्यन्ता स्त्री न पुंवत् स्यादिति पट्वी भार्या यस्येत्यर्थे गुणवचनस्यापि पट्वीशब्दस्य पुंवद्भावो न स्यादिति । **ङीरिति किमि**ति–स्वाङ्गान्ङीरेव विधीयत इति ङीग्रहणं व्यावर्त्तकमिति भावः । उत्तरयति– **सकेशभार्यः** इति–"असह-नञ्-विद्यमान०" [ २. ४. ३८. ] इति सूत्रे सहपूर्वस्य पर्युदस्तत्वात् ततो ङीर्न भवतीति सकेशा भार्या यस्येति आबन्तेनैव विग्रहे पुंवद्भावो भवत्येव, ङीरित्यस्याभावे च न स्यादिति भावः । **अमानिनीति किमि**ति– अविशेषेण सर्वस्मिन्नुत्तरपदे निषेधो विधीयतामित्याशयः । **दीर्घकेशमानिनी**ति स्वभिन्नां कांचिद् दीर्घकेशां मन्यत इति विग्रहे "क्यङ्-मानि-पित्तद्धिते" [ ३. २. ५० ] इति पुंवद्भावो भवत्येव, मानिनीत्यस्याभावे न स्यादिति भावः । नन्वत्र न मानिन्शब्द उत्तरपदमपि तु मानिनीशब्द इति 'अमानिनि' इत्युक्तेऽपि नात्र पुंवद्भावो युक्तः प्रकृतनिषेधप्रवृत्तेरव्याहतत्वादिति चेत् ? न ❀ नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ❀ इति न्यायेन लिङ्गबोधकप्रत्ययविशिष्टस्यापि मानिन्शब्दस्य मानिन्ग्रहणेन ग्रहीतुं शक्यत्वात् । न चात्र न मानिन्शब्दाल्लिङ्गबोधकः प्रत्ययोऽपि तु दीर्घकेशमानिन्शब्दादेव, यतः कर्मोपपदादेव मन्धातोर्णिन् प्रत्यय इति समुदायस्यैव स्त्रीप्रत्ययप्रकृतित्वमिति वाच्यम्, यतो यो विहितस्तद्विशिष्टस्यैव तेन ग्रहणमित्येतादृशनियमानङ्गीकारात् । अस्तु वा समुदायादेव ङीः, तथा सति मानिन्शब्दमात्रस्योत्तरपदत्वमव्याहतमेव, समासात् पूर्वं स्त्रीप्रत्ययोत्पत्त्यभावात् । ङी-जात्योः सहैव निषेधेन सहान्वयात् सहोक्तिसत्त्वेन समासः कुतो न कृतः सूत्रे इत्याशङ्कायामाह–**अस-**

"Aho Shrutgyanam"

**मासनिर्देशः सुखार्थः** इति–सुखार्थं इत्यस्य सुखेनार्थबोधार्थं इति भावः, स्वाङ्गङीजात्यमानिनीति कृते नार्थः सुखेन बोद्धुं शक्य इति व्यस्त एव निर्देशः कृत इति यावत् ।। ३. २. ५६. ।।

## पुंवत् कर्मधारये । ३. २. ५७ ।।

**त० प्र०—परतः स्त्र्यनूङ् कर्मधारये समासे स्त्र्येकार्थे उत्तरपदे परे पुंवद् भवति, प्रतिषेधनिवृत्त्यर्थं आरम्भः । "नाप्प्रियादौ" [ ३. २. ५३. ] इत्युक्तं तत्रापि भवति– कल्याणी चासौ प्रिया च–'कल्याणप्रिया, एवं–कल्याणमनोज्ञा; "तद्धिताककोपान्त्यपूरण्याख्याः" [ ३. २. ५४. ] इत्युक्तं तत्रापि भवति–मद्रिका चासौ भार्या च–'मद्रिकभार्या, लाक्षिकबृहतिका, पाचकवृन्दारिका, कारकवृन्दारिका, पञ्चमवृन्दारिका, षष्ठवृन्दारिका, दत्तवृन्दारिका, गुप्तवृन्दारिका; "तद्धितः स्वरवृद्धिहेतुररक्तविकारे" [ ३. २. ५५. ] इत्युक्तं तत्रापि भवति–माथुरी चासौ वृन्दारिका च–माथुरवृन्दारिका, स्रौघ्नवृन्दारिका; "स्वाङ्गान्ङीर्जातिश्चामानिनि" [ ३. २. ५६. ] इत्युक्तं तत्रापि भवति– चन्द्रमुखी चासौ वृन्दारिका च–चन्द्रमुखवृन्दारिका, दीर्घकेशवृन्दारिका, कठवृन्दारिका, बह्वृचवृन्दारिका; वतण्डस्यापत्यं–'वातण्ड्यः, स्त्री चेत् वतण्डी, सा चासौ वृन्दारिका च,–वातण्ड्यवृन्दारिका; गर्गस्यापत्यं–गार्ग्यः, स्त्री चेत् गार्गी, सा चासौ वृन्दारिका च–गार्ग्यवृदारिका; कपोतपाक एक–कापोतपाक्यः,स्त्री चेत् कपोतपाकी, सा चासौ वृन्दारिका च–कापोतपाक्यवृन्दारिका; कुञ्जस्यापत्यं–कौञ्जायन्यः, स्त्री चेत् कौञ्जायनी, सा चासौ वृन्दारिका च–कौञ्जायन्यवृन्दारिका; अङ्गस्यापत्यानि–अङ्गाः, स्त्रियश्चेदाङ्ग्यः,ताश्च ता वृन्दारिकाश्च–अङ्गवृन्दारिकाः; एवं–गर्गवृन्दारिकाः । 'इडविड्, पृथु, दरद्, उशिज्–एते जनपदशब्दाः क्षत्रियवाचिनः,एभ्योऽपत्यप्रत्ययस्य स्त्रियां लुपि–इडविट् चासौ वृन्दारिका चेत्यादिविग्रहे–ऐडविडवृन्दारिका, पार्थवृन्दारिका, दारदवृन्दारिका; औशिजवृन्दारिका इति भवति । परतः स्त्रीत्येवं–खट्वावृन्दारिका । अनूङित्येव–ब्रह्मबन्धूवृन्दारिका ।। ५७ ।।**

**श० म० न्यासानुसन्धानम्—पुंवत्०** । पुंवद्भावप्रकरणस्य निषेधेन व्यवहितत्वादिह पुनः पुंवद्ग्रहणम्, पुंवद्भावस्योद्देश्यतया पूर्वत्र प्रतीता परतः स्त्र्येवेहाप्युद्देश्यमिति तदनुवृत्तिरपेक्षितैव, एवं निमित्ततयाऽनुवृत्तं 'स्त्र्येकार्थे उत्तरपदे' इत्यपि सम्बध्यत एव, तदाह–**परतः स्त्री**त्यादिना । ननु "परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्" [३. २. ४९.] इति सूत्रेणैव कर्मधारयेऽपि पुंवद्भावः सिद्ध एवेति विशिष्यानेन सूत्रेण पुनः पुंवद्भावविधानमनावश्यकमित्याशङ्कायामाह– **प्रतिषेधनिवृत्त्यर्थ आरम्भः** इति–प्रतिषेधस्य "नाप्प्रियादौ" [ ३. २. ५३. ] इत्यादिसूत्रैः कृतस्य पुंवद्भावनिषेधस्य निवृत्तिः–कर्मधारयेऽप्रवृत्तिरेव अर्थः–प्रयोजनं यस्य तादृशोऽयमारम्भः, एतत्सूत्रेण पुनः पुंवद्भावविधानमिति तदर्थः । अयमाशयः–"परतः स्त्री०" [ ३. २. ४९. ] इत्यादिसूत्रैः प्राप्तः पुंवद्भावः "नाप्प्रियादौ" इत्यारभ्य "स्वाङ्गान्ङी" इत्यन्तं चतुर्भिः सूत्रैः प्रतिषिध्यत इति तत्तत्स्थले कर्मधारयेऽपि तैः प्रतिषेधः स्यात्, स कर्मधारये मा भूदपि त्वनेन पुंवद्भाव एव भूयादित्येतदर्थं प्रतिषेधनिवर्त्तकमिदं सूत्रमारभ्यत इति । तथा च प्रतिषेधप्राप्तिस्थलान्येव प्रकृतसूत्रोदाहरणतया प्रदर्श्यन्ते—**"नाप्प्रियादौ" इत्युक्तं तत्रापि भवती**त्यादिना, तत्र पूरण्यप्प्रत्ययान्ते उत्तरपदे विहितो निषेधो बहुव्रीहावेव प्रवर्त्तते तत्रैवाप्प्रत्ययान्तोत्तरपदस्य संभवादिति तदनुदाहरणम् । प्रियादावुदाहरति–**कल्याणी चासौ प्रिया चे**ति–अत्र "विशेषणं विशेष्येणैकार्थं कर्मधारयश्च" [३.१. ५६.] इति समासः, "परतः स्त्री०" [ ३. २. ४९. ] इति प्राप्तस्य पुंवद्भावस्य "नाप्प्रियादौ" [३. २. ५३.] इति निषेधे प्राप्तेऽनेन विशिष्य पुंवद्भावो भवति; एवं–कल्याणी चासौ मनोज्ञा-कल्याण-मनोज्ञेत्यत्रापि बोध्यमित्याह–**एवं–कल्याणमनोज्ञे**ति । एवं-"तद्धिताककोपान्त्यपूरण्याख्याः" [३. २. ५४.] इत्यनेन पुंवद्भावः प्रतिषिध्यतेऽतोऽत्र तद्विषयाण्यप्युदाहरणान्युपस्थापयितुमाह–**"तद्धिताककोपान्त्यपूरण्याख्या" इत्युक्तमिति**, तत्र चतुरोऽपि तदुद्देश्यभूतान् प्रयोगान् क्रमश आह–**मद्रिका चासौ भार्या चे**ति, इदं तद्धितप्रत्ययसम्बन्धिकोपान्त्यस्योदाहरणम्, पूर्ववत् कर्मधारयसमासः, पुंवद्भाव-तत्प्रतिषेधयोः प्राप्तिरनेन पुंवद्भावश्च बोध्यः । **लाक्षिकबृहतिके**ति–लाक्षया रक्ता-लाक्षिकी, सा चासौ बृहतिका चेति विग्रहः, इदमपि तद्धितसम्बन्धिकोपान्त्यस्यैवोदाहरणम्, अत्र यद्यपि "तद्धितः स्वरवृद्धिहेतुररक्तविकारे" [ ३. २. ५५. ] इति सूत्रे 'अरक्तविकारे' इति पर्युदासेनापि पुंवद्भावप्रतिषेधः पर्युदस्त इति तेनापि प्रकृतप्रयोगसिद्धिः, तथापि * अनन्तरस्य विधिर्वा भवति प्रतिषेधो

"Aho Shrutgyanam"

वा * इति न्यायेनासौ पर्युदासः स्वरवृद्धिहेतुतद्धितनिमित्तस्य प्रतिषेधस्यैव निवर्त्तको न तु "तद्धिताककोपान्त्यस्य०" [३. २. ५४.] इत्यनेन प्राप्तस्य प्रतिषेधस्य, तथा च तत्प्रतिषेधनिवृत्त्यर्थमेतत्सूत्रोदाहरणत्वं तस्य युक्तमेव । **पाचकवृन्दारिका, कारकवृन्दारिकेत्येते** अकसम्बन्धिकोपान्त्यस्य प्रतिषेधनिवृत्तेरुदाहरणे, पाचिका चासौ "वृन्दारिका कारिका चासौ वृन्दारिकेति विग्रहौ" **पञ्चमवृन्दारिका, षष्ठवृन्दारिके**ति पूरण्या उदाहरणे, पञ्चमी चासौ वृन्दारिका, षष्ठी चासौ वृन्दारिकेति विग्रहौ । **दत्तवृन्दारिका, गुप्तवृन्दारिके**ति आख्योदाहरणे, दत्ता चासौ वृन्दारिका, गुप्ता चासौ वृन्दारिकेति विग्रहौ, सर्वत्र समासादिः पूर्ववत्, वृन्दारकशब्दो, देववाची मुख्यवाची मनोहरवाची च, तत्र प्रकृतप्रयोगेषु मुख्यार्थक एव प्रतीयते, तस्य विशेषणत्वेऽपि प्रकृतप्रयोगेषु विशेष्यत्वमेव, मुख्यभूतायाः स्त्रिया एव पाचिकादिशब्देन विशेषणीयत्वात् आख्याभूतयोर्दत्ता-गुप्ताशब्दयोस्तु यद्यपि विशेष्यत्वमेव युक्तम्, तथा च तयोः परनिपात एवोचितः, तथापि विवक्षावशात् प्रकृते विशेषणत्वं व्यवहृतमिति ध्येयम् । प्रतिषेधान्तरमवतारयति—**तद्धितः स्वरवृद्धिहेतुरि**ति । तद्विषयेऽपि प्रवृत्तिमुदाहरति--**माथुरी चासौ वृन्दारिके**ति---मथुरायां भवा स्त्री—माथुरी, स्रुघ्नेभवा स्त्री---स्रौघ्नी, ते च ते वृन्दारिके इति विग्रहौ, अत्र भवार्थे विहितोऽण् तद्धितः स्वरवृद्धिहेतुः, तदन्तायाः स्त्रियाः पुंवत्त्वप्रतिषेधः प्राप्तः कर्मधारयेऽनेन प्रतिषिध्यते । स्वाङ्गान्ङीरिति सूत्रविषयमुदाहरति—**चन्द्रमुखी चासौ वृन्दारिके**ति—चन्द्र इव मुखं यस्या इति विग्रहे चन्दमुखीशब्दः "असहनञ्०" [ २. ४. ३८. ] इति ङ्यन्तः तस्य पुंवद्भावः प्रतिषिद्धोऽनेन प्रतिप्रसूयते, एवं--**दीर्घकेशवृन्दारिके**ति । जातिमुदाहरति-- **कठवृन्दारिके**त्यादि, कठी चासौ वृन्दारिकेति विग्रहः, एवं-- **बह्वृचवृन्दारिके**ति, कठी-बह्वृचीशब्दौ शाखावाचित्वाज्जातिप्रवृत्तिनिमित्तौ । गोत्रप्रवृत्तिनिमित्तां जातिमुदाहरति-- **वतण्डस्यापत्यमि**त्यादिना, "वतण्डात्" [ ६. १. ४५. ] इति यञ्, तस्य "स्त्रियां लुप्" [ ६. १. ४६ ] इति लुप्-- वतण्डी, तस्याः पुंवद्भावेन लुपो निवृत्तौ--**वातण्ड्यवृन्दारिके**ति । **गर्गस्यापत्यं स्त्री—गार्गी** यञन्तात् स्त्रियां ङीर्यलोपः, सा चासौ वृन्दारिकेति विग्रहे समासे पुंवद्भावान्ङीनिवृत्तौ यकारश्रवणमिति---**गार्ग्यवृन्दारिके**ति रूपम् । **कपोतपाक एव—कापोतपाक्य**--इति—"व्रातादस्त्रियाम्" [ ७. १. ३१. ] इति स्वार्थे ञ्यः, अस्त्रियामित्युक्तेः स्त्रियां कपोतपाकैव, कपोतपाका चासौ वृन्दारिकेति विग्रहे समासेऽनेन पुंवद्भावे ञ्यप्रत्ययश्रुतौ **कापोतपाक्यवृन्दारिकेति** । कुञ्जस्यापत्यमिति विग्रहे "कुञ्जादेर्ञायन्यः" [ ६. १. ४७. ] इति ञायन्यप्रत्यये आदिस्वरवृद्धौ---**कौञ्जायन्यः** इति, स्त्रियां तु--"स्त्रीबहुष्वायनञ्" [ ६. १. ४८. ] इत्यायनञि—**कौञ्जायनी**ति, तस्याः पुंवद्भावे स्त्रीत्वनिमित्तकस्यायनञो निवृत्तौ पुंस्त्वनिमित्तस्य ञायन्यस्य श्रवणमिति—**कौञ्जायन्यवृन्दारिके**ति । **अङ्गस्यापत्यानी**ति--- अङ्गशब्दादपत्यार्थे "पुरुमगधकलिङ्गसूरमसद्विस्वरादण्" [ ६. १. ११६. ] इत्यणि तस्य "बहुष्वस्त्रियाम्" [ ६. १. १२४. इति बहुत्वे लुप्---अङ्गाः इति, अत्र चास्त्रियामिति कथनात् स्त्रीबहुत्वे लुबभावे जातित्वान्ङ्याम्--- **आङ्ग्यः**, ताश्च ता वृन्दारिका इत्यर्थे समासेऽनेन पुंवत्त्वेऽस्त्रियामिति व्यावृत्तिनिवृत्तौ ङ्रेरणो लुपि सति-- **अङ्गवृन्दारिकाः** इति । एवं---गर्गस्यापत्यानि---गर्गाः पुमांसः, स्त्रियश्च गार्ग्यः, ताश्च ता वृन्दारिका इति विग्रहे कर्मधारयसमासेऽनेन पुंवत्त्वे स्त्रीत्वनिवृत्तौ "यञञोऽश्चावर्णान्तगोपवनादेः" [ ६. १. १२६. ] इति यञो लुपि-गर्गवृन्दारिका इति, तदाह—**एवं—गर्गवृन्दारिकाः** इति । इत्थं पुंवद्भावे सति प्रत्ययलुपमुदाहृत्य क्वचित् तस्मिन् सति प्रत्ययलुबभावमुदाहर्तुमवतारयति—**इडविड् पृथ्** इत्यादिना, एवं चैतेभ्योऽपत्यार्थे "राष्ट्र-क्षत्रियात् सरूपात् राजापत्ये द्रिरञ्" [ ६. १. ११४. ] इत्यञि तस्य स्त्रियां "देरञणोऽप्राच्यभर्गादेः" [ ६. १. १२३. ] इति लुपि—'इडविड्' इत्यादीन्येव रूपाणि, तेषां वृन्दारिकादिशब्देन सह कर्मधारयेऽनेन पुंवत्त्वे स्त्रीत्वनिमित्तकलुपो निवृत्तौ—**ऐडविडवृन्दारिके**त्यादीनि प्रत्ययान्तरूपघटितान्येव रूपाणीति समुदितार्थः । पदकृत्यमाह--**परतःस्त्रीत्येवे**ति—तदनुवृत्तिरपि सप्रयोजनेति भावः । तद्व्यावर्त्यमाह—**खट्वावृन्दारिके**ति—खट्वाशब्दः स्वत एव स्त्रीलिङ्ग इति तस्य नेह पुंवद्भाव इतिभावः । 'अनूङ' इत्यवश्यं सम्बन्धनीयमित्याह--**अनूङित्येवे**ति, व्यावर्त्यमाह—**ब्रह्मबन्धूवृन्दारिके**ति—अनूङित्यस्याननुवृत्तौ पुंवद्भावे ह्रस्वश्रवणापत्तिरिति भावः ॥ ३. २. ५७ ॥

**रिति ॥ ३. २. ५८**

**त० प्र०– स्त्र्यनूङ् रिति प्रत्यये जातीये देशीये च पुंव-**

"Aho Shrutgyanam"

**द्भवति । पट्वी प्रकारोऽस्याः—पटुजातीया, ईषदपरिसमाप्ता पट्वी–पटुदेशीया; मद्रकजातीया, मद्रकदेशीया; पाचकजातीया, पाचकदेशीया; पञ्चमजातीया, षष्ठदेशीया; दत्तजातीया, गुप्तदेशीया, माथुरजातीया, स्त्रौघ्नदेशीया, दीर्घकेशजातीया, चन्द्रमुखदेशीया, कठजातीया, बह्वृचदेशीया, वातण्ड्यजातीया, गार्ग्यदेशीया, कापोतपाक्यजातीया, कौञ्जायन्यदेशीया, अङ्गजातीया, गर्गदेशीया, ऐडविडजातीया, पार्थदेशीया, दारदजातीया; औशिजदेशीया । परतः स्त्रीत्येव—कुटीजातीया, द्रुणीदेशीया । अनूङित्येव—करभोरूजातीया, मद्रबाहूदेशीया ।। ५८ ।।**

---

**श० म० न्यासानुसन्धानम्—रिति** । र् इत् यस्मिंस्तत्–रित्, तस्मिन् **रिति,** तादृशौ च प्रत्ययौ जातीय-देशीयावेवेति 'रित्' शब्दमर्थतो व्याख्याति—**जातीये देशीये चे**ति । रितौ प्रत्ययावपि यदि पितौ क्रियेतां तर्हि "क्यङ्-मानिपित्तद्धिते" [ ३. २. ५०. ] इत्यनेनैव पुंवद्भावः सिध्येत्, परं "तद्धितः स्वरवृद्धिहेतुररक्तविकारे" [ ३. २. ५५. ] इति सूत्रेण स्वरवृद्धिहेतुतद्धितान्तस्त्रियाः पुंवद्भावो निषिध्यमानः 'माथुरजातीया' इत्यादावपि स्यात्, इष्यते च तत्र पुंवद्भाव इति तदर्थं "रिति" पृथक् पुंवद्भावविधानमावश्यकम्, विहितश्चायं परत्वान्निषेधं बाधते, ततश्च रित्करणमप्यावश्यकम् । किञ्च "क्यङ्मानिपित्तद्धिते" [ ३-२-५० ] इत्यत्र रितोऽपि पाठेन नैवं प्रयोजनसिद्धिः, ततः पराणां निषेधसूत्राणां रिति प्रवृत्तेर्दुर्वारत्वादिति पृथगेव सर्वनिषेधबाधनार्थमिदं सूत्रं विशिष्य रिति पुंवद्भावं विधत्त इति स्वीकरणीयमेव, एतत्सूचनार्थमेवाग्रे निषेध्यविषयाण्यप्युदाहरणानि दास्यन्ते—**मद्रकजातीये**त्यादिना । उदाहरति—**पट्वी प्रकारोऽस्याः** इति—"प्रकारे जातीयर्" [ ७.२.७५. ] इति जातीयरि अनेन पुंवद्भावे—**पटुजातीये**ति । ईषदसमाप्ता पट्वीत्यर्थे "अतमबादेरीषदसमाप्ते०" [ ७. ३. ११. ] इति देशीयरि पुंवद्भावे—**पटुदेशीये**ति । प्रतिषेधनिवृत्त्युदाहरणान्याह—**मद्रकजातीये**त्यादि, मद्रिका प्रकारोऽस्या इत्यादिरूपेण विग्रहः, अत्र तद्धितकोपान्त्यनिमित्ता पुंवद्भावप्रतिषेधप्राप्तिरनेन वार्यते, एवं—**पाचकजातीये**त्यादावकसम्बन्धिकोपान्त्यत्वेन प्रतिषेधप्राप्तिरुदाहार्या । वस्तुतस्तु नात्र पुंवद्भावः प्राप्तो नवा तन्निषेधः, पुंवद्भावस्य एकार्थे उत्तरपदे क्यङ्मानिपित्तद्धिते णितद्धितयस्वरे च प्राप्तिरिति प्रतिषेधोऽपि तेष्वेव प्राप्त इत्यप्राप्त एव पुंवद्भावोऽनेन विधीयते, पूर्वं पुंवद्भावप्रतिषेधप्राप्तिनिवारणपरत्वेन प्रकृतसूत्रसार्थक्योपपादनं तु रित्प्रत्ययस्य पित्करणशङ्कावारणप्रसङ्गेनेति न तदसङ्गतिः । प्रतिषेधप्राप्तिस्थलसजातीयस्थलोदाहरणं तु 'उत्तरपदे' इत्यस्यासम्बन्धबुद्ध्या, उत्तरपदसम्बन्धे हि न प्रतिषेधप्राप्तिरुत्तरपदशब्दस्य समासचरमावयवे रूढत्वात् । अत्रापि परतः स्त्रिया एव पुंवत्वमित्याह—**परतः स्त्रीत्येवे**ति । व्यावर्त्यमाह—**कुटीजातीया, द्रुणीदेशीये**ति—कुटीद्रुणीशब्दौ स्वत एव स्त्रीलिङ्गाविति तयोः पुंसि रूपमेव नास्तीति तयोः पुंवद्भावो न भवतीति भावः । एवमनूङित्यस्यापि सम्बन्ध आवश्यक एवेत्याह—**अनूङित्येवे**ति ।। ३. २. ५८. ।।

---

## त्व-ते गुणः ।। ३. २. ५९ ।।

**त० प्र०—परतः स्त्र्यनूङ् गुणवचनशब्दः त्व-त इत्येतयोः प्रत्यययोः परयोः पुमान् भवति । पट्व्याः भावः—पटुत्वम्, पटुता; एन्या भावः—एतत्वम्, एतता; श्येन्या भावः—श्येतत्वम्, श्येतता । त्वत इति किम् ? पट्वीरूप्यम्, पट्वीमयम् । गुण इति किम् ? कठीत्वम्, कठीता; दत्तात्वम्, दत्ताता; कर्त्रीत्वम्, कर्त्रीता । केचित्तु जातिसंज्ञावर्जितस्य विशेषणमात्रस्य पुंवद्भावमिच्छन्ति—पाचिकायाः भावः—पाचकत्वं, पाचकता; मद्रिकायाः भावः—मद्रकत्वम्, मद्रकता; आनुकूलिक्याः—आनुकूलिकत्वम्, आनुकूलिकता; आक्षिक्याः—आक्षिकत्वम्, आक्षिकता; द्वितीयायाः—द्वितीयत्वम्, द्वितीयता; पञ्चम्याः—पञ्चमत्वम्, पञ्चमता; माथुर्याः—माथुरत्वम्, माथुरता; स्रौघ्न्याः—स्रौघ्नत्वम्, स्रौघ्नता; चन्द्रमुख्याः—चन्द्रमुखत्वम्, चन्द्रमुखता; सुकेश्याः—सुकेशत्वं, सुकेशता ।**

"सैन्याः श्रियामनुपभोगनिरर्थकत्व-
मिथ्यापवादममृजन् वननिम्नगानाम् ।
सस्नुः पयः पपुरनेनिजुरम्बराणि
जक्षुर्बिसं धृतविकाशिबिसप्रसूनाः ।। १ ।।"
[ शिशुपालवधे ४ सर्गे ]

तदवितथमवादीर्यन्ममत्वं प्रियेति
प्रियजनपरिभुक्तं यद् दुकूलं दधानः ।

"Aho Shrutgyanam"

**तदधिवसतिमागाः कामिनां मण्डनश्री**
**र्व्रजति हि सफलत्वं वल्लभालोकनेन ।। २ ।।** [माघे]
**तथा–रसवत्या धूमवत्त्वम्, भुवस्तृणवत्त्वम्, शालाया दण्डित्वमित्यादि ।। ५९ ।।**

---

**श० म० न्यासानुसन्धानम्–त्व-ते०।** त्वश्च तश्चेति त्वतं, तस्मिन् **त्व-ते** इति समाहारद्वन्द्वात् सप्तम्येकवचने रूपम् ।* प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव०* इति न्यायेन त्वतौ प्रत्ययौ गृह्येते, तौ च "भावे त्वतल्" [७. १. ५५.] इति सूत्रेण विहितौ, गुणपदं स्ववाचकपरम्, तच्च गुणिनि वर्त्तमानं पदमुपस्थापयति, साक्षाद्गुणवाचकस्य स्त्रीत्वाभावात् "शुक्लादयो गुणाः पुंसि गुणिलिङ्गास्तु तद्वति" इति स्मरणात्, तथा च गुणवचनशब्देन गुणवाचकत्वेन पूर्वं दृष्टः सम्प्रति गुणोपसर्जनद्रव्यवाची शब्दो गृह्यते, अतएव तस्य परतः स्त्रीत्वमप्युपपद्यते, तदाह-**परतः स्त्र्यनू**ङित्यादिना । **पट्व्या भावः** इति–पट्वीनिष्ठविशेष्यतानिरूपितप्रकारताश्रय इति भावः, प्रकृतिजन्यबोधे प्रकारीभूतस्यैव भावशब्दवाच्यत्वात्, अत्रार्थे "भावे त्वतल्" [ ७. १. ५५. ] इति त्वतलोः कृतयोरनेन पुंवत्त्वम् । **एतत्तेति**–पुंवद्भावात् स्त्रीप्रत्ययनिवृत्तौ तत्सन्नियोगशिष्टं नत्वमपि निवर्तते* सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः* इति न्यायात्, एवम्-**श्येतत्तेति,** एतश्येतशब्दौ गुणवचनावपि गुणिपरावेव । पदकृत्यमाह-**त्वते इति किमिति**–सामान्येन गुणवचनस्य सर्वत्र प्रत्यये परतः पुंवत्त्वमेष्टव्यमिति प्रश्नाशयः, **पट्वीरूप्यम्, पट्वीमयमिति**–पट्व्या आगतम्, पट्वीनां प्राचुर्यमित्यर्थयोः क्रमेण रूप्यमयटौ, तत्र न पुंवत्त्वमिष्टमिति तत्र पुंवत्त्ववारणाय 'त्वते' इति विशिष्य कथनीयमिति भावः । **गुण इति किमिति**–परतः स्त्रीपरं शब्दमात्रं त्वतयोः पुंवद् भवत्विति प्रश्नकर्त्तुराकूतम् । जातिसंज्ञाक्रियाशब्दानामपि तथा सति पुंवद्भावः स्यादिति प्रत्युदाहरणमुखेनाह–कठीत्वमित्यादि, अत्र कठीशब्दस्य जातिपरत्वेन "स्वाङ्गान्ङीर्जातिश्चामानिनि" [३. २. ५६.] इत्येव पुंवद्भावप्रतिषेधो यद्यपि प्राप्तस्तथापि परत्वादस्य सर्वप्रतिषेधापवादत्वाशयेन प्रत्युदाहरणं बोध्यम् । **दत्तात्वमिति** संज्ञाशब्दस्य प्रत्युदाहरणम् । **कर्त्रीत्वमिति** क्रियावाचकशब्दस्य ।

मतान्तरे क्रियाप्रवृत्तिनिमित्तस्य शब्दस्यापि गुणवचनत्वमिष्टमिति कर्त्रीत्वमित्यादौ पुंवद्भाव इष्ट एवेति शिष्यबुद्धिवैशद्यायाह-**केचित् तु जातिसंज्ञावर्जितस्येति,** तथा च 'कठीत्वम्, दत्तात्वम्' इत्येते एवेह प्रत्युदाहरणे, न तु कर्त्रीत्वमिति, तत्र तैः पुंवद्भावस्येष्टत्वात् । तथा च तेषां मते गुणवाचकपदेन विशेषणमात्रमुच्यते, भवति च कृत्तद्धितशब्दानां विशेषणत्वम्, केवलं जाति-संज्ञाशब्दयोरेव विशेषणत्वाभावात् तेषां मते प्रत्युदाहरणीया अपि प्रयोगा उदाहरणान्येव, तदाह-**पाचिकाया भावः पाचकत्वमिति**–पाचिकाशब्दः पचनक्रियानिमित्तेन स्त्रियां वर्त्तते, स च विशेषणरूप एवेति भवति गुणवचनः ।

पाणिनीये च नये संज्ञाकृदन्ततद्धितान्तसमस्तसर्वनामसंख्याशब्दातिरिक्तः शब्दो गुणवचनशब्देनोच्यते। भाष्ये च–

"सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च, सोऽसत्त्वप्रकृतिर्गुणः ।।" इति

गुणवचनलक्षणमुक्तं "वोतो गुणवचनात्" [ पा० सू० ४. १. ४४. ] इत्यादिसूत्रेषु । अस्यार्थः–सत्त्वं द्रव्यं, तत्रैव निविशते नान्यत्र तिष्ठति, एतेन सत्ताजातिर्व्यावर्त्यते, सा हि न केवलं द्रव्ये निविशतेऽपि तु गुणकर्मणोरपि, एवमपि द्रव्यत्वेऽतिव्याप्तिस्तस्यापि द्रव्ये एव निवेशादत आह–अपैतीति—सत्त्वादपगच्छत्यपीत्यर्थः, द्रव्यत्वं हि न कदाचिद् द्रव्यादपगच्छति, गुणस्तु अपगच्छत्येव, 'यथाऽऽम्रफलादौ पीततायां जातायां नीलताऽपैति। एवमपि गोत्वादिष्वतिव्याप्तिः, गोत्वादयो हि गवादिद्रव्ये निविशन्तेऽश्वादेश्च व्यावर्त्तन्त इति तद्वारणायाह—पृथग्जातिषु दृश्यते इति गोत्वं हि द्रव्यत्वावान्तरनानाजातिषु न दृश्यते गुणस्तु दृश्यते, यथा अभ्रे नीलता तथैव तृणादिष्वपीति प्रतीतेः । इत्थं पूर्वार्धेन परापरजातीनां व्यवच्छेदः, किन्तु कर्मण्यतिव्याप्तिस्तदवस्था, तद्धि द्रव्ये निविशतेऽपैति नानाजातिषु च दृश्यत इति तद्वारणायाह—आधेयश्चाक्रियाजश्च, आधेय इत्यस्य उत्पाद्य इत्यर्थः, अक्रियाजश्चेत्यस्यानुत्पाद्य इत्यर्थः, घटादौ पाकजरूपादेरुत्पाद्यत्वात्, आकाशादौ महत्त्वादेरनुत्पाद्यत्वात्, कर्म [क्रिया] तु सर्वत्रोत्पद्यत एव न क्वचिदप्यनुत्पाद्यम्, तथा च तस्य द्वैविध्याभावान्न तत्र लक्षणातिव्याप्तिः । एवमपि द्रव्यस्य गुणत्वं प्राप्नोति, अवयवि द्रव्यं ह्यवयवद्रव्येषु निविशते, असमवायिकारणसंयोगनिवृत्तौ विनाशात् ततोऽपैति, भिन्नजातीयेषु च हस्तपादादिषु दृश्यते, नित्या-ऽनित्य [उत्पाद्या-ऽनुत्पाद्य] भेदेन द्विविधं च भवति, निरवयवानामात्म-परमाण्वादीनां

"Aho Shrutgyanam"

नित्यत्वात्, सावयवानां चानित्यत्वादत आह—असत्त्वप्रकृतिरिति अद्रव्यस्वभाव इत्यर्थः। इति। एवं च जातिद्रव्यक्रियावचनातिरिक्तः शब्दो गुणवचनः। इदमेव गुणवचनलक्षणं स्वसम्मतमपीति "स्वराद्धुतो गुणादखरोः" [२. ४. ३५.] इति सूत्रे समुपन्यस्तमुक्तरीत्यैव व्याख्यातं चेति तत एवावलोकनीयम्। उक्तं जातिसंज्ञावर्जितस्य गुणवचनत्वं तु प्राचीनतरमतेन, किन्तु तेषां मते "नेष्टं पुरोद्वारवतीत्वमासीत्" इति माघप्रयोगे पुंवद्भावो दुर्वार एव, अत्र द्वारवतीशब्दस्य तद्धितान्तत्वेन जातिसंज्ञाभिन्नत्वात् प्रकृतसूत्रेण पुंवद्भावस्य दुर्वारत्वात्। यद्यपि पूर्वोक्तभाष्यानुसारिस्वमतेऽपि प्रकृते पुंवद्भावो दुर्वार एव, यतो जातिद्रव्यक्रियाशब्दातिरिक्तशब्दानां गुणवचनत्वस्यैव तेन लक्षणेन प्रतीतेरिति शङ्कितुं शक्यते, तथापि तद्व्यावृत्त्यर्थं विशेषणदानेन तन्मात्रव्यावृत्तिर्नाभिप्रेताऽपि तु यत्र प्रकृतलक्षणं घटते तत्रैव गुणवचनत्वमिति पूर्वोक्तरीत्या संज्ञा-कृदन्त-तद्धितान्त-समास-संख्याशब्दातिरिक्तशब्दो गुणवचनत्वेन गृह्यत इत्यङ्गीकारादिह दोषाभावः। न चैवं 'शरदः कृतार्थता' [भारविः] "सा मुमोच रतिदुःखशीलताम्" [कालिदासः] इत्यादिषु का गतिः, 'कृतार्था' 'रतिदुःखशीला' इत्यादीनां समासत्वेन गुणवचत्वाभावात् पुंवद्भावाप्रवृत्तौ दीर्घश्रवणापत्तेरिति वाच्यम्, तत्र सामान्यविवक्षया नपुंसकयोरेव कृतार्थ-रतिदुःखशीलशब्दयोः प्रयोगस्वीकारे क्षत्यभावात्। अस्य सूत्रस्य च तन्मते तद्धितान्तेष्वपि प्रवृत्तिस्तेषामपि जातिसंज्ञाव्यतिरिक्तत्वात्, तथा च तद्धितान्तविषयाण्युदाहरणान्याह—**मद्रिकाया भावः** इत्यादिना, **मद्रकत्व**मित्यारभ्य **आक्षिकता**पर्यन्तं तद्धितकोपान्त्यत्वनिबन्धनस्य निषेधस्यापवादोदाहरणानि। **द्वितीयत्वमि**त्यारभ्य **पञ्चमता**पर्यन्तं पूरण्या उदाहरणानि। **माथुरत्वमि**त्यारभ्य स्रौघ्नतापर्यन्तं स्वरवृद्धिहेतुतद्धितान्तोदाहरणानि। एवं समासोऽपि तन्मते गुणवचने एवेति तत्रापि पुंवत्वमित्याह—**चन्द्रमुख्या भावः** इत्यादिना, एषु "स्वाङ्गान्ङी०" इति निषेधस्यापवादः। अथैतन्मतानुकूलं कविवचनमप्युदाहरति—"**सैन्याः श्रियामनुपभोगे**त्यादि, शिशुपालवधे चतुर्थसर्गे २८ रैवतकपर्वतोपरि श्रीकृष्णसैन्यस्य गिरिणदीविहारवर्णनमेतत्। अत्र पूर्वार्धपरार्धव्यत्यास इवोपलक्ष्यते, सस्नुः पयः पपुरिति पूर्वार्धम्, सैन्याः श्रियामित्याद्युत्तरार्धं च सम्प्रति मुद्रितपुस्तकेषु दृश्यते। "सैन्याः वननिम्नगानाम् श्रियाम् अनुपभोगनिरर्थकत्वमिथ्यापवादम् अमृजन्, तमेव मिथ्यापवादमार्जनप्रकारमाह— सस्नुः, पयः पपुः, अम्बराणि अनेनिजुः, धृतविकाशिबिसप्रसूनाः सन्तः बिसं जक्षुः" इत्यन्वयः। युधिष्ठिरकरिष्यमाणराजसूयज्ञे समुपस्थातुं गच्छतः श्रीकृष्णस्य सैन्याः **वननिम्नगानां** वननदीसम्बन्धिनीनां, **श्रियां** निर्मलमधुरजलकमलादिसम्पदाम्, अनुपभोगेन—आस्वादविशेषाभिज्ञजनानुपयोगेन, यो निरर्थकत्वस्य—निष्प्रयोजनत्वस्य, मिथ्याभूतोऽपवादो—दुष्कीर्त्तिः, तम्, **अमृजन्** पर्यशोधयन्। कथमिति चेदत्राह—**सस्नुः** स्नानमाचेरुः, **पयः पपुः** जलमभ्यवजह्रुः, **अम्बराणि** वस्त्राणि, **अनेनिजुः** शुचीचक्रुः, किञ्च, धृतानि—कर्णाद्याभरणतां नीतानि, विकाशीनि—फुल्लानि, बिसप्रसूनानि—कमलानि यैस्तादृशाः सन्तः, **बिसं** मृणालदण्डं, **जक्षुः** चखदुः, इत्थं च सर्वसम्पदः सर्वथोपभोगेन, अनुपभोगनिरर्थकत्वमिथ्यापवादस्य शोधनं स्पष्टमेव।

अत्र श्रियां स्त्रीत्वेन निरर्थिकानां भावो निरर्थिकात्वमित्येव स्यात्, समासस्य यन्मते गुणवचनत्वं नास्ति तन्मतानुसारम्, प्रकृत [ केचित्तु ] प्रदर्शितमतानुसारं च भवति गुणवचनत्वमिति पुंवत्त्वं सूपपादम्। स्वमते च "शरदः कृतार्थता" इति प्रयोगप्रसंगेन—प्राक्प्रदर्शित 'सामान्ये नपुंसकम्' इति वार्त्तिकोक्तरीत्या नपुंसकनिर्देशेनैव निर्वाह इति ज्ञेयम्। प्रकृतपद्ये च पुनरुक्तिदोषः, बिसशब्दस्य द्विधोपादानात्, 'जक्षुर्बिसं धृतविकस्वरतत्प्रसूनाः' इत्येवं सर्वनाम्ना तन्निर्देश उचित इति स्पष्टं काव्यप्रकाशादौ सप्तमोल्लासे।

पुनरपि माघकविपद्यमेवोदाहरति—**तदवितथमवादीरिति**—[ ११-३३. ] अत्र तदधिवसतिमित्यस्य स्थाने मदधिवसतिमिति पाठः समुचितः इदं हि खण्डिताया नायिकाया नायकं प्रति वचनम्। कश्चिन्नायकः प्रतिदिनं तां प्रियाशब्देनाह्वयति, स चान्यकामिनीलम्पटोऽपि, कदाचित् परकामिनीसङ्गचिह्नितं वस्त्रं परिदधान एवालक्षितचिह्नो नायिकासकाशमायातः, तदा सा तं प्रमाणितपरनायिकासंसर्गं विपरीतलक्षणया मिथ्यावादिनं प्रमाणयति, "त्वं मम प्रिया, इति यत् (त्वम्) अवादीः तत् अवितथम्, यत् (यस्मात्) प्रियजनपरिभुक्तं दुकूलं दधानः, मदधिवसतिम्, आगाः, हि वल्लभालोकनेन कामिनां मण्डनश्रीः सफलत्वं व्रजति "इत्यन्वयः। 'त्वं मम **प्रिया** वल्लभा' इति यत् त्वं मत्सविधे, **अवादीः** पूर्वं कतिधाऽचीकथः, तत् **अवितथं** सत्यमित्यद्य विज्ञातम्; **यत्** यस्मात् **प्रियजन-**

"Aho Shrutgyanam"

**परिभुक्तं** प्रियेण जनेन--मत्प्रतिनायिकया, परिभुक्तं--त्वदङ्गपरिभोगपरम्परया ; उपयुक्तं--तदङ्गसर्सर्गसौरभादिविशिष्टं, दुकूलं दधान एव, **मद्भिवसतिं** मन्निवासगृहम्, **आगाः** आगतवानसि; अयमेव तव तद्वचनसत्यताबीजम्। कथमिति चेदत्राहार्थान्तरन्यासेन--**कामिनां**--कामिनीजनमनोऽनुकूलचारिणां, **मण्डनश्रीः** अलङ्करणशोभा, वल्लभायाः--प्रियायाः, आलोकनेन--तत्कर्तृकप्रत्यक्षीकरणेन, **सफलत्वं** साफल्यं सार्थक्यं, **व्रजति** गच्छति। स्वप्रियाजनमनोविनोदार्थमेव कामिन आत्मानं मण्डयन्ति, तन्मण्डनं यदि प्रियया न प्रत्यक्षीकृतं तर्हि तदीयनैरर्थक्यमेव, प्रत्यक्षीकृतं चेत् सार्थक्यम्। तथा च तदङ्गसङ्गिवाससा आत्मानं मण्डितं मन्यमानस्त्वं तद्दर्शनाय तथैव मद्वसतिमायात इति मम प्रियात्वं त्वया साधु प्रमाणितमिति शब्दार्थः। विपरीतलक्षणया च त्वं मम प्रियेति यत् त्वमवादीस्तत् सर्वं मिथ्यैव, यदि तवाहं प्रिया स्यां तर्हि मत्सपत्नीसङ्ग एव त्वया न कृतः स्यात्, कृतोऽपि चेन्मम मनः सन्तोषाय यथासाध्यं तद्गोपनमुचितम्, तदकृत्वा निशङ्कं तदङ्गसङ्गिवासः परिदधान एव यत् त्वमत्रागतस्तेन त्वया मम द्वेष्यात्वमेव प्रकटितमिति प्रथमोक्तं सर्वं मिथ्यैवेति ध्वन्यते। अत्र-सफलत्वमिति सफलाया भाव इत्यर्थकम्, तत्र सफलाशब्दस्य गुणवचनशब्दत्वे सत्येव पुंवद्भावः सिध्येदिति जातिसंज्ञाव्यतिरिक्तस्य विशेषणमात्रस्य गुणवचनत्वमिति मते एव संगच्छते। स्वमते च सामान्ये नपुंसकमिति परिहारः स्मर्त्तव्यः। प्रयोगान्तराण्यपि तदनुसारीणि दर्शयति--**तथा रसवत्या धूमवत्त्वमि**त्यादि--रसवती-महानसम्, तस्या धूमवत्त्वं--धूमवत्या भावः, अत्र धूमवतीति तद्धितान्तस्य पुंवद्भावः। एवं--**भुवस्तृणवत्त्वमि**त्यत्र तृणवत्या भाव इत्यर्थात् तृणवतीशब्दस्य तद्धितान्तस्य पुंवद्भावः। **शालाया दण्डित्वमित्य**त्र दण्डिनीशब्दस्य पुंवद्भाव इति सर्वं तन्मतानुकूलमेव। स्वमते च पूर्वोक्तैव व्यवस्था विज्ञेयेति ॥ ३-२-५९ ॥

## च्वौ क्वचित् । ३. २. ६० ॥

**त० प्र०--परतः स्त्री अनूङ् च्वौ पुंवद्भवति, क्वचित्--लक्ष्यानुरोधेन। अमहती महती भूता--महद्भूता कन्या, एवं--बृहत्कृता; क्वचिद्ग्रहणादगोमती गोमतीभूता--गोमतीभूतेत्यादौ न स्यादेव; पट्वीभूता पटूभूता, मृद्वीकृता मृदूकृतेत्यादौ विकल्पः। महतीभूतेत्यपि केचित् ॥ ६० ॥**

**श० म० न्यासानुसन्धानम्--च्वौ०।** पुंवदित्यनुषज्यते। च्विः प्रत्ययः "कृभ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्वे च्विः" (७-२-१२६.) इति सूत्रेण विहितः, तस्मिन् परतः स्त्रियाः क्वचिदेव पुंवत्त्वमिष्टम्, तदिष्टस्थलनिर्णयश्च लक्ष्यदर्शनाधीन इत्याह--**लक्ष्यानुरोधेने**ति, तथा च प्रामाणिकलक्ष्यमनुरुध्य क्वचित् पुंवद्भावो नित्यं, क्वचिद् विकल्पेन, क्वचिन्नेति सूत्रतात्पर्यम्। तथा चोदाहरणेषु स्पष्टीकरोति--**महद्भूता कन्ये**त्यादिना, अत्र स्वमते नित्यमेव पुंवद्भावः, उक्तसूत्रेणैव च्विस्तस्मिन् परे महतीशब्दस्य पुंवद्भावान्महद्भूतेति। प्रकृतविग्रहादिकमतिदिशति--**एवं**--**बृहत्कृते**ति--अबृहती बृहती कृतेति विग्रहः। एतादृशप्रयोगाणां, च्वौ च, इत्येतावतैव, पूर्वसूत्रे च्विग्रहणेन वा सिद्धिरिति क्वचिदित्यस्यानर्थक्यमित्याशङ्कामपाकरोति--**क्वचिद्ग्रहणादि**ति--अत्र गोमद्भूतेति न भवतीत्येव क्वचिद्ग्रहणस्य फलमिति भावः। न केवलं क्वचिदप्रवृत्तिरेव क्वचिद्ग्रहणस्य फलमपि तु क्वचिद् विकल्पेन प्रवृत्तिरित्यपीत्याह--**पट्वीभूता पटूभूता; मृद्वीकृता, मृदूकृतेत्यादौ विकल्पः** इति, एषु पुंवद्भापक्षे च्विनिमित्तको दार्घोऽपि। केचित् तु क्वचिदप्रवृत्तिं क्वचिद् विकल्पं चेच्छन्ति, न तु क्वचिन्नित्यमिति तन्मतेनाह-- **महतीभूतेत्यपि केचित्** पाणिनीये च नैतादृशं वचनमुपलभ्यते, तन्मते च्वौ **क्वचिदपि पुंवत्त्वं न भवति** ॥ ३-२-६० ॥

## सर्वादयोऽस्यादौ । ३. २. ६१ ॥

**त० प्र०--'सर्वादिर्गणः परतः स्त्री पुंवत् भवति, अस्यादौ'--स्यादिश्चेत् ततः परो न भवति। सर्वासां स्त्रियः--सर्वस्त्रियः, भवत्याः पुत्रः--भवत्पुत्रः, एकस्याः क्षीरम्--एकक्षीरम्, एकस्या आगतम्--एकरूप्यम्, एकमयम्, तया प्रकृत्या--तथा, एवं--यथा; तस्यां वेलायां--तदा, एवं--यदा, कदा, सर्वदा, अन्यदा; तर्हि, यर्हि; कर्हि; सर्वामिच्छति--'सर्वकाम्यति, भवत्काम्यति', एककाम्यति। परत्वात् प्रतिषेधविषयेऽपि भवति--सर्वा प्रियाऽस्य--सर्वप्रियः, एवं--सर्व-**

"Aho Shrutgyanam"

**मनोज्ञः, सर्विका भार्याऽस्य–सर्वकभार्यः, एवं–विश्वकभार्यः । सर्वादय इति किम् ? कन्यापुरम्, कुमारीनिवासः। अस्यादाविति किम् ? सर्वस्यै, दक्षिणपूर्वस्यै, उत्तरपूर्वस्यै । बहुवचनं व्याप्त्यर्थम्, तेन भूतपूर्वसर्वादेरपि भवति–दक्षिणोत्तरपूर्वाणाम् इत्यादि ॥ ६१ ॥**

---

**श० म० न्यासानुसन्धानम्-सर्वादयो० । सर्वादिर्गणः** इति––सर्वादिगणे पठितः परतः स्त्रीशब्द इत्यर्थः' गण इति कथनेन यादृशानां गणे पाठस्तादृशानामेव प्रधानप्रसिद्धस्वीयसर्वार्थवाचिनामेव प्रकृतसूत्रेऽपि ग्रहणमिति सूचितम् । **अस्यादावि**ति न पर्युदासः, किन्तु प्रसज्यप्रतिषेध इत्याह- **स्यादिश्चेत् ततः परो न भवती**ति–स्यादौ पुंवत्त्वं न भवतीत्यर्थः, पर्युदासे स्वीकृते तु* पर्युदासः सदृग्ग्राही *इति न्यायेन स्यादिभिन्ने स्यादिसदृशे प्रत्यये परत एव पुंवत्त्वं स्यान्न तु उत्तरपदे परत इति तद्वारणायैव प्रसज्यप्रतिषेधपरतया व्याख्यानम्, एवं च प्रत्ययभिन्ने उत्तरपदेऽपि परतः पुंवत्त्वं सिध्यति । तथा चोदाहरति- **सर्वासां स्त्रियः** इति–एकार्थे इति नेह सम्बध्यते लक्ष्यानुरोधादिति सूचयितुं सर्वासामिति षष्ठयन्तेन विग्रहप्रदर्शनम् । तथाच यथाकथंचित् सर्वादिगणपठितः परतः स्त्रीवाचकः शब्दोऽनेन पुंवत् क्रियते । अत एवान्ये वैयाकरणाः सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इतीच्छन्ति । **भवत्पुत्रः** इति––पुंवद्भावे सति भवतः पुत्रो–भवत्पुत्रः, भवत्या वा पुत्रो–भवत्पुत्र इति विशेषनिश्चयः प्रकरणाधीन एव, एषा च रीतिः प्रायोऽसमानाधिकरणेन समासे सर्वत्रैव ज्ञेया । **एकक्षीरमि**त्यादौ तु अर्थवशादपि, नहि पुंसः क्षीरेण तादृशः सम्बन्धो यादृशः स्त्रियाः । प्रत्ययेऽप्युदाहरति- **एकरूप्यमि**त्यादि । **तया प्रकृत्या** इति– "प्रकारे था" [७. २. १०२.] इति था प्रत्ययः, तत्र प्रकारशब्दः स्वार्थपरो न तु स्वस्वरूपपर इति यत्र प्रकारार्थः स्त्रीत्वेन विवक्ष्यते तत्र तन्निरूपकः तत्समानाधिकरणः शब्दोऽपि स्त्रीलिंग एव स्यादिति तस्य प्रत्यये परतः पुंवद्भावात् तथेत्येव रूपं, न तु स्त्रीप्रत्ययविशिष्टम् । प्रकृतविग्रहवाक्यमन्यत्राप्यतिदिशति- **एवं-यथे**ति । **तस्यां वेलायामि**ति–समयार्थे [कालार्थे] "किम्-यत्-तत्-सर्वैकाऽन्यात् काले दा" [७. २. ९५.] इति दा विधीयते, तदर्थस्य स्त्रीत्वेनोपस्थितौ स्त्रीवाचकेभ्य एवैतेभ्यो दा प्रत्ययः स्यादिति पुंवद्भावे सत्येव तदेत्यादिरूपं भवतीति भावः । एवं नामधातुस्थलेऽपि प्रवृत्तिमुदाहरति- **सर्वकाम्यती**त्यादिना पूर्वं यत्र पुंवद्भावः प्रतिषिद्धस्तत्राप्ययं प्रवर्त्तत इत्याह- **परत्वात् प्रतिषेधविषयेऽपी**ति–"नाप्प्रियादौ" [३. २. ५३.] इत्यादयः पुंवद्भावप्रतिषेधास्तेषां विषयेऽपि परत्वादनेन पुंवद्भावो भवतीति भावः, प्रतिषेधाः सर्वाद्यतिरिक्ते कल्याणीप्रिय इत्यादौ लब्धावकाशाः, प्रकृतसूत्रं च भवत्पुत्र इत्यादौ, सर्वा प्रिया यस्य सा-सर्वप्रिय इत्यादौ चोभयोः प्राप्तिरिति "स्पर्धे" [७. ४. ११९.] इति परिभाषाबलात् परत्वात् तत्रायं पुंवद्भावः प्रवर्त्तते । किञ्च* अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा* इति न्यायेनानन्तरस्य "परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्" [३. २. ४९.] इत्यादिशास्त्रस्यैव स प्रतिषेधो न तु व्यवहितस्यास्य सूत्रस्येत्येतद्विषये तत्प्रतिषेधाप्राप्तिरेवेत्यपि विज्ञेयम् । मनोज्ञाशब्दोऽपि प्रियादिरेवेत्याह- **एवं-सर्वमनोज्ञः** इति । **सर्विका भार्या यस्ये**त्यादौ तु तद्धितकोपान्त्यत्वनिमित्तः प्रतिषेधः प्राप्तः सोऽप्यनेन परत्वादेव बाध्यते । पदकृत्यमाह–**सर्वादय इति किमि**ति–अविशेषेण सर्वेषामेव स्याद्यतिरिक्ते परतः पुंवद्भावो विधेय इति प्रश्नाशयः । प्रत्युदाहरति- **कन्यापुरमि**ति, अत्र पुंवद्भावो नेष्टस्तद्वारणाय सर्वादेरित्यावश्यकमिति भावः । यद्यपि कन्याशब्दः स्वत एव स्त्रीलिंगो न तु परतः क्वापि, स्त्रिया अन्यत्र तादृशशब्दस्य प्रयोगाभावात्, तथाप्याबन्तस्यास्य तद्रहितरूपमपि संभाव्यत इत्याशयेन प्रत्युदाहरणम् । यद्वाऽत एवारुचेः प्रत्युदाहरणान्तरमाह- **कुमारीनिवासः** इति– कुमारशब्दोऽस्ति पुंलिङ्गेऽपि प्रसिद्ध इति भवति पुंवद्भावप्रसङ्गः, स माभूदित्येतदर्थं सर्वादय इत्यावश्यकमितिभावः । **अस्यादाविति किमि**ति–सर्वत्र सर्वादीनां पुंवद्भावो विधीयतामिति प्रश्नाशयः । प्रत्युदाहरति– **सर्वस्यै, दक्षिणपूर्वस्यै** इत्यादि, अयमाशयः-अस्यादावित्यस्याभावे सर्वादीनां स्यादौ स्त्रियां विहितं कार्यमेव व्यर्थं स्यात्, क्वापि स्त्रियां तेषामवर्त्तनादिति तत्सार्थक्यायास्यादाविति कर्त्तव्यमिति भावः, 'सर्वस्यै' इति सर्वाशब्दस्य चतुर्थ्येकवचने रूपम्, 'दक्षिणपूर्वस्यै' इति दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दिक्–दक्षिणपूर्वा, तस्यै इति विग्रहे साधु, अत्र दक्षिणाशब्दस्य पुंवद्भावस्तु भवत्येव, तस्य स्याद्यव्यवहितपूर्वत्वाभावात्, पूर्वशब्दस्यैव पुंवद्भावोऽनेन 'अस्यादौ' इति कथनेन व्यावर्त्यते । न चात्र स्याद्युत्पत्तितः पूर्वमेव पुंवद्भावः प्रवर्त्ततां तस्यामवस्थाया-

"Aho Shrutgyanam"

मस्यादाविति निषेधाप्रवृत्तेरिति वाच्यम्, स्यादिपरत्व-संभावनायामपि निषेधप्रवृत्तेर्दुर्वारत्वात् । तथा च विषय-सप्तम्यपीयमिति विज्ञातव्यम्, अन्यथाऽस्यादावित्यस्य वैयर्थ्यं स्यादेव, 'उत्तरपदे' इति यद्यपि प्रकृतं तथापि तदत्र प्रकरणे न सम्बध्यत इति पूर्वमुक्तमेव, तथा चोत्तरपदे इत्यनुवर्त्तनादेव 'सर्वस्यै, दक्षिणपूर्वस्यै' इत्यादौ वारणमिति न वाच्यम्, "रिति" "त्व-ते गुणः" "च्वौ क्वचित्" इति सूत्राणामत्र चास्यादाविति कथनस्य सार्थक्यायोत्तरपदा-सम्बन्धस्यावश्यमभ्युपेयत्वात्, अत एव च यथेत्याद्युदा-हरणसंगतिः । आक्रोशे गम्यमाने "षष्ठ्याः क्षेपे" [३.२.२९.] इति ङसोऽलुपि 'अस्याः- पुत्रः' इत्यादौ पुंवद्भावार्थ-मस्यादावित्यावश्यकमिति न तत्सामर्थ्यादिहोत्तरपदे इत्यस्य सम्बन्धाभावः प्रतिपादयितुं शक्यते, तत्र विभक्त्या व्यव-धानादुत्तरपदपरत्वाभावादेव पुंवद्भावाऽप्रवृत्त्या तदर्थम-स्यादावित्यस्य प्रयोजनाभावात् । किञ्च नैकमुदाहरणं [सामान्यं] योगारम्भं प्रयोजयतीति वचनेन तावन्मात्रा-र्थत्वे विशिष्य ङसीत्येव ब्रूयात् । न च सर्वादीनामाबन्तानां ङितां यै-यास्-यास्-यामां ङस्पूर्वत्वविधानस्य "सर्वादेर्डस्-पूर्वाः" [१.४.१८.] इति सूत्रानुसारस्य वैयर्थ्येनैव 'सर्वस्यै, दक्षिणपूर्वस्यै' इत्यादौ पुंवद्भावाप्रवृत्तौ सिद्धायाम-स्यादाविति व्यर्थमेवेति वाच्यम्, तावता ङित्सु पुंवद्भा-वप्रवृत्तेर्वारणेऽपि विभक्त्यन्तरे तत्प्रवृत्तेर्वारणे निमित्ता-भावात् सर्वत्र पुंवदेव रूपं स्यादिति तद्वारणायास्यादेरित्य-स्यावश्यकत्वात् । "सर्वादिरस्यादौ" इत्येवमेकवचनान्त-पाठ एवोचितो बहुवचनेन निर्देशो व्यर्थ इति चेदत्राह– **बहुवचनं व्याप्त्यर्थमि**ति–व्याप्तिः सर्वत्र सर्वादिविषये प्रवृत्तिः, सैवार्थः प्रयोजनं यस्य तथाभूतमित्यर्थः । तत्फल-माह– **तेन भूतपूर्वसर्वादेरपि भवती**ति, अयमाशयः–सर्वा-दिकार्यस्य विद्यमानसर्वादित्ववत्येव प्रवृत्तिर्भवति, अत एव संज्ञोपसर्जनीभूतानां न सर्वादित्वप्रयुक्तं कार्यं तेषां सर्वत्र प्रयोक्तुमुचितत्वरूपसर्वादित्वस्याभावात्, एवं यत्र सर्वादित्वं निषिध्यते, यथा–"न सर्वादिः" [१.४.१२.] इति सूत्रेण द्वन्द्वे सर्वादित्वं निषिध्यते, तत्रापि सर्वादित्व-प्रयुक्तं कार्यं न भवति, प्रकृतं सर्वादित्वप्रयुक्तकार्यं [पुंवत्त्वं] तु यथा विद्यमानसर्वादित्ववतो भवति तथा भूतपूर्वसर्वादेरपि यथा स्यादित्येतदर्थमेव बहुवचनमिति । तदेवाह–**दक्षिणोत्तरपूर्वाणामि**ति–दक्षिणाचोत्तरा च पूर्वा चेति द्वन्द्वः, अत्र दक्षिणोत्तराशब्दयोस्तु पुंवद्भावो भवत्येव, स न स्यात्, यतः "न सर्वादिः" [१.४.१२.] इति सूत्रेण द्वन्द्वे सर्वादित्वं निषिध्यते, व्याप्त्यर्थत्वस्याश्रयणे तु ❀ साम्प्रतिकाभावे भूतपूर्वगतिः❀ इति न्यायस्याश्रयणाद् द्वन्द्वप्रवृत्तेः पूर्वं तेषु सर्वादित्वसत्त्वात् तदादायैव सत्यपि द्वन्द्वे तन्निषेधे प्रवर्त्तते पुंवद्भाव इति ॥ ३. २. ६१ ॥

## मृगक्षीरादिषु वा । ३. २. ६२॥

त० प्र०–मृगक्षीरादिसमासशब्देषु परतः स्त्रीलिङ्ग-मनेकार्थेऽस्त्र्यर्थे चोत्तरपदे, पुंवद् वा भवति । मृग्याः क्षीरं–मृगक्षीरम्, मृगीक्षीरम्; एवं–मृगपदम्, मृगीपदम्; मृग-शावः, मृगीशावः; कुक्कुटाण्डम्, कुक्कुट्यण्डम्; मयूरा-ण्डम्, मयूर्यण्डम्; काकाण्डं, काक्यण्डम्; काकशावः, काकीशावः । पुं-स्त्रीलिङ्गपूर्वपदभेदेन समासविवक्षायां सूत्रानारम्भे मृगक्षीरादयो न सिध्यन्ति; मृगक्षीरादयः प्रयो-गतोऽनुसर्तव्याः ॥ ६२ ॥

श० म० न्यासानुसन्धानम्—मृग० । उत्तरपद-प्रत्ययादिनिमित्तौ पुंवद्भावभावाऽभावौ प्रतिपाद्य प्रतिपदं तद्भावाऽभावप्रतिपादकमिदं सूत्रम् । अत आह–**मृगक्षी-रादिसमासशब्देष्वि**ति । एवमादयः समासा ये प्रयुक्ता-स्तेषूभयथा प्रयोगदर्शनात् पुंवद्भावो भवत्यपि न वा भवति, स्त्र्येकार्थे उत्तरपदे तु पुंवद्भावो नित्यमेव भवतीति तद-तिरिक्त एवास्य सूत्रस्य विषय इत्याह– **अनेकार्थेऽस्त्र्यर्थे चोत्तरपदे** इति– एष च पूर्वसूत्रानुरोधाल्लभ्यते, न तु केनापि पदेनोपस्थाप्यत इति न शब्दार्थोऽपि त्वार्थिकोऽर्थः । **मृग्याः क्षीरमि**ने– मृगक्षीरमिति प्रयोगो दृश्यते, न च मृगस्य क्षीरेण सह जन्यजनकभावः सम्बन्धोऽस्तीति मृग्या एव क्षीरमिति पुंवद्भावं विना प्रकृतप्रयोगासिद्धिरेव । ननु मृगस्य क्षीरमिति पुंस्त्रीभेदरहितजातिमात्रविवक्षायां मृगक्षीरशब्दस्य, मृग्याः क्षीरमिति स्त्रीत्वविशिष्टजाति-विवक्षायां मृगीक्षीरमित्युभयोः शब्दयोः सिद्धिः स्यादेवेति सूत्रमिदमनर्थकमिति चेदत्राह–**पुंस्त्रीलिङ्गपूर्वपदभेदेने**-त्यादि, सूत्राभावे पुंलिङ्गपूर्वपदेन मृगक्षीरमिति न सिध्यति पुंसः क्षीरेण सह जन्यजनकभावसम्बन्धाभावात्, मृग्याः क्षीरमिति स्त्रीलिङ्गेन पूर्वपदेनापि मृगक्षीरमिति न सिध्यति पुंवद्भावाप्राप्तेः समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे एव

"Aho Shrutgyanam"

पुंवद्भावविधानात्, एवं च मृगीक्षीरमित्यादीनां सिद्धावपि मृगक्षीरमित्यादीनां सिद्ध्यर्थं सूत्रमिदमावश्यकमिति समुदितार्थः।

पाणिनीये तन्त्रे तु मृगक्षीरादीनां सिद्ध्यर्थं "कुक्कुट्या दीनामण्डादिषु" इति वार्तिकमारभ्यते "पुंवत् कर्मधारय-जातीयदेशीयेषु" [पा. सू. ६. ३. ४२.] इति सूत्रे। तच्च भाष्यकृता प्रत्याख्यातम्, तथाहि– तत्रत्यो ग्रन्थः–"न वाऽस्त्रीपूर्वपदविवक्षितत्वात्' [वा०], न वा वक्तव्यम्, किं कारणम्? अस्त्रीपूर्वपदविवक्षितत्वात्, नाऽत्र स्त्रीपूर्वपदं विवक्षितम् किं तर्हि? अस्त्रीपूर्वपदं विवक्षितम् उभयोरण्डमुभयोः पदमुभयोः शावः। यद्यपि तावदत्रैतच्छक्यते वक्तुम्, इह तु कथं मृग्याः क्षीरं मृगक्षीरमिति। अत्राऽपि 'नवाऽस्त्रीपूर्वपदविवक्षितत्वात्' इत्येव। कथं पुनः सतो नामाऽविवक्षा स्यात्?। सतोऽप्यविवक्षा भवति, तद्यथा–अलोमिकैडका, अनुदरा कन्येति; असतश्च विवक्षा भवति, तद्यथा–समुद्रः कुण्डिका, विन्ध्यो वर्धितकमिति" इति।

अयमाशयः–'कुक्कुटाण्डम्, मृगपदम्, काकशावः' इत्यादिषु पुमानेव वृत्तिवाक्यविषयः–'कुक्कुटस्य अण्डम्, मृगस्य पदम्, काकस्य शावः' इत्येव वाक्यम्, पुलिंगेनैव पूर्वपदेन समासः अण्डादिना उभयोर्जन्यजनकभावसम्बन्धस्य, स्वस्वामिभावसम्बन्धस्य वा सत्त्वात्। कुक्कुट्या अण्डमिति स्त्रीलिंगेन विग्रहे तु वाक्यमेव, कुक्कुट्यण्डमित्यादयो न भवन्ति समासा अनभिधानात्। अस्तु वाऽभिधानसत्त्वे कुक्कुट्यण्डमित्यादिसमासोऽपि। एवं कुक्कुटाण्डमित्यादि-पूर्वोक्तप्रयोगेषु निर्वाहसम्भवेऽपि मृग्याः क्षीरं मृगक्षीरमिति न सिद्ध्यति, मृगस्य [पुंसः] क्षीरेण सह तथाविधसम्बन्धासम्भवादित्यपि न वक्तव्यम्, अत्रापि स्त्रीत्वस्याविवक्षया जात्यन्तरसम्बन्धनिवृत्तिमात्रप्रयोजनाय मृगजातिसम्बन्धिक्षीरमिति सामान्यविवक्षायां मृगक्षीरादीनां सिद्धेः। स्त्रीत्वविवक्षायां तु वाक्यमेव समासो वा सत्यभिधाने। यद्यपि जातिमात्रविवक्षायामपि स्त्रीत्वं सदेव, तथाऽप्यनुदरा कन्येत्यादिव्यवहारवत् सतोऽपि स्त्रीत्वस्याविवक्षा विज्ञेया। दृष्टा च क्वचिदसतोऽपि विवक्षा, यथा असदेव कुण्डिकात्वं समुद्रे,असदेव समुद्रत्वं कुण्डिकायामारोप्य समुद्रः कुण्डिकेति प्रयोगः क्रियते। यथा वा असदेव विन्ध्य [पर्वत] त्वं वर्धितके [हैयङ्गवीने] आरोप्य विन्ध्यो वर्धितकमिति प्रयोगः क्रियते। तथा च सत्त्वमसत्त्वं वा विवक्षाधीनं, न तु वस्तुस्थितिनिघ्नम्। एवं च क्षीरेण सह सतोऽपि स्त्रीसम्बन्धस्याविवक्षया मृगक्षीरादीनां सिद्धिः स्यादेवेति न तदर्थं वचनमारब्धव्यमिति। स्वमते तु विवक्षितेऽपि स्त्रीत्वे मृगक्षीरादीनां सिद्धये सूत्रमारब्धमिति पूर्वं प्रतिपादितमेव। मृगक्षीरादयो न नामतो निर्दिष्टा इति केषामादिशब्देन संग्रह इति सन्देहे आह– **मृगक्षीरादयः प्रयोगतोऽनुसर्त्तव्याः** इति–शिष्टप्रयोगानुसारमेव मृगक्षीरादयो विज्ञेया इति भावः॥ ३-२-६२॥

---

## ऋदुदित्-तर-तम-रूप-कल्प-ब्रुव-चेलट्-गोत्र-मत-हते वा ह्रस्वश्च। ३. २. ६३॥

**त० प्र०– ऋदिदुदिच्च परतः स्त्रीलिङ्गशब्दस्तरादिषु प्रत्ययेषु, ब्रुवादिषु च स्त्र्येकार्थेषूत्तरपदेषु ह्रस्वाऽन्तः पुंवच्च वा भवति। तर–पचन्तितरा, पचत्तरा, पचन्तीतरा; श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा; विदुषितरा, विद्वत्तरा, विदुषीतरा; तम–पचन्तितमा, पचत्तमा, पचन्तीतमा; श्रेयसितमा, श्रेयस्तमा श्रेयसीतमा; विदुषितमा, विद्वत्तमा, विदुषीतमा; रूप–पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा; श्रेयसिरूपा, श्रेयोरूपा, श्रेयसीरूपा; विदुषिरूपा, विद्वद्रूपा, विदुषीरूपा; कल्प–पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा; विदुषिकल्पा, विद्वत्कल्पा, विदुषीकल्पा; ब्रुव–पचन्ती चासौ ब्रुवा च पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा; श्रेयसिब्रुवा, श्रेयोब्रुवा, श्रेयसीब्रुवा; विदुषिब्रुवा विद्वद्ब्रुवा, विदुषीब्रुवा; चेलट्–टित्करणं ङ्यर्थम्–पचन्ती चासौ चेली च–पचन्तिचेली, पचच्चेली, पचन्तीचेली; श्रेयसिचेली, श्रेयश्चेली, श्रेयसीचेली; विदुषिचेली, विद्वच्चेली, विदुषीचेली; गोत्र–पचन्ती चासौ गोत्रा च–पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा; श्रेयसिगोत्रा, श्रेयोगोत्रा, श्रेयसीगोत्रा; विदुषिगोत्रा, विद्वद्गोत्रा, विदुषीगोत्रा; मत–पचन्ती चासौ मता च–पचन्तिमता, पचन्मता, पचन्तीमता; श्रेयसिमता, श्रेयोमता, श्रेयसीमता; विदुषिमता, विद्वन्मता, विदुषीमता; हत–पचन्ती चासौ हता च–पचन्तिहता, पचद्धता, पचन्तीहता; श्रेयसिहता, श्रेयोहता, श्रेयसीहता; विदुषिहता, विद्वद्धता, विदुषीहता; एवं–सुदतितरेत्यादि। ब्रुवादयः कुत्साशब्दाः "निन्द्यं कुत्सनै०" [३. १. १००.] इति च समासः। ऋदुदिदिति किम्? कुमारितरा, किशोरितरा; किशोरितमा। एकार्थ इत्येव–**

**पचन्त्याहता--पचन्तीहता, विदुष्याहता—विदुषीहता । तरादिष्विति किम् ? पचत्पाशा, विद्वद्वृन्दारिका ॥६३॥**

**श० म० न्यासानुसन्धानम्—ऋदुदित्० ।** ऋदु**दिदि**ति प्रथमान्तं 'परतः स्त्री' इत्यस्य विशेषणम्, तदाह—**ऋदिदुदिच्च परतः स्त्रीलिङ्गशब्दः** इति— यद्यपि पचन्तीत्यादीनां शब्दानां न ऋदित्त्वम्, यतोऽत्र प्रत्ययस्यैव तत्त्वम्, शतृप्रत्यये एव ऋकार इद् भवति, तथापि 'ऋदित्' शब्दस्य विशेषणत्वेन "विशेषणमन्तः" [ ७-४-११३ ] इति परिभाषया तदन्तग्रहणात् 'ऋदिदन्त उदिदन्तश्च परतः स्त्रीवाचकः शब्दः' इत्यर्थाश्रयणे दोषाभावः, भवति हि 'पचत्'शब्दस्य ऋदिदन्तत्वम्, ऋदित् 'अत्' इति सोऽन्तेऽस्येति तत्त्वाक्षतेः। अत्र तरादयः प्रत्ययाः ब्रुवादीनि शब्दस्वरूपाणि प्रायो वृत्तिविषये निन्दापराण्येव । अत्र सूत्रे वा ग्रहणं पुंवदित्यनेनैव सम्बध्यते, न तु ह्रस्वेनापीति परेषां मतस्य निराकरणाय वाशब्दमन्ते योजयति वृत्तौ--**ह्रस्वान्तः पुंवच्च वा भवती**ति । क्रमश उदाहरति--**पचन्तितरे**त्यादिना, 'पच्' धातोः पाकार्थस्य वर्त्तमानायां शतृप्रत्यये कृते पचदिति रूपं, ततः स्त्रियां पचन्तीति रूपमिति भवति तस्य ऋदिदन्तप्रकृतिकत्वात् तत्त्वम् । यद्यपि तरादिप्रत्ययविषयेऽपि तदन्तविधिना 'तराद्यन्ते उत्तरपदे' इत्यर्थ आशङ्कितुं शक्यते, भवति च तथा सति ब्रुवादिना सहैकरूपेणैवान्वयः, सम्प्रति हि प्रत्ययेषु परतः ब्रुवादिषु चोत्तरपदेष्विति विभज्य वाक्यं क्रियते, तरादिषु तदन्तविधौ सति च तराद्यन्ते ब्रुवादौ चोत्तरपदे परत इत्येकदैवोत्तरपदस्य समानाधिकरण्येनोभाभ्यामन्वये लाघवम्; तथापि तथा न व्याख्यातम्, यतः* उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्* इति न्यायेन प्रकृते तदन्तविधिर्न शक्यते कर्तुम्, अत्र न्याये मानं च "हृदयस्य हृल्लासलेखाण्ये" [३-२-९४] इति सूत्रे लेखग्रहणम्, तत्र हि लेखेत्यणन्तस्य ग्रहणमिति व्याख्यातम्, अण्प्रत्ययोऽपि सूत्रे पठ्यते, ततश्च अणन्तत्वेनैव लेखस्य ग्रहणे सिद्धे पुनर्लेखग्रहणं व्यर्थीभूतमुक्तन्यायज्ञापकमिति न्यायार्थसिन्धौ विस्तरशः प्रतिपादितम्। प्रकृतन्यायज्ञापने च तदीय [लेखग्रहण] सार्थक्यमिव प्रकृतेऽपि तदन्तविध्यभावान्न तराद्यन्ते उत्तरपदे सूत्रप्रवृत्तिरपि तु प्रत्ययमात्रे इत्याशयेनाह--**तर— पचन्तितरे**ति—इयमनयोरतिशयेन पचन्तीति विग्रहः, पुंवद्भावपक्षे च ह्रस्वप्रवृत्तेरसंभवात् तदभावपक्षमेव पूर्वं ह्रस्वप्रवृत्तिनिर्देशायोदाहरति, ह्रस्वाभावे पुंवत्वे— **पचत्तरे**ति, उभयोरभावे-**पचन्तीतरे**ति । **श्रेयसितरे**ति—इयमनयोरतिशयेन प्रशस्येति—श्रेयसी, सैवेति स्वार्थेऽत्र तरः "क्वचित् स्वार्थे" [७. ३. ७.] इत्यनुशासनात्, इदमुदिदन्तस्योदाहरणम्, इयसोरुदित्वात् । **विदुषितरे**त्याद्यप्युदिदन्तस्यैव, क्वसोरुदित्वात् । **पचन्तिरूपे**ति—प्रशस्ता पचन्तीति विग्रहे "त्यादेश्च प्रशस्ते रूपप्" [७. ३. १३.] इति रूपप् ह्रस्वादि पूर्ववत् । **पचन्तीकल्पा** ईषदसमाप्ता पचन्तीति विग्रहः "अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्" [७. ३. ११.] इति कल्पप् । अथ ब्रुवादिषूदाहरति- **पचन्तिब्रुवा** ब्रवीतीत्यर्थेऽचि प्रकृतसूत्रे निपातनाद् गुणाभावे उवादेशः, स्त्रियामाप्, ह्रस्वादि पूर्ववत् । चेलशब्दोऽपि लिहाद्यजन्त एव, टित्त्वं सूत्रे निपात्यते स्त्रियां ङ्यर्थं, तदाह— **टिद्वचनं ङ्यर्थमि**ति—"अणञेयेकण्-नञ्-स्नञ्-टिताम्" [२. ४. २०.] इति सूत्रविहितङीप्रत्ययसिद्ध्यर्थमित्यर्थः । ब्रुवादयो निन्दावचना इति पूर्वमुक्तमेव । गवोपपदात् त्रायतेः "आतो डोऽह्वा-वामः" [५. १. ७६] इति डे गोत्रशब्दो व्युत्पाद्यते, परमसावपि निन्दायामेव प्रयुज्यते। मन्यतेः सत्यर्थे क्ते मतशब्दो व्युत्पाद्यते, सोऽपि निन्दावचन एवेह वृत्तिस्वाभाव्यात् । हतशब्दो हन्तेः क्ते सिद्धः, स च पापादिगणपठित इति तस्य "निन्द्यं कुत्सनैरपापाद्यैः" [३. १. १००.] इति सूत्रे पर्युदस्तत्वान्न तेन समासो भवति, ततश्च हतशब्दस्य विशेषणत्वेन विशेषणसमासे पूर्वनिपातापत्तिः 'हतविधिः' इत्यादिवत्, किन्तु प्रकृतसूत्रेण हतशब्दे परे पुंवदादिविधानसामर्थ्यादेव निन्द्यसमासः, तथा च निन्द्यस्यैव पूर्वनिपातः । तद्धित-कृत्प्रत्ययसम्बन्धि ऋदुदितमुदाहरणमुक्त्वा समासान्तप्रत्ययसम्बन्धि ऋदितोऽप्युदाहरणं पूर्वोक्तप्रकारेणैवेत्यतिदिशति-**एवं-सुदतितरे**त्यादीति—शोभना दन्ता यस्या असौ सुदती, इयमनयोरतिशयेन सुदतीत्यादिविग्रहः । ब्रुवादिविषये समासविधायकसूत्रं वक्तुं ब्रुवादीनां कुत्सावाचकत्वमाह-**ब्रुवादयः कुत्साशब्दाः** इति । **ऋदुदिति किमि**ति—सामान्येनैव सर्वेषां परतः स्त्रीलिङ्गशब्दानामनेन पुंवद्भावो ह्रस्वश्च विधीयतामिति प्रश्नाशयः, **कुमारितरे**ति—तथा सतीहापि विकल्पेन पुंवत्त्वं स्यादिष्यते तु नेति भावः, ह्रस्वस्तूत्तरसूत्रेण नित्यमेव विधास्यते, तथा चैकमेव रूपम्, ऋदुदिदित्यस्याभावे तु रूपत्रयं स्यात्।

"Aho Shrutgyanam"

**एकार्थ इत्येवे**ति--समानाधिकरणे उत्तरपदे एव भवति नान्यत्रेति भावः। व्यावर्त्यमाह--**पचन्त्या हते**त्यादि--इह हतशब्दो न कुत्सावाची किन्तु भूतकालिकहिंसाकर्मीभूतार्थक एव। **तरादिष्विति किमि**ति--प्रत्ययविशेषोपादानं किमर्थमिति प्रश्नः। **पचत्पाशा** अत्र निन्दायां पाशप् प्रत्ययः, निन्दिता पचन्तीति विग्रहः, अत्र च नित्यमेव पित्तद्धितनिमित्तकः पुंवद्भावो भवति "क्यङ्मानिपित्तद्धिते"---[३. २. ५०.] इति सूत्रेण। प्रत्ययप्रत्युदाहरणमुक्त्वोत्तरपदप्रत्युदाहरणमाह–**विद्वद्वृन्दारिके**ति--वृन्दारिकाशब्दः प्रशंसावचनः, विदुषी चासौ वृन्दारिकेति विग्रहः, "वृन्दारक-नाग-कुञ्जरैः" [३. १. १०८.] इति समासः, "परतः स्त्र्यनूङ्०" [३. २. ४९.] इति पुंवद्भावः, अत्रापि ह्रस्व-पुंवत्त्वयोर्विकल्पो नेष्टः, तद्वारणार्थं तरादिग्रहणमावश्यकमिति भावः। पाणिनीये तन्त्रे काशिकादिवृत्तिकारैरपि पुंवद्भावो ह्रस्वश्च विकल्पेन विधीयते, परं भाष्यादिप्रामाणिकग्रन्थकर्तारः पुंवद्भावमेव वैकल्पिकमिच्छन्ति, ह्रस्वं नित्यमेव स्वीकुर्वते, तेषां मते पुंवद्भावाभावे ह्रस्वः प्रवर्त्तत इति विद्वत्तरा विदुषितरेत्याद्येव रूपं भवति। स्वमते च रूपत्रयमिति प्रकृतसूत्रविषये मदभेदो विज्ञेयः ॥ ३. २. ६३ ॥

## ङ्यः ।३. २. ६४।

त० प्रा०--**ङ्यन्तस्य परतः स्त्रीलिङ्गस्य तरादिषु प्रत्ययेषु, ब्रुवादिषु चोत्तरपदेषु एकार्थेषु ह्रस्वोऽन्तादेशो भवति। गौरितरा, गौरितमा, नर्तकिरूपा, कुमारिकल्पा, ब्राह्मणिब्रुवा, गार्गिचेली, ब्राह्मणिगोत्रा, गार्गिमताः, गौरिहता। परत्वाद्यथाप्राप्तं पुंवद्भावं बाधते। ङ्य इति किम्? मद्रिकातरा, कारिकातमा, दत्तारूपा, सेनानीरूपा, ग्रामणीकल्पा। परतः स्त्रिया इत्येव-'बदरीतरा, आमलकीतरा। एकार्थ इत्येव-'ब्राह्मणीहता। "नवैकस्वराणाम्" [३. २. ६६.] इत्युत्तरत्र वचनादनेकस्वरस्यैवायं विधिः ॥ ६४ ॥**

**श० म० न्यासानुसन्धानम्--ङ्यः।** ऋदुदिद्वर्जं पूर्वसूत्रं विकल्परहितमनुवर्त्तते, पुंवदिति च निवृत्तं पूर्वसूत्रे ह्रस्वश्चेति चकारेणानुकृष्टस्य तस्योत्तरत्र प्रवृत्तेरनौचित्यात् ❀ चानुकृष्टं नोत्तरत्र❀ इति न्यायात्, तथा च प्रकृतसूत्रेण ह्रस्व एव केवलं विधीयते, सोऽपि नित्यमेवैति लभ्यते। तथा च सूत्रार्थमाह–**ङ्यन्तस्ये**त्यादिना–ङीः प्रत्ययस्ततस्तस्य तदन्तग्राहकत्वस्यौचित्यात् 'ङ्यन्तः परतः स्त्रीलिङ्गशब्दः इत्यर्थलाभः। **गौरितरे**ति–इयमनयोरतिशयेन गौरी–गौरवर्णा इति विग्रहः। इयमासामतिशयेन गौरीति **गौरितमे**त्यस्य विग्रहः। प्रशस्ता नर्त्तकी–**नर्त्तकिरूपा**। ईषदसमाप्ता कुमारी–**कुमारिकल्पा**। ब्राह्मणी चासौ गोत्रा–**ब्राह्मणिगोत्रा**। गार्गी चासौ मता–**गार्गिमता**। आत्मानं गार्गीं मन्यते न तु तथा, निन्दितत्वादिति भावः, न त्वयं विग्रहः। गौरी चासौ हता–**गौरिहता**। प्रकृतसूत्रविषये पिदादिनिमित्तः पुंवद्भावः कर्मधारयनिमित्तश्च प्राप्नोति स कथं न क्रियत इत्याशङ्कायामाह–**परत्वाद् यथाप्राप्तं पुंवद्भावं बाधते** इति, अयमाशयः–दर्शनीयतरेत्याद्याबन्तेषु पुंवद्भावः पिन्निमित्तः सावकाशः, विद्वद्वृन्दारिकेत्यादिकर्मधारये च, नर्त्तकिरूपेत्यादौ कोपान्त्यत्वनिमित्तकपुंवद्भावप्रतिषेधात् प्रकृतसूत्रं सावकाशम्, कुमारितरेत्यादौ तूभयोः, प्राप्तिः, तत्र यदि पुंवद्भावः स्यात् तदास्य प्रवृत्तिप्रयोजनमेव नास्ति, अस्मिन् प्रवृत्तेऽपि यदि पुंवद्भावः स्यात् तदापि नैतत्प्रवृत्तिसार्थक्यं सति ह्रस्वेऽसति वा विशेषाभावादित्युभयोर्विरोधात् स्पर्धः, तत्र च "स्पर्धे" [७. ४. ११९.] इति परिभाषया परत्वादिदमेत्र प्रवर्त्तत इति ❀ सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव❀ इति न्यायात् पुनः पुंवद्भावो न भवति। **यथाप्राप्तमि**ति–प्राप्तं प्राप्तिः, तदनतिक्रमेण–यथाप्राप्तमिति, यत्र येन सूत्रेण प्राप्तं पुंवत्त्वं तत् सर्वमनेन बाध्यत इत्यर्थः। **गौरितरा गौरितमे**त्यादौ पिन्निमित्ता, अन्यत्र कर्मधारयनिमित्ता प्राप्तिः, **नर्त्तकीरूपे**त्यादौ कोपान्त्यत्वनिमित्तः प्रतिषेध एव प्राप्तः, **ब्राह्मणिब्रुवे**त्यादौ "स्वाङ्गान्ङी०" [३. २. ५६.] इति प्रतिषेधस्तु न शङ्क्यः "पुंवत् कर्मधारये" [३. २. ५७.] इत्यस्य प्रतिषेधनिवृत्त्यर्थत्वस्योक्तत्वात्। **ङ्य इति किमि**ति–सामान्येनैव परतः स्त्रियास्तरादिषु ह्रस्वो विधेय इति प्रश्नार्थः। **मद्रिकातरे**ति–अत्र पिन्निमित्तः पुंवद्भावस्तद्धितकोपान्त्यनिमित्तेन प्रतिषेधेन वारित इति ह्रस्वः स्यात्, **कारिकातमे**त्यत्राकनिमित्तः प्रतिषेधः, **दत्तारूपे**त्यत्राख्यानिमित्तः, सेनानीग्रामणीशब्दयोस्तु पुंस्यपि यथास्थितमेव रूपमिति नात्र पुंवद्भावकृतो विशेषः, सेनादिनायकत्वस्य स्वभावतः पुंधर्मत्वेऽपि परतः स्त्रीत्वं सेनानी-ग्रामणीशब्दयोः संभवत्येवेति



"Aho Shrutgyanam"

भवति ह्रस्वप्राप्तिः, ङय इति कथने तु पूर्वेषु आबन्तत्वेन, **सेना**नीत्यादौ धातुरूपस्यैव तथात्वेन नात्र भवति ह्रस्वः। **परतः स्त्रिया इत्येवे**ति–परतः स्त्रिया एवानेन ह्रस्वो भवति, न तु स्वतः [नित्यं] स्त्रीलिङ्गस्येति भावः। तत्फलमाह—**बदरीतरे**ति—बदरी–वृक्षविशेषः, स नित्यं स्त्रीलिङ्ग एवेति तस्यापि ह्रस्वत्वे बदरितरेति स्यात्, बदर्याः स्त्रीत्वं तु स्त्रीलिङ्गाधिकारे "शिंशपाद्या नदी–वीणा–ज्योत्स्ना–चीरी–तिथी–धियाम्" [लिं० स्त्री०३] इत्यादिवचनात् बदरीशब्दस्य शिंशपादौ पाठात्। **आमलकीतरे**ति–आमलकशब्दो यद्यपि त्रिलिङ्गस्तथापि तस्य स्वतस्त्रिलिङ्गेषु पाठः, तथाहि–"भल्लातक आमलको हरीतकबिभीतकौ" [लिं० स्वतस्त्रिलिङ्ग–प्र. ३] इति वचनम्' तथा च स्त्रियामपि स्वत एव प्रयोगो न तु विशेष्यपारवश्यात्, तथा चात्रापि न भवति ह्रस्वः, परतः स्त्रिया ग्रहणाभावे तु स्यादेव। एकार्थे उत्तरपदे इत्यप्यवश्यमेवानुवर्त्तनीयमित्याह––**एकार्थ इत्येवे**ति––यत्रोत्तरपदे परे ह्रस्वो विधेयस्तस्योत्तर–पदस्य पूर्वपदेन सहैकार्थ्यमावश्यकमिति भावः। तदभावे दोषमाह-**ब्राह्मण्या हता-ब्राह्मणीहते**ति––अत्र ब्राह्मणीकर्तृकहननकर्मीभूतेत्यर्थ इति न पूर्वोत्तरपदयोः सामानाधिकरण्यमिति न भवति ह्रस्वः, "एकार्थे" इत्यस्यासम्बन्धे च स्यादेव। अत्र सर्वेषामनेकस्वराणामेव परतःस्त्रीलिङ्गशब्दानामुदाहरणस्य कारणं शिष्यबुद्धिवैशद्याय स्फोरयति––**नवैकस्वराणामित्युत्तरत्रे**ति––"नवैकस्वराणाम्" [ ३. २. ६६. ] इत्युत्तरसूत्रेणैकस्वराणां ङ्यन्तानां यथाकथंचित् स्त्रियां वर्त्तमानानां विकल्पेन ह्रस्वो विधीयते, स चास्मात् पर इति स्वविषये प्रकृतसूत्रं बाधिष्यत इति परिशेषादस्य सूत्रस्यानेकस्वरेष्वेव प्रवृत्तिरिति भावः॥ ३. २. ६४.॥

## भोगवद्गौरिमतोर्नाम्नि॥ ३. ६. ६५॥

**त० प्र०—भोगवद्गौरिमतोर्नाम्नि-संज्ञायां वर्तमानयोर्ङीप्रत्ययस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेष्वेकार्थेषु ह्रस्वो भवति। भोगवतितरा, गौरिमतितरा, भोगवतितमा, गौरिमतितमा, भोगवतिरूपा, गौरिमतिकल्पा, भोगवतिब्रुवा, गौरिमतिचेली, भोगवतिगोत्रा, गौरिमतिमता भोगवतिहता। नाम्नीति किम्? भोगवतितरा, भोगवत्तरा, भोगवतीतरा, एवं––गौरिमतितरेत्यादि, उदित्त्वात्पूर्वेण त्रैरूप्यम्॥ ६५॥**

**श० म० न्यासानुसन्धानम्-भोगवद्०।** ङय इति पूर्वतोऽनुवृत्तम्, **भोगवद्-गौरिमतोरि**ति तस्यैव विशेषणम्, तथा च तत्सम्बन्धिङीप्रत्ययस्येत्यर्थो लभ्यते, **नाम्नी**ति च तयोरेव विशेषणं, न तु तत्सहितसमासस्य, तेन सह सूत्रस्थपदस्यास्य सम्बन्धासंभवात्। भोगाः सर्पफणाः सन्त्यस्याम्, सर्पशरीराण्यपि भोगशब्देनोच्यन्ते, लघुन्यासे– भोगाः सर्पकञ्चुकाः इत्युक्तम्, तत्र [कञ्चुके] भोगशब्दस्य शक्तिरप्रसिद्धा––

"पालनेऽभ्यवहारे च योषिदादिभृतावपि।
भोगः सुखे धने चाहेः शरीर-फणयोरपि॥"

इति लिङ्गानुशासनधृतवचने तद्वाचित्वस्याकथनात्। न च नदीविशेषे कुतः फणानां सत्ता, ते हि सर्पाणामेव शरीरे स्युरिति वाच्यम्, सर्पद्वारा नद्या अपि तद्वत्त्वे बाधकाभावात्, अत्र भोगशब्दान्मतुः, "अनजिरादिबहुस्वरशरादीनां मतौ" [३. २. ७८.] इति दीर्घे––भोगावतीति भवति, प्रकृतसूत्रे ह्रस्वनिर्देशादेव भोगवतीति ह्रस्वमध्यः पाठः। गौरीति प्रसिद्धमेव, गौरशब्दाद् गौरादित्वान्ङ्या सिद्धम्, ततोऽपि मतौ स्त्रियां गौरीमतीति प्राप्ते "ङ्यापो बहुलं नाम्नि" [८. ४. ९९.] इति ह्रस्वः, ताभ्यां, तरपि प्रकृतसूत्रेण ह्रस्वत्वे––**भोगवतितरा, गौरिमतितरे**त्यादि। **नाम्नीति किमि**ति– भोगवती-गौरिमतीशब्दयोरुदिदन्तत्वेन पूर्वेणैव सिद्धिरिति नाम्नि विशिष्य ह्रस्वविधानार्थं प्रकृतसूत्रमेव किमर्थमिति प्रश्नाशयः। नाम्नोऽन्यत्र पूर्वेण त्रैरूप्यं भवति, प्रकृतसूत्रं च नाम्नि केवलं ह्रस्वमेव विदधत् पुंवत्त्वस्य ह्रस्ववैकल्पिकत्वस्य चाभावार्थमिति फलसत्त्वेन पृथक् सूत्रमिदमावश्यकमिति प्रत्युदाहरणमुखेनोत्तरयति–**'भोगवतितरा, भोगवत्तरा, भोगवतीतरे**ति––अत्र हि भोगवच्छब्दो न नामापि तु भोगाः सुखादयः सन्त्यस्या इति विग्रहवशाद् विशेषणभूतः परतः स्त्रीलिङ्गः, पूर्वत्र तु नित्यस्त्रीलिङ्गो नदीविशेषस्य नामत्वात्, तथा च नामभिन्ने उदिदन्तत्वनिमित्तकं त्रैरुप्यमेव पुंवद्भाव-ह्रस्वयोर्विकल्पात् तच्च नाम्नि नेष्टमिति 'नाम्नि' इति पदघटितमिदं सूत्रमावश्यकमिति भावः। एतदर्थकं सूत्रं पाणिनीये तन्त्रे नोपलभ्यते, प्राचां तन्त्रे तु श्रूयते॥ ३. २. ६५.॥

"Aho Shrutgyanam"

## नवैकस्वराणाम् ।। ३. २. ६६ ।।

त० प्र०—बहुवचनात् परतः स्त्रीति निवृत्तम्, सामान्येन तु विधानम्; स्त्र्येकार्थे इत्यनुवर्तते । एकस्वरस्य ङ्यन्तस्य तरादिषु प्रत्ययेषु, ब्रुवादिषु चोत्तरपदेषु स्त्र्येकार्थेषु ह्रस्वोऽन्तादेशो वा भवति । स्त्रितरा, स्त्रीतरा; ज्ञस्य भार्या ज्ञी, ज्ञितमा, ज्ञीतमा; अस्यापत्यं स्त्री-ई, इरूपा, ईरूपा; कस्य भार्या-की, किकल्पा, कीकल्पा; ज्ञिब्रुवा, ज्ञीब्रुवा; इचेली; ईचेली किगोत्रा, कीगोत्रा; स्त्रिमता, स्त्रीमता; स्त्रिहता, स्त्रीहता । एकस्वराणामिति किम्? कुटीतरा, द्रुणीतमा, आमलकीतरा, बदरीतमा; कुवलीरूपा । ङ्य इत्येव श्रीतरा, ह्रीतमा, धीरूपा । एकार्थ इत्येव स्त्रिया हता-स्त्रीहता । नित्यदितामनेकस्वराणामपीच्छन्त्येके तन्मते-आमलकितरा, बदरितमा, कुवलिरूपा, लक्ष्मिकल्पा तन्त्रितरेत्याद्यपि भवति ।। ६६ ।।

---

श० म० न्यासानुसन्धानम्-नवै० । नवैकस्वरस्येति एकवचनप्रयोगेऽपि सूत्राणां स्वत एव व्यापकत्वेन सकलैकस्वरस्थले प्रवृत्तेरव्याहतत्वेन बहुवचनेन निर्देशो व्यर्थ इति शङ्कायामाह—**बहुवचनात् परतः स्त्रीति निवृत्तमिति**- बहुवचनस्य व्याप्त्यर्थत्वं बहुशो व्याख्यातम्, तत्र प्रकरणवशाल्लब्धस्य परतः स्त्रीलिङ्गशब्दस्यैव सूत्रविषयत्वे प्राप्ते सकलैकस्वरपरतःस्त्रीलिङ्गशब्देष्वेव सूत्रस्य प्रवृत्तिः स्यान्न तु परतः स्त्रीलिङ्ग-स्वतःस्त्रीलिङ्गादिसर्वविधैकस्वरविषये इति तादृशव्यापकविषयतालाभार्थं सूत्रे बहुवचनं निर्दिष्टमिति बोध्यमिति भावः । परतः स्त्रीत्यस्य निवृत्तौ केन रूपेणोद्देश्यतेति जिज्ञासायामाह—**सामान्येन तु विधानमिति**-सामान्यतो ङ्यन्तस्यैकस्वरस्यानेन ह्रस्वो विधीयत इति भावः । **स्त्र्येकार्थे इत्यनुवर्त्तते** इति–अतिप्रसङ्गनिवृत्त्यर्थं स्त्रीवाचिनि समानाधिकरणे उत्तरपदे इत्यस्य सम्बन्धस्त्वावश्यक इति भावः । तथा च निष्पन्नं सूत्रार्थमाह-**एकस्वरस्य ङ्यन्तस्ये**त्यादिना। **स्त्रितरा स्त्रीतरेति**–स्त्यायतोऽस्यां शुक्रशोणिते इत्यर्थे स्त्यायतेरौणादिकेन प्रत्ययेन 'स्त्र' शब्दो निष्पद्यते, ततो ङ्यां–स्त्रीति एकस्वरो ङ्यन्तः, तस्य तरादिषु ब्रुवादिषु च वैकल्पिके ह्रस्वत्वे-स्त्रितरेत्यादि । **ज्ञितमा** जानातीति ज्ञः, तस्य भार्या इत्यथ धवयोगे ङीः, ततस्तमबादौ ज्ञितमेत्यादि । **अस्यापत्यं स्त्रीति**–'अकारो वासुदेवः स्यात्' इत्येकाक्षरकोषानुसारम् 'अ' शब्दो विष्णुवाची, अन्यार्थोऽपि स इति श्रूयते, अकारः सर्वनामेति प्रसिद्धेः, ततोऽपत्यार्थे इञि अकारस्य लुपि इरिति, ततः स्त्रियां ङीः, ईति, ततः प्रशस्ते रूपपि आपि—**ईरूपेति**, ह्रस्वे-**इरूपा** । कस्य भार्येति—को ब्रह्मा, धवयोगे ङीः, तत ईषदसमाप्ते कल्पप् । एषु ह्रस्वविकल्पपक्षे पुंवत्त्वं पित्रिमित्तं कर्मधारयनिमित्तं वा न भवति, एषां सर्वेषामाख्यारूपत्वात् "तद्धिताककोपान्त्यपूरण्याख्याः" [ ३.२.५५ ] इति निषेधात् । 'ईरूपा' इत्यादौ पुंवत्त्वे ह्रस्वपक्षे च रूपसाम्यमेवेति न पुंवद्भावप्रवृत्तिफलम् । **एकस्वराणामिति किमिति**—"शेषस्य नवा" इत्यादिरूपमेव सूत्रं क्रियाताम् येन पूर्वसूत्राभ्यामवशिष्टस्य परतः स्त्रीरूपस्य वा सर्वस्य शब्दस्य तरादिषु ब्रुवादिषु च विकल्पेन ह्रस्वो भवेदिति प्रष्टुराशयः । **कुटीतरे**त्यादि, कुटी-द्रुणी-आमलकी-बदरी-कुवलीशब्दाः स्वतः स्त्रीलिङ्गा अनेकस्वराः, तेषामप्येवं सति विकल्पेन ह्रस्वः स्यात्, एकस्वराणामिति कथने तु एषामनेकस्वरत्वान्न भवति ह्रस्वः, पूर्वसूत्रे तु "परतः स्त्री" इति भणनादेषु ह्रस्वो नैव भवति । **ङ्य इत्येवेति**—एकस्वराणामिति बहुवचनेन परतः स्त्रीत्यस्य निवृत्तावपि पूर्वसूत्रात् ङ्य इत्यवश्यं सम्बन्धनीयमिति भावः । तत्फलमाह—**श्रीतरे**त्यादि—श्री—ह्री-धी-शब्दा न ङ्यन्ता अपि तु क्रुदन्ता एव, श्रयतीति—श्रीः, ह्रिणीते इति—ह्रीः, ध्यायतीति धीरिति विग्रहे क्विबन्ता एते सिद्ध्यन्तीत्येतेषु धातुसम्बन्ध्येवेकारो न तु ङीकृत इत्येषां केनापि सूत्रेण ह्रस्वो नेष्टः, ङ्य इत्यस्याभावे तु स दुर्वारः स्यादेकस्वरत्वेन प्रकृतसूत्रप्रवृत्तेः, स्वतः स्त्रीलिङ्गेष्वपि प्रकृतसूत्रप्रवृत्तेः स्वीकृतत्वात् । 'एकार्थे उत्तरपदे' इत्यपि स्वीकरणीयमेवेत्याह— **एकार्थ इत्येवे**ति । व्यावर्त्यमाह—**स्त्रिया हता—स्त्रीहते**ति—अत्र स्त्रीशब्दो न हतशब्देनैकार्थः, स्त्री हननकर्त्री, तत्कर्मीभूता चान्या, ततोऽत्र ह्रस्वव्यावृत्त्यर्थम् 'एकार्थे' इत्यावश्यकमिति भावः । मतान्तरमाह— **नित्यदितामनेकस्वराणा**मिति—नित्यं दितः—दकारेत्संज्ञका 'दै-दास्-दास्-दामः' आदेशा येषां ते नित्यदितः—नित्यस्त्रीलिङ्गा, "स्त्रीदूतः" [ १. ४. २०. ] इति सूत्रेण नित्यस्त्रीलिङ्गादीदूदन्तात् परेषां ङितां वचनानां पूर्वोक्तादेशानां नित्यं विधानात् । तादृशानामनेकस्वराणामपि केचित् वैकल्पिकं ह्रस्वमिच्छन्ति, तेषां मते च वृक्षेऽर्थे आमलकीशब्दोऽपि नित्यस्त्रीलिङ्ग इति तन्मतसाधारण्येनैवाह—

"Aho Shrutgyanam"

**तन्मते—आमलकितरेत्याद्यपीति**—तन्मते पाक्षिको ह्रस्व एषु भवत्येवेत्यर्थः । पाणिनीये मते च नैतद् दृश्यते, तन्मते स्वमतवदेकस्वराणामेव स्त्रीलिङ्गानां ङ्यन्तानां वैकल्पिक ह्रस्वविधानात् ॥ ३.२. ६६ ॥

## ऊङः । ३ । २. ६७ ॥

**त० प्र०–ऊङन्तस्य तरादिषु प्रत्ययेषु, ब्रुवादिषु चोत्तरपदेषु स्त्र्येकार्थेषु वा ह्रस्वो भवति । ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा, वामोरुतमा, वामोरूतमा; मद्रबाहुरूपा, मद्रबाहूरूपा, कमण्डलुकल्पा, कमण्डलूकल्पा, कद्रुब्रुवा, कद्रूब्रुवा, पङ्गुचेली पङ्गूचेली श्वश्रुगोत्रा, श्वश्रूगोत्रा, कुरुमता, कुरूमता, भीरुहता, भीरूहता । एकार्थ इत्येव–भीर्वा हता–भीरूहता ॥ ६७ ॥**

**श० म० न्यासानुसन्धानम्—ऊङः ।** ऊङ्प्रत्ययः स्त्रियाम् "उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ्" [२. ४. ६.३.] इत्यादिसूत्रेण विहितः, सोऽपि न परतः स्त्रिया एवापि तु नित्यस्त्रिया अपि विधीयते । प्रत्ययत्वेन तस्य तदन्तग्राहकतेत्याह-**ऊङन्तस्येत्यादि** । **ब्रह्मबंधुतरेति**–ब्रह्मा-ब्राह्मणो बन्धुरस्येति व्युत्पत्त्या ब्रह्मबंधुशब्दो विप्राचाररहिते निन्द्यकर्मकारिणि जात्या विप्रे प्रयुज्यते, ततः स्त्रियाम् "उतोऽप्राणिनः०" [२.४. ६३.] इति ऊङि–ब्रह्मबन्धूः, अतिशयेन सा–ब्रह्मबन्धूतरा, अत्र वैकल्पिको ह्रस्वः । **वामोरुतरा** वामे–सुन्दरे ऊरू यस्याः सा वामोरूः "उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणा-द्यूरोः" [२. ४. ७५.] इति ऊङ्, ततोऽतिशयार्थे तरप्, अनेन वैकल्पिको ह्रस्वः । **मद्रबाहुतरा**–मद्रबाहुशब्दात् "बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि" [२. ४. ७४.] इत्यूङ्, ततस्तरप् । **कमण्डलुकल्पा** कमण्डलुशब्दात् प्राणिविशेषवाचकात् स्त्रियां पूर्वोक्तसूत्रेणोङ्, तत ईषदसमाप्ते कल्पप् । कद्रूशब्दोऽपि तथैव सिध्यति, कद्रूशब्दश्च नागमातृवाची । **पङ्गुचेली** पङ्गुशब्दो "नारी सखी पङ्गू श्वश्रू" [२. ४, ७६.] इति सूत्रेण निपातितः, तस्य चेलीशब्देन सह निन्द्यसमासः, श्वश्रूशब्दोऽपि तेनैव सूत्रेण श्वशुरस्य स्त्रियां निपातितः । कुरूः भीरूरिति च "उतोऽप्राणिनः०" [२. ४. ७३.] इति सूत्रेणोङन्तौ, सर्वत्रैषु निन्द्यसमासो वैकल्पिको ह्रस्वश्च । **एकार्थ इत्येवेति** व्याख्यातपूर्वम् । भीर्वा कर्व्या हता–'**भीरूहतेति**–अत्र ह्रस्ववारणार्थमेकार्थ इत्यस्यावश्यकत्वमिति भावः ॥ ३, २. ६७. ॥

## महतः कर-घास-विशिष्टे डाः ।३. २. ६८॥

**त० प्र०—करादिषूत्तरपदेषु महतो डा इत्ययमन्तादेशो वा भवति । वैयधिकरण्ये इयं विभाषा, सामानाधिकरण्ये तु परत्वादुत्तरेण नित्य एव विधिः । महतः करः–महाकरः, महत्करः, कर एव कार इति–महाकारः, महत्कारः; महाघासः, महद्घासः, महाविशिष्ठः, महद्विशिष्टः । महत इति किम् ? राजकरः । करादिष्विति किम् ? महतः पुत्रः–महत्पुत्रः । डकारोऽन्त्यस्वरादिलोपार्थः, स च उत्तरार्थः ॥ ६८ ॥**

**श० म० न्यासानुसन्धानम्—महतः० । 'करघासविशिष्टे'** इति समाहारादेकत्वम्, 'उत्तरपदे' इति चानुवर्त्तत एव मण्डूकप्लुत्या, तच्च करादिभिः सामानाधिकरण्येनान्वेति । तदाह–**करादिषूत्तरपदेष्विति** । **'डा' इत्ययमन्तादेशः** इति–अन्त्यस्य तकारस्य स्थाने डा आदेशः, डकार इत् । वाग्रहणानुवृत्तेश्च वैकल्पिकोऽयं विधिः । पाणिनीये च नित्य एव दृश्यते, सोऽपि भाष्यमते स्त्रीलिङ्गस्यैवेति स्फुटीकरिष्यतेऽग्रिमसूत्रे । उत्तरत्र "जातीयैकार्थेऽच्वेः" [ ३. २. ७०. ] इति सूत्रेण सामान्यत एवोत्तरपदे डाविधानादस्य वैयर्थ्यमाशङ्क्याह- **वैयधिकरण्ये इयं विभाषेति**–तत्र सूत्रे 'एकार्थे' इति भणनात् समानाधिकरण उत्तरपद एव तस्य प्रवृत्तिः, इदं सूत्रं च व्यधिकरणे उत्तरपदे विकल्पेन डाविधानार्थं क्रियत इति भावः । **महतः कर** इति षष्ठीसमासः, डाविधौ **महाकरः** इति, तदभावे–**महत्करः** इति । **कर एव कारः** इति–स्वार्थिकेऽणि कारशब्दोऽपि करशब्दवदिह सूत्रे ग्राह्य इति भावः,*एकदेशविकृतमनन्यवत्*इति न्यायेन कारस्यापि ग्रहीतुमर्हत्वात्, करो-हस्तो राजग्राह्यं द्रव्यं वा । घासो-बालतृणम्, महतां घास इति विग्रहः । विशिष्टः-पार्थक्येन गणनार्हः, महतां मध्ये विशिष्ट इत्यर्थे–**महाविशिष्टः** इति । **महत इति किमिति**–सामान्येनैषूत्तरपदेषु पूर्वपदस्य डा विधीयतामिति प्रश्नाशयः । वस्तुतस्तु तथा सति पूर्वोक्तस्य ङ्य इत्यस्यै-

"Aho Shrutgyanam"

वानुवृत्त्या ङ्यन्तस्यैव डाः स्यादिति समाधानं वाच्यम्, यक्षानुरूपो बलिरिति न्यायेनासमञ्जसस्य प्रश्नस्य यथाकथंचिदुत्तरं विधेयमित्याशयेनाह-**राजकरः** इति-करस्य राज्ञैव सह स्वस्वामिभावसम्बन्धप्रसिद्धेर्वा प्रत्युदाहरणमिदम्, अत्रापि डाविधाने राजाकर इति स्यादिति तद्वारणाय महत इत्यावश्यकमुत्तरत्रानुवृत्त्यर्थं चेति भावः। **करादिष्विति किमिति**—सामान्यत उत्तरपदे एव डा विधेय इति भावः, करादिनिवृत्तिस्तु *अपेक्षातोऽधिकारः* इति न्यायात् भविष्यतीत्याशयः। **महतः पुत्रः** इति-अत्र न भवत्यात्वमिति तद्वारणाय करादिग्रहणमावश्यकमिति भावः। अन्त्यस्याकारादेशे समानदीर्घे च महाकर इत्यादिसिद्धौ डित्त्वविधानमादेशस्य व्यर्थमित्याशङ्कायामाह-**डकारोऽन्त्यस्वरादिलोपार्थः** इति "डित्यन्त्यस्वरादेः" [२-१-११४.] इति सूत्रेणान्त्यस्वरादेः 'अत्' इत्यस्य लोपविधानार्थं डित्त्वमिह कृतमिति' भावः। तथापि प्रकृते तस्य वैयर्थ्यमेव, विनाप्यन्त्यस्वरादिलोपेन समानदीर्घेण रूपसिद्धेरुक्तत्वादत आह-**स चोत्तरार्थः** इति-प्रकृतेऽन्त्यस्वरादिलोपस्यानावश्यकत्वेऽपि "स्त्रियाम्" इत्युत्तरसूत्रेण महतीशब्दान्तस्य 'आ' विधाने महदाकर इत्यादिरूपं स्यादिति तत्रान्त्यस्वरादिलोपेन महाकर इत्यादिरूपाणां सिद्ध्यर्थमादेशस्य डित्त्वमावश्यकमिति लाघवानुरोधेनैव तादृशो निर्देशः कृत इति भावः, कृते च डित्त्वे प्रकृतेऽपि यद्यन्त्यस्वरादिलोपः क्रियते तर्हि समानदीर्घविधानं नावश्यकमिति प्रक्रियालाघवमपि विज्ञेयम्॥ ३. २. ६८॥

## स्त्रियाम्। ३. २. ६९॥

**त० प्र०—स्त्रियां वर्तमानस्य महतः करादिषूत्तरपदेषु नित्यं डा अन्तादेशो भवति। महत्याः करः—महाकरः, एवं महाघासः, महाविशिष्टः। *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति पूर्वेणैव सिद्धे नित्यार्थमिदम्॥६९॥**

**श० म० न्यासानुसन्धानम्—स्त्रियाम्।** पूर्वसूत्रं सर्वमनुवर्त्तते, तत्रत्यस्य महत इति पदस्य स्त्रियामिति विशेषणम्, तदाह—**स्त्रियां वर्त्तमानस्य महतः** इति-स्त्रीप्रत्ययविशिष्टस्य महच्छब्दस्येत्यर्थः। **महत्याः करः** इति-इहापि पूर्वसूत्रोक्ता वैयधिकरण्येन समासे प्रवृत्तिरेष्टव्या, अन्यथा* लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं, न तु लाक्षणिकस्य* इति न्यायेन महच्छब्दमुच्चार्य विधीयमानः "सन्महत्परमोत्तमोत्कृष्टम्०" (३. १. १२८) इति समासएव ग्रहीष्यते, यथा "प्रमाणीसंख्याड्डः" (७. ३. १२८.) इति सूत्रे संख्याशब्दमुच्चार्य विशिष्य विहितः "सुज्वार्थे संख्या०" (३.१.१९) इति समास एव गृह्यते न तु "एकार्थं चानेकं च" (३. १. २२) इति सामान्यसूत्रविहितः, महच्छब्दमुच्चार्य विहितः समास एव ग्राह्य इतीदृशो नियमोऽग्रिमसूत्रेऽपि न स्वीक्रियत इति च प्रतिपादयिष्यते तत्रैव, तथा च षष्ठीसमासे व्यधिकरणे उत्तरपदेऽपि प्रकृतसूत्रप्रवृत्तिः। पूर्वसूत्रेणैव *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* इति न्यायसहकारेण स्त्रियामपि डासिद्धिरिति प्रकृतसूत्रस्य वैयर्थ्यमाशङ्क्याह-**नित्यार्थमिदमिति,** अयमाशयः--सत्यमेतत् यत् नामग्रहणे-नामविशेषमुच्चार्य कार्यविधौ लिङ्गविशिष्टस्य-लिङ्गबोधकप्रत्ययसहितस्यापि ग्रहणं भवतीत्यर्थकेन *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* इति न्यायेन पूर्वसूत्रेणैव महत्याः कर इत्यादिविग्रहेऽपि डाः सिद्ध एवेति, परं तत् सूत्रं विकल्पेन डाविधानं करोति, प्रकृतसूत्रं च नित्यत्वेन डाविधानार्थं पृथगारब्धमिति।

पाणिनीये च तन्त्रे "आन्महतः समानाधिकरण-जातीययोः" [६. ३. ४६] इति सूत्रे 'महदात्वे घास-करविशिष्टेषूपसंख्यानं पुंवद्भावश्च' इति वार्तिकं पठ्यते, तेन महच्छब्दस्य घास-कर-विशिष्टेषु आत्वं पुंवद्भावश्च विधीयते, उदाहृतं च महत्या घासो महाघासः, महत्याः करो महाकर इति। एतेन तन्मते स्त्रियामेवात्वमेषूत्तरपदेषु विधीयते इति कैयटादयो मन्यन्ते, यतः पुंवद्भावसन्नियोगशिष्टतया विधानाद् यत्र पुंवद्भाव आवश्यकस्तत्रैवात्वमपि भवतीति प्रतीयते। तथा च स्त्रियामेवात्वं भवति, तत्र पुंवद्भावविधानस्यैतदेव फलं यत्-अन्त्यस्याकारादेशे सत्यपि महाघास इति रूपं न स्यात्, पुंवद्भावे कृते च तकारस्याकारे भवति रूपसिद्धिरिति। **केचित्** तु वार्तिकस्थं चशब्दमन्वाचये मन्यमाना महतो घासो महाघास इत्यत्राप्यात्वं वर्णयन्ति, किन्तु वार्तिकोपात्तशब्दं विहाय लिंगविशिष्टपरिभाषागम्योदाहरणदानेन पुंवद्भावसन्नियोगेन विधीयमानमात्वं पुंसि न भवतीत्येव कैयटादयो व्याचख्युः। दीक्षितादिभिस्तु पुंस्यपि प्रवृत्तिरुक्ता, तत्रापि नित्यमेवात्वमुदाहृतमिति स्वमताद् विशेषः। सूत्रद्वयकरणे लिङ्गविशिष्टन्यायानाश्रयणमपि गुणः॥ ३. २. ६९॥

"Aho Shrutgyanam"

## जातीयैकार्थेऽच्वेः । ३. २. ७० ॥

त०प्र–महतोऽच्व्यन्तस्य जातीयप्रत्यये एकार्थे चोत्तरपदे डान्तादेशो भवति । महान् प्रकारोऽस्यास्या वेति महाजातीयः, महाजातीया । एकार्थे–महांश्चासौ वीरश्च–महावीरः, एवं–महामुनिः, महान् भागोऽस्य–महाभागः, एवं–महायशाः, महती चासौ देवी च–महादेवी, एवं–महाराज्ञी; महती कीर्तिरस्य–महाकीर्तिः, महास्तुतिः, महांश्चासौ करश्च, महान् करोऽस्येतिवा–महाकरः, एवं–महाघासः, महाविशिष्टः, महान्तमात्मानं मन्यते–महामानी; एवं–महंमन्यः, खशि डा ह्रस्वत्वे मोऽन्तः । जातीयैकार्थ इति किम् ? प्रकृष्टो महान्–महत्तरः, महत्याः पुत्रो–महतीपुत्रः, महत्याः पतिः–महतीपतिः । अच्वेरिति किम् ?, –अमहान् महान् संपन्नो महद्भूतश्चन्द्रमाः, अमहती महती संपन्ना–महद्भूता कन्या ॥ ७० ॥

श० म० न्यासानुसन्धानम् जाती० । महत इत्यनुवर्तते, स्त्रियामिति च निवृत्तं योगविभागात्, एकार्थे उत्तरपदे इति तु सम्बध्यत एव, तदाह—**महतोऽच्व्यन्तस्येति**—च्विप्रत्ययान्तेऽपि महतो रूपं न विनश्यतीति तत्र प्राप्तिरस्ति तत्परिहारायाच्वेरित्युच्यते, अस्य फलमग्रे प्रदर्शयिष्यत एव । उदाहरति—**महान् प्रकारोऽस्येति**—महच्छब्दात् प्रकारार्थे जातीयर्, तत्र चानेन डादेशात् **महाजातीयः** इत्यस्य सिद्धिः । महान् प्रकारोऽस्या इति विग्रहे च—**महाजातीये**ति । जातीयरि उदाहृत्यैकार्थे उत्तरपदे इत्युदाहरति—महाँश्चासौ वीरश्चेति—"सन्महत्परमोत्तमोत्कृष्टम्०" [ ३. १. १०६. ] इति समासः, अनेन डादेशः । महाँश्चासौ मुनिः– **महामुनिः** । उत्तरपदस्य सामानाधिकरण्यमात्रमपेक्ष्यते न तु प्रतिपदोक्तसमासग्रहणादर इति ध्वनयितुं बहुव्रीहिमुदाहरति—**महान् भागोऽस्येति**—भागशब्दोऽनेकार्थ इह च भाग्यवाची । **महायशाः** इति—महद्यशो यस्य यशसो महत्त्वं च तत्कारणमहत्त्वात् । न केवलं पुंस एव महच्छब्दस्यानेन डादेशोऽपि तु स्त्रीलिङ्गस्यापि ❀ नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ❀ इति न्यायात्, तदाह—**महती चासौ देवी चे**ति—अत्र च पूर्वं पुंवद्भावे सति डादेशः, परत्वाड्डादेश इति वा, सति हि डादेशेऽन्त्यस्वरादिलोपे पुंवद्भावप्रवृत्तेरनावश्यकत्वात् । एवं महती चासौ राज्ञी—**महाराज्ञीति,** अत्र समासान्तोऽट् तु न, तद्विधौ "राजन्-सखेः" [७. ३. १०६.] इत्यत्र राजन्निति नकारान्तनिर्देशात्, अत्र तु ङ्यन्तो राजशब्दो विग्रहवाक्ये, अलौकिके प्रक्रियावाक्य च प्रयुज्यत इति नान्तत्वाभावात् । बहुव्रीहावपि स्त्रियां प्रवृत्तिमाह—**महती कीर्त्तिरस्य –महाकीर्त्तिः** । महती स्तुतिरस्येति–**महास्तुतिः** । करादिष्वपि समानाधिकरणे उत्तरपदे परत्वादिदमेव 'प्रवर्त्तत इति नित्यमेव डादेशो भवति, परिशेषादेव पूर्वसूत्रस्य व्यधिकरणे उत्तरपदे प्रवृत्तिस्वीकारात्, तदाह—**महाँश्चासौ करश्च, महान् करोऽस्य वेति**—**महाकरः** इति । एवं घासविशिष्टयोरपि विज्ञेयम् । **महान्तमात्मानं मन्यते** इति—"मन्याण्णिन्" (५. १. ११६.) इति णिन्, उपान्त्यवृद्धिः, अनेन डादेशे—**महामानी** । "कर्तुः खश्" [ ५. १. ११६. ] इति खशि तु डा ह्रस्वे मोन्तादेशे च—**महंमन्यः** इति । **एकार्थ इति किमि**ति–तथा सति पूर्वोक्तसूत्रद्वयाकरणमपि लाघवमिति प्रष्टुराशयः । एकार्थादुत्तरपदादन्यत्र डादेशो नेष्ट इति तत्र तदभावार्थमेकार्थ इत्यावश्यकमिति प्रत्युदाहरणमुखेनाह—**प्रकृष्टो महान्–महत्तरः** इति—अत्रैकार्थ इत्यस्याभावे न केवलं व्यधिकरणे उत्तरपद एवापि तु तरादिष्वपि प्रकरणपठितेषु डादेशः स्यादिति भावः । व्यधिकरणे उत्तरपदे प्रत्युदाहरति—**महत्याः पुत्रः** इति—लिङ्गविशिष्टग्रहणन्यायेनेहाप्यस्य प्रवृत्तिः स्यादिति भावः । एवं—**महतीपतिरि**त्यत्रापि विज्ञेयम् । **केचित्** तु पूर्वपदे तदन्तविधिमप्याहुः ❀ग्रहणवता नाम्ना न तदन्तविधिः❀ इति न्यायश्च प्रत्ययविधिविषय एवेति वर्णयन्ति । तथा च महच्छब्दान्तस्यापि पूर्वपदस्य डादेशो भवतीति 'सुमहाजातीयः, परममहाकरः' इत्यादिरूपाण्यपीष्टानीत्याहुः । **अन्ये** च 'एकार्थे' इत्यस्याभावेऽपि "जातीये चाच्वेः" इत्येतावता सूत्रेणाप्युत्तरपदाधिकारात् समासे समाक्षिप्ते महावीर इत्यादीनां सिद्धिरस्त्येव, महत्तर इत्यत्र तु न दोषः समासाभावात्, महतीपुत्र इत्यादावपि न दोषः ❀लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्❀ इति न्यायेन प्रतिपदोक्तस्य "सन्महत्परमोत्तमोत्कृष्टम्०" [ ३. १. १०७. ] इति समासस्यैव ग्रहणात्, इति स्वभावत एवैकार्थे एवोत्तरपदे भविष्यतीति नावश्यकमेकार्थ इति पदमित्याहुः; तन्न—तथा सति 'महाभागः, महाबाहुः, महायशाः' इत्यादौ बहुव्रीहावपि प्रवृत्तिर्न स्यादिति लक्ष्या-

"Aho Shrutgyanam"

नुरोधादत्र लक्षणप्रतिपदोक्तन्यायानाश्रयणे सिद्धे षष्ठीतत्पुरुषे तद्वारणायैकार्थे इत्यावश्यकमेवेति । भाष्ये तु प्रकृतन्यायाश्रयणेऽपीह बहुव्रीहौ प्रवृत्तिः साधिता । स च प्रकारस्तदीयप्रक्रियानुसारीति नेहोपयुज्यत इति नोल्लिखितः । **अच्वेरिति किमि**ति—च्व्यन्तस्थले महतो न सामानाधिकरण्यमुत्तरपदेन, यतः—अमहान् महान् भूत इत्यर्थे अमहत एव भूतेन सह कर्तृत्वरूपः सम्बन्धः साक्षादिति महता सह भूतशब्दस्य नास्ति सामानाधिकरण्यमिति नावश्यकमच्वेरिपीति प्रष्टुराशयः । अमहान् महान् सम्पद्यत इत्यर्थे अमहति महच्छब्दो वर्त्तते, य एवामहान् स एव महानिति महतोऽपि तत्र कर्तृत्वमिति भूतशब्देन सह सामानाधिकरण्यमस्त्येवेति भवत्येव डादेशप्राप्तिरिति स्वाभिप्रायेण प्रत्युदाहरति—**अमहान् महान् भूतो महद्भूतश्चन्द्रमाः** इति— तथा चात्र डादेशवारणायाच्वेरिति कथनीयमेवेति भावः । एवम्— **अमहती महतीभूते**त्यत्रापि विज्ञेयम्, अत्र पुंवत्त्वं तु "च्वौ क्वचित्" [ ३. २. ६०. ] इति सूत्रेण विज्ञेयम् ।

पाणिनीये च तन्त्रेऽच्वेरिति तदर्थकं वा पदान्तरमेतद्विषयके सूत्रे "आन्महतः समानाधिकरणजातीययोः" [ ६. ३. ४६. ] इत्यत्र नोपादीयते । महद्भूत इत्यत्रात्वं च गौणमुख्यन्यायेन वारितम् । तथा चात्र विषये भाष्यादौ बहुविचारितम्, तच्च छात्रव्युत्पादकतयेहापि संक्षिप्य प्रदर्श्यते, तथाहि—"इह कस्मान्न भवति—अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमाः" इति सन्दिह्य "अन्यप्रकृतिरमहान्भूतप्रकृतौ महान् महत्येव । तस्मादात्वं न स्यात् पुंवत्तु कथं भवेत् तत्र [१] अहमति महान् हि वृत्तस्तद्वाची चात्र भूतशब्दोऽयम् । तस्मात् सिध्यति पुंवन्निवर्त्यमात्वं तु मन्यन्ते [२] यस्तु महतः प्रतिपदं समास उक्तस्तदाश्रयं ह्यात्वम् । कर्त्तव्यं मन्यते, न लक्षणेन, लक्षणोक्तश्चायम् । [३] शेषवचनात्तु योऽसौ प्रत्यारम्भात् कृतो बहुव्रीहिः । तस्मात् सिद्ध्यति तस्मिन् प्रधानतो यतो वृत्तिः"[४] इति समाधानमुक्तम् । 'अमहान् अन्यस्य महतः प्रकृतिः स एव भूतप्रकृतौ भूतशब्दार्थकर्तृत्वे वर्त्तते । तस्मादात्वं न स्यात्—अमहत एव भूतेन सामानाधिकरण्यान्महतश्च समानाधिकरणे उत्तरपदेऽभावात् नात्रात्व [ डादेश ] प्राप्तिरिति भावः ।

अयमभिप्रायः—च्विविषये प्रकृतिः कर्त्री न विकृतिः । 'सुवर्णं कुण्डले भवतः' इत्यादौ विकृतेः कुण्डलयोः कर्तृत्वेऽपि च्विविषये प्रकृतेरेव—य एव किञ्चित् सम्पद्यते तस्यैव कर्तृत्वं, तथाहि 'सङ्घीभवन्ति ब्राह्मणाः पटीभवन्ति तन्तवः' इत्यादौ विकृतिगता संख्या समुदायाद्भवति । 'असंघो ब्राह्मणाः संघः संपद्यते' इत्यर्थे सत्यपि समुदायात् संघीभवन्ति इत्यस्मात् विकृतिगता—'ब्राह्मणनिष्ठा बहुत्वसंख्यैव दृश्यते । एवं पटीभवन्ति तन्तव इत्यत्राप्यपटीभूतास्तन्तवः पटः सम्पद्यत इत्यर्थे पटस्य विग्रहवाक्ये कर्तृत्वप्रतीतावपि च्व्यन्ते पटीभवन्तीत्यत्र तन्तूनामेव कर्तृत्वं भवति, तदनुसारिण्येव संख्या क्रियायां भवति । एवम्-अत्वं त्वं सम्पद्यते-त्वद्भवतीत्यादौ प्रकृत्याश्रय एव प्रथमपुरुषो भवति, विकृत्याश्रयत्वे तु युष्मदः सामानाधिकरण्ये मध्यमपुरुषः स्यात् , एवं च भूत इति क्तप्रत्ययो भवनक्रियायाः कर्तर्यमहति विधीयते, न तु विकारे महतीति महता सह तस्य सामानाधिकरण्यं नास्ति । अत्रेदं शङ्क्यते—तर्हि अमहती महती संपन्ना—महद्भूतेत्यत्र पुंवद्भावः कथं स्यात्, तत्रापि महतीशब्देन सह भूतेत्यस्य सामानाधिकरण्याभावात् [ तन्मते समानाधिकरणे उत्तरपदे एव तत्र पुंवद्भावः, न तु च्वौ पुंवद्वचनं पठ्यते ] अस्ति च विकृतेरपि कर्तृत्वदर्शनं, यथा—सुवर्णः खदिराङ्गारसदृशे 'कुण्डले भवतः' इति विकारसंख्यानिमित्तं द्विवचनं दृश्यते, तथा 'असङ्घो ब्राह्मणाः सङ्घः सम्पद्यते' इति पूर्वोक्तवाक्येऽपि विकृतेः सङ्घस्य कर्तृत्वं दृश्यते । एतन्मतमाश्रित्य यदि 'अमहती महती भूता—महद्भूता' इत्यत्र पुंवद्भावः साध्यते तदा आत्वमप्युभयत्र प्राप्नोति । तत्राह—अमहति महच्छब्दो वर्त्तते, 'तद्वाची च भूतशब्दः, इति भवति महच्छब्देन सह सामानाधिकरण्यम् ।

अयंभावः—च्व्यन्तोऽत्र महच्छब्दः च्विः प्रत्ययश्च प्रकृतेर्विकारात्मकताऽऽपत्तिमाह, यदा चैकोऽर्थः प्रकृतिविकारभावेन विवक्ष्यते तदा परिणामव्यवहारो भवति । यथा चोक्तमभियुक्तैः—

"जहद्धर्मान्तरं पूर्वमुपादत्ते यदा परम् ।
तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते ॥"

यथा दुग्धं स्वकीयं धर्मं द्रवत्वादिकं जहत् परं दध्यवस्थायामवस्थितं धर्ममुपादत्ते, तत्त्वात् स्वभावाच्चाप्रच्युतमेव तिष्ठति, तदा परिणाम उच्यते इत्यर्थः । यदा तूत्तरावस्था पूर्वावस्था वा नाश्रीयते तदा च्विप्रत्ययो न भवति, यथा तन्तवो भवन्ति, पटो भवति, उक्तं च **हरिणापि**—

"Aho Shrutgyanam"

"पूर्वावस्थामविजहत् संस्पृशद् धर्ममुत्तरम् ।
संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ॥"

इति पूर्वा—कारणावस्थाम्, अविजहत्-अत्यजन्, उत्तरं—धर्ममवस्थाविशेषरूपं, संस्पृशद्-आसादयन्, संमूर्च्छित इवोभयरूपतयाऽध्यवसीयमानो जायमानः-उत्पद्यमानोऽर्थात्मा-पदार्थः, च्विप्रत्ययान्तेनाभिधीयत इति तदर्थः । एवं चैकस्यैव वस्तुनः पूर्वोत्तरावस्थोपाधिव्यवच्छिन्नत्वात् प्रकृतिविकृत्योरुभयोरपि कर्तृत्वमुपपद्यते । उभयोः कर्तृत्वेऽपि च्विप्रत्ययस्थले वचनं प्रकृतिगतसंख्याश्रयं, पुरुषोऽपि तदाश्रय एव भवति 'सङ्घीभवन्ति ब्राह्मणाः, पटीभवन्ति तन्तवः, अत्वं त्वं सम्पद्यते' इत्यादौ । तत्र शब्दशक्तिस्वभाव एव बीजं किमत्र शक्यसस्मदादिभिः कर्तुम् । एवं तर्हि महद्भूतेत्यत्र पुंवद्भावस्य सिद्धावपि 'महद्भूतश्चन्द्रमाः' इत्यत्र, [ डाः ] आत्वं दुर्वारं स्यादिति चेत् ? अत्रोच्यते-डादेशविषये प्रतिपदोक्तः समासो गृह्यते ❀लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्❀ इति न्यायात्, महद्भूत इत्यादौ तु गतिसमास इति न दोष इति । एवं तर्हि 'महाबाहुः महायशाः' इत्यादिलक्ष्यासिद्धिरिति चेत् ? अत्रोच्यते-❀गौण-मुख्ययोर्मुख्ये कार्यसम्प्रत्ययः❀ इति न्यायेनेह समाधानम्, न लक्षणप्रतिपदोक्तन्यायेनेति महद्भूत इत्यादौ गौणो महच्छब्द इत्यात्वं [डादेशो] न भवति, महाबाहुरित्यादौ तु स प्रधान एवेति तत्रात्वं भवतीति । स्वमते च यथा महद्भूत इत्यत्र गौणत्वं तथा महाबाहुरित्यत्रापि, अन्यपदार्थं प्रत्युपसर्जनत्वाद् गौणत्वमिति मत्वा तत्समाधानं नाश्रितम्, किन्तु लक्ष्यानुरोधाल्लक्षणप्रतिपदोक्तन्यायानाश्रयणमिति, महाबाहुरित्यादावदोषः, महद्भूतश्चन्द्रमा इत्यादौ तु 'अच्वेः' इति वचनाददोषः, महद्भूता कन्येत्यत्र च "च्वौक्वचिद्" [३.२.६०.] इति पुंवत्त्वमिति पृथगेव समाधानं सर्वत्राश्रितमिति विशेषः । अत्र कैयटादिग्रन्थो यद्यपि विस्तृतस्तथापि प्रकृतोपयुक्त एवांशस्ततः साररूपेण गृहीतः । स्वमते चैतावद्व्याख्यानापेक्षया वचनकरण एव लाघवमिति स्वीकृतं प्रतीयते ॥३-२-७०॥

## न पुंवन्निषेधे ॥ ३. २. ७१ ॥

**त० प्र०—महतः पुंवन्निषेधविषये उत्तरपदे डा न भवति । महती प्रिया अस्य महतीप्रियः, महतीमनोज्ञः ॥ ७१ ॥**

**श० म० न्यासानुसन्धानम्—न पुंव० ।** पूर्वसूत्रं निषेध्योपस्थापकतया 'महतः' इति पदेन सहानुवर्त्तते, तथा च योऽर्थः सम्पन्नस्तमाह—**महतः पुंवन्निषेधविषये उत्तरपदे** इत्यादि—पुंवद्भावस्य निषेधो यस्मिन् भवति स पुंवन्निषेधविषयः, तथाभूते उत्तरपदे परे इत्यर्थः । ❀नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्❀ इति न्यायेन पूर्वसूत्रेण महतीशब्दस्यापि डादेशो भवति । यत्र च पुंवद्भावो न भवति तत्र च स नेष्टो लक्ष्यानुरोधादिति लक्ष्यैकचक्षुष्केणाचार्येण तदर्थमिदं सूत्रमारभ्यते । **महतीप्रियः** इति—अत्र बहुव्रीहिसमासे "परतः स्त्री पुंवत्" [ ३. २. ४९. ] इति पुंवद्भावः प्राप्तः स "नाप्प्रियादौ" [ ३. २. ५३. ] इति निषिध्यते, तथा च निषेधविषयतासत्त्वादत्र पूर्वसूत्रेण प्राप्तस्य पुंवद्भावस्यानेन निषेधः । मनोज्ञाशब्दोऽपि प्रियादिपठित इति तत्रापि निषेधविषयताऽस्त्येवेति तत्राऽप्ययं निषेधः प्रवर्त्तते, तदाह-**महतीमनोज्ञः** इति—महती मनोज्ञा यस्येति विग्रहः । अन्यैर्वैयाकरणैः पुंवद्भावविषय एव यत्र "महतः" सूत्रनिर्दिष्टं रूपं सम्भाव्यते तत्रैव आत्वस्य [ डादेशस्य ] प्रवृत्तिः, स्वीक्रियते, अत एव तत्र निषेधवचनं न दृश्यते ॥ ३. २. ७१. ॥

## इच्यस्वरे दीर्घ आच्च । ३. २. ७२ ॥

**त०प्र०—इच्प्रत्ययान्तेऽस्वरादावुत्तरपदे परे पूर्वपदस्य दीर्घ आकारश्चान्तादेशो भवति । बाहुषु च बाहुषु च मिथो गृहीत्वा व्यासक्तं-बाहूबाहवि व्यासजेताम्, बाहाबाहवि, एवं केशाकेशि, मुष्टिभिश्च मुष्टिभिश्च मिथः प्रहृत्य कृतं युद्धं-मुष्टीमुष्टि, मुष्टामुष्टिः एवं-यष्टायष्टि, यष्टीयष्टि, दण्डादण्डि, दीर्घत्वाऽऽत्वयोरकारान्तादन्यत्र विशेषः । दीर्घसाहचर्यादात्वमपि स्वरान्तानामेव भवति, तेनेह न भवति-दोर्दोषि, धनुर्धनुषि । अस्वर इति किम् ? अस्यसि, इष्विषवि ॥ ७२ ॥**

**श० म० न्यासानुसन्धानम्—इच्य० । इच् प्रत्ययान्ते** इति-इचः प्रत्ययत्वेन तदन्तग्राहकता प्रत्ययग्रहणन्यायलब्धा, तदनुसारमेवेदम्, इच्प्रत्ययश्च "इज् युद्धे" [७.३.७४.] इति सूत्रेण विधीयते, तदन्तस्योत्तरपदपरत्वं न सामानाधिकरण्यविषये संभाव्यते, युद्धे विहितसमासस्य समाना

"Aho Shrutgyanam"

धिकरणविषयत्वाभावादित्येकार्थे इति नेह सम्बद्धम् । **दीर्घ-आकारश्चान्तादेशः** इति–तथा च दीर्घाऽऽकारादेशयोः पाक्षिकत्वं लभ्यते, सह विधाने चैकस्य विधानं व्यर्थमेव स्यात् । पाणिनीये चाकारविधानं न दृश्यते, केवलं दीर्घ-मात्रम्, उक्तं च मनोरमाकारेण–स्वरादिभिन्ने उत्तरपदे प्राचीनैराकारादेशोऽपि विधीयते, परं तदपाणिनीयमिति। **बाहुषु बाहुषु च मिथो गृहीत्वेत्यादि** "तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः" [३.१.२६.] इति समास-सूत्रस्य प्रवृत्त्यनुरूपं विग्रहवाक्यम्, तथा च तेनैव सूत्रेण समासः "इच् युद्धे" [७.३.७४] इतीच् प्रत्ययः, अनेन पूर्वपदस्यात्वे–**बाहाबाहवि, दीर्घे–बाहूबाहवी**ति । प्रकृतं विग्रहादिक-मन्यत्राप्यतिदिशति–**एवं-केशाकेशी**ति–केशेषु केशेषु गृहीत्वा व्यासक्तमिति विग्रहः, व्यासक्तमिति च विग्रहवाक्ये गृहीत्वेति क्त्वाप्रत्ययार्थपूर्वकालिकत्वस्य लाभाय । तत्रादायेत्यंशस्योदाहरणमुक्त्वा तेन प्रहृत्येत्यंशस्योदाहरणमाह–**मुष्टिभिश्च मुष्टिभिश्चेति**––समासादिकं पूर्ववत् यष्टिभिर्यष्टिभिः प्रहृत्य–**यष्टीयष्टि**, दण्डैर्दण्डैः प्रहृत्य–**दण्डादण्डि**, अत्र च दीर्घे आकारान्तादेशे च विशेषस्यादर्शनादाह––**दीर्घत्वाऽऽत्त्वयोरकारान्तादन्यत्र विशेषः इति**––अकारान्तस्य दीर्घे आकारान्तादेशे वा विशेषाभावेऽपि, अन्यस्वरान्तेषु विशेषस्य सत्त्वात् तद्विधानमावश्यकमिति भावः । अतिप्रसङ्गवारणायाह––**दीर्घसाहचर्यादि**ति––दीर्घ आत्वं च सह विहितौ, तथा च दीर्घः स्वरान्तेष्वेव विहितः *स्वरस्य ह्रस्व-दीर्घ-प्लुताः* इति न्यायात्, तेन हि न्यायेन ह्रस्व-दीर्घ-प्लुताः स्वरस्यैव भवन्तीति सूच्यते, एवं च दीर्घो विधीयमानो यथा स्वरान्तेष्वेव प्रवर्त्तते तथा आत्वमपि तेष्वेव प्रवर्त्तेत तत्साहचर्यादिति व्यञ्जनान्तानां न दीर्घ इत्यात्त्वमपि न भवतीति भावः । तत्फलमाह––**तेनेह न भवति––दोर्दोषि** इत्यादि; दोष्णोर्दोष्णोर्गृहीत्वा व्यासक्तमिति विग्रहे समासः, इच् प्रत्ययश्च पूर्ववत्, व्यञ्जनान्तत्वेन दीर्घाऽऽत्वयोरभावः । धनुषा धनुषा मिथः प्रहृत्य व्यासक्तं युद्धं–**धनुर्धनुषि** इत्यत्रापि तथैव । **अस्वर इति किमि**ति—स्वरादावुत्तरपदे प्रकृतदीर्घाऽऽत्वयोर्वर्जनं किमर्थ-मिति प्रश्नः । **अस्यसि** इति––असिनाऽसिना मिथः प्रहृत्य प्रवृत्तं युद्धम्; **इषिवषवि** इषुणेषुणा प्रहृत्येति विग्रहः, पूर्वोत्तरपदयोः स्वरादित्वेन स्वरान्तत्वे सत्यपि स्वरादावुत्तरपदे दीर्घाऽऽत्वयोर्वर्जनादिह न तयोः प्रवृत्तिरिष्टा, असति चास्वरे इति पदे स्यादेवेति भाव. । यद्यपि दीर्घे प्रवृत्तेऽपि प्रकृतरूपसिद्धौ बाधकाभावः, अत एव केवलदीर्घ-विधायकतन्त्रे [ पाणिनीये ] 'अस्वरे' इति प्रकृतसूत्रे न पठ्यते । स्वमते चाकारस्यापि विधानाद्रूपे वैलक्षण्यं स्पष्ट-मेवेति 'अस्वरे इति कर्त्तव्यमेवेति ॥ ३. २. ७२ ॥

## हविष्यष्टनः कपाले । ३. २. ७३ ॥

**त० प्र०—हविष्यभिधेयेऽष्टन्शब्दस्य कपाले उत्तरपदे दीर्घोऽन्तादेशो भवति । अष्टसु कपालेषु संस्कृतम्–अष्टाकपालं हविः । हविषीति किम् ? अष्टानां कपालानां समाहारः–अष्टकपालम्, पात्रादित्वात् स्त्रीत्वाभावः । कपाल इति किम् ? अष्टपात्रं हविः ॥ ७३ ॥**

**श० म० न्यासानुसन्धानम्—हवि०** । देवोद्देश्येन त्यज्यमानं द्रव्यं हविः । **'अष्टनः'** इति अष्टसंख्यावाचि-शब्दस्यानुकरणमिति स्वार्थबहुत्वसंख्याभिधायित्वाभावान्न बहुवचनम्, स्वरूपभङ्गभिया चात्र "अनोऽस्य" [२.१.१०८] इत्यकारलोपो न । 'उत्तरपदे' इत्यनुवृत्तं, तद्विशेषणं–**कपाले** इति, तथा च 'तद्रूपे उत्तरपदे' इत्यर्थो भवति । अत्र दीर्घाऽऽत्वयो रूपे विशेषाभावात् प्रथमोपस्थितदीर्घमात्रविधानेन रूपसिद्धिसम्भावनायामात्त्वं नानुवर्त्तितमित्याह–**दीर्घोऽन्त्यादेशो भवतीति** । **अष्टसु कपालेषु संस्कृतमि**ति–अस्मिन् विग्रहे "दिगधिकं संज्ञातद्धितोत्तरपदे" [३-१-९८.] इत्यधिकारे 'संख्यासमाहारे च द्विगुश्चानाम्न्ययम्" [३-१-९९.] इति समासे द्विगुसंज्ञायां च "संस्कृते भक्ष्ये" [६-२-१४०] इत्यणि "द्विगोरनपत्ये यस्वरादेर्लुबद्विः" [६.१.२४.] इति लुपि 'अष्टन् कपाल' इति स्थिते नलोपे सत्यनेनान्त्यस्य दीर्घः । यदि च नलोपस्य दीर्घरूपे परविधा-वसत्त्वान्नकारस्यैवान्त्यत्वमिति कथं दीर्घ इत्याशङ्क्यते, तदा * अन्त्यबाधेऽन्त्यसदेशस्य [उपान्त्यस्य] * इति न्यायादुपान्त्यस्याकारस्य दीर्घे नलोपे च रूपसिद्धिर्द्रष्टव्या । **हविषीति किमि**ति–सामान्यतः कपालेऽष्टनो दीर्घो विधीयतामिति प्रश्नाशयः । उत्तरयति–**अष्टानां कपालानां समाहारः इति**–पूर्वोक्तसूत्रेण समासे रूपसिद्धिः । यद्यप्यकारान्तोत्तरपदकद्विगुत्वेन लिङ्गानुशासनबलादत्र स्त्रीत्वं प्राप्तं तथापि पात्रादित्वात् तदभावो भवतीत्याह–**पात्रादित्वात् स्त्रीत्वाभावः** इति, तथाहि-लिङ्गानुशासनीयं वचनम्–[ स्त्रीलिङ्गाधिकारे]



"Aho Shrutgyanam"

"पात्रादिवर्जितादन्तोत्तरपदः समाहारे ॥
द्विगुरन्नाबन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः ॥" इति [५]।

पात्रादिगणवर्जितमकारान्तमुत्तरपदं यस्य तथाभूतो द्विगुः समाहारे वर्त्तमानः स्त्रीलिङ्ग इति हि तदर्थः। पात्रादीनां च शिष्टप्रयोगगम्यत्वमक्तमिति 'अष्टकपालम्' इत्यादिशिष्टप्रयोगदर्शनात् कपालशब्दोऽपि पात्रादिषु पठित इति विज्ञेयम्। **कपाले इति किमिति**–हविषि वाच्येऽष्टन-आत्वं सर्वस्मिन्नुत्तरपदे विधीयतामिति प्रश्नाशयः। प्रत्युदाहरति–**अष्टपात्रं हविरिति**–अष्टसु पात्रेषु संस्कृतं हविरिति विग्रहः, पूर्ववत् समास-प्रत्ययादिः. कपालरूपोत्तरपदपरत्वाभावाद् दीर्घो न भवति, 'कपाले' इत्यस्याभावे च स्यादेवेति तद्वारणाय 'कपाले' इत्यावश्यकमिति भावः ॥३.२.७३॥

## गवि युक्ते । ३. २. ७४ ॥

**त० प्र०–अष्टन्शब्दस्य गव्युत्तरपदे युक्तेऽभिधेये दीर्घोऽन्तादेशो भवति। अष्टागवं शकटम्, अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परे द्वयोर्द्विगुः, "गोस्तत्पुरुषात्" (७. ३. १०५.) इत्यट् समासान्तः, तत्र दीर्घत्वेन युक्तार्थसंप्रत्ययाद्गतार्थत्वाद्युक्तशब्दस्य निवृत्तिः, अथवा–समाहारद्विगुः,–तत्र साहचर्यादुपचारादष्टगवेन युक्तं शकटमष्टागवमुच्यते। गवीति किम्? अष्टतुरगो रथः। युक्त इति किम्? अष्टगवं ब्राह्मणधनम्, अष्टगुश्चैत्रः ॥ ७४ ॥**

**श० म० न्यासानुसन्धानम्–गवि०।** अष्टन इत्यनुवृत्तम्, 'गवी'त्युत्तरपदविशेषणम्, 'युक्ते' इति च प्रयोगोपाधिनाभिधेयकथनम्, तथाच सूत्रार्थमाह–**अष्टन्शब्दस्ये**त्यादिना, **युक्तेऽभिधेये** इत्यस्य युक्तेऽर्थे गम्यमाने इत्यर्थः। **अष्टागवं शकटमि**ति–अष्टाभिर्गोभिर्युक्तमित्यर्थः। समासोपयोगिविग्रहवाक्यमाह–**अष्टौ गावो युक्ता अस्मिन्नि**ति, तथा च युक्तशब्द एवोत्तरपदं तस्मिन् परे "संख्या समाहारे च०" [३.१.९९.] इति समासो द्विगुः, ततो "गोस्तत्पुरुषात्" [७.३.१०.] इति समासान्तोऽट्, अनेन पूर्वपदस्य दीर्घः, 'अष्टागवयुक्त' इत्यवस्थायां दीर्घेणैव युक्तार्थसम्प्रत्ययाद् युक्तशब्दस्य निवृत्तौ सत्यां न तस्य प्रयोगोऽथ च तं विनापि तदर्थप्रतीतिः प्रयोगस्वाभाव्यात्। युक्तशब्दार्थाभिधायकत्वं दीर्घस्य दुर्लभम्, किंच विग्रहवाक्येऽन्यपदार्थपारतन्त्र्येण प्रयुक्तस्य युक्तशब्दस्य दीर्घसत्त्वे निवृत्तिरपि न युज्यत इत्याशयवान् पक्षान्तरमाह–**अथवा समाहारद्विगुरि**ति–अष्टौ गावः समाहृताः; अष्टानां गवां समाहार इति वार्थे द्विगुः, तेन चाष्टगवशब्देन साहर्यात् सहचरितत्वलक्षणसम्बन्धाद् हेतोरुपचाराल्लक्षणात आरोपाद् वा शकटमप्याष्टागवमुच्यते, तत्र यत्र साहचर्यनिमित्तक उपचारस्तत्रैव दीर्घस्तस्योपचारस्य द्योतकः, यत्र च नोपचारस्तत्र तदर्थप्रतीतेः प्रत्युदाहरणं बोध्यम्। अष्टौ गावो युक्ता इति त्रिपदतत्पुरुषविग्रहे तु न तदर्थप्रतीतिः, अन्यपदार्थाभिधायकशक्त्यभावात्, अन्यपदार्थे समासे सति तदभिधायकशक्तिसत्त्वेन भवत्यन्यपदार्थस्य रथस्य प्रतीतिः, सा च प्रतीतिर्दीर्घसहकारेणैव। अष्टतुरगो रथ इत्यत्रापि प्रत्युदाहरणेऽन्यपदार्थे समासादेव तदर्थप्रतीतिरिति प्रत्युदाहरणस्य द्व्यङ्गविकलत्वं नाशङ्क्यम्। **गवीति किमि**ति–यत्र क्वाप्युत्तरपदे युक्तार्थे गम्यमाने दीर्घो विधीयतामिति प्रष्टुराशयः। प्रत्युदाहरति–**अष्टतुरगो रथः** इति–अष्टौ तुरगा यस्मिन् सः–अष्टतुरग इति, इह च बहुव्रीहिसामर्थ्याद् युक्तार्थप्रत्ययेऽपि गोरूपोत्तरपदत्वाभावान्न भवति दीर्घः, गवीत्यस्याभावे च स्यादेव। अत्र च केचित् समाहारद्विगुं कृत्वा ततो मत्वर्थीयमकारप्रत्ययं विदधति द्व्यङ्गविकलताव्यावृत्त्यर्थम्, तन्न मन्यामहे–"न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इति व्युत्पत्त्या बहुव्रीहिसमासेन तदर्थप्रतीतौ सत्यां ततो मत्वर्थीयप्रत्ययविधानस्यायुक्तत्वात् पूर्वं च स्वयमपि बहुव्रीहिणैव युक्तार्थप्रत्ययस्य कथनात्। अष्टागवमित्यत्र समाहारविधानं तु समासान्तप्रत्ययार्थम्, तत्पुरुषादेव तद्विधानात्, अन्यथा अष्टगुरिति स्यात्। किंच तत्र प्रदर्शितवाक्ये बहुव्रीहौ युक्तशब्दस्य श्रवणं स्यात्, त्रिपदबहुव्रीह्याश्रयणात्, इह च द्विपदबहुव्रीहावपि युक्तार्थप्रत्यये बाधकाभावेन समाहारात् मत्वर्थीयविधानं नावश्यकमिति विभावनीयं विज्ञैः। **युक्त इति किमि**ति–गवि उत्तरपदेऽष्टनो दीर्घो विधीयतां किमर्थविशेषाश्रयणेनेति प्रष्टुराशयः। प्रत्युदाहरति–**अष्टगवं ब्राह्मणधन**मिति–अष्टानां गवां समाहार इति विग्रहे द्विगुतत्पुरुषः, "गोस्तत्पुरुषात्" [७.३.१०५.] इति समासान्तोऽट्, अष्टगवाभिन्नं ब्राह्मणधनमिति प्रतीतिर्न युक्तार्थस्य प्रतीतिरिति न भवति दीर्घः, युक्त इत्यस्याभावे स्यादेव। न केवलं समाहारे एवापि तु बहुव्रीहावपि दीर्घः

"Aho Shrutgyanam"

स्यादित्याह-**अष्टगुश्चैत्रः** इति-अष्टौ गावो यस्येत्यर्थे बहुव्रीहिः "गोश्चान्ते०" [२.४.९६.] इति ह्रस्वः, अत्रापि दीर्घवारणाय युक्त इति वक्तव्यम्। यद्यपि बहुव्रीहिणा अष्टतुरगो रथ इत्यत्र यथा युक्तार्थप्रतिपत्तिरस्ति तथात्रापि कुतो नेति शङ्कितुं शक्यते, तथापि तत्र रथादिपदसान्निध्यात् सोऽर्थो गम्यते; इह च चैत्रपदसान्निध्यात् स्वस्वाभिभाव एव प्रतीयत इति वैलक्षण्यमवसेयम्, अन्यपदसन्निधेरपि शक्तिग्राहकत्वस्य सर्वसम्मतत्वात् ॥३.२.७४.॥

## नाम्नि । ३. २. ७५ ॥

**त० प्र०-अष्टन्शब्दस्योत्तरपदे परे नाम्नि-संज्ञायां दीर्घोऽन्तादेशो भवति । अष्टौ पदान्यत्र-अष्टापदः कैलाशः, अष्टापदं-सुवर्णम्, अष्टावक्रो मुनिः; अष्टाविटपो नाम कश्चित्। नाम्नीति किम ? अष्टदण्डः, अष्टगुणमैश्वर्यम् ॥ ७५ ॥**

**श० म० न्यासानुसन्धानम्—नाम्नि ।** अत्रार्थ एव निमित्ततयाऽऽश्रितो न तूत्तरपदविशेषः, तदाह-**उत्तरपदे** इति । **नाम्नी**त्यस्य विवरणं-**संज्ञायामि**ति-संज्ञापदेनात्र रूढिरेवाभिप्रेता योगरूढिर्वा, न केवलं यौगिकी संज्ञा, अष्टौ पदानि--स्थानानि यत्र सः—**अष्टापदः कैलासः** इति-- अत्राष्टन्शब्दस्य पदशब्देन सह बहुव्रीहिः। केचित् त्वेवमाहुः--अष्टौ पदानि-प्रकृतिसृष्टिकरतत्त्वात्मकानि स्थानानि यत्रेति, अष्टौ पदानि च क्षितिजलाऽग्नि-वायु-आकाश-यजमान [ जीव ] सोम-सूर्यात्मकानि क्रमेण शर्व-भव-रुद्रोग्र-भीम-पशुपति-महादेव-ईशाननामभिः ख्यातानि, तानि च शिवात्मकानीति शिवालये कैलासे तत्स्थितिः सिद्धेति योगरूढिरियं कैलासे। एवम्-**अष्टापदं सुवर्णम्** इति-अष्टसु लोहधातुषु पदं मुख्यं स्थानमस्येति-अष्टापदं सुवर्णम्, अत्रापि समासादिः पूर्ववत्, एषोऽपि शब्दो योगरूढ एव, तदर्थाभावे तदर्थसत्त्वेऽपि तद्व्यक्तेरन्यत्र तच्छब्दप्रयोगाभावात् । **अष्टावक्रो मुनिरि**ति-अष्टसु स्थानेषु वक्रः-अष्टावक्रः, अष्टौ वक्राण्यस्येति वा विग्रहः, सोऽयं मुनिरेव तन्नाम्नाऽऽख्यायते, नान्यः; अस्य चाष्टधावक्रत्वमुक्तं पुराणादिषु, तद्यथा-- गर्भस्थे तस्मिन् तन्मातुः सन्निधावेव शिष्यानध्यापयतः पितुरुपदेशाशुद्धिं श्रुत्वाऽष्टधा मैवमिति शब्दं चकार, क्रुद्धेन पित्रा चाष्टधा 'हूँ' इति तर्जितः शिशुरष्टस्ववयवेषु वक्रत्वमापन्न इति । न केवलं योगरूढावेव, रूढावपि भवतीत्याह, अष्टाविटपो नाम कश्चिदिति-अष्टौ विटपा अस्येति विग्रहः तत्संख्याकविटपाभावेऽपि तस्य नाम तथाप्रसिद्धमिति कश्चिदित्युक्त्या विज्ञायते । पदकृत्यमाह—**नाम्नीति किमि**ति— तथा च अन्यत्रापीत्येव सूत्र्यतामिति तदाशयः, उत्तरपदविशेषानाश्रयणवदर्थविशेषोऽपि नाश्रीयतामिति भावः, अन्यथा नाम्नीति सूत्रस्वरूपमेव, तदभावे चाष्टापदमित्यादिप्रयोगाणामसिद्धिरेवेत्यव्याप्तिरेव दोषत्वेनोक्ता स्यान्नातिव्याप्तिः, अतिव्याप्त्यपेक्षयाऽव्याप्तेरधिकदोषावहत्वात्, तथा च पूर्वोक्तादन्यत्रापि दीर्घ इत्यर्थकोऽन्यत्रापीत्यादिन्यास एव कार्य इत्येवाशयः । न च तावता किं लाघवमिति शङ्क्यम्, प्रष्टुर्गुणदोषदर्शनेऽनादरात् असूयामात्रस्य कर्तव्यत्वात् । **अष्टगुणमैश्वर्यमि**ति-अष्टौ गुणा अणिमादयः सिद्धयो यत्र तादृशमैश्वर्यमित्यर्थः, अत्र चैश्वर्येऽष्टगुणवत्त्वस्य सत्त्वेऽपि नैतन्नाम तस्येति न भवति दीर्घः, नाम्नीत्यस्या भावे सामान्यसूत्रसत्त्वे च स्यादेवात्रापि दीर्घ इति नाम्नीति वाच्यमेवेति ॥ ३. २. ७५ ॥

## कोटर-मिश्रक-सिध्रक-पुरग-सारिकस्य वणे ।३. २. ७६॥

**त० प्र०-कोटरादीनां कृतणत्वे वनशब्दे उत्तरपदे दीर्घोऽन्तादेशो भवति, नाम्नि-संज्ञायां विषये । कोटरावणम्, मिश्रकावणम्, सिध्रकावणम्, पुरगावणम्, सारिकावणम् । "पूर्वपदस्थान्नाम्न्यगः" [ २. ३. ६४. ] इति णत्वे सिद्धे, कृतणत्वस्य वनशब्दस्य निर्देशो नियमार्थः तेन "पूर्वपदस्थाद्०" इत्यादि सूत्रेण वनशब्दस्य णत्वमाकारसंनियोगे एव भवति; ततश्च 'कुबेरवनम्, शतधारवनम्' इत्यादौ संज्ञायामपि णत्वं न भवति ॥ ७६ ॥**

**श० म० न्यासानुसन्धानम्—कोटर० ।** दीर्घ इति वर्तते, 'उत्तरपदे' इति च प्रकृतम् 'उत्तरपदे' इत्यस्य 'वणे' इत्यनेन सामानाधिकरण्यम्, 'वणे' इति च पदमनुकरणं कृतणत्ववनशब्दस्य, तदाह-**कोटरादीनामि**त्यादि । **कोटरावणमि**ति-नामत्वादिह वाक्यं न प्रदर्शितम्, शास्त्रप्रक्रियानिर्वाहाय 'कोटर-आम्-वन-सि' इत्यलौकिकं वाक्य-

"Aho Shrutgyanam"

मवधारणीयम्, षष्ठीसमासः, "पूर्वपदस्थान्नाम्न्यगः" [२.३.६४.] इति णत्वम्, एवं मिश्रकावणादीनां सिद्धिर्बोध्या, एते सर्वे नरकविशेषाणां वाचकाः शब्दा इति प्राञ्चः । ननु 'वणे' इति णत्वनिर्देशस्य कोऽर्थः ? णत्वविधानमिति चेत् ? नैतत्-तस्यान्यसूत्रेण स्वतः प्राप्तत्वादिति शङ्कामुत्थाप्य समाधातुमाह-"**पूर्वपदस्थान्नाम्न्यगः**"[२.३.६४.] **इति णत्वे सिद्धे** इत्यादि, न च न तेन सर्वत्र णत्वप्राप्तिः 'अगः' इति पर्युदासात्, गकारान्तात् परस्य पुरगावणमित्यत्र णत्वाप्राप्तेरिति वाच्यम्, तत्र 'अगः' इत्यनेन गकारव्यञ्जनान्तमात्रात् परत्वं पर्युदस्यते, इह चाकारविशिष्टो गकारो न तत्पर्युदासविषय इत्यदोषात्, अत एव तत्र सूत्रे ["पूर्वपदास्थान्नाम्न्यगः" [२.३.६४.] इत्यत्र] अग इत्यस्य व्यावर्त्यम् ऋगयनमित्युक्तम्, तत्र गन्तमात्रात् परत्वमुत्तरपदस्येति स्वरान्तात् परस्योत्तरपदस्य सम्बन्धिनो णत्वप्राप्त्यक्षते; एवं च कृतणत्वनिर्देशो व्यर्थ एव, स च व्यर्थीभूय ज्ञापयति-पूर्वपदस्थान्निमित्तात् परस्य नकारस्य णत्वं चेत् कृतदीर्घात् पूर्वपदात् परस्यैवेति, तथा चाकारसन्नियोगे एव भवतीत्यस्यायमेवार्थः, समं नियोगोविधानं सन्नियोगः, स च यद्यप्येकसूत्रेणैकस्मिल्लक्ष्ये विधानमेव,तथापीह सन्नियोगशब्दः साहचर्यपर इति बोध्यम्, दीर्घेण सह यत्र साहचर्यं सम्भावितं तत्रैव णत्वमित्यर्थात्, अन्यथा दीर्घे सति णत्वं णत्वे सति च दीर्घ इत्यन्योन्यमुखप्रेक्षित्वादेकमपि न प्रवर्त्तेत, तथा चाग्रे दीर्घसंभावनायामेव णत्वं, कृते च णत्वे, कृतणत्ववनशब्दपरत्वसिद्धौ दीर्घ इति प्रक्रिया विज्ञेया । तत्फलमाह-**ततश्च कुबेरवनमि**त्यादि । **संज्ञायामपी**ति-णत्वनिमित्तस्य संज्ञारूपस्य सत्त्वेऽपि पूर्वपदस्थान्निमित्तात् परस्य वनशब्दसम्बन्धिनो नस्य णत्वं न भवतीत्यर्थः ॥३.२.७६॥

---

## अञ्जनादीनां गिरौ ।३. २. ७७ ॥

**त० प्र०-अञ्जनादीनां गिरावुत्तरपदे दीर्घोऽन्तादेशो भवति, नाम्नि । अञ्जनागिरिः, भाञ्जनागिरिः, किंशुलकागिरिः, साल्वागिरिः, लोहितागिरिः, कुक्कुटागिरिः, खडूनागिरिः, नलागिरिः, पिङ्गलागिरिः । अञ्जनादीनामिति किम् ? कृष्णगिरिः, श्वेतगिरिः । नाम्नीत्येव-'अञ्जनस्य गिरिः-अञ्जनगिरिः । 'अञ्जन, भाञ्जन, किंशुक, किंशुलक, साल्व, लोहित, कुक्कुट, खडून ( खड्न ), नल, पिङ्गल' इत्यञ्जनादिः बहुवचनमाकृतिगणार्थम् ॥ ७७ ॥**

**श० म० न्यासानुसन्धानम्—अञ्जना०** । उत्तरपदे दीर्घ इति प्रकरणप्राप्तम्, तत्रोत्तरपदे इत्यनेन गिरावित्यस्य सामानाधिकरण्येनान्वयः, तदाह-**गिरावुत्तरपदे इति । अञ्जनागिरिरिति**-अञ्जनो वृक्षविशेषः, तस्य [प्रभवः] गिरिः-अञ्जनागिरिः, जन्यजनकभावसम्बन्धे षष्ठी, तदन्तेन गिरिशब्दस्य समासः । **भाञ्जनागिरिः** भज्यन्ते शत्रवोऽनेनेति भञ्जनः, स एव भाञ्जनो राजविशेषः, तस्य निवासो गिरिः-भाञ्जनागिरिः । किंशुकः पलाशवृक्षः, तस्य [प्रभवो] गिरिः **किंशुकागिरिः,** किंशुलकोऽपि स एव वृक्षः । साल्वो जनपदविशेषः, तद्राजा च, तस्य गिरिः-**साल्वागिरिः** । लोहितानां मृगविशेषाणां [प्रभवो] गिरिः-**लोहितागिरिः । एवं-कुक्कुटागिरिरपि** विग्राह्यः । **खडूनागिरिरिति**-खडूनशब्दोऽप्रसिद्धचरः, क्वचिच्च 'खड्न' इति पाठोऽपीति सूत्रवृत्त्यन्त प्रदर्शित—गणपाठेनानुज्ञायते । पाणिनीये च तन्त्रे अञ्जनादयः किंशुलकादित्वेन [पा० सू० ६-३-११७] पठिताः तत्र 'खडून' शब्दः 'खड्न' शब्दो वा न पठ्यते, 'अन्योऽपि गणपाठभेदस्तत्र दृश्यते, यथा भाञ्जनशब्दस्य स्थाने 'भञ्जन' शब्दस्य पाठः, किंशुकशब्दो न पठ्यते, सति च तद्विषये प्रामाणिकप्रयोगे बहुवचनबललभ्याकृतिगणत्वेन निर्वाहः कार्यः, नलशब्दस्य स्थाने नडशब्दस्तत्र पठ्यते, तच्च डलयोरभेदाद्गतार्थम् । नलानां तृणविशेषाणां प्रभवो गिरिः-**नलगिरिः** । पिङ्गं लातीति पिङ्गलो नागविशेषो रुद्रश्च, तस्य गिरिः-**पिङ्गलागिरिः** । सर्वत्र गिरावुत्तरपदे पूर्वपदभूतानामञ्जनादीनां दीर्घः । **अञ्जनादीनामिति किमिति**-सामान्येन गिरावुत्तरपदे पूर्वपदस्य दीर्घो विधीयतामिति प्रष्टुराशयः । प्रत्युदाहरणेनोत्तरयति—**कृष्णगिरिरिति**-कृष्णः कृष्णवर्णो गिरिरिति विशेषणसमासः, गिरावुत्तरपदे सत्यपि न दीर्घो भवति, पूर्वपद-विशेषग्रहणाभावे स्यादेवेति भावः एवं-**श्वेतगिरिरित्यत्रापि** बोध्यम् । **नाम्नीत्येवेति**—पर्वतविशेषस्य संज्ञायामेव दीर्घो भवति नान्यत्रेति भावः **अञ्जनगिरिरिति**—अत्र अञ्जनशब्दः कज्जलवाचकः, तद्वर्णोऽथवा तत्प्रभवो गिरिरञ्जनगिरिरित्येव विशिष्यते, न तु रूढ्योच्यते, इति नास्य नामत्वम् । गणे पठितान् निर्दिशति-**अञ्जनेत्यादिना** । एकवचननिर्देशे लाघवमनादृत्य बहुवचननिर्देशस्य किं फलमित्याह-- **बहुवचनमाकृतिगणार्थमिति**—एवमाकृतयोऽन्येऽपि गणे बोध्या इति ज्ञापनार्थमित्यर्थः॥३०२-७७॥

"Aho Shrutgyanam"

## अनजिरादिबहुस्वर-शरादीनां मतौ । ३. २. ७८ ॥

**त० प्र०—अजिरादिवर्जितबहुस्वराणां शरादीनां च मतौ प्रत्यये दीर्घोऽन्तादेशो भवति, नाम्नि। बहुस्वर—उदुम्बरावती, मशकावती, वीरणावती, पुष्करावती, अमरावती; शरादि- शरावती, वंशावती, शुचीमती, कुशावती, धूमावती, अहीवती, कपीवती, मुनीवती, मणीवती; वार्दावान् नाम गिरिः, वेटावान् नाम गिरिः। 'शर, वंश, शुचि, कुश, धूम, अहि, कपि, मुनि मणि वार्द, वेट' इति शरादिः बहुवचन- माकृतिगणार्थम्, तेन 'ऋषीवती, मृगावती, पद्मावती, वातावती, भोगावती' इत्यादि सिद्धम् । बहुस्वरशरादी- नामिति किम् ? व्रीहिमती, इक्षुमती, द्रुमती, मधुमती । बहुस्वरस्यानजिरादिविशेषणं किम् ? अजिरवती, खदिर- वती, खपुरवती, स्थविरवती, पुलिनवती, मलयवती, हंसकारण्डववती, चक्रवाकवती, अलंकारवती, शशाङ्कवती, हिरण्यवती अजिरादिराकृतिगणः । नाम्नीत्येव—वलयवती कन्या, शरवती तूणा ॥ ७८ ॥**

**श० म० न्यासानुसन्धानम्—अनजि०** । अनजि- रादिशब्दो बहुस्वरमात्रविशेषणं संभवात्, न शरादीनाम- सम्भवात्, तदाह- **अजिरादिवर्जितबहुस्वराणामिति** । अजिरादयो न पठ्यन्तेऽपि त्वाकृत्या गण्यन्ते तद् वक्ष्यति— **अजिरादिराकृतिगणः** इति । शरादयश्च गण्यन्ते । तत्र क्रमप्राप्तत्वात् पूर्वं बहुस्वरविषयाण्येवोदाहरणान्याह— **बहुस्वरे**ति प्रकृत्य, **उदुम्बरावती**ति—उदुम्बरा वृक्षविशेषाः, ते सन्त्यस्यामित्यर्थे "तदत्रास्ति" [६.२.७०] इति चतुरर्थ्यन्तर्गतार्थे "नद्यां मतुः" [६. २. ७२] इति मतुः, "नाम्नि" [२. १. ९५] इति मस्य वः स्त्रियां ङीः, अनेन दीर्घः । **मशकावती** मशकाः सन्त्यस्यामित्यादिरीत्या विग्र- हादिः पूर्ववत् । **वीरणावती**ति—वीरणास्तृणविशेषाः, विग्र- हादिः पूर्ववत् । **पुष्करावती**ति-पुष्कराणि पद्मानि सन्त्य- स्यामिति चतुरर्थ्यां मतुः । **अमरावती**ति अमरा देवाः सन्त्यस्यामिति मत्वर्थे मतुः, पुरीविशेषस्य नाम । उदुम्ब- रादयः सर्वे बहुस्वराः ।

अथ शरादीनुदाहरति- **शरादी**ति प्रकृत्य, **शरावती**ति— शरास्तृणजातयः, ते सन्त्यस्यामिति विग्रहः, नदीविशेषस्य नाम । वंशाः प्रसिद्धाः, ते सन्त्यस्यामिति- **वंशावती** । **शुचीमती**ति- शुचिरस्त्यस्यामिति विग्रहः, "नाम्नि" [२.१.९५] इति प्राप्तं वत्वं "नोर्म्यादिभ्यः" [२.१.९९] इति निषिध्यते । **कुशावती**ति कुशास्तृणविशेषाः सन्त्यस्यामिति विग्रहः, नगरीविशेषस्य नाम । **धूमावती** धूमः [विशेषकः] अस्त्य- स्यामिति विग्रहः, तान्त्रिकसम्प्रदाये दशसु महाविद्यासु प्रसिद्धैका महाविद्या । **अहीवती** अहयः सन्त्यस्यामिति विग्रहः, पुरीविशेषस्य नाम । **कपीवती** कपयः सन्त्यस्या- मिति विग्रहः, गुहाविशेषस्य नाम । **मुनीवती** मुनयः सन्त्यस्यामिति विग्रहः,एवं **मणीवती**त्यादयोऽपि विग्राह्याः । **वार्दावान् नामगिरिरि**ति-वारि [ जलानि ] ददतीति- वार्दा मेघाः, ते सन्त्यस्मिन्निति वार्दावान् नाम पर्वतविशेषः । **वेटावान् नाम गिरिः** वेटन्ति इति वेटाः- वृक्षाः, "विट शब्दे" श्वादिः, पक्षिद्वारा शब्दवत्त्वेन वृक्षाणां संज्ञेयमिति साम्प्रदायिकाः, ते सन्त्यस्मिन्निति वेटावान् ।

गणं निर्दिशति— **शर वंशे**त्यादिना । पाणिनीये तन्त्रे शरादिगणे [ पा० सू० ६.३.१२०. ] वार्द-वेट—शब्दौ न पठ्येते, सति प्रामाणिके प्रयोगे आकृतिगणत्वेन तयोः संग्रहः । स्वमतेऽपि शरादीनामाकृतिगणत्वमाह- **बहुवचन- माकृतिगणार्थमि**ति । शरादेरित्येकवचननिर्देशे करणीये बहुवचननिर्देशस्य व्याप्त्यर्थत्वेनान्येषामपि संग्रह इति भावः। तेन संग्राह्यान् प्रसिद्धान् प्रयोगानाह- **ऋषीवती**त्यादिना, विग्रहादिः पूर्ववत् । **बहुस्वरशरादीनामिति किमि**ति— सामान्येनैव मतौ दीर्घो विधीयतामिति प्रष्टुराशयः । व्याव- र्त्यमाह-- **व्रीहिमती**त्यादि । एषु सत्यपि मतौ न दीर्घो भवति, विशिष्य विधानाभावे तत्रापि दीर्घः स्यादिति भावः। **बहुस्वरस्यानजिरादिविशेषणं किमि**ति—शरादिषु पठि- तानामेव ग्रहणात् तत्र पर्युदासस्यानावश्यकत्वेन, तेषु बहु- स्वरशब्दपाठाभावेन च बहुस्वरविषय एवानजिरादिवि- शेषणं संभावितमिति तदपि न कार्यमिति प्रश्नाशयः । प्रत्यु- दाहरति- **अजिरवती**त्यादिना, अजिरमङ्गणं, तदस्त्यस्या- मिति विग्रहः, खदिरो वृक्षविशेषः, खजुरोऽपि स एव, स्थविरो वृद्धः, पुलिनं तटम् । **मलयवती**ति—मलयस्यादूरभवा नगरी, विद्याधरचक्रवर्तिनो जीमूतवाहनस्य पत्न्यपि मलय- वतीति प्रसिद्धा, सापि मलयपर्वतसमीपस्थतपोवनप्रभवेति तन्नाम्ना ख्याता । **हंसकारण्डववती**ति—हंसकारण्डवौ पक्षिविशेषौ, ताभ्यां युक्ता नदी प्रकृतशब्देनाख्यायते; हंस- कारण्डवतीत्यपि क्वचित् पठ्यते, तत्र कारण्डः कारण्डव एव ।

"Aho Shrutgyanam"

ततः स्वार्थिकः प्रज्ञाद्यण्, करण्डो वंशनिर्मितपात्रविशेषः, स एव कारण्डः, हंसस्य कारण्ड इति षष्ठीसमास इति केचित् । **चक्रवाकवती**ति--चक्रनामा पक्षिविशेषः, स एव चक्रवाकः, चक्रशब्देनोच्यमानत्वात्, सोऽस्त्यस्यामिति विग्रहः । **अलङ्कारवती**ति विशेषणशब्दोऽपि । **शशाङ्कवती** रात्रिः, कथासरित्सागरे प्रसिद्धा नायिका वा । **हिरण्यवती**त्यपिविशेषणशब्दो नदीविशेषस्य नाम च । एषु बहुस्वराणां मतौ दीर्घो नेष्टः । अजिरादेरपठितत्वात् कथं परिचयस्तदाह— **अजिरादिराकृतिगणः** इति—आकृत्यैव गण्यन्ते परिचीयन्त इत्याकृतिगणा अजिरादय इति भावः । **नाम्नीत्येवे**ति— "नाम्नि" [३. २. ७५] इति सूत्रं सर्वत्र सम्बध्यत एवेति भावः । तद्व्यावर्त्यमाह- **वलयवती कन्ये**ति—वलयोऽस्त्यस्या इति विग्रहे विशेषणशब्द एवायं न तु नामेति बहुस्वरसत्वेऽपि न दीर्घ इति तद्वारणार्थं नाम्नीत्यावश्यकमिति भावः । एवं- **शरवती तूणे**त्यत्रापि द्रष्टव्यम्, तूणा शराधानपात्रम्, तस्याः सदा शरवत्त्वात् तस्या विशेषणमिदं न तु नामाप्रसिद्धेः ॥३.२.७८॥

## ऋषौ विश्वस्य मित्रे ३. २. ७९ ॥

**त० प्र०—विश्वशब्दस्य मित्रे उत्तरपदे, ऋषावभिधेये, नाम्नि विषये दीर्घोऽन्तादेशो भवति । विश्वामित्रो नामर्षिः । ऋषाविति किम् ? विश्वमित्रो माणवकः । नाम्नीत्येव-विश्वं मित्रमस्य-विश्वमित्रो मुनिः ॥ ७९ ॥**

**श० म० न्यासानुसन्धानम्—ऋषौ० । ऋषावि**ति विषयनिर्देशो न तु निमित्तसप्तम्यन्तम्, निमित्तस्य षष्ठ्यन्तात् परतः श्रूयमाणत्वात्, तदाह- **विश्वशब्दस्य मित्रे उत्तरपदे** इति—मित्ररूपे उत्तरपदे इत्यर्थः । **ऋषावि**ति विशेषपरं न तु सामान्यपरं नहि ऋषिसामान्यस्य विश्वामित्रसंज्ञाऽपि तु तद्विशेषस्य, तथाह—विश्वामित्रो नामर्षिरिति **ऋषाविति किमि**ति—अभिधानस्वाभाव्यादेव कृतदीर्घो विश्वामित्रशब्द ऋषावेव प्रयोक्ष्यत इति ऋषाविति कथनमनावश्यकमिति प्रष्टुराशयः । न सर्वत्राभिधानस्वाभाव्येन निर्वाहः शास्त्रानर्थक्यप्रसङ्गादित्यतिव्याप्तिवारणार्थमवश्यमेव ऋषाविति कथनीयमित्याह- **विश्वमित्रो माणवक** इति—विश्वे मित्राणि यस्येति विग्रहः, पूर्वत्रापि स एवोचितः, तत्पुरुषे सति उत्तरपदलिङ्गतायाः प्राबल्याद् विश्वामित्रमिति स्यात्। **नाम्नीत्येवे**ति—रूढ्या ऋषिविशेषे प्रतिपाद्य एवानेन दीर्घो न तु विशेषणविधयाऽपि तत्परत्वे, तथा सत्यतिप्रसङ्गात्, तदाह- **विश्वं मित्रमस्येति**—मुनेर्हि अहिंसायां प्रतिष्ठितस्य निर्वैरित्वाज्जगदेव तस्य मित्रमिति सर्वोऽपि मुनिर्विश्वमित्र इति न तादृशेऽर्थे प्रतिपाद्येऽस्य सूत्रस्य प्रवृत्तिरिष्टेति भावः, तथा च नाम्नीत्यावश्यकमिति ॥ ३. २. ७९ ॥

## नरे । ३. २. ८० ॥

**त० प्र०—विश्वशब्दस्य नरशब्दे उत्तरपदे, नाम्नि विषये दीर्घोऽन्तादेशो भवति । विश्वे नरा अस्य—विश्वानरो नाम कश्चित् । नर इति किम् ? विश्वसेनः । नाम्नीत्येव—विश्वनरो राजा ॥ ८० ॥**

**श० म० न्यासानुसन्धानम्—नरे ।** योगविभागसामर्थ्यादृषाविति न सम्बध्यते, किन्तु विश्वस्य नाम्नीत्येवेत्याह- **विश्वशब्दस्ये**त्यादिना, **विश्वे नरा अस्ये**ति—विश्वशब्दोऽत्र सर्वपर्यायः, सर्वार्थोऽप्यत्र बहुत्वमात्रपरो न त्ववच्छेदकावच्छेदपरः, अवच्छेदकावच्छेदेन नरत्वनिरूपितस्वामित्वस्याप्रसिद्धेः । **नरे इति किमि**ति—विशिष्य नरशब्दे दीर्घविधानं किमर्थम्, 'अन्यत्रापि' इति सामान्येनैव नाम्नि विश्वशब्दस्य दीर्घो विधीयतामिति तदाशयः । नरादन्यत्रोत्तरपदे दीर्घो नेष्ट इत्याह—प्रत्युदाहरणमुखेन- **विश्वसेनः** इति—विश्वा सेना यस्येत्यर्थे ऽत्र न भवति दीर्घः । नाम्नीत्यस्य सम्बन्धोऽप्यावश्यक इत्याह- **नाम्नीत्येवे**ति। **विश्वनरो राजे**ति—भवति हि राज्ञो बहुनरनिरूपितं स्वामित्वमिति तस्यायं शब्दो विशेषणं न तु नाम, नाम्नीत्युक्तत्वादत्र न भवति दीर्घोऽन्यथा स दुर्निवार इति भावः ॥ ३. २. ८० ॥

## वसुराटोः । ३. २. । ८१॥

**त० प्र०—पृथग्योगान्नाम्नीति निवृत्तम्, विश्वशब्दस्य वसौ राटि चोत्तरपदे दीर्घोऽन्तादेशो भवति । विश्वं वस्वस्य—विश्वावसुः, विश्वस्मिन् राजते इति—विश्वाराट् । राडिति विकृतनिर्देशादिह न भवति—विश्वराजौ, विश्वराजः ॥८१॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—वसु०।** विश्वस्येति प्रकृतं, नाम्नीत्यपि पूर्वतोऽनुसृतं किन्तु तस्य नेह सम्बन्ध इत्याह-**पृथग्योगान्नाम्नीति निवृत्तमिति**, अयमाशयः— नाम्नीत्यस्य सम्बन्धे इष्यमाणे पूर्वत्रैव वसुराटोरपि पाठः करणीयः स्यात् किमिति पृथक्सूत्रमाचरितमिति पृथक्सूत्रकरणसामर्थ्यात् ततः कश्चिदिह विशेषोऽभिमत इति प्रतीयते, स च विशेषः कोऽन्यः स्यान्नाम्नीत्यस्यासम्बन्धात्। **विश्वं वस्वस्येति**-विश्वशब्द इह सर्वविधार्थः, सर्वप्रकारं वसु अस्येत्यर्थः, गावो भूमिर्हिरण्यमिति वसुनस्त्रयः प्रकाराः, तत्र गोपदं सर्वविधपशुपरम्, हिरण्यपदं सर्वविधाकुप्यधनपरम्, भूमिपदं च भूमि-तत्सम्भवसर्वविधान्नादिपरम्, तथा च यस्यैतत्त्रितयान्तर्गतं सर्वप्रकारं वसु भवेत् स एव **विश्वावसुः** न तु सकलजगद्गतधनस्वामी, तादृशस्य कस्यचनाभावात्। **विश्वस्मिन् राजते** इति-सर्वत्र दीप्यत इत्यर्थः। राट्शब्दो हि राज्शब्दप्रकृतिक इति प्रकृत्यैव "वसुराजोः" इति निर्देश उचित इति राडिति विकृतिनिर्देशो व्यर्थ इत्याशङ्कायामाह-**राडिति विकृतिनिर्देशादिति** —प्रकृतिनिर्देशं विहाय विकृतिनिर्देशेन यत्र तादृशो विकारः संभवति तत्रैव दीर्घ इति विज्ञायत इति यत्र न तत्सम्भावना तत्र न दीर्घ इति भावः, तथाहि—पदान्तविषये एव दीर्घो भवति नान्यत्रेति फलति। तदाह-**तेनेह न भवति-विश्वराजौ, विश्वराजः** इति ॥ ३. २. ८१ ॥

## वलच्यपित्रादेः। ३. । २. ८२ ॥

**त० प्र०—वलच्प्रत्यये परे पित्रादिवर्जितानां स्वरान्तानां शब्दानां दीर्घोऽन्तादेशो भवति। आसुतिः सुरा, साऽस्यास्तीति आसुतीवलः, एवम् कृषीवलः, दन्तावलः, उत्सङ्गावलः; पुत्रावलः। अपित्रादेरिति किम्? पितृवलः, भ्रातृवलः, मातृवलः, उत्साहवलः। चकारः किम्? उत्तरपदे मा भूत्-कायवलम्, नागवलम् ॥ ८२ ॥**

**श० म० न्यासानुसन्धानम्—वल०।** **अपित्रादेरिति** पर्युदासः, स च सदृग्ग्राहीति यथाभूताः पित्रादयः स्वरान्तास्तथाविधानामेव दीर्घो भवतीत्याह-**पित्रादिवर्जितानां स्वरान्तानामिति**। पाणिनीये च नयेऽपित्रादेरिति नोच्यते, एतद्विषये "वले" [पा. सू. ६. ३. ११८] इति सूत्रे, किन्तु संज्ञायामिति प्रकरणे तत् सूत्रमुच्यत इति संज्ञातोऽन्यत्र न भवति दीर्घ इत्यपित्रादेरित्यस्य व्यावर्त्यानां पितृवलादीनां तेनैव निवृत्तिर्भवति। उदाहरति—**आसुतिः सुरेत्यादिना**। कृष्यादित्वाद् वलचि-**आसुतीवलः** शौण्डिकः। कृषिः कर्षणमस्य-**कृषीवलः** कर्षकः, दन्तौ यस्य स-**दन्तावलो** हस्ती। उत्सङ्गोऽस्य-**उत्सङ्गावलः**। पुत्रोऽस्येति-**पुत्रावलः**। पाणिनीयादावेतौ प्रयोगौ नोपलभ्येते नामत्वेनाप्रसिद्धत्वात्, नाम्न्येव तत्र दीर्घविधानात्। पर्युदासव्यावर्त्यमाख्यातुं पृच्छति-**अपित्रादेरिति किमिति**। **पितृवल** इत्यादि, सर्वत्र मत्वर्थीयो वलच्। **चकारः किमिति**— *प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव* इति न्यायेन प्रत्ययभूते एव वलशब्दे परे भविष्यति, वलस्य प्रत्ययत्वख्यापनार्थश्चकारो व्यर्थ इति भावः। उत्तरयति—**उत्तरपदे मा भूदिति**, अयमाशयः—यत्र प्रत्ययाऽप्रत्यययोरुभयोः सामान्येन ग्रहणं प्राप्तं तत्रैव तन्न्यायप्रवृत्तिः, इह च 'उत्तरपदे' इत्यननुवृत्तमित्युत्तरपदभूत एव वलशब्दे परे इत्यर्थो गम्येत, न न्यायापेक्षास्यादसन्दिग्धत्वादिति यत्रोत्तरपदभूतो वलशब्दस्तत्रैव स्यान्न त्वन्यत्रेति 'आसुतीवलः' इत्यादौ न स्यात्, कायवलमित्यादौ च स्यादित्यव्याप्त्यतिव्याप्तिरूपोभयदोषापत्तेः। तत्राव्याप्तिदोषस्यातिव्याप्त्यपेक्षया बलवत्त्वेपि तस्य स्वयमूहनीयत्वादतिव्याप्तिदोषमेवाह— **कायवलमि**त्यादिना, अत्र केचित्— 'कृषीवलः' इत्यादौ वकारः [अन्तस्थान्तर्गतः], कायबलमित्यादौ च बकारः [पवर्गीयः] इति वलेऽपित्रादेरिति न्यासेऽपि प्रकृते दोषाभाव एव। दृश्यते च पाणिनीये चकाररहित एव सूत्रपाठे "वले" [पा. सू. ६. ३. ११८] इति प्रत्ययभिन्नस्योत्तरपदभूतस्य 'वल' शब्दस्याप्रसिद्धिरेव। यद्यपि वलधातोरचि वलते इति 'वलः' इति साधयितुं शक्यते, संभवति च तस्य क्लीबताऽपि तथापि तादृशप्रयोगस्याप्रसिद्धत्वेन न कायबलमित्यादौ तस्य संभव इति स्पष्टार्थमेव चकारोपादानमित्याहुः, वस्तुतस्तु—अच्प्रत्ययान्तो वलशब्दः धातुपारायणे स्वयमाचार्येण साधित इति तदप्रसिद्धिरिति नोचितमिति चकारोपादानमावश्यकम्। किञ्चबवयोरैक्यमितिबलशब्दोऽपि वलशब्दो भवतीति ध्येयम् ॥३. २. ८२॥

## चितेः कचि। ३. २ ८३ ॥

**त० प्र०—चितिशब्दस्य कचि प्रत्यये परे दीर्घोऽन्तादेशो भवति। एका चितिरस्मिन् एकचितीकः, द्विचितीकः; त्रिचितीकः॥ ८३ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—चितेः०** । चितिशब्दोऽनेकार्थश्चिनोतेः क्तिप्रत्यये साधुः, समूहे चितायां च वर्तते, इष्टकादिसमूहविषये च निरूढलक्षणया, एका **चितिरस्मिन्नि**त्यादिविग्रहवाक्ये चितिशब्दस्तत्समूहविशेषवाचक एव विज्ञायते, बहुव्रीहौ कृते समासान्तः कच्, तस्मिन् परे पूर्वपदभूतस्य चितिशब्दस्य दीर्घे-**एकचितीकः; द्विचितीकः** इत्यादौ द्वे चिती यस्येत्यादिक्रमेण विग्रहो बोध्यः ॥३.२.८३॥

## स्वामिचिह्नस्याऽविष्टाऽष्ट-पञ्च-भिन्न-छिन्न-छिद्र-स्रुव-स्वस्तिकस्य कर्णे । ३. २. ८४ ॥

**त० प्र०—स्वामी चिह्न्यते येन तत्—स्वामिचिह्नम्, तद्वाचिनो विष्टादिवर्जितस्य कर्णशब्दे उत्तरपदे परे दीर्घोऽन्तादेशो भवति। दात्रमिव दात्रम्, दात्रं चिह्नं कर्णे यस्य स, दात्रमिव वा कर्णौ यस्य स दात्राकर्णः पशुः, एवं—शङ्कूकर्णः, द्विगुणाकर्णः, द्व्यङ्गुलाकर्णः । स्वामिचिह्नस्येति किम्? शोभनकर्णः । स्वामिग्रहणं किम्? लम्बकर्णः, अविद्धकर्णः शिशुः । चिह्नग्रहणं किम्? वाहनस्य कर्णः—वाहनकर्णः । विष्टादिवर्जनं किम्? विष्टकर्णः, अष्टकर्णः, पञ्चकर्णः, भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः, स्रुवकर्णः, स्वस्तिककर्णः । कर्ण इति किम्? चक्रसक्थः ॥ ८४ ॥**

**श० म० न्यासानुन्धानम्—स्वामि०** । **स्वामिचिह्नस्ये**ति शब्दः सन्दिग्धः, किं तत्पुरुषोऽथवा बहुव्रीहिरित्यादिसन्देहे तं व्युत्पादयति- **स्वामी चिह्न्यते- येने**त्यादिना—चिह्न्यते—परिचीयते येन तत् चिह्नं लक्षणम्, स्वामिनश्चिह्नमिति षष्ठीतत्पुरुष इति भावः, तथा च स्वामिपरिचायकस्य पूर्वपदस्येति पर्यवस्यति । "विश्वस्य मित्रे" "चितेः कचि" इत्यादाविव "स्वामिचिह्न०" इति सूत्रोपात्तशब्दस्यैव कर्णशब्दे परे दीर्घ इत्याशङ्कामपनेतुमाह- **तद्वाचिनः** इति—स्वामिचिह्नभूतवस्तुवाचिनः पूर्वपदस्येति भावः, युक्तं चैतत्, स्वामिचिह्नस्य स्वरूपग्रहणे हि विष्टादीनां दीर्घस्याप्रसक्तेस्तद्वर्जनस्य वैयर्थ्यं स्यादेव, विष्टादयो हि स्वामिपरिचायकचिह्नविशेषा एव, तत्पर्युदासात् तत्सदृशा अन्ये चिह्नवाचिनः शब्दा एव ग्राह्या इति भावः । **दात्रमिव दात्रमि**ति—दात्रं हि लौहादिनिर्मितं काष्ठादिद्विधाकरणसाधनम्, तद्धि न पश्वादीनां कर्णे स्वामिविशेषपरिचायकत्वेन तिष्ठत्यपि तु तदाकारेण रोमदाहादिचिह्नमेव, तथा च न तद्दात्रमपि तु तदाकारत्वात् तत्सदृशमेव, तदेव सादृश्यनिबन्धनं तेन शब्देन व्यवह्रियते लक्षणया । **दात्रमिव वा कर्णौ यस्ये**ति—एतच्च विग्रहान्तरसम्भावनाप्रदर्शनमात्रं न तु वस्तुतः स्वामिचिह्नत्वसाधकम्, न प्राकृतिकेन दात्राद्याकारेण चिह्नेन स्वामिविशेषः परिचीयते, कृते तु संकेते कश्चिदित्थंभूतः पशुः स्वामिविशेषसम्बन्धितया परिचीयेतापि परं न तत्साधारण्येन चिह्नतया व्यवहर्तुं शक्यते । एवं- **शङ्कूकर्णः** इति—यथा दात्राकर्ण इत्यत्र विग्रहस्तथाऽस्यापीत्यर्थः । **द्विगुणाकर्णः** इति—द्विगुणं—चिह्नं कर्णे यस्येत्यर्थः। **द्व्यङ्गुलाकर्णः** इति—द्वे अङ्गुली मानमस्येत्यर्थे तद्धितार्थसमासे "संख्याव्ययादङ्गुलेः" (७. ३. १२४) इति डे, मानार्थके मात्रटि कृते-तस्य "द्विगोः संशये च" (७. १. १४४) इति लुपि द्व्यङ्गुलमिति, द्व्यङ्गुलं कर्णे यस्येति विग्रहे बहुव्रीहिसमासेऽनेन पूर्वपदस्य चिह्नवाचिनो दीर्घे-द्व्यङ्गुलाकर्ण इति । कर्णस्य द्व्यङ्गुलत्वं न चिह्नविशेषतया व्यवहर्तुं शक्यत इति मते तु-द्वयोरङ्गुल्योः समाहार इत्यर्थे द्व्यङ्गुलपदं संसाध्य द्व्यङ्गुलरूपं चिह्नं यस्य कर्णे इति विग्रहः कार्यः । **स्वामिचिह्नस्येति किमि**ति-सामान्यतो विष्टादिवर्जितस्य पूर्वपदस्य कर्णशब्दे उत्तरपदे दीर्घो विधीयतामिति प्रष्टुराशयः । **शोभनकर्णः** इति—कर्णस्य शोभनत्वं न स्वामिविशेषपरिचायकमिति तस्य [शोभनशब्दस्य] दीर्घो न भवति, स्वामिचिह्नस्येति पदस्याभावे च स्यादेवेति तद्वारणाय तदावश्यकमिति भावः । नन्वेतद्वारणाय चिह्नस्येत्येव पर्याप्तमिति शङ्कते- **स्वामिग्रहणं किमि**ति—यथाकथंचिच्चिह्नभूतस्य पूर्वपदस्य विष्टादिवर्जितस्य कर्णे उत्तरपदे दीर्घो भवतीत्येवाश्रयणीयमिति भावः। तत्राह— **लम्बकर्णः** इति—लम्बौ कर्णौ यस्येति विग्रहः, कर्णानां लम्बत्वं स्वामिनः परिचायकं नास्ति चिह्नरूपं त्वस्त्येव, साधारणकर्णापेक्षया तस्य व्यावर्त्तकत्वात्, तथा चात्र दीर्घः स्यात्, इष्यते तु नेति तद्वारणाय स्वामिग्रहणं कार्यमिति भावः । एवम्- **अविद्धकर्णः शिशुः** इत्यत्रापि कर्णवेधस्य चिह्नविशेषरूपत्वे सत्यपि स्वामिविशेषपरिचायकत्वं नास्तीति न भवति तत्र दीर्घः, स्वामिग्रहणाभावे च स्यादेवेति तद्वारणाय स्वामिग्रहणमावश्यकम्। **चिह्नग्रहणं किमि**ति— तथा च स्वामिवाचकस्य पूर्वपदस्य दीर्घ इत्येवार्थः स्यात्, तथा च वाहनस्य कर्णो वाहनकर्ण इति विग्रहः कर्णनिरूपितं स्वामित्वं वाहनेऽस्तीति तस्य

"Aho Shrutgyanam"

दीर्घः स्यात्; यद्यपि चिह्नग्रहणाभावे स्वामिन एव दीर्घविधाने विष्टादिपर्युदासोऽपि व्यर्थः स्यात्, विष्टादिषु केषांचित् स्वामित्वस्य क्वाप्यसंभवात्, तथापि प्रवाहगत्याऽतिव्याप्तिरेव दोषत्वेन दत्तेति न किमपि परिहीणम्। **विष्टादिवर्जनं किमिति**–विष्टादिवर्जनेन किं फलमिति जिज्ञासा, विष्टं व्याप्तं [चिह्नं] कर्णे यस्य स **विष्टकर्णः**। विष्टशब्दो व्याप्त्यर्थकाद् विषेः, अष्टशब्दोऽपि व्याप्त्यर्थकादश्नोतेः क्ते सिद्धः, अष्टशब्दः संख्यावाचकोऽपि पञ्चशब्दसाहचर्यात्, तत्पक्षे च अष्टौ [चिह्नानि] कर्णे यस्य पञ्च [चिह्नानि] कर्णे यस्येत्यादिरीत्या विग्रहः। भिदेश्छिदेश्च क्ते-भिन्नच्छिन्नशब्दौ, तावपि स्वामिविशेषपरिचायकचिह्नवाचिनौ, स्वामिविशेषपरिज्ञानाय भेद-च्छेदौ विशेषरीत्या क्रियेते, भिन्नं-[चिह्नं] कर्णे यस्येति, भिन्नौ छिन्नौ वा कर्णौ यस्येति वा विग्रहः। छिद्रं [सुषिरं] कर्णे यस्य **स च्छिद्रकर्णः**। स्रुव इव स्रुवः [स्रुवाकारं चिह्नं] कर्णे यस्य स–**स्रुवकर्णः**। स्वस्तिकः–मङ्गलसूचकचिह्नविशेष एव, स कर्णे यस्य स **स्वस्तिककर्णः**। एषु सर्वत्र दीर्घो न स्यादित्येव विष्टादिवर्जनप्रयोजनमिति भावः। **कर्णः इति किम्?** स्वामिचिह्नस्य कर्ण एव प्रायो दर्शनादसत्यपि कर्णग्रहणे कर्णे परत एव भविष्यतीत्यभिमानेन प्रश्नः। न चिह्नं कर्ण एव भवत्यन्यत्रापि तद्दर्शनादित्याह-**चक्रसक्थः** इति–चक्राकारं चिह्नं सक्थनि यस्येति विग्रहः "सक्थ्यक्ष्णः स्वाङ्गे" [७.३.१२६] इति टः समासान्तः, अत्र पूर्वपदस्य दीर्घवारणार्थं कर्णे इत्यावश्यकमिति भावः॥३. २. ८४॥

## गतिकारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ ३. २. ८५॥

**त० प्र०–गतिसंज्ञकस्य कारकवाचिनश्च नह्यादिषु क्विबन्तेषूत्तरपदेषु परेषु दीर्घोऽन्तादेशो भवति उपनह्यति उपनह्यते वा–उपानत्, परीणत्; वृत्–नीवृत्, उपावृत्, वृष्–प्रावृट्, परीवृट्, व्यध्–श्वावित्, मर्मावित्; रुच्–नीरुक्, अतीरुक्, अभीरुक्; सह्–तुरासट्, ऋतीषट् भीरुष्ठानादित्वात् षत्वम्; जलासट्; तन्–परीतत् "गमां क्वौ" ४.[२.५८.] इति नलोपः। गतिकारकस्येति किम्? पटुरुक्, तिग्मरुक्, तीव्ररुक्, श्वेतरुक्, कमलरुक्; केचित्तु रुजाविच्छन्ति न रुचौ, तेन रुजरुच्योर्मतभेदेन विकल्पः सिद्धः, रुज्–निरुक्, नीरुक्; रुच्–अतिरुक्, अतीरुक्। क्वाविति किम्? उपनद्धम्, विततम्। इह क्विग्रहणादन्यत्र धातुग्रहणे तदादिविधिर्लभ्यते, तेन 'अयस्कृतम्, अयस्कारः इत्यादौ सकारः सिद्धो भवति, अन्यथा ह्ययस्कृदित्यत्रैव स्यात्॥ ८५॥**

१२

**श० म० न्यासानुसन्धानम्–गति०। 'नहि-वृति-तनौ' 'क्वौ'** इत्युभयं सप्तम्यन्तं विशेष्यविशेषणभावेन सम्बध्यते, नह्यादयो विशेष्याणि क्वाविति विशेषणम्, तेनोभयथापि तदन्तग्रहणसम्भवः, प्रत्ययग्रहणन्यायेन विशेषणं तदन्तस्य ग्राहकमित्यर्थकेन "विशेषणमन्तः" [७.४.११३] इति परिभाषासूत्रेण च, तत्रोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नेति पूर्वमुक्तत्वेन प्रत्ययग्रहणनिमित्तकतदन्तविधिर्न भवत्यपि तु विशेषणनिमित्त एव, तथा चैकदैव तदन्तार्थयोजनं न द्विः। तदाह **नह्यादिषु क्विबन्तेष्विति**। नह्धातुविषयमुदाहरणमाह-**उपनह्यतीति**–कर्त्तरि विग्रहः, नहेर्दिवादित्वात्, **उपनह्यते** परिधीयते पादयोः बध्यते वा इति कर्मणि विग्रहः, उभयथापि वाच्यस्य पादत्राणस्य **प्रतीति**र्भवति, नहेः क्विप्, गतिसंज्ञस्योपशब्दस्य दीर्घः। परिणह्यत इति-**परीणत्**। निवर्तते इति–**नीवृत्**। उपवर्त्तत इति–**उपावृत्**। प्रवर्षतीति-**प्रावृट्**। परिवर्षतीति-**परीवृट्**। श्वानं विध्यतीति–श्वावित्, व्यधेः क्विपि "ज्या-व्ये-व्यधि०" [४. १. ७१] इति यस्य इः कारकरूपस्य पूर्वपदस्य **दीर्घः**। मर्म विध्यतीति-**मर्मावित्**। निरोचत इति-**नीरुक्**। अतिरोचत इति-**अतीरुक्**। अभिरोचत इति-**अभीरुक्**। तुरं वेगं सहते इति-**तुरासट्**, तुरेः "नाम्युपान्त्य" [५. १. ५४] इति के तुरशब्दो वेगवाची, तदुपपदात् सहेः क्विप्। 'तुराषाट्' इति प्रयोगोऽपि दृश्यते, स च छान्दसः, "छन्दसि सहः" [पा० सू० ३. २. ६३] इति सूत्रेण 'ण्वि' विधाने अन्येषामपि दृश्यते [पा० सू० ६. ३. १३७] इति पूर्वपदस्य दीर्घे तत्सिद्धिः। लोकेऽपि तुराषाट् शब्दः प्रयुज्यते–"तुराषाण्मेघवाहनः" इतीन्द्रनामसु पाठात्। "तुरासाहं पुरस्कृत्य धाम स्वायंभुवं ययुः" इति रघुवंशे कालिदास प्रयोगाच्च। इत्थं च लोके तत्सिद्धिः कथमित्याशङ्कायां दीक्षित आह–"लोके तु साहयतेः क्विबिति, दीर्घस्तु पूर्ववत्। **ऋतीषट्** ऋतिं पीडां सहते इति विग्रहः, "भीरुष्ठानादयः" [२. ३. ३३] इति सूत्रे गणेऽस्याप्यन्तर्भावाश्रयणात् षत्वम्,

"Aho Shrutgyanam"

तदाह- **भीरुष्ठानादित्वात् षत्वमिति । जलासट्** जलं सहते इति विग्रहः । **परीतत्** परितनोतीति विग्रहः, क्वौ सति "गमां क्वौ" [ ४. २. ५८ ] इति नलोपमाह- **गमां क्वाविति**-नलोपे सति "ह्रस्वस्य तः पित्कृति" [४. ४. ११३] इति तागमः । पदकृत्यमाह- **गतिकारकस्येति किमिति**-धातोः पूर्वं प्रायो गति-कारकयोरेव प्रयोगादसत्यपि गति-कारकस्येति कथने तयोरेव दीर्घः स्यादिति प्रष्टुराशयः । प्रत्युदाहरणेनोत्तरयति- **पटुरुगि**त्यादिना, अयमाशयः-अवश्यं गतिकारकयोरेव प्रायो धातुना योगः, किन्तु क्विबन्त-स्थले नैवं शक्यते वक्तुम्, क्विबन्ते केवलधातोरप्युत्तरपदत्वसं-भावनायां तस्य विशेषणात् परत्वमपि संभाव्यते, विशेषणं च यद्यपि क्रियान्तरं प्रति कारकं परम्परया उत्तरपदद्वारा अस्त्येव, तथापीह प्रत्यासत्त्या रुच्यादिक्रियापेक्षं कारकत्वं ग्राह्यमिति पट्वी रुक् यस्येति विग्रहे नास्ति पट्वीशब्दस्य रुच् धात्वर्थं प्रति कारकत्वमपि तु विद्यमानार्थादिक्रियान्तरापेक्षयेति न भवति तस्य दीर्घः, गतिकारकस्येत्यस्याभावे तु स्यादेवेति तद्वयावर्त्तनाय गतिकारकस्येति कथनमावश्यकमेव । एवं-**तिग्मरुगि**त्यादावपि विज्ञेयम् । मतान्तरमाह-- **केचित्तु रुजाविति**-रुचिस्थाने रुजि सूत्रे पठन्तीति भावः, तथा च तेषां मते रुजावेव क्विबन्ते दीर्घो न तु रुचौ, स्वमते च रुचावेव क्विबन्ते दीर्घो न तु रुजाविति आचार्यद्वयमतभेदे-नोभयोरपि रुचिरुजोर्विषये दीर्घ-तदभावौ साधू इति विकल्पः फलतीत्याह-**तेन रुज-रुच्योर्मतभेदेने**ति । तथैवोदाहरति-**निरुक् नीरुगि**त्यादिना, रुचि-रुज्यो रूपे विशेषः क्वचिदे-वापदान्ते पदान्ते तु सारूप्यमेव, अर्थ एव भेदः । **क्वौ किमि**ति-धातोः केवलस्य प्रयोगाभावात्, तन्मात्रस्य नोत्त-रपदत्वं, प्रत्ययान्तरपरस्य च न तद्रूपतेति विनापि क्विग्रहणं क्विबन्तेष्वेवैतेषु दीर्घो भविष्यतीति क्विग्रहणमनावश्यक-मिति प्रष्टुराशयः । 'न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययाः' इति सिद्धान्तेन केवलस्य धातोः प्रयोगाभावा-देव सूत्रसार्थक्याय क्विबन्तेष्विव प्रत्ययान्तरपरेष्वपि नह्या-दिषु सूत्रप्रवृत्तिः स्यादिति प्रत्युदाहरणमुखेनाह- **उपनद्धं, विततमि**ति--उपनद्धमित्यत्र क्तान्तो नह् धातुः,विततमित्यत्र क्तान्तस्तन्धातुः, अनयोर्गतिसंज्ञकस्य न दीर्घोभवति । एवं च क्विग्रहणं स्वसार्थक्यद्वाराऽन्यत्र धातुग्रहणे तदादिविधिं सूचय-तीत्याह-**इह क्विग्रहणादि**ति,अयमाशयः-प्रकृतसूत्रे 'उत्तरपदे' इत्यधिकारान्नह्यादावुत्तरपदे परे इत्यर्थलाभादुपनद्धं वितत-मित्यादिषु नह्यादिरूपोत्तरपदपरत्वाभावादतिव्याप्तिविरहेण 'उपानत्, परीतत्' इत्यादौ च तद्रूपोत्तरपदपरत्वसत्त्वादव्या-प्तिविरहेण च विनापि क्वाविति पदं क्वापि दोषाभावात् व्यर्थं सत् क्वाविति पदमन्यत्र धातुग्रहणे तदादिग्रहणमिति सूचयति एवं च प्रकृतसूत्रेऽपि--इकारप्रत्ययेन सह धातुश्रवणाद् धातु-ग्रहणसत्त्वात् पदादिग्रहणापत्तौ नहोदिधात्त्वादावुत्तरपदे परे इत्यर्थसत्त्वे उपनद्धं विततमित्यादावपि दीर्घप्रवृत्तिः स्या-दिति तद्वारणाय क्वाविति पदस्य स्वांशे सार्थक्यमिति । अन्यत्र फलं च दर्शयति- **तेन 'अयस्कृतम्, अयस्कारः' इत्यादौ सकारः सिद्धो भवतीति**ति, अयमाशयः-"अतः कृ-कमिकंस०" [ २. ३. ५. ] इति सूत्रे कृधातुर्निर्दिष्टः, तस्य स्वरूपमात्रस्य ग्रहणे च 'अयस्कृत्' इत्यादावेव कथ-ञ्चित् सूत्रं प्रवर्त्तेत, न तु 'अयस्कृतम्, अयस्कारः, इत्यादि-क्ता-ऽणप्रत्ययान्ते करोतौ, प्रकृतज्ञापने तदादिविधिलाभे तु करोत्यादौ शब्दे परे प्रवृत्त्या भवति 'अयस्कृतम्' इत्यादा-वपि सूत्रप्रवृत्तिः, ज्ञापनाभावे दोषमाह--**अन्यथा ह्यय-स्कृदित्यत्रैवे**ति--व्याख्यातपूर्वमेवैतदिति ॥ ३. २. ८५ ॥

## घञ्युपसर्गस्य बहुलम् ॥ ३. २. ८६ ॥

**त० प्र०–घञन्ते उत्तरपदे परे उपसर्गस्य बहुलं दीर्घो-ऽन्तादेशो भवति । नीक्लेदः, नीमेदः, नीमार्गः, नीवारः, प्रावारः, नीशारः; क्वचिन्न भवति–निषादः, विषदनं-विषादः, प्रतपनं–प्रतापः, प्रभावः, प्रभारः, प्रहारः, क्वचिद् विकल्पः–प्रतीवेशः, प्रतिवेशः; प्रतीपादः २, प्रतीबोधः २, परीणामः २, प्रतीहारः २, प्रतीकारः २, अतीसारः२, वीसर्पः २; क्वचिद् विषयभेदेन–प्रासादो गृहम्, प्रसादोऽन्यः; प्राकारो वप्रः, प्रकारोऽन्यः; अपामार्ग ओषधिः, अपमार्गोऽन्यः; नीहारो हिमम्, निहारोऽन्यः; परीरोधो, मृगावरोधः परिरोधोऽन्यः; परीहारो देशानुग्रहः, परिहारोऽन्यः; वीतंसः–पक्षिबन्धनम्, वितंसोऽन्यः ।**

**उपसर्गस्येति किम् ? चन्दनसारः, खदिरसारः, मार्गमतिक्रान्तः–अतिमार्गः । घञीति किम् ? अवसायः, अवहारः, णप्रत्ययोऽयम् । बहुलवचनादनुपसर्गस्यापि अघ-ञ्यपि च भवति–दक्षिणापथः, उत्तरापथः । क्वचिद् विकल्पः–अन्धतमः, अन्धातमः; अन्धतमसम्, अन्धातमसम्। क्वचिद् विषयभेदेन–अधीदन्तः, अधीकर्णः, अधीकण्ठः,**

"Aho Shrutgyanam"

**अधीपादः, एते आधिक्ये, अन्यत्र–अधिदन्त इत्यादि भवति। क्वचिदनुत्तरपदेऽपि विकल्पः–पूरुषः, पुरुषः; नारकः, नरकः; सादनम्, सदनम्; अतिशायनम्, अतिशयनम्। काशशब्दे च घञन्ते विकल्पः–नीकाशः, निकाशः; प्रतीकाशः, प्रतिकाशः; अजन्ते तूदारो विधिः ॥ ८६ ॥**

**श० म० न्यासानुसन्धानम्—घञ्यु०।** घञः प्रत्ययत्वेन *प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्* इति न्यायेन तदन्तार्थलाभादाह **घञन्ते उत्तरपदे** इति, यद्यपि उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्' इति पूर्वमुक्तत्वेनेह तदन्तग्रहणमनुचितं तथापि केवलेन घञा सहोत्तरपदस्य सामानाधिकरण्यासम्भवात्, उपसर्गस्य च घञा सह साक्षात् पूर्वापरीभावासम्भवाच्च तदन्तविधेरावश्यकत्वमिति सूत्रसार्थक्यान्यथानुपपत्त्या पूर्वोक्ततदन्तग्रहणनिषेधनियमस्येह न प्रवृत्तिरिति स्वीकार्यम्। **नीक्लेदः** इति–क्लिद्यतेर्घञि क्लेद इति, उपसर्गस्य निशब्दस्य दीर्घोऽन्तादेशः, एवं- **नीमेदः** इत्यत्रापि, निक्लेदनं नीक्लेदः, निमेदनं नीमेद इत्येवं प्रकारेण विग्रहः। **नीमार्गः** इति–निमार्जनमित्यर्थे निपूर्वकान्मृजेर्घञ्। **नीवारः** इति–निवरणमिति विग्रहे निपूर्वकाद् वृणोतेर्घञ्। प्रवरणं- **प्रावारः,** प्रव्रियतेऽनेन वेति विग्रहः। **नीशारः** निशरणमिति विग्रहे शृणातेर्घञ्। बहुलग्रहणप्रयोजनवर्णनार्थं तल्लभ्यार्थोदाहरणमाह— **क्वचिन्ने**त्यादिना, क्वचिदप्रवृत्तिरूपस्य बाहुलकस्योदाहरणमुच्यत इति भावः। **निषादः** इति–निषीदति मनः पापं वा यस्मिन्नित्यर्थेऽधिकरणे घञ्, पूर्वविग्रहेण निषादनामा स्वरः, परेण च म्लेच्छजातिविशेष उच्यते; अत्र घञन्ते उत्तरपदे सत्यपि नोपसर्गस्य दीर्घः। **विषदनं विषादः** इति–विषीदति मनोऽस्मिन्निति वा विग्रहे विपूर्वकात् सीदतेर्घञ् भावेऽधिकरणे वाऽर्थे। **प्रतपनं प्रतापः** इति- अयमपि शब्दोऽधिकरणव्युत्पत्त्याऽपि साधनीयः सूर्यातपादौ तदर्थस्यैव सङ्गतेः। एवं–प्रभवनं- **प्रभावः,** प्रमरणं **प्रमारः,** प्रहरणं- **प्रहारः** इति विग्रहः कार्यः। क्वचिद् विभाषेति बाहुलकं समुदाहरति- **क्वचिद् विकल्पः** इति। **प्रतीवेशः** इति–प्रतिवेशनं प्रतिविशन्त्यस्मिन् वेति–विग्रहः, गृहसमीपस्थगृहान्तरं प्रतीवेश-प्रतिवेशशब्दाभ्यामाख्यायते। एवं–प्रतिपदनं- **प्रतीपादः,** प्रतिबोधनं- **प्रतीबोधः,** परिणमनं **परीणामः,** प्रतिहरणं– **प्रतीहारः,** प्रतिहरत्यस्मिन्निति वा--प्रतीहारः। प्रतिकरणं– **प्रतीकारः,** अतिसरणम्- **अतीसारः,** विसर्पणं- **वीसर्पः** इति, एषूभयथा प्रयोगदर्शनाद् विकल्पेन दीर्घो भवतीति प्रतीयते। क्वचिदन्यदेवेति बाहुलकमुदाहर्तुमाह- **क्वचिद् विषयभेदेनेति**–विषयोऽर्थः, तद्भेदेन प्रवृत्त्यप्रवृत्ती भवत इत्यर्थः, अर्थविशेषे दीर्घः प्रयुज्यते तदन्यार्थे च न दीर्घ इति भावः। **प्रासादो गृहमि**ति–प्रसीदन्त्यस्मिन्निति विग्रहेऽधिकरणे घञि दीर्घ; प्रसदनं प्रसत्तिर्वेति विग्रहे प्रसादोऽनुग्रहः। **प्राकारो वप्रः** इति–प्रकीर्यते- परिविक्षिप्यत इति प्राकारो वप्र इष्टकादिरचितः प्राचीरः, **प्रकारोऽन्यः** प्रकरणमित्यर्थे घञि प्रकारशब्दो भेदवाची सादृश्यवाची च "प्रकारो भेद-सादृश्ये" इत्युक्तेः। **अपामार्ग औषधिविशेषः** इति–अपमृज्यते व्याध्यादिरनेनेति विग्रहे साधुः, **अपमार्गोऽन्यः** इति–अपमार्जनमिति विग्रहः। **नीहारो हिममि**ति–निह्रियते सूर्यकिरणादिनाऽपनीयत इति नीहारः कर्मणि घञ्, **निहारोऽन्यः** इति–निहरणमित्यर्थः। **परीरोधो मृगावरोधः** इति–परितो रोधनं गतिनिवारणं परीरोधः, मृगयुभिर्मृगमन्यं वा वन्यं पशुं क्वचिद् वनमध्ये स्थितमनुमाय सर्वदिक्षु तन्निर्गमरोधनं क्रियते तस्यैव संज्ञेयम्, **परिरोधोऽन्यः** इति–तद्भिन्नो जलादिनिर्गमरोधनादिः परिरोध एवेत्यर्थः। **परीहारो देशानुग्रहः** इति–देशस्यानुकूलतया ग्रहणं परीहारः, **अन्यः** परिहरणादिरूपः **परिहार** एव। **वीतंसः पक्षिबन्धनमि**ति–वितंस्यतेऽनेनेति वीतंसः, अन्यत्र वितंसनमलंकरणं- **वितंसः** इति। एवं चैतेषु नियतार्थादन्यार्थविषये न दीर्घप्रवृत्तिः। **उपसर्गस्येति किमि**ति–घञन्ते उत्तरपदे पूर्वपदमात्रस्य दीर्घविधानेऽपि प्राय उपसर्गस्यैव घञन्तपूर्ववर्त्तितेति नातिप्रसक्तिरिति प्रष्टुराशयः। न केवलमुपसर्गस्यैव घञन्तपूर्ववर्त्तिताऽपि तु पदान्तरस्यापीत्यतिप्रसङ्गः स्यादित्याह- **चन्दनसारः खदिरसारः** इति–सरणं सारः, चन्दनस्य सार इति विग्रहः, खदिरस्य सार इति षष्ठीसमासे पूर्वपदस्य दीर्घः स्यादिति तद्वारणायोपसर्गस्येति कथनमावश्यकमिति भावः। न केवलं पदान्तरव्यावृत्तिरेव प्रयोजनमपि तु धात्वन्तरोपसर्गस्य धात्वन्तरसमभिव्याहारे गतिसंज्ञकमात्रस्य दीर्घवारणमपि तत्प्रयोजनमित्याह- **मार्गमतिक्रान्तः** इति–अत्र मार्गशब्दो घञन्तोऽतिरुपसर्गोऽपि क्रान्तापेक्ष इति मार्गापेक्षया तस्योपसर्गत्वाभावेन गतित्वमात्रमिति तस्य दीर्घो मा भूदित्येतदपि तत्प्रयोजनमिति भावः। **घञीति किमि**ति–कृतीत्यादिरूपेण सामान्यतः कृदन्ते उत्तरपदे परे दीर्घो विधीयतां

"Aho Shrutgyanam"

विशिष्य घञीति कथनं व्यर्थमिति प्रश्नाशयः। व्यावर्त्यमाह-**अवसायः, अवहारः** इति, नन्वत्रापि अवपूर्वात् स्यतेर्घञेव, एवमवपूर्वाद्धरतेर्घञेवेति भाव्यमेव घञीति कथितेऽपि दीर्घेणेति चेदत्राह-**णप्रत्ययोऽयमि**ति-नात्र भावाद्यर्थको घञ्, अपि तु कर्त्रर्थकः "अवहृसासंस्रोः" [ ५. १. ६३ ] इति सूत्रविहितो णप्रत्यय इति घञीति कथने न भवति दीर्घप्राप्तिस्तदभावे च स्यादेव दीर्घं इति तद्व्यावृत्त्यर्थं घञीति वाच्यमेवेति भावः। बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वमपीहेत्याह- **बहुलवचनादनुपसर्गस्यापि अघञ्यपी**ति-सूत्रोपात्तमुपाधिद्वयं-घञीति उपसर्गस्येति च, बहुलवचनसामर्थ्याच्चोभयव्यभिचारोऽपि दृश्यते-क्वचिदनुपसर्गस्यापि पूर्वपदस्य दीर्घो भवति घञन्तोत्तरपदाभावेऽपि, तथा च पूर्वपदमात्रस्योत्तरपदमात्रे दीर्घ इति क्वेत्याह- **दक्षिणापथः, उत्तरापथः** इति-दक्षिणः पन्थाः-दक्षिणापथः, उत्तरः पन्थाः-उत्तरापथ इति विग्रहः, कर्मधारये सति "ऋक्-पूः-पथ्यपोऽत्" [ ७. ३. ७६ ] इत्यत्, पाणिनीयाश्च दक्षिणस्यां पन्थाः-दक्षिणापथः, उत्तरस्यां पन्थाः-उत्तरापथ इति विगृह्णन्तीति न पूर्वपददीर्घमाश्रयन्ते। न केवलमुपाधिद्वयव्यभिचार एव, तत्र विकल्पोऽपि बहुलवचनेन लभ्यत इत्याह- **क्वचिद् विकल्पः** इति-अनुपसर्गस्यापि अघञ्यपि क्वचिद् विकल्पेन दीर्घो भवतीत्यर्थः। क्वेत्याह-**अन्धतमः अन्धातमः** इत्यादि, अत्र रूपद्वयमिदं लेखकप्रमादायातमिति प्रतीयते, यतः "समवान्धात् तमसः" [७. ३. ८०] इति विधीयमानः समासान्तोऽत् नित्यमेव विधीयते, केवलं दीर्घविकल्प एवेति **'अन्धतमसम्, अन्धातमसम्'** इत्येव रूपद्वयमुचितम्, यदि च *समासान्तविधिरनित्यः* इति न्यायाश्रयणेनेदं समासान्तरहितं रूपद्वयमित्युच्यते, तर्हि सति तादृशशिष्टप्रयोगे वयमपि स्वीकुर्मः, न तु क्वापि दृश्यते तादृशः प्रयोगः, वाङ्मयस्यानन्तत्वात् कथमिदमुच्यत इति चेदस्तु। नैतावदेव अस्त्यन्यदपि प्रकृतबहुलवचनप्राप्तवैशिष्ट्यं, तदाह **क्वचिद् विषयभेदेने**ति-अनुपसर्गस्याप्यघञ्यपि क्वचिद् विषयभेदेन दीर्घो भवति न वा भवतीत्यपि बहुलवचनादेव लभ्यत इति भावः। क्वेति चेदत्राह—**अधीदन्तः** इत्यादि-अधिको दन्त इति विग्रहः, अधेर्निपातस्याधिकार्थत्वात्। एवम्—**अधीकर्णः** इत्यादावप्यधेर्निपातस्याधिकार्थस्यैव दीर्घः। तदाह—**एते आधिक्ये** इति-एते प्रयोगा आधिक्यविषय एव कृतदीर्घा भवन्तीति तदर्थः। पूर्वमुक्तस्य क्वचिद् विकल्प इति पक्षस्य शेषभूतमेवार्थं विषयभेदप्रसङ्गेन प्रत्ययभेदप्रसङ्गस्य स्मृतत्वात् प्रत्ययभेदेनापि क्वचिद् विकल्प इति सूचयति—**काशशब्दे च घञन्ते विकल्पः** इति-काशशब्दो द्विधा व्युत्पाद्यते-घञाऽचा च, तत्र घञन्तेऽनेन सूत्रेण वैकल्पिको दीर्घो भवतीत्यपि बहुलवचनलभ्य एवार्थ इति भावः। क्वेत्याह— **नीकाशः, निकाशः** इति-उभयथापि कविप्रयोगदर्शनादत्र वैकल्पिको दीर्घः। एवं—**प्रतीकाशः** इत्यत्रापि, उभावपि शब्दौ सादृश्ये प्रयुज्येते। घञन्ते विकल्प इत्युक्त्या सूचितोऽन्यत्र विशेषः क इत्याकाङ्क्षायामाह—**अजन्ते तूत्तरो विधिरि**ति-उत्तरसूत्रेण नाम्यन्तस्योपसर्गस्याजन्ते काशशब्दे परे नित्यमेव दीर्घो भवति, तदन्यस्य नेति भावः॥ ३. २. ८६॥

## नामिनः काशे ॥ ३. २. ८७ ॥

**त० प्र०-नाम्यन्तस्योपसर्गस्य "अच्" [ ५. १. ४९ ] इत्यजन्ते काशशब्दे उत्तरपदे परे दीर्घोऽन्तादेशो भवति। निकाशते निकाश्यत इति वा-नीकाशः, विकाशते इति-वीकाशः, अनूकाशः; प्रतीकाशः। बहुलाधिकारान्निकाश इत्यपि। नामिन इति किम्? प्रकाशते इति-प्रकाशः॥ ८७॥**

**श० म० न्यासानुसन्धानम् नामिनः०**। उपसर्गस्येति सम्बध्यते पूर्वसूत्रात्, तस्य च **नामिनः** इति विशेषणमिति "विशेषणमन्तः" [ ७. ४. ११३ ] इति परिभाषासूत्रबलेन तदन्तार्थलाभादाह— **नाम्यन्तस्योपसर्गस्ये**ति-"अनवर्णा नामी" [ १. १. ६ ] इति संज्ञासूत्रेण अवर्णवर्जानामौदन्तानां स्वराणां नामिसंज्ञाविधानेऽपि 'ए ऐ ओ औ' वर्णानां स्वत एव दीर्घत्वेन दीर्घविधानानर्थक्यात् लृकारान्तानामेवेहोद्देश्यत्वं, तत्रापि ऋकारान्त-लृकारान्तस्योपसर्गस्याश्रुतत्वात् परिशेषादिकारोकारयोरेव ग्रहणमितीकारोकारान्तस्योपसर्गस्येति पर्यवस्यति सूत्रे **'काशे'** इति सामान्यनिर्देशेऽपि लक्ष्यैकचक्षुष्केणाचार्येण लक्ष्यानुसारमेव व्याख्यातव्यमिति विशिष्य काशशब्दं परिचाययति—"**अच्**" [ ५. १. ४९ ] **इत्यजन्ते काश शब्दे** इति-यद्यप्यजन्ते इत्येतावदुक्तावपि "अच्" [ ५. १. ४९ ]

"Aho Shrutgyanam"

सूत्रविहिताजन्त एव ग्रहीष्यतेऽन्यस्याजन्तस्य काशशब्दस्याप्रसिद्धेः, तथापि स्पष्टार्थं सूत्रोपादानमपि कृतमिति बोध्यम् । 'अच्' प्रत्ययस्य कर्तरि विहितत्वात् तदनुकूलमेव विग्रहमाह— **निकाशते इति-नीकाशः** इति, एवम्-अनुकाशते प्रतिकाशते इत्येवंरूपेण विग्रहः कार्यः । **बहुलाधिकारादि**ति-पूर्वसूत्रोक्तबहुलग्रहणस्य लक्ष्यानुरोधादिहापि सम्बन्धाश्रयणादजन्तेऽपि काशशब्दे परे क्वचिद्विकल्पेन दीर्घो भवतीति भावः । **नामिन इति किमि**ति-अजन्ते काशशब्दे परे सामान्यत एवोपसर्गस्य दीर्घो विधीयतामिति भावः । अवर्णान्तस्योपसर्गस्य दीर्घो नेष्ट इति तद्व्यावृत्त्यर्थमावश्यकमेव नामिन इति पदमित्याह प्रत्युदाहरणमुखेन— **प्रकाशते इति-प्रकाशः** इति-अत्र दीर्घो न भवेदित्येव 'नामिनः' इत्यस्य फलमित्यर्थः ॥ ३. २. ८७ ॥

## दस्ति ॥ ३. २. ८८ ॥

**त० प्र०-'दा' इत्येतस्य यस्तकारादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घोऽन्तादेशो भवति । नीत्तम्, वीत्तम्, परीत्तम्, परीत्तवान्, परीत्त्रिमम्, प्रणीत्त्रिमम् । द इति किम् ? वितीर्णम् । तीति किम् ? सुदत्तम् । नामिन इत्येव-प्रत्तम्, अवत्तम् ॥ ८८ ॥**

**श० म० न्यासानुसन्धानम्-दस्ति** । नामिन उपसर्गस्येति च पूर्वसूत्राभ्यां सम्बध्यते । तथा च योऽर्थः सम्पद्यते तमाह— **दा इत्यस्येत्या**दिना । **नीत्तमि**ति-निदीयते स्म, विदीयते स्म, परिदीयते स्मेत्येवं प्रकारेण विग्रहः, नि-वि-परिपूर्वाद् दासंज्ञकात् क्तः "स्वरादुपसर्गात् दस्ति, कित्यधः" [ ४. ४. ९ ] इति सूत्रेण 'दा' इत्यस्य 'त्त' इत्यादेशेऽनेनोपसर्गस्य दीर्घोऽन्तादेशः । **परीत्तवान्** परिददाति स्म, परिद्यति स्म वेति विग्रहे क्तवतुः, शेषं कार्यं पूर्ववत् । **परीत्त्रिमं** परिदानेन निर्वृत्तमिति विग्रहे "ड्वितस्त्रिमक् तेन कृतम्" [५. ३. ८४] इति त्रिमक्, त्तादेशोऽनेन । दीर्घः। **प्रणीत्त्रिमं** प्रणिदानेन निर्वृत्तमिति विग्रहे पूर्ववत् कार्यम् । **द इति किमि**ति—तकारादावुत्तरपदे नाम्यन्तस्योपसर्गस्य-दीर्घो विधीयतां, 'दा' इत्यस्य स्थाने यस्तकारादिरादेश इत्यर्थो माऽस्त्विति भावः । द इति स्थानषष्ठीसहकारेणैव 'ति' इत्यस्य तकारादौ आदेशे इत्यर्थलाभो भवति, तदभावे च 'ति' इत्यस्य 'उत्तरपदे' इत्येतद्विशेषणत्वमेव स्यादिति तकारादावुत्तरपदे इत्येवार्थः स्यादिति **वितीर्णमि**त्यादौ तरतेः क्ते इरि दीर्घादौ सति तीर्णमिति भवति, तस्मिन् परतोऽप्युपसर्गस्य दीर्घः स्यादित्याह—**वितीर्णमि**ति प्रत्युदाहरणमुखेन । **तीति किमि**ति—"दः" इत्येतावन्मात्रं सूत्रमस्तु, 'दा' इत्यस्य स्थाने यस्तदादावुत्तरपदे इत्यर्थव्याख्यानात् नीत्तमित्यादावव्याप्तेः, वितीर्णमित्यादावतिव्याप्तेश्च वारणसम्भवात् 'ति' इति व्यर्थमिति प्रष्टुराशयः। यत्र 'दा' इत्यस्य "दत्" [ ४. ४. १० ] इति सूत्रेण ददादेशो भवति तत्रापि दीर्घः स्यादिष्यते तु नेत्याह प्रत्युदाहरणद्वारा-**सुदत्तमिति**-सुपूर्वकाद् ददातेः सुदीयते स्मेत्यर्थे क्ते "दत्" [ ४. ४. १० ] इति ददादेशे रूपसिद्धिः, अत्रोपसर्गस्य दीर्घवारणार्थमावश्यकं तीति । पूर्वसूत्रात् 'नामिनः' इत्यस्य सम्बन्धोऽप्यावश्यक एवेत्याह—**नामिन इत्येवे**ति । तद्व्यावर्त्यमाह—**प्रत्तम्, अवत्तमि**ति—प्रदीयते स्म, अवदीयते स्मेति विग्रहे प्रपूर्वकादवपूर्वकाच्च ददातेः क्ते "स्वरादुपसर्गात्" [ ४. ४. ९. ] इति त्तादेशे रूपसिद्धिः, नामिन इत्युक्ततया न भवत्यवर्णान्तस्योपसर्गस्येह दीर्घ इति भावः ॥ ३. २. ८८ ॥

## अपील्वादेर्वहे ॥ ३. २. ८९ ॥

**त० प्र०-पील्वादिवर्जितस्य नाम्यन्तस्य वहे उत्तरपदे परे दीर्घोऽन्तादेशो भवति । वहतीति वहम् "अच्" [ ५. १. ४९ ] इत्यच् । ऋषीणां वहम्-ऋषीवहम्, मुनीवहम्; कपीवहम्; एवंनामानि नगराणि । घान्ते तु वहशब्दे-ऋषीवहः, मुनीवहः, कपीवहः । अपील्वादेरिति किम् ? पीलुवहम्, दारुवहम्, चारुवहम् । नामिन इत्येव-पिण्डवहम्, काष्ठवहम् ॥ ८९ ॥**

**श० म० न्यासानुसन्धानम्—अपील्वा० । अपील्वादेरि**ति पर्युदासादुपसर्गस्येति न सम्बध्यते, तत्सम्बन्धे हि पील्वादीनां प्राप्तिरेव नेति तत्पर्युदासो व्यर्थः स्यादिति, अपील्वादेरिति उत्तरपदेनाक्षिप्तस्य पूर्वपदस्य विशेषणम्, नामिन इति च सम्बध्यत एवेति योऽर्थः सम्पद्यते तमाह—**पील्वादिवर्जितस्य नाम्यन्तस्ये**ति—पूर्वपदस्येति शेषः, तद्धि 'उत्तरपदे' इत्यनेनाक्षिप्यते, उत्तरपद-

"Aho Shrutgyanam"

परत्वं हि पूर्वपदस्यैव सम्भवति। **वहे** इति चोत्तरपदे इत्यस्य समानाधिकरणं विशेषणम्, तथा च वहशब्दरूपे उत्तरपदे इत्यर्थः। वहशब्दो द्विधा सिध्यति---अच्प्रत्ययेन घप्रत्ययेन च, अत्रोभयरूपस्य ग्रहणं विशेषानिर्देशात्, तत्र पूर्वमच्प्रत्ययान्तस्योदाहरणमाह---**वहतीति वहमि**त्यादिना । तत्साधनमाह---"**अच्**" [ ५. १. ४९. ] **इत्यजि**ति । **ऋषीणां वहमि**ति-ऋषीणां धारकमित्यर्थः, एवं---मुनीनां वहं कपीनां वहमित्यादिरूपेण विग्रहो बोध्यः। प्रयोगविषयमाह---**एवंनामानि नगराणि** इति । घान्ते तु लिङ्गभेदाद्रूपे भेद इति तं पृथगुदाहर्त्तुमाह---**घान्ते तु वहशब्दे** इति---विग्रहादिः पूर्ववत् । वहेः करणे "पुंनाम्नि घः" [ ५. ३. १३०. ] इति घः, वहत्यनेन वहः---स्कन्धः, घान्तत्वात् पुंस्त्वं "घं-घञौ" इति लिङ्गानुशासनात् । पीलवादिवर्जनफलं प्रकटयितुं पृच्छति-**अपीलवादेरिति किमिति,** फलमाह---**पीलुवहमिति**---पीलुर्वृक्षविशेषः, तस्य वहं---पीलुवहं नाम वनम् अत्र दीर्घवारणार्थमेवापीलवादेरित्युक्तमिति भावः। आदिपदप्रयोजनमाह---**दारुवहं, चारुवहमिति** । नामिन इत्येतस्यापि सम्बन्ध आवश्यक इत्याह--**पिण्डवहं काष्ठवहमिति**---नाम्यन्तत्वाभावात् पूर्वपदस्य दीर्घो न भवति, नामिन इत्यस्यासम्बन्धे च स्यादेवेति भावः ॥ ३. २. ८९ ॥

## शुनः ॥ ३. २. ९० ॥

**त० प्र०-'श्वन्' इत्येतस्योत्तरपदे परे दीर्घोऽन्तादेशो भवति । शुनो दन्तः-श्वादन्तः, एवं-श्वादंष्ट्रा, श्वाकर्णः, श्वाकर्दः, श्वाकूर्दः, श्वावराहम् । बहुलाधिकारात् क्वचिद् विकल्पः-श्वापुच्छम्, श्वपुच्छम् । क्वचिद् विषयान्तरे-शुनः पदमिव पदमस्य-श्वापदं व्याघ्रादिः, शुनः पदं-श्वपदम् । क्वचिन्न भवति-श्वकल्पः, श्वमुखः ॥ ९० ॥**

**श० म० न्यासानुसन्धानम्---शुनः** । अत्र विशेषाश्रवणात् केवलमुत्तरपदमात्रं निमित्तमित्याह---**'श्वन्' इत्येतस्योत्तरपदे परे** इति । उदाहरति ---**शुनो दन्तः** इत्यादिना । **श्वाकर्दः** इति-कर्दनं कर्दः कुत्सितशब्दः कर्दमोऽपि कर्द इत्युच्यते, सोऽपि शुनः सम्बन्धी भवितुमर्हति । **श्वाकूर्दः** इति-कूर्दनं कूर्दः उत्फालः, भवति हि शुन उत्फालः स्वभावाद् भिन्नः। पाणिनीये तु---एतौ प्रयोगौ न दृश्येते, तत्र दन्तदंष्ट्रा कर्ण-कुन्दवराह---पुच्छ-पदेष्वेव दीर्घो विधीयते नान्यत्र, प्रायः 'कुन्द' शब्दस्थान एव स्वप्रक्रियायां कर्दशब्दः कर्दशब्दस्थान एव वा तत्र कुन्दशब्दः पठित इति विभाव्यते । कुन्दशब्दस्तु कुं---पृथिवीं द्यति खण्डयतीति व्युत्पत्त्या प्रकृतवार्त्तिके निपातनादेव विभक्त्यलुपा सिध्यति, श्वा चासौ कुन्द इति विग्रहे कर्मधारयः, भवति हि पृथ्वीभेदनपूर्वकमुपवेशनं श्वजातिस्वभावः, सति प्रयोगे स्वमतेऽपि श्वाकुन्दपदं साधयितुं शक्यत एव विशिष्य कथनाभावात्, तन्मते तु 'श्वाकर्दः, श्वाकूर्दो वा' न साधयितुं शक्यते दन्तादीनां परिगणनात्; किञ्च बाहुलकाश्रयणादपि स्वमते सर्वाभीष्टलक्ष्यसिद्धिः, तन्मते च तदाश्रणं न दृश्यते । बाहुलकलभ्यं विशेषमाह---**बहुलाधिकारात् क्वचिद् विकल्पः** । क्वेत्याह---**श्वापुच्छं, श्वपुच्छमि**ति---उभयथा प्रयोगदर्शनाद् विकल्प इष्ट इति भावः, शुनः पुच्छमिति विग्रहः । बाहुलककार्यान्तरमप्याह---**क्वचिद् विषयान्तरे** इति---विषयविशेषेऽर्थविशेषे दीर्घो भवति, अन्यत्र नेति भावः । उदाहरति---**शुनः पदमिव पदमस्येति**---उष्ट्रमुखादित्वाद् बहुव्रीहिः, नपुंसकनिर्देशो बाहुलकात्, पुंलिङ्गप्रयोगोऽपि दृश्यते, तत्र हिंस्रजातौ सामान्यतः प्रयोगे नपुंसकं "सामान्ये नपुंसकम्" इति सिद्धान्तात्, व्याघ्रवाचित्वेन प्रयोगे च पुंलिङ्ग इति विवेकः । अर्थविशेषविषय एव दीर्घोऽन्यत्र नेत्याह---**शुनः पदं श्वपदमिति**---पदं स्थानम्, अत्र न भवति दीर्घः । क्वचित् सर्वथा दीर्घाभाव एवेत्याह---**क्वचिन्न भवतीति,** क्वेत्याह---**श्वकल्पः श्वमुखः** इति---ईषदूनः श्वा-श्वकल्पः, अथवा शुनः कल्प इत्येव विग्रहः, उत्तरपदशब्दस्य समासचरमावयवे रूढत्वेन समास एव दीर्घप्रवृत्तिसंभावनायां दीर्घाभावस्योदाहर्तुं युक्तत्वात् । क्वचित् श्वफल्क इति पाठः । श्वमुखः इति---शुनो मुखमिव मुखं यस्येति विग्रहः, बाहुलकादेवेदृशेषु न दीर्घप्रवृत्तिरिति भावः ॥ ३. २. ९० ॥

## एकादश षोडश षोडन् षोढा षड्ढा ॥३.२. ९१॥

**त० प्र०-एकादयः शब्दा दशादिषु उत्तरपदादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकोत्तरा दश, एकं च दश**

"Aho Shrutgyanam"

**च वा-एकादश, अत्रैकस्य दशशब्दे उत्तरपदे दीर्घः; षडुत्तरा दश, षट् च दश च वा—षोडश, अत्र षषोऽन्तस्योत्वम्, उत्तरपददकारस्य च डकारः; षड् दन्ता अस्य-षोडन्, अत्र दन्तशब्दस्य दत्रादेशे कृते दस्य डत्वं षषोऽन्तस्योत्वं च, एवं-षोडन्तौ, षोडन्तः, स्त्रियां तु षोडती; अन्ये तु-दत्रादेशे कृते 'षोडन्' इति शब्दान्तरं नकारान्तं राजन्शब्दवन्निपातयन्ति, ततश्च षोडानमिच्छतीति क्यनि नकारलोपे ईत्वे च-षोडीयतीति सिध्यतीति मन्यन्ते। षड्भिः प्रकारैः-षोढा, षड्ढा, अत्र धाप्रत्यये षषोऽन्तस्य वोत्वं धकारस्य तु नित्यं ढत्वम् । यत्तु षड्धेति रूपं न तत् धाप्रत्यये, किं तु षड् दधाति धयति वेति "आतो डोऽह्वा-वा-मः" [५. १. ७६] इति डे कृते स्त्रियामापि च भवति, निपातनस्य चेष्टविषयत्वादत्रोत्वढत्वे न भवतः ॥ ९१ ॥**

---

**श० म० न्यासानुसन्धानम्—एका०** । सूत्रस्य निपातनरूपेण साधुत्वबोधकत्वेऽपि पूर्वोत्तरपदादिपरिज्ञानाय प्रकृतसूत्रविधेयकार्यपरिज्ञानाय च पूर्वोत्तरपदादिविभागपूर्वकमर्थमाह—**एकादयः शब्दाः** इति–एकादशेत्यत्रैकशब्दः, षोडशेत्यादौ षट्शब्दश्चादिपदग्राह्यः। **दशादिषूत्तरपदादिषु** दशादिष्वित्यत्र 'दत्, धा' इत्येतावादिपदग्राह्यौ, उत्तरपदादिष्वित्यत्र धाप्रत्यय आदिपदग्राह्यः । **कृतदीर्घत्वादय** इत्यत्र दीर्घत्वमेकादशशब्दे, उत्वं षट्शब्दे आदिपदग्राह्यम् । **एकोत्तरा दशे**ति—एकादशादौ द्विधा विग्रहस्य "चार्थे द्वन्द्वः" [पा० सू० २. २. २९. ] इति सूत्रस्थभाष्यशैलीसिद्धत्वादुभयथा विग्रहः साधीयानेव, तत्र हि एकादीनां दशादिभिर्द्वन्द्वे एकविंशत्यादौ वचनभेदस्य परिहाराय अधिकशब्देन सह विग्रहः प्रदर्शितः, प्रकृते उत्तरशब्दोऽप्यधिकार्थ एव । सूत्रशेषे च सर्वत्र द्वन्द्वे विभाषितैकत्वस्य लोकाश्रयत्वेन प्रकृतलिङ्गस्य च सिद्धया द्वन्द्वसमासोऽपि समर्थित इति तदाशयेनाह—**एकं च दश च वे**ति—अत्र पूर्वस्मिन् विग्रहे तत्पुरुषसमासः शाकपार्थिवादिवदुत्तरपदलोपश्च, परत्र विग्रहे द्वन्द्वसमासः, पूर्वपदस्य दीर्घत्वम्, तदाह—**अत्रैकस्य दशशब्दे उत्तरपदे इति** । षोडशेत्यस्य विग्रहमाह—**षडुत्तरा दशे**त्यादिना, अत्राप्युत्तरशब्दोऽधिकार्थ एव, पूर्ववत् समासे 'षष्' 'दश' इत्यवस्थायां षषोऽन्तस्योत्वं दशशब्ददकारस्य डत्वं च निपातितं, तदाह—**अत्र षषोऽन्तस्योत्वम्, उत्तरपद–[दशशब्द–] दकारस्य च डकार** इति। षोडन्शब्दं व्युत्पादयति—**षड् दन्ता अस्ये**ति—बहुव्रीहिसमासे "वयसि दन्तस्य दतृ" [७. ३. १५१.] इति 'दतृ' आदेशे ऋकार इत्, दत्रादेशादेर्डकारः; तदाह—**अत्र दन्तशब्दस्ये**त्यादिना । नान्तत्वमपि निपात्यत इत्याशङ्कापनोदायाह—षोडन्तौ, षोडन्त इति । ऋकारेत्त्वस्य फलमाह—**स्त्रियां तु षोडती**ति—"अधातूदृदितः" [ २. ४. २. ] इति ङीरिति भावः । नान्तनिपातनविषयं मतमाह—**अन्ये तु दत्रादेशे कृते** इति, तन्मते च 'षोडा, षोडानौ, षोडानः' इत्यादिक्रमेण रूपाणि; अन्यमपि तन्मतसिद्धं विशेषमाह—**ततश्च षोडानमिच्छतीति क्यनी**ति—क्यनि सति "नं क्ये" [ १. १. २२ ] इति पदत्वेन तदन्तनकारस्य लोपः, "क्यनि" [४. ३. ११२] इतीत्वे-**षोडीयती**ति सिद्धिः, अत्र'मन्यन्ते' इति कथनेन केवलं तेषामेवेदं मतं नास्माकमनुमतमिति सूचितम् । षोढाशब्दव्युत्पत्तिमाह-**षड्भिः प्रकारैरि**ति— अत्र तृतीयान्तेन विग्रहो यथेष्टविभक्तिविग्रहस्योपलक्षणम्, 'द्रव्यमेकं षड्धा कुरु' इत्यादौ षट्प्रकारं कुर्वित्येव व्याख्येयत्वात्, यत्र यादृशी विभक्तिरुपयुज्यते तत्र तया विभक्त्या विग्रह इत्यस्य न्याय्यत्वात्, "प्रकारे था" [७. २. १०२. ] इति प्रकरणे "संख्याया धा" [ ७. २. १०४. ] इति धाप्रत्ययविधानात्, तत्र क्रियाविशेषणत्वे तृतीयया विग्रहोऽपि युज्यते--षोढा विभजतीत्यादौ, अत एव "प्रकारे था" [ ७. २. १०२. ] इति सूत्रव्याख्यायां प्रकारार्थात् सम्भवत्स्याद्यन्तादिति स्पष्टमुक्तमधिकं तु तत्रैव द्रष्टव्यम् । एवं च षष्शब्दात् धाप्रत्यये सति षष उत्त्वे धकारस्य ढकारे च—षोढेति उत्वस्य वैकल्पिकत्वेन पक्षे—षड्ढेति रूपम् । अत्र केचिदुत्ववत् ढत्वमपि वैकल्पिकमिति मत्वा पक्षे षड्ढेत्यस्य स्थाने षड्धेति रूपमाहुः तन्न युक्तमित्याह—**यत्तु षड्धेति रूपमि**ति । धाप्रत्यये यदि न तद्रूपं तर्हि कथं तत्सिद्धिरिति चेदत्राह-**किन्तु षड् दधाति धयति वे**ति- उभयथा धातोराकारान्तत्वेन, "आतो डोऽह्वा-वा-मः" [ ५. १. ७६. ] इत्यस्य प्राप्तिः । धातोराकारलोपे कथं तच्छ्रवणं तत्राह-**स्त्रियामापि च भवति,** तथा च षट्कर्मकधारणकर्त्री–पानकर्त्रीति वा षड्धापदस्यार्थो न तु प्रकारार्थकोऽयं शब्द इति भावः । नन्वस्तु कथमपि सिद्धिः षषो धाशब्दे परे विधीयमानं प्रकृतसूत्रनिर्दिष्टं कार्यं तत्र कुतो न भवतीति चेतत्राह-**निपातनस्येष्टविषयत्वादि**ति-

"Aho Shrutgyanam"

निपातनं हीष्टप्रयोगस्य सिद्धये समाश्रीयते इष्टप्रयोगश्च न स्वरूपत एवापि त्वर्थतोऽपि, तथा च षट्प्रकारार्थे एव षोढा षड्ढेति निपातनमिष्टं, न तु पूर्वोक्त--षट्कर्मकधारणकर्म्यर्थे इति तत्र न भवति प्रकृतसूत्रप्रवृत्तिरिति भावः ।

पाणिनीये तन्त्रे पृषोदरादिगणे "षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च" इति गणसूत्रं पठ्यते, तेन षोडन्षोडशेत्यनयोः सिद्धिः । ततः "धासु वा" इति पठ्यते, तदग्रे "उत्तरपदादेः ष्टुत्वं" इति । एतद्भाष्यव्याख्यायां कैयट आह--'उत्वं विकल्प्यते, तेन ष्टुत्वं नित्यमेव भवति' इति, तथा च षोढा षड्ढा इत्येव प्रयोगस्तन्मते । हरदत्तादयस्तु उत्वपक्षे एव ष्टुत्वं नित्यम्, उत्वाभावपक्षे च ष्टुत्वं न भवतीति व्याचख्युः, तन्मते षोढा षड्धेति रूपं । सम्प्रति समुपलभ्यमानभाष्यपुस्तके च 'षोढा षड्ढा' इत्येव रूपद्वयं दृश्यते । सिद्धान्तकौमुद्यां दीक्षितेन च पूर्वोक्तं गणसूत्रत्रयं सहैव पठ्यते, तत्पुरुषप्रकरणे षष उत्वं दतृदशधासु उत्तरपदादेः ष्टुत्वं च धासु वेति । एवं च षोढा षड्धेति रूपमुदाहृतम् । तच्च न भाष्यसम्मतमिति प्रतीयते, यतो भाष्ये---धासु वेति पठित्वा, उत्तरपदादेः ष्टुत्वस्य विधानं पृथगेव कृतम्, तथा च तत्र विकल्पसम्बन्धो भाष्यकृतो नाभिप्रेत इति स्पष्टमेव प्रतीयते अन्यथा एकदैव सूत्रद्वयमपि सहैव पठितं स्यात् । तथा च **दीक्षित**ग्रन्थो **हरदत्त**व्याख्यानुकूल इति प्रतीयते, स्पष्टं चेदं **नागेशेनो**द्योते कथितम्, तथाहि---अत एव भाष्ये ष्टुत्ववचनं वाशब्दाघटितं पृथगेवोक्तम्, एवं चोत्वाभावपक्षे षड्ढेति ढकारविशिष्ट एव पाठो भाष्ये । यत् तु हरदत्ते--नोत्वपक्षे ष्टुत्वं नित्यमित्युक्तं---तन्न---सन्नियोगशिष्टपरिभाषयैव सिद्धे पृथग्वचनवैयर्थ्यापत्तेरित्याहुरिति । तथा च यत् तु षड्धेति रूपमित्युक्त्याऽत्र वृत्तिकृता हरदत्तमतमेव खण्डितमिति प्रतीयते ॥ ३. २. ९१ ॥

## द्वि-त्र्यष्टानां द्वा-त्रयो-ऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ ॥ ३. २. ९२ ॥

**त० प्र०–द्वि त्रि अष्टन् इत्येतेषां यथासंख्यं 'द्वा त्रयस् अष्टा' इत्येते आदेशाः प्राक् शतात् संख्यायामुत्तरपदे भवन्ति, अनशीतिबहुव्रीहौ–अशीति बहुव्रीहिसमासविषयं चोत्तरपदं वर्जयित्वा । द्वाभ्यामधिका दश, द्वौ च दश चेति वा–द्वादश, एवं-द्वाविंशतिः, द्वात्रिंशत्; त्रयोदश त्रयोविंशतिः; त्रयस्त्रिंशत्; अष्टादश, अष्टाविंशतिः, अष्टात्रिंशत् । द्वित्र्यष्टानामिति किम् ? पञ्चदश । प्राक्शतादिति किम् ?–द्विशतम्, त्रिशतम्, अष्टशतम्, त्रिसहस्रम्, अष्टसहस्रम् । अनशीतिबहुव्रीहाविति किम् ? द्व्यशीतिः, त्र्यशीतिः; द्वौ वा त्रयो वा–द्वित्राः, त्रिचतुराः, अष्टनवाः, द्विर्दश–द्विदशाः, एवं–त्रिदशाः । प्राक् शतादित्यवधेः संख्यापरिग्रहादिह न भवति,–द्वैमातुरः, त्रैमातुरः, आष्टमातुरः; द्विमुनि व्याकरणस्य, त्रिमुनि व्याकरणस्य ॥ ९२ ॥**

**श० म० न्यासानुसन्धानम्**---विभज्य सूत्रं व्याख्याति---**'द्वि त्रि अष्टन्' इत्येतेषामिति । यथासंख्य**मिति---सम्यक् ख्यायते ऽनयेति--संख्या क्रमवैशिष्ट्येन ज्ञानम् तामनतिक्रम्य यथासंख्यम्, मिथः साकाङ्क्षाणां पदार्थानां येन क्रमेण ज्ञानं तेनैव क्रमेणान्वय इति तदर्थः । 'प्राक् शतात्' इति उत्तरपदभूतशब्दानामवधिदानादवध्यवधिमतोः साजात्यमिति नियमेनावधिमदुत्तरपदमपि संख्यारूपमेवेति लभ्यते, तदाह---**संख्यायामुत्तरपदे** इति, **'अनशीति'** इति पर्युदासादपि सदृग्ग्राहकादयमर्थो लब्धुं शक्यते, तथा च संख्यायामित्यस्य सूत्रेऽनुपादानेऽपि न क्षतिरिति ध्वनितम् । **अनशीतिबहुव्रीहावि**ति पदं व्याख्याति---**अशीतिं बहुव्रीहिसमासविषयं चे**ति---अशीतिरूपमुत्तरपदं बहुव्रीहिसमासविषयं चोत्तरपदं वर्जयित्वेत्यर्थः । उदाहरति---द्वाभ्यामधिका दश, द्वौ च दश चेति वा---द्वादश, पूर्वस्मिन् विग्रहे तत्पुरुषः, परत्र द्वन्द्वः, द्विशब्दस्य 'द्वा' आदेशः । प्रकृतं विग्रहमन्यत्राप्यतिदिशति–**एवं द्वाविंशतिरिति**–द्व्यधिका विंशतिः, द्वौ च विंशतिश्चेति वा विग्रहः । एवं–द्व्यधिका त्रिंशत्, द्वौ च त्रिंशच्चेति वा–**द्वात्रिंशत्** । **त्रयोदशे**ति–त्रयश्च दश च, त्र्यधिका दशेति वा विग्रहः, त्रिशब्दस्य त्रयस् आदेशः, एवं---**त्रयोविंशतिः, त्रयस्त्रिंशदिति । अष्टादशेति**–अष्टाधिका दश, अष्टौ च दश चेति वा विग्रहः, एवम्---**अष्टाविंशतिः अष्टात्रिंशदिति । द्वित्र्यष्टानामिति किमिति**---आदेशैरनुरूपाः स्थानिनः स्वयमेव आक्षेप्स्यन्त इति द्वित्र्यष्टानामिति स्थानिनिर्देशो व्यर्थ इति प्रश्नाशयः द्वादिभिरादेशैरनुरूपस्थानिसमाक्षेपसंभवेऽप्याक्षिप्तस्य शाब्दबोधे भानाभावेन लक्ष्यसंस्कारानुकूलो बोधो न स्यादिति सामान्यत एव संख्यावाचकस्य पूर्वपदस्य द्वादिरादेशः स्यादिति

"Aho Shrutgyanam"

दोषमाह---**पञ्चदशेति**---पञ्चाधिका दश, पञ्च च दश चेति वा विग्रहः, अत्र पञ्चन्शब्दस्यापि द्वादिरादेशः स्यादिति तद्वारणाय द्वित्र्यष्टानामित्यावश्यकमिति भावः। **प्राक् शतादिति** किमिति---'संख्यावाचिन्युत्तरपदे' इति चार्थोऽशीतिपर्युदासादेव भविष्यतीत्यभिमानेन प्रश्नः। संख्यावाचिशताद्युत्तरपदेषु मा भूदादेश इत्यर्थं तस्यावश्यकत्वमित्याह प्रत्युदाहरणमुखेन---'द्विशतम्' इत्यादिना, द्वे शते---द्विशतम्, द्व्यधिकं शतं---द्विशतम्, द्वौ च शतं चेति वा द्विशतम्, एवं-**त्रिशतमित्यादिषु** विग्रहो बोध्यः। एषु द्वाद्यादेशवारणार्थं प्राक् शतादित्यावश्यकमिति भावः। **अनशीतिबहुव्रीहाविति किमि**ति---अशीतौ उत्तरपदे बहुव्रीहिविषये च प्रकृतसूत्रप्रवृत्तिवर्जने किं फलमिति प्रश्नाशयः। **द्व्यशीतिः, त्र्यशीतिरिति**-द्व्यधिका अशीतिः, द्वौ च अशीतिश्चेति वा विग्रहः, एवं---**त्र्यशीति**रित्यत्रापि, अत्र द्वा-त्रयसोरभावायाशीतिवर्जनमावश्यकमिति भावः। बहुव्रीहिपर्युदासफलमाह---**द्वौ वा त्रयो वा**---द्वित्राः इति--"सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः" [३. १. १९.] इति सूत्रेण समासः "प्रमाणीसंख्याड्डः" [३. ३. १२७.] इति डः। एवं---**त्रिचतुराः** इत्यादयः, त्रिचतुरा इत्यत्र डापवादोऽप् "नञ्सु" [ ७. ३. १३१ ] इति सूत्रेण, अत्र द्वित्र्यष्टानां न द्वादय आदेशाः, अतो बहुव्रीहिवर्जनं सार्थकम्। उत्तरपदस्य संख्यावाचकत्वं कथं लब्धं किं च तदाश्रयणे फलमिति स्फोरयितुमाह---**प्राक् शतादित्यवधेरिति**---प्राक्शतादिति ह्यवधिः, स च न पूर्वपदविषयः, तस्य स्पष्टमुपादानात्, तथा चोत्तरपदविषय एवेति निश्चीयते, अवध्यवधिमतोश्च साजात्यं लोके दृष्टम्, एवं च शतमवधि---संख्यावाचि, तदनुरूपत्वादवधिमत्यपि संख्यैव भवितुमर्हतीति संख्यावाचिन्युत्तरपदे इत्ययमर्थो लभ्यते, तदनुपादाने च **द्वैमातुरः** इत्यादावपि द्वादेशापत्तिः, द्वयोर्मात्रोरपत्यं---द्वैमातुरः, तिसृणां मातॄणामपत्यं---**त्रैमातुरः** अष्टानां मातॄणामपत्यम्---**आष्टमातुरः** इत्यादिर्विग्रहः, एषु तद्धितार्थ एव समासः, ततस्तद्धितप्रत्ययोत्पत्त्यैव परिनिष्ठितत्वं रूपस्येति समासावस्था नोदाहरणार्हा, एषु द्वाद्यादेशानां वारणायोत्तरपदस्य संख्यावाचकत्वसमाश्रयणमावश्यकम्। समासेऽपि प्रत्युदाहरति---**द्विमुनि व्याकरणस्येति**-द्वौ मुनी वंश्यौ---द्विमुनि, त्रयो मुनयो वंश्याः---**त्रिमुनि** "वंश्येन पूर्वार्धे" [ ३. १. २९ ] इति समासः, अत्रापि द्वाद्यादेशवारणाय संख्यावाचित्वमुत्तरपदस्यावश्यकमिति भावः ॥ ३. २. ९२ ॥

## चत्वारिंशदादौ वा ।३. २. ९३॥

**त० प्र० द्वित्र्यष्टानां प्राक् शताच्चत्वारिंशदादौ संख्यायामुत्तरपदे यथासंख्यं द्वा-त्रयस्-अष्टा इत्येते आदेशा वा भवन्ति, अनशीतिबहुव्रीहौ। द्वाभ्यामधिका, द्वौ च चत्वारिंशच्चेति वा-द्वाचत्वारिंशत्, द्विचत्वारिंशत्; त्रयश्चत्वारिंशत्; अष्टाचत्वारिंशत्; द्वापञ्चाशत्, द्विपञ्चाशत्, त्रयःपञ्चाशत्, त्रिपञ्चाशत्; अष्टापञ्चाशत्, अष्टपञ्चाशत्; द्वाषष्टिः, द्विषष्टिः; त्रयःषष्टिः, त्रिषष्टिः, अष्टाषष्टिः, अष्टषष्टिः, द्वासप्ततिः, द्विसप्ततिः; त्रयःसप्ततिः, त्रिसप्ततिः, अष्टासप्ततिः, अष्टसप्ततिः द्वानवतिः; द्विनवतिः, त्रयोनवतिः, त्रिनवतिः, अष्टानवतिः, अष्टनवतिः। अनशीतिबहुव्रीहावित्येव-द्व्यशीतिः, त्र्यशीतिः, अष्टाशीतिः, द्विश्चत्वारिंशत्, द्विचत्वारिंशाः, एवं-त्रिचत्वारिंशाः, अष्टौ चत्वारिंशतोऽस्मिन्-अष्टचत्वारिंशत्। पूर्वेण नित्यं प्राप्ते विकल्पार्थमिदम् ॥ ९३ ॥**

**श० म० न्यासानुसन्धानम्-चत्वा०**। पूर्वसूत्रविधेया एव चत्वारिंशदादौ संख्यायां विकल्पेनानेन सूत्रेण विधीयन्ते, तथा च पूर्वसूत्रं सम्पूर्णमनुवर्तत एव, 'उत्तरपदे' इत्यस्य च **चत्वारिंशदादाविति** विशेषणम्, तथा च सूत्रार्थमाह-**द्वित्र्यष्टानामित्यादिना** द्वाचत्वारिंशदादयः-साध्याः, तेषां विग्रहवाक्यमाह---**द्वाभ्यामधिका** इत्यादिना। स्पष्टान्युदाहरणानि---'**अष्टनवतिरि**'त्यन्तानि। पूर्वसूत्रस्थपदानामत्राप्यावश्यकत्वं द्योतयितुं पदकृत्यमप्याह---**अनशीति-बहुव्रीहावित्ये**वेत्यादिना। **द्व्यशीति**रित्यादयोऽशीतिवर्जनप्रयोजनानि। **द्विचत्वारिंशाः त्रिचत्वारिंशाः** इति बहुव्रीहिवर्जनप्रयोजनम्। सुज्-वाऽर्थादन्यत्र बहुव्रीहावपि तद्वर्जनप्रयोजनमित्याह-**अष्टौ चत्वारिंशतोऽस्मिन्निति**---अत्र "प्रमाणी-संख्याड्डः" [ ७. ३. १२८. ] इति डस्तु न भवति बहुव्रीहेः संख्यार्थत्वाभावात् संख्यार्थाद्बहुव्रीहेरेव तेन डप्रत्ययविधानात्, इह हि अन्यपदार्थस्यैव प्राधान्यम्। पूर्वेण चत्वारिंशदादावपि द्वाद्यादेशे सिद्धे किमर्थमिदमित्याशङ्कायामाह---**पूर्वेण नित्यं प्राप्ते** इति ॥ ३. २. ९३ ॥

## हृदयस्य हृल्लास-लेखा-ण-ये ३. २. ९४॥

**त० प्र०-हृदयशब्दस्य लास-लेखयोरुत्तरपदयोरणि ये**



"Aho Shrutgyanam"

च प्रत्यये परे 'हृद्' इत्ययमादेशो भवति । लास–हृदयस्य लासो–हृल्लासः, लेख–हृदयं लिखतीति–हृल्लेखः, अण्संनिधानाल्लेखशब्दोऽणन्तो गृह्यते, तेन–घञन्ते न भवति–हृदयस्य लेखः–हृदयलेखः, अण्–हृदयस्येदं–हार्दम्, सौहार्दम्, दौर्हार्दम्; य–हृदयस्य प्रियः–हृद्यः, हृदयस्य बन्धनो मन्त्रः–हृद्यः, हृदये भवं हृदयाय हितम्–हृद्यम् । 'अण्' इत्येव सिद्धे लेखग्रहणं ज्ञापकम्–'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवति, "खित्यनव्यया०" ( ३. २. १११ ) इत्यादौ तु असंभवात् तदन्तग्रहणम् । हृदयशब्दसमानार्थेन हृच्छब्देनैव सिद्धे हृदादेशविधानं लासादिषु हृदयशब्दप्रयोगनिवृत्त्यर्थम्, अन्यत्र तूभयं प्रयुज्यते–सौहार्दम्, सौहृदय्यम्; हृच्छोकः, हृदयशोकः, हृद्रोगः, हृदयरोगः, हृच्छङ्कुः, हृदयशंकुः, हृच्छूलम्, हृदयशूलम्; हृच्छल्यम्, हृदयशल्यम्; हृद्दाहः, हृदयदाहः; हृद्दुःखम्, हृदयदुःखम्; हृत्कमलम्, हृदयकमलम्; हृत्पुण्डरीकम्, हृदयपुण्डरीकम् इत्यादि ॥ ९४ ॥

**श० म० न्यासानुसन्धानम्—हृदयस्य० ।** समासाश्रयां पदैकदेशविकृतिमुदाहृत्य पदादेशप्रकरणमारभते, तत्रोत्तरपदे इत्यनुवृत्तमपि यथासंभवमेव सम्बध्यते, तदाह **लास-लेखयोरुत्तरपदयोरिति**—तयोरेवोत्तरपदत्वेन योगात् । अण्-ययोस्तु प्रत्ययत्वेन तत्त्वायोगादाह—**अणि ये च प्रत्यये परे** इति । क्रमश उदाहरति—लास—इति—लासरूपे उत्तरपदे यथेति भावः, लसनं विलसनं—लासः, भावे घञ्, हर्षातिरेकः, **हृदयस्य लासः** इति षष्ठीतत्पुरुषे सति अनेन हृदादेशः । लेखरूपे उत्तरपदे उदाहरति—**हृदयं लिखतीति**—हृदये कमपि भावमाविष्करोतीति भावः, "कर्मणोऽण्" [५. १. ७२.]इत्यण्, गुणे कृते लेखशब्दो निष्पद्यते, तेन सह हृदयशब्दस्योपपदसमासः, अनेन हृदादेशः । लासशब्दो घञन्तस्तत्साहचर्याल्लेखशब्दोऽपि घञन्त एव ग्रहीतुमुचित इति किमर्थमणन्तलेखशब्दे परे उदाहृतमित्याशङ्कायामाह—**अणसन्निधानाल्लेखशब्दोऽणन्तो गृह्यते** इति, अयमाशयः—अवश्यं लासशब्दसन्निधानाल्लेखशब्दस्य घञन्तस्य ग्रहणं चोदयितुं शक्यते, किन्तु अण्प्रत्ययस्यापि सन्निधानमस्त्येव, तेन चाणन्तस्यापि तस्य ग्रहणं प्राप्नोत्येव, अस्यामवस्थायां कतरत् सान्निध्यं बलवदिति चिन्तायां पूर्वात् परबलीयस्त्वमुचितमिति परस्याणः सान्निध्यापेक्ष एव निर्णयो विधेय इत्यणन्तस्यैव लेखशब्दस्य ग्रहणमुचितमिति । एवमणन्तलेखशब्दग्रहणे स्थिरीकृते यत् फलितं तदाह—**तेन घञन्ते न भवतीति**—घञन्ते लेखशब्दे उत्तरपदे सति हृदादेशो न भवतीत्यर्थः । तथोदाहरति—**हृदयस्य लेखः—हृदयलेखः** इति—अत्र न हृदयशब्दस्य हृदादेश इति भावः । अणि हृदादेशमुदाहरति—**हृदयस्येदं**—हार्दमिति—हृदयशब्दात् "तस्येदम्" [ ६. ३. १४२ ] इत्यण्, हृदादेशे सति आदिस्वरस्यवृद्धिः । **सौहार्दमि**ति—सुष्ठु हृदयं यस्य तादृशो मित्रातिरिक्तः [तटस्थः] सुहृदयः, तस्येदमिति, तस्य भावो वा—सौहार्दम्, इदमर्थे पूर्वोक्त एवाण्, भावार्थे च "युवादेरण्" [७. १. ६७.] इत्यण्, अनेन हृदादेशे उभयपदादिस्वरस्य वृद्धिः । **दौर्हार्दमि**ति—दुष्टं हृदयं यस्य स—दुर्हृदयः, तस्येदं, तस्य भावो वेत्यर्थेऽणि गतिसंज्ञकदुर्शब्दातिरिक्तस्य हृदयशब्दमात्रस्य हृदादेशे उभयपदादिस्वरवृद्धौ—दौर्हार्दमिति० । यप्रत्यये उदाहरति—**हृदयस्य प्रियः** इत्यादिना, तत्र प्रियार्थे बन्धनमन्त्रार्थे च "हृद्य-पद्य-तुल्य-मूल्य०" [ ७. १. ११ ] इति यः भवार्थे "दिगादिदेहांशाद्यः" [ ६.३. १२४ ] इति यः, हितार्थे "प्राण्यङ्ग-रथ-खल-तिल०" [ ७. १. ३७ ] इति यः, अनेन हृदयस्य हृदादेशः । पूर्वमणन्तस्य लेखशब्दस्येह ग्रहणमिति निर्णीतम्, ततश्चाण्ग्रहणेनैव ❀ प्रत्ययग्रहणे तदन्तस्य ग्रहणम् ❀ इति न्यायेन अणन्ते उत्तरपदे परे हृदादेशसिद्धौ हृल्लेख इति सिध्यत्येवेति तदर्थं लेखग्रहणं व्यर्थमित्याशङ्क्य तस्य नियमार्थत्वं साधयति—**अणीत्येव सिद्धे लेखग्रहणं ज्ञापकमि**ति—सिद्धे सत्यारभ्यमाणो विधिर्नियमार्थ इति सिद्धान्तात् लेखग्रहणेन स्वसार्थक्यानुकूलं किमपि ज्ञाप्यम्, तच्चेदम्—**'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवति''** इति, अस्तीहोत्तरपदाधिकारः, अस्ति चाण्प्रत्ययग्रहणं, तेन च तदन्तग्रहणाभावे सति लेखशब्दस्येह ग्रहणं न स्यादिति तदर्थं तस्येह सूत्रे ग्रहणं सार्थकम् । फलं चान्येषामणन्तानां न ग्रहणं भवतीति हृदयं स्पृशतीति हृदयस्पर्श इत्यादौ न प्रकृतसूत्रप्रवृत्तिः । नन्वेवं ज्ञापिते "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [३. २. १११.] इत्यग्रिमसूत्रेऽप्युत्तरपदाधिकारसत्त्वात् तत्रापि खिदन्तग्रहणाभावे 'कालिमन्या' इत्यादौ खशन्ते मन्यारूपे उत्तरपदे परे तस्य प्रवृत्तिर्न स्यात्, तस्य खिद्रूपत्वा-

"Aho Shrutgyanam"

भावादिति चेदत्राह—“खित्यनव्यय०” [ ३. २. १११ ] इत्यादौ तु असंभवात् तदन्तग्रहणमिति, अयमाशयः—सर्वो हि नियमः शास्त्रप्रक्रियानिर्वाहायाश्रीयते, “खित्यनव्यय०” [ ३. २. १११ ] इति शास्त्रेणाव्ययवर्जितस्य पूर्वपदस्य मान्तादेशो ह्रस्वश्च विधीयते, तादृशस्य पूर्वपदस्य खित्परत्वसम्भावनैव नास्ति, खित्प्रत्ययस्य खशादेर्धातोर्विधीयमानत्वात्, अनव्यय इति पर्युदासेन हि अव्ययभिन्नं स्याद्यन्तमेव ग्राह्यम्, पर्युदासस्य सदृग्ग्राहित्वात्, ततश्च पूर्वपदस्य खिदव्यवहितपूर्वत्वासम्भवादेव खिदन्तग्रहणं तत्र शास्त्रसार्थक्यायावश्यकम्, इह च अणव्यवहितपूर्वत्वं हृदयशब्दस्य संभवत्येव, अणः स्याद्यन्तादेव विधीयमानत्वादित्यसंभवरूपहेतोरभावादुक्तनियमप्रवृत्तौ बाधकाभावः, एवं च “घञ्युपसर्गस्य बहुलम्” [ ३. २. ८६. ] इत्यादावप्युपसर्गस्य घञ्व्यवहितपरत्वसंभावनाभावादेव तदन्तग्रहणमित्युक्तपूर्वम्, तथा चासंभवाद् हेतोरपि प्रकृतज्ञापितार्थस्य तत्र न प्रवृत्तिरिति । प्रकारान्तरेण सूत्रवैयर्थ्यमाशङ्कयोत्तरमभिदधाति—**हृदयशब्दसमानार्थेत्या**दिना—हृदयशब्देन समानोऽर्थो यस्य तादृशेन स्वाभाविकहृद्शब्देनैव हृल्लासः, हृल्लेखः, हार्दं, हृद्यमित्यादि प्रयोगाणां सिद्धिरस्त्येवेति हृदयस्य हृदादेशविधानं व्यर्थं सत् तत् स्वसार्थक्याय लास-लेखा-ऽण्-ये हृच्छब्दस्यैव प्रयोगो न तु हृदयशब्दस्येति सूचयति, तत्फलमाह—अन्यत्र तूभयं प्रयुज्यते इति, अयमाशयः—प्रकृतसूत्राभावे ‘हृल्लासः, हृदयलासः, इति स्वाभाविकः प्रयोगः प्राप्नोति, सूत्रसत्त्वे च हृदयलास इति प्रयोगस्य निवृत्तिर्भवति, लास-लेखा-ऽण्-यातिरिक्ते च स्थले हृद्-हृदयशब्दयोरुभयोरपि पर्यायेण प्रयोगो भवति । क्वेत्याह—सौहार्द्यम्, सौहृदय्यमिति—अत्र सुहृदो भाव इत्यर्थे “पतिराजान्त-गुणाङ्गराजादिभ्यः कर्मणि च” [ ७. १. ६० ] इति टयणि उभयपदादिस्वरवृद्धौ—सौहार्द्यमिति, सुहृदयस्य भाव इति विग्रहे च सुहृदयशब्दात् पूर्वोक्ते टयणि “हृद्-भग-सिन्धोः” [७. ४. २५.] इत्यस्य प्राप्त्यभावादादिस्वरवृद्धौ—सौहृदय्यमिति । रूपद्वयं भवति, यद्यपीहापि टयणि यरूपत्वमेव प्रत्ययस्येति ये परे प्रवर्त्तमानोऽयं नियमो लगत्येव, तथापि ❀ निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणम् ❀ इति न्यायेन टयणो यस्येह न ग्रहणमिति बोध्यम् । एवं—हृच्छोको हृदयशोकः इत्यादावपि प्रकृतसूत्रविषयत्वाभावेनोभयथा प्रयोगः । तथा चैवं प्रयोगविशेषसूचनार्थमेवेदं सूत्रमिति ॥ ३. २. ९४ ॥

**पदः पादस्या-ऽऽज्या-ऽऽति-गोपहते । ३.२. ९५ ॥**

**त० प्र०—पादशब्दस्याज्यादिषूत्तरपदेषु ‘पद’ इत्ययमादेशो भवति । पादाभ्यामजति अतति चेति औणादिके इणि—पदाजिः, पदातिः, अत एव निर्देशात् अजेर्वी न भवति । पादाभ्यां गच्छति—पदगः, “नाम्नो गमः खड्डौ०” [ ५. १. १३१. ] इत्यादिना डः; पादाभ्यामुपहतः—पदोपहतः । पादशब्दसमानार्थः पदशब्दोऽस्ति, आज्यादिषु तु पादशब्दप्रयोगनिवृत्त्यर्थं वचनम् । कथं दिग्धश्चासौ पादश्च—दिग्धपादः, तेनोपहतः—दिग्धपादोपहतः ? उत्तरपदसंनिधापितेन पूर्वपदेन पादशब्दो विशेष्यते, न चात्र पादशब्दः पूर्वपदमपि तु दिग्धपादः, तेनात्र न भवति ॥ ९५ ॥**

**श० म० न्यासानुसन्धानम्**—पदः० । आजि आति ग उपहत इत्येते उत्तरपदविशेषणानि, एषूत्तरपदेषु सत्सु पादस्य स्थाने पदः प्रयुज्यत इति सूत्रार्थमाह—**पादस्याज्यादिषूत्तरपदेष्वित्या**दिना । अजिरतिश्च गमनार्थौ धातू, ताभ्यामौणादिके इणि प्रत्यये—आजिरातिरिति पदे सिध्यतः, तदाह—**पादाभ्यामजतीत्या**दिना । तथा चात्राजेर्वी” आदेशोऽपि प्राप्नोति “अघञ्क्यबलच्यजेर्वी”—[ ४. ४. ३. ] इति सूत्रेण, स कथं नेत्याशङ्कापनोदायाह—अत एव निर्देशादिति, अयमाशयः—कानिचित् कार्याण्याचार्याः स्पष्टं विदधति कानिचिच्च स्वाचारेण शिक्षयन्ति, तथाचाचार्येण आजिशब्दव्यवहारादत्र तदभावोऽनुमीयत इति तथा चोभयत्र पदादेशे—**पदाजिः पदातिरिति** शब्दौ निष्पन्नौ । गरूपे उत्तरपदे उदाहरति—**पादाभ्यां गच्छति**ति पादशब्दे उपपदे गमेर्डः प्रत्ययोऽन्त्यस्वरादेर्डित्त्वसामर्थ्याल्लुक्, तदाह—“**नाम्नो गमः०**” [५. १. १३१.] इत्यादिना ड इति, अनेन पदादेशे-**पदगः । पादाभ्यामुपहतः** इति, तथा च “कारकं कृता” [ ३. १. ६८ ] इति समासः, अनेन पदादेशे—**पदोहतः** इति । सूत्रस्य वैयर्थ्यमुद्भाव्य सार्थकत्वं द्रढयति—**पादशब्दसमानार्थः** इति—प्रकृतसूत्रे पादशब्दः शरीरावयवविशेषपरो न तु श्लोकादिचतुर्थांशपरः, तथा च शरीरस्य यस्मिन्नवयवे पादशब्दः प्रयुज्यते तस्मिन्नेव पदशब्दोऽपि प्रयुज्यत एव, एवं चोभयोः समानार्थत्वेन पादाभ्यामजतीत्यादिविग्रहे पदाजिरित्यादिप्रकृतसूत्रलक्ष्याणां स्वभावत एव सिद्धिरिति तत्साधनार्थं प्रकृतसूत्रस्य न

"Aho Shrutgyanam"

प्रयोजनमिति शङ्का; यथा पदाजिरिति पदशब्देन सह वाक्ये सति भवति तथा पादशब्देन सह वाक्ये पादाजिरित्यादयोऽपि प्राप्नुवन्त्येवेति तादृशाः प्रयोगा मा भूवन्निति प्रकृतसूत्रेण नियम्यते, तथा चाज्यातिगोपहतेषु परेषु सत्सु पादशब्दप्रयोगनिवृत्त्यर्थमेव सूत्रमिति समाधानग्रन्थाशयः । क्वचित् प्रयोगे उपहतादिशब्दपरत्वे सत्यपि पादशब्दप्रयोगो दृश्यते, प्रकृतसूत्रेण नियमे कृते च कथं तदुपपत्तिरिति शङ्कते–कथं दिग्धश्चासौ पादश्चेति–दिग्धः–तैलादिनोपलिप्तः पादो दिग्धपादः, तेनोपहत इति विग्रहे "कारकं कृता" [३. १. ६८] इति समासः, अत्रोपहतशब्दे उत्तरपदे पादशब्दप्रयोगः कथमिति शङ्कार्थः । उत्तरयति–**उत्तरपदसन्निधापितेनेत्या**दि–इह ह्युत्तरपदे इत्यधिकृतम्, उत्तरत्वं च पूर्वापेक्षयैव भवतीत्युत्तरपदब्देन पूर्वपदं सन्निधाप्यते–आक्षिप्यते, तच्च पूर्वपदत्वं पर्याप्त्या गृह्यत इति यत्र पादशब्दमात्रपर्याप्तं पूर्वपदत्वं तत्रैव पदादेशेन भाव्यमितीह पूर्वपदत्वस्य पादशब्दमात्रपर्याप्तत्वाभावान्न सूत्रप्रवृत्तिः, पूर्वपदत्वं हि दिग्धपादेति समुदाये पर्याप्तं न तु पादशब्दमात्रे, तदाह–**न चात्र पादशब्दः पूर्वपदमपि तु दिग्धपादः** इति । फलितमाह–**तेनात्र न भवती**ति–पदादेश इति शेषः ॥ ३. २. ९५ ॥

## हिम-हति-काषि-ये पद् ॥ ३. २. ९६ ॥

**त० प्र०–हिमादिषूत्तरपदेषु पादसंबन्धिनि ये च प्रत्यये पादशब्दस्य 'पद्' इत्ययमादेशो भवति । पादयोर्हिमं–पद्धिमम्, पादाभ्यां हतिः–पद्धतिः; पादौ कषतीत्येवंशीलः, पुनः पुनः पादौ कषतीति, पादाभ्यां साधु कषतीति वा–पत्काषी, परमश्चासौ पत्काषी च–परमपत्काषी । यदा च परमौ च तौ पादौ च– परमपादौ, तत्कषणशीलादिर्विवक्ष्यते तदा पादशब्दस्य पूर्वपदत्वाभावात् परमपादकाषीत्येव भवति; पादौ विध्यन्ति पद्याः–शर्कराः, पादयोर्भवाः–पद्याः पांसवः; पादाभ्यां हितं पद्यं–घृतम् । कथं पादार्थमुदकं पाद्यम् ? "पाद्यार्घ्ये" (७. १. २३.) इति निपातनात् । पादशब्दसंबन्धिनि य इति किम् ? द्विगुसमाससंबन्धिनि मा भूत्, द्वाभ्यां पादाभ्यां क्रीतं–'द्विपाद्यम्, एवं–त्रिपाद्यम्, अध्यर्धपाद्यम्, "पणपादमाषाद्यः" (६. ४. १४८.) इति यः । यद्वा आज्यादिषु करणभावः प्राण्यङ्गस्यैवेति पूर्वत्र पादशब्दः प्राण्यङ्गवचनः, स एव चेहानुवर्तत इति परिमाणार्थस्य न भवति । अन्ये तु गोपहतयोरपीच्छन्ति–पादाभ्यां गच्छतीति–पद्गः, पादाभ्यामुपहतः–पदुपहतः । कथं हस्तिपादस्यापत्यं–हास्तिपद इत्यत्र अपत्याणि पद्भावः ? "कौपिञ्जल-हास्तिपदादण्" (६. ३. १७१.) इति निर्देशाद् भविष्यति । पादाभ्यां चरति–पदिक इति तु "पदिकः" ( ६. ४. १३ ) इति निपातनात् ॥ ९६ ॥**

**श० म० न्यासानुसन्धानम्**–हिम० । अत्रापि निमित्तकोटिर्द्विविधः–उत्तरपदरूपः प्रत्ययरूपश्च, तत्र पूर्वमुत्तरपदकोटिमुपादायाह–**हिमादिषूत्तरपदेष्विति**–आदिपदेन हतिकाषिशब्दौ ग्राह्यौ । प्रत्ययकोटिं सविशेषमाह–**पादसम्बन्धिनि ये चेति**–इदं च लक्ष्यानुसारि व्याख्यानं पादस्येति पदस्यावृत्त्या प्रत्यासत्तिन्यायेन वा समाश्रितम्, तथा हि–'पादस्य पदादेशः पादस्य ये, अथवा पादस्य पदादेशो ये' इत्येतावन्मात्रे कथितेऽपि पादशब्दसान्निध्यात् तत्सम्बन्धिन्येव ये इति लभ्यते, प्रत्ययेन हि स्वप्रकृतिराक्षिप्यते, सा च यथासम्भवं समभिव्याहृता–समीपोच्चारितैव ग्राह्येति नोक्तार्थे किमपि बाधकम् । उदाहरति–**पादयोर्हिममि**ति षष्ठीसमासे सति पदादेशः । **पादाभ्यां हतिरि**ति–'हतिराघातः कारकं कृता" [३. १. ६८. ] इति समासः । काषिशब्दो णिन् प्रत्ययान्तः, स च "अजातेः शीले" [५. १. १५४. ] "साधौ" [५. १. १५५. ] "व्रताभीक्ष्ण्ये" [५. १. १५७. ] इत्येतेष्वर्थेषु विधीयत इति सर्वेष्वर्थेषु यथोचितं विग्रहवाक्यमाह–**पादौ कषतीत्येवं शीलः** इत्यादिना, तत्र प्रथमः "अजातेः शीले" [५. १. १५४. ] इति सूत्रानुसारी, द्वितीयः "व्रताभीक्ष्णे" [५. १. १५८. ] इति सूत्रानुसारी, तृतीयश्च–"साधौ" [५. १. १५५.] इति सूत्रानुसारी, उपपदसमासेऽनेन पदादेशः । पदादेशे कृते समासान्तरप्रवेशो ननु पदादेशात् पूर्वं पादस्य समासान्तरप्रवेशे पदादेश इति सूचयितुं तथोदाहरति–**परमश्चासौ पत्काषी**ति–"सन्महत्परमोत्तमोत्कृष्टं पूजायाम्" [३. १. १०७. ] इति समासः । तथा च पत्काषिण एव समासान्तरे प्रवेशः, परमपादस्य काषिणा समासे च न पदादेशः, तदाह–**यदा च परमौ च तौ पादावि**ति । तत्र पदादेशाभावकारणमाह–**पादशब्दस्य**

"Aho Shrutgyanam"

**पूर्वपदत्वाभावादि**ति, व्याख्याता चेयं युक्तिः पूर्वसूत्रे दिग्धपादोपहत इत्यत्र पदादेशाभावोपपादनवेलायामिति नेह पुनर्व्याख्यायते । पादसम्बन्धिनि ये उदाहरति—**पादौ विध्यन्तीत्या**दिना, तत्र पादौ विध्यन्तीत्यर्थे "विध्यत्यनन्येन" [७. १. ८.] इत्यनेन स्वकरणकवेधविवक्षायां ये पदादेशः, स्त्रीत्वादाप्—**पद्याः शर्करा** मार्गकङ्कणानि, **पादयोर्भवा** इत्यर्थे "दिगादिदेहांशाद्यः" [६. ३. १२४.] इति यः, **पादाभ्यां हितमित्य**र्थे च "प्राण्यङ्गरथखल०" [७. १. ३९.] इति यः । क्वचित् पादसम्बन्धिनि ये सत्यपि पदादेशो न दृश्यते, तदुपपत्तिः कथमित्याशङ्कामाह—**कथं पादार्थमुदकं—पाद्यमिति**—पादशब्दात् तदर्थेऽर्थे यप्रत्यये सति कथं न पदादेश इति शङ्कार्थः । उत्तरमाह—**"पाद्यार्घ्ये"** [७. १. २३.] **इति निपातनादि**ति, अयमाशयः—"देवतान्तात् तदर्थे" [७. १. २२.] इति प्रकरणे पादार्घाभ्यामित्यनुक्त्वा "पाद्यार्घ्ये" इति यत् स्वरूपनिपातनं कृतं तेन पदादेशाभावः, बाधकान्येव निपातनानीति न्यायात् । यप्रत्यये पादशब्दसम्बन्धित्वं कुतो व्याख्यायत इत्याशङ्कते—**पादशब्दसम्बन्धिनि य इति किमि**ति । उत्तरयति—**द्विगुसमाससम्बन्धिनि मा भूदि**ति—यत्र न केवलं पादशब्दाद्यो विधीयतेऽपि तु तदन्ताद् द्विगोस्तत्र पदादेशाभावार्थं पादशब्दसम्बन्धित्वविशेषणं यप्रत्ययस्यावश्यकमिति भावः, क्वेति चेदत्राह—**द्वाभ्यां पादाभ्यां क्रीत**मिति—अत्र तद्धितार्थे द्विगुः, पणपादमाषाद् यः" [६. ४. १४८.] इति यः, स च पादान्तात् द्विगोर्विहितो न तु केवलपादशब्दादिति तत्सम्बन्धी [ तन्मात्रप्रकृतिको ] न भवति, ततश्च तत्र सति नानेन पदादेश इत्येव पादशब्दसम्बन्धित्वविवक्षाफलम् । एवमर्थविवक्षायां गौरवमिति तदभावेऽपि प्रकृतोदाहरणे पदादेशाभावमुपपादयितुं पाणिनीयादिमतसंवादिपक्षान्तरमाह—**यद्वा आज्यादिषु करणभावः प्राण्यङ्गस्यवेतीति** अयमाशयः—"पदः पादस्याज्यातिगोपहते" [३. २. ९५.] इति पूर्वसूत्रादेवेह पादस्येत्यनुवृत्तम्, तत्र पादशब्दः प्राण्यङ्गवाच्येव ग्राह्यः, यत आज्यादिषु शब्देषु क्रियाप्रधानेषु संभावितकरणभावस्यैव पादस्य ग्रहीतुमौचित्यम्, स च करणभावो न परिमाणविशेषवाचकस्य पादशब्दस्य संभवतीति तत्र प्राण्यङ्गवाचकस्यैव ग्रहणमिति निर्णीयते, ततश्च ततोऽनुवृत्तस्य पादस्येत्यस्य प्रकृतसूत्रेऽपि प्राण्यङ्गवाचकस्यैव ग्रहीतुमौचित्यम्, एकत्र गृहीतार्थस्य त्यागायोगात् । द्वाभ्यां पादाभ्यां क्रीतमित्यर्थे च रूप्यकादिचतुर्थांशरूपपरिमाणवाचकः पादशब्दः, तदर्थस्यैव क्रयणे करणत्वसंभवादिति तस्य प्राण्यङ्गवाचित्वाभावान्न भवति पदादेश इत्यसत्यपि पादशब्दसम्बन्धित्वव्याख्याने न क्षतिरिति । मतान्तरे पूर्वसूत्रोक्तगोपहतशब्दयोः परतोऽपि व्यञ्जनान्तः पदादेशः प्रयुज्यते, तदाह—**अन्ये तु गोपहतयोरपीच्छन्ती**ति—यथा गोपहतयोः परतः 'पद' इत्यदन्तादेशो विहितस्तथा 'पद्' इति व्यञ्जनान्तादेशमपीच्छन्तीति भावः । तदनुकूलमुदाहरति—**पादाभ्यां गच्छतीति**—पद्गः इति । प्रकृतसूत्रनिर्दिष्टनिमित्तादन्यत्रापि पदादेशो दृश्यते स कथमुपपद्यत इति जिज्ञासां सोपपत्तिकामाह—कथं **हस्तिपादस्यापत्यमि**त्यादिना—हस्तिनः पादाविव पादौ यस्येत्यर्थे बहुव्रीहिः, "पात् पादस्याहस्त्यादेः [७. ३. १४८.] इति सूत्रे हस्त्यादिवर्जनात् पाद् आदेशो न, तस्यापत्यमित्यर्थे "ङसोऽपत्ये" [६. १. २८.] इत्यण्, आदिस्वरस्य वृद्धिः, "अत इञ्" [६. १. ३१.] इतीञ् तु न, अग्रे उदाह्रियमाणनिर्देशादेव, अत्र च पदादेशनिमित्ताभावेऽपि कथं पदादेश इति शङ्का । उत्तरमाह—**"कौपिञ्जलहास्तिपदादण्"**[६. ३. १७०.] इति निर्देशादिति, अयमाशयः—आचार्याणामाचारादपि कश्चिदर्थोऽनुमीयतेऽनुक्तोऽपीति पूर्वत्रोक्तम्, तथा चाणि पदादेशोऽविहितोऽपि हास्तिपदशब्दे भवतीति "कौपिञ्जलहास्तिपदादण्" [६. ३. ७०.] इति सूत्रनिर्देशरूपाचार्याचारादनुमीयत इति । अस्त्विह निर्देशात् पदादेशानुमानम्, पादाभ्यां चरतीत्यर्थे पदिक इति प्रयोगे कथमिकटि परतः पदादेश इति शङ्कते—**कथं पादाभ्यां चरति—पदिकः** ? इति, तत्र च साक्षान्निपातनसूत्रमेवाचार्येण विहितमित्युत्तरं स्मारयति—**"पदिक"** [६. ४. १३.] **इति निपातनादि**ति—"चरति" [६. ४. ११.] इत्यधिकारे हि पूर्वोक्तंसूत्रमुच्यते, तत्र "पर्पादिरिकट्" [६. ४. १२.] इति सूत्रे एव पर्पादिगणे पादशब्दपाठेन, "पर्पादिपादादिकट्" इति सूत्रकरणेन वा पादशब्दादपीकट् स्यादेवेति पृथक् [ "पदिकः" इति ] सूत्रेण पदिक इत्यस्य साधुत्वनिपातनमप्राप्तकार्यविधानार्थमेव कृतमित्यप्राप्तोऽपि पदादेशस्तत्र भवतीति भावः । ये च वैयाकरणा निपतानं नारभन्ते ते विदधत्येवेकेऽपि पदादेशं, यथा—"पद्यत्यतदर्थे" [६. पा० सू० ३. ५३.] इति पाणिनीयसूत्रे भाष्ये—इके चरतावुपसंख्यानमित्युक्तमिति त्वन्यत् । स्वमते च निपातनादेव तत्सिद्धिराश्रयितव्येति ॥ ३. २. ९६. ॥

"Aho Shrutgyanam"

## ऋचः श्शसि ॥ ३. २. ९७ ॥

**त० प्र०—ऋचः संबन्धिनः पादस्य शकारादौ शस्प्रत्यये 'पद्' इत्ययमादेशो भवति । पादं पादं गायत्र्याः शंसति–पच्छो गायत्रीं शंसति, वाक्यगम्यस्य गायत्र्याः पादसंबन्धस्य वृत्तौ निवृत्तत्वात् स्वाभाविकं शंसनक्रियापेक्षं कर्मत्वं भवति । ऋच इति किम् ? पादं पादं कार्षापणस्य ददाति–पादशः कार्षापणं-ददाति,एवं–पादशः श्लोकं व्याचष्टे । शसो द्विशकारपाठात् विभक्तिशसि न भवति–ऋचः पादान् पश्य ॥ ९७ ॥**

**श० म० न्यासानुसन्धानम्—ऋचः०** । पूर्वत्र पादस्य प्राण्यङ्गार्थस्य ग्रहणमिति प्रतिपादितम्, ततश्चान्यार्थस्य विना प्रयत्नं ग्रहणं न स्यादिति 'ऋचः' इति पदमुपात्तम् । अर्थवान् नियताक्षरपादो वेदभागो ऋक्, तस्याश्च पादा नियताक्षरा भवन्ति, तथा च तादृगृचः पादवाचिनः पादशब्दस्य शकारादौ [ विद्यमानशकारे ] शस्प्रत्यये परतः पदादेशो भवति । पूर्वसूत्रगृहीतपादशब्दाद् भिन्नस्य पादशब्दस्य ग्रहणार्थमेव च पृथक् सूत्रमारब्धम् । उदाहरति—**पादं पादं गायत्र्याःशंसति-पच्छः शंसतीति**-"संख्यैकार्थात् वीप्सायां शस्" [ ७. २. १५१. ] इति शस्, अनेन पादस्य पदादेशः । द्विजातेरुपनयनप्रकरणे आचार्यो माणवककर्णे गायत्रीं शंसति, तत्र गायत्र्यास्त्रिपादात्मिकायाः पादाः क्रमशो माणवकायोपदिश्यन्ते, प्रथमं प्रथमः पादस्ततः प्रथमद्वितीयौ, ततः प्रथमद्वितीयतृतीयाः, अथवा प्रथमं प्रथमः पादस्ततो द्वितीयस्ततस्तृतीयः, पश्चात् संपूर्णा गायत्रीति क्रमः, तत्रत्यमेवेदमुदाहरणम्, तदाह—**पच्छः शंसति गायत्रीम्** इति । अत्र पूर्वं गायत्र्याः' इति सम्बन्धित्वेन तदुपादानं, वृत्तौ सति कथं तस्याः कर्मत्वमित्याशङ्कापनोदायाह—**'वाक्यगम्यस्य गायत्र्याः पादसम्बन्धस्ये**त्यादि—'पादं पादं गायत्र्याः शंसति" इति वाक्यम्, तत्र गायत्र्याः पादेन सह सम्बन्धो गम्यते, स च वृत्तौ सत्यां वृत्तावन्तर्भूतः पादस्य पृथगनुपस्थितेः, अन्वयितावच्छेदकं रूपं हि पृथगुपस्थितिमत्त्वम्, तच्च निवृत्तमिति सम्बन्धार्थो निवृत्तः, सम्प्रति च शंसतीति क्रियायाः किमपि कर्मापेक्ष्यते, तच्चोपस्थितत्वाद् गायत्र्येव भवति, तस्या एवावयवरूपेण शंसनादिति तस्यामेव कर्मत्वं प्रयुज्यत इति शेषत्वाभावान्न तस्याः षष्ठयन्तत्वम् । **ऋच इति किमिति**–'श्शसि' इति पृथक् सूत्रकरणादेव प्राण्यङ्गाद् भिन्नस्येह पादस्य ग्रहणमिति कल्पयिष्यत इति ऋचः पादस्यापि पदादेशो भविष्यत्येवेति ऋच इति पदमनर्थकमिति प्रष्टुराशयः । ऋग्विषयभिन्नस्य चतुर्थांशवाचकस्यापि पादशब्दस्य शसि प्रत्यये सत्यपि पदादेशो नाभिमत इति तद्वारणार्थम् 'ऋचः' इति कथनमावश्यकमिति प्रत्युदाहरणेनाह—**पादं पादं कार्षापणस्य ददातीत्या**दिना । प्रत्युदाहरणान्तरमप्याह—**एवं—पादशः श्लोकं व्याचष्टे** इति—पादं पादं श्लोकस्य व्याचष्ट इत्यर्थः, अत्रापि नियताक्षरसमुदायरूपश्लोकचतुर्थांशवाचकस्य पादशब्दस्य न पदादेशः, तदर्थमपि 'ऋचः' इति पदमावश्यकमिति भावः 'श्शसि' इति शकारद्वयविशिष्टः पाठः किमर्थ इति शङ्कामपनुदति—**शसो द्विशकारपाठा-द्**इति—विभक्तिशसि—द्वितीयाबहुवचने शसि न पदादेशो भवतीति शकारद्वयविशिष्टशस्पाठप्रयोजनम्; द्विशकारपाठेन हि विद्यमानशकारवत्त्वं प्रतीयते, शसः शकारश्च न विद्यमानोऽपि तु अप्रयोगितयेत्संज्ञक, इति तत्र न पदादेशः । क्वेत्याह—**ऋचः पादान् पश्येति** । अत्र पादशब्दाद् द्वितीयाबहुवचने शसि पादानिति रूपं न तु 'पदः' इति भावः ॥ ३. २. ९७ ॥

## शब्द-निष्क-घोष-मिश्रे वा ॥ ३. २. ९८ ॥

**त० प्र०—शब्दादिषूत्तरपदेषु पादस्य 'पद्' इत्ययमादेशो वा भवति । पादयोः शब्दः–पच्छब्दः, पादशब्दः; एवं–पन्निष्कः, पादनिष्कः; पद्घोषः, पादघोषः; पादाभ्यां मिश्रः–पन्मिश्रः, पादमिश्रः ॥ ९८ ॥**

**श० म० न्यासानुसन्धानम्—शब्द०** । नित्यमादेशप्रकरणं परिसमाप्य विकल्पादेशमाहानेन सूत्रेण, तत्र शब्दादय उत्तरपदविशेषणानि, तदाह—**शब्दादिषूत्तरपदेषु** इति—निष्कघोषमिश्रा आदिपदग्राह्याः । **पादयोःशब्दः** इति—पादयोः सञ्चालनपतनादिकृतः शब्द इत्यर्थः, षष्ठीसमासः, पदादेशश्चानेन । वेत्युक्ततया पादशब्दोऽपीत्याह—**पादशब्द** इति । प्रकृतं विग्रहमतिदिशति—एवं-**पन्निष्कः, पादनिष्कः** इति—निष्कशब्दार्थोऽत्र भूषणविशेषः, निष्कशब्दस्य बहवोऽर्थाः—दीनारम्, मानविशेषः, भूषणविशेषश्च,

"Aho Shrutgyanam"

स च यद्यपि वक्षोभूषणे प्रयुक्तः, तथापीह पन्निष्क इत्यादि प्रयोगश्रवणात् पादभूषणेऽपि प्रयुज्यत इति प्रतीयते । **पद्घोष** इति—पादयोर्घोष इति विग्रहः, शब्दः—स्पष्टं परिचीयमानः, घोषश्चास्पष्ट इति शब्द-घोषयोर्भेदः । **पादाभ्यां मिश्रः पन्मिश्रः** इति—मिश्रशब्दः संयुक्तार्थः, पादाभ्यां संयुक्त इत्यर्थः, सहार्थे तृतीया, यदि च मिश्रशब्दस्य मिश्रीकृतार्थपरत्वमाश्रीयते तदा करणे सा ॥ ३. २. ९८ ॥

## नस् नासिकायास्तः-क्षुद्रे ॥ ३. २. ९९ ॥

त० प्र०—**नासिकाशब्दस्य तस्प्रत्यये क्षुद्रशब्दे चोत्तरपदे परे 'नस्' इत्ययमादेशो भवति । नासिकाया नासिकायां वा—नस्तः, नासिकायां नासिकया वा क्षुद्रः—नःक्षुद्रः ॥ ९९ ॥**

श० म० **न्यासानुसन्धानम्—नस्०** । अत्र पूर्वं प्रत्ययरूपं निमित्तं परत उत्तरपदरूपमिति तथव व्याख्याति—**तस्प्रत्यये 'क्षुद्रशब्दे चोत्तरपदे** इति । उदाहरति—**नासिकाया नासिकायां वेति**—आद्यादीनामाकृतिगणत्वात् सार्वविभक्तिकस्तसुः, तत्र नासिकाया इति पञ्चम्यन्तम्, नासिकायामिति सप्तम्यन्तम्, एवं-नासिकायां नासिकाया वा 'क्षुद्रः' इत्यत्र पूर्वं सप्तम्यन्तेन विग्रहे नासिकाविषयकक्षुद्रत्वविशिष्टः, पञ्चम्यन्तेन विग्रहे च नासिकाहेतुकक्षुद्रत्वविशिष्ट इत्यर्थः, उभयत्र नासिकाया नसादेशः ॥ ३. २. ९९ ] ॥

## येऽवर्णे ॥ ३. २. १०० ॥

त० प्र०—**नासिकाशब्दस्य येप्रत्यये वर्णादन्यस्मिन्नभिधेये 'नस्' इत्ययमादेशो भवति । नासिकायै हितं तत्र भवं वा—नस्यम् । य इति किम् ? नासिक्यं नगरम्, चातुरर्थिकोऽयं ञ्यः, 'निरनुबन्धग्रहणे च न सानुबन्धकस्य ग्रहणं भवति' । अवर्ण इति किम् ? नासिक्यो वर्णः ॥ १०० ॥**

श० म० **न्यासानुसन्धानम्—ये०** । नस् नासिकाया इत्यनुवर्त्तते, तथा च सम्पन्नं सूत्रार्थमाह—**नासिकाशब्दस्ये**त्यादिना । उदाहरति—**नासिकायै हितमि**त्यादिना, तत्र हितमित्यर्थे "प्राण्यङ्गरथखल" [ ७. १. ३७. ] इति यः, भवार्थे च "दिगादिदेहांशाद्यः" [ ६. ३. १२४.] इति यः, पूर्वत्र नस्यं-नासिकाग्राह्यमौषधादिचूर्णम्' परत्र नस्यं—नासारज्वादि । **ये इति किमिति**—अवर्णे इत्येतावत्युक्तेऽपि वर्णादन्यस्मिन्नभिधेये नासिकाया नस् इत्यर्थे सति वर्णादन्यार्थाभिधानयोग्यप्रत्ययपरत्वलाभसंभावनायां तादृशप्रत्ययस्य च भवाद्यर्थस्य यस्यैव संभवेन च नस्यमित्यादिलक्ष्यसिद्धौ यग्रहणं व्यर्थमिति प्रष्टुराशयः । न केवलं तादृशः प्रत्ययो य एव, किन्तु ञ्योऽपि, तत्र च नसादेशो नेष्टः, सामान्येन यप्रत्ययपरिग्रहे च तत्रापि नसादेशप्रवृत्तिर्दुर्वारेति तद्वारणाय य इत्यावश्यकमिति प्रत्युदाहरणेनाह—**नासिक्यं नगरमिति**, नासिकाया अदूरभवमित्यर्थे "सुपन्थ्यादेर्ञ्यः" [ ६. २. ८४.] इति ञ्यः । नन्वत्रापि प्रत्ययस्य 'य'—रूपत्वमेवेति कृतेऽपि 'ये' इत्येतद्ग्रहणे कुतो न नसादेश इति चेदत्राह—**निरनुबन्धकग्रहणे च न सानुबन्धकस्य ग्रहणं भवती**ति—सूत्रेऽनुबन्धरहितो यकारमात्रनिर्देशः, तथा च तादृशस्यैव यस्येह ग्रहणं भवतीति ञाकारानुबन्धस्य ञ्यस्य ग्रहणं न भवति, 'ये' इति न क्रियते चेत् तदा स्यादेवेति भावः । वर्णपर्युदासवैयर्थ्यं शङ्कते—**अवर्ण इति किमिति** । उत्तरयति—**नासिक्यो वर्णः** इति—नासिकायां भवः, नासिकामभिहत्य वायुनाऽभिव्यञ्जितो वर्णः—नासिक्यः, अत्राऽपि भवार्थे देहांशत्वाद् यः, अत्र नेष्यते नसादेशः, वर्णपर्युदासाभावे च स दुर्वार इति तद्वारणाय तत्सार्थक्यमिति भावः ॥ ३. २. १०० ॥

## शिरसः शीर्षन् ॥ ३. २. १०१ ॥

त० प्र०—**शिरस्शब्दस्य 'शीर्षन्' इत्ययमादेशो भवति ये प्रत्यये परे । शिरसि भवः—शीर्षण्यः स्वरः, एवं—शीर्षण्यो व्रणः; शिरसे हितं—शीर्षण्यं तैलम् । य इत्येव—शिरस्तः, सशिरस्कः 'निरनुबन्धग्रहणे च न सानुबन्धकस्य ग्रहणं' तेनेहापि न भवति—शिर इच्छति—शिरस्यति, तथा हस्तिनः शिर इव शिरो यस्य—हस्तिशिराः, तस्यापत्यं स्त्री बाह्वादित्वादिञि "शीर्षः स्वरे तद्धिते" (३. २. १०३. ) इति शिरसः शीर्षादेशे "अनार्षे वृद्धेऽणिञो०" (२. ४. ७८. ) इत्यादिना चेञः ष्यादेशे—हास्तिशीर्ष्या,**

"Aho Shrutgyanam"

**एवं-पैलुशीर्ष्या; अत्र ष्य-शीर्षदेशयोः स्थानिवद्भावात् शीर्षन्नादेशः स्यात्। शिरस इति चादेशेन संबध्यते न प्रत्ययेन, तेन हास्तिशीर्षिरित्यादौ समाससंबन्धिन्यपि तद्धिते उत्तरसूत्रेण शीर्षादेशो भवति॥ १०१॥**

**श० म० न्यासानुसन्धानम्—शिरस०।** 'ये' इत्यनुवर्त्तते, तथा चार्थमाह—**शिरस् शब्दस्ये**त्यादिना। **शीर्षण्यः स्वर** इति—देहांशत्वाद् यः, शीर्षन्नादेशे सति "नोऽपदस्य तद्धिते" [ ७.४.६१. ] इत्यन्त्यस्वरादिलुकि प्राप्ते "अनोऽट्ये ये" [७.४.५१.] इति निषेधः। **शीर्षण्यं तैलमि**त्यत्र प्राण्यङ्गत्वाद् यः। 'ये' इत्यस्यानुवृत्तिरावश्यिकेत्याह—**य इत्येवेति**। व्यावर्त्यमाह—**शिरस्तः, सशिरस्कः,** इति—पूर्वत्र पञ्चम्यन्तात् पित् तस्, परत्र शिरसा सह वर्त्तते इति विग्रहे बहुव्रीहिः सहस्य सादेशः, "शेषाद् वा" [ ७.३.७५. ] इति कच्, 'ये' इत्युक्तत्वादेव तसि कचि च शिरसः शीर्षन्नादेशो न भवति। यरूपपर्यवसायिनि सानुबन्धे यप्रत्ययेऽपि न भवतीत्याह—**निरनुबन्धग्रहणे न सानुबन्धस्ये**त्यादिना, **शिर इच्छति शिरस्य**ति शिरस् शब्दादिच्छार्थे क्यन्, तदीयसकारस्य सानुबन्धत्वेनेह ग्रहणं न भवतीति शीर्षन्नादेशो न भवति। सानुबन्धग्रहणाभावस्य फलान्तरमप्याह—**तथा हस्तिनः शिर इव शिरो यस्ये**ति—केवलस्य शिरसोऽपत्यार्थेन सम्बन्धासम्भवात् समासाश्रयणम्, तस्य हस्तिशिरसोऽपत्यं स्त्रीत्यर्थे "बाह्वादिभ्यो गोत्रे" [ ६.१.३२. ] इतीञ् "शीर्षः स्वरे तद्धिते" [ ३.२.१०३. ] इत्यग्रिमसूत्रेण शीर्षादेशः, "अनार्षे वृद्धेऽणिञो०" [ २.४.७८. ] इति ञः ष्यादेशः, तत्र षकार इत्, शीर्षशब्दाकारस्य "अवर्णवर्णस्य" [ ७.४.६८. ] इति लोपः, स्त्रीत्वादाप्—**हास्तिशीर्ष्येति** भवति, इह ष्यादेशस्य स्थानिवद्भावेनेञ्निष्ठं प्रत्ययत्वमानीय शीर्षादेशस्य स्थानिवत्त्वेन च शिरः शब्दत्वं गृहीत्वा यत्वस्य स्वतः सिद्धत्वेनानेन शीर्षन्नादेशो न भवति, यतः ष्यादेशोऽपि सानुबन्ध एवेति। ननु यथा "पदः पादस्याज्यातिगोपहते" [ ३.२.९५. ] इति प्रकरणे पठिते "हिम-हति-काषि-ये०" [ ३.२.९६. ] इति सूत्रे द्विपाद्यं त्रिपाद्यमित्यादौ प्रवृत्त्यभावाय 'पादसम्बन्धिनि ये' इति व्याख्यानं कृतं तथेहापि शिरः सम्बन्धिनि 'ये' इत्येव व्याख्यायताम्, "हास्तिशीर्ष्या" इत्यत्र च न शिरःसम्बन्धी 'य'-कारोऽपि तु हस्तिशिरः सम्बन्धीति तथा व्याख्यानेनैवात्र वारणमिति न निरनुबन्धग्रहणे सानुबन्धस्य न ग्रहणमित्यस्येदमुदाहरणमिति चेदत्राह—**शिरस इति चादेशेन सम्बध्यते, न प्रत्ययेने**ति—तथा च प्रत्ययेन सम्बन्धाभावान्न तथा व्याख्यानमिह सम्भाव्यते। प्रत्ययेन सम्बन्धाभावे प्रमाणं च लक्ष्यानुसारिव्याख्यानमेव, तदेवाह—**तेन हास्तिशीर्षिरित्यादावि**ति, अयमाशयः—इदमेव 'शिरसः' इति पदमग्रे "शीर्षः स्वरे तद्धितस्य" इति सूत्रेऽप्यनुवर्त्तते, तत्र यदि शिरः सम्बन्धिनि स्वरादौ तद्धिते परे इति व्याख्यास्यते तर्हि हास्तिशीर्षिरित्यादि तदीयमुख्योदाहरणानामपि न सिद्धिः स्यात्, इह प्रत्ययेन सम्बन्धः, तत्र चादेशेनेति वैषम्यस्य दुरुपपादत्वाच्च, तत्र च केवलस्य शिरश्शब्दस्य स्वरादिप्रत्ययपरत्वसंभावनाभावादेव तथाऽ [आदेशेनान्वयो] स्तु, प्रकृते प्रत्ययेनान्वये किं बाधकमिति चेत्? न—ऐकरूप्येण व्याख्यानेऽपि लक्ष्यसिद्धौ सत्यां वैषम्येण व्याख्याने बीजाभावात्॥ ३.२.१०१.॥

## केशे वा॥ ३.२.१०२॥

**त० प्र०—शिरसः केशविषये यप्रत्यये परे 'शीर्षन्' इत्यादेशो वा भवति। शिरसि भवाः—शीर्षण्याः केशाः, शिरस्याः—केशाः। केचित्तु—"इल्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः" इति प्रयोगदर्शनात् केशादन्यत्रापि विकल्पमिच्छन्ति, शाखादियप्रत्यये च 'शीर्षन्' इति नेच्छन्त्येव—शिरसस्तुल्यः शिरस्यः, शाखादित्वाद् यः॥ १०२॥**

**श० म० न्यासानुसन्धानम्—केशे०।** 'शिरसः शीर्षन्' इत्यनुवर्त्तते। 'केशे' इति नोत्तरपदविशेषणमपि 'तु' यप्रत्ययस्यैव व्याख्यानात्, तदाह—**केशविषये यप्रत्यये परे** इति। **शिरसि भवाः** इति—देहांशत्वाद् यः, विकल्पेनादेशः। मतान्तरसिद्धं विषयान्तरेऽपि विकल्पमाह—**केचित्** त्वित्यादिना। 'मृगशीर्षस्य शिरस्यास्तारकाः इल्वलाः स्मृताः' इत्यन्वयः, तथा च तारकाविषयेऽयं प्रयोग इति केशविषयत्वाभावः स्पष्ट एव, इत्थं च "शिरसः शीर्षन्" [ ३.२.१०१. ] इति पूर्वसूत्रेण नित्यमेव शीर्षन्नादेश उचितः,

"Aho Shrutgyanam"

तदभावकरणाच्च केशादन्यत्रापि तद्वैकल्पिकत्वमिष्टमित्याशात्येव । क्वचिच्च सर्वथा शीर्षन्नादेशाभाव एव तेषां मते, इत्याह–**शाखादियप्रत्यये** इति । शाखादित्वनिबन्धनयप्रत्यये च सर्वथा शीर्षन्नादेशाभावमेव ते इच्छन्ति, तन्मतसिद्धं प्रयोगमाह—**शिरसस्तुल्यः**—**शिरस्यः** इति, स्वमते चात्रापि शीर्षण्य इत्येव प्रयोग उचितः । प्रत्ययविधायकं सूत्रमुद्दिशति–**शाखादित्वाद् यः** इति—"शाखादेर्यः" [७. १. ११४.] इति तस्य तुल्ये कः "संज्ञा-प्रतिकृत्योः" [७. १. १०८.] इति प्रकरणपठितेन सूत्रेण यः प्रत्यय इत्यर्थः । यद्यपि 'शिरस्यास्तारकाः' इतिवद् वैकल्पिकत्व–स्वीकारेऽपि पाक्षिकः शिरस्य इति प्रयोगः स्यादेव, तथापि तेषां मतेऽत्र सर्वथा तदभाव एवेष्ट इति विशेषः ॥ ३. २. १०२ ॥

## शीर्षः स्वरे तद्धिते ॥ ३.२. १०३ ॥

**त० प्र०—शिरस्शब्दस्य स्वरादौ तद्धिते परे 'शीर्ष' इत्ययमादेशो भवति । हस्तिशिरसोऽपत्यं–हास्तिशीर्षिः, एवं–स्थौलशीर्षिः, पैलुशीर्षिः; मृगशिरसा चन्द्रयुक्तेन युक्ता–मार्गशीर्षी पौर्णमासी, स्थूलशिरस इदं–स्थौलशीर्षम्, शिरसि कृतं–शैर्षम्, शिरसा तरति–शीर्षिकः । स्वर इति किम् ? शिरस्कल्पः । तद्धित इति किम् ? शिरसा, शिरसे; स्थूलशिरसमाचष्टे स्थूलशिरयति । कथमिल्वला मृगशीर्षस्येति ? शीर्षशब्दः प्रकृत्यन्तरमस्ति–शीर्षच्छेद्यं परिच्छिद्येति, अनेनैव च सिद्धे उक्तविषये शिरसः प्रयोगनिवृत्त्यर्थं वचनम् ॥ १०३ ॥**

श० म० **न्यासानुसन्धानम्**—शीर्षः० । "सप्तम्या आदिः" [७. ४. ११४. ] इति परिभाषासूत्रानुसारं सप्तम्यन्तस्य विशेष्यस्य विशेषणं तदादिबोधकमिति परिभाष्यते, तथा च 'तद्धिते' इति सप्तम्यन्तं विशेष्यम्, तस्य विशेषणभूतं **'स्वरे'** इति पदं तदादिबोधकमिति स्वरादावित्यर्थकं सम्पद्यते, तदाह—**शिरसश्शब्दस्य स्वरादौ तद्धिते परे** इति । उदाहरति—**हस्तिशिरसोऽपत्यमिति**—हस्तिनः शिर इव शिरो यस्य स हस्तिशिरा इत्युक्तं प्राक्, तस्यापत्यमित्यर्थे "बाह्वादिभ्यो गोत्रे" [६. १. १२९.] इति इञि स्वरादितद्धितपरत्वसत्त्वात् प्रकृतसूत्रेण शीर्षादेशे "अवर्णेवर्णस्य" [७. ४. ६८.] इत्यवर्णस्य लोप आदिस्वरवृद्धिः । एवं—**स्थौलशीर्षिरिति**—स्थूलं शिरो यस्य स—स्थूलशिराः, तस्यापत्यमित्यर्थः । पीलुर्वृक्षः, तत्फलं पीलु, तद्वत् शिरो यस्य स पीलुशिराः, तस्यापत्यं—**पैलुशीर्षिः । मृगशिरसा** एतन्नाम्ना **चन्द्रयुक्तेन** चन्द्रस्थितिमता नक्षत्रेण, **युक्ता पौर्णमासी—मार्गशीर्षी** मृगशिरःशब्दात् "चन्द्रयुक्तात् 'काले०" ([६. २. ६.] इति अण् प्रत्ययः, शीर्षादेशः, आदिस्वरस्य वृद्धिः, स्त्रीत्वान्ङीः । **स्थूलशिरस इदं**—स्थौलशीर्षमिति—"तस्येदम्" [६. ३. १६० ] . इति अण् । शिरसि कृतं—**शैर्षमिति**—"तत्र कृत-लब्धक्रीत-सम्भूते" [६. ३. ९४. इत्यण् । **शिरसा तरति-शीर्षिकः** इति—तरतीत्यर्थे "नौ-द्विस्वरादिकः" [६.४.१०.] इति इकः, शीर्षादेशः । **स्वर इति किमिति**–सामान्येन तद्धिते परत एव विधीयताम्, ये च पूर्वेणापवादभूतेन बाधोऽन्यत्रानेन 'शीर्षादेशो भविष्यतीति 'स्वरे' इति व्यर्थमित्यर्थः । प्रत्युदाहरति—**शिरस्कल्पः** इति–ईषदपरिसमासं शिरः—शिरस्कल्पः "अतमबादेरीषदपरिसमाप्ते कल्पप्—देश्यप्—देशीयर्" [७. ३. ११ ] इति कल्पप्, स च व्यञ्जनादिरिति शीर्षादेशस्तत्र नेष्टः, 'स्वरे' इत्यस्याभावे च स्यादेवेति तद्वारणाय 'स्वरे' इत्यावश्यकम् । नन्वेवं 'स्वरे' इत्येवोच्यताम्, 'प्रत्यये' इति च विशेष्यमध्याहार्यम्, तथा च न शिरस्कल्प इत्यादावतिव्याप्तिः, नापि हास्तिशीर्षिरित्यादावव्याप्तिरिति 'तद्धिते' इति व्यर्थमित्याशङ्कते **तद्धित इति किमिति** । न केवलं तद्धितप्रत्यय एव स्वरादिः, स्यादिविभक्तिष्वपि स्वरादयः प्रत्ययाः सन्ति, तत्रापि शीर्षादेशापत्तिः, न च तत्रेष्टः स इत्याह प्रत्युदाहरणेन—**शिरसेति**—शिरस्शब्दस्य टायां रूपमिदम्, अत्र शीर्षादेशनिवृत्त्यर्थमावश्यकं 'तद्धिते' इति, इति भावः । न केवलं स्यादिविभक्तय एव स्वरादयोऽतिप्रसक्तिविषया नामधातुप्रत्यया अपि नाम्नो विहिताः **स्वरादयः**, सन्ति, तेऽपि भविष्यन्त्यतिप्रसङ्ग विषया इत्याह—**स्थूलशिरसमाचष्टे** इति—"णिज् बहुलं नाम्नः कृगादिषु" [३. ४. ४२. ] इति णिचि "त्र्यन्त्यस्वरादेः" [७. ४. ४३.] इत्यन्त्यस्वरादेर्लुकि—**स्थूलशिरयतीति**—अत्रापि स्वरादिप्रत्ययसत्त्वात् शीर्षादेशः स्यात्, तन्निवृत्तिरपि 'तद्धिते' इत्यस्य फलमिति भावः । विनापि स्वरादितद्धितप्रत्ययं शीर्षशब्दप्रयोगो दृश्यते स कथमुपपद्यत इति पृच्छति—**कथ-**



"Aho Shrutgyanam"

**मिल्वला मृगशीर्षस्ये** ति---"इल्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः" इति पूर्वोदाहृतादरणीयवाक्ये मृगशीर्षस्येति स्यादिविभक्तौ परतः कथं शीर्षादेश इत्यर्थः। उत्तरयति---**शीर्षशब्दः प्रकृत्यन्तरमस्तीति**---शिरः पर्यायः शीर्षशब्दोऽप्यस्ति, स एवात्र प्रयुक्तो न तु शिरः शब्दस्थानीय इति भावः। प्रकृतमर्थं पोषयितुं शीर्षशब्दप्रयोगं प्रमाणयति **'शीर्षच्छेद्यं परिच्छिद्य** इति---शीर्षच्छेदमर्हतीत्यर्थे "शीर्षच्छेदाद् यो वा" [ ६. ४. १८४. ] इति यः, तादृशं जनं परिच्छिद्य---निश्चित्येति क्वाचित्कः प्रयोगः, तत्र शीर्षच्छेदशब्दः शिरश्छेदार्थकः शिरःपर्यायशीर्षशब्दवशेनैव प्रयुक्त इत्यर्थः। इत्थं च प्रकृतसूत्रस्य वैयर्थ्यमायातम्, विनापि प्रकृतसूत्रं स्वाभाविकेन शीर्षशब्देनैव हास्तिशीर्षिरित्यादिसिद्धिरस्त्येवेति शङ्कामुत्थाप्य समाधत्ते-**'अनेनैव च सिद्धे उक्तविषये शिरसः प्रयोगनिवृत्त्यर्थं वचनमिति**---स्वरादौ तद्धिते शिरः शब्दस्थाने शीर्षशब्द एव प्रयोक्तव्यो न शिरः शब्द इति प्रयोगनियमार्थं प्रकृतसूत्रमिति भावः ॥ ३. २. १०३ ॥

## उदकस्योदः पेषं-धि-वास-वाहने ॥३.२.१०४॥

**त० प्र०---उदकशब्दस्य पेषमादिषूत्तरपदेषु 'उद्' इत्ययमादेशो भवति। उदकेन पिनष्टि-उदपेषं पिनष्टि तगरम्, उदकं धीयतेऽस्मिन्निति-उदधिः-घटः, उदकस्य वासः-उदवासः, एवम्-उदवाहनः। अनामार्थं वचनम्, नाम्न्युत्तरेणैव सिद्धम् ॥ १०४ ॥**

**श० म० न्यासानुसन्धानम्---उदक०।** पेषंधिवासवाहनान्युत्तरपदस्य विशेषणानि, तथा च तद्रूपे उत्तरपदे उदकशब्दस्योदादेशः प्रकृतसूत्रविधेयः। उदाहरति---**उदकेन पिनष्टीति**---"स्वस्नेहनार्थात् पुष-पिषः" [ ५. ४. ६५. ] इति णम्, उपपदसमासः, पेषमिति णमन्ते उत्तरपदेऽनेनोदकशब्दस्य उदादेशः। **उदकं धीयतेऽस्मिन्निति** दधातेराधारे ""व्याप्यादाधारे" [ ५. ३. ८८. इति किः, आतो लोपे धि-शब्दो निष्पद्यते, उपपदसमासे सति अनेनोदकस्योदादेशः। वासशब्दे उदाहरति---**उदकस्य वासः** इति---वसनं वासो भावे घञ्, उदकस्य वास इति षष्ठीसमासे सति अनेनोदकस्योदादेशः। **उदवाहनः** इति। उदकं वाहनमस्येति विग्रहः, बहुव्रीहिसमासे सति उदकस्योदादेशः। एते प्रयोगाः सर्वे यौगिका एव, तदाह---**अनामार्थं वचनमिति**---'नामभिन्नविषये प्रवृत्त्यर्थमिदं सूत्रमिति भावः। उदधिरिति समुद्रनामस्वपि पठयते, तत्र कथमुदकस्योदादेश इत्यादिशङ्कायामाह---**नाम्न्युत्तरेण सिद्धमिति**---"नाम्न्युत्तरपदस्य च" इति वक्ष्यमाणेन सूत्रेणैव तत्र सिद्धिरिति न तदर्थमेतत्सूत्रावश्यकतेति भावः ॥ ३. २. १०४. ॥

## वैकव्यञ्जने पूर्ये ॥ ३. २. १०५ ॥

**त० प्र०---उदकशब्दस्य पूरयितव्यवाचिन्येकव्यञ्जनेऽसंयुक्तव्यञ्जनादावुत्तरपदे उदादेशो वा भवति। उदकुम्भः, उदककुम्भः; उदघटः, उदकघटः; उदपात्रम्, उदकपात्रम्। व्यञ्जन इति किम्? उदकामत्रम्। एकेति किम्? उदकस्थालम्। पूर्य इति किम्? उदकपर्वतः, उदकदेशः ॥१०५॥**

**श० म० न्यासानुसन्धानम्**---वैक०। वा एकव्यञ्जने' इतिच्छेदः तत्र 'एकव्यञ्जने' इति 'उत्तरपदे' इत्यस्य विशेषणम्, "सप्तम्या आदिः" [ ७. ४. ११४ ] इति परिभाषणात् तदादिबोधः, एकमसंयुक्तं व्यञ्जनमादौ यस्य तादृशे उत्तरपदे इत्यर्थः, उत्तरपदस्यैव च विशेषणं 'पूर्ये' इति, तथा च यादृशोऽर्थः सम्पन्नस्तमाह वृत्तिकृत्---**उदकशब्दस्य पूरयितव्यवाचिनि** इत्यादि। एकव्यञ्जने' इत्यस्यार्थमाह-**असंयुक्तव्यञ्जनादाविति,** पूर्ये उत्तरपदे इति सामानाधिकरण्येनान्वयो न घटते, यतो नोत्तरपदं पूरणीयमपितूत्तरपदार्थभूतो घटादिरेव, अत एव 'पूर्ये' इत्यस्यार्थपरतां व्याचख्यौ---पूरयितव्यवाचिनीति, तथा च पूर्ये यदुत्तरं पदं तस्मिन्निति रीत्या सम्बन्धो योजनीयः। **उदकुम्भः** इति---उदकस्य कुम्भ इति सम्बन्धसामान्यषष्ठया, उदकेन पूरणीयः कुम्भ इति पूरणार्थं वृत्तावन्तर्भाव्य करणतृतीयान्तेन वा समासः, उदकशब्दस्य पाक्षिक उदादेशः, एवं सर्वत्र। पदकृत्यमाह---**व्यञ्जन इति किमिति**---यद्यपि व्यञ्जनरूपविशेष्याभावे एकशब्दो विशेषणमपि व्यर्थ एव निर्विशेष्यस्य तस्याकिञ्चित्करत्वात् तथा ऽप्यवयवद्वारा समुदाये प्रश्नः---'एकव्यञ्जने' इत्येव किमर्थमिति तत्र विशेषणांशफलस्य पृथगेव वक्ष्यमाणतया विशेष्यांशमात्रफलं प्रथमं प्रदर्शनीय-

"Aho Shrutgyanam"

मित्याशयेन व्यंजने इति किमित्येतावदेव पृच्छति। **उदकामत्रमिति**—अमत्रमपि पात्रमेव, तदपि पूरणीयमिति पूर्ये उत्तरपदे सत्यपीह नेष्यते उदादेशः, व्यञ्जनग्रहणाभावे च स्यादेव। **एकेति किमिति**—अस्तु व्यञ्जनादावुत्तरपदे इत्येवार्थः, तावताऽप्यव्याप्त्यतिव्याप्तिपरिहारादिति 'एक' इति व्यञ्जनविशेषणं व्यर्थमित्याशयः। प्रत्युदाहरति—**उदकस्थालमिति**—स्थालीशब्द एव पात्रवाची श्रूयते स्म, प्रकृतप्रयोगाच्च तस्य नपुंसकत्वमपीति प्रतीयते। अन्नपात्रे नपुंसकं प्रयुज्यते लोकेऽपि, पाकपात्रे च स्त्रीलिङ्गम्, तथोदकपात्रेऽपि क्वचिन्नपुंसकं प्रयुज्यत इत्यस्मात् प्रयोगादवगम्यते, स्थालशब्दश्चानेकव्यञ्जनादिरिति तस्मिन्नुत्तरपदे उदकस्योदादेशो नेष्टः, तद्वारणायैकग्रहणमावश्यकमिति भावः। **पूर्य इति किमिति**—उदकस्य प्रायः पूर्येणैव सामर्थ्यमिति मत्वा प्रश्नः। **उदकपर्वतः** इति—उदकस्य पर्वतः, उदकबहुलः पर्वत इत्यर्थः। एवम्—**उदकदेशः** इत्यत्रापि स एवार्थः—उदकबहुलो देश इति, अत्र पर्वतदेशयोः पूरयितव्यवाचित्वाभावेन तयोः परत उदकशब्दस्योदादेशो नेष्टः, तद्वारणायेह पूर्य इत्यावश्यकमिति भावः ॥ ३. २. १०५.॥

## मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहे वा ॥ ३. २. १०६ ॥

**त० प्र०—मन्थादिषूत्तरपदेषूदकशब्दस्योदादेशो वा भवति। उदमन्थः, उदकमन्थः; उदौदनः, उदकौदनः; उदसक्तुः, उदकसक्तुः; उदबिन्दुः, उदकबिन्दुः; उदवज्रः, उदकवज्रः; उदभारः, उदकभारः; उदहारः, उदकहारः; उदवीवधः, उदकवीवधः; उदगाहः; उदकगाहः; अपूर्यार्थो यत्नः ॥१०६॥**

**श० म०न्यासानुसन्धानम्**—मन्थौ०। मन्थादय उत्तरपदविशेषणानि, एषूत्तरपदेषु सत्सु उदकशब्दस्योदादेशो विकल्पेन विधीयते प्रकृतसूत्रेण, तदाह—**मन्थादिष्विति**। **उदमन्थः** इति—द्रवद्रव्यसंस्कृताः सक्तवो मन्थ इत्युच्यते, उदकेन मन्थ इति विग्रह **इति तत्त्वबोधिनीकृत्**। उदकेन मथ्यते इति कर्मणि घञि "कारकं कृता" [ ३. १. ६८. ] इति समास इति लघुन्यासकारः। वैकल्पिके उदकस्योदादेशे—**उदकमन्थोऽपि**। **उदौदनः** इति—उदकेनोपसिक्त ओदन इत्यर्थः, उपसेकक्रियायाश्च वृत्तावन्तर्भावात् तद्द्वारा उदकेन सहौदनस्य सामर्थ्यम्, मयूरव्यंसकादेराकृतिगणत्वात् समासः, उदादेशो वैकल्पिकः, एवम्—**उदसक्तुरि**त्यत्रापि, उदकेनोपसिक्तः सक्तुरिति विग्रहे उपसेकक्रियाद्वारैवोदकेन सह सक्तोः सामर्थ्यम्। **उदबिन्दुरिति** षष्ठीसमासः। उदकस्य वज्रः—**उदवज्रः** उदकसंभूतो मण्यादिजातीयः पदार्थः वज्रत्वेन प्रसिद्धो वा मेघसम्भूतोऽशनिः। **उदभारः** उदकस्य भारः। **उदहारः** उदकं हरतीति सः, "कर्मणोऽण्" [ ५. ३. १४. ] इत्यण्, हारशब्दे परे उदकस्योदादेशः। **उदकवीवधः** वीवधशब्दोऽव्युत्पन्नः, उभयतोबद्धसिक्ये स्कन्धबाह्ये काष्ठे—पथिपर्याहारे वर्तते उदकस्य वीवधः उदकाहरणार्थः पथिपर्याहार इति तदर्थः, षष्ठीसमासः। **उदगाहः** इति—उदकस्य गाहो गाहनमुदकगाहः। सर्वेषामुत्तरपदानामेकव्यञ्जनादित्वेन पूर्वेणैवोदादेशसिद्धिरिति शङ्कायामाह—**अपूर्यार्थो यत्नः** इति, अयमाशयः—पूर्वसूत्रं पूर्ये उत्तरपदे प्रवर्त्तते, मन्थादीनां च पूरयितव्यवाचित्वाभावः स्पष्ट एवेति तत्र पूर्वसूत्रेण न प्राप्तिरिति तदर्थमयं सूत्रारम्भरूपो यत्नः कृत इति भावः॥३. २. १०६.।

## नाम्न्युत्तरपदस्य च ॥३.२.१०७॥

**त० प्र०—उदकशब्दस्य पूर्वपदस्योत्तरपदस्य च नाम्नि संज्ञायां विषये 'उद' इत्ययमादेशो भवति। उदमेघो नाम—यस्यौदमेघिः पुत्रः, उदवाहो नाम—यस्यौदवाहिः पुत्रः, उदपानं निपानम्, उदधिः समुद्रः। उत्तरपदस्य—लवणोदः, कालोदः, क्षीरोद, एवंनामानः समुद्राः; लोहितोदा, क्षीरोदा नाम—नदी; अच्छोदम्, सितोदम्, अरुणोदम्, लोहितोदम्, एवंनामानि सरांसि॥ १०७ ॥**

**श० म० न्यासानुसन्धानम्—नाम्न्यु०**। पूर्वसूत्रैः साधारण्येन पूर्वपदभूतस्योदकशब्दस्योदादेशो विहितः अनेन च नाम्नि उत्तरपदभूतस्यापि चोदकशब्दस्योदादेशो विधीयते, तदाह—**पूर्वपदस्योत्तरपदस्य** चेति—तत्रोत्तरपदस्थस्यादेशस्थले उत्तरपदे इति न सम्बध्यते वैयर्थ्यात्, तथा च तत्रानैमित्तिक एवादेशः, तस्योत्तरपदस्थत्वमेव वा तत्र निमित्तम्। उदाहरति—**उदमेघो नाम यस्यौदमेघिः पुत्र** इति—उदकपूर्णो मेघः—उदमेघः, तत्सादृश्यात्

"Aho Shrutgyanam"

तादृशस्य कस्यचन पुरुषस्य संज्ञेयम्, तस्य संज्ञात्वमेव प्रमाणयति---यस्यौदमेघिः पुत्र इति, उदमेघः स्वयं प्रसिद्धिमनाप्तोऽपि औदमेघेः प्रसिद्धया तस्यापि तन्नाम्ना प्रसिद्धत्वं स्वीकार्यमेवेति भावः। एवमुदवाहशब्दस्यापि नामत्वमाह---**उदवाहो नाम कश्चिद् यस्यौदवाहिः पुत्रः** इति---उदकं वहतीत्युदवाहः "कर्मणोऽण्" [ ५.३.१४.] इत्यण्, यौगिकशब्दोऽप्ययं पुरुषविशेषे रूढ इति तस्य नामत्वं तत्पुत्रप्रसिद्धया स्वीकार्यम्। **उदपानमिति** उदकस्य पानमिति विग्रहः, पीयतेऽस्मिन्निति पानं जलपानस्थानम्, तदाह---**निपानमिति**---कूपादिसमीपे पश्वादिजलपानार्थं स्थलविशेषो निर्मीयते, तदेव निपानमुदपानं वोच्यते। **उदधिः समुद्रः** इति---उदकं धीयतेऽस्मिन्नित्येव विग्रहः, समुद्रनामसु प्रसिद्धो ऽयं शब्दः। पूर्वपदभूतस्योदक-शब्दस्य नाम्न्युदादेशमुदाहृत्योत्तरपदभूतस्य तस्योदादेशोदाहरणमाह---**लवणोदः** इत्यादिना; लवणं क्षारमुदकं यस्य स लवणोद इति विग्रहे बहुव्रीहिसमासे उत्तरपदभूतस्योदकशब्दस्य उदादेशः। **कालोदः** इति---कालं कृष्णवर्णमुदकं यस्येति विग्रहः। क्षीरोदः इति---क्षीरमिवोदकं यस्येति विग्रहः। एषां शब्दानां नामत्वमाह---**एवंनामानः समुद्राः** इति। **लोहितोदा** इति लोहितं रक्तवर्णमुदकं यस्याः सेति विग्रहः; क्षीरमिवोदकं यस्याः **सा क्षीरोदा** एते नदीनामनी इति स्त्रीत्वादाप्। **अच्छोदमिति**---अच्छं निर्मलमुदकं यस्य तत्; सितं शुक्लमुदकं यस्यं तत्-**सितोदम्**; अरुणमुदकं यस्य तत्-**अरुणोदम्,** लोहितमुदकं यस्य तत् लोहितोदम्; एषामपि नामत्वमाह---**एवं नामानि सरांसीति,** अच्छोदसरसो वर्णनं कादम्बर्यां प्रसिद्धमेव, एवं सितोदादयोऽपि क्वचिदाख्यानादौ प्रसिद्धाः शब्दाः सरोवाचकाः। एषु च नित्यमेवोदकस्योदादेशः॥ ३.२.१०७॥

## ते लुग्वा ॥ ३.२.१०८ ॥

**त० प्र०---नामविषये ये पूर्वोत्तरपदे ते लुग् वा भवतः। देवदत्तः, देवः, दत्तः; सत्यभामा, सत्या, भामा; शब्दसाम्येऽपि प्रकरणादेरर्थविशेषनिश्चयः॥ १०८ ॥**

**श० म० न्यासानुसन्धानम्---ते०।** 'तत्' शब्दस्य प्रक्रान्तोपस्थापकत्वेन प्रक्रान्ते पूर्वोत्तरपदे तदर्थः, नाम्नीत्यनुवृत्तम्, तदाह---**नामविषये ये पूर्वोत्तरपदे** इति। लुक् शब्दः कर्मणि क्विबन्तः, लुच्यत इति लुगिति व्युत्पत्तेः, तथा च ते लुच्येते-लुप्येते इति तदर्थः। **देवदत्तः** इति लुगभावपक्षे समुदायोपस्थापकं रूपम्, तत्रोत्तरपदभूतस्य दत्तशब्दस्य लोपे---**देवः** इति, पूर्वपदभूतस्य देवशब्दस्य लोपे-**दत्तः** इति रूपम्। एवं---**सत्यभामेति** समुदायोपस्थापकं वैकल्पिकं रूपम्, तत्रोत्तरपदस्य भामेत्यस्य लोपे स्त्रीत्वादापि---**सत्येति,** पूर्वपदस्य सत्येत्यस्य लोपे---**भामेति**। अत्र स्वतन्त्रा अपि देव-दत्त-सत्य-भाम-शब्दा नामत्वेन प्रयुज्यन्त एवार्थविशेषेषु, देवदत्तादिशब्दपूर्वोत्तरपदभूता अप्यनेन सूत्रेण साध्यन्ते, एवं च किमर्थोऽयं शब्द इति कथं निश्चेयमाकारसाम्यात् सन्देहस्य दुर्वारत्वादित्यत आह **शब्दसाम्येऽपि प्रकरणादर्थविशेषनिर्णयः** इति, अयमाशयः---सत्यं देवदत्तादिबोधका देवादिशब्दास्त्रिदशादिबोधकाश्च देवादि---शब्दास्तुल्यरूपा एव, किन्तु शब्दार्थसन्देहे सति विशेषबोधकेषु---तात्पर्यनिश्चायकेषु प्रकरणमपि पठ्यतेऽभियुक्तैः, तथाहि---

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थःप्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ १ ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥२॥" इति-

इत्थं प्रकरणमपि' शब्दार्थसन्देहे निर्णायकमित्यवगमाद् यत्र यादृशार्थस्य प्रकरणप्राप्तत्वं तत्र तादृशार्थस्यैव बोध इति न शब्दार्थसन्देह इति ॥ ३.२.१०८॥

## द्व्यन्तरनवर्णोपसर्गादप ईप् ॥३.२.१०९॥

**त० प्र०---'द्वि-अन्तर्' 'इत्येताभ्यामनवर्णान्तेभ्यश्चोपसर्गेभ्यः परस्य 'अप्' इत्येतस्योत्तरपदस्य' 'ईप्' 'इत्ययमादेशो भवति। द्विधा गता आपोऽस्मिन्निति-द्वीपम्, एवमन्तरीपम्, नीपम्, प्रतीपम्, समीपम्, अन्वीपम्, वीपम्। उपसर्गादिति किम्? शोभना आपः-स्वापः, पूजिता आपः-अत्यापः; स्वती पूजायां नोपसर्गौ, अत एव समासान्तो न भवति। अनवर्णेति किम्? प्रापम्, परापम्, संश्लिष्टा आगता आपोऽस्मिन् समापो-देवयजनम्॥ १०९॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—द्व्यन्त०।** उत्तरपदस्येति सम्बध्यते। द्वि-अन्तरशब्दौ पूर्वपदभूतौ, अवर्णान्तभिन्ना उपसर्गाश्च, **एतेभ्यः** परस्याप्शब्दस्य 'ईप्' इत्यादेशोऽनेन विधीयते, तदाह–**'द्वि अन्तर' इत्येताभ्यामित्या**दि। विगृह्णाति–**द्विधा गता आपोऽस्मिन्नि**ति। यस्यभूभागस्य द्वयोः पार्श्वयोः समुद्रादिसम्बन्धिन्य आपः सन्ति स [ भूभागः ] 'द्वीपम्' इति कथ्यते, नामत्वेन नित्यसमासत्वात् अस्वपदविग्रहः, यद्यपि स्वपदे [ द्वि अप् ] अपि विग्रहवाक्ये प्रयुक्ते एव तथापि पदान्तरस्यापि मध्ये प्रवेशादस्वपदविग्रहत्वं व्यवह्रियते। 'द्वि अप्' इत्यनयोर्बहुव्रीहिः ऋक्-पूः-पथ्यपोऽत्" [ ७. ३. ७६. ] इत्यत् समासान्तः, 'अप्' इत्यस्यानेन 'ईप्' आदेशे–**द्वीपमिति।** प्रकृतं विग्रहमन्यत्राप्यतिदिशति—**एवम्—अन्तरीपमित्या**दिना, अन्तर्गता आपो यस्मिन् तत् अन्तरीपम्, निवृत्ता आपो यस्मिन्निति–नीपम्, प्रतिगता आपो यस्मिन्निति—प्रतीपम्, संगता आपो यस्मिन् तत्—समीपम्, अनुगता आपो यस्मिन् तत्—अन्वीपम्, विगता आपो यस्मिन्निति **वीपम्,** सर्वत्र बहुव्रीहिसमासः, अत् समासान्तः पूर्ववत्। **उपसर्गादिति किमिति**–अन्तः शब्दसान्निध्यादसत्त्ववचनस्याव्ययस्यैव पूर्वपदत्वेन ग्रहणमिति तथाभूताश्च शब्दाः प्राय उपसर्गा एव सन्तीति 'उपसर्गाद्' इत्यस्याभावेऽपि नातिव्याप्तिरिति मत्वा प्रश्नः। उपसर्गादित्यस्याभावे च तद्विशेषणीभूतस्यानवर्णपदस्यापि वैयर्थ्यमेवेति तदपि नास्त्येवेति विज्ञाय गतिपूर्वपदं समासं प्रत्युदाहरति–**शोभना आपः–स्वापः** इति अत्र विशेषणसमासः,। 'सु' इत्यस्यापि क्वचिदुपसर्गत्वदर्शनात् कथमिदमुपसर्गादित्यस्य प्रत्युदाहरणमिति शङ्कायामाह—**स्वती पूजायां नोपसर्गाविति**—"धातोः पूजार्थस्वति०" [ ३. १. १. ] इति सूत्रे पूजार्थौ स्वती पर्युदस्येते इति तयोर्नोपसर्गत्वमिति प्रत्युदाहरणत्वं सम्भवतीति भावः। अनुपसर्गयोः पूजार्थयोः स्वत्योः सत्त्वादेवात्र समासान्तोऽत् न भवतीत्याह—अत एव समासान्तो न भवतीति—"पूजास्वतेः प्राक् टात्" [ ७. ३. ७२. ] इति सूत्रेण पूजार्थस्वतिभ्यां परादुत्तरपदात् समासान्तस्य निषेधादिह स न भवतीति भावः। अस्तु 'उपसर्गाद्' इति, तस्य अनवर्णेति विशेषणं किमर्थमिति पृच्छति—**अनवर्णेति किमिति।** तदभावेऽवर्णान्तादुपसर्गात् परस्यापि 'अप्' शब्दस्य ईपादेशः स्यादित्याह—**प्रापम्, परापमिति—**प्रगता आपो यस्मिस्तत्—प्रापम्, परागता आपो यस्मिस्तत्—परापमित्यर्थः, समासादिः पूर्ववत्। अनवर्णेति पर्युदासेन अवर्णान्तभिन्नवदावर्णान्तभिन्नस्यापि बोधादावर्णान्तोपसर्गात् परस्यापि अपो नादेश इति तदाह–**संश्लिष्टा आगता आपोऽस्मिन्निति—**सम्–आ–पूर्वकोऽप्शब्द इत्यवर्णान्तभिन्नपूर्वको न भवतीति न भवतीप् आदेशः, अनवर्णेत्यस्याभावे च स्यादेवेति तद्वारणाय तदावश्यकत्वमिति भावः। पाणिनीयास्तु—समा आपो यस्मिन्निति विगृह्णन्तीति, तन्मते नात्रोपसर्गपूर्वत्वम्। **देवयजनं** देव-पूजास्थानम्॥ ३. २. १०९॥

## अनोर्देश उप्॥ ३. २. ११०॥

**त० प्र०—अनोः परस्यापो देशेऽभिधेये 'उप्' इत्ययमादेशो भवति। अनुगता आपोऽस्मिन्–अनूपो देशः। देश इति किम्? अन्वीपं वनम्। कथं कूपः?, सूपः?, पृषोदरादित्वात्॥ ११०॥**

**श० म० न्यासानुसन्धानम्—अनो०।** लक्ष्यैकचक्षुष्कतया आचार्याः प्रतिलक्ष्यमपि लक्षणं विदधति, तथा च 'अनूप' शब्दसिद्ध्यर्थमिदं सूत्रम्। अप इत्यनुवर्त्तते, तथा च सूत्रार्थमाह—अनोः **परस्यापो देशेऽभिधेये** इति—**अनुगता आपो यस्मिन्निति—**यत्र देशे सर्वत्रापः सुलभाः स देश इत्यर्थः, "जलप्रायमनूपं स्यात्" इति कोशादपि तथा प्रतीतेः, यत्र वा देशे जलपूर्णदेश एवाधिकः शुष्कं स्थलमल्पं स देशः। देशादन्यत्र पूर्वसूत्रेण 'ईप्' एवेत्याह—**देश इति किम्? अन्वीपं वनम्** इति—अनुगता आपो यस्मिन्नित्येव विग्रहः। अनुपूर्वादन्यत्रापि देशादन्यत्रापि च दृश्यते क्वचिदुपादेशः स कथमुपपद्यत इत्याशङ्क्ते—**कथं कूपः, सूपः, यूपः?** इति—कु—ईषत् आपो यत्र स कूपः, सुपेया आपो यत्र स सूपः, यौतीति युत्, युत आपो यत्समीपे स यूप इत्यादिविग्रहे एषां सिद्धिरित्यभिमानेनात्र कथमुपादेश इति प्रश्नः। उत्तरयति–**पृषोदरादित्वादिति—**नैते व्युत्पन्नाः शब्दा अपि तु पृषोदरादित्वाद् यथाश्रुता एव वर्णलोप-वर्णविकारादिना निपात्यन्त इति नैते प्रकृतसूत्रव्यभिचारस्थलानि। यद्यपि समुपलभ्यमानपृषोदरादिगणे एषां पाठो नोपलभ्यते, तथापि "पृषोदरादयः"

"Aho Shrutgyanam"

[ ३. २. १५५. ] इति सूत्रे बहुवचननिर्देशस्याकृतिगणार्थत्वस्योक्तत्वादनुक्तानामपि संग्रहो बोध्य एव, तथा चापठितानामपि शब्दानां सिद्धिप्रकारः कथितः—

"वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥" इति ।

व्याख्यास्यते चेदं पद्यं तत्रैव, इवं च नात्रोपादेश इति न व्यभिचार इति ॥ ३. २. ११० ॥

## खित्यनव्यया-ऽरुषो मोऽन्तो ह्रस्वश्च ॥ ३. २. १११ ॥

**त० प्र०—अनव्ययस्य-अर्थात् स्वरान्तस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तो भवति, यथासंभवं ह्रस्वश्चान्तादेशो भवति। ज्ञमात्मानं मन्यते-ज्ञंमन्यः, पण्डितंमन्यः, क्ष्मंमन्यः, खट्वंमन्या, महंमन्यः, रात्रिंमन्यमहः, द्रुणिंमन्यः, ग्रामणिंमन्यः, वधुंमन्यः, खलपुंमन्यः; क्षेमंकरः, मेघंकरः, आढ्यंभविष्णुः, आढ्यंभावुकः, सुभगंकरणम्, आशितंभवो वर्तते, मितंगमः, विहंगमः, पतङ्गः। परत्वात् पुंवद्भावो ह्रस्वत्वेन बाध्यते-कालिमन्या, हरिणिमन्या, अरुस्-अरुंतुदः। खितीति किम्? पण्डितमानी, सुभगमानी। अनव्ययेति किम्? दोषामन्यमहः, दिवामन्या रात्रिः। अव्ययप्रतिषेधात् खिति तदन्तग्रहणम्, न ह्यव्ययात् परः खित्संभवति। अरुःशब्दोपादानादनव्ययस्य व्यञ्जनान्तस्य मो न भवति-गीर्मन्यः। *स्वरस्य ह्रस्व-दीर्घ-प्लुताः;* इति ह्रस्वः स्वरस्यैव। कृद्ग्रहणे सति (स) गतिकारकस्यापि ग्रहणात्-'कूलमुद्रुजः, कूलमुद्वहः' इत्यत्रापि भवति ॥ १११ ॥**

**श० म० न्यासानुसन्धानम्—खित्य०** । आदेशप्रकरणं परिसमाप्यागमप्रकरणमारभतेऽनेन सूत्रेण। तत्रानव्ययेति पर्युदासोऽव्ययभिन्नस्य तत्सदृशस्य नाम्नः संग्राहकः, तथा चारुषोऽप्यनव्ययत्वेनैव सिद्धिरिति तस्य पृथक्कथनेनाव्ययभिन्नस्य स्वरान्तस्य ग्रहणमित्याह—**अनव्ययस्यार्थात् स्वरान्तस्येति**—अरुः शब्दस्य पृथक्कथनसामर्थ्यादेव स्वरान्तस्येत्यर्थस्य लाभ इति भावः। 'उत्तरपदे' इत्यनुवृत्तम्, तद्विशेषणं—**खितीति,** तत्र खितः प्रत्ययस्य साक्षादुत्तरपदत्वासंभवादाह—**खित्प्रत्ययान्ते** इति-यद्यपि 'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न" इति ज्ञापितं प्राक्, तथापीह यथा तदन्तग्रहणं तथा वक्ष्यति स्वयमेवाग्रे, पूर्वमपि च सूचितं तत्। **यथासंभवं ह्रस्वश्चेति—**यत्र ह्रस्वभवनयोग्यताऽस्ति तत्रैव ह्रस्वो न तु सर्वत्रेत्यर्थः । यद्यपि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वस्यापि ह्रस्वविधाने बाधकाभावस्तथापि नानर्थिका शास्त्रप्रवृत्तिरस्त्वित्यभिप्रायेणएवमुक्तम् । उदाहरति—**ज्ञमात्मानमिति**—जानातीति ज्ञः "नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः" [ ५. १. ५४.] इति कः, आलोपः, ज्ञमात्मानं मन्यत इत्यर्थे "कर्तुः खश्" [ ५. १. ११७. ] इति खश्, दिवादित्वात् श्यः, उपपदसमासे 'ज्ञमन्य' इति स्थितावनेन मोन्तः, ह्रस्वस्य स्वत एव विद्यमानत्वान्न सः। एवं—पण्डितमात्मानं मन्यत इति **पण्डितंमन्यः,** सदसद्विवेकशालिनी प्रज्ञा-पण्डा, सा संजाताऽस्येति पण्डितः "तदस्य सञ्जातं तारकादिभ्य इतः" [ ७. १. १३८. ] इतीतः, खशादिः पूर्ववत्। **क्ष्मंमन्यः** इति—क्षमामात्मानं मन्यत इति विग्रहः, इह ह्रस्वोऽपि क्षमाशब्दस्य दीर्घान्तत्वात्। **खट्वंमन्या** खट्वामात्मानं मन्यते या सा, इहापि ह्रस्वः, स्त्रीत्वादाप्। एवं **महंमन्यः** इत्यपि, महान्तमात्मानं मन्यत इत्यर्थे डान्तस्य ह्रस्वः। **रात्रिंमन्यमहः** रात्रिमात्मानं मन्यते, रात्रिसदृशान्धकारादिवदहमपीति मन्यत इति भावः। **द्रुणिंमन्यः** इति-द्रुणीमात्मानं मन्यत इति विग्रहः, द्रुणी कच्छपी। **ग्रामणिंमन्यः** ग्रामणीमात्मानं मन्यते, ग्रामं नयतीति—ग्रामणीर्ग्रामनायकः, अग्रामनायकोऽपि ग्रामनायकमात्मानं मन्यत इत्यर्थः। वधुंमन्यः वधूमात्मानं मन्यते, तद्वत् पराधीनाचरण इति भावः। खलं—धान्यादिनिष्पावनस्थानं, पुनाति—कार्ययोग्यं करोतीति खलपूः, तमात्मानं मन्यत इति—**खलपुंमन्यः**। द्रुणिमन्यादारभ्यात्र पर्यन्तं सर्वत्र ह्रस्वोऽपि। **क्षेमंकरः** क्षेमं करोतीति विग्रहे "क्षेमप्रिय-मद्र-भद्रात् खा-ऽण्" [ ५. १. १०५. ] इति खः। **आढ्यंभविष्णुः** अनाढय आढयो भवति तच्छील इति विग्रहे "नग्न-पलित-प्रिया-ऽन्ध०" [ ५. १. १२७. ] इति खिष्णुः, गुणावादेशयोरनेन मोन्तः, अत्रैव विग्रहे खुकञि वृद्धावावादेशे-**आढयंभावुकः** इति। **सुभगंकरणमिति—** असुभगः सुभगः क्रियतेऽनेनेति विग्रहे "कृगः खनट् करणे" [५. १. १२९] इति खनट्। **आशितंभवो वर्त्तते** आशितस्य

"Aho Shrutgyanam"

भाव इत्यर्थे "भावे चाशितात् भुवः खः" [ ५. १. १३०. ] इति सूत्रेण भावे खः। मितं परिमितं गच्छतीति सः, मितोपपदाद् गमः "नाम्नो गमःखड्-डौ च विहायसस्तु विहः" [ ५. १. १३१. ] इति खः। **विहंगमः** विहायसा गच्छतीति सः, इह विहादेशोऽपि । **पतङ्गः**पतन् गच्छतीति विग्रहः, पृषोदरादित्वात् तलोपः। क्वचित् पुंवद्भाव-ह्रस्वत्वयोरुभयोः प्राप्तौ केन भाव्यमित्याशङ्कायामाह---**परत्वात् पुंवद्भावो ह्रस्वत्वेन बाध्यते इति,** अयमाशयः---उभयोः प्राप्तौ सत्यामनिर्णये प्राप्ते "स्पर्धे"" [ ७. ४. ११९] इति परिभाषासूत्रसहकारेण परस्यैव प्रवृत्तिर्भवतीति "परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्" [ ३. १. ४९. ] इति सूत्रापेक्षया प्रकृतसूत्रस्यैव बलवत्त्वात् प्रवृत्तिर्भवतीति। क्वेत्याह---**कालिंमन्या, हरिणिंमन्येति**---कालीमात्मानं मन्यते, हरिणीमात्मानं मन्यत इति विग्रहः, कालीहरिणीशब्दयोः पुंवद्भावे सति कालंमन्या हरितंमन्येति स्यात्, किन्तु परत्वाद् ह्रस्वस्य प्रवृत्त्या 'सकृद्गतौ स्पर्द्धे यद् बाधितं तद् बाधितमेव' इति न्यायेन न पुनः प्रवृत्तिरिति न पश्चादपि पुंवद्भावः । अनव्ययांशमुदाहृत्याऽरुष उदाहरति---**अरुन्तुद** इति---अरुर्मर्मस्थानं तुदतीति विग्रहः "बहुविध्वरुस्तिलात् तुदः" [ ५. १. १२४.] इति खश्, तुदादित्वात् शः, अनेन मोन्ते सति "संयोगस्यादौ स्कोर्लुक्" [ २. १. ८८. ] इति सलोपे सति रूपसिद्धिः। पदकृत्यमाह-**खितीति किमिति**---खितीत्यस्य स्थाने कृतीत्याद्येव सामान्येन वाच्यमित्याशयः, अन्यथा खितीत्यस्याभावे सामान्यत उत्तरपदेऽस्य प्रवृत्त्या देवाश्रित इत्यादिसमासेऽपि प्रवृत्तिर्दुर्वारेति कृदन्तस्थलप्रत्युदाहरणानुधावनप्रयासो विफल एव स्यात् । **पण्डितमानी, सुभगमानीति**---पण्डितं परं मन्यत इति विग्रहः, "मन्याण्णिन्" [ ५. १. ११७. ] इति णिन्, अत्रापि मोन्तः स्यादिति खितीति वाच्यमेवेति **भावः, एवं सुभगमानी**त्यपि । **अनव्ययेति किमि**ति---अनव्ययपदमव्ययभिन्नपूर्वपदोपस्थापकं तदभावे च 'उत्तरपदे' इत्यनुवृत्तिसामर्थ्यादेव पूर्वपदस्योपस्थितिः स्यादिति सामान्येन सर्वस्य पूर्वपदस्य खिति मोन्तो विधीयतामित्याशयः। **दोषामन्यमहः** इति---दोषा आत्मानं मन्यत इति विग्रहः, एवं---**दिवामन्या रात्रिरित्य**त्रापि, अत्रानव्ययग्रहणाभावे प्रकृतप्रयोगयोरव्यययोर्दोषादिवाशब्दयोर्ह्रस्वे मान्तागमे च 'दोषंमन्यम्' 'दिवंमन्या' इति स्यादिति तन्निवृत्तयेऽनव्ययस्येति वाच्यमेवेति भावः । पूर्वमुत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणमिति ज्ञापितत्वेनेह खितः प्रत्ययस्य ग्रहणे सति तदन्तग्रहणमनुचितमिति कथमिह 'खिदन्ते उत्तरपदे' इत्यर्थलाभ इत्याशङ्कायामाह---**अव्ययप्रतिषेधात् खिति तदन्तग्रहणमिति**---अनव्ययस्येति कथनेनाव्ययस्य मोऽन्तागमः प्रतिषिध्यते । यद्यपि नायं प्रसज्यप्रतिषेधार्थो नञ् किन्तु पर्युदासार्थः, स चाव्ययप्रतिषेधो व्यर्थः, यतोऽव्ययस्य खित्परत्वयोग्यतैव नास्तीत्याह---**नह्यव्ययात् परः खित् संभवीति**---खितः प्रत्ययस्य धातोरेव विधानादव्ययस्य खित्परत्वयोग्यताया एवाभावात् तस्य मान्तागमः प्राप्त एव नेति व्यर्थस्तस्य पर्युदाससूचितः प्रतिषेध इति व्यर्थीभूतः स तदन्तग्रहणमिह ज्ञापयति, एवं च खिदन्ताव्यवहितपूर्वत्वस्याव्ययेषु सम्भवाद् भवति तत्प्रतिषेधसार्थक्यम् । अर्थात् स्वरान्तस्येति व्याख्यातं, तन्मूलमुद्घाटयितुं तत्फलमाह---**अरुः शब्दोपदानादनव्ययस्य व्यञ्जनान्तस्य मो न भवती**ति---अनव्ययस्येत्युक्त्याऽव्ययभिन्नस्य सर्वस्य मागमे सिद्धे सति अरुषोऽपि स्यादेवेत्यरुषो ग्रहणेन व्यञ्जनान्तस्य चेदरुष एवेति विज्ञापनादन्यस्य व्यञ्जनान्तस्य न भवतीत्यर्थत एव स्वरान्तस्यैव मान्तागम इति पर्यवस्यतीति भावः, तत्फलमाह---**गीर्मन्यः** इति---गिरमात्मानं मन्यत इति विग्रहः, अत्र यद्यपि मागमे सत्यपि तस्य "पदस्य"" [ २. १. ८९. ] इति संयोगान्तस्य मस्य लोपे प्रकृतरूपसिद्धौ बाधकाभाव इति कथयितुं शक्यते, तथापि "रात् सः" [ २. १. ९०. ] इति नियमाद् रेफात् परस्य सकारभिन्नस्य मस्य लोपो न स्यादिति रूपासिद्धिर्बोध्या । ननु यत्र मान्तागम-ह्रस्वयोरुभयोर्विधानं तत्र क्रमेण पूर्वं मान्तागमे पश्चात् तस्यैव ह्रस्वो भवत्विति चेदत्राह---❀ **स्वरस्य ह्रस्वदीर्घप्लुता** ❀ **इति ह्रस्वः स्वरस्यैवेति**---ह्रस्व-दीर्घ-प्लुता विधीयमानाः स्वरस्यैव स्थाने भवन्तीति प्रकृतन्यायार्थः । तथा च न व्यञ्जनस्य ह्रस्वप्राप्तिरिति मागमे सत्यपि स्वरेष्वन्त्यस्य स्थाने एव ह्रस्वो भवति, न व्यञ्जनस्य मस्येति भावः । ननु 'अनव्ययारुषः" इति षष्ठीनिर्देशेन "षष्ठ्याऽन्त्यस्य [ ७. ४. १०६. ] इति परिभाषयाऽन्त्यस्य ह्रस्वो विधेयः, अन्ते च स्वराभावान्न भविष्यति ह्रस्व इति चेत् ? न-सन्नियोगशिष्टत्वात्, सन्नियोगशिष्टो हि ह्रस्वो मागमेन सहैव भविष्यति, स्वरस्य ह्रस्वस्तस्यैव मागमश्च । यद्यपि ह्रस्व-

"Aho Shrutgyanam"

श्रुत्या ❀ स्वरस्य ह्रस्वदीर्घप्लुताः ❀ इति न्यायवशात् स्वरस्येत्युपस्थितम्, तच्चानव्ययस्येत्यस्य विशेषणम्, विशेषणेन च तदन्तविधिर्भवति, एवं च स्वरान्तस्यानव्ययस्य पूर्वपदस्य ह्रस्वो भवतीत्यर्थः, न तु स्वरस्येति विशेष्यम्, पूर्वपदस्येति च विशेषणम्, अनव्ययपूर्वपदसम्बन्धिनः स्वरस्य–ह्रस्वो भवतीति, तथा सति वाङ्मन्य इत्यादावपि ह्रस्वप्रवृत्त्यापत्तिः, एवं च पूर्वं मागमप्रवृत्तौ स्वरान्तत्वाभावाद्ध्रस्वो न स्यादिति शङ्कयितुं शक्यते, तथापि ❀ सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्ति ❀ इति न्यायेन सहैवोभयमपि प्रवर्त्तत इति न स्वरान्तत्वहान्या ह्रस्वाप्रवृत्तिप्रसङ्ग इति । न केवलं खिदन्तस्यैव ग्रहणमपि तु खिदन्तान्तस्यापि क्वचिद् ग्रहणं भवतीत्याह—**कृद्ग्रहणे सति गति-कारकस्यापी**ति—"कृत् सगति-कारकस्यापि" [ ७.४.११७. ] इति परिभाषया कृद्ग्रहणे केवलस्य गति-कारकपूर्वस्यापि च ग्रहणाद् गतिकारकपूर्वस्यापि खिदन्तस्येह ग्रहणमिति भावः । तत्फलमाह—**कूलमुद्रुजः, कूलमुद्वह इत्यत्रापि भवतीति** । कूलोपपदात् उद्पूर्वकात् रुजेर्वहेश्च "कूलादुद्रुजोद्वहः" [ ५.१.१२२. ] इति खश्, अत्र उदिति' गतिसंज्ञम्, तत्पूर्वकस्यापि खिदन्तस्य 'उद्रुज, 'उद्वह' इत्यस्येह खिदन्तत्वेन ग्रहणात् तस्मिन् परतः सति भवत्येवात्र मागम इति भावः । वृत्तौ कृद्ग्रहणे सति गतिकारकस्यापीति पाठो न समीचीनः, गतिकारकयोः स्वातन्त्र्येण ग्रहणस्यानिष्टत्वात्, किन्तु सगतिकारकस्यापीत्येव पाठः समीचीनः । प्रकृतपाठस्यैव वा तत्रैव तात्पर्यमवधारणीयं, गतिकारके स्तोऽस्येति मत्वर्थीयेनाकारेण तस्य तदर्थकत्वसम्भवात् ॥ ३. २. १११. ॥

## सत्या-ऽगदा-ऽस्तोः कारे ॥ ३. २. ११२ ॥

**त० प्र०—सत्यादिभ्यः कारशब्दे उत्तरपदे परे मोऽन्तो भवति । सत्यं करोति, सत्यस्य कार इति वा—सत्यंकारः, एवम्—अगदंकारः, अस्तुंकारः, अस्त्विति निपातः क्रियाप्रतिरूपकोऽभ्युपगमे वर्तते ॥ ११२ ॥**

**श० म० न्यासानुसन्धानम्— सत्या०** । 'सत्य–अगद-अस्तु'-शब्दानां समाहारः सौत्रत्वात् पुंस्त्वम् । कार इत्युत्तरपदविशेषणम्, तत्समभिव्याहारात् सत्यादीनां पूर्वपदत्वं विज्ञायते, सत्यादीनां पूर्वपदभूतानां कारशब्दे उत्तरपदे मोऽन्तो भवतीति सूत्रार्थः । **सत्यादिभ्यः** इति पञ्चम्यन्ततया व्याख्यानं तु वैचित्र्यार्थम् । **सत्यं करोती**त्यादि—कृदन्तस्थले उभयथा विग्रहस्यौचित्यादित्थमुक्तिः, पूर्वं कृत्प्रत्ययोत्पत्त्यर्थं सत्यं करोतीत्येव विग्रहः, उत्पन्ने तु तस्मिन् तद्योगे षष्ठीविधानात् षष्ठ्यन्तेन सह समास इति वस्तुस्थितिप्रदर्शनार्थं सत्यस्य कारः इति विग्रहः । वस्तुतस्तु कृद्योगे षष्ठीविधानेऽपि न तया षष्ठ्या लौकिकं विग्रहवाक्यमीदृशस्थले प्रदर्श्यते, गतिकारकङस्युक्तानां कृद्भिः सह स्याद्युत्पत्तेः पूर्वमेव समासस्य न्यायसिद्धत्वात् । विवेचितं चैतन्न्यायसिन्धौ विस्तरेणेति तत एवावधारणीयम् । तथा च संभवप्रदर्शनमात्रं षष्ठ्यन्तेन सह विग्रहवाक्यं न तु वस्तुस्थितिरीदृशीति ध्येयम् । एवं च सत्यं करोतीति विग्रहे "कर्मणोऽण्" [ ५.१.७२. ] इत्यण्, कृद्योगे कर्मणि षष्ठीं, तदन्तस्य कारेति कृदन्तेन सह स्याद्युत्पत्तेः पूर्वमेव समासः, अनेन मोन्तो भवति । अगदं—नीरोगं करोतीति—**अगदंकारो वैद्यः** । अस्तु करोतीति—**अस्तुंकारः**, स्वीकार इत्यर्थः । नन्वस्त्विति त्याद्यन्तं कथं नाम्ना कारशब्देन समस्यते ? नाम नाम्नेति कथनात्, असति च समासे कथं पूर्वोत्तरपदव्यवहारः, पूर्वोत्तरपदयोः समासपूर्वावयवचरमावयवयो रूढत्वादिति चेदत्राह—**अस्त्विति निपातः क्रियाप्रतिरूपकोऽभ्युपगमे वर्त्तते** इति—"विभक्तिथमन्ततसाद्याभाः" [ १.१.३३. ] इति सूत्रेण विभक्त्यन्ताभानामव्ययसंज्ञाविधानादस्त्विति त्यादिविभक्त्यन्ताभमव्ययमभ्युपगमवाचि, तेन सहैव समास इति भावः ॥ ३. २. ११२ ॥

## लोकंपृण-मध्यंदिना-ऽनभ्याश-मित्यम् ॥ ३. २. ११३ ॥

**त० प्र०—एते शब्दाः कृतपूर्वपदमान्ता निपात्यन्ते । लोकं पृणति, लोकस्य वा पृणः—लोकंपृणः; मध्यं दिनस्य, मध्यं च तत् दिनं चेति वा—मध्यंदिनम्; अश्नोतेर्घञि-अभ्याश इति रूपम्, अनभ्याशं—दूरम्, इत्यं—गन्तव्यमस्य—अनभ्याशमित्यः, दूरतः परिहर्तव्यः; अनभ्याशेनेत्योऽनभ्याशमित्य इति वा, दूरेण प्राप्यो न त्वन्तिकेनेत्यर्थः । अन्ये तु—प्रीणातेर्णिगन्तस्याचि ह्रस्वत्वं निपात्य लोकंप्रिणः, लोकस्य प्रीणक इत्यर्थं इत्युदाहरन्ति । कश्चित्त्वकृतह्रस्वत्वमेव मन्यते—लोकंप्रीणः ॥ ११३ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्--लोक०।** निपातनपरमिदं सूत्रम्, एतदेवाह--**एते शब्दाः कृतपूर्वपदमान्ता निपात्यन्ते** इति। निपात्यमानानामपि प्रकृति-प्रत्ययादिविभागकल्पना ज्यायसीति मत्वा तद्विभागज्ञापनाय विग्रहवाक्यमाह--लोकं पृणतीति--एवं विग्रहवाक्ये "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणोऽभावोऽपि निपातनादेव वाच्यः, 'मूलविभुजादिपाठकल्पना वा, अत एव वारुचेर्विग्रहान्तरमाह--**लोकस्य वा पृण** इति--पृणतीति पृणः "नाम्युपान्त्य०" [ ५. १. ५४. ] इति कः, तदन्तेन योगे षष्ठी, निपातनसामर्थ्यादिव समासः, मान्तत्वं च पूर्वपदस्य। अनभ्याशमित्यस्य साधनार्थं पूर्वमभ्याशशब्दं व्युत्पादयति--अश्नोतेर्घञीति--अभिपूर्वकादिति शेषः, न अभ्याश इत्यनभ्याशः, दूरमित्यर्थः, एतु योग्यमित्यं गन्तव्यमित्यर्थः, अनभ्याशं दूरमित्यं--गन्तव्यं यस्येति बहुव्रीहिः, अत्रानभ्याशमिति क्रियाविशेषणत्वेन द्वितीयैकवचनान्तं क्लीबम्, अन्यथा प्रथमैकवचनान्तस्यानभ्याशशब्दस्य घञन्तत्वेन पुंस्त्वं स्यात्। आर्थिकार्थमाह-- **दूरतः परिहर्त्तव्यः** इति, विग्रहवाक्ये प्रकारान्तरमाह--**अनभ्याशेनेत्यः इति**--हेतुतृतीयान्तेन सह "तृतीया" इति योगविभागात् समासः। मतान्तरमाह--**अन्ये त्विति**--प्रीणयतीति प्रीणः, लोकस्य प्रीण इति विग्रहे षष्ठीसमासः, प्रीणयतेरीकारस्य ह्रस्वोऽपि निपात्यत इति तेषामाशयः। प्रयोगार्थमाह--**लोकप्रीणक** इति। मागममात्रं निपात्यं न तु ह्रस्वोऽपीति मतान्तरमाह--**कश्चित्त्वकृतह्रस्वत्वमेवेति** ॥ ३. २. ११३ ॥

## भ्राष्ट्राग्नेरिन्धे ॥ ३. २. ११४ ॥

**त० प्र०--भ्राष्ट्राग्निभ्यामिन्धशब्दे उत्तरपदे परे मोऽन्तो भवति। भ्राष्ट्रस्येन्धः-भ्राष्ट्रमिन्धः, एवम्-अग्निमिन्धः ॥ ११४ ॥**

**श० म० न्यासानुसन्धानम्-भ्राष्ट्रा०। भ्राष्ट्राग्नेरिति** पञ्चम्यन्ततया व्याख्याति-**भ्राष्ट्राग्निभ्यामित्यादि,** वस्तुतस्तु मागमस्य तदवयवतया विधानस्यौचित्येन षष्ठ्यन्ततयैव व्याख्यानमुचितमिति प्रतिभाति "खित्यनव्ययारुष०" [ ३. १. १११. ] इति सूत्रे तथैव व्याख्यानस्य कृतत्वमपि, पश्चाद् वा षष्ठ्यन्तता समाश्रयणीया। **भ्राष्ट्रस्येन्धः** इति--इन्धयतीतीन्ध इन्धयतेरलि रूपम्, तस्य षष्ठ्यन्तेन भ्राष्ट्रशब्देन समासः, भ्राष्ट्रमिन्धे--दीपयतीति वा विग्रहे "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण्, इन्धनमिन्ध इत्यर्थे "पुंनाम्नि घः" [ ५. ३. १३०. ] इति घः, भ्राष्ट्रस्य इन्ध इति विग्रहः, घञि सति तु "दशनाऽवोदैधौद्मप्रश्रथ-हिमश्रथम्" [ ४. २. ५४. ] इति निपातनात् नलुक् स्यात्। वस्तुतस्त्विह इन्धयतीतीन्ध इति कर्तृप्रत्ययान्तत्वमेवेन्धशब्दस्य युक्तम्, अत्र प्रकरणे कर्तृप्रत्ययान्तानामेव विशेषतः प्रयोगदर्शनात्। अग्निमिन्धेऽपि प्रकृतं विग्रहादिकमतिदिशति--एवम्-अग्निमिन्धः इति ॥ ३. २. ११४ ॥

## अगिलाद्गिल-गिलगिलयोः ॥ ३. २. ११५ ॥

**त० प्र०--गिलान्तशब्दवर्जितात् पूर्वपदात् परे गिले गिलगिले चोत्तरपदे परे मोऽन्तो भवति। तिमिं गिलतीति-तिमिङ्गिलः, एवं-मत्स्यंगिलः, बालंगिलो राक्षसः, अपत्यंगिला शिशुमारी। तिमीनां गिलगिलः-तिमिंगिलगिलः; गिलगिलशब्दे गिलशब्दो नोत्तरपदमिति गिलगिलोपादानम्। गिलशब्दस्य स्वरान्तस्य पर्युदासेन स्वरान्ताद् विधिस्तेन व्यञ्जनान्तान्न भवति-धूर्गिलः। अगिलादिति किम्? तिमिंगिलं गिलति-तिमिंगिलगिलः। गिलं गिलति-गिलगिल इत्यत्र गिलगिलेति निर्देशादेव मोऽन्तो न संभवति, अगिलादिति तु निषेधो गिलान्तस्यापि निवृत्त्यर्थः ॥ ११५ ॥**

**श० म० न्यासानुसन्धानम्-अगिला०। अगिलादिति** पर्युदासवैयर्थ्यम्, गिलगिलेति सूत्रस्थनिपातनादेव तत्सिद्धेरिति सामर्थ्यादिव तदन्तस्य पर्युदास इत्याह-**गिलान्तशब्दवर्जितादिति। तिमिं गिलतीति**--"बहुयोजन--विस्तीर्णस्तिमिर्मत्स्य उदाहृतः" इति श्रुतत्वान्मत्स्यविशेषस्तिमिः, तं गिलतीति विग्रहे मूलविभुजादिपाठकल्पनया कः, "नाम्युपान्त्य०" [ ५. १. ५४. ] इति कस्तु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यनेन बाध्यते, बाहुलकाद् वा तद्बाधाभावः कल्पनीयः। एवं-**मत्स्यंगिलाद**योऽपि व्याख्येयाः। गिलगिले उदाहरति--**तिमीनां गिलगिलः** इति--गिलं गिलतीति गिलगिलः, तिमीनां गिलगिल इति विग्रहः। ननु **तिमिंगिलगिल** इत्यत्रापि उत्तरपदे गिलशब्दस्य सत्त्वेन गिले उत्तरपदे इत्यर्थेनैव मागमसिद्धौ गिलगिलशब्दोपादानं सूत्रे व्यर्थमिति



"Aho Shrutgyanam"

चेदत्राह—**गिलगिलशब्दे गिलशब्दो नोत्तरपदमिति,** अयमाशयः—यत्र गिलशब्दमात्रे पर्याप्तमुत्तरपदत्वं भवेत् तत्रैव गिले उत्तरपदे विधिः स्यात्, 'तिमिंगिलगिलः' इत्यत्र तु न गिलशब्दमात्र-पर्याप्तमुत्तरपदत्वमिति न तत्र विधिः स्यात्, 'गिलगिल' इत्येतावतोऽखण्डस्योत्तरपदत्वादिति तत्र मागमविधानार्थमावश्यकं गिलगिल-शब्दोपादानमिति। इह प्रकरणे प्रायः स्वरान्तस्यैव मान्तागमो विधीयते, तदेव चेहापि सूत्रे समाश्रीयत इत्याह—**गिलशब्दस्य स्वरान्तस्य पर्युदासेनेति,** अयमाशयः—'पर्युदासः सदृशग्राही 'नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः' इति न्यायात्। एवं गिलान्ताद् भिन्नस्य तत्सदृशस्य च पूर्वपदस्य ग्रहणमिति सादृश्यस्य स्वरान्तत्वेन ग्रहणाद् व्यञ्जनान्तस्य पूर्वपदस्य मागमो न भवतीति। क्वेत्याह—**धूर्गिलः** इति धुरं गिलतीति विग्रहः, मागमे सति मकारस्य लोपेन रूपसिद्धिस्तु नाशङ्क्या। "रात् सः" [२. १. ९०.] इति नियमादित्युक्तं प्रागपि। **अगिलादिति किमिति—**गिलगिलेति सूत्रे निपातनादेव गिलशब्दस्य पूर्वपदस्य मागमो न भविष्यतीत्यगिलादिति व्यर्थमेवेति प्रष्टुराशयः। अगिलादित्यस्य गिलान्तस्य मागमनिवृत्त्यर्थत्वमिति स्वाशयं स्फोरयति—**तिमिंगिलं गिलतीति**—'अत्र गिलान्तस्तिमिंगिलशब्दः, तस्य मोऽन्तो न भवति, अगिलादिति निषेधाभावे च स्यादेवेति भावः। ननु गिलं गिलतीति गिलगिल इति सूत्रोपात्त एव प्रयोगे मागमनिवृत्त्यर्थमगिलादित्यस्यावश्यकत्वेन किमिति गिलान्तानुधावनक्लेश इति चेदत्राह—**गिलं गिलति—गिलगिल इत्यत्र गिलगिलेति निर्देशादेव मोन्तो न सम्भवतीति,** अयमाशयः—आचार्यप्रयोगस्यापि साधुत्वानुशासकत्वमिति सूत्रे गिलगिलेति निर्देशसामर्थ्यादेव गिलस्य गिले परे मागमो न भविष्यत्येवेति तदर्थमगिलादिति पर्युदासस्य नावश्यकत्वमिति व्यर्थीभूतं तत् गिलान्तस्य पर्युदासं सूचयतीति, तदेवाह—**अगिलादिति निषेधो गिलान्तस्यापि निवृत्त्यर्थ** इति—गिलान्तस्यापीत्यत्रापिरवधारणार्थः, गिलान्तस्यैवेत्यर्थः, समुच्चयार्थत्वं तु तस्य न युज्यते, तथा सति गिलस्यापि निषेधार्थत्वं पर्यवस्येत्, तच्च न स्वसम्मतं निर्देशसामर्थ्यादिव तद्वारणस्योक्तत्वात्; यद्वा तस्य समुच्चयार्थत्वमेवास्तु, सति साक्षाद्वचनेन प्रयोगसाधुत्वे निर्देशसामर्थ्याश्रयणस्यानौचित्यात्, यत्र हि नास्ति किमपि स्पष्टं गमकं तत्रैव निर्देशसामर्थ्याद्याश्रयणस्य दर्शनात्। नन्वेकेनागिलादिति विशेषणेन कथमुभयोः केवलस्य तदन्तस्य च निषेधः सम्भवतीति चेत्? अगिलादिति विशेषणं तदन्तप्रतिषेधार्थमेव, केवलस्य व्यपदेशिवद्भावेन तदन्तत्वोपचाराद् भविष्यतीति गृहाण। इत्थं चापिशब्दस्यावधारणार्थत्वमिति न्यासग्रन्थो निर्देशसामर्थ्याश्रयणपक्षविषयको बोध्यः, एदनाश्रयणे च समुच्चयार्थ एवेति तत्त्वम्॥३. २. ११५॥

## भद्रोष्णात् करणे ॥ ३. २. ११६ ॥

**त० प्र०—भद्रशब्दादुष्णशब्दाच्च करणशब्द उत्तरपदे मोऽन्तो भवति। भद्रस्य करणं-भद्रंकरणम्, एवमुष्णंकरणम्॥ ११६॥**

**श० म० न्यासानुसन्धानम्—भद्रो०।** अत्र स्पष्टं पञ्चमीनिर्देशेन मागमोद्देश्यत्वं कस्येति यद्यपि न ज्ञायते तथापि 'उत्तरपदे' इति सप्तम्यन्तानुवृत्तिलभ्यपदसामर्थ्यात् "सप्तम्या पूर्वस्य" [७. ४. १०५] इति परिभाषाबलादुत्तरपदात् पूर्वस्य भद्रशब्दस्योष्णशब्दस्य च तदुद्देश्यत्वं बोध्यम्, एतत् पूर्वसूत्रेऽपि विज्ञेयम्, तत्रापि पञ्चमीनिर्देशस्य स्पष्टत्वात्, यत्र च "सत्यागदास्तोः कारे" [३. २. ११२.] "भ्राष्ट्राग्नेरिन्धे" [३. २. ११४] इत्यादौ षष्ठ्यन्तत्वेन व्याख्यानसम्भवेऽपि पञ्चम्यन्ततया व्याख्यातं तत्राप्येषा रीतिरवधारणीया। उदाहरति—**भद्रस्य करणमिति**—कृतिः करणं, भद्रस्य करणमिति विग्रहे "कृति" [३. १. ७७] इति समासः। एवम्—उष्णंकरणमित्यत्रापि विज्ञेयम्॥३.२.११६॥

## नवाऽखित्कृदन्ते रात्रेः॥ ३. २. ११७ ॥

**त० प्र०—रात्रिशब्दस्य खिद्वर्जितकृदन्ते उत्तरपदे मोऽन्तो वा भवति। रात्रौ चरति–रात्रिंचरः, रात्रिचरः; रात्रिंचरी, रात्रिचरी; रात्रावटः–रात्रिमटः, रात्र्यटः, रात्रिमटति–रात्रिमाटः, रात्र्याटः; रात्रेः करणम्–रात्रिंकरणम्, रात्रिकरणम्। खिद्वर्जनं किम्? रात्रिमन्यमहः, "खित्यनव्यया०" (३. २. १११.) इत्यादिना नित्यमेव भवति। कृदन्त इति किम्? रात्रिसुखम्। अन्तग्रहणं किम्? रात्रिरिवाचरति क्विप्, लुक्, तृच्,–रात्र्यिता। इदमेवान्तग्रहणं ज्ञापकम्–'इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं, न तदन्तस्येति, तेन–"कालात्तनतर-**

"Aho Shrutgyanam"

**तम०" ( ३. २. २४. ) इत्यादौ प्रत्ययमात्रस्यैव ग्रहणं सिद्धम्; "न नाम्येकस्वरात्०" ( ३. २. ९. ) इत्यादौ त्वसंभवात्तदन्तग्रहणम् । केचित् 'तीर्थंकरः, तीर्थकरः' इत्यत्रापि विकल्पमिच्छन्ति, तदर्थं "नवाऽखित्कृदन्ते" इति, "रात्रेः" इति च योगो विभजनीयः ॥ ११७ ॥**

---

**श० म० न्यासानुसन्धानम्—नवा०। खिद्वर्जितकृदन्ते** इति—एतच्च परत्वात् खिद्विषयेऽप्यस्य प्रवृत्तिबाधनार्थमेव, विवेचयिष्यते चैतदग्रे। **रात्रौ चरतीति**—"चरेष्टः" [ ५. १. १३८. ] इत्याधारोपपदाच्चरेः टः प्रत्ययोऽनेन मागमः, पक्षे—**रात्रिचरः** इति, टित्वात् स्त्रियां ङीः—**रात्रिंचरी, रात्रिचरीति। रात्रावटः** इति—अटतीति—अट इति लिहादित्वादच्, रात्रावट इति सप्तमीसमासः, मागमे सति **रात्रिमटः,** तदभावे—**रात्र्यटः** इति। रात्रेः कर्मत्वविवक्षायां रूपान्तरमाह—**रात्रिमटतीति**—अत्रार्थे 'कर्मणोऽण्" [ ४. १. ७२. ] इत्यण्, उपान्त्यवृद्धया आट इति, तेन सह ङस्युक्तसमासे—**रात्रिमाटः रात्र्याटः** इति करणशब्दस्याप्यखित्कृदन्तत्वाद्रात्रिशब्दस्य तस्मिन्नपि परे विकल्पेनैव मागमः परत्वादित्याह—**रात्रिंकरणं रात्रिकरणमिति। खिद्वर्जनं किमिति**—"नवा कृदन्ते रात्रेः" इत्येवोच्यतां, खिति परे विशेषविहितत्वात् पूर्वसूत्रेण ["खित्यनव्ययारुषो मोन्तो ह्रस्वश्च." [ ३. २. १११ ] इत्यनेन नित्यमेव भविष्यतीति मत्वा प्रश्नः। **रात्रिंमन्यमहः** इति—साधितमेतत् पूर्वसूत्रेणैव, अत्रापि परत्वादिदमेव प्रवर्त्तिष्यत इति विकल्पापत्तिः, तद्वारणायाखितीत्यावश्यकमिति भावः। वस्तुस्थितिमाह—**"खित्यनव्यया०" [ ३. २. १११ ] इत्यादिना नित्यमेव भवतीति** न च विनापि खिद्वर्जनं सामान्यतः कृदन्तेऽस्य प्रवृत्तिः, खिति कृदन्ते च तस्येति विशेषविहितत्वात् "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति लौकिकन्यायेन पूर्वसूत्रमेव प्रवर्त्तिष्यत इति नास्ति दोष इति वाच्यम्, अनव्ययसामान्ये पूर्वसूत्रस्य प्रवृत्तिः, रात्रिशब्दमात्रेऽस्येति रीत्या प्रकृतसूत्रस्यापि विशेषविहितत्वसाम्यात्, परत्वरूपं बलमतिरिच्यतेऽस्येति अखितीत्यस्याभावे तत्रापीदमेव प्रवर्त्तिष्यत इत्याशयात्। **कृदन्त इति किमिति** अखितीति पर्युदासेन सदृशग्रहणात् खिद्भिन्ने खित्सदृशे कृदन्ते एव प्रवृत्तिः स्यादिति कृदन्ते इत्यनावश्यकमिति प्रष्टुराशयः; पर्युदासस्य सदृग्ग्राहित्वेऽपि केन रूपेण सादृश्यं ग्राह्यमित्यत्र विनिगमकाभावात् नामत्वादिना सादृश्यग्रहणेऽन्यत्रापि प्रसक्तिर्दुर्वारेत्याह प्रत्युदाहरणमुखेन—**रात्रिसुखमिति। अन्तग्रहणं किमिति**—कृतीत्येवोच्यतां रात्रिशब्दस्य नामत्वेन तस्य स्वतः कृत्प्रत्ययपरत्वायोगादसंभवादेव कृदन्त इत्यर्थो भविष्यतीत्यन्तग्रहणं व्यर्थमेवेति प्रष्टुराशयः। रात्रिशब्दस्य न केवलं नामत्वं किन्तु नामधातुप्रकरणोक्तप्रत्ययसंयोगेन तस्य धातुत्वमपि सम्भाव्यते, ततश्च तस्यास्ति कृत्प्रत्ययपरत्वसंभावनेति तत्र मागमनिवृत्त्यर्थमन्तग्रहणमावश्यकमित्याह—**रात्रिरिवाचरति क्विबिति**—"कर्तुः क्विप्" [ ३. ४. २५. ] इति क्विपि तदन्तस्य धातुत्वे, ततः कर्त्तरि तृचि सम्भवति कृत्प्रत्ययाव्यवहितपूर्वत्वं रात्रिशब्दस्य तत्र मागमो मा भूदित्यन्तग्रहणमावश्यकम्, कृते चान्तग्रहणे तृच्मात्रस्य कृदन्तत्वाभावात् न भवति। नन्वेवमप्यन्तग्रहणं व्यर्थमेव, कुतः प्रत्ययत्वेन प्रत्ययग्रहणे तदन्तग्रहणस्य न्यायसिद्धत्वेन कृदन्ते इत्यर्थः स्यादेवेति चेदत्राह—**इदमेवान्तग्रहणं ज्ञापकमित्यादि।** * प्रत्ययग्रहणे तदन्तग्रहणम् * इति न्यायेन सिद्धेऽपि तदन्तग्रहणे क्रियमाणमिदमन्तग्रहणं व्यर्थीभूय स्वसार्थक्यसाधकमग्रिममर्थं ज्ञापयतीति भावः। ज्ञाप्यार्थस्वरूपमाह—**इहोत्तरपदाधिकारे** इत्यादि—अस्तीहोत्तरपदाधिकारः प्रत्ययग्रहणं च, तत्र प्रत्ययमात्रस्यैव कृत्पदेन ग्रहणे रात्रयितेत्यादौ दोषो दुर्वार इति भवत्यन्तग्रहणस्य स्वांशे चारितार्थ्यम्। अन्यत्र फलमप्यावश्यकं स्वसार्थक्यमात्रार्थं ज्ञापनानौचित्यात्, तदर्थज्ञापनापेक्षया तदकरण एव लाघवादित्याशयेन फलान्तरमप्याह—**तेन "कालात् तरतम० [ ३. २. २४ ] इत्यादौ प्रत्ययमात्रस्यै**वेत्यादि, उक्तं चैतत् सूत्रव्याख्यायामेव "उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य "नवा खित्कृदन्ते०" [ ३. २. ११७. ] इत्यत्रान्तग्रहणात्, तेनात्र तन-तर-तम-प्रत्ययानां स्वरूपेणैव ग्रहणं भवति, इति"। तेन 'परमे पूर्वाह्णेतरे' इत्यादिस्थले परिनिष्ठितविभक्त्यन्तेन विशेषणसमासे सप्तम्या अलुप् न भवति। नन्वेवं क्वापीहोत्तरपदाधिकारे तदन्तग्रहणेन न भाव्यम्, दृश्यते च "न नाम्येकस्वरात् खिति०" [३.२.९.] "खित्यनव्ययारुषः" [ ३. २. १११. ] इत्यादौ तदन्तग्रहणमिति चेदत्राह—**"न नाम्यकस्वरात् खिति०" [ ३.२.९] इत्यादाविति**—"न नाम्येकस्वरात् खिति०" इत्यादौ यत् तदन्तग्रहणं दृश्यते तदसंभवात्, एकस्वरात् पूर्वपदभूतान्नाम्नः परस्य खितः प्रत्ययस्य नास्ति संभवः, तस्य धातो विधीयमानत्वादिति हेतोरेव तत्र तदन्तग्रहणं भवति, **प्रकृते**

"Aho Shrutgyanam"

च रात्रेः परस्य कृत्प्रत्ययसंभवस्य दर्शितत्वान्नास्त्यसंभवो हेतुरिति विना यत्नं तदन्तग्रहणं न स्यादिति तदर्थमन्तग्रहणमावश्यकमिति समुदितार्थः । यद्यपि "हृदयस्य हृल्लासलेखाऽण्-ये" [ ३. २. ९४ ] इति सूत्रव्याख्यावसरे--- लेखेत्यणन्तस्य ग्रहणमिति---अण्ग्रहणेनैव तदन्तस्य तस्य ग्रहणे सिद्धे लेखग्रहणेन---इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तु तदन्तस्येति ज्ञाप्यत इत्युक्तम्, इह चेदमेवान्तग्रहणं प्रकृतार्थे ज्ञापकमित्युच्यत इति परस्परविरुद्धमिव प्रतिभाति, तथापि "कालात् तन-तर-तम-काले" [ ३. २. २४ ] इति सूत्रव्याख्यावसरेऽपि प्रकृतसूत्रस्थान्तग्रहणस्यैवोत्तरपदाधिकारे तदन्तग्रहणाभावस्य ज्ञापकत्वोक्तेरनेन ज्ञापितस्यार्थस्यैव समर्थकं लेखग्रहणं तत्रेति स्वीकर्त्तव्यम्, तत्र हि लेखेति घञन्तस्य न ग्रहणमपि तु अणन्तस्यैवेति लक्ष्यानुसारिव्याख्यातृवचनमवलम्ब्यैव लेखशब्दस्य ज्ञापकता संभवतीति प्रमाणान्तरसापेक्षं तस्य ज्ञापकत्वमत्र त्यान्तग्रहणस्य च निरपेक्षं ज्ञापकत्वमिति प्रकृतज्ञापकस्यैव बलीयस्त्वम्, साक्षात् सूत्रस्थपदत्वात् । ज्ञापिते चास्मिन्नर्थे लेखग्रहणस्यापि सार्थक्यमित्यन्यदेतत् । अन्यैश्च वैयाकरणैः [पाणिन्यादिभिः] प्रकृतसूत्रस्थानीये "रात्रेः कृति विभाषा" [पा० सू० ६. ३. ७२] इति सूत्रेऽन्तग्रहणं न क्रियते, किन्तु "हृदयस्य हृल्लास-लेखाऽण्ये" [३. २. ९४] इति सूत्रस्थानीये "हृदयस्य हृल्लेखयदण्लासेषु" [पा० सू० ६. ३. ५०] इति सूत्रे लेखग्रहणेनैवोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभावो विज्ञाप्यते, तत्संग्रहाय स्वमतेऽपि तस्य ज्ञापकत्वमुक्तं, न तु तत्राचार्यस्य तात्पर्यमित्यवधेयम् । व्याकरकरणान्तरसम्मतलक्ष्यसंग्रहोपायं दिदर्शयिषुराह---**केचित् तीर्थंकरः, तीर्थकरः** इति, स्वमतेऽत्र मागमस्य प्राप्त्यभाव एव, परमते च वैकल्पिको मागमो दृश्यते, सोऽपि साधयितुं शक्यत एवेति तदुपायमाह---**तदर्थं "नवाऽखित्कृदन्ते"** इतीति---प्रकृतसूत्रस्यैव द्विधा विभागः कार्यः "नवाऽखित्कृदन्ते" इत्येको योगः "रात्रेः" इति च परः, तथा च पूर्वयोगेन सामान्यत एव खिद्भिन्ने कृदन्ते मागमविधानेन तीर्थङ्करादावपि प्रवृत्तिः "रात्रेः" इत्यनेन च विशिष्य रात्रिशब्दस्यैव मान्तागमविधानम् । न चैवं कुम्भकार इत्यादावपि स्यान्मागमः निवारकाभावादिति वाच्यम्, योगविभागस्येष्टसिद्ध्यर्थत्वात्, अत एव च रात्रेरिति योगस्यापि सार्थक्यम्, अन्यथा रात्रिञ्चर इत्यादावपि पूर्वयोगेनैव सिद्धेरुत्तरयोगस्य वैयर्थ्यापातात्, उत्तरयोगारम्भसामर्थ्यादिव पूर्वयोगस्य क्वाचित्कत्वज्ञापनाद् वा, किञ्च परमतसंग्रहोपायत्वेनास्य योगविभागस्य स्वीकरणान्नैतदाश्रयणेन दोषापादनमुचितमिति ॥ ३. २. ११७ ॥

## धेनोर्भव्यायाम् ॥ ३. २. ११८ ॥

**त० प्र०---धेनुशब्दाद्भव्याशब्दे उत्तरपदे मोऽन्तो वा भवति । धेनुश्चासौ भव्या च-धेनुंभव्या, धेनुभव्या । केचित्तु नित्यमिच्छन्ति ॥ ११८ ॥**

**श० म० न्यासानुसन्धानम्---धेनो०** । नवप्रसूतिका गौर्धेनुः, तस्य शब्दस्य भव्याशब्दे उत्तरपदे मागमोऽनेन विधीयते, भव्याशब्दश्च "भव्य-गेय-जन्य-रम्या०" [ ५. १. ७ ] इति सूत्रेण कर्त्तरि निपातितः, तस्य धेनुशब्देन मयूरव्यंसकादित्वात् समासे विशेषणस्य भव्याशब्दस्य परप्रयोगः, विशेषणसमासे च भव्याशब्दस्यैव पूर्वनिपातः स्यात् । तदाह---**धेनुश्चासौ भव्या चेति** । मतान्तरमाह---**केचित् तु नित्यमिच्छन्तीति,** एतच्च पाणिनीयानामपि सम्मतम्, तैरपि तथैव विधानात् तथा च तन्मते-धेनुम्भव्येत्येवेति भव्याशब्दस्य पूर्वनिपातवारणार्थं धेनोरित्यस्य विशेषणत्वविवक्षा, भव्यायामिति निमित्तसप्तमीश्रुतिसामर्थ्याश्रयणं वा न कार्यं द्रव्यवाचकक्रियावाचकयोः समवाये क्रियावाचकस्यैव विशेषणत्वौचित्यात्, निमित्तसप्तमीश्रुत्या पूर्वनिपातशास्त्रबाधानौचित्याच्च, किन्तु मयूरव्यंसकादित्वकल्पनैव ज्यायसीति ॥ ३. २. ११८ ॥

## अषष्ठीतृतीयादन्याद्दोऽर्थे ॥ ३. २. ११९ ॥

**त० प्र०---अषष्ठ्यन्तादतृतीयान्ताच्चान्यशब्दादर्थशब्द उत्तरपदे दोऽन्तो वा भवति । अन्यश्चासौ अर्थश्च, अन्योऽर्थोऽस्येति वा-अन्यदर्थः, अन्यार्थः; अन्यस्मै इदम्-अन्यदर्थम्, अन्यार्थम्; अन्यस्मिन्नर्थः-अन्यदर्थः, अन्यार्थः । अषष्ठीतृतीयादिति किम् ? अन्यस्यार्थः-अन्यार्थः, अन्येनार्थः-अन्यार्थः ॥ ११९ ॥**

**श० म० न्यासानुसन्धानम्---अषष्ठी०** । 'अषष्ठीतृतीयात्' इति 'अन्यात्' इत्यस्य विशेषणम्, विशेषणेन च

"Aho Shrutgyanam"

तदन्तविधिरिति अषष्ठचन्तादतृतीयान्ताच्चेत्यर्थलाभः । उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणमिति निषेधस्तु *प्रत्ययग्रहणे तदन्तग्रहणम्* इति न्यायप्राप्तस्यैव तदन्तग्रहणस्य, साजात्यात्, न तु विशेषणत्वप्रयुक्ततदन्तग्रहणस्येति विज्ञेयम् । **दोऽन्तो भवतीति**-अर्थादन्यशब्दस्यैवान्तः, सप्तमीश्रुत्या "सप्तम्या पूर्वस्य" [ ७. ४. १०५ ] इति परिपरिभाषासहकारात् । उदाहरति---**अन्यश्चासावर्थश्चेति**-प्रथमान्तस्योदाहरणमिदम्, विशेषणसमासः, अनेन दागमः । द्वितीयान्तस्यार्थशब्देन सह विग्रहासम्भवः, तृतीयान्तस्य पर्युदस्तत्वमेवेति चतुर्थ्यन्तेन विग्रहे उदाहरति---**अन्यस्मै इदम्** इति नित्यसमासत्वादस्वपदविग्रहः । पञ्चम्यन्तेन सह विग्रहासम्भवः, **षष्ठ्यन्तस्य** पर्युदस्तत्वमिति सप्तम्यन्तेन विग्रहमाह---अन्यस्मिन्नर्थः इति । पदकृत्यमाह---**अषष्ठीतृतीयादिति किमिति**---तदन्तस्यापि विकल्पेन दागमो विधीयतामिति भावः । षष्ठ्यन्ततृतीयान्तेन विग्रहे नेष्यते दागम इति तद्वारणाय तद्वर्जनमावश्यकमित्याह प्रत्युदाहरणमुखेन-**अन्यस्यार्थः, अन्येनार्थः** इत्यादि ॥ ३. २. ११९ ॥

## आशीराशास्थितास्थोत्सुकोतिरागे ॥ ३. २. १२० ॥

त० प्र०---वेति निवृत्तम् पृथग्योगात् । **अषष्ठीतृतीयान्तादन्यशब्दाद् आशिस् आशा आस्थित आस्था उत्सुक ऊति राग, इत्येतेषूत्तरपदेषु दोऽन्तो भवति । अन्या आशीः-अन्यदाशीः, अन्या आशा-अन्यदाशा, अन्यमास्थितः-अन्यदास्थितः, अन्या आस्था-अन्यदास्था, अन्यस्मिन् उत्सुकः-अन्यदुत्सुकः, अन्या ऊतिः-अन्यदूतिः, अन्यत्र रागः-अन्यद्रागः । अषष्ठीतृतीयादित्येव-अन्यस्याशीः-अन्याशीः, अन्येनास्थितः-अन्यास्थितः ॥ १२० ॥**

**श० म० न्यासानुसन्धानम्-आशी०** । इदमपि सूत्रमन्यशब्दस्य दागमविधायकमेव, ततश्च पूर्वत्रैव सूत्रे एषामप्युत्तरपदानां पाठो युक्त इति पृथक् सूत्रमिदमनर्थकमित्याशङ्कायामाह---**वेति निवृत्तं पृथग्योगादिति**---पूर्वत्रसूत्रे "नवाऽखित्कृदन्ते रात्रेः" [ ३. २. ११७ ] इति सूत्राद् वा ग्रहणस्यानुवृत्तिर्भवति, इह च तद् वाग्रहणं निवृत्तं स्यादित्यर्थमेव पृथक्सूत्रकरणमिति भावः । अषष्ठीतृतीयादिति चानुवर्त्तत एव, अन्यादित्यस्य विशेषणतयैकयोगनिर्दिष्टत्वेन सहैवानुवृत्ति-निवृत्त्योर्युक्तत्वात्, तदाह---**अषष्ठीतृतीयान्तादिति** । यथायोगं प्रथमाद्यन्तत्वेन विग्रहवाक्यानि प्रदर्श्योदाहरति---**अन्या आशीरिति** । आस्थित-शब्दस्य क्रियाशब्दत्वेन सम्भवति द्वितीयान्तेनापि विग्रहवाक्यमिति तदाह---**अन्यमास्थितः** इति । स्पष्टान्यन्यान्युदाहरणानि ॥ ३. २. १२० ॥

## ईय-कारके ॥ ३. २. १२१ ॥

**त० प्र०---पृथग्योगादषष्ठीतृतीयादिति निवृत्तम्, अन्यशब्दादीये प्रत्यये कारकशब्दे चोत्तरपदे दोऽन्तो भवति । अन्यस्यायम्-अन्यदीयः, गहादित्वादीयः; अन्यस्मै हितम्-अन्यदीयम्; अन्यस्यान्येन वा कारकः-अन्यत्कारकः, अन्यः कारकः-अन्यत्कारकः; अन्यत्कारिका ॥ १२१ ॥**

**श० म० न्यासानुसन्धानम्---ईय०** । पूर्वतरं सूत्रमनुवर्त्तते वाग्रहणरहितम्; तत्राषष्ठी-तृतीयादित्यस्याप्यनुवृत्तिः संभाविता एकयोगनिर्दिष्टत्वादिति तदननुवृत्तिं साधयति-**पृथग्योगादषष्ठी-तृतीयादिति निवृत्तमिति**-ईयस्य षष्ठ्यर्थे विधानात् कारकस्य तृतीयान्तेनापि विग्रहेऽन्यस्य दागमदर्शनाल्लक्ष्यैकचक्षुषा आचार्येण तदर्थमेव पृथग्योगोऽयमारब्ध इति तत्सामर्थ्यादेकयोगनिर्दिष्टानामिति न्यायस्य बाधेन *क्वचिदेकदेशोऽप्यनुवर्त्तते* इति न्यायमाश्रित्य 'अन्याद् दो' इत्येतावन्मात्रमत्र सम्बध्यत इति भावः । उदाहरति-**अन्यस्यायमिति**---षष्ठ्यर्थे शैषिक ईयः, तत्र सूत्रं निर्दिशति---**गहादित्वादिति**-गहादिगणेऽन्यशब्दपाठस्य सन्दिग्धत्वेऽपि "गहादिभ्यः" [ ६. ३. ६३ ] इति बहुवचननिर्देशस्याकृतिगणार्थत्वेन ईयो भवतीति भावः । चतुर्थ्यन्तस्थलेऽप्युदाहरति---**अन्यस्मै हितमिति**---"तस्मै हिते" [ ७. १. ३५ ] इत्यर्थनिर्देशकसूत्रे "ईयः" [ ७. १. २७ ] इत्यत 'ईय' इत्यस्याधिकारादीयः । कारके परेऽपि षष्ठी-तृतीयान्ताभ्यां विग्रहं प्रदर्शयति---**अन्यस्यान्येन वा कारकः** इति-अन्यस्य कारक इत्यर्थे "कृति" [ ३. १. ७७ ] इति समासः, अन्येन कारक इत्यर्थे "कारकं कृता" [ ३. १. ६८ ] इति समासः, अन्यः कारकः इत्यर्थे विशेषणसमासः । * नाम ग्रहणे लिङ्गविशिष्टस्यापि

"Aho Shrutgyanam"

ग्रहणम् * इति न्यायमाश्रित्याह—**अन्यत्कारिके**ति—अन्या अन्यस्यान्येन वा कारिकेति विग्रहे यथायोगं विशेषणसमासादावनेन सूत्रेण पूर्वोक्तन्यायसहकारेण कारिकाशब्दे परेऽपि दागमो भवतीति भावः ॥ ३. २. १२१ ॥

## सर्वादि-विष्वग्देवाड्डद्रिः क्वच्यञ्चौ ॥ ३. २. १२२ ॥

**त० प्र०—सर्वादेर्विष्वग्-देवशब्दाभ्यां च परः क्विबन्तेऽञ्चतावुत्तरपदे परे डद्रिरन्तो भवति । सर्वमञ्चति—सर्वद्र्यङ्, सर्वद्र्यञ्चौ, सर्वद्र्यञ्चः, सर्वद्रीचः, सर्वद्रीचा, सर्वद्रीची; एवं—तद्र्यङ्, तद्र्यञ्चौ, तद्र्यञ्चः, तद्रीचः, तद्रीचा, तद्रीची; अदद्र्यङ्, अदद्र्यञ्चौ, अदद्र्यञ्चः; अदद्रीचः, अदद्रीचा, अदद्रीची; कद्र्यङ्, कद्र्यञ्चौ, कद्र्यञ्चः, कद्रीचः, कद्रीचा; व्यद्र्यङ्, व्यद्र्यञ्चौ, व्यद्र्यञ्चः । विषू अवतीति—विषूः; विष्वमञ्चति—विष्वङ्, विष्वञ्चमञ्चति, विष्वगित्यव्ययं वा विष्वगञ्चति—विष्वद्र्यङ्, विष्वद्र्यञ्चौ, विष्वद्र्यञ्चः, विष्वद्रीचः, विष्वद्रीचा, विष्वद्रीची; देवानञ्चतीति—देवद्र्यङ्, देवद्र्यञ्चौ, देवद्र्यञ्चः, देवद्रीचः, देवद्रीचा; देवद्रीची । सर्वादि-विष्वग्-देवादिति किम् ? अश्वमञ्चति—अश्वाची, विष्वमञ्चति—विषूची । अञ्चाविति किम् ? विश्वयुक्, विष्वग्युक्, देवयुक् । क्वीति किम् ? विष्वगञ्चनम् । धातुग्रहणे तदादेः समुदायस्य ग्रहणं प्राप्नोताति क्वीत्युक्तम् । डकारोऽन्त्यस्वरादिलोपार्थः ॥ १२२ ॥**

**श० म० न्यासानुसन्धानम्—सर्वादि०** । सर्वादिर्गणः, विष्वग्-देवशब्दौ च समाहारेण निर्दिष्टौ, पञ्चमीनिर्देशाड् डद्रेः परतो विधानमित्याश्रित्याह—**परः** इति, परत्वे सति तस्य पूर्वोत्तरोभयपदानवयवत्वं स्यादिति शङ्कायामाह—**डद्रिरन्तो भवती**ति—अन्त्यावयवतया डद्रिरागमो भवतीति भावः; एवं च परत्वकथनमनर्थकमिति प्रतिभाति, पञ्चमी चोत्तरपदपरत्वसम्बन्धेऽपि संभवत्येव, तथा च ग्रन्थकृतो वैचित्र्यमात्रमिदमिति मन्ये, पूर्वसूत्रेषु तथा व्याख्यानादर्शनात् । **क्विबन्तेऽञ्चतावि**ति—सूत्रे 'क्वचञ्चौ' इत्यत्र क्विपदं क्विबन्तपरमिति भावः, क्विबन्तश्चासावञ्चिः—क्वयञ्चिरिति विग्रहात् । **डद्रिरन्तो भवती**ति='अर्थात् सर्वादिविष्वग्देवानामेव । उदाहरति—**सर्वमञ्चती**त्यादिना, सर्वशब्दे उपपदे अञ्चतेः क्विः, नामत्वादि, 'सर्व अञ्च्' इति स्थितावनेन डद्रिः, डित्त्वसामर्थ्यादन्त्यस्वरादिलोपः, 'सर्वद्रि अञ्च' इति स्थितौ स्यादिनिमित्तककार्येषु सत्सु—**सर्वद्र्यङ्** इति । **सर्वद्रीचः** इति—'सर्वद्रि 'अञ्च् अस् इति स्थितौ नलोपे, "अच्च् प्राग् दीर्घश्च" [ २. १. १०४ ] इति चादेशो दीर्घश्च । स्त्रियां ङ्यां नलोपादौ—**सर्वद्रीची**ति । प्रकृतं विग्रहादिकमन्यत्राप्यतिदिशति—**एवं-तद्र्यङ्** इति—तमञ्चतीति विग्रहे डद्र्यादिः पूर्ववत् । **अदद्र्यङ्** इति—अमुमञ्चतीति—विग्रहः, अत्र "वाऽद्रौ" [ २. १. ४६ ] इति सूत्रेण द्वितीयदस्य मत्वे "मादुवर्णोऽनु" [२. १. ४७ ] इत्युवर्णादेशे च—"अदमुयङ्' इति, प्रथमस्यैव मुत्वे-'अमुद्र्यङ्' इति, उभयोर्मुत्वे-'अमुमुयङ्' इति, विकल्पपक्षे सर्वथा मादेशाप्रवृत्तावुवर्णस्याप्यभावे-'अदद्र्यङ्' इति रूपमिति स्यादिप्रक्रिया बोध्या । यदुक्तम्—

"परतः केचिदिच्छन्ति, केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः ॥१॥"

तथा च स्वमते सर्वेषां संग्रहः । **कद्र्यङ्** इति—किमञ्चतीति विग्रहः । **विषू अवती**ति—विषुर्नाम मुहूर्त इत्यभिधानचिन्तामणिः, दिनरात्र्योः साम्यावस्थायामिति केचित्, विषूपपदादवतेः क्वौ ऊवृति—अव ऊकारे सन्धौ च **विषूरि**ति, विष्वमञ्चतीति विग्रहे विषूपपदादञ्चतेः क्विः—**विष्वङि**ति, प्रकारान्तरेणाह—**विष्वगित्यव्ययं वे**ति—तथा च तस्याव्युत्पन्नत्वस्वीकारेऽपि न क्षतिः; **विष्वगञ्चती**त्यव्ययमाश्रित्य विग्रहः, पूर्वोक्तस्य तु **विष्वमञ्चती**ति विग्रह एव युक्तः, अत्रापि डद्रौ सति **विष्वद्र्यङि**ति । देवशब्दविषयमुदाहरति—**देवानञ्चती**ति विगृह्य, स्पष्टान्यन्यानि रूपाणि । पदकृत्यमाह—**सर्वादिविष्वग्देवादिति किमि**ति—तथा च "डद्रिः क्वचञ्चौ" इत्येव सूत्रमस्तु, पूर्वपदसामान्यस्य क्विबन्तेऽञ्चतौ परे डद्रिर्विधीयतामिति प्रष्टुराशयः । एभ्योऽन्यस्य नेष्टो डद्रिरिति तद्वारणाय विशिष्टैषां ग्रहणमावश्यकमिति प्रत्युदाहरति—**अश्वाची, विषूची**ति—प्रसिद्धप्रयोगप्रत्युदाहरणार्थं स्त्रियामुदाहरणम्, अश्वाचीशब्दस्य वैदिकप्रयोगे, विषूचीशब्दस्य च लौकिकप्रयोगेऽपि च प्रसिद्धेः, अनयोर्डद्र्यभावे स्त्रियां ङ्यां नलोपे "अच्च् प्राग् दीर्घश्च" [ २. १. १०४ ] इति चादेशो दीर्घश्च । **अञ्चाविति किमि**ति—'क्वौ' इत्येवोच्यतां, प्रत्ययग्रहणे

"Aho Shrutgyanam"

तदन्तग्रहणात् 'क्विबन्ते उत्तरपदे' इत्यर्थाश्रयणेऽपि 'सर्वद्र्यङ' इत्यादि सिद्धौ बाधकाभाव इति तदाशयः । यद्यपि * उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् * इति न्यायः प्राप्नोतीति 'क्विबन्ते उत्तरपदे' इत्यर्थो दुर्लभस्तथापि सर्वादिभ्यः क्विपोऽसंभवादेव तदन्तविधिसम्भव इति ध्येयम् । अव्याप्तिरूपदोषाभावेऽप्यतिव्याप्तिः स्यादित्याह—**विश्वयुक्, विष्वग्युक्, देवयुगि**ति—विश्वेन युज्यत इति विश्वयुक्, विश्वशब्दः सर्वादिरिति तस्य क्विबन्ते युजौ परेऽपि डद्रिः स्यात्; एवं–विष्वग् युज्यत इति—विष्वग्युक् देवैर्युज्यत इति–देवयुक् । नन्वेतद्दोषपरिहाराय 'अञ्चौ' इत्युच्यतां, तद्विशेषणं क्वीति परित्यज्यतामित्याह—**क्वीति किमि**ति—क्विबन्तस्थले धातुमात्रस्यैव प्रयोगात् धातुमात्रनिर्देशेऽपि स्यादेव पूर्वोक्तातिव्याप्तिवारणम्, अव्याप्तिश्च सुतरामेव वारितेति व्यर्थमेव क्वाविति विशेषणमिति भावः । प्रत्युदाहरति—**विष्वगञ्चनम्** इति–अत्रापि डद्रिः स्यादिति भावः । नन्वत्र नाञ्चतिमात्रपरत्वमपि तु अञ्चनमिति "अनट्" प्रत्ययान्ताञ्चतिपरत्वमिति कथं प्राप्तिरिति चेदत्राह—**धातुग्रहणे तदादेः समुदायस्य ग्रहणं प्राप्नोती**ति, अयमाशयः—* धातुग्रहणे तत्प्रत्यये कार्यविज्ञानम् * इति न्यायेन यत्र यत्र धातुग्रहणं तत्र तत्र तस्मिन् प्रत्ययान्ते एव कार्यं भवति, अथवा प्रकृतमेव क्विग्रहणमन्यत्र धातुग्रहणे तदादेः समुदायस्य ग्रहणमिति ज्ञापयति, यतः 'अञ्चौ' इत्युक्तेऽपि केवलस्याञ्चतेः क्वावेव प्रयोगसत्त्वेन क्विबन्ते एव भविष्यतीति तस्य वैयर्थ्यं स्यादेव, ततश्चाञ्चौ क्वीति विशेषयता आचार्येणायमर्थः सूच्यते, एवं च विष्वगञ्चनमित्यादौ डद्रिनिवृत्त्यर्थं स्वांशे चारितार्थ्यम् । फलं चान्यत्र अयस्कार इत्यादौ "अतः कृ-कमि-कंस०" [ २. ३. ५ ] इति सत्वं सिध्यतीति, अन्यथा अयस्कृदिति प्रयोगे कथंचित् सत्वप्रवृत्तावप्ययस्कार इत्यादौ न स्यात्, तत्र कृमात्रपरत्वाभावात् । नन्वत्र डकारस्य प्रयोगेऽश्रवणात् किमर्थं विधेय समावेश इति चेदत्राह–**डकारोऽन्त्यस्वरादिनिवृत्त्यर्थः** इति—"डित्यन्त्यस्वरादेः" [ ८. १. ११४ ] इति सूत्रेणान्त्यस्वरादिनिवृत्तिसिद्धये तत्समावेशो विधेय इति भावः ॥३. २. १२२॥

## सह-समः सध्रि-समि ॥ ३. २. १२३ ॥

त० प्र०—सह सम् इत्येतयोः स्थानेऽञ्चतौ क्विबन्ते उत्तरपदे परे यथासंख्यं 'सध्रि' 'समि' इत्येतावादेशौ भवतः । सहाञ्चति–सध्र्यङ्, सध्र्यञ्चौ सध्र्यञ्चः, सध्रीचः, सध्रीचा, सध्रीची, सध्रीचीनः; समञ्चति–सम्यङ्, सम्यञ्चौ, सम्यञ्चः, समीचः, समीचा, समीची; समीचीनः । सह–सम इति किम्? प्राङ्, प्राञ्चौ । अञ्चावित्येव–सहयुक् । संयुक् । क्वीत्येव–सहाञ्चनम् समञ्चनम् ॥ १२३ ॥

**श० म० न्यासानुसन्धानम्—सह०** । सहेत्यव्ययं, समित्युपसर्गः, अनयोरपि स्थाने आदेशविधानार्थमिदं सूत्रम्; तत्रानयोः साक्षात् संपूर्णस्थानिताया इष्टत्वात् **'सहसमः'** इति षष्ठ्यन्तमेवाश्रीयते, न तु पूर्वसूत्रादिवत् पञ्चम्यन्तम्, तदाह **'सह सम्' इत्येतयोः स्थाने** इति । क्व्यञ्चावित्यनुवर्तत एवेत्याह—**अञ्चतौ क्विबन्ते उत्तरपदे** इति । स्थान्यादेशयोः समसंख्यत्वादाह–**यथासंख्यमि**ति–प्रथमस्य स्थाने प्रथमो द्वितीयस्य स्थाने द्वितीय आदेश इत्यर्थः । **सहाञ्चती**ति—सहेत्यस्य समकालमनुगतभावेनेत्यर्थः, तथा च क्रियाविशेषणत्वादस्यान्येन सम्बन्धाभावात् न ततस्तृतीया, तथा च 'रामस्य सध्र्यङ् लक्ष्मण' इत्यादय एव प्रयोगाः, न तु रामेण सध्यङ् इत्यादयः, सहाञ्चतीति विग्रहे क्विपि सध्र्यादेशे नामसंज्ञादौ स्यादिकार्यम् । **सध्रीचः** इत्यादौ चादेशो दीर्घश्च । **समञ्चती**ति—संगतं सम्यग् वाऽञ्चतीति विग्रहार्थः । समीत्युपसर्गस्य सम्यादेशः, शेषं पूर्ववत् । समीचीनः इति—सम्यगित्यर्थ एव "अदिक्स्त्रियां वाञ्चः" [७. १. १०७.] इति सूत्रेण ईनः । **सहसम इति किमि**ति—सामान्येन पूर्वपदमात्रस्य क्व्यञ्चौ परतः सध्रिसमी विधेयेतामिति प्रष्टुराशयः । **प्राङि**ति—प्रकृष्टमञ्चतीति विग्रहे क्वौ क्विबन्ताञ्चतौ परतः सत्यपि न भवत्यादेशः, 'सहसमः' इत्यस्याभावे तु स दुर्वार इति तद्वारणाय तद्ग्रहणसार्थक्यम् क्व्यञ्चावित्यस्यापि सम्बन्ध आवश्यक इति खण्डशः कृत्यं दर्शयति—अञ्चावित्येवेति—क्विबन्तेऽन्यधातौ परत आदेशनिवृत्त्यर्थमञ्चावित्यस्य सम्बन्ध आवश्यक इति भावः । क्व मा भूदित्याह—**सहयुक् संयुगिति** । अञ्चावित्यस्य विशेषणभूतं क्वीत्यप्यावश्यकमित्याह—**क्वीत्येवेति**–प्रत्ययान्तरान्ताञ्चौ परतः प्रवृत्तिवारणार्थं क्वीत्यप्यञ्चतिविशेषणमावश्यकमेवेति भावः । प्रत्युदाहरणमाह—**सहाञ्चनं, समञ्चनमि**ति—

"Aho Shrutgyanam"

*धातुग्रहणे तदादेः समुदायस्य ग्रहणम्* इति पूर्वोक्तनियमादिह प्राप्तिः, तद्वारणाय क्वीत्यप्यावश्यकम्, तस्मिन् सति प्रत्ययान्तरान्तेऽञ्चतौ तु नभवति सूत्रप्रवृत्तिरिति ॥ ३०२. १२३ ॥

## तिरसस्तिर्यति ॥ ३. २. १२४ ॥

**त० प्र०––तिरस्‌शब्दस्याति–अकारादावञ्चतौ क्विबन्ते उत्तरपदे परे 'तिरि' इत्ययमादेशो भवति। तिरस्तिरको वा अञ्चति–तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः, तिर्यग्भ्याम्, तिर्यग्भिः, तिर्यग्भ्यः, तिर्यक्षु। अतीति किम् ? तिरश्चः, तिरश्चा, तिरश्ची, तिरश्चीनः ॥ १२४ ॥**

**श० म० न्यासानुसन्धानम्––तिरस०।** क्व्यञ्चावित्यनुवृत्तम्, तस्यैव च **अती**ति विशेषणम्, **'तिरि'** इत्यविभक्तिको निर्देशः सौत्रत्वात्, शब्दस्वरूपपरत्वेन क्लीबत्वं वा, तदाह––**तिरस्‌शब्दस्याति** इति। 'अति' इत्यत्रात्-शब्दस्य वर्णबोधकत्वेन सप्तम्यन्तविशेषणत्वेन च "सप्तम्या आदिः" [ ३. ४. ११४. ] इति परिभाषया तदादिबोधकत्वमित्याह––**अकारादावि**ति। **'तिरि'इत्ययमि**ति––आदेशस्वरूपभङ्गभिया असन्धिनिर्देशः। उदाहरति––**तिरस्तिरको** वेति––'तिरस्' इत्यव्ययेन तिरोधायकार्थेन तिरकशब्देन वा विग्रहेऽस्वपदविग्रहान्नित्यसमास इति भावः, तिरकोऽञ्चतीति विग्रहे तिरस्‌शब्देन सहैव समासात् तिरसस्तिरिः सिध्यति, स्यादिनिमित्तकार्यादिकं च स्वयमूहनीयम्। पदकृत्यमाह––**अतीति किमि**ति––अकारादावञ्चतावित्यर्थः किमर्थमाश्रीयत इति भावः, यत्राकारादित्वं नास्ति तत्र न भवति तिर्यादेशः, अतीत्यस्याभावे च तत्रापि स्यादित्याह प्रत्युदाहरणद्वारा––**तिरश्चः** इत्यादिना, अत्र "अच्च् प्राग् दीर्घश्च" [२. १. १०४.] इति 'अच्' इत्यस्य स्थाने चादेशादकारादित्वाभावः, दीर्घश्च स्वराभावान्न प्रवर्त्तते। **तिरश्चीनः** इत्यत्र तिर्यगेवेत्यर्थे स्वार्थिक ईनः, सर्वत्र स्वरादिप्रत्ययसत्त्वात् चादेश इति न तिर्यादेशः, तद्वारणाय 'अति' इति क्व्यञ्चावित्यस्य विशेषणमावश्यकमिति भावः ॥ ३. २. १२४ ॥

## नञत् ॥ ३. २. १२५ ॥

**त० प्र०––नञ्‌शब्द उत्तरपदे परेऽकारो भवति। अचौरः–पन्थाः, अमक्षिको–देशः, अमशकं वर्तते, अमक्षिकं वर्तते, अहिंसा, अस्तेयम्। ञाकारः किम्? पामनपुत्रः। उत्तरपद इत्येव–न भुङ्क्ते ॥ १२५ ॥**

**श० म० न्यासानुसन्धानम्––नञत्।** 'उत्तरपदे' इति सम्बध्यते। **नञ्** इति प्रथमान्तमेव, तस्यैव **अत्** इति विधेयत्वविशिष्टं विशेषणमिति सामानाधिकरण्येन सूत्रं व्याख्याति––**नञ् शब्द उत्तरपदे परेऽकारो भवती**ति, एतच्च लाघवानुरोधिसूत्रनिर्देशानुसारं व्याख्यानं, वस्तुतस्तु नञ्शब्दस्य नकाराऽकाररूपस्य स्थाने अकारमात्रप्रयोगः कर्तव्य इत्येवानुशासनीयोऽर्थः। तथा च नञः स्थानेऽकारो भवेदित्यर्थः फलति, भवतीत्यादिपदानामनुवादकत्वं, भवतु भवेदित्यादि-पदानामनुशासकत्वमिति त्यादिप्रत्ययार्थनिर्देशकशास्त्रतः समुपलब्धेः।

अत्रेदं विचार्यते––'नञ्' इति समुदायनिर्देशात् यत्र नञित्यव्ययात् "अव्ययस्य०" [ ७. ३. ३१ ] इति सूत्रेणाक भवति, स चान्त्यस्वरात् पूर्वमिति नक इति रूपम्, तेन नकशब्देन समासे नकचौर इत्यादौ अक्विशिष्टस्य नञः स्थानेऽपि अकारादेशे––अचौर इति स्यात्। अकोऽन्त्यस्वरात् पूर्वं विधानेन तन्मध्यपतितत्वान्नञ्ग्रहणेनैव नकस्य ग्रहणात्, यथा किम्‌शब्देऽपि ककिम्‌शब्दस्य स्थाने "किमः कस्तसादौ च" [२. १. ४०] इति सूत्रेण कादेशो भवतीति तत्रापि क इत्येव रूपम्, एवमिहापि नकस्य स्थाने अकारादेशे 'अचौर' इत्याद्येव रूपं स्यात्, इष्यते तु अकचौर इत्यादि। तदर्थमेवान्यैः पाणिन्यादिभिर्वैयाकरणैर्नञो नकारस्यैव लोप आरभ्यते, न तु नञोकारादेश इति स्वमते कथं संगच्छत इति चेत् ? अत्राभिदध्महे–नञ्शब्दः स्वसम्बन्धिनकारे [ नकाराकारसमुदाये ] लाक्षणिकः तथा च नञ्-शब्दसम्बन्धिनोर्नकारा–कारयोः स्थानेऽकारो भवतीति नाकविशिष्टस्य तस्याकारः।

अथापरं विचार्यते––न मानव इति विग्रहः––वाक्ये मानवभिन्न इत्यर्थ इति 'अमानव' इत्यत्रापि स एवार्थो ग्राह्यः, वृत्तिविग्रहयोः समानार्थत्वनियमात्। इत्थं च तत्पुरुषसमासे उत्तरपदार्थप्राधान्यं सर्वतान्त्रिकसम्मतं विह-

"Aho Shrutgyanam"

न्यते, पूर्वपदार्थभूतस्य भेदस्यैव प्राधान्यप्रतीतेः। अत्रोक्तं **भूषणे**--"आरोपितत्वं नञ्द्योत्यं नह्यसोऽप्यतिसर्ववत्" इति, अस्यायमाशयः---'अतिसर्वाय' इत्यादौ अतिक्रान्तः सर्वमिति विग्रहे "अतिरतिक्रमे च" [३.१.४६] इति समासे सर्वार्थस्य गुणीभावात् सर्वाद्यर्थप्रधानकार्याणां 'स्मै' इत्याद्यादेशानामभाववत् 'न सः---असः' इत्यादौ सर्वाद्यर्थप्रधानकार्याणामभावो न दृश्यतेऽतो नञ्समासे नञर्थो न भेदोऽपि तु आरोपितत्वम्, तथा च आरोपितः सः--असः, आरोपितो मानवः---अमानव इत्यादिरूपेणैव तत्रार्थः,

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥"

इत्युक्तदिशोक्ता नञर्थास्तु पार्ष्णिकतया प्रतीयन्त इति नोत्तरपदार्थप्राधान्यहानिरिति तत्र भवति सर्वादिनिमित्तककार्यमिति। एतदर्थे ज्ञापकं च "एतदश्च व्यञ्जनेऽनग्-नञ्समासे" [१.३.४६] इति सूत्रेऽनञ्समासग्रहणमेव, तद्धि 'अनेषो याति, इत्यादौ सेर्लुगभावार्थं क्रियते, नञ्समासे विग्रहवाक्यानुरोधेन नञर्थप्राधान्ये स्वीकृते च तत्र सर्वादेरप्राधान्येन "आद्वेरः" [२.१.४१] इत्यस्याप्रवृत्त्या व्यञ्जनान्तत्वनिमित्ते सेर्लुकि 'अनेष' इत्यादिरूपाणामेवासिद्धिरिति तदर्थं तद्ग्रहणस्य [अनञ्-समासग्रहणस्य] वैयर्थ्यमेव स्यात्, व्यर्थीभूतं च तन्नञ्समासे उत्तरपदार्थप्राधान्यं ज्ञापयति, तच्चारोपितत्वार्थस्वीकार एव सम्भवति।

परे तु पूर्वपदार्थप्रधानोऽव्ययीभाव उत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिवादानां प्रायोवादत्वमाहुः, उन्मत्तगङ्गमित्याद्यव्ययीभावेऽन्यपदार्थप्राधान्यस्य, निष्कौशाम्बिरित्यादितत्पुरुषे पूर्वपदार्थप्राधान्यस्य, द्वित्रा इत्यादिबहुव्रीहावुभयपदार्थप्राधान्यस्य च दर्शनादुक्तनियमस्य व्यभिचरितत्वदर्शनात्। इत्थं च 'अमानव' इत्यादौ पूर्वपदार्थप्राधान्येऽपि न तत्पुरुषलक्षणासङ्गतिर्नवा तस्य सर्वादित्वहानिः, अन्यपदार्थनिरूपितोपसर्जनत्वसत्त्व एव सर्वादित्वहानिस्वीकारात्, प्रकृते च न नञर्थभेदं प्रति सर्वादीनामुपसर्जनत्वं वाक्यार्थबोधे समुदायस्यैव प्राधान्यप्रतीतेरिति न किमपि दूषणमिति पूर्वोक्तारोपितत्वादिकल्पनाऽनावश्यकीत्याहुः। [अत्रान्यैर्व्याख्यातृभिर्नञर्थविचारो महताऽऽडम्बरेण कृतोऽस्माभिरनुपयुक्तत्वादुपेक्षितः, सति तज्जिज्ञासोदयेऽन्यत्र दर्शितदिशाऽवसेयमिति]

प्रकृतमनुसरामः—**अचौरः पन्थाः** इति—न विद्यते चौरो यस्मिन् स इत्यर्थः, बहुव्रीहिसमासेऽनेनाकारादेशः। **अमक्षिको देशः** इत्यपि बहुव्रीह्युदाहरणमेव। **अमशकं वर्त्तते** इत्यव्ययीभावः, मशकानामभाव इति विग्रहे "विभक्तिसमीप०" [३.१.३९] इति समासः, अनेनाकारादेशः। एवम्--**अमक्षिकं वर्त्तते** इत्यत्रापि। **अहिंसेति** तत्पुरुषसमासः, एवम्—**अस्तेयमि**त्यपि। **ञकारः किमि**ति—"नात्" इत्येव सूत्र्यतां प्रतिपदोक्तत्वान्निषेधार्थ एव नकारो ग्रहीष्यत इति ञकारविशिष्टपाठो व्यर्थ इति शङ्का। प्रत्युदाहरणेनोत्तरयति---**पामनपुत्रः** इति---पामा अस्यास्तीत्यर्थे "नोङ्गादेः" [७.२.२९] इति ने-पामन इति, पामनस्य पुत्र इति विग्रहे षष्ठीसमासः, अत्र सूत्रे ञकाराभावे कस्य नस्य ग्रहणमिति विनिगमकाभावात् प्रत्ययनकारस्यापि ग्रहणापत्तावुत्तरपदपरत्वसत्त्वाच्चेहापि नकारस्याकारः स्यादिति तन्निवृत्तये ञकारविशिष्टः पाठः कृतः, कृते च तथापाठे ञकारविशिष्टो नकारो निषेधार्थोऽव्ययमेवेति तस्यैवाकारादेशो भवति, न प्रत्ययभूतस्य तस्येति दोषाभावः।

अत्रेत्थं केचित् प्रत्यवतिष्ठन्ते---चादिषु ञकाररहित एव नञ् पठ्यतां, तस्यैव चेह ग्रहणमास्थीयताम्, प्रतिपदोक्तत्वात् स एव ग्रहीष्यते, न तु लक्षणविहितः प्रत्ययनकार इति पामनपुत्र इत्यादौ दोषाभाव इति। अत्रेदमुच्यते--तथा सति *प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव* इति न्यायेन प्रत्ययभूतस्य नस्यैव ग्रहणं स्यान्न तु लक्षणप्रतिपदोक्तन्यायेन चादिपठितनस्य, तथा च 'अचौरः पन्थाः' इत्यादौ न स्यात्, पामनपुत्र इत्यादौ च स्यादेत्वेवमव्याप्त्यतिव्याप्त्युभयदोषापत्तिः, प्रत्ययभूतनकारस्यापि लक्षणविहितत्वेऽपि लक्षणनिष्पन्नत्वाभावात्। लक्षणनिष्पन्नत्वमप्रसिद्धलक्षणादिपरिज्ञातत्वं वा लाक्षणिकत्वं, न तु लक्षणविहितत्वम्, तच्छब्दानुवादेन विहितत्वमिति प्रतिपदोक्तत्वमपि प्रत्ययनकारेऽस्त्येवेति दोषापत्तेर्दुर्वारत्वात्, एवं च सानुबन्धपाठस्य व्यावर्त्तकस्यावश्यकत्वमस्त्येव। न च सानुबन्धपाठेऽपि "प्रागवतः स्त्रीपुंसात् नञ् स्नञ्" [६.१.२५] इति विहितो नञ् कुतो नात्र ग्रहीष्यते, तथा च स्त्रैणपुत्र इत्यत्रापि नकारस्याकारादेशः स्यादेव, किञ्च तस्यैव स्यान्नतु चादिपठितस्य प्रत्ययाप्रत्यययोरिति न्यायादिति वाच्यम्, आदिस्वरवृद्धिरूपकार्यकारित्वेन चरितार्थानुबन्धस्य नञ्प्रत्ययस्य सार्थक्येन "नोङ्गादेः" [७.२.२९] इति सूत्रविहितनकारनिवृत्तिफलकस्य ञकारस्य तदकारित्वेऽचारितार्थ्येन च तस्यैव ग्रहणस्यौचित्यादित्यादास्तां विस्तरः।



"Aho Shrutgyanam"

**उत्तरपद इति किमिति**—नञः प्रायः पदान्तरेण सम्बन्ध एव प्रयोगादुत्तरपदपरत्वे एव प्रवर्त्तिष्यत इत्युत्तरपदे इत्यस्यानुवृत्तिरिहानर्थिकेति प्रष्टुराशयः । उत्तरपदशब्दस्य समासचरमावयवे योगरूढत्वं नतूत्तरं च तत् पदमिति व्युत्पत्तिलभ्ययौगिकार्थमात्रपरत्वम्, तथा चोत्तरत्र त्याद्यन्तपदादिसत्त्वेऽपि समासाभावान्न भवति तत्राकारादेशः, 'उत्तरपदे' इत्यस्य सम्बन्धाभावे च स दुर्वार इत्याह प्रत्युदाहरणमुखेन—**न भुङ्क्ते** इति–नाम नाम्नेत्युक्तेस्त्याद्यन्तेन सह समासाभावान्नास्तीह 'भुङ्क्ते' इत्यस्योत्तरपदत्वमिति न भवत्यकारः ।। ३. २. १२५ ।।

## त्यादौ क्षेपे ।। ३. २. १२६।।

**त० प्र०—त्याद्यन्ते पदे परतः क्षेपे गम्यमाने नञ् अकारो भवति। अपचसि त्वं जाल्म! अकरोषि त्वं जाल्म! त्यादाविति किम्? न पाचको जाल्मः । क्षेप इति किम्? न पचति चैत्रः। 'अ-मा-नो-नाः प्रतिषेधे' इत्यकारेण प्रतिषेधार्थीयेनैव सिद्धौ क्षेपे नञः श्रवणनिवारणार्थम्, अनुत्तरपदार्थं च वचनम् ।। १२६ ।।**

**श० म० न्यासानुसन्धानम्—त्यादौ० ।** क्वचिदनुत्तरपदेऽपि नञोकारादेशस्येष्टत्वेन तदनुशासनार्थं सूत्रमिदम्, 'नञत्' इति च पूर्वतोऽनुवृत्तमेव तथा चार्थमाह—**त्याद्यन्ते पदे परतः इति । अपचसि त्वं जाल्म ? इति**–कुत्सितं पचसीत्यर्थः समासाभावेऽपि-प्रयोगस्वाभाव्यादस्याकारस्य क्रियातः पूर्वमेव प्रयोगः, अत एव त्यादिपरत्वं सिद्ध्यति 'पचसि न जाल्म ?' इत्यादौ च न भवति, इत्थं च न तत्र क्षेपार्थावगतिः । **त्यादाविति किमिति**—"क्षेपे" इत्येवोच्यतां, पृथग्योगसामर्थ्यादेवास्योत्तरपदातिरिक्तविषये त्यादावेव प्रवृत्तिः स्यादित्याशयः प्रष्टुः। **न पाचको जाल्मः** इति—बहुलाधिकारात् समासाभावेनोत्तरपदपरत्वाभावात् पूर्वेण नाऽकारादेशः इह त्यादावित्यभावे च स्यादेवेति तद्वारणाय त्यादावित्यावश्यकमिति भावः । **क्षेप इति किमिति**—सर्वत्र त्यादौ विधीयतामकारादेश इति भावः। **न पचति चैत्रः** इति–प्रकृतेऽपि स्यात्, इष्यते तु नैवेति तद्वारणायावश्यकं 'क्षेपे' इति भावः । सूत्रं विनापि 'अपचसि त्वं जाल्म ?' इत्यादिप्रयोगसिद्धिरिति सूत्रस्य वैयर्थ्याशङ्कापूर्वकं तस्य सार्थक्यमुपपादयति—**अ-मा-नो-नाः प्रतिषेधे** इति—नञ् निषेधार्थकः, अकारोऽपि प्रकृतकोषबलात् तदर्थक इत्यवगम्यते, इत्थं च निषेधार्थेनाकारेणापचसि त्वं जाल्मेत्यादिप्रयोगाणां सिद्धिरस्त्येवेति सूत्रमिदमनर्थकमित्याशङ्का। भवति 'अपचसि' इति प्रयोगसिद्धिः, न पचसि' इति प्रयोगनिवृत्तिस्तु सूत्रं विना न सम्भवतीति तन्निवृत्त्येऽनुत्तरपदेऽपि क्वचिन्नञः स्थानेऽकारस्यप्रयोगार्थं च सूत्रस्य सार्थक्यमिति समाधानाशयः ।। ३. २. १२६ ।।

## नगोऽप्राणिनि वा ।।३. २. १२७।।

**त० प्र०—अप्राणिन्यभिधेये 'नग' इति निपात्यते वा। न गच्छतीति–नगः, पर्वतः, अगः–पर्वतः; नगाः–वृक्षाः, अगाः–वृक्षाः। अप्राणिनीति किम्? अगो वृषलः शीतेन। पूर्वेण नित्यमादेशे प्राप्ते विकल्पोऽयम् ।। १२७ ।।**

**श० म० न्यासानुसन्धनम्—नगो०।**' 'नञत्" इति सामान्यसूत्रस्यापवादसूत्राण्यारभमाण इदमाह, 'नग' शब्दे नकारस्याऽकारो विकल्पेन विधीयते, यदि प्राणिविषयकः प्रयोगो न भवेदिति सूत्रार्थः, तदाह—**अप्राणिन्यभिधेये** इति । **न गच्छतीति**—नञ्पूर्वाद् गमेः "नाम्नो गमः खड्-डौ च०" [ ५. १. १३१ ] इति डः, अन्त्यस्वरादिलोपे ङस्युक्तसमासे सति "नञत्" [ ३. २. १२५ ] इति नित्यं प्राप्तमकारादेशं परत्वात् विशेषविहितत्वाच्च प्रबाध्य विकल्पेनाकारादेशे— **अगः** इति, पक्षे-**नगः** इति, पर्वतो वृक्षश्च प्रसिद्धप्राणिभिन्न–इत्यप्राणिविषयत्वमस्त्येव । **अप्राणिनीति किमिति**–प्रायोऽप्राणिन्येव गमनाभावप्रवृत्तिनिमित्तकस्यास्य शब्दस्य प्रयोग इत्यप्राणिनीत्यव्यावर्त्तकमिति मत्वा प्रश्नः। **अगो वृषलः शीतेनेति**, अयमाशयः—प्राणिनि स्वाभाविकं गमनाभाववत्त्वं माऽस्तु, औपाधिकं तु सम्भाव्यत एवेति शीतनिमित्तिकजाड्याविर्भावाद् वृषलस्य शीतत्राणोपायरहितस्य गमनाभाववत्त्वं सूपपन्नमिति तद्विषये नित्यमेवाकारो यथा स्यान्न त्वनेन विकल्प इत्येतदर्थमप्राणिनीत्यावश्यकमिति भावः। सम्पूर्णसूत्रस्यैव वैयर्थ्यमाशङ्क्य सार्थक्यमाह—**पूर्वेण नित्यमादेशे प्राप्ते** इति—"नञत्" [३. २. १२५] इति सामान्यसूत्रेण सर्वत्रैवोत्तरपदे ऽकारादेशे नित्यं प्राप्त इति प्रकृते विकल्पार्थं सूत्रमिदमिति भावः ।।३. २. १२७।

"Aho Shrutgyanam"

## नखादयः ॥ ३. २. १२८ ॥

**त० प्र०—नखादयः शब्दा अकृताकाराद्यादेशा निपात्यन्ते। नास्य खमस्तीति–नखः, न भ्राजते इति–नभ्राट्, क्विबन्तः; न पातीति–नपात्, शत्रन्तः, त्रिलिङ्गोऽयम्, निपातनात्तु नाभावः; न वेत्तीति–नवेदाः, औणादिकोऽस्; सत्सु साधुः–सत्यः, साधौ यः, न सत्यः–असत्यः; नासत्यः, नासत्यौ, नासत्याः; न मुञ्चतीति–नमुचिः, औणादिकः किः, नास्य कुलमस्तीति–नकुलः। कथं न न भ्राजते किंतु भ्राजत एवेति–नभ्राट्? पृषोदरादित्वादेकस्य नञो लोपे भविष्यति; एवं–न न पाति–नपात्, न न वेत्ति–नवेदाः, न न मुञ्चति–नमुचिः, न न कुलमस्त्यस्य–नकुलः, न न खमस्त्यस्य–नखः, न पुमान् न स्त्रीति–नपुंसकम्, अत एव निपातनात् स्त्रीपुंसयोः पुंसकादेशः। न क्षीयते, न क्षरति वा–नक्षत्रम्, औणादिके त्रटि क्षभावे निपात्यते, न क्रामति, न क्रीणाति वा–नक्रः, डप्रत्ययो निपातनात्; नास्मिन्नकं दुःखमस्ति–नाकः, न विद्यन्ते ग्नाः–श्रियः छन्दांसि वास्य–नग्नः; न अगः–नागः; न विद्यते भागोऽस्य–नभागः; नारमञ्चति–नाराचः; न आप्यत इति–नापितः; न मीयतेऽसाविति–नमेरुः; नाभिनन्दति वधूमिति–ननान्दा; नान्तरेण भवति–नान्तरीयकम्; न न चिकेत्ति–नाचिकेतः, अत एव निपातनात् कित् ज्ञानार्थो जुहोत्यादौ द्रष्टव्यः, अस्माच्च नञ्द्वयोपपदान्नाम्नि शव् प्रत्ययो भवति। बहुवचनमाकृतिगणार्थम्, तेन–नास्तिकः, नभः, नारङ्गमित्यादयोऽपि द्रष्टव्याः ॥ १२८ ॥**

**श० म० न्यासानुसन्धानम्–नखा०।** प्रतिशब्दं नञादेशनिषेधे गौरवमभिसमीक्ष्य यत्र यत्राकारादेशो नेष्टस्तादृशानां शब्दानामेकस्मिन् गणे सन्निवेशं परिकल्प्य सूत्रमिदमारब्धवानाचार्यः, तथा च निपातनपरत्वमेव सूत्रस्येति फलतीत्याह—**नखादयः शब्दाः** इति। एवं च निपातितानां रूढिशब्दानामेषां पूर्वोत्तरपदसमुदायार्थप्रदर्शकविग्रहवाक्यादिप्रदर्शनमनावश्यकमपि कथंचिद्रूढ्यर्थस्य व्युत्पत्याऽपि लाभसंभव इति प्रदर्शनाय तेषां यथाकथंचिद् विग्रहादिकमाह—**नास्य खमस्ती**ति—खन्यत इति खं—छिद्रम्, तदस्य नास्ति स नखः, बहुव्रीहिसमासे "नञत्" [३. २. १२५] इति प्राप्तोऽकारादेशो निपातनान्निवर्तत इति तत्सिद्धिः। **न भ्राजते** इति विग्रहे भ्राजेः क्विप्, ङस्युक्तसमासेऽकारादेशो निपातनान्न भवति। **न पाती**ति—पातीति पात्, पातेः शतृप्रत्ययः, स्यादिविभक्तौ धुटि "ऋदुदितः" [१. ४. ७०] इति नाऽन्तादेशे प्राप्ते तदभावोऽपि निपातनादेवेत्याह—**निपातनात् तु नाभावः** इति। अस्य च लिङ्गत्रयेऽपि विशेषणतया प्रयुज्यमानत्वादाह—**त्रिलिङ्गोऽयमि**ति। **न वेत्तीति–नवेदाः** इति—विदेरौणादिकेऽसि वेदस्शब्दः सिध्यति, तस्य सि विभक्तौ "अभ्वादेरत्वसः सौ" [१. ४. ९०] इति दीर्घे–वेदा इति, न वेदा इति विग्रहे तत्पुरुषसमासेऽनेन नञोऽकारादेशाभावो निपात्यते। **सत्सु साधुरि**ति—सच्छब्दात् साध्वर्थे यप्रत्ययः, **न सत्यः–असत्यः** इति—अत्राकारादेशो भवत्येव, असत्यशब्दस्य गणेऽपाठात्, नासत्यशब्दस्यैव हि गणे पाठो दृश्यते। **न असत्यौ** इति विग्रहे चानेनाकारदेशाभावो निपात्यते "नासत्यावश्विनौ दस्रौ" इति कोषः **नासत्याः** देवाः। **न मुञ्चतीति–नमुचिः** मुचेरौणादिकः किः, इहापि नञुपपदादेव मुचेः किः केवलात् प्रयोगादर्शनात्। नकुलशब्दं व्युत्पादयति—**नास्य कुलमस्ती**ति–व्युत्पत्तिमात्रमेतत्, नकुलस्य कुलसहितत्वदर्शनात् न तत्र तदर्थानुगतिः। एवमेकेन नञा सह विग्रहे प्रकृतप्रयोगान् व्युत्पाद्य नञ्द्वयसत्त्वेऽप्येवमेव रूपाणीति दर्शयितुं शङ्कते—**कथं न न भ्राजते किन्तु भ्राजत एवेति–नभ्राडि**ति—नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात् यत्रावश्यभ्राजनं प्रतीयते तादृशस्थलेऽपि नभ्राडिति प्रयोगो दृश्यते स कथमुपपद्यत इति शङ्काग्रन्थार्थः। तत्साधनोपायमाह—**पृषोदरादित्वादि**ति, अयमाशयः—तादृशाः प्रयोगा न केवलं प्रकृतसूत्रसाध्या अपि तु पृषोदरादित्वं तेषु परिकल्प्यैकस्य नञो लोपे कृते द्वितीयस्य नञोऽनेनाकारादेशाभावनिपातनमिति। प्रकृतां प्रक्रियामुक्तेषु सर्वेषु प्रयोगेषूपपादयति–एवं–न न पाति—**नपादिति।** अथान्यान्युदाहरणान्याह—**न पुमान् न स्त्री**ति—अत्रैकस्य नञः पृषोदरादित्वाल्लोपे पुंस्त्रीति समुदायस्यानेन पुंसकादेश इत्याह—**अत एव निपातनादि**ति—एतद्गणपाठसामर्थ्यादेव स्त्री–पुंसयोः पुंसकादेश इत्यर्थः, विग्रहवाक्ये स्त्रियाः पश्चात् पाठेऽपि स्त्रीपुंसयोरित्युक्तिस्तथापूर्वप्रयोगनियमात्, "लघ्वक्षराऽसखी०" [३. १. १६०] इत्यनेनाल्पस्वरस्य स्त्रीशब्दस्य पूर्वनिपातात्, न च पुंशब्दापेक्षया स्त्रीशब्दस्य कथमल्पस्वरत्वमिति वाच्यम् समासान्ते कृते पुंसेति समुदायस्य स्त्रीति समुदायापेक्षयाऽधिकस्वरवत्त्वात्, समासान्तप्रत्ययानामुत्तरपदावयवत्वमित्यस्यापि सिद्धान्तस्य

"Aho Shrutgyanam"

भाप्याद्यारूढत्वात्, अथवा "स्त्रियाः पुंसो द्वन्द्वाच्च" [७.३.९६] इति समासान्ताद्विधानेन स्त्रीवृत्तिमातृत्वमादाय तस्या अर्च्यत्वमपीत्यर्च्यत्वादेव तस्याः पूर्वनिपात इत्यवधेयम्। नक्षत्रशब्दं व्युत्पादयति— **न क्षीयते न क्षरति वे**ति—क्षीयतेः क्षरतेर्वा औणादिके त्रटि प्रकृतिभागस्य निपातनात् क्षादेशे समासे सति अनेन नञोऽकारादेशाभावो निपात्यत इति भावः, **नक्षत्रं** तारकासु रूढम्। नक्रं व्युत्पादयति—**न क्रामति न क्रीणातीति वे**ति—यद्यपि क्रामतिक्रीणात्योरर्थे महान् भेद इति एकत्रार्थे तयोर्नानुगतिस्तथापि यथाकथंचिद्व्युत्पत्तिप्रदर्शनमेव रूढेषु कार्यम्, नार्थानुगतिरनुसन्धातव्येत्याशयेनैवमुक्तिः। कथं सिद्धिरित्याह–**डप्रत्ययो निपातनादि**ति—लक्षणाप्राप्तस्य कार्यमात्रस्य लाभार्थमेव हि निपातनमाश्रीयत इति डोऽपि शास्त्रान्तरेणाप्राप्तो निपातनलभ्य एवेति भावः। नाकशब्दं व्युत्पादयति—**नास्मिन्नकं दुःखमस्ती**ति—कमिति शब्द उदकसुखयो रूढः, तद्विरोधित्वादकं दुःखमेव, तच्च नाके स्वर्गे नास्तीति तत्रार्थानुगतिरस्ति। नग्नशब्दं व्युत्पादयति—**न विद्यन्ते ग्राः** इत्यादिना, नग्नशब्दस्य मूर्खे दरिद्रे च रूढत्वात् तत्रैतद्योगार्थानुगतिरस्ति, बहुव्रीहिसमासे सति नञोऽकारादेशाभावो निपातनात्। नाराचं व्युत्पादयति—**नारमञ्चतीति**—अरीणां समूहः–आरम् आरं न न–अञ्चतीत्यर्थानुगतं विग्रहवाक्यम्, एकस्य नञः पृषोदरादित्वाल्लोपे नारमञ्चतीति विग्रहः, बाणस्यारिसमूहेऽवश्यगतिशीलत्वात् तथैव विग्रहीतुमौचित्यात्। अभिधानचिन्तामणिवृत्तौ चाचार्या एवमाहुः—नरमञ्चति नराची, नराच्यास्तुल्यो नाराचः शर्करादेरण्, नराच्येव वा प्रज्ञादित्वात् स्वार्थेऽण्, नारं नरसमूहमञ्चतीति वा। **न आप्यते** इति–"नराणां नापितो धूर्तः" इति नीतिवाक्यानुसारं नापितस्य सर्वैरप्राप्यत्वादेवं विग्रहार्थसंगतिः। **न मीयतेऽसावि**ति—नमेरुवृक्षस्यातिपरिणाहित्वप्रसिद्धेरेवमर्थानुगतिः। **नाभिनन्दति वधूमि**ति–वधूननान्द्रोः परस्परमीर्ष्याया लोकप्रसिद्धेः, ननान्दुश्च स्वमातृसमीपे **प्रौढ्या** वक्तुं प्रभुत्वात् तस्या एव प्रकृतिः प्राधान्येनानेन पदेन प्रतिपाद्यते, सा हि सतीमपि भ्रातृजायां निन्दन्त्येव नाभिनन्दति, अन्यकुलप्रसूतेयमिहागत्याधिपत्यं करोति अहमेतत्कुलप्रसूताऽपि नात्राधिकारवतीति मनोवृत्तिरेव तयोः परस्परं वैमनस्यकारणम्, अत्राजन्तस्य नन्देरादिदीर्घत्वमपि निपात्यते। **नान्तरेण भवती**ति—विग्रहवाक्यमिदं प्रयोगार्थप्रदर्शनमात्रम्, सप्तम्यर्थविवक्षायामेव गहादित्वादीयो भवतीति **लघुन्यासकृतः**। वस्तुतस्तु अन्तरेणेति विभक्तिप्रतिरूपकमव्ययं विनेत्यर्थे वृत्तिदशायां तस्य विभक्तिकृतो विशेषो न तिष्ठतीति न तस्य सप्तम्यन्तत्वसम्भवः। **नाचिकेतः** इति—एकस्य नञोऽकारादेशो द्वितीयस्यानेनाकारादेशनिषेधः। क्वचिच्चासन्तोऽयं शब्दो दृश्यते, तत्र प्रथमैकवचने 'नाचिकेताः' इति स्यात्, नचिकेतास्तु कठोपनिषदि प्रसिद्धोऽन्य एव। प्रकृतप्रयोगसिद्ध्यर्थं 'प्रकृतिभूतस्य धातोरपि निपातनज्ञाप्यत्वमेवेत्याह—**अत एव निपातनात् कित् ज्ञानार्थो [धातुः] जुहोत्यादौ द्रष्टव्यः** इति, परे वैयाकरणास्तु धातुमिमं जुहोत्यादौ पठन्ति। रूपसिद्धिमाह—**अस्माच्च नञ्द्वयोपपदादि**ति। **नाम्नि शवि**ति—निपातनादिति भावः, शवि कृते "हवः शिति" [४.१.१२.] इति द्वित्वम्, उपान्त्यगुणादिकार्यं च। नखादिरित्येकवचनान्तनिर्देशस्यैवौचित्येन बहुवचनान्तनिर्देशस्य वैयर्थ्यमाशङ्क्याह—**बहुवचनमाकृतिगणार्थमि**ति। तत्फलमाह—**तेन नास्तिकः** इत्यादि–यद्यपि "नास्तिकास्तिकदैष्टिकम्" [६.४.६६.] इति सूत्रेणैव नास्तिकशब्दो निपातित इति नास्ति तत्रैतद्गणान्तर्गतत्वावश्यकता, तथापि यदि न आस्तिक इति विगृह्य नास्तिकशब्दो व्युत्पाद्यते तदेदमुदाहरणं बोध्यम्, तत्र निपातितेन नास्तिकशब्देन नास्ति परलोकादीति मतिर्यस्येति नास्तिक इति, अत्र निपातितेन च आस्तिकविपरीत इति बोधे विशेषः। **नभः** इति—न बभस्तीत्यर्थे नञुपपदात् भसः क्विप्, नभातीति वाऽर्थे नञुपपदाद् भातेः "मिथिरञ्ज्युषि०" [९७१] इत्याद्युणादिसूत्रेण किदस् प्रत्ययः, आकारलोपः, अनेनोभयत्र नञोऽकारादेशाभावनिपातनम्। न रज्यत इत्यरङ्गम्, न अरङ्गं—**नारङ्गमि**ति, अत्र द्वितीयस्य नञोऽकारादेशाभावो निपात्यते, रञ्जेः कर्मणि घञ्, अथवा रज्यतेऽस्मिन्निति रङ्गः, नास्ति रङ्गो यत्रेत्यरङ्गम्, इति यथाकथञ्चिद् व्युत्पादनीयम्, रूढिशब्देषु योगार्थानुगतिविचाराभावात् ॥३.२.१२८॥

## अन् स्वरे ॥ ३.२.१२९ ॥

**त० प्र०—नञः स्वरादावुत्तरपदे परे 'अन्' इत्ययमादेशो भवति। न विद्यते अन्तोऽस्येति–अनन्तो जिनः, एवमनादिः, अजानामभावोऽनजम्; न अश्वोऽनश्वः। अन् इति स्वरूपनिर्देशात् नलोपो द्वित्वं च न भवति ॥ १२९ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—अन्०** । **'स्वरे'** इति सप्तम्यन्तम् 'उत्तरपदे' इत्यस्य विशेषणमिति "सप्तम्या आदिः" [ ७. ४. ११४ ] इति परिभाषाबलात् तदाद्यर्थकमित्याह--**स्वरादावुत्तरपदे** इति । नञोऽकारादेशः पूर्वसूत्रेण निपातनबलान्निषिद्ध इति निषेधप्रकरणाभावादादेशप्रकरणस्यैव प्रवर्त्तमानत्वमित्यनेन नञः स्थानेऽन् आदेशो विधीयत इति न प्रकरणविच्छदः । **न विद्यतेऽन्तोऽस्येति–अनन्तो जिनः** इति–न विद्यते ऽन्तो यस्येति बहुव्रीहिसमासेऽनादेशः, अन्तश्च परिच्छेदः; स च त्रिविधो दैशिकः कालिकः प्रातियोगिकश्च, दैशिकस्तावत् किञ्चिद्देशपरिच्छिन्नत्वम्, कालिकस्तावत् किञ्चित्कालपरिच्छिन्नत्वम्, प्रातियोगिकस्तावत् केनचित् प्रतियोगिना परिच्छेदः, जिनस्य च सर्वत्र सर्वदा सर्वस्मिञ्जने व्याप्य स्थितत्वान्न केनापि परिच्छेद-इत्यनन्तत्वं तस्य । एवम्--**अनादिरिति**—न अस्त्यादिः पूर्वपरिच्छेदो यस्य सोऽनादिः, अन्तशब्दस्यापरपरिच्छेदवाचित्ववदादिशब्दस्यापि पूर्वपरिच्छेदवाचकत्वमिति तथैव [ अनन्तशब्दवत् ] अनादिशब्दस्यापि सर्वथा पूर्वपरिच्छेद राहित्यमर्थः । अव्ययीभावमुदाहरति– **अजानामभावोऽनजमि**ति । तत्पुरुष उदाहरति-**न अश्व** इति–अश्वप्रतियोगिकभेदवानित्यर्थः । नञः स्थानेऽनादेशे सति न लोपः, नकारस्य ह्रस्वात् परत्वेन स्वरे परे तस्य "ह्रस्वान्ङ-ण-नो द्वे" [ १. ३. २७ ] इति द्वित्वं च प्राप्नोति, तत् कथं न भवतीत्याशङ्कायामाह--**'अन्' इति स्वरूपनिर्देशादि**ति, अयमाशयः नलोपे सति अकारस्यैव शिष्टत्वे तद्विधानवैयर्थ्यात्, सर्वत्र स्वरादावुत्तरपदे एवानादेशविधानेन द्वित्वस्य नित्यप्राप्ततया द्विनकारनिर्देशस्यैव प्रक्रियालाघवार्थं विधेयत्वं स्यादित्येकनकारान्तादेशस्वरूपनिर्देशसामर्थ्यादिह नकारस्य लोपो द्वित्वं च न भवतीति ॥ ३. २. १२९ ॥

## कोः कत् तत्पुरुषे ॥ ३. २. १३० ॥

**त० प्र०––तत्पुरुषे समासे स्वरादावुत्तरपदे कुशब्दस्य 'कत्' इत्ययमादेशो भवति । कुत्सितः अश्वः–कदश्वः, कदुष्ट्रः, कदन्नम्; कदशनम् । तत्पुरुष इति किम् ? कुत्सिता उष्ट्रा अस्मिन्–कूष्ट्रो देशः । स्वर इत्येव–कुब्राह्मणः ॥ १३० ॥**

**श० म० न्यासानुसन्धानम्—कोः०** । "स्वरे" इत्यनुवर्त्तते, 'नञ्' इति निवृत्तं स्थान्यन्तरनिर्देशात् । कुशब्दश्चाव्ययमिह गृह्यते, तस्यैव विशिष्य [ प्रतिपदोक्तत्वेन ] "गति-क्वन्यस्तत्पुरुषः" [ ३. १. ४२ ] इति समासविधानात्, तथा च पृथ्वीवाचककुशब्दस्य नायमादेशः । एवं च कुं–पृथ्वीमतीतः–ववतीत इत्यादौ तत्पुरुषे कदादेशो न भवति, तत्र हि द्वितीयान्तत्वेन कुशब्दोऽत्रत्यो ग्राह्यइति द्वितीयान्तत्वस्य सामान्यरूपेण लक्षणरूपत्वेन वा तत्समासस्य लाक्षणिकत्वात् । तथाचोदाहरति–**कुत्सितोऽश्वः–कदश्वः** इति–"गति-क्वन्यस्तत्पुरुषः [ ३. १. ४२ ] इति समासः, कोः कदादेशश्चानेन । एवं– **कदुष्ट्रः** इत्यादावपि विज्ञेयम् । तत्पुरुष एव विशिष्य कुशब्दस्य समासविधानात् तत्पुरुषे एव भविष्यतीति प्रकृतसूत्रे 'तत्पुरुषे, इत्यव्यावर्त्तकमिति शङ्कते– **तत्पुरुष इति किमि**ति । "नञत्" [३. २. १२५] इत्यादिपूर्वसूत्रैर्विहिता आदेशा यथा सर्वेषु समासेषु प्रवर्त्तन्ते तथाऽयमपि प्रवर्त्तिष्यते, कुशब्दमुचार्य विहितसमासस्यैवेह ग्रहणमित्यर्थनियामकाभावादिति बहुव्रीह्यादावपि प्रवृत्तिदुर्वारेति प्रत्युदाहरणमुखेनाह–**कुत्सिता उष्ट्रा अस्मिन्नि**ति, एवं च बहुव्रीहौ प्रवृत्तिवारणार्थं 'तत्पुरुषे' इत्यावश्यकमिति भावः । स्वर इत्यस्य सम्बन्धोऽप्यावश्यक इत्याह– **स्वर इत्येवे**ति । व्यावर्त्यमाह– **कुब्राह्मणः** इति–कुत्सितो ब्राह्मण इति विग्रहः, तत्पुरुषसमासे सत्यपि स्वरादित्वाभावादुत्तरपदस्य तस्मिन् परे न भवति कदादेश इति भावः ॥ ३. २. १३० ॥

## रथवदे ॥ ३. २. १३१ ॥

**त० प्र०––रथ–वदयोरुत्तरपदयोः कुशब्दस्य कदादेशो भवति । कुत्सितो रथः–कद्रथः, कुत्सितो रथोऽस्य–कद्रथः; कुत्सितो वदः–कद्वदः, कुत्सितो वदोऽस्य–कद्वदः । तत्पुरुष एवेच्छन्त्येके, अन्यत्र कुरथो राजा, कुवदो मूर्खः ॥ १३१ ॥**

**श० म० न्यासानुसन्धानम्—रथ०** । पूर्वत्र स्वरादावित्युक्तत्वात् रथवदशब्दयोः परतोऽप्राप्तिरिति तयोः परतो विशिष्य कदादेशमाहानेन सूत्रेण, अयमपि तत्पुरुषे एव प्रवर्त्तत इति वक्ष्यति मतान्तरपरत्वेन, तथा च स्वमतेऽस्यान्यसमासेऽपि प्रवृत्तिः, पृथक्-सूत्रारम्भादिति तत्पुरुषबहुव्रीह्युभयसमासमुदाहरति– **कुत्सितो रथः, कुत्सितो रथोऽ-**

"Aho Shrutgyanam"

**स्येति** च विग्रहाभ्याम् । वदनं वदः, पुंसि नाम्नि घः, कुत्सितो वदः–**कद्वदः**, बहुव्रीहावाह–**कुत्सितो वदोऽस्येति** । स्वमतमुदाहृत्य परमतमनुवदति–**तत्पुरुष एवेच्छन्त्येके** इति-पूर्वसूत्रात् तत्सम्बन्धस्य सत्त्वादिति तेषामाशयः । तथा च बहुव्रीहौ न कदादेश इति तथोदाहरति–**अन्यत्र कुत्सितो राजेति**–विग्रहादिः पूर्ववत् । पाणिनीयेऽपि 'तत्पुरुषे' इत्यस्येह–न सम्बन्ध इति कद्वदो मूर्ख इत्यादिप्रयोगदर्शनात् प्रतीयते, तथा चान्यस्यैव कस्यचन वैयाकरणस्य मतमिदम् ।। ३. २. १३१ ।।

## तृणे जातौ ३. २. १३२ ।।

त० प्र०–**कुशब्दस्य तृणे उत्तरपदे जातावभिधेयायां कदादेशो भवति । कुत्सितं तृणमस्याः–कत्तृणा नाम रौहिषाख्या तृणजातिः । जाताविति किम् ? कुत्सितानि तृणानि–कुतृणानि ।। १३२ ।।**

**श० म० न्यासानुसन्धानम्**–**तृणे०** । 'तृणे' इत्युत्तरपदविशेषणम्, जातावित्यभिधेयनियन्त्रणम्, कोः कदिति पूर्वतोऽनुवृत्तमिति सूत्रार्थमाह–**'कु' शब्दस्य तृणशब्दे उत्तरपदे** इति–अभिधेयविशेषनियमार्थमेव पृथग् योगारम्भः । जातौ रूढत्वेनावयवार्थप्रतीत्यभावेऽपि पूर्वोत्तरपदावगतये विग्रहवाक्यमाह–**कुत्सितं तृणमस्या इति**–तथा च बहुव्रीहिसमासेऽनेन कदादेशः । अभिधेयस्फुटीकरणार्थमाह–**रौहिषाख्या तृणजातिरिति**–रौहिषमित्याख्या पर्यायशब्दो यस्याः सा तृणजातिरित्यर्थः, तथा च वनौषधिवर्गेऽमरकोषे 'कत्तृणमित्युपक्रम्य "पौर-सौगन्धिक-ध्याम-देवजग्धक-रौहिषम्" इत्युक्तम् । तृणोत्तरपदककुशब्दान्वितसमासस्य प्रायस्तज्जातिवाचिन्येव प्रयोगादसत्यपि जातावित्यस्मिन् पदेऽन्यत्र न भविष्यतीति मत्वा तद्वैयर्थ्यमाशङ्कते–**जाताविति किमिति** । न कुशब्दपूर्वपदकतृणशब्दोत्तरपदकः समासस्तृणजात्यभिधान एव प्रयुज्यते, तृणनिन्दायामपि तादृशशब्दस्य प्रयोगसम्भवादिति तद्व्यावृत्त्यर्थमावश्यकं जाताविति पदमित्याह–**कुत्सितानि तृणानीति**, तथा च तत्र कुतृणानीत्येवास्त्वित्यर्थं जाताविति पदम् । किञ्च जातावित्यस्यानावश्यकत्वे पूर्वत्रैव तृणशब्दपाठः कृतः स्यादित्यतोऽपि तस्यावश्यकत्वं प्रतीयत एवेति ।। ३. २. १३२ ।।

## कत्त्रिः ।। ३. २. १३३ ।।

त० प्र०–**कुशब्दस्य किंशब्दस्य वा त्रिशब्दे उत्तरपदे कदादेशो निपात्यते । कुत्सितास्त्रयः, के वा त्रयः–कत्त्रयः, कुत्सितास्त्रयोऽस्य, के वा त्रयोऽस्य–कत्त्रिः । किमो नेच्छन्त्यन्ये–कित्रयः ।। १३३ ।।**

**श० म० न्यासानुसन्धानम्**–**कत्त्रिः** । 'त्रौ च' इत्यनुक्त्वा कत्त्रिरिति निपातनसामर्थ्येनेह स्थान्यन्तरस्यापि कदादेशोऽनुमीयते, तदाश्रित्याह–**कुशब्दस्य किंशब्दस्य वेति**–किमोऽपि क्षेपार्थविषये प्रयोगदर्शनात् कुत्सावाचकत्वेन यत्किञ्चिच्छब्दसाम्याच्च तयोरिह स्थानिता व्याख्यातेति वा । तत्पुरुषे बहुव्रीहौ च सामान्यतो निपातनमित्यपि द्योतयति उभयथाविग्रहप्रदर्शनेन । **कुत्सितास्त्रयः** इति कुशब्देन सह समासाय **के वा त्रयः** इति किंशब्देन सह समासाय तत्पुरुषसमासविग्रहवाक्यम्, **कुत्सितास्त्रयोऽस्येत्यादि** च बहुव्रीहिसमासविग्रहवाक्यम्, तत्र तत्पुरुष उत्तरपदार्थप्राधान्याद् बहुवचनम्, बहुव्रीहौ चान्यपदार्थप्राधान्यादेकवचनादिसर्ववचनानि । **किमो नेच्छन्त्यन्ये** इति–कोः प्रकरणात् तन्मात्रस्यादेशाश्रयणे प्रयोगार्थव्याघाताच्च किमोऽप्यादेशाश्रयणे मानाभाव इति तदाशयः । तन्मते किमो विग्रहवाक्यप्रवेशे यादृशं रूपं तदाह–**किन्त्रयः** इति । पाणिनीयतन्त्रे भाष्यपर्यालोचनया तु किमोऽपि प्रकृतप्रयोगे समानं रूपमिति प्रतीयते, तथाहि–"कोः कत् तत्पुरुषेऽचि" [ पा० सू० ६. ३. १०१ ] इति सूत्रे "कद्भावे त्रावुपसंख्यानम्" कद्भावे त्रावुपसंख्यानं कर्तव्यम्, कत्त्रयः किमिदं कत्त्रय इति ? कुत्सितास्त्रयः–कत्त्रयः, के वा त्रयो न बिभृयुः–कत्त्रय इति" इत्युक्तम् । के वा त्रय इति प्रतीकमुपादाय **कैयट** आह–किंशब्दस्य क्षेपार्थस्य कद्भाव इति । तथा च किमोऽप्यादेश इति तेन स्फुटीकृतम् । किंशब्दवाच्यः क्षेप एव 'न बिभृयुः' इति वाक्यशेषेण प्रदर्शितो भाष्ये, भरणासामर्थ्याच्च क्षेप इति स्पष्टम् ।।३.२.१३३।।

## का-ऽक्ष-पथोः ।। ३. २. १३४ ।।

त० प्र०–**'अक्ष पथिन्' इत्येतयोरुत्तरपदयोः कोः 'का' इत्ययमादेशो भवति, अक्षशब्दस्याकारान्तस्य कृतसमासान्तस्य चाविशेषेण ग्रहणम् । कुत्सितोऽक्षः–काक्षः**

"Aho Shrutgyanam"

**पाशकादिः, कुत्सितमक्षमिन्द्रियं–काक्षम्, कुत्सितोऽक्षोऽस्य–काक्षो रथः, कुत्सितमक्षि अक्षं वाऽस्य–काक्षः, कुत्सितः पन्थाः–कापथम्, कुत्सितः पन्था अस्मिन्–कापथो देशः, साकोऽपि भवति–ककु–कुत्सितः अक्षः–काक्षः, एवं–कापथः । पथिशब्दनिर्देशात् तत्पर्यायेऽव्युत्पन्ने पथशब्दे न भवति–कुत्सितः पथः–कुपथः, कुपथं वनम् । अनीषदर्थार्थं वचनम् ॥ १३४ ॥**

---

**श० म० न्यासानुसन्धानम्–काक्ष०** । अत्र 'कोः' इत्येव सम्बध्यते, अक्षरानुगुण्येन तदनुवृत्तेरेव प्रकरणप्राप्तत्वात्, पूर्वसूत्रे किमोऽप्यादेशविधानं च निपातनाश्रयणसामर्थ्यादाश्रितम्, तच्च नाक्षरानुगुणमितिस्वाभिप्रायं वृत्त्या प्रकटयति---**कोः 'का' इत्ययमादेशः** इति । अक्षशब्द इह पठ्यते, स च द्विधा दृश्यते---अक्षिशब्दस्य कृतसमासान्तत्वेन, प्रतिपदोक्तरीत्या च इन्द्रियाद्यर्थकत्वेन, तयोरुभयोरिह ग्रहणमित्याह---**अक्षशब्दस्याकारान्तस्य कृतसमासान्तस्य चे**ति । ग्रहणे हेतुमाह---**अविशेषेणे**ति---उत्तरपदत्वदशायामुभयोर्विशेषस्य कस्यचिदनुपलभ्यमानत्वेन कस्य ग्रहणं कस्य नेति विनिगमकस्यानुपलब्धेरिति भावः । तत्र पूर्वमकारान्तमेवाक्षशब्दमाश्रित्य तदुदाहरणान्याह प्रतिपदोक्तत्वेन तस्यैव प्राथम्येनोपादेयत्वात्---**कुत्सितोऽक्षः** इति । अक्षशब्दस्यानेकार्थत्वेन सर्वार्थिकस्याविशेषेण विग्रहे ग्रहणमिति ध्वनयन्नाह---**पाशकादिरि**ति---

"अक्षो ज्ञातार्थशकटव्यवहारेषु पाशके ।
रुद्राक्षेन्द्राक्षयोः सर्पे बिभीतकतरावपि ।
चक्रे कर्षे पुमान् क्लीबं तुत्थे सौवर्चलेन्द्रिये ॥"

इति **मेदिनी**कोषानुसारं पाशकादिरनेकोऽर्थोऽक्षशब्दस्य, तेष्वन्यतमस्य बुबोधिषया प्रयोगेऽयमादेशो भवतीति भावः । पुंलिङ्गमुदाहृत्य क्लीबमुदाहरति---**कुत्सितमक्षमिन्द्रियमि**ति---इन्द्रियेऽक्षशब्दस्य क्लीबत्वमुक्तकोशादिबलान्निर्णीतमिति क्लीबप्रयोगे तदर्थस्यावगतिः । चक्रकर्षार्थाक्षशब्दमाश्रित्याह---**कुत्सितोऽक्षो यस्य–काक्षो रथः** इति– पूर्वोक्तमेदिनीकोषवाक्ये 'चक्रे कर्षे पुमान्' इति पठ्यते, तेन चक्रे कर्षे च पृथक् शक्तिरक्षशब्दस्यावगम्यते, किन्तु "ना द्यूताङ्गे चक्रकर्षे व्यवहारे कलिद्रुमः" इत्यमरकोषीयनानार्थवर्गघृताक्षशब्दार्थोपक्रमवाक्ये 'चक्रकर्षे'– इति समस्तप्रयोगदर्शनात्, लोकेऽपि चक्रस्थे तदाकर्षके काष्ठविशेष एवाक्षशब्दस्य प्रयोगात 'चक्रकर्षे' इत्येकमेव पदमर्थबोधकमित्यवसेयम्, तदनुसारं कुत्सितोऽक्षः–धूःस्थितश्चक्राकर्षकः काष्ठविशेषो यस्येत्येव प्रयोगार्थोऽवसेयः । एषु सर्वत्राक्षशब्दे उत्तरपदे कोः कादेशः । अकारान्ताक्षशब्दोत्तरपदकसमासान्दाहृत्य कृतसमासान्तप्रत्ययकाक्षिशब्दप्रभवाक्षशब्दोत्तरपदकसमासमुदाहरति---**कुत्सितमक्षि यस्ये**ति– बहुव्रीहिसमासे "सक्थ्यक्ष्णः स्वाङ्गे" [७. ३. १२६.] इति टः समासान्तः "अवर्णेवर्णस्य" [७. ४. ६८.] इतीवर्णस्य लोपेऽक्षशब्दो निष्पद्यते, तस्मिन् परे कोः कादेशः । अक्षशब्दविषये समुदाहृत्य पथिशब्दे परे उदाहरति---**कुत्सितः पन्थाः–कापथमि**ति---अस्य तत्पुरुषसमासत्वेनोत्तरपदलिङ्गत्वस्यौचित्येऽपि लिङ्गानुशासने "पथः संख्याऽव्ययोत्तर" इति पाठात् कापथमिति क्लीबत्वमुक्तम् । **अमरसिंह**स्तु भूमिवर्गे "व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः" इत्यूचिवान्, पुंस्त्वमस्याभिप्रैति **गौडो**ऽपि "व्यध्वो विपथ-कापथौ" इत्याह, तदनुसारमपि पुंस्त्वमेव पाणिनिमतेऽपि "अपथं नपुंसकम्" [पा० सू० २. ४. ३०] इति सूत्रे "पथः संख्याव्ययादेः" इति भाष्यधृतवार्त्तिकेन कापथशब्दस्य नपुंसकत्वमेव, तथैव च सिद्धान्तकौमुद्यादौ समुदाहृतम् । **अत्र सिंह-गौडयो**र्लिङ्गानुशासनं किंमूलमिति न ज्ञायते । **मेदिनीकृत्तु**---"कापथः कुत्सितपथे उशीरे क्लीबमिष्यते" इति वदन् प्रकृतेऽर्थे पुंस्त्वमेवानुमोदयति । तथा चोभयलिङ्गताऽस्य विज्ञातव्या, लोकाश्रयत्वाल्लिङ्गस्य, कोशकृतामपि लौकिकप्रयोगानुसारमेव लिङ्गव्यवस्थापकत्वात्, उक्तं च भाष्यकृताऽपि---लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति । बहुव्रीहौ त्वन्यपदार्थप्राधान्यात् तदानुगुण्येन लिङ्गव्यवस्थेति पुंल्लिङ्गताऽपि भवतीत्युदाहरति---**कुत्सितः पन्था अस्मिन्–कापथो देशः** इति---देशस्य पुंस्त्वात् कापथशब्दस्तत्पारवश्येन पुंल्लिङ्गः । कोरिति समुदायाश्रयणात् तन्मध्यपतितस्याकोऽपि "अव्ययस्य कोऽद् च" [७. ३. ३१] इति विहितस्य *तन्मध्यपतितस्तद्ग्रहणेन गृह्यते* इति न्यायाश्रयणाद् ग्रहणमित्याह---**साकोऽपि भवती**ति---अक्सहितस्यापि कोरयमादेशो भवतीत्यर्थः, तत्र मूलमुक्तमेव । उदाहरति---**ककु-कुत्सित** इति---'कु' इत्यस्यैव 'ककु' इति रूपम्, तदर्थ एव च कुत्सितशब्देनानूदित इति ककुशब्देन सह समासे तस्यापि कादेशो भवतीति तत्रापि **'काक्षः'** इत्येवरूपं, नतु ककाक्ष इति भावः । एवं पथिन्शब्देन सह साकः कोर्विग्रहवाक्ये प्रवेशेऽपि कादेशमुदाहरति---**एवं-कापथः** इति–अत्र पुंलिङ्गोदाहरणं, पूर्वोक्तकोशादि-

"Aho Shrutgyanam"

प्रदर्शितरीत्या पुंलिङ्गताया अपि प्रामाणिकत्वमिति ख्यापयितुम्, लिङ्गानुशासनवृत्तावपि स्वकारिकानुसारं कापथमित्युदाहृत्यामर-गौडमते उल्लिख्य कापथ इत्यपि भवतीति सूचितम्। "काऽक्षपथोः" इति सूत्राक्षरस्वारस्येन पथिन्शब्दस्यैवेहोत्तरपदत्वमाश्रितं न तु अक्षशब्दवदकारान्तपथशब्दकृतसमासान्तपथिशब्दयोरुभयोरपीति स्पष्टयति--**पथिनिर्देशात् तत्पर्यायेऽव्युत्पन्ने पथशब्दे न भवती**ति--अक्षशब्दस्योभयथारूपसाम्येन, सूत्रे तथोच्चारणाद् भवत्युभयोर्ग्रहणम्, अक्षपथोरिति निर्देशश्चाकारान्तपथशब्दग्रहणे न समर्थ इति न भवति तस्य ग्रहणमिति भावः। तथा च तेन सह विग्रहे रूपमाह--**कुत्सितः पथः कुपथः** इति, यद्यपि "पथः संख्याऽव्ययोत्तरः" इति लिङ्गानुशासनीयवृत्तिग्रन्थे--"संख्यावाचिनोऽव्ययाच्चोत्तरः--उत्तरपदभूतः, पथ इति पथिन्शब्दः "ऋक्पूः-पथ्यपोऽत्" [७. ३. ७६] इति कृतसमासान्तः, पथशब्दो वा नपुंसकम् इति कथितम्, तदग्रेऽपि संख्याव्ययोत्तर इति किमिति रूपेण पदकृत्यप्रदर्शनावसरे--'पथः परमपथः, उच्चैः पथ, केवलोऽपि विना समासान्तेनौणादिकः पथशब्दोऽस्ति, "पथ गतौ" इत्यस्य वाऽचि रूपम्' इत्युक्तम्। तथा चोभयविधस्य पथशब्दस्य लिङ्गानुशासनीयवाक्ये ग्रहणमिति, कुत्सितः पथ इति विग्रहेऽपि कुपथमित्येव स्वमतानुसारमायाति, तथा च 'कुपथः' इति पुंल्लिगप्रयोगो लेखकप्रमादादित्यवसेयम्, लिङ्गस्य लोकाश्रयत्वमिति न तत्राग्रह इति प्रदर्शनाय वा तथोदाहरणममरसिंहादिमतापेक्षयेत्यास्थेयम्। बहुव्रीहौ तु विशेष्याधीनं लिङ्गमिति वनस्य विशेष्यत्वे नपुंसकत्वमित्याह--**कुपथं वनमि**ति--एवं चेह न भवति कादेशः। "अल्पे" इत्यग्रिमसूत्रेणेषदर्थे सामान्यत एव कादेशविधानात् तेनैव सिद्धिरिति सूत्रमिदमनर्थकमित्याशङ्क्याह--**अनीषदर्थार्थं वचनम्** इति भवेदीषदर्थे तेन सूत्रेण सिद्धिरक्षपथोरप्युत्तरपदयोः परतः, किन्तु यत्र नेषदर्थो विवक्षितोऽपि तु कुत्सा विवक्षिता तत्र तेन न सिद्धिरिति तदर्थं प्रकृतसूत्रस्यावश्यकत्वमिति भावः॥ ३.२.१३४॥

## पुरुषे वा ॥३.२.१३५॥

**त० प्र०--कुशब्दस्य पुरुषशब्दे उत्तरपदे कादेशो भवति वा। कुत्सितः पुरुषः--कापुरुषः, कुपुरुषः; कुत्सिताः पुरुषा अस्मिन्--कापुरुषो ग्रामः, कुपुरुषो ग्रामः। अनीषदर्थे विकल्पोऽयम्, ईषदर्थे तु परत्वादुत्तरेण नित्यमेव; तत्रापि विकल्प एवेति कश्चित्--ईषत्पुरुषः--कापुरुषः, कुपुरुषः॥ १३५॥**

**श० म० न्यासानुसन्धानम्--पुरुषे वा।** कोरिति केति च सम्बध्यते, उत्तरपदे इति चानुवृत्तमेव, तद्विशेषणमेव **पुरुषे** इति, तथा च सम्पन्नमर्थमाह--**कुशब्दस्य पुरुषशब्दे उत्तरपदे** इत्यादिना। विकल्पविधानार्थमेव पृथग् योगः। **कुत्सितः पुरुषः कापुरुषः** इति--"गतिक्व-न्य०" [ ३. २. २७ ] इति समासे कोः कादेशः, विकल्पपक्षे--**कुपुरुषः** इति; बहुव्रीहिमुदाहरति--**कुत्सिताः पुरुषा अस्मिन्नि**ति--कुत्सितपुरुषमात्रनिवासभूतो ग्राम इति भावः, यद्यपि कस्मिन्नपि ग्रामे कापुरुषमात्रनिवासो न संभाव्यते, कस्यचिदवश्यं सुपुरुषस्यापि तत्र संभवात् तथापि बाहुल्येन कापुरुषाणामेव सत्त्वेन मल्लग्रामादिवद् भूयसा व्यपदेशः, पक्षे कादेशाभावोऽपीति **कुपुरुषः** इति। **अनीषदर्थे विकल्पोऽयमिति**--ईषदर्थे पूर्वेण सिद्धावपि अनीषदर्थे न केनापि प्राप्तिः, पूर्वसूत्रे पुरुषशब्दपाठे कृतेऽपि नित्यमेव स्यादिति फलतोऽनीषदर्थे विकल्पविधानार्थत्वमस्य सूत्रस्य पर्यवस्यति। ईषदर्थे तर्हि का व्यवस्थेत्याह--**ईषदर्थे त्वि**ति। नित्यविधेः प्रवृत्तौ हेतुमाह--**परत्वादि**ति--अनीषदर्थे पुरुषशब्दे परेऽस्य चारितार्थ्यम्, ईषदर्थे पुरुषशब्दादन्यत्र परस्य चारितार्थ्यमितीषदर्थे पुरुषशब्दे पर उभयोः प्राप्तौ सत्यां स्पर्धे जाते "स्पर्द्धे" [ ७. ४. ११९ ] इति--परिभाषासूत्रबलान्नित्यविधेः परस्यैव प्रवृत्तिरिति भावः। न च पुरुषशब्दमुच्चार्य कादेशविधायकस्यास्य प्रतिपदोक्तत्वम्, तस्य च [ ईषदर्थे नित्यविधेः ] सामान्यत ईषदर्थे विधायकत्वमिति परादपि प्रतिपदोक्तस्य [ विशेषविधेः ] बलवत्त्वमिति विकल्पेनैवेषदर्थेऽपि भवितव्यमिति वाच्यम्, शब्दविशेषेऽस्य विधायकत्वमर्थविशेषे च परस्येति विशेषविधित्वस्योभयत्र साम्येन परत्वेनैव व्यवस्थाया युक्तत्वात्, विशेषविधौ हि निरवकाशत्वमूलकमेव बलवत्त्वम् अस्ति चेहोभयोः परस्परावकाशलाभ इति प्रदर्शिततया सामान्यविशेषभावमूलकबलाबलविनिश्चयस्य कर्तुमशक्यत्वात्, शब्दविशेषनिमित्तत्वादस्यार्थविशेषनिमित्तत्वाच्च परस्य विशेषविधित्वसाम्यस्याप्युपपादितत्वात्। मतान्तरमाह--**तत्रापि विकल्प एवेति कश्चित्** पाणिनीये चेषदर्थे विधायकं शास्त्रं पूर्वम्, पुरुषे विकल्पेन विधायकं शास्त्रं परं तथापि ईषदर्थे नित्यमेव विधानमिष्यते पूर्वविप्रतिषेधादिति प्रति-

"Aho Shrutgyanam"

पादितं दीक्षितेन सिद्धान्तकौमुद्यां समासाश्रयविधिप्रकरणे । अत्रापि मतान्तरमित्याह--**तत्रापि विकल्प इति कश्चिदिति**—बाध्यसामान्यचिन्तापक्षाश्रयणेन पुरुषशब्दे परे कोः स्थाने यद् यत् शास्त्रं प्राप्नोति तन्मया बाध्यमिति लाभादस्यैव तत्रापि प्रवृत्तिरिति तेषामाशयः, किन्तु यथा पुरुषशब्दमाश्रित्यास्य तथा कल्पकत्वमेवमीषदर्थमाश्रित्य परस्यापि बाध्यसामान्यचिन्तकत्वे परत्वं विहायान्यद् व्यवस्थापकं मूलं दुर्लभमिति विचारणीयं तेनेति कश्चिदित्युक्त्याऽरुचिः सूचिता । तन्मतमनुसृत्योदाहरति– **कापुरुषः, कुपुरुषः** इति ॥ ३. २. १३५ ॥

## अल्पे ॥ ३ २. १३६ ॥

**त० प्र०--ईषदर्थे वर्तमानस्य कुशब्दस्योत्तरपदे परे कादेशो भवति । ईषन्मधुरं–कामधुरं, कालवणम् । स्वरादावपि परत्वादीषदर्थे कादेश एव भवति–ईषदम्लम्–काम्लम्, एवं–काच्छम् ॥ १३६ ॥**

**श० म० न्यासानुसन्धानम्– अल्पे ।** अल्पशब्दस्य न शब्दस्वरूपपरत्वमपि त्वर्थपरत्वं व्याख्यानात् । यद्यपि * स्वं रूपं शब्दस्याशब्दसंज्ञा * इति न्यायेन शब्दस्य स्वरूपमेव ग्राह्यं पूर्वोत्तरसूत्रादौ तथैव दर्शनात्, तथापि न्यायानामस्थिरत्वेन शास्त्रकृद्व्याख्यानस्य च तदपेक्षया बलवत्त्वध्रौव्यादल्पशब्दस्येहार्थपरत्वमिति व्याख्याति-- **ईषदर्थे वर्त्तमानस्येति** । **ईषन्मधुरमिति**–मधु–माधुर्यमस्यास्तीति मधुरम्, अल्पं मधुरमित्यर्थः । एवं लवणशब्देनापि लवणरसवत्त्वं बोध्यते, गुणवचनेभ्यो मतोर्लुपा गुणवचनानामेव गुणिपरत्वात्, ईषल्लवणं [ कालवण ] मिति विग्रहः । न केवलमस्य "पुरुषे वा" [ ३. २. १३५ ] इत्यनन्तरपूर्वविधेरेव बाधकत्वमपि तु दूरान्तरितपूर्वविधेरपीत्याह-- **स्वरादावपीति**--"कोः कत् तत्पुरुषे" [ ३. २. १३१ ] इति सूत्रेण स्वरादावुत्तरपदे विधीयमानः कदादेशोऽपि परत्वादनेन बाध्यते इति भावः। तथा चेषदर्थे पूर्वेषां कोः स्थाने आदेशविधायकानामयमपवाद इति तेषां सर्वेषां कुत्सितार्थ एव चारितार्थ्यम् । तथोदाहरति--**ईषदम्लमिति**, अम्लशब्दः स्वरादिस्तत्रापि कादेश एव कृते-- **काम्लमिति** । प्रकृतं विग्रहवाक्यमतिदिशति– **एवं काच्छमिति**--ईषदच्छं स्वच्छं काच्छमिति, अत्रापि कदादेशं परत्वात् प्रबाध्य कादेश एव भवति ॥ ३. २. १३६ ॥

## का-कवौ वोष्णे ॥ ३. २. १३७ ॥

**त० प्र०--कुशब्दस्योष्णशब्दे उत्तरपदे 'का कव' इत्येतावादेशौ वा भवतः । ईषत् कुत्सितं वा उष्णम्–कोष्णम्, कवोष्णम्; ईषत् कुत्सितं वा उष्णमत्र-कोष्णः कवोष्णो देशः; पक्षे–यथाप्राप्तमिति, तत्पुरुषे–कदुष्णम् । बहुव्रीहौ तु कदादेशो न भवति–कूष्णो देशः । अन्यस्त्वग्नावपीच्छति–काग्निः, कवाग्निः, कदग्निः ॥ १३७ ॥**

**श० म० न्यासानुसन्धानम्—का० ।** अत्रोष्ण इति शब्दपरमेवोत्तरपदविशेषणम्, कोरिति च पूर्वानुसृतं तदाह– **कुशब्दस्योष्णशब्दे उत्तरपदे** इति । का कवेत्युभयोर्विकल्पेन विधाने पक्षे उभयोरभावे कदादेशोऽपि भविष्यतीति रूपत्रयमिहेति सिध्यति, तदग्रे वक्ष्यति । अस्य परत्वेन कुत्सितार्थे ईषदर्थे च प्रवृत्तिरिति सूचयितुमुभयथा विग्रहमाह– **ईषत् कुत्सितं वा उष्णमिति । पक्षे यथाप्राप्तमिति**-- उभयोरादेशयोरभावे तत्पुरुषे "कोः कत् तत्पुरुषे" [ ३. २. १३० ] इत्यस्य प्रवृत्तिरिति भावः । बहुव्रीहौ तदप्रवृत्त्या **कूष्णमि**त्येव प्राप्तमित्याह-- **बहुव्रीहौ तु कदादेशो न भवती**ति । अत्र सूत्रेऽग्निशब्दोऽपि व्याकरणान्तरे पठ्यत इत्याह--**अन्यस्त्वग्नावपीच्छती**ति, पाणिनीये च न तथोपलभ्यते । तन्मतसिद्धानि रूपाण्याह-- **काग्निः, कवाग्निरि**त्यादि । अमरकोषे दिग्वर्गे--"कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति" इति प्रयोगदर्शनाद् बहुव्रीहावपि तत्प्रयोग (कदुष्णशब्दप्रयोग) इति केचिदाहुः, तत् तु न युक्तम्, कदादेशस्य तत्र प्राप्त्यभावात्, तद्वतीति तु न बहुव्रीहिलभ्यान्यपदार्थपरमपि तु मत्वर्थीयपरम्, तथा चोष्णशब्दस्योष्णत्वगुणपरत्वेन मतोर्लुपा तस्य तद्वत्परत्वम्, ईषदुष्णत्वविशिष्टं वस्तु कदुष्णपदेनाभिधीयते, अग्निशब्दोत्तरपदकसमासे च काद्यादेशप्रयोगाः कोषादपि नैवोपलभ्यन्ते ॥ ३. २. १३७॥

## कृत्येऽवश्यमो लुक् ॥ ३. २. १३८ ॥

**त० प्र०--'अवश्यम्' शब्दस्य कृत्यप्रत्ययान्ते उत्तरपदे लुक् अन्तादेशो भवति । अवश्यकार्यम्, अवश्यस्तुत्यम्,**



"Aho Shrutgyanam"

**अवश्यदेयम्, अवश्यकर्तव्यम्, अवश्यकरणीयम्। कृत्य इति किम्? अवश्यंलावकः॥ १३८॥**

**श० म० न्यासानुसन्धानम्—कृत्ये०।** "ते कृत्याः" [५. १. ४७.] इति सूत्रेण ध्यणादयः प्रत्ययाः कृत्यसंज्ञत्वेनोक्ताः, तथा च कृत्यशब्दस्य प्रत्ययार्थत्वेन प्रत्ययग्रहणन्यायेन तदन्तपरत्वमिति कृत्यप्रत्ययान्तत्वमुत्तरपदविशेषणं लभ्यते, तदाह—**कृत्यप्रत्ययान्ते उत्तरपदे** इति। **'अवश्यमः'** इति षष्ठीनिर्देशेन "षष्ठ्याऽन्त्यस्य" [७. ४. १०६.] इति परिभाषया लुक् अन्त्यस्यैव भवतीत्याशयेनाह—**लुक् अन्तादेशो भवती**ति। **अवश्यकार्यमि**ति—कर्तुं योग्यं कार्यम्, करोतेः "ऋवर्ण-व्यञ्जनाद् ध्यण्" [५. १. १७.] इति ध्यण्, तदन्ते कार्यशब्दे 'अवश्यम्' इत्यस्यान्तलुकि—अवश्यकार्यमिति, अत्र चोत्तरपदत्वसिद्धये अवश्यं कार्यमिति विग्रहे मयूरव्यंसकादित्वमाश्रित्य समासो विधेयः। **अवश्यस्तुत्यमि**ति—स्तौतेः "दृवृग्-स्तुः०" [५. १. ४०.] इति क्यप् स्तोतुं योग्यमित्यर्थे, "ह्रस्वस्य तः पित्कृति" [५. ४. ११३.] इति तागमे-स्तुत्यमिति, अवश्यं स्तुत्यमित्यर्थे मयूरव्यंसकादित्वात् समासेऽनेनावश्यमो मलोपः। **अवश्यदेयमि**ति—दातुं योग्यं—देयमिति ददातेः "य एच्चान्तः" [४. १. २८.] इति यः प्रत्ययः, आकारस्यैकारादेशश्च विधीयते, अवश्यं देयमिति वाक्ये कृते पूर्ववत् समासादिः। **अवश्यकर्त्तव्यमि**ति—कर्तुं योग्यमित्यर्थे करोतेः "तव्यानीयौ" [५. १. २७.] इति तव्ये कर्त्तव्यमिति, अवश्यं कर्त्तव्यम्—अवश्यकर्तव्यम्। एवम्—**अवश्यकरणीयम्।** ध्यणादयः पञ्चापि कृत्यप्रत्यया उदाहृताः। **कृत्य इति किमि**ति—अवश्यमः क्रियाविशेषणत्वेन त्याद्यन्तायाश्च क्रियायाः समासानर्हत्वेन कृत्यप्रत्ययान्तेन सहैव तस्य समासो बाहुल्येन दृश्यत इति तत्रैव भविष्यतीति 'कृत्ये' इत्यव्यावर्त्तकमिति प्रश्नाशयः। न केवलं कृत्ये एवावश्यमः समासोऽन्यत्रापि कृदन्ते परे तस्य समासः संभाव्यत इति तत्र सूत्रप्रवृत्तिर्मा भूदित्येतदर्थं 'कृत्ये' इत्यावश्यकमित्याह प्रत्युदाहरणमुखेन—**अवश्यंलावकः** इति—लुनातीति लावकः, लूधातोः कर्तरि "णकतृचौ" [५. १. ४८[ इति णकः, वृद्धावावादेशे लावक इति अवश्यं लावक इति समासे सत्यपि न भवति मलोपः, इति प्रकृते मलोपवारणार्थमावश्यकं 'कृत्ये' इति पदमिति भावः॥३. २. १३८.॥

## समस्तत-हिते वा॥ ३. २. १३९॥

**त० प्र०—सम्शब्दस्य तते हिते चोत्तरपदे परे लुगन्तादेशो वा भवति। सततम्, संततम्; सहितम्, संहितम्॥ १३९॥**

**श० म० न्यासानुसन्धानम्—सम०।** लुगित्यनुवर्त्तते, 'उत्तरपदे' इत्यस्य विशेषणं 'ततहिते' इति—**तते हिते चोत्तरपदे** इति। उदाहरति—**सततं, सन्ततमि**ति—तनोतेः क्ते—ततमिति, सम्यक् ततं-सततम्, अत्र ततशब्दे उत्तरपदे समो मस्य लोपः, पक्षे—सन्ततमिति, **सहितं संहितमि**ति—दधातेः क्ते—हितमिति, सम्यग् हितमिति विग्रहे समासेऽनेन यलोपः॥ ३. २. १३९॥

## तुमश्च मनः-कामे॥ ३. २. १४०॥

**त० प्र०—तुम्प्रत्ययान्तस्य सम्शब्दस्य च प्रत्येकं मनसि कामे चोत्तरपदे लुगन्तादेशो भवति। भोक्तुं मनोऽस्य—भोक्तुमनाः, गन्तुं कामोऽस्य—गन्तुकामः, सम्यग्मनोऽस्य—समनाः, एवं—सकामः। सहशब्देनापि सिद्धौ समः श्रुतिनिवृत्त्यर्थं वचनम्॥ १४०॥**

**श० म० न्यासानुसन्धानम्—तुम०।** तुमिति प्रत्ययः, तद्ग्रहणे तदन्तस्य ग्रहणम्। समः लुगिति च वर्त्तते, उत्तरपदे इति च, तस्यैव विशेषणं **मनः कामे** इति, अत्र च 'मनःकामे' इति समाहारः, तथा च मनसि कामे चोत्तरपदे तुम्प्रत्ययान्तस्यान्तो लुप्यत इत्यर्थः पर्यवस्यतीत्याह—**तुम्प्रत्ययान्तस्ये**त्यादिना। मनःकाम इति समुदाये कार्यं मा ज्ञायीति स्पष्टार्थमाह—**प्रत्येकमि**ति। उदाहरति—**भोक्तुं मनोऽस्ये**ति—भुजेस्तुमि भोक्तुमिति, पश्चात् तस्य मनसा सह बहुव्रीहिः, अनेन मलोपः। कामे उदाहरति—**गन्तुं कामोऽस्ये**ति—गमेस्तुमि गन्तुमिति, तस्य कामशब्देन बहुव्रीहिः, अनेन मलोपः। समो मस्य लोपमुदाहरति—**सम्यङ् मनोऽस्ये**ति, समा सह मनसो बहुव्रीहिरनेन मलोपे कृते—**समनाः** इति। एवं-सम्यक् कामोऽस्य—**सकामः** इति। मनसा सह—समनाः, कामेन सह सकाम इति विग्रहेऽपि प्रकृतसूत्रसाध्यरूपयोः सिद्धौ समो मस्य मनसि कामे च लुको विधानस्य वैयर्थ्यमाशङ्क्य निराकरोति—**सहशब्देनापि**

"Aho Shrutgyanam"

**सिद्धावि**ति । **समः श्रुतिनिवृत्त्यर्थमि**ति—मकारेण सहितः सम्, तस्य 'समः' इत्येकः समः शब्दः, परश्च "सम्" इति शब्दानुकरणस्य षष्ठ्यन्तं रूपम्, उभयोस्तन्त्रेण निर्देशः, तथा च मकारसहितस्य समः श्रुतिर्माभूदित्येतदर्थमत्र समो लोपो विधीयत इति भावः । पाणिनीयैश्च समो मकारस्य मनसि कामे च लुङ् न विधीयते, तत्र हि मते—

"लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि ।
समो वा हिततयोर्मांसस्य पचि युड्घञोः ॥"

इति कारिका प्रकृतसूत्रचतुष्टयविषये पठ्यते,तत्र तुमा 'काममनसोः' इत्येव सम्बध्यते समः पश्चान्निरूपणात् । तथा च तन्मते सम्यक्कामोऽस्येति विग्रहे संकाम इत्येव, तादृशप्रयोगस्यानभिधाने तु समा सह तयोः समासोऽप्यनभिधानान्नेति तैराश्रयितव्यम्, 'समनाः, सकामः, इत्यादौ च सहार्थस्यैव प्रतीतिस्तैरभ्युपेयत इति स्वमताद् भेदस्तत्र ॥ ३. २. १४० ॥

## मांसस्यानट्-घञि पचि नवा ॥ ३. २. १४१ ॥

**त० प्र०—मांसशब्दस्यानडन्ते घञन्ते च पचावुत्तरपदे लुगन्तादेशो वा भवति । मांसस्य पचनं–मांस्पचनम्, मांसपचनम्; मांस्पचनी, मांसपचनी; मांसस्य पाकः–मांस्पाकः, मांसपाकः अनड्घञीति किम् ? मांसपक्तिः । पचाविति किम् ? मांसदाहः, मांसदहनी ॥ १४१ ॥**

**श० म० न्यासानुसन्धानम्—मांस०** । अनड्घञौ पचेर्विशेषणे, प्रत्ययत्वेन च ताभ्यां तदन्तस्य ग्रहणम्; तथा-चानडन्ते घञंते च पचि परत इत्यर्थ आयाति, पचीति चोत्तरपदविशेषणमिति अनडन्ते घञन्ते च पचावुत्तरपदे इत्यर्थः सम्पद्यते, तदाह–**मांसशब्दस्यानडन्ते घञन्ते च पचावुत्तरपदे** इत्यादिना । **मांसस्ये**ति षष्ठीनिर्देशात् । "षष्ठ्यान्त्यस्य ] ७. ४. १०६ ] इति परिभाषया तदन्तस्याकारस्य लुक् । **मांस्पचनमि**ति–पचेर्भावेऽनट्-पचनमिति, मांसस्य पचनमिति षष्ठीसमासः, अनेनाकारलुक्, तस्य बहिरङ्गतयाऽसिद्धत्वात्, सकारस्य रुत्वं संयोगान्तलोपश्च न भवतः, "स्वरस्य परे प्राग्विधौ" [ ७. ४, ११० ] इति स्थानिवत्त्वेन तु न निर्वाहः "न सन्धि०" [ ७. ४. १११ ] इति परिभाषयाऽसद्विधौ तन्निषेधात् । अकारस्य लुगभावे–**मांसपचनमि**ति । स्त्रियां टित्वान्ङ्यां–पचनीति, तत्रापि अनडन्तपचेः सत्त्वेन लुक् प्रवर्त्तत एवेति मांसस्य पचनीति विग्रहे–**मांस्पचनीत्य**पि भवति । **मांस्पाकः** इति–पचेर्भावे घञि पाक इति, मांसस्य पाक इति विग्रहः । **अनड्घञीति किमि**ति–केवलेन पचधातुना सह समासो दुर्लभ इति तस्योत्तरपदत्वासंभवः इति–कृदन्तेन सहैव समासे लुक् प्रवर्तिष्यते, तत्र बाहुल्येनानड्घञन्तयोरेव प्रयोगात् तत्रैव भविष्यतीति मत्वा प्रश्नः । बाहुल्येन तस्यैव प्रयोगोऽस्तु, कृत्प्रत्ययान्तरान्तस्यापि प्रयोगः सम्भाव्यत एवेति 'तत्र प्रवृत्तिवारणार्थमनड्घञीत्यावश्यकमिति प्रत्युदाहरणमुखेनाह–**मांसपक्तिरि**ति–पचेर्भावे स्त्रियां क्तिः–पक्तिरिति, मांसस्य पक्तिरिति विग्रहे समासः, अत्र लुङ् मा भूदिति तदावश्यकत्वमिति भावः । **पचाविति किमि**ति–सूत्रे यद्यपि पचीत्येवोक्तम्, तथा च पचीति किमित्येव प्रश्नो युज्यते, तथापि तदर्थस्य वृत्तौ पचावित्येवं प्रदर्शितत्वात् तमादायैव प्रश्नः, सूत्रे धातोरनुकरणेन निर्देशः, वृत्तौ च "इ-कि-श्तिव् स्वरूपार्थे" [ ४. ३. १३८ ] इति इप्रत्ययान्तत्वेन निर्देश इति भेदः, पचेरेव विक्लित्त्यर्थस्यानड्घञन्तस्य मांसशब्देन सह सामर्थ्यात् प्रयोग इति तत्रैव भविष्यतीति मत्वा प्रश्नः । न पचेरेव तादृशस्य मांसेन तह सामर्थ्यमपि तु दहेरपि तथा भूतस्य [ अनड्घञन्तस्य ] तेन सह प्रयोगसंभवात् तस्मिन् परे मांसस्याकारस्य लोपो मा भूदित्येतदर्थं पचेर्ग्रहणमावश्यकमित्याह प्रत्युदाहरणद्वारा–मांस- **दाहः, मांसदहनी**ति–दहेर्घञि दाहः, अनटि स्त्रियां दहनीति, मांसस्य दाहः मांसस्य दहनीति विग्रहे षष्ठीसमासः, अत्रापि मांसशब्दाकारस्य लोपो मा भूदित्येतदर्थं पचीत्यावश्यकमिति भावः ॥ ३. २. १४१॥

## दिक्शब्दा-त्तीरस्य तारः ॥ ३. २. १४२ ॥

**त० प्र०—दिक्शब्दात् परस्य तीरशब्दस्योत्तरपदस्य 'तार' इत्ययमादेशो वा भवति । दक्षिणस्या दिशः, दक्षिणस्य वा देशस्य तीरं–दक्षिणतारं, दक्षिणतीरम्; एवम्–उत्तरतारम्, उत्तरतीरम्; पश्चिमतारं, पश्चिमतीरम्; पूर्वतारं, पूर्वतीरम् । दिक्शब्दादिति किम् ? गङ्गातीरम् ॥ १४२ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्- दिक्०** । नवेति सम्बध्यते, 'उत्तरपदे' इति सप्तम्यन्तं प्रकृतं दिक्शब्दादिति पञ्चमीबलेन षष्ठ्यन्ततया विपरिणम्यते, तस्य च तीरस्येत्यनेन विशेष्यविशेषणभावः सम्बन्धः तथा च योऽर्थः सम्पन्नस्तमाह-**दिक्शब्दात् परस्येत्यादि**ना, दिशि दृष्टः शब्दो-दिक्शब्दः, दिग्वाचकत्वेन प्रसिद्ध इति भावः । अत्र दिग्विशेषवाचका एव पूर्वादयः शब्दा दिक्शब्दत्वेन गृह्यन्ते, दिक्सामान्यवाचकाः 'दिक्, आशा, ककुप्' इत्यादयः शब्दाः, ऐन्द्र्यादयश्च यौगिकाः शब्दा न गृह्यन्ते व्याख्यानात् । 'दिशः' इत्येतावताऽपि सिद्धेः शब्दग्रहणात् तस्य शब्दस्य दिशि दृष्टत्वमेवावश्यकं न तु संप्रति दिगर्थवृत्तित्वमपि, तथा च दिग्वाचकस्य शब्दस्य सम्प्रतिदेशवाचकत्वेऽपि दिक्शब्दत्वेन ग्रहणं भवतीत्युदाहरणेषु स्फुटीभविष्यति । तथाहि-**दक्षिणस्या दिशः,दक्षिणस्य वा देशस्यति**---षष्ठी समासे सर्वादित्वेन दक्षिणाशब्दस्य "सर्वादयोऽस्यादौ" [३.२.६१] इति पुंवद्भावे चानेन तीरशब्दस्य विकल्पेन तारादेशे---**दक्षिणतारमि**ति, पक्षे-**दक्षिणतीरमि**ति । प्रकृतं विग्रहमन्यत्राप्यतिदिशति-**एवम्-उत्तरतारमित्या**दि । **पश्चिमतारमि**ति-पश्चिमाया दिशः पश्चिमस्य वा देशस्य तीरमितीहापि विग्रहः, तत्र दिशि पश्चिमाशब्दस्य स्त्रीत्वेन तस्य च सर्वादित्वाभावेन पुंवद्भावाभावे---पश्चिमातारमित्येव रूपं विज्ञेयम्, पश्चिमतारमिति वृत्तौ निर्दिष्टं च रूपं देशवाचिन एव । **दिक्शब्दादिति किमि**ति---प्रायस्तीरशब्दस्य दिक्शब्देन सहैव समासो दृश्यत इत्याशयेन प्रश्नः । न केवलं तीरशब्दस्य दिक्शब्देनैव समासः, नद्यादिसम्बन्धविवक्षया तेनापि सह समासस्य दर्शनात्, तत्र तारादेशाभावार्थं दिक्शब्दादिति कथनमावश्यकमिति प्रत्युदाहरति-**गङ्गातीरमि**ति---**गङ्गा** स्वनाम्ना ख्याता नदी, तस्यास्तीरमिति विग्रहः, अत्र तारादेशाभावेनैकमेव रूपं भवति, तथा चात्र तारादेशाभावार्थं तदावश्यकत्वमिति ॥३.२.१४२॥

## सहस्य सोऽन्यार्थे ॥ ३. २. १४३ ॥

**त० प्र०---अन्यार्थे अन्यपदार्थे बहुव्रीहौ समासे उत्तरपदे परे सहशब्दस्य 'स' इत्ययमादेशो भवति वा । सह पुत्रेण-सपुत्र आगतः, सहपुत्र आगतः; एवं-सशिष्यः, सहशिष्य आगतः; सह लोम्ना वर्तते-सलोमकः, सहलोमकः; विद्यमानलोमक इत्यर्थः । अन्यार्थ इति किम्? सहयुध्वा, सहकृत्वा, सहकारी, सहजः । कथं सहकृत्वा प्रियोऽस्य-सहकृत्वप्रियः?, प्रियः सहकृत्वाऽस्य-प्रियसहकृत्वेति ? बहुव्रीहौ यदुत्तरपदं तस्मात् पूर्वः सहशब्दो न भवतीति सादेशो न भवति ॥ १४३॥**

**श० म० न्यासानुसन्धानम्-सहस्य०** । **'अन्यार्थे'** इति पदं समुदायविशेषणं न तूत्तरपदमात्रस्य, 'अन्यस्यार्थे वाच्ये सति' इति तदर्थात्, तथा चोत्तरपदे इत्यपि सम्बध्यते, एवं चान्यार्थपदमन्यपदार्थप्रधानसमासपरमित्यायाति, तदेवाह-**अन्यार्थे अन्यपदार्थे बहुव्रीहौ समासे** इति-बहुव्रीहावेव समस्यमानपदातिरिक्तपदार्थस्य प्राधान्यं भवतीत्यन्यपदार्थशब्दस्तदुपस्थापक इति भावः । उदाहरति-**सह पुत्रेण-सपुत्रः** इति-सहशब्दयोगे "सहार्थे"[२.२.४५.] इति तुल्ययोगेऽर्थे गम्यमाने तृतीया "सहस्तेन" [३.१.२४.] इति सूत्रेण च समासो बहुव्रीहिः अनेन सहस्य सादेशो विकल्पेनेति सपुत्रः सहपुत्रो वेति रूपे, एष एव विग्रहादिरन्यत्राप्येवं समासे इत्याह-**एवं सशिष्यः, सहशिष्यो वेति** । तुल्ययोगार्थकस्य सहस्यादेशमुदाहृत्य विद्यमानार्थकस्यादेशमुदाहरति---**सह लोम्ना वर्तते** इति, यद्यपीहापि तुल्ययोगार्थो व्याख्यातुं शक्यते, वृत्तावन्यपदार्थस्य लोम्ना सहैव योगादिति न विद्यमानार्थत्वं पृथक् सहशब्दस्य स्वीकार्यम्, तथापि सहपुत्र आगत इत्यादितः सलोमक इत्यादीनां विशेषस्य क्रियान्तराकाङ्क्षाभावरूपस्य दर्शनात् पृथगर्थत्वं स्वीकार्यमिति पृथगुदाहरणमर्हतीत्याचार्याशयः, इहापि "सहार्थे" [२. २. ४५.] इत्येव तृतीया, तदन्तस्य "सहस्तेन" [३. १. २४.] इति समासेऽनेन सादेशः । प्रयोगार्थमाह-**विद्यमानलोमकः** इति । **अन्यार्थ इति किमिति**-सहस्यान्यार्थे बहुव्रीहावेव विशिष्य समासस्य "सहस्तेन"[३.१.२४.] इति सूत्रेण विधानात् प्रतिपदोक्तत्वात्, स एव समासो ग्रहीष्यत इति व्यर्थमेवान्यार्थ इति पदमिति प्रष्टुराशयः । न केवलं सहशब्दस्य बहुव्रीहिसमास एव, ङस्युक्तसमासोऽपि दृश्यते, अत्र चान्यार्थे इत्यस्याभावे समासोपस्थापकपदाभावात् प्रतिपदोक्त एव समासो ग्राह्य इति विनिगमकाभाव इति सामान्येनोत्तरपदे परतः सहस्य सादेशो भविष्यतीति ङस्युक्तसमासेऽपि स दुर्वार इत्याह-**सहयुध्वा, सहकृत्वा** इत्यादि---सह युद्धवान्-सहयुध्वा, सहकृतवान्-सहकृत्वा, उभयत्र "सह-राजभ्यां कृग्-युधेः" [५.१.१६७]

"Aho Shrutgyanam"

इति क्वनिप्, "ङस्युक्तं कृता" [ ३. १. ४९ ] इति समासः, अत्रोत्तरपदे सत्यपि न भवति सादेशः, अन्यार्थत्वाभावात्, अन्यार्थे इति पदाभावे च स दुर्वारः। एवं–सह करोतीति–**सहकारी,** अत्र "अजातेः शीले" [ ५. १. १५४ ] इति णिन्, ङस्युक्तसमासः। एवं–**सहजातः, सहजः,** "क्वचित्" [ ५. १. १७१ ] इति डः, अनयोरपि सादेशव्यावृत्त्यर्थमन्यार्थे इत्यावश्यकमिति भावः। क्वचिदन्यार्थे सत्यपि सादेशो न दृश्यते स कथमुपद्यत इत्याशङ्कते—कथं **सहकृत्वा प्रियोऽस्येति**—अत्र बहुव्रीहिसमासोऽस्ति, अस्ति चोत्तरपदपरत्वमिति भवितव्यं सादेशेनेति तदभावः कथं दृश्यत इति जिज्ञासा "प्रियः [ ३. १. ९५७ ] इति सूत्रेण प्रियशब्दस्य विकल्पेन पूर्वनिपात इति **सहकृत्वप्रियः प्रियसहकृत्वे**त्युभयथा रूपं भवतीति, तथैव विग्रहद्वयं प्रदर्शितवान्–**सहकृत्वा प्रियोऽस्य, प्रियः सहकृत्वाऽस्य चे**ति। उत्तरयति—**बहुव्रीहौ यदुत्तरपदमिति,** अयमाशयः–अन्यपदार्थे उत्तरपदे इत्यनयोः प्रत्यासत्त्या अन्यपदार्थप्रधानो यः [ बहुव्रीहिः ] समासस्तत्सम्बन्ध्युत्तरपदाव्यवहितपूर्वस्य सहस्य सादेश इत्येव सूत्रार्थो लभ्यते, एवं च सहकृत्वप्रियः प्रियसहकृत्वेत्युभयत्रापि, प्रियशब्दस्य बहुव्रीह्युत्तरपदत्वं पूर्वपदत्वं वेति कृत्वेत्यस्य बहुव्रीह्युत्तरपदत्वाभावेन, सहेत्यस्य च बहुव्रीहिपूर्वपदत्वाभावेन न सादेशप्राप्तिरिति न सूत्राव्याप्तिरुद्भावयितुं शक्या, सूत्रार्थस्य प्रत्यासत्त्यैव निर्णेयत्वात्॥ ३. २. १४३॥

## नाम्नि॥ ३. २. १४४॥

त० प्र०—**योगारम्भाद् वेति निवृत्तम्। अन्यार्थे समासे उत्तरपदे परे सहशब्दस्य सादेशो भवति, नाम्नि–संज्ञायां विषये। सहाश्वत्थेन वर्तते–साश्वत्थम्, सपलाशम्, सशिंशपम्; एवंनामानि वनानि, सह रसेन–सरसा दूर्वा। अन्यार्थ इत्येव–सह चरतीति–सहचरः कुरण्टकः, सह दीव्यतीति–सहदेवः कुरुः; सहदेवा–ओषधिः, सहजायते–सहजन्या अप्सराः॥ १४४॥**

**श० म० न्यासानुसन्धानम्—नाम्नि।** नाम्नि एकरूपताया आवश्यकत्वेन, सादेशाभावस्यापि नामस्वरूपान्तर्गतत्वेऽस्य सूत्रस्य वैयर्थ्यमेव स्यादिति सूत्रारम्भसामर्थ्यादस्य नित्यत्वमित्यायाति, तथा च पूर्वसूत्रादनुवर्त्तमानं नवेतीह न सम्बध्यत इत्याह—**योगारम्भाद् वेति निवृत्तमि**ति। अन्यार्थ इति च सम्बध्यत एव तदाह—**अन्यार्थे समासे उत्तरपदे** इति। उदाहरति—**सहाश्वत्थेन वर्त्तत** इति—विद्यमानार्थे सहयोगे तृतीया "सहस्तेन [ ३. १. २४ ] इति समासेऽनेन सादेशः एवं—**सपलाशमि**त्यादावपि विज्ञेयम्। संज्ञात्वं परिचाययति—**एवं नामानि वनानी**ति। अन्यामपि संज्ञामुदाहरति—**सह रसेने**ति—रसेन सह वर्त्तत इत्यर्थः, पूर्ववत् समासादिः, दूर्वायाः संज्ञेयमिति बोधयितुं **दूर्वेति** पदम्। अन्यार्थ इत्यस्य सम्बन्धस्यावश्यकतामाह—**अन्यार्थ इत्येवे**ति, व्यावर्त्त्यमाह—**सहचरः** इति—सह चरतीति विग्रहे अच्, संज्ञात्वं द्योतयितुमाह—**कुरण्टकः** इति। सहचरशब्दो नाम्नोऽन्यत्रापि प्रयुज्यते, तत्र च नामत्वाभावाद् द्व्यङ्गविकलता विज्ञेया। "प्रेक्ष्य स्थितां सहचरीम्" इत्यादौ स्त्रियां ङीप्रत्ययस्तु लिहादिषु [ "लिहादिभ्यः ५. १. ५१. इति सूत्रस्थगणे ] 'चरट्' इति टिद्विशिष्टपाठादेव समाधेयः, "चरेष्टः" [ ५. १. १३८ ] इति तु आधारोपपदादेव विधीयत इति प्रोक्तसमाधानाद् गत्यन्तराभावात्। एवं सह दीव्यतीत्यर्थेऽपि दीव्यतेरच्, अयं च कुरुवंशे प्रसिद्धो युधिष्ठिरस्य वैमात्रेयः। स्त्रियामाप्—**सहदेवा–ओषधिरि**ति, लिहादिगणे टिद्विशिष्टपाठात् सहदेवीत्यपि ज्ञेयम्, श्रूयते च "सहदेवी शिखाबद्धा हन्ति चातुर्थिकं ज्वरम्" इति, स्वयमप्याचार्या लिङ्गानुशासनशेषे पठन्ति—

"सहदेवा बलादण्डोत्पलाशाखिभेषजे।
सहदेवी तु सर्पाक्ष्यां सहदेवश्च पाण्डवे॥"

**सह जायते** इति–"भव्यगेय०" [ ५, १. ७ ] इति कर्त्तरि जन्यशब्दो निपात्यते। सर्वत्रङस्युक्तसमास इत्यन्यपदार्थप्रधानसमासाभावान्न भवति सादेशः॥ ३. २. १४४॥

## अदृश्या-ऽधिके॥ ३. २. १४५॥

त० प्र०—**अदृश्यं–परोक्षम्, अधिकमधिरूढम्, तद्वाचिनोरुत्तरपदयोरन्यार्थे समासे सहशब्दस्य सादेशो भवति। अदृश्ये–साग्निः कपोतः, सपिशाचा वात्या, सराक्षसीका विद्युत्, समुशलो व्रीहिकंसः; अधिके–सद्रोणा खारी, समाषः**

"Aho Shrutgyanam"

**कार्षापणः, सकाकणीको माषः । “सहस्य सोऽन्यार्थे” (३. २. १४३ ) इत्यनेनैव सिद्धे नित्यार्थं वचनम् ॥ १४५ ॥**

श० म० **न्यासानुसन्धानम्–अदृश्यां०** । वाक्यार्थज्ञाने पदार्थज्ञानस्य हेतुत्वेन सूत्ररूपवाक्यार्थज्ञानाय तद्गतपदयोरर्थं तावदाह- **अदृश्यं परोक्षमि**त्यादिना, दृशधातुश्चाक्षुषज्ञानार्थः, द्रष्टुमयोग्यमदृश्यम्–चाक्षुषज्ञानाविषयमित्यर्थात् परोक्षत्वं पर्यवस्यति, अक्ष्णः परमक्षिविषयातीतं वस्तु परोक्षमिति कथ्यते, तथा चात्राक्षिपदमिन्द्रियसामान्यपरमिति इन्द्रियविषयातीत एव वस्तुनि परोक्षत्वव्यवहार इति शब्दादिविषयेषु श्रोत्रादीन्द्रियग्राह्येषु न परोक्षत्वम् । एवं चेन्द्रियाविषयेऽनुमानादिगम्ये उत्तरपदार्थे सतीति पर्यवसितोऽर्थः । अधिकशब्दार्थमाह–**अधिरूढमि**ति–अधिरूढशब्दात् कनि उत्तरपदलोपश्च निपातनात्, अधिरूढं चातिरिक्ततया प्रतीयमानम् । **तद्वाचिनोरुत्तरपदयोरि**ति–तदिति पदेनादृश्याऽधिकयोः स्वरूपतो न भानमपि तु तदर्थविशिष्टत्वेन, तथा चादृश्यत्वाधिकत्वविशिष्टार्थवृत्तिनोरुत्तरपदयोः परत इति तदर्थः । अन्यार्थ इति च प्रकरणप्राप्तमिहापि अपेक्ष्यत एवेत्याह–**अन्यार्थे समासे** इति । क्रमश उदाहर्तुमवतारयति–**अदृश्ये** इति । **साग्निः कपोतः** इति–अग्निना सह वर्त्तत इति विग्रहः, अत्र कपोतेऽग्निरदृश्य एवागमेन प्रतीयमानत्वात्, तथा चोत्तरपदभूतस्याग्नेरदृश्यत्वेन तद्वाचित्वमुत्तरपदस्यास्तीति भवति सादेशः । **सपिशाचा वात्ये**ति–वातानां समूहो वात्या बहुदिग्वायुसंघातरूपा, सा च पिशाचेन सहिता वर्त्तत इति प्रसिद्धिरिति पिशाचोऽदृश्यमान एव विद्यमानत्वेन व्यपदिश्यते तत्र, एवं चादृश्यार्थपरत्वमुत्तरपदस्यास्तीति भवति सहस्य सादेशः । **सराक्षसीका विद्युत्** विद्युत् मेघप्रभवं ज्योतिः, सा च कयाचन राक्षस्याधिष्ठितेति प्रसिद्धिरिति तद्बलादेव राक्षस्या सह वर्तमानत्वव्यवहारो न तु तस्या दृश्यत्वमित्यदृश्यार्थपरत्वमुत्तरपदस्यास्तीति भवति सहस्य सादेशः । **समुशलो व्रीहिकंसः** इति–कंसो मानविशेषः, स चाढकपर्याय इति शब्दस्तोमनिधिकृतः, अत्र चाढकादधिकस्य कस्यचन मानस्य नामेति सामर्थ्यादवगम्यते, यतो मुशलस्यादृश्यत्वेन स्थानयोग्यता तत्र संभाविता, नहि आढके मुशलादर्शनयोग्यताऽस्ति मुशलस्य दीर्घतया तस्य तावत्सु व्रीहिषु गुप्तत्वासम्भवात्, अत्र काचिल्लोकप्रसिद्धिर्मूलमिति प्रतीयते, व्रीहिकंसे मशलो गोपनीय इति व्यवहारबलात्, तथा प्रयोगस्य संभवात्, एवं चादृश्यार्थपरत्वमुत्तरपदस्येति भवति सादेशः । अधिकार्थमुदाहर्तुमवतारयति–**अधिके** इति । **सद्रोणा खारी** द्रोणेन–चतुराढकपरिच्छिन्नपरिमाणेन सहिता–सद्रोणा, अत्र खार्या द्रोणेन सह विद्यमानत्वस्यागम्यमानत्वात् खार्या द्रोणेनाधिकत्वं प्रतीयते, अधिकार्थपरश्च द्रोणशब्द इति तस्मिन्नुत्तरपदे सहस्य सादेशः, समासादिः पूर्ववदेव सर्वत्रानुसन्धातव्यः । **समाषः कार्षापणः** माषेण सहित इत्यर्थः, माषेणाधिक इति प्रतीयते, माषोऽष्टरक्तिकापरिच्छिन्नः परिमाणविशेषः, कार्षापणश्च माषत्रयपरिमितः परिमाणविशेषः, तथा च समाषः कार्षापग इत्यत्र माष एवाधिकार्थपर इति तत्र परतः सहस्य सादेशः । एवं–**सकाकणीको माषः** इति–काकणीह न वराटिकापराऽपि तु परिमाणविशेषपरैव, स च परिमाणो माषान्न्यून इति रक्तिकैव स्यात्, तथा च काकण्यधिको माष इति प्रतीतिः, काकणीशब्दस्याधिकार्थपरत्वेन तत्र परतः सहस्य सादेशः । सूत्रवैयर्थ्यमाशङ्क्य समाधातुमाह–**सहस्य सोऽन्यार्थे** इत्यादि, अन्यार्थ एव प्रकृतसूत्रस्यापि प्रवृत्तिरित्यदृश्यार्थपरेऽधिकार्थपरेऽपि चोत्तरपदे “सहस्य सोऽन्यार्थे” [ ३. २. १४३.] इति पूर्वसूत्रेणैव सादेशः प्रकृतसूत्रविषयेऽपि सिद्ध एवेति पृथक् सूत्रारम्भो विफल इति नाशङ्कनीयम्, तस्य विकल्पेन सादेशविधायकत्वादिह च नित्यं तदादेशस्येष्टत्वात् तदर्थं पृथक् सूत्रारम्भस्यावश्यकत्वात्, तेन सादेशे च कदाचित् सहाग्निः कपोत इत्यादिप्रयोगाणामपि संभव इति तद्व्यावृत्त्यर्थं वचनमिति भावः ॥३. २. १४५॥

## अकालेऽव्ययीभावे ॥ ३. २. १४६ ॥

**त० प्र०–सहशब्दस्याकालवाचिन्युत्तरपदेऽव्ययीभावसमासे सादेशो भवति । ब्रह्मणः संपत्–सब्रह्म साधूनाम्, एवं–सवृत्तं सुविहितानाम्, सक्षत्रं यदूनाम्, संपत्तावव्ययीभावः; युगपच्चक्रेण चक्राणि वा धेहि–सचक्रं धेहि, एवं–सधुरं प्राज, यौगपद्येऽव्ययीभावः; तृणैः सह–सतृणमभ्यवहरति, एवं–समूलघातं हन्ति, साकल्येऽव्ययीभावः; षड्जीवनिकामन्तमवसानं कृत्वाधीते–सषड्जीवनिकमधीते श्रावकः, एवं–सलोकबिन्दुसारमधीते पूर्वधरः, अन्त इत्यव्ययीभावः । अकाल इति किम्? सहपूर्वाह्णं शेते, सहापराह्णं भुङ्क्ते,**

"Aho Shrutgyanam"

**अयमपि साकल्येऽव्ययीभावः। अव्ययीभाव इति किम्? सहयुध्वा ॥ १४६ ॥**

**श० म० न्यासानुसन्धानम्—अकाले०**। "अकाले" इत्युत्तरपदविशेषणम्, तत्र कालशब्दो न स्वरूपपरोऽपि त्वर्थपरो व्याख्यानात्, तथा च कालशब्दस्य कालवाच्यर्थः, नञा भेदः प्रत्याय्यत इति कालवाचिभिन्ने उत्तरपदे परेऽव्ययीभावसमासे सहस्य सादेशोऽनेन विधीयते इत्यर्थः सूत्रस्येत्याह-**सहशब्दस्याकालवाचिन्युत्तरपदे** इति। उदाहरति–ब्रह्मणः **सम्पत्–सब्रह्मे**ति–सम्पत्त्यर्थे द्योत्ये सहेत्यव्ययेन सह 'ब्रह्म टा' इत्यस्य विभक्ति-समीप० [३. १. ३९] इत्यव्ययीभावसमासः, अनेन सहस्य सादेशः, ब्रह्मपदेन निरवच्छिन्नं चैतन्यमुच्यते, साधवो हि समाधिगततत्त्वसाक्षात्कारा ब्रह्म सम्पद्यन्त इति तेषां ब्रह्मणः सम्पत्तिः प्रसिध्यति। प्रकृतं विग्रहमतिदिशति-एवं-**सवृत्तं सुविहितानामि**ति–वृत्तस्य–वर्त्तनस्य सम्पत्–सवृत्तम्, सुविहितानां–स्वनुष्ठितानां कार्याणाम्, सदनुष्ठायिनां वा वृत्तं सम्पद्यत एवेति 'वृत्त टा' इत्यस्य सहशब्देन सहाव्ययीभावसमासः 'पूर्वोक्तसूत्रेण, अनेन सहस्य सादेशः। **सक्षत्रं यदूनामि**ति–'क्षत्रस्य–क्षत्रियोचितवृत्तस्य सम्पत्' इत्यर्थेऽव्ययीभावः, यदवो यदुवंशीयाः क्षत्रियाः, तेषां स्वकर्मानुष्ठायित्वात् क्षत्रस्य सम्पत्तिराख्यायते। एषु सर्वत्राव्ययीभावसमासार्थमाह–**सम्पत्तावव्ययीभावः** इति। अथार्थान्तरे समुदाहरति–**युगपच्चक्रेण चक्राणि वा धेही**ति–युगपच्चक्रेणेत्यर्थे यौगपद्यस्य चक्रेण सहान्वयः, युगपच्चक्राणीत्यर्थे च तस्य क्रियया सहान्वय इति विवेकः, तत्र परस्मिन्नर्थे चक्रेण सह सामर्थ्याभावेऽपि गमकत्वात् समास एष्टव्यः, यौगपद्यार्थे "विभक्तिसमीप०" [३. १. ३९] इति समासः, सहस्य सादेशः प्रकृतसूत्रेण। **सधुरं प्राजः** इति–धुरा युगपत्–सधुरं, यौगपद्येऽव्ययीभावः, "धुरोऽनक्षस्य" [७. ३.७७] इति समासान्तोऽत्, सहस्य सादेशोऽनेन; **प्राज** इति प्रपूर्वकस्याजेः पञ्चमीहौ रूपम् धूरत्र कार्याग्रभागः। समासार्थमाह–**यौगपद्येऽव्ययीभावः** इति। **तृणैः सहे**ति–तृणमप्यपरित्यज्य सकलमभ्यवहरति भक्षयति, यदग्रे परिवेषितं तत्र किमपि न परिशेषयतीत्यर्थः, न त्वत्र तृणभक्षणे तात्पर्यम्, साकल्येऽव्ययीभावसमासे कृते सहस्य सादेशः। **समूलघातं हन्ति** मूलेन सह हन्तीति विग्रहः, मूलेन सहेत्यर्थे मूलशब्दस्य सहशब्देन साकल्येऽव्ययीभावः, पश्चात् समूलं हननमित्यर्थे "हनश्च समूलात्" [५. ४. ६३] इति णम्, पुनश्च समूलेत्यस्य घातशब्देन सह तत्पुरुषः, इत्यव्ययीभावपूर्वपदकः समासः। उभयत्र समासार्थमाह–**साकल्येऽव्ययीभावः** इति। अथान्तार्थेऽव्ययीभाव मुदाहरति–**षड्जीवनिकामन्तमवसानं कृत्वे**ति–जीव्यतेऽनया जीवनिका, करणानडन्तात् स्वार्थे के जीवनिकाशब्दः सम्पद्यते, षड्जीवनिकामन्तं कृत्वेत्यर्थे जीवनिका–टा–सहेत्यस्यान्तवचनेऽव्ययीभावसमासः; षड्जीवनिका नाम दशवैकालिकनामकग्रन्थस्य चतुर्थमध्ययनं तस्यान्तं यावदधीत इति समासार्थः, **सषड्जीवनिकमधीते** इति प्रयोगसम्पत्तिः। प्रकृतं विग्रहवाक्यमन्यत्रापि निर्दिशति–एवं **सलोकबिन्दुसारमि**ति–ग्रन्थविशेषात्मकानि चतुर्दशपूर्वाणि, तद्धारकः पूर्वधरः, स लोकबिन्दुसारं नाम चतुर्दशं पूर्वाभिधं ग्रन्थमन्तं कृत्वाऽधीत इति समासार्थविवक्षायामन्तवचनेऽव्ययीभाव समासः, अनेन सहस्य सादेशः। एषु सर्वत्र लौकिकविग्रहवाक्ये समासार्थप्रदर्शनानुकूलं यथा तथा विभक्तिप्रवेशेऽपि अलौकिकविग्रहवाक्ये तृतीयान्तस्य प्रवेश इत्यवधेयम्, सहेत्ययेन योगे तृतीयाया एवौचित्यात्, तदयोगे तु सामर्थ्याभावात् समासाभावस्यैव प्रसङ्गः। पदकृत्यमाह–**अकाल इति किमि**ति–कालवाचिन्युत्तरपदे सहस्य सादेशः किमर्थं पर्युदस्यत इति प्रश्नार्थः। **सहपूर्वाह्णं शेते** सकलं पूर्वाह्णमभिव्याप्य शेत इत्यर्थः, अत्र पूर्वाह्ण–टा–सहेत्यस्य साकल्येऽव्ययीभावसमासेऽनेन सहस्य सादेशो न भवति पूर्वाह्णशब्दस्योत्तरपदस्य कालवाचित्वात्, 'अकाले' इत्यस्याभावे च स दुर्वारः। **सहापराह्णं भुङ्क्ते** इति—सकलमपराह्णमभिव्याप्य भुङ्क्त इत्यर्थः, अत्रापि साकल्ये एवाव्ययीभावः, अभिव्याप्तिस्तु द्वितीयार्थः। **अव्ययीभाव इति–किमि**ति–सहेत्यव्ययम्, तस्याव्ययीभावसमास–एव सम्भावितः "सहस्तेन" [३. २. २४.] इति विहितः समासो बहुव्रीहिः, तत्र च पूर्वसूत्रैः सहस्य सादेशो यथायोगं विहितः एवेति परिशेषादव्ययीभाव एव भविष्यतीति 'अव्ययीभावे' इत्यनावश्यकमिति प्रश्नाशयः। **सहयुध्वेति**–सह युद्धवानित्यर्थे क्वनिप् ङस्युक्तसमासः, इत्थं चाव्ययीभावादन्यत्र तत्पुरुषेऽपि सहशब्दः समस्यत इति तस्य कालभिन्ने युध्वेत्युत्तरपदे सादेशो मा भूदित्येतदर्थमव्ययीभाव इत्यावश्यकमिति भावः ॥ ३. २. १४६ ॥

"Aho Shrutgyanam"

## ग्रन्थान्ते ।। ३. २. १४७ ।।

**त० प्र०—ग्रन्थस्यान्तो–ग्रन्थान्तः, तद्वाचिन्युत्तरपदेऽव्ययीभावे समासे सहशब्दस्य सादेशो भवति। कलामन्तं कृत्वा–सकलं ज्योतिषमधीते, एवं–सकाष्ठम्, समुहूर्त्तम्। कलादिशब्दाः कालविशेषवाचिनोऽपि तत्सहचारिषु ग्रन्थेषु वर्तन्त इति ग्रन्थान्तवाचित्वमुत्तरपदस्य, अन्त इत्यव्ययीभावः। कालार्थ आरम्भः ।। १४७ ।।**

**श० म० न्यासानुसन्धानम्—ग्रन्थान्ते।** 'उत्तरपदे' इत्यनुवृत्तम्, तद्विशेषणं ग्रन्थान्तपदम्, तच्चेहार्थपरं न तु शब्दपरमित्याह—**ग्रन्थस्यान्तो ग्रन्थान्तः** इत्यादि । ग्रन्थशब्दश्चेह ग्रथ्यमानशास्त्रादिपरो न तु पुस्तकपरः, **तद्वाचिनीति**—तद्वाचिपदमात्र तद्बोधकपरं न तु शक्त्या तदुपस्थापकपदमात्रपरम्, कलादिशदानां शक्त्या तदुपस्थापकत्वाभावात् । उदाहरति—**कलामन्तं कृत्वेति**, एतच्च लौकिकं वाक्यम्, अलौकिकं [ शास्त्रीयं ] तु कलया सहेति वाक्यानुसारि 'सह–कला-टा' इति, समासशास्त्रं स्वयमेवोपदेक्ष्यति, समासे कृतेऽनेन सहस्य सः, "गोश्चान्ते०" [ २. ४. ९६ ] इति कलाशब्दस्य ह्रस्वेऽव्यीभावनिमित्तककार्यान्तिरेषु कृतेषु—**सकलमिति** । प्रकृतं विग्रहादिकमन्यत्राप्यतिदिशति—**एवं-सकाष्ठमिति**—काष्ठामन्तं कृत्वेति विग्रह इति भावः, पूर्ववत् कार्यम् । **एवं—समुहूर्त्तमिति**—मुहूर्त्तमन्तं कृत्वेति विग्रहः । कला-काष्ठा-मुहूर्तशब्दानां कालविशेषवाचिनां कथं ग्रन्थान्तवाचकत्वमित्याश ङ्कयामाह—**कलादिशब्दाः कालविशेषवाचिनोऽपीति**, अयमाशयः—कलादिशब्दा अवश्यं कालविशेषवाचिनः, किन्तु प्रकृते तत्कालसहचारिषु तत्कालवर्त्तिषु ग्रन्थेषु लक्षणया प्रयुज्यन्ते, अधीयमानग्रन्थम् अध्ययनकालान्तिमकलावर्त्तिग्रन्थेन सहितमधीते इत्यर्थस्य विवक्षणात् । एवं च कलाशब्दस्य तदग्रन्थान्तभागपरत्वं सम्पद्यत इत्याह—**ग्रन्थान्तवाचित्वमुत्तरपदस्येति** । समासविधायकशास्त्रमुपदिशति—**अन्त इत्यव्ययीभावः ।** इति—"विभक्ति-समीप०" [ ३. १. ३९ ] इत्यादिसूत्रेणान्तार्थेऽव्ययीभावसमास इति भावः । केचित् तु कलादिशब्दाः कलादिप्रतिपादकग्रन्थपराः, ज्योतिःशास्त्रस्य कालप्रतिपादकत्वस्य प्रसिद्धत्वात्, तथा च कलादिप्रतिपादकग्रन्थमवधि कृत्वाऽधीते इति विवक्षितोऽर्थइत्याहुः, तन्न; तथा सति उत्तरपदस्य ग्रन्थान्तप्रतिपादकत्वं न स्यादिति ग्रन्थान्तवाचित्वमुत्तरपदस्येति वृत्तिग्रन्थो विरुध्येत । कलादिशब्दानां ग्रन्थान्तवाचित्वेन कालवाचित्वाभावात्, 'अकाले' इति निषेधाऽप्रसक्त्या "अकालेऽव्ययीभावे" [ ३. २. १४६ ] इति पूर्वसूत्रेणैव सहस्य सादेशः सिद्ध एवेति व्यर्थमिदं सूत्रमित्याशङ्कायामाह—**कालार्थ आरम्भः** इति, अयमाशयः—"अकालेऽव्ययीभावे" [ ३. २. १४६ ] इत्यत्राकाले इत्यस्य कालनिरूपितवाचकताव्यावर्त्तककालत्वव्याप्यानुपूर्वीभिन्नानुपूर्वीमत्युत्तरपदे इत्यर्थः, एवं चात्र कलादिशब्दानां ग्रन्थान्तपरत्वेऽपि तदानुपूर्व्याः [तद्घटितवर्णसन्निवेशक्रमस्य] कालनिरूपितवाचकताव्यावर्त्तककालत्वव्याप्यानुपूर्वीमत्त्वमेव, तादृशानुपूर्व्या एव कालवाचित्वस्यान्यत्र दृष्टत्वात्, इति तादृशानुपूर्वीभिन्नानुपूर्वीमत्त्वविरहात् तत्सूत्रस्याप्रवृत्तावप्राप्तसादेशविधानार्थं प्रकृतसूत्रमारब्धमिति । यादृशवर्णसन्निवेशक्रमोन्यत्र कालवाचित्वेन दृष्टस्तादृश एवेह लक्षणया ग्रन्थान्तवा[चित्]वेन प्रयुक्त इति कालवाचिवर्णानुपूर्वीभिन्नानुपूर्वी[मत्त्वाभावेन] पूर्वसूत्राप्रवृत्तौ प्राप्तायां सकलं ज्योतिषमधीते [इत्या]दिप्रयोगसिद्ध्यर्थं प्रकृतसूत्रमिति पर्यवसितोऽर्थः ।। [३.] २. १४७ ।।

## नाशिष्यगो-वत्स-हले ।। ३. २. १४८ ।।

**त० प्र०—आशिषि गम्यमानायां गवादिवर्जित उत्तरपदे परे सहशब्दस्य सादेशो न भवति। स्वस्ति राज्ञे–सहराष्ट्राय, स्वस्ति गुरवे–सहशिष्याय, भद्रं सहसंघायाचार्याय। आशिषीति किम्? सपुत्रः सहपुत्र आगतः, अगो-वत्स-हल इति किम्? स्वस्ति भवते सगवे, सहगवे; सवत्साय, सहवत्साय; सहलाय, सहहलाय ।। १४८ ।।**

**श० म० न्यासानुसन्धानम्—नाशिष्य०।** सहस्य सादेशः प्रकृतः, तस्यैवानेनाशीर्विवक्षायां निषेध आरभ्यते, सोऽपि न सर्वत्रापि तु कतिषुचिच्छब्देषु उत्तरपदभूतेषु सत्सु न प्रवर्त्तत इति तत्र भवत्येव सादेशः, तदाह—**आशिषि गम्यमानायां गवादिवर्जिते उत्तरपदे** इति, उदाहरति—**स्वस्ति राज्ञे सहराष्ट्रायेति**—राष्ट्रेण सहिताय राज्ञे स्वस्तीति विवक्षिते राष्ट्र-टा-सहेत्यस्य समासः, "सहस्य सोऽन्यार्थे" [ ३. २. १४३ ] इति सादेशे प्राप्तेऽनेन निषेधः,

"Aho Shrutgyanam"

एवं-**सहशिष्याये**त्यादावपि, स्वस्तिशब्दयोगे सहराष्ट्र-सहशिष्यादिशब्देभ्यश्चतुर्थी, एवं भद्रशब्दयोगे सहसंघशब्दादपि वैकल्पिकी सा, पूर्वत्र "शक्तार्थ-वषड्-नमः-स्वस्ति०" [ २. २. ६८ ] इति नित्यं चतुर्थी, परत्र च "तद्भद्राऽऽयुष्य०" [ २. २. ६६ ] इति वैकल्पिकी । पदकृत्यं प्रदर्शयितुं पृच्छति---**आशिषीति किमि**ति---तथा च गवादिवर्जिते उत्तरपदे कदापि न सादेश इत्यर्थोऽस्तु, यत्र च "नाम्नि" [ ३. २. ४४ ] इत्यादिना विशिष्य सादेशो विधीयते तत्र विधानसामर्थ्यान्निषेधाप्रवृत्तौ परिशेषादाशिष्येव निषेधः स्यादिति आशिषीति पदमव्यावर्त्तकमिति प्रष्टुराशयः । प्रत्युदाहरणद्वारोत्तरयति---सपुत्रः, **सहपुत्र आगतः** इति, अयमाशयः--न केवलं "नाम्नि" [ ३. २. १४४ ] इत्यादिसूत्रविषयेभ्योऽतिरिक्त आशीरर्थ एव किन्तु तदतिरिक्तोऽपि सादेशप्राप्तिविषय इति तत्रापि निषेधः स्यात्, यथा सपुत्रः सहपुत्रो वा आगत इत्यत्रागमनक्रियायां पुत्रसाहित्यविवक्षायां "सहस्य सोन्यार्थे" [ ३. १. १४३ ] इति सूत्रवैयर्थ्यं स्यादिति सूत्रारम्भसामर्थ्यादेवात्र न निषेध इति वाच्यम्, 'सगवे सवत्साय सहगवे सहवत्साय' इत्यादिप्रयोगेषु तत्सार्थक्यस्य जागरूकत्वात् । नन्वेवमाशिषीत्येतावदेवास्तु 'अगोवत्सहले' इति पर्युदासः परित्यज्यतामित्याह---**अगोवत्सहले इति किमि**ति---आशीरर्थे विवक्षितेऽपि एषूत्तरपदेषु निषेधो नेष्ट इति तद्व्यावृत्त्यर्थमगोवत्सहले इत्यप्यावश्यकमित्याह प्रत्युदाहरणेन---**स्वस्ति भवते सगवे सहगवे** इति । गवा सहितः सगौस्तस्मै-सगवे सहगवे इति, अत्र निषेधस्य पर्युदस्तत्वेन भवत्येव पाक्षिकः सादेश इति भावः, एवं-सहवत्सायेत्यादावपि व्यावृत्तिरूहनीयेति ॥३.२.१४८॥

## समानस्य धर्मादिषु ॥ ३.२.१४९ ॥

**त० प्र०---समानशब्दस्य धर्मादिषूत्तरपदेषु सादेशो भवति । समानो धर्मोऽस्य-सधर्मा, समानो वा धर्मः-सधर्मः; समाना जातिरस्य-सजातीयः, समानं नामास्य-सनामा, समानं नाम-सनाम । 'धर्म, जातीय, नामन्, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, ज्योतिष्, जनपद, रात्रि, नाभि, बन्धु, पक्ष, गन्ध, पिण्ड, देश, कर, लोहित, कुक्षि, वेणि' इति धर्मादयः, बहुवचनमाकृतिगणार्थम् ।**

**अन्ये तु-धर्मादिषु वचनान्तेषु नवसु विकल्पमिच्छन्ति-सधर्मा, समानधर्मा; सजातीयः, समानजातीयः; सनामा, समाननामा; सगोत्रः, समानगोत्रः; सरूपः, समानरूपः; सस्थानः, समानस्थानः, सवर्णः, समानवर्णः; सवयाः, समानवयाः; सवचनः, समानवचनः ।**

**अपरे तु-नामादिषु बन्धुपर्यन्तेषु द्वादशस्वेव समानस्य सभावं नित्यमिच्छन्ति, अन्येषु तु नेच्छन्त्येव; सधर्मसपक्षादिशब्दांस्तु सहशब्देन समानपर्यायेण कृतसादेशेन साधयन्ति, समानशब्दप्रयोगे तु-समानधर्मा, समानपक्षः, समानजातीय इत्याद्येव मन्यन्ते ।**

**कथं समानोदरे जातः-सोदर्यः ? समाने तीर्थे वसति-सतीर्थ्य इति ? "सोदर्य-समानोदर्यौ" (६. ३. १११.) इति, "सतीर्थ्यः" (६. ४. ७८.) इति च निपातनाद् भविष्यतः ॥ १४९ ॥**

**श० म० न्यासानुसन्धानम्-समान०** । 'स' इत्यनुवर्त्तते, धर्मादयश्चोत्तरपदविशेषणानि, तथा च योऽर्थः सम्पन्नस्तमाह---**समानशब्दस्ये**त्यादिना । **समानो धर्मोऽस्ये**ति---बहुव्रीहिसमासे सति समानस्य सादेशः, "द्विपदाद् धर्मादन्" [७. ३. १४१.] इत्यन्---**सधर्मे**ति । तत्पुरुषेऽपि भवतीत्याह-**समानो वा धर्मः** इति---"विशेषणं विशेष्येण०" [३. १. ९६.] इति समासः, अनेन सहस्य सादेशः । **समाना जातिरस्ये**ति---इदं प्रयोगार्थपरिचायकं वाक्यमात्रम्, व्युत्पत्तिस्तु समानशब्दाज्जातीयर् प्रत्ययः स्वार्थे, समानत्वं च जात्येति समानजातिक इत्यर्थो भवति । **अन्ये** तु समानां जातिमर्हतीत्यर्थे तद्धितार्थे समासे सति ईयप्रत्यये समानस्य सादेशे सजातीयशब्दं व्युत्पादयन्ति । **समानं नामास्ये**ति---बहुव्रीहिसमासः, अनेन सादेशः, तत्पुरुषेऽपि **समानं नामे**ति विग्रहे विशेषणसमासे, समानस्य सादेशे सति **सनाम** इति भवति । सर्वथा प्रयोगप्रदर्शनेन 'अन्यार्थेऽव्ययीभावे' इत्यनयोरसंबंधः सूचितः । धर्मादीन् पठति---**धर्म जातीय** इत्यादिना । "धर्मादौ" इत्येकवचनेन निर्देशे कर्तव्ये धर्मादिष्विति-बहुवचनेन निर्देशो व्यर्थ इत्याशङ्कायामाह---**बहुवचनमाकृतिगणार्थमि**ति---आकृत्या समानस्य सादेशनिमित्तभूतस्वरूपेणैव गण्यन्ते-परिचीयन्ते धर्मादय इति बोधनार्थमिति भावः ।



"Aho Shrutgyanam"

एतत्सूत्रविषये मतभेदस्य दृष्टतया तं ताटस्थ्येन बोधयति—**अन्ये तु धर्मादिषु वचनान्तेष्वि**ति—व्याकरणलक्षणप्रणेतॄणां लक्ष्यदर्शनपारवश्येन यैर्यथालक्ष्यदर्शनं कृतं तैस्तथासूत्राणि प्रणीतानि, तत्र स्वमते सर्वत्र नित्य एव सादेशो दृष्ट इति तथैव सूत्रितम्, यैस्तु धर्मादिषु नवसु विकल्पेन सादेशः प्रत्यक्षीकृतस्तैस्तथैव वचनमारब्धमिति भावः। तथा च तन्मतानुसारिप्रयोगानाह—**सधर्मा समानधर्मा** इत्यादिना। पाणिनीयमतमाह—**अपरे तु नामादिषु बन्धुपर्यन्तेष्वि**ति, तथाहि पाणिनीयं सूत्रम्—"ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु" [पा. सू. ६, ३. ८२.] इति, अत्र स्वगणपाठीयनामादयो बन्धुपर्यन्ता एव शब्दाः सन्निविष्टाः, तेषु परतो नित्यमेव सादेशो विधीयते, तदतिरिक्तेषु धर्मादिगणपठितशब्देषु समानस्य सभावं नेच्छन्ति। इत्थं च तेषां मते 'सधर्मा, सपक्षः, सजातीयः' इत्यादिप्रसिद्धप्रयोगाणामसिद्धौ सत्यां तदर्थं तैः प्रदर्श्यमानां युक्तिमाह—**सहशब्देन समानपर्यायेण कृतसादेशेने**ति, प्रयोगानुपूर्वी तदर्थश्च रक्षणीय इत्येतावन्मात्रमावश्यकम्, तत्र समानसहशब्दयोरैकार्थ्यं प्रसिद्धम्, सहस्य च सादेशोऽन्यपदार्थे सामान्येनानुशिष्टः, तथा च 'सधर्मा' इत्यादिप्रयोगाणां सिद्धौ बाधकाभाव इति भावः। नन्वस्तु सहशब्देन वाक्यरचनायां सधर्मेत्यादिप्रयोगसिद्धिः समानशब्देन वाक्यरचनायां च का गतिरिति चेदत्राह—**समानशब्दप्रयोगे त्वि**ति। यद्यपि वैयाकरणसिद्धान्तकौमुद्यां **दीक्षितेन** समानशब्दप्रयोगेऽपि सादेशः साधितः, तथाहि—समासाश्रयप्रकरणे तदीयो ग्रन्थः [ "समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु" पा. सू. ६. ३. ४३. इति सूत्रव्याख्यायाम् ] "समानस्य इति योगो विभज्यते, तेन सपक्षः, साधर्म्यं सजातीयमित्यादि सिद्धयतीति काशिका" इति। अयमाशयः—यद्यपि पक्षधर्मजातीयेषु स्वमते समानस्य सभावो न विधीयते, तथापि प्रदर्शितसूत्रे "समानस्य" इति योगः पृथक् क्रियते, सामान्येन समानस्य उत्तरपदे परे सादेशो विधीयते, पश्चात् "छन्दस्यमूर्धप्रभृत्युदर्केषु" इति सूत्रेण पूर्वयोगस्य क्वाचित्कत्वं विज्ञाप्यते, इति नानिष्टस्थले प्रवृत्तिरिति काशिकाकृतो मतमिति। काशिकेति कथनात् स्वमते तत्कृते समाधानान्तरमेवोचितं, न तु योगविभागरूपं समाधानं, योगविभागस्य भाष्येऽदृष्टत्वादित्यरुचिः सूचिता। तथा च समाधानान्तरमुक्तं, तत्रैव तेन पक्षान्तरतया "अथवा सहशब्दः सदृशवचनोऽप्यस्ति सदृशः सख्या ससखीति यथा, तेनायमस्वपदविग्रहो बहुव्रीहिः, समानः पक्षोऽस्य" इत्यादिना, अयमाशयः—सदृशः सख्येति विगृह्य ससखीत्यव्ययीभावसमासः सर्वैरेव साधुत्वेन व्यवहृतः, तत्र च सहशब्दस्यैवालौकिके विग्रहे प्रयोगस्तस्यैव सादेशः "अकालेऽव्ययीभावे" [ ३. २. १४६. ] इत्यनेन, सदृशसमानशब्दौ च सर्वसम्मतौ पर्यायशब्दौ सहशब्दस्य सदृशार्थत्वे च स्वीकृते समानार्थत्वं स्वीकृतमेवेति समानः पक्षोऽस्येति समानशब्देन लौकिकविग्रहे कृतेऽपि सहशब्देन सहालौकिकविग्रहमाश्रित्य समासे तस्य "सहस्य सोऽन्यार्थे" [ ३. २. १४३. ] इति सादेशे सम्भवति प्रयोगसिद्धिरिति। आस्तां मतान्तरचर्चा, स्वमतेऽपि **कैश्चन** प्रसिद्धाः शब्दाः कथं सेत्स्यन्ति, सोदर्यसतीर्थ्यशब्दौ च स्वमतेऽपि प्रसिद्धौ, अस्ति च तत्र समानशब्दस्य विग्रहवाक्ये प्रयोगः सर्वसम्मतः। न च तत्र प्रकृतसूत्रेणान्येन वा सादेशस्य प्राप्तिरिति शङ्कते—**कथं समानोदरे जातः सोदर्यः, समाने तीर्थे वसति—सतीर्थ्यः** इतीति। उत्तरयति—**सोदर्यसमानोदर्यावि**ति। अस्त्वन्येषां मतेऽत्र सादेशाप्राप्तिशङ्का, यैर्निपातनं न स्वीक्रियते, नवा तादृशस्थले सादेशविधिरारभ्यते, स्वमते तु निपातनादेव तत्र प्रथमे वैकल्पिको द्वितीये नित्यश्च सादेशः सिद्धः, तथाहि—समाने उदरे जात इत्यर्थे "सोदर्यसमानोदर्यौ" [६. ३. १११.] इति सूत्रेण यप्रत्ययसन्नियोगेन समानस्य वैकल्पिकः सादेशो निपात्यते; समाने तीर्थे गुरौ वसतीत्यर्थे च "सतीर्थ्यः" [६. ४. ७८.] इति सूत्रेण यप्रत्ययसन्नियोगेव समानस्य सादेशो निपात्यते, एवं चाञ्जसैव स्वमते तयोः सिद्धिः। पाणिनीये तु "तीर्थे ये" [पा० सू० ६. ३. ८७] "विभाषोदरे" [पा० सू० ६. ३. ८८.] इति सूत्राभ्यामेव तयोः सिद्धिराश्रिता। एवमन्यैरपि तदर्थमुपायान्तराण्याश्रितानीति नासिद्धिशङ्का तयोरिति ॥ ३. २. १४९ ॥

## सब्रह्मचारी ॥ ३. २. १५० ॥

**त० प्र०—सब्रह्मचारीति निपात्यते। समानो ब्रह्मचारी समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरतीति वा—सब्रह्मचारी, निपातनादेव व्रतशब्दस्यापि लोपः ॥ १५० ॥**

**श० म० न्यासानुसन्धानम्—सब्रह्म०।** यद्यपि समानस्य सादेशमात्रं प्रकृतप्रकरणविधेयं तथापि प्रकृतप्रयोगे

"Aho Shrutgyanam"

कार्यान्तरस्यापि लक्षणान्तराप्राप्तस्य विधित्सेति निपातनसूत्रमिदमारभ्यते। तदाशयं स्वयमेवाग्रे स्फोरयिष्यतीति विभज्यसूत्रार्थमनुक्त्वा निपातनपरत्वमेव सूत्रस्याह—**सब्रह्मचारीति निपात्यते** इति। प्रयोगं च द्विधा व्युत्पादयति—**समानो ब्रह्मचारी**ति—ब्रह्मचारिशब्दस्यान्यत्रापि साधनीयत्वेन प्रकृते सादेशमात्रस्य विधेयत्वमिति मतमाश्रित्येदम्, तथा च ब्रह्म आगमः, तदध्ययनार्थं व्रतमपि लक्षणया ब्रह्मैव, तच्चरतीति विग्रहे "व्रताऽऽभीक्ष्णे" [ ५. १. १५५ ] इति णिन्—ब्रह्मचारीति, समानो ब्रह्मचारीति विग्रहे विशेषणसमासेऽनेन समानस्य सादेशः। सादेशमात्रस्य प्रकृते विधेयत्वे धर्मादिष्वेव ब्रह्मचारिशब्दे पठितेऽपि प्रकृतप्रयोगसिद्धिरिति निपातनवैयर्थ्यमित्याशङ्क्य विग्रहान्तरमप्याह—**समाने ब्रह्मणि-आगमे गुरुकुले वा व्रतं चरती**ति—ब्रह्मणीत्यस्यार्थः—'आगमे' इति 'गुरुकुले' इति च, तथा च समान-ब्रह्म-व्रतेति शब्दद्वयात् परवर्त्तिनश्चरतेर्णिनपि निपातनलभ्य एव। व्रतशब्दलोपश्च निपातनमात्रसाध्य इत्याह—**निपातनादेव व्रतशब्दस्यापि लोपः** इति। एवं च सादेशविधानप्रसङ्गेन ब्रह्मचारिशब्दसिद्धिरपि प्रकृतसूत्रप्रयोजनम्, तदर्थमेव च निपातनाश्रयणम्, पूर्वोक्तं ब्रह्मपदस्य आगमाध्ययनार्थव्रतपरत्वं तु जघन्यवृत्तिलभ्यमिति तत्र नास्था कर्त्तव्येति भावः।

एतच्च "चरणे ब्रह्मचारिणि" [पा० सू० ६.३.८६] इति सूत्रस्थभाष्यकैयटादिग्रन्थेभ्योऽप्यवगम्यते, तथाहि—तत्र सूत्रे भाष्यकृता—"अत्र किं निपात्यते ? ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरेर्णिनिर्व्रतलोपश्च, ब्रह्मण्युपपदे समानपूर्वे कर्मणि चरेर्णिनिः प्रत्ययो व्रतलोपश्च निपात्यते—समाने ब्रह्मणि व्रतं चरतीति—सब्रह्मचारी" इत्युक्तम्। अत्र प्रकरणवशात् 'चरणे' [ शाखाध्यायिनि ] अभिधेये समानस्य 'सभावोऽनेन सूत्रेण विधेय इत्यायाति, तत्र निपातनस्यावश्यकता नास्तीति "किं निपात्यते" इति भाष्यकृत्प्रश्नेन—ब्रह्मणो [वेदस्य] ग्रन्थरूपत्वेन चर्यमाणताया असंभवात् चरणकर्मत्वमनुचितमिति ब्रह्मचारिशब्दासिद्धिरिति मत्वा तदंशे निपातनस्यावश्यकत्वमिति सूचितम्। तत्र यद्यपि ब्रह्मचारीत्यवयवस्यैव निपात्यत्वमायाति तथापि अवयवद्वारा विशिष्टेऽर्थे समुदायस्यैव साधुत्वमन्वाख्येयमिति तस्यैव निपात्यत्वेनोपन्यासः। अत्र व्रतलोपश्चेत्यनेन वृत्त्यैव व्रतार्थस्योक्तत्वात् तस्याप्रयोग इत्याशयः, ब्रह्मचारिणश्च तेन समानत्वं तदध्येयग्रन्थतुल्याध्येयत्वेन, एवं च समाने साधारणे ब्रह्मणि वेदे गुरौ वा यो व्रतं चरति स सब्रह्मचारीत्यर्थो लभ्यते। एवं च "ब्रह्म वेदस्तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारीति दीक्षितादिव्याख्या यथाकथंचित् पदार्थप्रतिपादनरूपा, न तु वस्तुस्थितिरिति॥ ३.२.१५०॥

## दृग्-दृश-दृक्षे ॥ ३. २. १५१ ॥

**त० प्र०—'दृश्, दृश, दृक्ष' इत्येतेषूत्तरपदेषु समानस्य सादेशो भवति। समान इव दृश्यते—सदृक्, सदृशः, सदृक्षः। दृश-दृक्षसाहचर्यात् टक्—सक्प्रत्ययसहचरितक्विबन्तस्यैव दृशो ग्रहणादिह न भवति—समाना दृक्-समानदृक् ॥ १५१ ॥**

**श० म० न्यासानुसन्धानम्—दृक्०** 'समानस्य सः' इति प्रकरणलभ्यम्, यद्यपि मध्ये निपातनपरसूत्रोपन्यासेन प्रकरणविच्छेदस्तथापि तत्रापि सादेशस्यैव प्राकरणिकत्वेन प्रकरणैक्यमविच्छिन्नमेव। दृक्दृश-दृक्षशब्दानां स्वातन्त्र्येण स्थितिर्नास्ति, "त्यदाद्यन्यसमानादुपमानात्०" [५. १. १५२ ] इति सूत्रेण त्यदाद्यादिषूपपदेषु सत्स्वेव क्विप्टक्सकानां विधानात्. तथापि प्रयोगस्थानामेवैतेषां शब्दानामिदमनुकरणमिति विज्ञेयम्। एते चोत्तरपदविशेषणानि, तदाह—**इत्येतेषूत्तरपदेष्वि**ति। **समान इव दृश्यते** इति—व्याप्ये [कर्मणि] प्रत्ययविधानात् कर्मणि विग्रहः, ये च कर्मणि प्रत्ययं न विदधति ते 'तमिवेमं पश्यन्ति जनाः' इत्यर्थे स इवायं पश्यति ज्ञानविषयो भवतीति कर्मकर्त्तरि प्रत्ययमाहुः। स्वमते च सूत्र एव व्याप्ये इति कथनादञ्जसैवार्थसंगतिरिति न क्लिष्टकल्पनाऽऽवश्यकता। 'समान इव 'दृश्यते' इति कथनं च "त्यदाद्यन्यसमानदुपमानात्०" [५. १. १५८ ] इति सूत्रस्थस्योपमानपदस्य सर्वत्रान्वयस्यौचित्यमनुरुध्य, अन्यथा समानशब्दस्याप्युपमानवाचित्वेन पुनरुपमानवाचिन इवशब्दस्य प्रयोगोऽनावश्यक एव, सदृशशब्दस्य समानत्वेन दृष्टिविषयतैवार्थो न तु समानत्वेनैव दृष्टिविषय इति। तथा च साम्यस्यापि तत्राभावो भासेत समान इव दृश्यते न तु वस्तुतः समान इति प्रतिपत्तेः, तथा च समानो दृश्यते इत्येव प्रयोगार्थः। अत्र विग्रहे क्विपि समानस्य सादेशे—**सदृक्** इति, टकि—**सदृशः** इति, सकि—**सदृक्ष** इति। दृक्शब्दः कर्मणिक्विपा कर्तरि करणे क्विपा च सम्भवति

"Aho Shrutgyanam"

तत्र कर्त्तरि करणे वा क्विपि निष्पन्ने दृक्शब्दे समानस्य सादेशो नेष्ट इति तदुपायमाह---**दृश-दृक्षसाहचर्यादि**ति, अयमाशयः---'दृशदृक्षशब्दौ च कर्मणि प्रत्यये सत्येव सम्पद्येते इति तत्सहचरितो दृक्शब्दोऽपि तत्सहचरितक्विप्प्रत्ययान्त एव ग्रहीतुमुचितः *सहचरिताऽसहचारितयोः सहचरितस्यैव* इति न्यायादिति कर्तृ-करणप्रत्ययान्ते दृक्शब्दे परतः समानस्य सादेशोऽनेन न भवतीति । क्वेत्याह---**समाना दृक् समानदृक्** इति---पश्यतीति-'दृक्' इतीन्द्रियाणां कर्तृत्वविवक्षायां, पश्यत्यनयेति-'दृक्' इति तेषां करणत्वस्यैव विवक्षायाम्, तत्र पूर्वस्मिन् विग्रहे बाहुलकात् कर्त्तरि क्विप् परत्र च "क्रुत्-संपदादिभ्यः क्विप्" [५. ३. ११४.] इति करणे क्विप् विशेषणसमासः, अत्र न भवति समानस्य सादेशः, "पुंवत् कर्मधारये" [ ३. २. ५७. ] इति पूर्वपदस्य पुंवद्भावे--समानदृगिति ॥३. २. १५१॥

## अन्यत्यदादेरा ॥ ३. २. १५२ ॥

**त० प्र०---अन्यशब्दस्य त्यदादेश्च दृक्-दृश-दृक्षेषूत्तरपदेषु आकारोन्तादेशो भवति । अन्य इव दृश्यते-अन्यादृक्, अन्यादृशः, अन्यादृक्षः; एवं-त्यादृक्, त्यादृशः, त्यादृक्षः; तादृक्, तादृशः, तादृक्षः; यादृक्, यादृशः, यादृक्षः; अमूदृक्, अमूदृशः, अमूदृक्षः; भवादृक्, भवादृशः, भवादृक्षः; त्वादृक्, त्वादृशः, त्वादृक्षः; मादृक्, मादृशः, मादृक्षः; एकादृक्, एकादृशः, एकादृक्षः; द्वादृक्, द्वादृशः, द्वादृक्षः; युष्मादृक्, युष्मादृशः, युष्मादृक्षः; अस्मादृक्, अस्मादृशः; अस्मादृक्षः । कथं यत्-परिमाणमस्य-यावान् ?, एवं-तावान् ?, एतावान् ? "यत्तदेतदो डावादिः" (७. १. १४९.) । इति डावतौ भविष्यति ॥ १५२ ॥**

**श० म० न्यासानुसन्धानम्---अन्य०** । पूर्वसूत्रमनुवर्त्तते, समानस्य स इति निवृत्तं विधेयोद्देश्ययोः कण्ठतो निर्देशात् तथा च सूत्रं व्याख्याति---**अन्यशब्दस्य त्यदादेश्चे**ति । **आकारोऽन्तादेशः** इति---"त्यदाद्यन्यसमानादुपमानात्" [ ५. १. १५२ ] इति क्विप्-टक्-सकः सर्वत्र, अनेन चाकारान्तादेशः । प्रकृतं विग्रहं सर्वत्रातिदिशति---**एवं त्यादृगित्या**दि । स्य इव दृश्यते---**त्यादृक्, त्यादृशः त्यादृक्षः** इति---अत्रान्त्यस्य दस्याकारे समानदीर्घेण रूपसिद्धिः । एवं-स इव दृश्यते-**तादृक्**-य इव दृश्यते-**यादृक्** । असाविव दृश्यते-**अमूदृगि**ति---अत्र चादसोऽन्त्यस्याकारादेशे समानदीर्घे सति "मोऽवर्णस्य" [ २. १. ४५. ] इति दकारस्य मादेशो "मादुवर्णोऽनु" [ २. १. ४८ ] इति उवर्णे-अमूदृगिति । भवानिव दृश्यते---**भवादृक्** । त्वमिव दृश्यते- **त्वादृक्** । अहमिव दृश्यते-**मादृक्** । एक इव दृश्यते--**एकादृक्** । द्वाविव दृश्यते--**द्वादृक्** । युवामिव यूयमिव वा दृश्यते इति द्विवचन-बहुवचनान्तेन विग्रहे तु "त्व-मौ प्रत्ययोत्तरपदे चैतस्मिन्" [२. १. १५] इति त्वादेशाभावात्---**युष्मादृगि**ति एवमावामिव वयमिव वा दृश्यते इति- विग्रहे---**अस्मादृगि**ति । अन्यैर्वैयाकरणैर्वतावप्याकारादेशो विधीयत इति 'यावान्' इत्यादिप्रयोगसिद्धिस्तेषां भवति, स्वमते च तथाविधानाभावात् कथं तेषां सिद्धिरित्याशङ्कते---**कथं यत् परिमाणस्य-यावानित्या**दि---अत्र आत्वं कथं भवति तद्विधानाभावादिति प्रश्नाशयः । समाधत्ते **"यत्तदेतदो डावादिः" [७ १. १४९ ] इति डावतौ भविष्यती**ति, अयमाशयः---नात्र त्यदादेशत्वमपि तु परिमाणार्थे 'यद्-तद्-एतद्' शब्देभ्यो डावतुप्रत्ययः, तत्र डित्वसामर्थ्यादन्त्यस्वरादिलोपे---यावानित्यादिरूपसिद्धिर्भवतीति नायं प्रकृतसूत्रविषय इति ॥ ३. २. १५२ ॥

## इदं किमीत् की । ३. २. १५३ ॥

**त० प्र०---इदंशब्दः किंशब्दश्च दृक्-दृश-दृक्षेषूत्तरपदेषु परेषु यथासंख्यमीकाररूपः कीकाररूपश्च भवति । अयमिव दृश्यते-ईदृक्, ईदृशः, ईदृक्षः; क इव दृश्यते-कीदृक्, कीदृशः; कीदृक्षः । कथं इदं किं वा परिमाणमस्य-इयान् ? कियान् ? "इदंकिमोऽतुरिय् किय्०" (७. १. १४८.) इति भविष्यति ॥ १५३ ॥**

**श० म० न्यासानुसन्धानम्---इदं०** । स्थान्यादेशयोः सामानाधिकरण्येन निर्देशः सर्वादेशत्वार्थः, तथा सति ईदादेशोऽपि सर्वस्यैव सम्पूर्णस्येदम एव स्थाने भवति, अन्यथा तस्यैकवर्णरूपत्वेन षष्ठीनिर्देशेऽन्त्यस्यैव विधिः स्यात्, 'की' आदेशस्तूभयथा सर्वादेश एवानेकवर्णत्वात् । तथा च सूत्रा-

"Aho Shrutgyanam"

र्थमाह—**इदं शब्दः किं शब्दश्चेति । अयमिव दृश्यत** इति—"त्यदाद्यन्यसमानात्०" [ ५. १. १५२ ] इति क्विबादयः । क्वचित् दृक्-दृश-दृक्षेभ्योऽन्यत्रापि इदं–किमोरादेशौ दृश्येते तयोः कथं सिद्धिरित्याशङ्कायामाह—**कथमिदं किं वा परिमाणमस्येति** । उत्तरयति–**"इदं-किमोऽतुरियू कियू०" इति**—नात्र ईत्-की आदेशावपि तु 'इयू कियू' देशाविति न प्रकृतसूत्रातिव्याप्तिरिति भावः ।।३.२.१५३।।

## अनञः क्त्वो यप् । ३. २. १५४ ।।

**त० प्र०—नञ्वर्जितादव्ययात् पूर्वपदाद् यत् परमुत्तरपदं तदवयवस्य क्त्वाप्रत्ययस्य यबादेशो भवति । प्रकृत्य, प्रहृत्य, उच्चैःकृत्य, नानाकृत्य । अनञ इति किम् ? अकृत्वा, अहृत्वा, परमकृत्वा; अनञ इति नञ्सदृशमव्ययं गृह्यत इति इह नञोऽनव्ययाच्च न भवति । उत्तरपदस्येत्येव–अलं कृत्वा, खलु कृत्वा ।। १५४ ।।**

**श० म० न्यासानुसन्धानम्—अनञः०** । 'उत्तरपदे' इत्यधिकृतं "न नाम्येकस्वरात् खित्युत्तरपदेऽमः—[३. २. ९.] इत्यतः, तत्सामर्थ्यात् पूर्वपदस्येति लभ्यते, इह चोत्तरपदस्यैव क्त्वान्तस्य कार्यः, एतच्च क्त्व इति षष्ठीनिर्देशाल्लभ्यते, तत्सामर्थ्याच्च अनञ इति पञ्चम्यन्तं दिग्योगलक्षणपञ्चम्या, ततश्चोत्तरपदसामर्थ्यलब्धस्य पूर्वपदस्यापि पञ्चम्यन्तत्वमेव सामानाधिकरण्यानुरोधात् । 'क्त्वः' इति षष्ठीनिर्देशसामर्थ्याच्च 'उत्तरपदे' इति सप्तम्यन्तं षष्ठ्यन्ततया विपरिणमति, क्त्वेति प्रत्ययः, तद्ग्रहणे तदन्तस्य ग्रहणं भवतीति नञ्भिन्नान्नञ्सदृशात् [ अव्ययात् ] पूर्वपदात् परस्य क्त्वान्तस्योत्तरपदस्य यप् भवति, स च निर्दिश्यमानन्यायेन क्त्व एव स्थाने इति सूत्रार्थः सम्पद्यते । तदेतत् सर्वं मनसिकृत्य सूत्रं व्याख्याति—**नञ्वर्जितादव्ययात् पूर्वपदादित्यादि**ना । **यत् परमुत्तरपदं तदवयवस्येति**—क्त्वान्तस्योत्तरपदस्येति न्यायलब्धेऽर्थे * निर्दिश्यमानस्यादेशा भवन्ति * इति न्यायेन निर्दिश्यमानस्य क्त्व एवादेशः, स चोत्तरपदावयवभूत एवेति फलितार्थकथनमिदम् । उदाहरति—**प्रकृत्य, प्रहृत्येति**—कृत्वा हृत्वेति क्त्वान्तम्, तस्य प्रशब्देन सह गतिसमासः, प्रशब्दश्चाव्ययं पूर्वपदम्, तस्मात् परं क्त्वान्तमुत्तरपदं कृत्वेत्यादि तदवयवस्य क्त्वो यबादेशः "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३.] इति तागमः । **उच्चैःकृत्येति**—"कृगोऽव्ययेनानिष्टोक्तौ क्त्वाणमौ" [५. ४. ८४.] इति क्त्वा, ङस्युक्तसमासः, अनेन क्त्वो यप् । **अनञ् इति किमिति**—"क्त्वो यप्" इत्येतावदेवोच्यताम्, पूर्वपदात् परस्य क्त्वान्तस्य यबादेशो विधीयताम्, तावतैव प्रकृत्येत्यादीनां सिद्धिरिति भावः । **अकृत्वेति**—अत्र न कृत्वेति विग्रहे नञ्समासः, अत्र पूर्वपदात् परत्वे सत्यपि न यबादेशो भवति, यदि 'अनञ्' इति न कथयिष्यते तर्हीहापि स्यादेवेति तद्वारणाय 'अनञः' इत्यावश्यकमिति भावः । किञ्च 'अनञः' इत्यस्याभावे पूर्वपदोपस्थापकाभावादसमासेऽपि स्यात् । यदि चोत्तरपदाधिकारात् पूर्वपदाक्षेप इत्युच्यते तदापि सर्वस्मात् पूर्वपदात् परस्य यबादेशः स्यादित्याह—**परमकृत्वेति**—परमं च तत् कृत्वेति विग्रहः ,'सन्महत्०" [३. १. १०७.] इति समासः । ननु च "कृत् सगतिकारकस्यापि [७. ४. ११७.] इति परिभाषया 'अनञः' इत्यस्याभावेऽपि पूर्वपदाक्षेपाभावेऽपि च प्रकृत्येत्यादौ कथंचित् स्यादपि परमकृत्वेत्यत्र कथं स्यात्, परमशब्दस्य गतित्वकारकत्वयोरभावादिति चेत् ? न 'अनञः' इति पर्युदासं कुर्वत आचार्यस्य "कृत् सगतिकारकस्यापि" [७. ४. ११७.] इति परिभाषा नेहोपतिष्ठते इत्याशयात् । ननु 'अनञः' इत्यस्य सत्त्वेऽपि परमकृत्वेत्यत्र कथं न यबादेशः, यतो नात्र नञः परं क्त्वान्तम्, अव्ययात् पूर्वपदादिति च वृत्तिवर्णितोऽर्थो न सूत्राक्षरलभ्य इति यबादेशोऽत्र दुर्वार इति चेदत्राह—**अनञ् इति नञ्सदृशमव्ययं गृह्यते** इत्यादि, अयमाशयः—* नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः * इति न्यायेन नञ्युक्तस्य पदस्य तदन्यतत्सदृशार्थवाचकत्वम्, नञ्भिन्नं नञ्सदृशं च पूर्वपदमव्ययमेवेति–अव्ययात् पूर्वपदात् परस्यैव क्त्वान्तस्य यबादेशो भविष्यति, परमकृत्वेत्यत्र परमपदं च नाव्ययमिति न भवति तत्र यबादेशः । तथा चानञ इत्यस्य नञोऽनव्ययाच्च परस्य क्त्वान्तस्य यबादेशनिषेधकत्वं पर्यवस्यतीत्याह—**नञोऽनव्ययाच्च** [ परस्य ] न भवतीति । ननु च नञोऽसत्त्वार्थकत्वेन तेन रूपेण सादृश्यग्रहणे धातुरेवासत्त्वार्थकः ततः परस्य क्त्वो यबादेशः स्यादिति कृत्वेत्यादावपि यबादेशापत्तिरिति चेन्न—क्त्व इति प्रत्ययोपस्थापकपदेनैव प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणात् धातोः

"Aho Shrutgyanam"

क्त्वान्त एवान्तर्भावात् तद्भिन्नमेव नञ्सदृशं ग्राह्यमिति, तच्चाव्ययमेवेत्यदोषात्, क्त्वाग्रहणेन हि धातुप्रत्ययसमुदायः परिगृह्यत इति धातोः स्वावयवत्वेन स्वावयवेन च सह पौर्वापर्यरूपसम्बन्धासंभवात् ततो भिन्नस्यैव नञ्सदृशस्य ग्रहीतुमौचित्याच्च। अनञोऽव्ययात् परस्य क्त्वान्तस्य यबित्यर्थेनैव सकलेष्टसिद्धाविहोत्तरपदसम्बन्धोऽनावश्यक इति शङ्कां मनसि निधायाह--**उत्तरपदस्येत्येवे**ति, अनञोऽव्ययात् परस्योत्तरपदभूतस्यैव क्त्वान्तस्य [ क्त्वो ] यबित्यर्थलाभार्थमुत्तरपदसम्बन्ध इहावश्यक एवेति भावः । कुत इति चेदत्राह--**अलं कृत्वा, खलु कृत्वे**ति--"निषेधेऽलंखल्वोः क्त्वा" [ ५. ४. ४४. ] इति क्त्वा, अत्र क्त्वाविधायकसूत्रेऽलं-खल्वोः सप्तम्योक्तत्वेन ङस्युक्तत्वाभावान्न ङस्युक्तसमास इति अलं-कृत्वाशब्दयोः, खलु-कृत्वाशब्दयोश्च पूर्वोत्तरपदत्वाभावः, नहि पूर्वमवस्थितं पदं पूर्वपदमुत्तरमवस्थितं पदमुत्तरपदमिति यौगिकी शक्तिः पूर्वोत्तरपदयोर्व्याकरणे समुपयुज्यतेऽपि तु पूर्वपदशब्दः समासप्रथमावयवे रूढ उत्तरपदशब्दश्च समासचरमावयवे रूढ इति प्रकृते समासाभावात् कृत्वेति क्त्वान्तस्य नोत्तरपदत्वमिति न भवति यबादेशः; उत्तरपदस्येत्यस्याभावे च स्यादेवेति तद्व्यावृत्त्यर्थं तदनुवृत्तिरवश्यं स्वीकार्येति भावः ॥ ३. २. १५४ ॥

## पृषोदरादयः। ३. २. १५५ ॥

त० प्र०--'पृषोदर' इत्येवंप्रकाराः शब्दा विहितलोपाऽऽगम-वर्णविकाराः शिष्टैः प्रयुज्यमानाः साधवो भवन्ति। पृषद्बुदरमुदरे वास्य-पृषोदरः, पृषत उदरं-पृषोदरम्, पृषत उद्वानं-पृषोद्वानम्, एवं-पृषोद्धारम्, अत्र तकारलोपो निपात्यते। जीवनस्य-जलस्य मूतः-पुटबन्धः-जीमूतः, अत्र वनस्य लोपः; वारिणो वाहको-बलाहकः, अत्र पूर्वपदस्य ब उत्तरपदादेश्च ल आदेशः; आध्यायन्ति तमिति-आढ्यः, अत्र ध्यस्य ढ्यादेशः; कृच्छ्रेण दास्यते नास्यते दभ्यते च खलि-दुष्टो दासो नासो दम्भ इति वा-दूडासः, दूणासः, दूडभः; दुष्टं ध्यायति-दूढ्यः, एषु पूर्वपदस्य दुसो दूभाव उत्तरपदादेश्च डत्व-णत्व-ढत्वानि दम्भेर्नलोपश्च; मह्यां रौति-मयूरः, रौतेरच्यन्तलोपो महीशब्दस्य मयूभावः; मह्यां शेते-महिषः, डः, अत्र पूर्वपदस्य ह्रस्वत्वं शस्य च षत्वम्; पिशितमश्नाति-पिशाचः, अत्र पिशितस्य पिशादेशः, अश्नातेः शस्य चादेशः; शवानां शयनं-श्मशानम्, पूर्वपदस्य श्मादेश उत्तरपदस्य च शानादेशः; ब्रुवन्तोऽस्यां सीदन्ति विषीदन्ति-बृसी अत्र डट् प्रत्ययः, पूर्वपदस्य बृभावः; ऊर्ध्वं खं बिलं वास्य-उदूखलम्, उलूखलं वा, अत्र पूर्वपदस्योदूभाव उलूभावश्च, उत्तरपदस्य खलादेशः; दिवि द्यौर्वौक एषां-दिवौकसः, अत्राकारागमः; अश्व इव तिष्ठति-अश्वत्थः; कपिरिव तिष्ठति कपयोऽस्मिंस्तिष्ठन्ति इति वा-कपित्थः; दधिन तिष्ठति-दधित्थः, मह्यां तिष्ठति-महित्थः, एषु तिष्ठतेः सकारस्य तकारः; मुहुः स्वनं लाति मुहुर्मुहुर्लसतीति वा-मुसलम्, अत्र मुहुःशब्दस्य मुभावः स्वनशब्दस्य सभावः, पक्षान्तरे-लसयोर्विपर्ययश्च; ऊर्ध्वौ कर्णावस्येति-उलूकः, अत्रोर्ध्वशब्दस्योलादेशः कर्णशब्दस्योकादेशश्च; मेहनस्य खं-मेहनखं, तस्य माला-मेखला, अत्र 'मेहनखे' हनस्य, मालाशब्दे च माशब्दस्य लोपः; कौ जीर्यति-कुञ्जरः, अत्र कुशब्दस्य मोऽन्तः; आश्वस्य विषमस्ति-आशीविषः, अत्राशुशब्दस्याशीभावः; बलं वर्षयति-बलीवर्दः, अत्र बलस्येकारोऽन्तादेशो वर्षषकारस्य च दकारः; मनस ईष्टे-मनीषी, अत्र मनसोऽन्त्यस्वरादिलोपः, ईशेः शस्य च षः; बिलं दारयतीति-बिडालः, अत्र बिलशब्दस्य ललोपः, उत्तरपदस्य च डालादेशः; मृदमालीयते डः-मृणालः, अत्र मृदो दकारस्य णकारः; असृगालीयते डः-सृगालः, अत्रादेर्लोपः; असृग्गिलति वा-सृगालः, अत्रासृग आद्यन्तलोपः; पुरो दाश्यते पुरोडाशः, अत्रोत्तरपदादेर्डत्वम्; अश्वस्याम्बा-वडवा, अत्राश्वस्याशो लोपः, ड् चान्तः, अम्बाशब्दे च मो लोपः; शकस्यान्धुः-शकन्धुः, अत्र पूर्वपदान्तस्योत्तरपदादेर्वा लोपः, एवं-कर्कन्धुः; अटतीत्यच्-अटा, कुलान्यटा-कुलटा; अव-अवाक् अटन्त्यस्मिन्निति बाहुलकात् "पुंनाम्नि" (५. ३. १३०.) इति घः, अवटः; हिनस्तीति-सिंहः, अत्र सकार-हकारयोर्विपर्ययः; कृतकेन शलति-कृकलासः, अत्र तकारस्य लोपः, शकारलकारयोस्तु विपर्ययः; भ्रमन् रौति डः-भ्रमरः, अत्र तलोपः; एवंप्रकाराः शिष्टैः प्रयुक्ताः पृषोदरादयः। मयूर-महिषादीनामुणादौ व्युत्पादितानामपीह व्युत्पादनमनेकधा शब्दव्युत्पत्तिज्ञापनार्थम्। बहुवचनमाकृतिगणार्थम्, तेन-मुहूर्तमारावधोऽश्वत्थामनिर्लयनीत्यादयोऽपि द्रष्टव्याः।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ १५५ ॥

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्—पृषो०** । अत्रादिशब्दो व्यवस्थावाची प्रकारवाची वेति संदेहमपाकर्तुमाह-**पृषोदर इत्येवं प्रकाराः** इति-आदिशब्दस्य प्रकारवाचित्वे हि गणे पठितेभ्योऽन्येऽप्येवंविधाः शिष्टप्रयुक्ताः शब्दाः पृषोदरादित्वेन बोद्धं शक्याः, व्यवस्थाचित्वे च तत्र स्यात् पृषोदरशब्दमाद्यवयवत्वेन निर्दिश्य पठितसमुदायान्तर्गतस्यैव पृषोदरादित्वेन ग्राह्यत्वापत्तेः । पृषोदरादय इत्यस्य बहुव्रीहित्वेनान्यपदार्थप्राधान्यादन्यपदार्थं इह क इत्याशङ्कापनोदायाह—**शब्दाः** इति—व्याकरणशास्त्रस्य शब्दसाधुत्वमात्रार्थकत्वेन शब्दानामेय सर्वथाऽत्रान्वाख्येयत्वमिति त एवेहान्यपदार्थतया ग्रहीतुमुचिता इति भावः । सूत्रस्य निपातनरूपत्वेन निपात्यविषयाणां च बहुत्वेन संक्षेपेण तेषां सङ्ग्रहमप्याह वृत्तौ—**विहितलोपा-ऽऽगम-वर्णविकाराः** इति-विहिताः कृताः, लोपश्चागमश्च वर्णविकारश्च—लोपागमवर्णविकारा येषु तथाभूताः एषु हि क्वचिल्लोपः-श्रूयमाणवर्णादर्शनम्, क्वचिदागमः—अश्रूयमाणवर्णादिप्रयोगः, वर्णविकारः—श्रूयमाणवर्णस्यैवान्यथाभाव इत्येवमादयो विषयाः शास्त्रान्तरेणाविहिता अपि साधुत्वेनान्वाख्यायन्त इति भावः । अविहितत्वेऽपि साधुत्वेनान्वाख्येयत्वे हेतुमाह—**शिष्टैः प्रयुज्यमानाः** इति—दिव्येन चक्षुषा प्रत्यक्षीकृतशब्दमर्यादाः शिष्टास्तैः प्रयुज्यमानाः स्वकीयतन्त्रेऽन्यतन्त्रे वाऽनन्वाख्याता अपि साधुत्वेन विज्ञेया इति भावः ।

शिष्टपदार्थविचारो भाष्यकृता सम्यक् प्रपञ्चितो व्याख्यातश्च कैयट-नागेशादिभिः "पृषोदरादीनि यथोपदिष्टम्" [पा० सू० ६. ३. १०९] इति सूत्रव्याख्यायाम् । तथाहि—के पुनः शिष्टाः ? वैयाकरणाः । कुत एतत् ? शास्त्रपूर्विका हि शिष्टिः, वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विका शिष्टिः, शिष्टिपूर्वकं च शास्त्रं, तदितरेतराश्रयं भवति, इतरेतराश्रयाणि कार्याणि च न प्रकल्पन्ते । एवं तर्हि निवासतश्चाचारतश्च । स चाचार आर्यावर्त्त एव । कः पुनरार्यावर्त्तः ? प्रागादर्शात् प्रत्यक्कालकवनाद् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । एतस्मिन्नार्यावर्त्त निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद् विद्यायाः पारंगतास्तत्रभवन्तः शिष्टाः" इति ।

अस्यायमर्थः—शिष्टशब्दः कृतशासनार्थकः, शासनं चेह प्रत्यासत्त्या व्याकरणशास्त्रमेवेति व्याकरणशास्त्रज्ञानवन्तो वैयाकरणा एवेह शिष्टपदेन विज्ञेयाः । यदि चात्र शिष्टपदप्रवृत्तिनिमित्तभूतशिष्टेः [शासनस्य] पृषोदरादिशास्त्ररूपशासनमूलकत्वेऽन्योन्यान्याश्रय इति कथ्यते तर्हि निवासविशेषाचारविशेषमूलकं शिष्टत्वं स्वीकार्यम्, तत्र निवासविशेष आर्यावर्त एव, आर्यावर्त्तदेशश्च यद्यपि मनुना—

"आ समुद्राच्च वै पूर्वादा समुद्राच्च पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्त्तं प्रचक्षते ॥"

इत्युक्तदिशा प्रतिपादितः, तथापि भाष्यकृताऽन्य एव तदवधिः प्रतिपादितः प्रागादर्शादित्यादिना, आदर्शः—कुरुक्षेत्रे पर्वतविशेषः, तस्मात् प्राक्-पूर्वां दिशमभिव्याप्य, कालकवनं—राजगिरिप्रदेशवनं तस्मात् प्रत्यक्—पश्चिमां दिशमभिव्याप्य, हिमवन्तं दक्षिणेन हिमवतो दक्षिणदिशमभिव्याप्य, पारियात्रं दक्षिणे [ हैदराबाद ] प्रदेशे स्थितात् पर्वतविशेषादुत्तरां दिशमभिव्याप्य स्थितो देश आर्यावर्त्तः कथ्यत इति भाष्याशयः । एवं च मनुना—

"हिमवद्विन्ध्ययोर्मध्ये यत् प्राग् विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥

इति रीत्या प्रदर्शितो मध्यदेश एवेहार्यावर्त्तत्वेन भाष्यकृता प्रतिपादितः । अत्र प्रदेशे निवसन्तो धनसंग्रहहीना-, लाभपूजादि दृष्टं कारणं विनैव सदाचारानुवर्त्तिनः, सदाचारानुष्ठानजनितान्तःकरणशुद्ध्याऽविद्यापगमाद् गुरूपदेशादिकं विनैव तपोबलेन प्रत्यक्षीकृतशब्दमर्यादा ये सन्ति त एव शिष्टास्त एव हि शब्दसाधुत्वपरिज्ञाने प्रमाणम् । तदुक्तं वाक्यपदीये—

"आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥"

इति, आविर्भूतप्रकाशानामिति—अविद्यापगमेन योगाभ्याससहकृतप्रत्यक्षेणाविर्भूतसर्वविषयज्ञानानामित्यर्थः । तत्र कारणमाह—अनुपप्लुतचेतसामिति—विहितकर्मानुष्ठानाच्छुद्धान्तःकरणानामित्यर्थः । अतीतानागतज्ञानं भूतभविष्यद्विषयकं विज्ञानं, प्रत्यक्षात्—विद्यमानवस्तुविषयास्मदादिप्रत्यक्षज्ञानात्, न विशिष्यते—नातिरिच्यते । अतीन्द्रियान्—बाह्येन्द्रियाग्राह्यान्-असंवेद्यान्, अन्यैर्मनसाऽप्यनुपलभ्यमानान् भावान्, ये आर्षेण योगाभ्याससहकृतेन दिव्येन चक्षुषा पश्यन्ति—प्रत्यक्षीकुर्वन्ति तेषां वचनं, अनुमानेन—

"Aho Shrutgyanam"

युक्त्यादिसहकृतेन शास्त्रेण न बाध्यते, अपि तु तेषामेव वचनं प्रमाणमिति भावः। अत्र पुनः शङ्कितं भाष्ये-"यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या शिष्टाः शक्या विज्ञातुम्? अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दास्तान् प्रयुञ्जानम्। स पश्यति नूनमस्य दैवानुग्रहः स्वभावो वा,-योऽयं न चाष्टाध्यायीमधीते, ये चास्या विहिताः शब्दास्तांश्च प्रयुङ्क्ते! नूनमयमन्यानपि जानाति" इति। एवमेषा शिष्टज्ञानार्थाऽष्टाध्यायी" इति।

अयमाशयः-"शिष्टानां शब्देषु प्रामाण्याङ्गीकारे शिष्टप्रयोगानुसारमेव साधुत्वं विज्ञायतामष्टाध्यायीरूपं शब्दानुशासनमनावश्यकमिति न भ्रमितव्यम्; शिष्टप्रयुक्तप्रयोगपरिज्ञानार्थमेवाष्टाध्याय्या आवश्यकत्वात्, ये शब्दाः शिष्टैः प्रयुक्तास्त एवेह संगृह्य प्रदर्शिताः। तत्र येऽवशिष्टास्ते च शिष्टप्रयोगानुसारं विज्ञेयाः। अनधीताष्टाध्यायिकान्-अष्टाध्यायीस्थप्रयोगानन्यानपि च निःशङ्कं प्रयुञ्जानानवलोक्य प्रतिपत्ता विचारयति यदनधीताष्टाध्यायिका अप्येते यथाऽष्टाध्यायीस्थप्रयोगान् साधु प्रयुञ्जते, तथाऽन्यानपि साधूनेवामी प्रयुञ्जते तेऽपि संग्राह्या एवास्माभिरिति। एवं चासंगृहीतप्रयोगविषयेऽपि शिष्टप्रयोगविज्ञानार्थमष्टाध्याय्या उपयोगः स्फुटः, अष्टाध्याय्यनध्ययनेऽपि तत्प्रयोगविज्ञानेन तेषां दैवानुग्रहं शिष्टत्वं च निर्णीय यानन्यानप्येते प्रयुञ्जते तेऽप्येते तथैव साधुत्वेन ज्ञाता इति कल्पनायाः संभवादिति।

एतदेव संक्षेपेणाह- **शिष्टैः प्रयुज्यमानाः साधवो भवन्तीति।**

अथ पृषोदरादीन् क्रमशो यथासंभवं व्युत्पादयन्नाह- **पृषदुदरमुदरे वा यस्येति**-'पृषत्' शब्दो बिन्दुवाची मृगविशेषवाची च "पृषत् पृषतवन्मृगे। बिन्दौ" इत्यनेकार्थसंग्रहे, तत्र पूर्वमर्थमादायेमे वाक्ये पृषदिवोदरमस्य, पृषत् उदरे यस्येत्यर्थके, उभयत्र बहुव्रीहिः, अनेन तकारलोपः। **पृषत उदरमिति** षष्ठीसमासे पृषच्छब्दो मृगविशेषवाची। यदि च मृगविशेषवाची पृषत् शब्दो न किन्तु 'पृषत' इत्यकारान्तोऽमरकोशादिभिस्तथैवोपलब्धेः, अभिधानचिन्तमणावपि मृगविशेषे यथा पृषतशब्दो दर्शितस्तथा न 'पृषत्' इत्युच्यते तर्हि षष्ठीसमासेऽपि पृषच्छब्दो बिन्दुवाच्येवास्तु तस्यापि मध्यभागस्य उदरसंज्ञासंभवात्। **पृषत उद्वानमिति**-उद्वानं-शोषणम्, षष्ठीसमासः, तकारलोपः। **पृषोद्वारमिति**-अत्रापि पृषत उद्धारमिति विग्रहे उत्पूर्वकात् धृग्धातोर्णिगि अचि सामान्ये नपुंसकमिति क्लीबता, अथवा वस्तुविशेषरूढान्येतानिपदानीति वाच्यार्थानुसारमेव लिङ्गम्। जीमूतशब्दं व्याचष्टे- **जीवनस्य जलस्येति**-जलनामसु जीवनशब्दस्यापि पाठात्, अपां प्राणधारणसाधनत्वाच्च जीवनशब्दस्य तत्र यौगिक्याः शक्तेरपि संभवात् **मूतः पुटबन्धः** इति-"मव बन्धने" इत्यस्य क्ते-मूत इति तस्यैवार्थः-पुटबन्ध इति, जीमूतशब्दवाच्यस्य मेघस्य जलपुटबन्धरूपत्वाद् योगार्थसंगतिरूह्या। प्रकृतसूत्रनिपात्यार्थमाह- **अत्र वनस्य लोपः** इति-जीवनशब्दावयवस्य वनशब्दस्य मूतशब्दे उत्तरपदे लोपोऽत्र विधीयत इति भावः। बलाहकशब्दं व्युत्पादयति- **वारिणो वाहकः**- इति-षष्ठीसमासः, प्रकृतगणविधेयमाह- **अत्र पूर्वपदस्य बः, उत्तरपदादेश्च लः** इति-वारिशब्दस्थाने 'ब' शब्द आदिश्यते, वाहकशब्दादिभूतस्य वकारस्य लकार इति भावः। आढ्यशब्दं विगृह्णाति **आध्यायन्ति तमिति**-आढ्यो धनिकः, स च सर्वैः स्मिर्यमाणत्वादाध्यानविषय इति योगार्थावगतिस्तत्र। आङ्पूर्वकाद् ध्यायतेः "स्थादिभ्यः कः" [ ५. ३. ८२. ] इति कः, आलोपः, अनेन धकारस्य ढकारः, एवं च ध्य इत्यस्य स्थाने ढ्यः प्रयुज्यते, तदाह- **अत्र ध्यस्य ढ्यादेशः। कृच्छ्रेण दास्यते** इत्यादि, दास्धातुर्दानार्थः, नास्धातुः शब्दार्थः, दम्भ्धातुश्छलार्थः, लोकवञ्चनार्थं कृतं कर्म दम्भ, एष्वर्थेषु दुरुपपदाद् दासेर्नासेर्दम्भेश्च खलि-दुर्दासः दुर्नासः दुर्दम्भ इति, विग्रहान्तरमाह- **दुष्टो दास** इत्यादिना, एवं-दुष्टं ध्यायति, दुःखेन वा ध्यायतीति विग्रहे दुरुपपदाद् ध्यायतेः "स्थादिभ्यः" [ ५. ३. ८२. ] इति कः, आलोपे-दुर्ध्य इति च प्राप्तेऽनेन कुत्र किं विधीयते, तदाह- **एषु पूर्वपदस्य दुस** इत्यादिना, पूर्वपदस्य सर्वत्रैकरूपत्वेन तस्यादेशेऽप्यैकरूप्यम्, उत्तरपदस्य भिन्नभिन्नतया विधेयभेदानाह- **उत्तरपदादेश्च डत्वणत्वढत्वानि दम्भेर्नलोपश्चेति**-अत्र न यथासंख्यमपि तु यथोचितमेव कार्यं विज्ञेयम्, तेन 'दूडास' इत्यत्र डत्वम्, 'दूणास' इत्यत्र णत्वं, 'दूडभ' इत्यत्र डत्वं दम्भेर्नलोपश्च 'दूढ्य' इति प्रयोगे च ढत्वमिति विवेकः। पाणिनीयतन्त्रे च 'दूडाशः, दूणाशः' इति शब्दौ तालव्योपान्त्यौ पठितौ, तथाहि- "पृषोदरादीनि यथोपदिष्टम् [ ६. ३. १० ] इति सूत्रे

"Aho Shrutgyanam"

वार्त्तिकम्---"दुरोदाश-नाशदभध्येषूत्वमुत्तरपदादेः षुत्वं च" इति । एवं च 'दूडाश' इत्यत्रवर्णभेदेऽपि नार्थभेदो दाश्-दासोरुभयोरपि दानार्थत्वाविशेषात्, 'दूणास' इत्यत्रैव भेदः, नासतेः शब्दार्थत्वात्, नश्यतेश्चादर्शनार्थत्वात् । श-सयोरैक्यमतेनोभयमप्युपपद्यते । मयूरशब्दं व्युत्पादयति--**मह्यां रौती**ति---पक्षित्वेऽपि तस्य बहुशो महीस्थितस्यैव केकारूपस्वशब्दकारित्वदर्शनाद् योगार्थसंगतिः, अत्र सप्तमीसमासः । प्रकृतगणविधेयकार्याण्याह-**रौतेरच्यन्तलोपो महीशब्दस्य मयूभावः** इति---रौतेरचि प्रत्यये सति उकारस्य लोपः, महीशब्दस्य स्थाने मयूशब्दस्य प्रयोग इति भावः । महिषशब्दं व्युत्पादयति---**मह्यां शेते** इति--यद्यपि पशूनां सर्वेषां मह्यामेव शयनं दृश्यते, तथापि महिषष्य प्रायोऽयं स्वभाव एव यत्---शीतलं भूमितलं दृष्ट्वा पङ्के वा स लुठति स्वपिति चेति योगार्थसंगतिः । निपात्यकार्याण्याह--- **अत्र पूर्वपदस्य ह्रस्वत्वं शस्य च षत्वमि**ति---शेतेर्डप्रत्यये ईकारलोपः, महीशब्देकारस्य ह्रस्वः, शस्य षत्वं चेतीह निपातनलभ्यमिति भावः । पिशाचशब्दं व्युत्पादयति--**पिशितमश्नाती**ति---पिशितं--मांसमश्नाति---भुङ्क्ते, मांसभोजित्वस्य बहुषु जीवेषु दर्शनेऽपि प्रकृतशब्दो भूतयोनिविशेषे रूढः, अश्नोतेरण् "कर्मणोऽण्" [ ५. १. ७२ ] इति सूत्रेण । गणपाठविधेयमाह-- **अत्र पिशितस्य पिशादेशोऽश्नातेः शस्य चादेशः** इति पिशितशब्दावयवस्येतशब्दस्य लोप एवं पिशितस्य स्थाने पिशादेशरूपः, शस्य च चरूप आदेशः । श्मशानशब्दं व्युत्पादयति---**शवानां शयनमि**ति---शेतेऽस्मिन्निति शयनम्, शेतेरधिकरणेऽनट्, श्मशानं हि शवानां शयनस्थानम्, शयनशब्देनेह स्थितिमात्रं लक्ष्यते, तत्रैव शवानां स्थितेः । शवशयनमित्यवस्थायां निपात्यमाह -**पूर्वपदस्य श्मादेश उत्तरपदस्य च शानादेशः** इति---शवशब्दस्थाने श्मशब्दस्य प्रयोगः शयनशब्दस्थाने च शानशब्दस्य प्रयोग इति भावः । वृसीशब्दं व्युत्पादयति **ब्रुवन्तोऽस्यां सीदन्ती**ति---ब्रुवन्तः शास्त्रपारायणपरायणास्तपस्विन ऋषयो वा, सीदन्तीत्यस्यार्थमाह--**विषीदन्ती**ति, एतत्स्थाने **'निषीदन्ति'** इति पाठः सम्यगाभाति, उपविशन्तीति च तदर्थः, "स्युरास्तेतूपविशति निषीदत्युपवेशने" इत्याख्यातचन्द्रिका, "वृषी-तु ऋषिविष्टरे" इत्यनेकार्थसंग्रहः, एतदर्थेशब्दस्वरूपभेदो-दृश्यते, प्रकृतवृत्तौ "वृसी" इति, अभिधानचिन्तामणिवृत्तौ तु "वृषी वृसी" इति, पाणिनीयेऽत्रगणे 'बृसी' इति च, तत्र बवयोः सषयोश्चैक्यमतमाश्रित्यत्रयमप्युपपद्यते । अत्र सदेरधिकरणे डट्प्रत्ययः । प्रकृतगणविधेयमाह-- **पूर्वपदस्य वृभावः** इति--पूर्वपदं 'ब्रुवत्' शब्दस्तस्य स्थाने 'वृ' इत्यादेशः, स्त्रीत्वस्य लोकसिद्धत्वान्ङीः । उदूखलशब्दं व्युत्पादयति---**ऊर्ध्वं खं बिलं यस्ये**ति---बहुव्रीहिसमासः, अयं शब्दोऽन्यथापि पठ्यते, तदाह--**उलूखलं वे**ति---कोषेषूभयथा पाठदर्शनात्, तथाहि---अमरकोशे द्वितीयकाण्डे वैश्यवर्गे "अयोऽग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम्" इति पठितम् । निपातनीयार्थमाह-- **अत्र पूर्वपदस्योदूभाव उलूभावश्च, उत्तरपदस्य खलादेशः** इति---यथादृष्टस्यैवानुशासनीयत्वेन यथारूपं तथैवादेशकल्पनेति एकत्रोर्ध्वशब्दस्योदूभावः परत्रोलूभावश्च; खलशब्दस्य चोभयत्रश्रवणादुत्तरपदादेशे भेदाभावः । दिवौकस्शब्दं साधयति---**दिवि द्यौर्वे**ति, पूर्वस्मिन् विग्रहे व्यधिकरणपदबहुव्रीह्याश्रयणमिति लाघवात् सामाधिकरण्येनैव विग्रह उचित इत्याशयवानाह---**द्यौर्वे**ति । बहुव्रीहिसमासे 'दिव् ओकस्' इति स्थितौ यद् विधेयं तदाह--**अत्राकारागमः** इति---पूर्वपदस्येति शेषः, पूर्वपदस्यान्तेऽकारागमे सति 'दिव-ओकस्' इत्यवस्थायां "ऐदौत् सन्ध्यक्षरैः" [ १. १. १२. ] इत्यौत्वम्, प्रथमाबहुवचने रूपं---दिवौकसः इति । अश्वत्थ कपित्थ-दधित्थमहित्थशब्दान् सरूपानेकदैव व्याख्यातुं क्रमशो विग्रहवाक्यान्याह---**अश्व इव तिष्ठती**ति---अश्वोपपदात् तिष्ठतेः कः, आकारलोपः तिष्ठतेः सकारस्य तकारो निपातनात्; अन्ये तु--न श्वश्चिरं तिष्ठति शाल्मलिवृक्षादिवदित्यश्वत्थ इति व्युत्पत्तिमाहुः, तेषां मते श्वसः सकारस्य तकारः । कपित्थशब्दविग्रहमाह—**कपिरिव तिष्ठती**ति--कप्युपपदात् तिष्ठतेः कः, सकारस्य तकारो निपातनात् । वृक्षस्य कपिसदृशस्थित्यसंभवात् विग्रहान्तरमाह-- **कपयोऽस्मिंस्तिष्ठन्ति वे**ति---प्रत्ययादिः पूर्ववत् । दधित्थशब्दं व्युत्पादयति **दध्नि तिष्ठती**ति--प्रत्ययादिः पूर्ववत् । दधित्थ-कपित्थौ पर्यायौ वृक्षविशेषवाचिनौ । महित्थशब्दं विगृह्णाति--**मह्यां तिष्ठती**ति--प्रत्ययादिः पूर्ववत्, महित्थशब्दोऽप्रसिद्धः । चतुर्ष्वपि निपात्यमाह-- **एषु तिष्ठतेः सकारस्य तकारः** इति, महित्थे पूर्वपदान्त्यस्य ह्रस्वोऽपि निपातनादेव । मुसलशब्दं द्विधा व्याख्याति---**मुहुः स्वनं लाति, मुहुर्मुहुर्लसतीति वा ।** उभयोरपि विग्रहयोः प्रकृतिभेदात् क्रमशो निपात्यमाह---**अत्र मुहुःशब्दस्ये**ति --मुहुःस्वनेत्युपपदात् लातेः कः, मुहुःशब्दस्थाने 'मु' आदेशः स्वनशब्द-



"Aho Shrutgyanam"

स्थाने स आदेश इति भावः, मुसलचालनसमये मुखात् स्वनविशेषस्यासकृन्निःसरणाद् योगार्थसंगतिः। द्वितीये विग्रहे मुहुरुपपदाल्लसतेरच्, लसतेर्लसयोर्विपर्यास इत्याह— **पक्षान्तरे लसयोर्विपर्ययश्चे**ति—अन्यः पक्षः—पक्षान्तरम्, मुहुः स्वनं लातीति विग्रहादन्यस्मिन् विग्रहे कृते इति भावः, स च विग्रहः मुहुर्लसतीतिरूपः। उलूकशब्दं व्युत्पादयति— **ऊर्ध्वौ कर्णौ यस्ये**ति—ऊर्ध्वकर्णशब्दयोर्बहुव्रीहिः। निपात्यमाह— **अत्रोर्ध्वशब्दस्योलादेशः कर्णशब्दस्योकादेशश्चे**ति—ऊर्ध्वशब्दस्य स्थाने 'ऊल्'शब्दस्य प्रयोगः कर्णशब्दस्य स्थाने 'ऊक'शब्दस्य प्रयोग इत्युभयोर्मेलनेनोलूकशब्दस्य सिद्धिः। **मेहनस्य खमि**ति—मेहनं मेढ्रं, तत्सम्बन्धि खमूर्ध्वप्रदेशः, खशब्दस्याकाशवाचकत्वेऽपि प्रकृते ऊर्ध्वप्रदेशमात्रवाचकत्वम्, तत्र स्थिता माला मालाकारा रसनारज्जुर्मेखलेत्युच्यते। अत्र षष्ठीसमासद्वयम्, ततो गणकार्यं यदिष्टं तदाह—**अत्र मेहनखे हनस्य मालाशब्दे च माशब्दस्य लोपः** इति—मेहनखस्य मालेति पश्चाद्भववाक्ये मेहनखेति पूर्वपदं मालेत्युत्तरपदमिति तत्र पूर्वपदे हनस्योत्तरपदे माशब्दस्य च लोप इति भावः। कुञ्जरशब्दस्य व्युत्पत्तिमाह—**कौ जीर्यती**ति—कौ—पृथिव्यां पतितं सत् जीर्यति जरां प्राप्नोति—म्रियते चेति भावः, जीर्यतेरच्, सप्तमीसमासः, गणपाठात् कुशब्दस्यान्ते मागमश्चेत्याह— **अत्र कुशब्दस्य मोऽन्तः** इति। आशीविषं विगृह्णाति—**आश्वस्य विषमस्ती**ति—आशुविषशब्दयोर्बहुव्रीहिसमासः। गणकार्यमाह—**आशुशब्दस्याशीभावः** इति—आशुशब्दस्थाने आशीशब्द आदेश इति भावः। आशीविषशब्दमन्येऽन्यथापि व्युत्पादयन्ति—आश्यतीत्यचि गौरादित्वान्ङ्यामाशीति दंष्ट्रानाम, आश्यां विषमस्येति विग्रहे बहुव्रीहिः, अत्र चार्थे न निपातनमावश्यकमिति विग्रहान्तरमप्याहुः—आशिषि विषमस्येति, आशीरपि द्रंष्ट्रैव, अत्र निपातनाद्रेफस्य लोपः, अन्यथा 'आशीर्विषः' इति प्रयोगः स्यात्। बलीवर्दशब्दं साधयति—**बलं वर्धयती**ति—बलमिति कर्मणः पराद् वर्धेरण्। गणकार्यमाह—**बलशब्दस्येकारोऽन्तादेशः** इति—बलशब्दाकारस्य स्थाने ईकारः, वर्धशब्दीयधकारस्य दकारादेशे सति बलीवर्दशब्दनिष्पत्तिरिति भावः। मनीषिशब्दं साधयति—**मनस ईष्टे** इति—मनउपपदादीशेर्णिन् बाहुलकात्, गणकार्यमाह—**अत्र मनसोऽन्त्यस्वरादिलोपः, ईशेः शस्य षः** इति—मनस्शब्दीयस्य 'अस्' भागस्य लोपः, ईशधातोस्तालव्यशस्य स्थाने मूर्धन्यः ष आदेश इति भावः। अन्ये तु मनस ईषा—अबाधिता गतिः—मनीषा बुद्धिः, साऽस्त्यस्येति मनीषीति व्युत्पत्तिमाहुः, तत्र ईषेति ईष्धातोर्भिदादित्वादङ् "क्तेटो गुरोः" [ ५. ३. १०६. ] इति वा अः, पृषोदरादित्वात् [ तन्मते शकन्ध्वादित्वात् ] अस्भागस्य लोपः, मत्वर्थीय इन्, मनीषाशब्दः स्वमतेऽपि व्युत्पाद्य एवेति प्रकृतप्रकारेण मनीषिशब्दसिद्धिः स्वमतेऽपि सम्भाव्यते यद्यपि तथापि व्युत्पत्तिसौकर्यमर्थानुकूल्यं चाश्रित्य मनस ईष्टे इति व्युत्पत्तिराश्रितेति विज्ञेयम्। बिडालशब्दं व्युत्पादयति—**बिलं दारयती**ति—बिलमिति कर्मणः पराद् दारयतेरण्। गणकार्यमाह—**बिलशब्दस्य ललोपः, उत्तरपदस्य डालादेशः** इति—बिलशब्दावयवस्य 'ल' शब्दस्य लोपो दारेत्युत्तरपदस्य स्थाने डालेति शब्दश्च इति भावः। मृणालशब्दमाह—**मृदमालीयते** इति—मृदमाश्लेषयतीत्यर्थः, मृदुपपदादाङ्पूर्वकाल्लीयतेर्डः, अन्त्यस्वरादिलोपः। गणकार्यमाह—**अत्र मृदो दकारस्य णकारः** इति। अन्ये तु मृण्धातोः कालनि सति साधयन्ति। सृगालशब्दमाह— **असृगालीयते** इति—असृगिति द्वितीयान्तम्, असृक्शब्दः शोणितवाची; तदुपपदादाङ्पूर्वकाल्लीयतेर्डः, आदेरकारस्य लोपः, तदाह—**अत्रादेर्लोपः** इति—अन्यथापि सृगालशब्दं व्युत्पादयति—**असृग् गलति वे**ति—"गल चर्व अदने" इति पाठाद् गलधातुर्भक्षणार्थोऽपि शोणितं भक्षयतीत्यर्थः, तथा च असृगुपपदात् गलेरणि 'असृज् गाल' इति स्थितौ गणकार्यमाह—**अत्रासृज आद्यन्तलोपः** इति—अकारस्य जकारस्य च लोप इति भावः। शृगाल इति तालव्यादिरपि श्रूयते, तत्रापि व्युत्पत्तिरियमेव, गणपाठादेव दन्त्यस्य स्थाने तालव्यस्य प्रयोगः। पुरोडाशशब्दं व्युत्पादयति—**पुरो दाश्यते** इति—पुरोऽग्रे पूर्वं वा दीयत इत्यर्थः, पुरउपपदाद् दाशतेः कर्मणि घञ्। निपात्यं कार्यमाह—**अत्रोत्तरपदादेरि**ति—उत्तरपदं दाश इति तदादेर्दस्य स्थाने ड इति भावः। वडवाशब्दमाह—**अश्वस्याम्बे**ति—षष्ठीसमासे सति अश्वाम्बाशब्दे पूर्वपदस्याश्वशब्दस्याशो लोपे वकारमात्रावशेषेऽन्त्यस्य डकार आगमः, अम्बाशब्दे च मकारस्य लोपो बकारस्य वकारादेशश्च, तदाह—**अत्राश्वस्याशो लोपः** इति—अत्र बकारस्य स्थाने वकारादेशो नोल्लिखितस्तथापि स विज्ञेय एव, वडवाशब्दस्यान्तःस्थोपान्त्यत्वात्, अम्बाशब्दस्य च वर्गीयोपान्त्यत्वात्। अन्ये च बलं वातीति विगृह्य बलोपपदाद् वातेर्डप्रत्यये 'बडवा'—शब्दमाहुः। शकन्धुशब्दं साधयति—**शकस्या-**

"Aho Shrutgyanam"

**न्धुरिति**—शकस्य राजविशेषस्यापत्यं शकः, शकशब्दादपत्यार्थे विहितस्य द्विस्वरनिमित्तस्याणो द्रिसंज्ञकस्य "शकादिभ्यो द्रेर्लुप्" [ ६. १. १२०. ] इति लुप्, शक इति, तस्यान्धुः कूपः-**शकन्धुः** । अन्ये तु शकानां राजविशेषाणां निवासो जनपदः—शकाः, तेषामन्धुरिति देशविशेषपरत्वेन शकशब्दस्यात्र स्थितिमाहुः । अत्र निपात्यमाह—**पूर्वपदान्तस्योत्तरपदादेर्वा लोपः** इति–पूर्वपदं शक शब्दस्तस्यान्ते स्थितस्याकारस्य, अन्धुशब्द उत्तरपदं तदादौ स्थितस्य वाऽकारस्य लोप इत्यर्थः, उभयोरकारयोः सत्त्वे हि समानदीर्घः स्यादित्येकस्य लोप आवश्यक इति विनिगमनाविरहादुभयोरपि पाक्षिको लोपोऽवगन्तव्य इत्यर्थः । उक्तं कार्यमन्यत्राप्यतिदिशति—**एवं कर्कन्धुरिति**–यथा शकन्धुरित्यत्र विग्रहादिकमुक्तं तथा कर्कन्धुरित्यत्रापि विज्ञेयमित्यर्थः, तत्र कर्कशब्दो राजविशेषपर इति परे, स्वमते च किमपि विशिष्य नोक्तमिति राजविशेषपरत्वेऽपि देशविशेषपरत्वेऽपि वा न क्षतिः, केवलं रूढया देशविशेषपरत्वे बहुवचनान्तत्वमेव युक्तं, कर्काणां राजविशेषाणां निवासो जनपद इति विग्रहे कर्का इत्यस्यैव युक्तत्वात्, राजविशेषपरत्वे च कर्कस्यान्धुरित्येकवचनान्तेन कर्काणामन्धुरिति बहुवचनान्तेन च विग्रहे कामचारः । कुलटाशब्दं व्युत्पादयितुमाह—**अटतीत्यच्–अटा** इति–अट्धातोर्गत्यर्थादचि कृते स्त्रियामटेति रूपम् । **कुलानामटेति**—कर्मणि षष्ठी, बहुकुलकर्मकगमनशीलेति तदर्थः, अत्र षष्ठीसमासे पूर्वपदान्तस्य उत्तरपदादेर्वाऽकारस्य लोपः, अस्याश्च प्रक्रियायाः शकन्धुशब्देऽभिहितत्वान्न पुनरुक्तिः, यदि च कुलान्यटतीति सहैव विग्रहः करिष्यते तर्हि 'कुलाटी' इति स्यात्, कर्मोपपदत्वादणापत्तेः, अत एव अटेति पृथगेव संसाधितम् । अवटशब्दं साधयति—**अव–अवागिति**–अत्र वृत्तौ–'अव्' इति व्यञ्जनान्तः पाठः समुपलब्धः, स च नोचितः, अवेति स्वरान्तस्यैवोपसर्गस्य धातुना सम्प्रयोगात्, तदर्थस्यैवावाक्शब्देनोच्यमानत्वात् अवाक्शब्दस्यैव वा अवादेशो वृत्तौ, तथा सति तस्य [अवशब्दस्य] विग्रहवाक्ये प्रयोगानौचित्यमेव । **अटन्त्यस्मिन्निति बाहुलकादिति**–अट्धातोः केवलस्य घान्तस्य पुंनाम्नि प्रयोगाभावः, सोपपदाच्च घप्रत्ययविधानाभाव इति बाहुलकाश्रयणे नैव घप्रत्ययसंभव इति भावः, अत्रावागित्यर्थे अव इति–प्रादिपठितस्य पूर्वपदस्य अन्ते योऽकारस्तस्य, 'अटः' इत्यस्यादिर्वा योऽकारस्तस्य वा लोपः । **अवटो गर्तः** । अभिधानचिन्तामणिवृत्तौ तु—अवटस्तस्मादवटः, "दिव्यवि०" [ उ पा० १४२ ] इत्यटः । न वटतीति वा अवाक् अटति अस्मिन् बाहुलकात् "पुंनाम्नि०" [ ५. ३. १३० ] इति घे पृषोदरादित्वात् साधुरिति । सिंहशब्दं व्युत्पादयति—**हिनस्तीति सिंह** इति । हिंस्धातोरचि सति गणकार्यमाह—**अत्र हकारसकारयोर्विपर्ययः** इति—आदिभूतो हकारः सकारत्वेन विपरीतः, अन्त्यसकारश्च हकारत्वेनेति । अत्र यद्यपि उत्तरपदाधिकारस्थं सूत्रमिदमिति सम्भावितोत्तरपदके समासे एवास्य प्रवृत्तिरुचितेत्येकपदकमिदमुदाहरणं नोचितमिति प्रतिभाति, तथापि गणपाठसामर्थ्यात् क्वचिदसमासेऽपि प्रवृत्तिरिति स्वीकार्यमिति न दोषः । अथवोणादित्वेन बाहुलकादपि सिंहादिशब्दानां सिद्धौ सत्यामपि प्रकृतगणपाठेनापि सिद्धिः सम्भवतीति सम्भवप्रदर्शनार्थमेवेदम् । यद्यपि—

"भवेद् वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम् ॥

इति प्राचां कारिकारीत्या हंससिंहादिशब्दानामपि प्रकृतगणे पाठादेव सिद्धिरित्यायाति, तथापि तत्र हंस-सिंहशब्दयोर्दृष्टान्तत्वेनैवोपन्यास इति तद्व्याख्यातार इति सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिनीकृत्, तस्यायमाशयः—प्रकृतसूत्रे गणे समासा एव पाठ्या उत्तरपदाधिकारस्थत्वेनोत्तरपदस्य समास एवोपलब्धेः । एवं च कारिकायां हंससिंहशब्दयोर्दृष्टान्तत्वेनैवोपन्यासो युक्तः । यथा वर्णागमात्–हस्धातोरचि मकाररूपवर्णस्यागमाद्धंसशब्दस्य सिद्धिः, यथा वा–हिंस्धातोरचि वर्णविपर्ययेण सिद्धिः, तथा गूढ आत्मा यस्येत्यर्थे आत्मशब्दाकारस्य स्थाने उकाररूपवर्णविकारात् गूढोत्माशब्दस्य, पृषत्–उदरमित्यवस्थायां तकारनाशात् पृषोदरशब्दस्य च सिद्धिरिति तदर्थात् । एवं च समास एव प्रकृतसूत्रं प्रवर्त्तत इति नियमे न कोऽपि दोष इति । कृकलाशशब्दमाह—**कृतकेन शलतीति**—कृतकशब्दस्य हेतुतृतीयान्तस्य ज्वलादित्वेन णान्तेन शालशब्देन सह समासः । गणकार्यमाह—**अत्र तकारस्य लोपः** इत्यादिना, कृतकशब्दमध्यस्थितस्य तकारस्य लोपः शकार-लकारयोर्विपर्यासो वैपरीत्येन स्थितिः । भ्रमरशब्दं साधयति—**भ्रमन् रौतीति**—भ्रमदुपपदात् रौतेर्बाहुलकादेव डः, डित्वादुकारलोपः । गणकार्यमाह—**अत्र तलोप** इति—'भ्रमत्' इति शतृप्रत्ययान्तस्यान्ते तकारस्य लोप इत्यर्थः । गणेपठितान् यथोचितं व्युत्पाद्योपसंहरति—**एवंप्रकाराः**

"Aho Shrutgyanam"

**शिष्टैः प्रयुक्ताः** इति—न केवलं पृषोदरादिगणे पठिता एव पृषोदरादयः, एवंभूता अन्येऽपि शिष्टप्रयोगविषयभूताः शब्दाः पृषोदरादयोऽवगन्तव्याइति भावः। मयूर-महिष-सिंहादिशब्दा उणादिष्वपि व्युत्पादिता इतीहान्यथाव्युत्पादनं किमर्थमित्याशङ्कायामाह— **मयूरमहिषादीनामि**ति, रूढानां शब्दानां प्रकृति-प्रत्ययाद्यर्थप्रतीतौ तात्पर्याभावेन यथाकथंचिच्छास्त्रशिष्टत्वज्ञापनार्थमेव तद्व्युत्पादनमिति तत्रेयमेव व्युत्पत्तिर्निश्चितेति नाग्रह इति बोधनार्थमेवेह तेषां व्युत्पादनमिति भावः। पृषोदरादिरित्येकवचनेन निर्देशे एव गणनिर्देशस्य लाभेन बहुवचनान्तपाठो व्यर्थइति चेदत्राह— **बहुवचनमाकृतिगणार्थमि**ति—एवं प्रकाराः पृषोदरादय आकृत्यैव गणनीया न तु तेषां पाठविशेषान्तर्गतत्वमेवेति नियम इति भावः। आकृतिगणत्वफलमाह— **तेन मुहूर्त्तमारग्वधोऽश्वत्थाम निर्लयनीत्यादयोऽपि द्रष्टव्या** इति—आकृतिगणत्वेन मुहूर्त्तादिशब्दा गणे अपठिता अपि तदन्तर्गतत्वेन विज्ञेया इत्यर्थः। तत्र 'मुहुरियर्त्ति स्म' इत्यर्थे मुहुरूपपदादियर्त्तेः "गत्यर्थाकर्मक" [५.१.११.] इति कर्त्तरि क्तः, धातोर्लोपः, मुहुरित्युपान्त्योकारस्य दीर्घो गणपाठात्। **अन्ये** च—"हुर्छधातोर्मुहूर्त्तं साधयन्ति, कुटिलगत्यर्थत्वेन कर्तरि क्तः, धातोरादौ 'मु' आगमः, छकारस्य तकारश्च निपातनात्" इत्याहुः। **मुहूर्त्त**शब्दश्च द्वादशक्षणमिते काले पञ्चदशधा विभक्तस्य दिनस्य पञ्चदशभागे, किञ्चिन्न्यूनाधिकघटिकाद्वयमिते काले च रूढः। 'आराद् वध्यते' इत्यर्थे कः, आरादित्यस्योपान्त्यह्रस्वः, तस्य च गः, **आरग्वधो** वृक्षविशेषः। **अन्ये** च आङ्पूर्वकात् 'रग' धातोः शङ्कार्थात् क्विप् आरग्—रोगशङ्का, 'आरगं हन्ति' इत्यर्थे अच्, हन्तेर्वधादेशे सति आरग्वधं साधयन्ति। अश्व इव तिष्ठतीत्यर्थे अश्वोपपदात् तिष्ठतेर्मन् सकारस्य तकारो निपातनात्— **अश्वत्थामे**ति द्रोणपुत्रस्य संज्ञा। निलीयतेऽस्यामित्यर्थे नीत्युपपदाल्लीयतेरनट् निपातनाद्रागमः, **निर्लयनीति** सर्पत्वचो नाम। एवमादयोऽपि पृषोदरादीनामाकृतिगणत्वादेव सिद्धा इति भावः। व्याकरणेन शब्दनिर्वचनं क्रियते, विशेषतश्च निपातनपरलक्षणैर्यथाकथंचिदस्य शब्दस्य निष्पत्तिः स्यात् तथा साधुत्वमवधार्यमित्यनुशास्यते, तत्र शब्दनिर्वचनप्रसङ्गे किं किं विधेयं भवतीति प्राचामुक्त्या प्रकाशयन् सूत्रव्याख्यामुपसंहरति— **वर्णागमो वर्णविपर्ययश्चे**त्यादिना, वर्णागमस्योदाहरणम्—हंस इति, वर्णविपर्ययस्य—सिंह इति, वर्णविकारस्य—अश्वत्थ इति, वर्णनाशस्य—पृषोदरमिति। न केवलं शब्दविषयककार्येणैव शब्दनिरुक्तिरपि तु अर्थविषयकार्येणापि शब्दनिरुक्तिरित्याह— **धातोस्तदर्थातिशयेन योग** इति—तस्य-धातोरर्थस्तदर्थः, धातुपाठपठितो धातुवाच्योऽर्थस्तस्यातिशयेन— माधुर्यादिरूपेण योगः सम्बन्धः प्रकृते उपस्थितिस्तेनापि शब्दस्य निर्वचनं भवतीति चतुर्विधशाब्दिकपरिवर्त्तनेन सहैकविधार्थपरिवर्त्तनेन निरुक्तस्य शब्दनिर्वचनस्य पञ्चविधत्वं सिद्धम्। तथा च शब्दानां नित्यत्वेऽपि तदर्थपरिज्ञानाय शाब्दिकैरेवंप्रकारा उपाया आश्रीयन्त इति भावः॥ ३.२.१५५॥

---

## वाऽवाऽप्योस्तनि-क्रीधाग्-नह्योर्व-पी॥ ३.२.१५६॥

**त० प्र०—अवशब्दस्योपसर्गस्य तनि-क्रीणात्योः परयोरपिशब्दस्य च धाग्नह्योः परयोर्यथासंख्यं 'व पि' इत्येतावादेशौ वा भवतः। वतंसः, अवतंसः; वक्रयः, अवक्रयः; पिहितम्, अपिहितम्; पिधानम्, अपिधानम्; पिदधाति, अपिदधाति; पिनद्धम्, अपिनद्धम्। धातुनियमं नेच्छन्त्येके। पृषोदरादिप्रपञ्च एषः, तेन-शिष्टप्रयोगोऽनुसरणीयः॥१५६॥**

**इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनतत्त्वप्रकाशिकावृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः समाप्तः॥ ३-२॥**

---

**श्रीमद्वल्लभराजस्य प्रतापः कोऽपि दुःसहः।**
**प्रसरन् वैरिभूपेषु दीर्घनिद्रामकल्पयत ॥ १०॥**

**श० म० न्यासानुसन्धानम्— वावाप्यो०**। 'वा अवाप्योः तनिक्री-धाग्नह्योः वपी इति पदच्छेदः, तत्रावाप्योरिति द्वन्द्वनिर्दिष्टयोरव-अपीति प्राद्योः क्रमेण तनि-क्रीभ्यां च सम्बन्धो व्याख्यानात् व-पीत्यादेशयोश्च यथासंख्यं ताभ्यां सम्बन्धः, तथा च सूत्रार्थमाह—**अवशब्दस्योपसर्गस्य तनिक्रीणात्योरि**ति—तथा चावस्य तनि-क्रीणात्योः परतो व आदेशः, अपेः धाग्-नह्योः परतः पि आदेश इति फलति।

"Aho Shrutgyanam"

तथा चोदाहरति— **वतंसः, अवतंसः** इत्यादिना, अवपूर्वकात् तनोतेः सन् औणादिकः, अवस्य पाक्षिको वकारादेशः । **वक्रयः, अवक्रयः** क्रीणातेर्भावे अच्-क्रय इति, अवेत्युपसर्गस्य वा वादेशः । **पिहितम् अपिहितमि**ति—अपिपूर्वकाद् दधातेः क्ते धातोर्हि आदेशे हितमिति, पाक्षिकेऽपेः 'पि' आदेशे रूपद्वयम् । **पिधानम्, अपिधानमि**ति—दधातेरपि पूर्वकस्यानटि रूपम्, **पिदधाति, अपिदधाती**ति वर्त्तमानायां तवि रूपे । **पिनद्धम्, अपिनद्धमि**ति नह्यतेरपिपूर्वकस्य ते रूपे । मतान्तरमाह— **धातुनियमं नेच्छन्त्येके** इति तथाहि भागु-रिराचार्य आह—"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।" इति—तत्र हि तेन धातुविशेषपरत्वं नाश्रितम्, तथाहि—'वगाहः, अवगाहः' इत्याद्यपि तदुदाहरणत्वेन दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यामुक्तम्, अनेन सूत्रेणावाप्योरुपसर्गयोरादिवर्णस्य नाशः क्रियते, स एव च वादेशत्वेन प्यादेशत्वेन च कथ्यते इति पृषोदरादेराकृतिगणत्वेनैव तत्कार्यसिद्धिरिति सूत्रस्यास्य वैयर्थ्यमित्याशङ्कां हृदि निधायाह— **पृषोदरादिप्रपञ्च** एष इति—" पृषोदरादयः" इति पूर्वोक्तसूत्रस्यैव विषयोऽनेन विस्तरेण प्रतिपादित इति तत्सूत्रप्रतिपाद्यविषयस्यैव प्रपञ्चरूपत्वेनास्य नापूर्वविधायकत्वमपि तु तत्पूरकत्वमेवेति भावः । किञ्च—धातुविशेषनियमस्यापि सूत्रोक्तस्य तथा सति नादर इति येऽन्येऽपि शिष्टप्रयोगा वगाहादयस्तेऽपि प्रकृतसूत्रेण साधनीया एवेति न परमतेन सह भेदो नवा त्रुटिरिति 'एके' इत्यनेन प्रतिपादितस्य मतस्यापि संग्रह इत्याशयवानाह— **तेन शिष्टप्रयोगोऽनुसरणीय** इति—शिष्टानां प्रयोगा वगाहादयस्तेऽपि स्वमते साधुत्वेन विज्ञेया इत्यर्थः ॥ ३. २. १५६. ॥

इति कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवद्विरचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे शब्दमहार्णवन्यासे त्रुटिस्थले तपोगच्छाधिपति-सूरिसमाट्-**श्रीविजयनेमिसूरीश्वर**पट्टालङ्कार कविरत्न-शास्त्रविशारद-व्याकरणवाचस्पति-**श्रीविजयलावण्यसूरि**निर्मितानुसन्धानेन पूर्णतां नीते तृतीयाध्यायस्य

**द्वितीयः पादः समाप्तः ॥**

अनुसन्धानकारस्य-**श्रीमद्वल्लभराजस्य** श्रीमांश्चासौ वल्लभराजश्च श्रीमद्वल्लभराजस्तस्य, **कोऽपि** अवर्णनीयरूपः, **दुःसहः** अतितीव्रः, **प्रतापः,** तेजः, **प्रसरन्** सर्वतः सरीसृप्यमाणः, **वैरिभूपेषु** शत्रुषु राजसु, **दीर्घनिद्रां** चिरस्वापम्, **अकल्पयत्** अकरोत् एतद्धि परमाश्चर्यं यत् प्रतापस्य सूर्यादितापस्येव प्रसरणेऽतिदुःसहतया तत्र स्थातुमप्यशक्यतया निद्रालाभोऽसम्भावितोऽपि कल्पित इति, वस्तुतस्तु दीर्घनिद्राशब्दस्य मृत्युवाचकतया प्रतापप्रसरणे वैरिभूपा मृता इत्यस्यार्थस्य विवक्षितत्वेनौचित्यमेवेति न किमप्याश्चर्यम् ।

"Aho Shrutgyanam"

"Aho Shrutgyanam"

। अर्हँ ।

श्राशैशवशीलशालिने श्रीनेमीश्वराय नमो नमः ।

कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवत्प्रणीतं-

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।

## [ स्वोपज्ञतत्त्वप्रकाभिधबृहद्वृत्ति-तत्त्वप्रकाशिका-प्रकाशशब्दमहार्णवन्याससंवलितम् ]

## तत्र-

## *[ तृतीयाध्याये तृतीयपादः ]*

### वृद्धिरारैदौत् ॥ ३. ३. १ ॥

**त० प्र०**—आकार आर् ऐकार औकारश्च प्रत्येकं वृद्धिसंज्ञा भवन्ति । मार्ष्टि, पाक्यम्, दाक्षिः; कारयति, कार्यम्, आर्षम्; नाययति, नायकः, ऐन्द्रम्; लावयति, लावकः, औपगवः । वृद्धिप्रदेशाः—"मृजोऽस्य वृद्धिः" [ ४. ३. ४२ ] इत्येवमादयः ॥ १ ॥

---

**श० म० न्यासानुसन्धानम्**—वृद्धि० । संज्ञासूत्रमिदम् । 'वृद्धिः, आ, आर्, ऐत्, औत्' इति पदच्छेदः, तत्र वृद्धिः संज्ञा, आ इत्यादयः संज्ञिनः । यद्यपि 'यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्' इत्यभियुक्तोक्त्या उद्देश्यानाम्—'आ आर्' इत्यादीनां प्राथम्येनोच्चारणं युक्तम्, 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इत्यनुशासनाच्च, तथापि माङ्गलिक आचार्योऽध्येतृ-प्रवक्तॄणामनुषङ्गतो मङ्गलार्थं वृद्धिशब्दं पादस्यादौ प्रायुङ्क्त, "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि च" इति भाष्याद्युक्तवृद्धव्यवहारवाक्यात् ।

अत्रेदं विचार्यते—तद्भावितानामारैदौतां वृद्धिसंज्ञा, उतातद्भावितानामिति । के तद्भाविताः ? के चातद्भाविताः ? इति चेच्छृणु—तेन वृद्धिशब्देन भाविताः—विहिताः—तद्भाविताः, यथा—'आश्वलायनः, कार्तवीर्यः, ऐतिकायनः, औपगवः' इत्येतेषु 'आ–आर्–ऐत्–औत्' तद्भाविताः, सर्वत्र "वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते" [ ७. ४. १. ] इति सूत्रेण क्रमशः 'आ–आर्–ऐत्–औतः' वृद्धिशब्देन विधीयन्त इति तद्भाविताः । अतद्भाविताश्च तद्भिन्नाः—वृद्धिशब्देन विहितत्वाभाववन्तः स्वाभाविका वा, ते च यथा—'राजा, प्राच्र्छति, रैपात्रम्, नौघोषः' इत्यादौ, एषु सर्वत्र आ-आर्-ऐत्-औतो न वृद्धिशब्देन विहिताः, किन्तु राजन्शब्दे धातुपाठीय एवाकारः, प्रार्च्छतीत्यत्र "ऋत्यारुपसर्गस्य" [ १. २. ९. ] इत्यार्शब्देन विहितो न तु वृद्धिशब्देन, रैपात्रमित्यत्र नामसम्बन्ध्येव ऐत्, नौघोष इत्यत्रापि तथाभूत एव-तत्र तद्भावितानां ग्रहणेऽन्योन्याश्रयो दोषः—यदि वृद्धिशब्देन भावितास्तदा वृद्धिसंज्ञाः, यदा वृद्धिसंज्ञास्तदा वृद्धिशब्देन भाविताः स्युरिति । अथातद्भावितानां ग्रहणमिति चेत् ? तर्हि संज्ञावैयर्थ्यम्, विधिसूत्रोपकारार्थं हि संज्ञा विधीयन्ते, यदि चाविहितानामेव संज्ञा स्यात् किंप्रयोजना तर्हीयं संज्ञा स्यात् । न च "वृद्धिर्यस्य स्वरेष्वादिः [६. १. ८] इति सूत्रेण दुसंज्ञाविधानार्थमस्या वृद्धिसंज्ञाया उपयोग इति वाच्यम्, "ऐदोद् यस्य स्वरेष्वादिः" इति सूत्रयित्वा आ ऐद् औत् यस्य समुदायस्य स्वराणामादिः स्वरः स दुसंज्ञ

"Aho Shrutgyanam"

इत्यर्थवर्णनेनापि तत्संभवात्, इत्युभयथापि दोषसत्त्वाद् व्यर्थमिदं संज्ञासूत्रमिति चेदत्रोच्यते--अस्तु तद्भावितानामेव ग्रहणम्। नन्वन्योन्याश्रयो दोषः, भाविसंज्ञाश्रयणात्, अयमाशयः—विधिप्रदेशेषु यस्य येषां वा वृद्धिसंज्ञा भाविनी तद्विधानम् प्रकृतसूत्रे च वृद्धिशब्देन भाव्यमानानामेषां वृद्धिसंज्ञेत्याश्रयणमिति। अयं चार्थः सूत्रशाटकन्यायेन तत्र तत्र भाष्ये साधितः, यथा—अस्य सूत्रस्य शाटकं वयेति कथने यदि वातव्यो न शाटकः, अथ शाटको न वातव्य इति प्रकृतवाक्यस्यानर्थक्ये प्रसक्ते इत्थमवधार्यते—मन्ये स वातव्यः यस्योतस्य शाटकमित्येषा संज्ञा भाविनीति, तथा प्रकृतेऽपि भाविसंज्ञाश्रयणे दोषाभाव इति।

अथेदं विचार्यते--'वृद्धिः संज्ञा, आरैदौतः संज्ञिनः' इति, कथमवधार्यते? 'वृद्धिः संज्ञा, आरैदौतः संज्ञिनः' अथवा 'आरैदौतः संज्ञा, वृद्धिशब्दः संज्ञी' इति संदेहनिवर्त्तकाभावात् निश्चयाभाव इति। तत्रेदं कर्त्तव्यम्--संज्ञाधिकारः कर्त्तव्यः 'अथ संज्ञा'' इत्येवं पठित्वा "वृद्धिरारैदौत्" इत्यादीनि सूत्राणि पठितव्यानि इति चेत्? तेन संज्ञासूत्राणीमानीति विज्ञातेऽपि का संज्ञा कः संज्ञीति संदेहस्य निवृत्तिर्न स्यात्, तदर्थमपि यत्नान्तरं करणीयमिति बहुगौरवमिति चेदत्रोच्यते--"आचार्याचारात् संज्ञासिद्धिर्भविष्यति, आचार्याणां व्यवहारादेव वृद्धिरिति संज्ञा आरैदौतः संज्ञिन इति ज्ञानं भविष्यति, लोकेऽपि तावत् मातापितरौ जातस्य पुत्रस्य गृहैकदेशे श्रोतृजनासन्निधाने नाम कुर्वाते—देवदत्तो यज्ञदत्त इत्यादि, तयोर्व्यवहारादेवान्ये जानन्ति—इयमस्य संज्ञेति, न च ताभ्यां क्वचिदुच्यते—इयमस्य संज्ञेति। एवमिहापि आचार्याणां व्याख्यानादिरूपव्यवहारादेवान्येऽपि ज्ञास्यन्ति--वृद्धिशब्दः संज्ञा, आरैदौतः संज्ञिन इति। आचार्या हि व्याचक्षते--आरैदौतो वृद्धिसंज्ञा भवन्तीति। अपरे च वृद्धिः स्वरेष्वादेरित्युक्त्वा 'आश्वलायनः, कार्तवीर्यः, ऐतिकायनः, औपगवः' इत्यादीन्युदाहरन्ति, तेन मन्यामहे—यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन इति, एतेनैवाचार्यव्यवहारेण संज्ञा-संज्ञिनोरसन्देहोऽपि भविष्यति। किंच वृद्धिशब्द एव स्थाने आवर्त्तते इत्येकः सः, आरैदौतस्तु बहवः, इति बहूनामेका संज्ञेति विज्ञायते, न चैकस्य बह्व्यः संज्ञाः शास्त्रे भवन्तीत्यतोऽपि संज्ञा-संज्ञिनोरसन्देहो भविष्यति। ननु च आचार्यव्यवहार एव सन्देहमाविष्कुर्वता भवता स एव प्रमाणत्वेनोपन्यस्यत इत्ययुक्तमिति चेदत्रोच्यते--"वृद्धिः आरैदौत्" इति सामानाधिकरण्येनैकविभक्तिनिर्देशेनापि संज्ञा-संज्ञिनावेवैताविति निश्चयो भविष्यति, द्वयोर्हि सामानाधिकरण्यं दृश्यते--विशेषण-विशेष्ययोर्वा संज्ञा-संज्ञिनोर्वा, तत्र विशेषणविशेष्यभावाभावस्तावत् सिद्ध एव, द्वयोर्हि प्रतीतपदार्थयोर्लोके विशेषणविशेष्यभावो दृष्टः, यथा नीलो घट इति, अत्र नीलोऽपि लोके प्रतीतः, घटोऽपि, इति तौ परस्परं विशेषणविशेष्यभावं प्रतिपद्येते:, इह च वृद्धिशब्दो लोके प्रतीतपदार्थकः सन्नपि शास्त्रे त्वप्रतीतपदार्थक एव आरैदौच्छब्दश्च सर्वथा लोकेऽप्रतीतपदार्थक एवेति, संज्ञा-संज्ञिनावेवैताविति निश्चयो भविष्यति। तदुक्तं **हरिणापि वाक्यपदीये**—

''वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः।
आदैच्प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः॥''

इति; स्वरूपमात्रबोधका वृद्ध्यादयः शब्दाः 'आरैदौत्' शब्देन प्रत्यायितैः 'आ-आर्-ऐत्-औत्' शब्दैः संज्ञिभिः सह सम्बन्धं प्राप्नुवन्तीति तदर्थः। किञ्च यत्र समानाक्षरमुभयं भवति तत्र सन्देहः—का संज्ञा कः संज्ञीति, इह च वृद्धिशब्दो लघ्वक्षरः, 'आरैदौत्' शब्दश्च बह्वक्षरः, तत्र यल्लघु सा संज्ञा यद् गुरु स संज्ञीति निश्चीयते, लघ्वर्थत्वात् संज्ञाकरणस्य, लाघवेन शास्त्रप्रवृत्तिसिद्ध्यर्थं हि संज्ञाः क्रियन्ते। किञ्च—आवर्तिन्यः संज्ञा भवन्ति, वृद्धिःशास्त्रेष्वसकृदावर्त्तते "मृजोऽस्य वृद्धिः", [ ४.३.४२ ] "वृद्धिः स्वरेष्वादेः" [ ७.४.१ ] इत्यादौ, आरैदौच्छब्दश्च क्वचिदपि नावर्त्तते। लोकेऽपि देवदत्तशब्द आवर्त्तते, न मांसपिण्डः। किञ्च लोके अगोज्ञाय कश्चिद् गां कर्णे गृहीत्वा कथयति--अयं गौरिति, एतेनैव तस्य ज्ञानं भवति—यदस्य मांसपिण्डस्येयं संज्ञेति, न चास्य गौरिति संज्ञेति कथ्यते, एवमिहापि संज्ञाधिकाराभावेऽपि संज्ञा-संज्ञिनोरसन्देहो भविष्यतीति निरवद्यमिति।

अथापरं विचार्यते—वृद्धिसंज्ञायां प्रत्येकमिति वक्तव्यम्—आरैदौतः प्रत्येकं वृद्धिसंज्ञा भवन्तीति, अन्यथा आरैदौदिति समुदाय एव वृद्धिसंज्ञा स्यादिति, नैतद्युक्तम्—प्रत्येकं वाक्यपरिसमाप्तिदर्शनात् समुदायस्य संज्ञा न भवति, यथा—देवदत्त-यज्ञदत्त-विष्णुमित्रा भोज्यन्तामित्युक्ते प्रत्येकमिति कथनाभावेऽपि प्रत्येकं भोज्यन्ते, तथेहापि प्रत्येकमेव वृद्धिसंज्ञा भविष्यति, न समुदायस्य। किञ्च समुदायस्य क्वचिल्लक्ष्ये

"Aho Shrutgyanam"

प्रयोगाभावादपि प्रत्येकमेव संज्ञा स्यादिति प्रत्येकमिति कथनानर्थक्यमेव।

अथैदौतोस्तपरकरणं किमर्थम्? असन्देहार्थमिति चेत्? न- * व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् * इति न्यायेनाचार्याणां व्याख्यानादेव सन्देहनिवृत्तिः स्यादिति तस्यानर्थक्यमेवेति चेत्? न-त्रिमात्र-चतुर्मात्राणां स्थानिनां त्रिमात्र-चतुर्मात्रौ ऐदौतौ "आसन्नः" [ ७. ४. १२० ] इति परिभाषासहकारात् प्रमाणकृतासत्तेर्मा भूतामित्येतदर्थं तपरकरणस्यावश्यकत्वात्, तपरकरणे सति हि * तपरस्तत्कालस्य * इति न्यायेन उच्चारितकालविशिष्टस्य द्विमात्रस्यैव वृद्धिसंज्ञाविधानार्थं तपरकरणस्यावश्यकत्वात्।

अथोदाहरति—**मार्ष्टि** इत्यादिना, मृजेर्वर्त्तमानायां तिवि रूपम्, तत्र गुणे कृते "मृजोऽस्य वृद्धिः" [४. ३. ४२] इत्यकारस्य वृद्धिराकारो भवति। **पाक्यमि**ति—पचेः "ऋवर्ण-व्यञ्जनाद् घ्यण्" [५.१.१७] इति घ्यणि "ञ्णिति" [४. ३. ५०] इति धातोरुपान्त्यस्यातो वृद्धिराकारो भवति। **दाक्षिरि**ति—'दक्षस्यापत्यं पुमान्' इत्यर्थे "अत इञ्" [ ६. १. ३१ ] इतीञि "वृद्धिः स्वरेष्वादेः" [ ७. ४. १ ] इति आदिस्वरस्याकारस्य वृद्धिराकारः। **कारयती**ति—करोतेर्णिचि "नामिनोऽकलि-हलेः" [ ४. ३. ५१ ] इति वृद्धिरार् भवति। **कार्यम्** इति-करोतेः "ऋवर्ण-व्यञ्जनाद् घ्यण्" [ ५. १. १७ ] इति घ्यणि "नामिनः०" [४.३.५१] इति वृद्धिरार् भवति। **आर्षमि**ति—ऋषेरिदमित्यर्थे "तस्येदम्" [ ६. ३. १६० ] इत्यणि "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इति ऋकारस्यार् वृद्धिर्भवति। **नाययति** नयतेः प्रयोजकव्यापारविवक्षायां णिगि "नामिनः" [४. ३. ५१] इति ईकारस्य वृद्धिरैत् भवति। **नायकः** इति—नयतेः "णक-तृचौ" [५. १. ४८] इति णके "नामिनः०" [ ४.३. ५१ ] इति वृद्धिरैत् भवति। **ऐन्द्रमि**ति—इन्द्रो देवताऽस्येत्यर्थे "देवता" [ ६. २. १०१ ] इत्यणि आदिस्वरस्येकारस्य वृद्धिरैकारः। **लावयति** इति—लुनातेः प्रयोजकव्यापारविवक्षायां णिगि "नामिनः०" [ ४. ३. ५१ ] इति ऊकारस्य वृद्धिरौकारो भवति। **लावकः** इति—लुनातीत्यर्थे लुनातेर्णकि ऊकारस्य वृद्धिरौकारः। **औपगवः** इति—उपगोरपत्यमित्यर्थे "ङसोऽपत्ये" [ ६. १. २८ ] इति अणि "वृद्धिः स्वरेष्वादेः" [ ७. ४. १ ] इत्यादिस्वरस्योकारस्य वृद्धिरौकारः। संज्ञासूत्राणां विधिसूत्रोपकारकत्वेनास्य संज्ञासूत्रस्य कुत्रोपकार इत्याशङ्कायामाह—**वृद्धिप्रदेशाः** "**मृजोऽस्य वृद्धिः**" [ ४. ३. ४२ ] **इत्येवमादयः** इति—वृद्धेः प्रदेशाः—वृद्धिविधिदेशा वृद्धिशब्दप्रयोगस्थानानि "मृजोऽस्य वृद्धिः" [ ४. ३. ४२ ] इत्यादीनि सूत्राणीति भावः, आदिशब्देन "वृद्धिः स्वरेष्वादेः" [ ७. ४. १. ] इत्यादीनां संग्रहः ॥ ३. ३. १ ॥

## गुणोऽरेदोत् ॥ ३. ३. २ ॥

**त० प्र०—'अर् एत् ओत्' इत्येते प्रत्येकं गुणसंज्ञा भवन्ति। करोति, कर्तव्यम्, चेता, चेयम्; स्तोता, स्तोतव्यम्। गुणप्रदेशाः—"नामिनो गुणोऽक्ङिति" [४. ३. १.] इत्येवमादयः॥ २ ॥**

**श० म० न्यासानुसन्धानम्— गुणो०।** 'गुणः, अर्, एत्, ओत्' इति च्छेदः। अत्रापि पूर्वसूत्रवत् विधेयभूतस्य गुणशब्दस्य पूर्वप्रयोगो मङ्गलातिशयद्योतनार्थ एव, अथवा "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इति नियमस्य व्यभिचारद्योतनार्थमेवैवमाचार्येण प्रयोगः कृत इत्यवधार्यते, तथा च क्वचिच्छिष्टप्रयोगे विपरीतप्रयोगोऽपि साधुः, तेन कविप्रयोगेषु बहुलमुद्देश्यविधेययोर्वैपरीत्यं संगच्छते। संज्ञा-संज्ञ्यसन्देहादिः पूर्वसूत्रव्याख्यानुसारं ज्ञातव्यः। उदाहरति-**करोतीति**—अत्र कृगो वर्त्तमानायां तिवि उप्रत्यये "नामिनो गुणोऽक्ङिति" [ ४. ३. १ ] इति गुणेऽरि करोतीति रूपम्; **कर्त्तव्यमि**ति—कृगस्तव्ये सति गुणे रूपम्। **चेते**ति—चिनोतेस्तृचि रूपम्, **चेयमि**ति तस्मादेव ये, अनयोरेत् गुणः। **स्तोते**ति—स्तौतेस्तृचि रूपम्, **स्तोतव्यमि**ति तस्यैव तव्ये, अनयोरोत् गुणः। गुणसंज्ञायाः प्रयोजनप्रदर्शनायाह—**गुणप्रदेशाः** इति—गुणसंज्ञाबोध्यविधायकसूत्राणीति भावः। "**नामिनो गुणोऽक्ङिति**" [ ४. ३. १ ] **इत्यादयः** इति—आदिपदेन तदग्रिमसूत्राणि "उ-श्नोः" [४.३.२] इत्यादीनि संग्राह्याणि ॥ ३. २. २ ॥

## क्रियार्थो धातुः ॥ ३. ३. ३ ॥

**त० प्र०—कृतिः क्रिया प्रवृत्तिर्व्यापार इति यावत्, पूर्वापरीभूता साध्यमानरूपा साऽर्थोऽभिधेयं यस्य स शब्दो धातुसंज्ञो भवति। एधते, अस्ति, दीव्यति, सुनोति, तुदति,**



"Aho Shrutgyanam"

रुणद्धि, तनोति, क्रीणाति, सहति । आयादिप्रत्ययान्तानामपि क्रियार्थत्वात् धातुत्वम्—गोपायति, कामयते, ऋतीयते, जुगुप्सते, कण्डूयति, पापच्यते, चोरयति, कारयति, चिकीर्षति, पुत्रकाम्यति, पुत्रीयति, अश्वति, श्येनायते, हस्तयते, मुण्डयति । एवं जु-स्तम्भूचुलुम्पादीनामपि-जवनः, स्तभ्नाति, चुलुम्पांचकार, प्रेङ्खोलयति ।

शिष्टप्रयोगानुसारित्वादस्य लक्षणस्याणपयत्यादिनिवृत्तिः, शिष्टज्ञापनाय चेदं लक्षणम्, एतदविसंवादेन च शिष्टा ज्ञायन्त इति ।

अन्वय-व्यतिरेकाभ्यां च धातोः क्रियार्थत्वावगमः, तथाहि—पचतीत्यादौ धातु-प्रत्ययसमुदाये संसृष्टक्रियाकालकारकाद्यनेकार्थाभिधायिनि प्रयुज्यमाने धातोरेव क्रियार्थत्वमवगम्यतेऽन्वय-व्यतिरेकाभ्यां नेतरेषाम् । पचतीति प्रयोगे द्वयं श्रूयते—'पच्' इति प्रकृतिः, 'अतिः' इति च प्रत्ययः, अर्थोऽपि कश्चिद् गम्यते—विक्लित्तिःकर्तृत्वमेकत्वम्; पठतीत्युक्ते कश्चित् शब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी, 'पच्' शब्दो हीयते 'पठ्' शब्द उपजायते 'अति' शब्दोऽन्वयी, अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी, विक्लित्तिर्हीयते पठिरुपजायते कर्तृत्वमेकत्वं चान्वयी; तेन मन्यामहे—यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते, यश्च शब्दउपजायते तस्यासावर्थो योऽर्थ उपजायते, यश्च शब्दोऽन्वयी तस्यासावर्थो योऽन्वयीति ।

ननु च कृतिः करोत्यर्थः क्रिया, तत्र युक्तं पचादीनां किं करोति ? पठतीति करोतीत्यर्थगर्भितत्वात् क्रियात्वम्, अस्ति-विद्यते-भवतीनां तु न युक्तम्, नहि भवति-किं करोति ? अस्ति भवति विद्यते चेति; तदयुक्तम्—न करोत्यर्थः क्रियाशब्दस्य प्रवृत्तिनिमित्तम्, अपि तर्हि कारकव्यापारविशेषः, व्यापारश्च व्यापारान्तराद् भिद्यत इत्यस्त्याद्यर्थोऽपि क्रियैव, करोत्यर्थस्तु क्रियाशब्दस्य व्युत्पत्तिनिमित्तमेव; एवं सति क्रियासामान्यवचनाः कृभ्वस्तयः क्रियाविशेषवचनास्तु पचादय इति सिद्धम् । तथा 'भावे घञ्' इत्युक्त्वा 'कारः, पाकः' इत्यादयोऽप्युदाह्रियन्ते । 'क्रियोपपदाद्धातोस्तुम्' इत्युक्त्वा 'योद्धुं धनुर्भवति, द्रष्टुं चक्षुर्जातम्' इत्याद्यप्युदाहरणं युक्तम् । यदाहुः—"यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषे प्रयुज्यते" इति । क्रिया च द्वेधा सिद्ध-साध्यत्वभेदात्, तत्र सिद्धस्वभावोपसंहृतक्रमा परितः परिच्छिन्ना सत्त्वभावमापन्ना घञादिभिरभिधीयते, यदाह—"कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति; तुमादिभिस्तु सत्त्वभावमनापन्नेति विशेषः; साध्यमानावस्था पूर्वापरीभूतावयवा भूत-भविष्यद्-वर्तमान-सदसदाद्यनेकावयवरूपाऽऽख्यातपदैरुच्यते, यदाह—"पूर्वापरीभूतं भावमाख्यातेनाचष्टे" यथा च पचतीत्यत्र पूर्वापरीभावस्तद्वदेव 'जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यति भवति श्वेतते संयुज्यते समवैति'इत्यादावपि, साध्यत्वाभिधानेन क्रमरूपाश्रयणात् क्रियाव्यपदेशः सिद्धः, तदुक्तम्—

"यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् तत् क्रियेति प्रतीयते ।" ॥३॥

---

**श० म० न्यासानुसन्धानम्—क्रिया०** । क्रिया अर्थोऽभिधेयो यस्य इति विग्रहे क्रियापदार्थस्य ज्ञानं विना क्रियार्थपदार्थज्ञानासंभवात् क्रियापदार्थं तावदाह—**कृतिः क्रिया प्रवृत्तिर्व्यापार इति यावदि**ति—कृगो भावे "स्त्रियां क्तिः" [ ५. ३. ९१ ] इति क्तिः—कृतिरिति, तत एव भाव एव "कृगः श च वा" [ ५. ३. १०० ] इति शे क्रियेति, द्वयोरेव शब्दयोरेकार्थत्वमेवेति न तावता क्रियापदार्थः परिचित इत्यपरितुष्यन्नाह—प्रवृत्तिरिति, प्रपूर्वकात्, वृतेः स्त्रियां क्तिः—प्रवृत्तिरिति प्रक्रान्तां वृत्तिमाह प्रवृत्तिशब्दः; तथा चार्थोत्पत्त्यनुकलामात्मनश्चेष्टामाह—प्रवृत्तिशब्दः, तामेव चेष्टामन्येन शब्देन स्पष्टयति—व्यापार इति यावदिति, तथा च क्रिया व्यापार इति पर्यवस्यति, व्यापारश्च वि-आङ्पूर्वकात् पृणोतेर्घञि साधुर्व्यापृतिं कार्यसंलग्नतामाह । तमेव क्रियापदार्थं विशिनष्टि—**पूर्वापरीभूता साध्यमानरूपे**ति—पूर्वावयवसंबद्धा पूर्वा, अपरावयवसम्बन्धाऽपरा, पूर्वा चासावपरा च—पूर्वापरा, अपूर्वापरा पूर्वापरा सापन्ना—पूर्वापरीभूता, अयमर्थः—यद्यपि क्रिया नामादितोऽन्तं यावदेकैव, तथापि तस्याः क्रमिकोत्पत्तिदर्शनात् क्रमविषयाणामवस्थाविशेषाणां तदङ्गत्वं परिकल्प्यते, पच्धात्वर्थभूता विक्लित्त्यनुकूला क्रिया हि अधिश्रयण-फूत्कारा-ऽधः सन्तापनादिकमारभ्यावश्रयणपर्यन्तमेकैव, तथापि अधिश्रयणादीनां तदवयवत्वं परिकल्प्यते, तत्र केचिदवयवाः पूर्वमुत्पद्यन्ते केचित् पश्चादिति तेषां पूर्वत्वापरत्वहारो लोके दृष्टः, तथा च वस्तुतोऽपूर्वापरा सत्यपि सा पूर्वापरा सम्पद्यत इति पूर्वापरीभूतात्वं तस्याः । अत्र पूर्वापराशब्दौ द्वावपि "पूर्वापरप्रथमचरमजघन्य०" [ ३. १. १०३ [ इति सूत्रो-

"Aho Shrutgyanam"

क्ताविति प्रथमोक्तत्वं द्वयोरस्ति, तत्र कस्य पूर्वनिपात इत्याशङ्कायां सूत्रपाठक्रममाश्रित्य शब्दपरविप्रतिषेधादपरशब्दस्यैव पूर्वनिपातप्राप्तावप्यर्थक्रमस्य स्पष्टप्रतिपत्त्यर्थं तमनुरुध्य राजदन्तादिगणपठितत्वपरिकल्पनया पूर्वशब्दस्यैव पूर्वनिपातः कृत इति न दोषः। तत्र पूर्वोऽवयवोऽधिश्रयणं–पाकपात्रस्य चुल्युपरिधारणम्, अपरोऽवयवोऽग्निसन्दीपनादिः, पूर्वा च क्रियाऽवश्रयणान्ता–पाकपात्रस्य नीचैरानयनान्ता, घटादिः सिद्धपदार्थोऽपि पूर्वापरीभूत इति तद्व्यावृत्तय आह–**साध्यमानरूपे**ति––साध्यमानं–साधनव्यापारपरतन्त्रं रूपं यस्याः सेत्यर्थः, पचतीत्युक्ते हि वर्त्तमाना विक्लित्तिसाधिनी क्रिया कर्त्रादिसाधनायत्ता, कः पचति, किं पचति, केन पचति, क्व पचति, कुत आनीय पचति, कस्मै पचतीत्यादिसाधनाकाङ्क्षायाम्––चैत्र ओदनं काष्ठैः कुसूलादानीय मैत्राय पचतीति वाक्यप्रयोगे सति निराकाङ्क्षताप्रतीतिर्भवति, इति तस्याः क्रियायाः साधनायत्तत्वं विज्ञायते। **से**ति–पूर्वापरीभूतेत्यादिना प्रतिपादितस्वरूपेत्यर्थः। **अर्थोऽभिधेयः** इति––अभिधया शक्त्या प्रतिपाद्य इत्यर्थः, तथा च साध्यमानार्थप्रतिपादकः शब्दो धातुसंज्ञ इत्यर्थः पर्यवस्यति। घटादिशब्दा हि सिद्धमर्थं प्रतिपादयन्ति, साधनव्यापारेण लब्धस्वरूपं वस्तु घटादिशब्देनाभिधीयते, इति तादृशार्थप्रतिपादकानां नाम्नां धातुसंज्ञा न भवति।

उदाहरति––**एधते, अत्ति, दीव्यती**त्यादिना, 'एध्' इति वृद्ध्यनुकूलक्रियाप्रतिपादकः शब्दः, तस्य धातुसंज्ञायां सत्यां ततो वर्त्तमानताविवक्षायां वर्त्तमानायाः प्रथमपुरुषैकवचनं ते प्रत्ययः, मध्ये शव् विकरणः। भ्वादिगणपठितमुदाहृत्यादादिगणपठितमाह––**अत्ती**ति––'अद्' धातुर्भक्षणार्थः, गलविलाधः संयोगरूपक्रियाया वर्त्तमानताविवक्षायां प्रथमपुरुषैकवचनं तिव्, शव्विधायके "कर्त्तर्यनद्भ्यः शव्" [ ३. ४. ७१ ] इति सूत्रे 'अनद्भ्यः' इत्यादिपर्युदासात् शव् न भवति। **दीव्यती**ति दिवाद्युदाहरणम्, 'दिव्' इति क्रीडाजयेच्छादिक्रियाप्रतिपादकः शब्दः, तस्य धातुत्वे वर्तमानाप्रथमपुरुषैकवचने तिवि दिवादित्वात् "दिवादेः श्यः" [ ३. ४. ७२ ] इति श्ये उपान्त्यदीर्घे सति––दीव्यतीति रूपम्। **सुनोती**ति स्वादेरुदाहरणम्, सुधातुरभिषवार्थः, अभिषवश्च क्लेदनं सन्धानाख्यं पीडनमन्थने वा, स्वादित्वात् "स्वादेः श्नुः" [ ३. ४. ७५ ] इति श्नुः। **तुदती**ति तुदादेरुदाहरणम्, "तुदादेः शः" [ ३. ४. ८१. ] इति शः। **रुणद्धि** इति रुधादेरुदाहरणम्, "रुधां स्वराच्-श्नो नलुक् च" [ ३. ४. ८२. ] इति श्नः, धातोर्नकारस्य च लुक्। **तनोती**ति तनादिगणोदाहरणम्, तनादित्वात् "कृग्-तनादेरुः [ ३. ४. ८३. ] इति उः। **क्रीणाती**ति–"क्र्यादेः [ ३. ४. ७८. ] इति श्नाप्रत्ययः। **सहती**ति––मर्षणार्थस्य सहधातोरात्मनेपदिनोऽपि क्वचित् परस्मैपदित्वमिति सूचनाय, भवति हि कविप्रयोगे क्वचित् परस्मैपदित्वेन प्रयोगः, यथा–"स एवायं नागः सहति कलभेभ्यः परिभवम्" इति, यद्वा सहधातोर्युजादित्वात् पाक्षिकणिचोऽभावेऽदो रूपम्।

एवं शुद्धानां शब्दानां क्रियार्थत्वाद् धातुत्वमुदाहृत्य प्रकृति-प्रत्ययसमुदायस्यापि क्वचिदेकक्रियार्थत्वाद् धातुत्वमुदाहर्तुमाह– **आयादिप्रत्ययान्तानामपि क्रियार्थत्वाद् धातुत्वमि**ति–"गुपौधूप-विच्छि-पाणि-पनेरायः" [ ३. ४. १. ] इति सूत्रविहित आयप्रत्यय आदौ येषां ते आयादयः, ते च ते प्रत्यया अन्ते येषां ते––आयादिप्रत्ययान्ता 'गोपाय' प्रभृतयस्तेषामपि रक्षादिरूपक्रियावाचकत्वात् क्रियार्थत्वमस्तीति धातुत्वं भवतीत्यर्थः। अयमाशयः––यदि हि पाठविशेषान्तर्गतत्वमेव धातुत्वप्रयोजकं स्यात् तर्हि आयादिप्रत्ययान्तानां धातुत्वं न स्यात्, तदर्थं च प्रत्ययविशेषविशिष्टानामपि धातुसंज्ञाविधानाय सूत्रान्तरनिर्माणे गौरवमिति क्रियावाचकत्वमेव तत्प्रयोजकमेष्टव्यम्। न च 'हिरुक्, पृथग्' इत्याद्यव्ययानां क्रियाप्रधानत्वेन क्रियार्थत्वाद् धातुत्वं स्यादिति पाठविशेषान्तर्गतत्वे सति क्रियार्थत्वं धातुत्वप्रयोजकमेष्टव्यमिति वाच्यम्, तेषां [ हिरुगित्याद्यव्ययानां ] क्रियान्तराकाङ्क्षोत्थापकतादर्शनेन क्रियावाचित्वाभावात्, क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्स्वरूपं साध्यत्वेन प्रतीयमानत्वमेव हि क्रियात्वमिति तेषामर्थस्य तादृशत्वाभावेन क्रियात्वाभावात्, भवति हि हिरुगित्यादीनामस्त्यादिक्रियाकाङ्क्षा। ननु क्रियालक्षणे साध्यत्वेन प्रतीयमानत्वस्य निवेशे भूप्रभृतीनां सत्ताद्यर्थकानां क्रियार्थत्वं न स्यात्, सत्ताया नित्यत्वेन साध्यत्वेन प्रतीयमानत्वाभावादिति चेन्न––आधेयभेदेन, आधेयगतावस्थाभेदेन च नित्याया अपि सत्तायाः साध्यत्वेन प्रतीतिसंभवात्। देवदत्तो भवतीत्यादौ देवदत्तनिष्ठाधेयतानिरूपिताऽऽधारतावती सत्ता जायमानेव प्रतीयते, एवं 'देवदत्तो गच्छन्नस्ति देवदत्तो भुञ्जानोऽस्ति स एव पठन्नस्ति' इत्यादौ च गमनादिविशिष्टदेवदत्तविशिष्टा सत्ता जायमानेव प्रतीयते। वस्तुतस्तु सत्तायाः पूर्वसिद्धत्वेऽपि नाधारत्वमपि त्वाधेयत्वमेव घटे घटत्वमिति प्रतीतिवत् घटे सत्ता, न तु सत्तायां घट इति प्रतीतेः, अत्रापि

"Aho Shrutgyanam"

पक्षे सत्ताया विशेष्यभेदेन भिन्नत्वमिव जायमानत्वमपि प्रतीयत इति भवति साध्यमानत्वम् ।

ननु क्रियार्थस्य धातुत्वे 'शिश्ये' इत्यादिभावाख्यातान्तानामपि क्रियार्थत्वात् तेषां धातुत्वं स्यादिति "आत् सन्ध्यक्षरस्य [४. २. १.] इति तदीयसन्ध्यक्षरस्य एकारस्य आत्वं स्यात्, तद्धि सन्ध्यक्षरान्तस्य धातोर्विहितमनैमित्तिकं च; एतद्दोषपरीहाराय क्रियाविशेषकत्वेन प्रथमग्रहणे कृते सति प्राथम्येन यः क्रियामाह स धातुसंज्ञ इति भवत्यर्थः, तत्र प्राथम्यं किं शब्दत आहोस्विदर्थतः, अयमर्थः—प्रथमो यः क्रियार्थ इति कथिते प्रथममुच्चार्यमाणः सन् य क्रियामाहेति गम्यते, तथा च शब्दतः प्राथम्यमायाति । प्रथमा क्रियाऽर्थो यस्येति विग्रहे चार्थतः प्राथम्यं प्रतीयते, स्वयं प्रथमोऽप्रथमो वा प्रथमां क्रियामाहेति क्रियारूपेऽर्थे प्राथम्यादर्थतः प्राथम्यं स्पष्टम्, तत्र पूर्वस्मिन् पक्षे सन्नन्तादीनां धातुसंज्ञा न प्राप्नोति, पठितुमिच्छति—पिपठिषतीति, अत्र पठत्यर्थोऽपि सन्निविष्ट इति स पूर्वमेव पठतिनोक्त इति नास्ति सन्नन्तस्य तदभिधाने प्राथम्यम्, एवं—पुत्रमिच्छति—पुत्रीयतीत्यत्रापि पुत्रकर्मकेच्छारूपां क्रियां क्यान्त आहेति पुत्रार्थस्य प्रथमं पुत्रशब्देनोक्तत्वान्नास्ति प्राथम्यम्, क्यान्तस्य प्रथममुच्चार्यमाणत्वाभावेन प्राथम्याभावात् । यद्यर्थतः प्राथम्यं विवक्ष्यते तर्हि सनाद्यन्तस्य धातुत्वसंभवेऽपि 'शिश्ये' इत्यादिभावाख्यातान्ते दोषस्तदवस्थ एव, तत्राख्यातार्थस्य भावस्य तेनैव [आख्यातेनैव] प्रथममुक्तत्वात्, पूर्वस्मिन् पक्षे तु 'शी' इत्यनेनाभिहितां क्रियामेव आख्यात आहेति नास्ति तस्य क्रियाभिधाने प्राथम्यम्, इत्युभयस्मिन् पक्षे दोषसद्भावात् किमत्र न्याय्यमिति चेत् ? अभिधानतः प्राथम्यं ग्राह्यमित्यदोषः, अयमाशयः—अभिधानतः प्राथम्यविवक्षणेऽन्येनानभिहितां क्रियां यः प्रथममाह स धातुरित्यर्थो भवति 'शिश्ये' इत्यत्र तु प्रकृत्यभिहितं भावं प्रत्यय आहेति न तत्र धातुसंज्ञाप्रवृत्तिः, यथा—प्रथममयं राजानं पश्यतीत्यस्यायमर्थो यदन्येनादृष्टं पश्यतीति, तथेहापि प्राथम्यमभिधानक्रियापेक्षमाश्रीयते—अन्येभ्यः क्रियाभिधायिभ्यो यः प्रथमं क्रियामाहेति, पिपठिषतीत्यत्र पठत्यर्थोपसर्जनामिच्छामन्येनानभिहितां सन् प्रत्ययः प्रथममाहेति न भवति धातुत्वाभावदोषः । अत्र पक्षे 'शिश्ये' इत्यत्र दोषवारणमप्युक्तमेव, स्वार्थिकप्रत्ययान्तानां 'गोपाय' 'कामि' इत्यादीनामपि धातुसंज्ञाऽत्र पक्षे न प्राप्नोति; यतो गुपिप्रभृतिभिरुक्तामेव क्रियां गोपायेत्यादय आहुरिति प्राथम्याभावस्तथापि स्वार्थे प्रत्ययविधानसामर्थ्यात् तत्र प्रत्ययान्तस्य स्वाव्यतिरिक्तत्वं स्वीक्रियते इति न दोषः । अन्यैस्तु तथा स्वीकाराभावात् तदर्थमायादिप्रत्ययान्तस्य धातुसंज्ञाविधानार्थं सूत्रमारभ्यत एव । **लघुन्यासकारै**स्तु गोपायतीत्यादौ धातुसंज्ञार्थं क्रियामेव प्राधान्येन योऽभिधत्ते स क्रियाभिधायी, स च धातुसंज्ञ इत्यर्थः स्वीक्रियते, 'शिश्ये' इत्यादिभावाख्यातान्ते धातुसंज्ञानिवृत्तिरपि तथा सति सिद्धा भवति, यत आख्यातस्य न प्राधान्येन क्रियाभिधायित्वमपि तु काल-कारक-संख्याद्यभिधायकत्वमपि प्रत्ययस्य तेष्वर्थेष्वपि शक्तेः स्वीकारादिति, तथा च यस्य क्रियैवाभिधेया स धातुरिति पर्यवस्यति । एवं च कृत्वा कर्तुमित्यादीनां कृदन्तानां क्रियाभिधायित्वेऽपि क्रियामात्राभिधायित्वाभावान्न भवति धातुसंज्ञा, तत्र हि पूर्वकालाद्यर्थस्यापि क्त्वादिभिरभिधानात् क्रियामात्राभिधायित्वाभावात् । किंचात्राव्ययसंज्ञया धातुसंज्ञानिवृत्तिरित्यपि समधातुं शक्यते । 'पचिः, पचतिः' इत्यादिषु "इ-कि-श्तिव् स्वरूपार्थे" [५. ३. १३८.] इति सूत्रविहित 'इ-किश्तिव्' प्रत्ययान्तेषु क्रियाभिधायित्वेऽपि साध्यमानत्वाभावात् न क्रियात्वमिति न भवति तत्र धातुसंज्ञा । एवं 'कर्तव्यं' 'भूयते' इत्यादावपि, प्रथमे कर्माद्यर्थस्याप्यभिधानात् द्वितीये च वर्तमानत्वादेरप्यभिधानात् क्रियामात्रवाचित्वं नास्तीति न दोषः ।

इत्थं चायादिप्रत्ययान्तानामपि क्रियार्थत्वात् धातुत्वमिति सिद्धम् । तथा चोदाहरति—**गोपायती**त्यादि, गुप्धातोः "गुपौ-धूप" [३. ४. १.] इत्यायः, तदन्तस्य धातुत्वात् त्याद्युत्पत्तिः । **कामयते** इति—कमेरिच्छार्थात् "कमेर्णिङ्" [३. ४. २.] इति णिङ्, तदन्तस्य कामीत्यस्य धातुत्वात् त्याद्युत्पत्तिः । **ऋतीयते** इति—ऋतिः सौत्रो धातुः, तस्मात् "ऋतेर्ङीयः" [३. ४. ३.] इति ङिति ईये तदन्तस्य-धातुसंज्ञासत्त्वे त्यादिः । **जुगुप्सते** इति—गुपेर्गर्हाविवक्षायां "गुप्-तिजो गर्हा-क्षान्तौ सन्" [३. ४. ५.] इति सन्, तदन्तस्य धातुत्वम् । **कण्डूयती**ति—कण्डूधातोर्गात्रविघर्षणार्थकात् "धातोः कण्ड्वादेर्यक्" [३. ४. ८.] इति यक्, तदन्तस्य धातुत्वम् । **पापच्यते** इति—पुनःपुनरतिशयेन वा पचतीत्यर्थे 'पच्'धातो "व्यञ्जनादेरेकस्वरात् भृशाभीक्ष्ण्ये यङ् वा" [३. ४. ९.] इति यङ्, तदन्तस्य द्वित्वादिकार्ये कृते सति धातुत्वात् त्यादिः । **चोरयती**ति—स्तेयार्थात् 'चुर्' धातोः "चुरादिभ्यो णिच्" [३. ४. १७] इति णिच्, उपान्त्यगुणे चोरीत्यस्य धातुत्वात् त्याद्युत्पत्तिः ।

"Aho Shrutgyanam"

एवं स्वार्थिकप्रत्ययान्तानुदाहृत्यार्थविशेषविहितप्रत्ययान्तानामपि क्रियावाचित्वाविशेषाद् धातुत्वमुदाहरति—कारयतीत्यादिना, कश्चित् करोति तं प्रेरयतीत्यर्थे कुर्वन्तं प्रेरयतीत्यर्थे वा "प्रयोक्तृव्यापारे णिग्" [ ३. ४. १०. ] इति णिग्, वृद्धावारि 'कारि' इति जाते धातुत्वम्। **चिकीर्षतीति**—कर्तुमिच्छतीत्यर्थे "तुमर्हादिच्छायां सन्नतत्सनः" [ ३. ४. २१. ] इति सन्, सन्नन्तत्वाद् द्वित्वादौ चिकीर्षेत्यस्य क्रियार्थत्वाद् धातुत्वम्। **पुत्रकाम्यतीति**—आत्मनः पुत्रमिच्छतीत्यर्थे पुत्रमिति द्वितीयान्तात् "द्वितीयायाः काम्यः" [ ३. ४. २२. ] इति काम्यप्रत्यये सति तदन्तस्य धातुत्वम्, तस्मिन्नेवार्थे तस्मादेव द्वितीयान्तात् "अमाव्ययात् क्यन् च" [ ३. ४. २३. ] इति क्यन्, "क्यनि" [ ४. ३. ११२. ] इति अवर्णस्येत्वे कृते पुत्रीयेत्यस्य धातुत्वम्। **अश्वतीति**—अश्व इवाचरतीत्यर्थे "कर्तुः क्विप् गल्भ-क्लीब-होडात् तु ङित्" [ ३. ४. २५. ] इति क्विप्, तस्याप्रयोगित्वेनेत्वे तदन्तस्यानेन धातुत्वात् त्याद्युत्पत्तिः। **श्येनायते** इति—श्येन इवाचरतीर्थे "क्यङ्" [ ३. ४. २६. ] इति क्यङ्, "दीर्घश्च्वि-यङ्-यक्-क्येषु च" [ ४. ३. १०८. ] इत्यकारस्य दीर्घे श्येनायेत्यस्य धातुत्वात् त्यादिः। **हस्तयते** इति—हस्तं निरस्यतीत्यर्थे "अङ्गान्निरसने णिङ्" [ ३. ४. ३८. ] इति णिङ्, तदन्तस्यानेन धातुत्वम्। **मुण्डयतीति**—मुण्डं करोतीत्यर्थे "णिज् बहुलं नाम्नः कृगादिषु" [ ३. ४. ४२. ] इति णिज्, तदन्तस्य धातुत्वम्।

एवं नाम्नां धातुत्वमुदाहृत्य सौत्रादीनामपि केषांचित् क्रियावाचित्वेन धातुत्वमाह—**एवं जु-स्तम्भु-चुलुम्पादीनामिति**—'जु' इति सौत्रो धातुर्वेगार्थः, तस्य धातुत्वे सति तस्मात् कृत्यने—**जवनः** इति। **स्तभ्नातीति**—स्तम्भुधातुः सौत्रः स्तम्भनार्थः, तस्य धातुत्वे त्यादिः। **चुलुम्पांचकारेति**—चुलुम्प इति वाक्यकरणीयो धातुर्विनाशार्थः, तस्य धातुत्वे परोक्षायाम् "धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्" [ ३. ४. ४६ ] इति आमि परोक्षान्तस्य करोतेरनुप्रयोगे च चुलुम्पाञ्चकारेति। **प्रेङ्खोलयतीत्यपि** वाक्यकरणीयधातोरेवोदाहरणम्, प्रेङ्खोलधातुर्णानुबन्ध आन्दोलनार्थो वाक्यकरणीयश्चुरादिः, तस्मात् स्वार्थे णिचि तदन्तस्य धातुत्वे—**प्रेङ्खोलयतीति**। अन्ये वैयाकरणाः प्राकृतादिधातूनां पात्रविशेषप्रयोगविषयाणां क्रियार्थत्वेऽपि धातुत्वनिवृत्त्यर्थं पाठविशेषान्तर्गतत्वमपि धातुत्वप्रयोजकमाश्रयन्ते, तस्य स्वमतेऽन्यथासिद्धिमाह—**शिष्टप्रयोगानुसारित्वादस्य लक्षणस्याणपयत्यादिनिवृत्तिरिति**, शिष्टप्रयोगशब्दो द्विधा व्याख्यातुं शक्यते—शिष्टानां धातूनां प्रयोगः—शिष्टप्रयोग इति, शिष्टानामाप्तपुरुषाणां प्रयोगः शिष्टप्रयोग इति, पूर्वत्र शिष्टशब्दो लक्षणसूत्रैः पृथक्शिष्टत्वप्रतिपादितत्वार्थकः, प्रयोगशब्दश्च पाठार्थकः, तथा चाचार्यैर्लक्षणादिना पाठसन्निविष्टानामेव धातूनां धातुत्वस्यानुसरणशीलत्वादस्य लक्षणस्य तद्भिन्नानामाणपयतीत्यादीनां न धातुत्वेन साधुत्वमिति तदर्थः। नन्वेवं पाठ एव शिष्टानां धातूनां विधीयतां लक्षणस्यास्य न किमपि प्रयोजनमिति चेदत्राह—**शिष्टज्ञानाय चेदं लक्षणमिति**, अयमाशयः—पाठपठिता अपि क्रियार्था एव धातवो ज्ञेया इति परिज्ञानाय प्रकृतसूत्रस्यावश्यकत्वम्, तेन च पठितसदृशानामपि या-वाप्रभृतीनां सर्वाद्यव्ययादीनां न धातुत्वं क्रियार्थत्वाभावात्, आणपयत्यादीनां तु क्रियार्थत्वेऽपि शिष्टत्वाभावान्न धातुत्वमिति विवेकः। आणपयतीत्यस्य स्थाने भाष्य-कैयटादावाणवयतीति प्रयोगो दृश्यते, तथा चोभयमपि संभाव्यते लक्षणाननुशिष्टेषु स्वरूपनिर्णयस्याभावात्। तथा च यद्यपि शिष्टप्रयुक्तत्वज्ञानाय पाठस्य लक्षणस्योभयस्यावश्यकत्वमिति समायाति, तथापि लक्षणेन पाठोऽनुशिष्यत इति लक्षणस्यैव प्राधान्यादावश्यकत्वं, पाठे तु विपर्यासस्यापि दर्शनात् तस्य नात्यावश्यकत्वमिति विशकलितोऽर्थः।

इत्थं क्रियार्थस्य धातुत्वमुदाहृत्य धातोः क्रियार्थत्वसाधनायाह—**अन्वय-व्यतिरेकाभ्यां च धातोः क्रियार्थत्वावगमः** इति, अयमाशयः—यस्मिन् शब्दे सति योऽर्थः प्रतीयते स तदर्थः, यस्मिन्नसति च योऽर्थो न प्रतीयते स तदर्थः, पूर्वः पक्षोऽन्वयानुसारी परः पक्षश्च व्यतिरेकानुसारी, तत्सत्त्वे तदितरयावत्कारणसत्त्वे च तत्सत्त्वमन्वयः, तदसत्त्वे तदसत्त्वं व्यतिरेकः, ताभ्यां कारणता निश्चीयते, तथा च यस्मिन् शब्दे सति योऽर्थः प्रतीयते, असति च तस्मिन् न प्रतीयते स तस्यैव शब्दस्यार्थ इति निश्चीयते। तावेवान्वयव्यतिरेकौ प्रदर्शयति—**तथाहीत्यादिना**, तथाहीत्यस्य तदेव प्रदर्श्यत इत्यर्थः। किमित्याह—**पचतीत्यादाविति**, अयमाशयः * न केवला प्रकृतिः प्रयोक्तव्या नापि केवलप्रत्ययः * इति न्यायेन प्रत्ययसहितस्यैव पचादेर्लौकिके प्रयोगे प्रसिद्धिः। एवं च पचतीत्याद्येव प्रयुज्यते, तत्रांशद्वयम्—'पच्' इति प्रकृतिः, 'अति' इति प्रत्ययः, तेन च समुदायेन एककर्तृका वर्त्तमानकालिका विक्लित्यनुकूला क्रिया प्रतिपाद्यते, तत्र यद्यपि वाक्यार्थबोधकालेऽखण्डमेव पदमखण्डस्यैवार्थस्य-

"Aho Shrutgyanam"

प्रतिपादकमिति, तथापि शास्त्रकृद्भिरन्वयव्यतिरेकाभ्यां पदस्य सखण्डतां परिकल्प्य तदीयावान्तरखण्डानामर्थविशेषाः परिकल्प्यन्ते। तावन्वय-व्यतिरेकौ चेत्थं परिकल्पनीयावित्याह- **पचतीति प्रयोगे द्वयं श्रूयते** इत्यादिना, अयमाशयः---पचतीति प्रयोगः संसृष्टक्रियाकाल-कारकाद्यनेकार्थाभिधायी, क्रिया च कालश्च कारकं चेति क्रियाकालकारकाणि तान्यादौ येषां ते च ते संसृष्टाः क्रियाकालकारकादयः---संसृष्टक्रियाकालकारकादयः, ते च ते ऽनेके अर्थाः---संसृष्टक्रियाकालकारकाद्यनेकार्थाः, तानभिधत्त इति संसृष्टक्रियाकालकारकाद्यनेकार्थाभिधायी, तादृशश्च पचतीति प्रयोगः, तेन हि विक्लित्त्यनुकूला वर्त्तमानकालिका कर्तृकारकगता एककर्तृका क्रियाऽभिधीयते, आदिपदेन संख्यायाः परिग्रहात्, एते चार्थाः परस्परं संसृष्टाः क्रियामेव विशिषन्ति। तत्रायं क्रमः---कालकारकौ क्रियाविशेषणं, संख्या च कारकस्य [ कर्तुः ] विशेषणमिति। एवं चास्मिन् पचतीति प्रयोगे द्वावंशौ-प्रकृतिः प्रत्ययश्च, 'पच्' इति प्रकृतिः, तत एव प्रत्ययस्य विधानात् प्रत्ययपूर्वस्यैव प्रकृतित्वात्, तत्रोभयोरंशयोरर्थावपि प्रतीयेते, प्रकृत्यंशस्य विक्लित्तिः---अवयवशैथिल्यपूर्वक आर्द्रीभावः, प्रत्ययांशस्य कर्तृत्वमेकत्वमिति, अत्र वर्त्तमानतेत्यपि शेषः। इत्थमन्वयं प्रदर्श्य व्यतिरेकमाह---**पठतीत्युक्ते कश्चित् शब्दो हीयते** इत्यादिना, हीयत इति कर्मकर्तरिप्रयोगः, प्रयोक्ता शब्दं न जहात्यपि तु शब्दः स्वयमेव हीयत इत्याशयात्, पूर्वप्रयोगस्थ इति शेषः। **कश्चिदुपजायते** हीनस्य शब्दस्य स्थान इति शेषः।

**कश्चिदन्वयी**ति---पूर्वोत्तरप्रयोगयोः साधारण्येन सम्बन्धीति भावः। उक्तार्थमेव स्पष्टयति **'पच्' शब्दो हीयते** इति-प्रकृत्यंशो व्यतिरिच्यत 'इति भावः। पठ्शब्द उपजायते इति---प्रकृत्यन्तरत्वेन श्रूयत इति भावः। **अतिशब्दोऽन्वयी**ति---प्रत्ययांश उभयसाधारण इति भावः। न केवलं शब्दस्यैव हानोपजननान्वयाः, अपि तु अर्थस्यापि ते भवन्त्येव शब्दार्थयोरव्यतिरेकादित्याह- **अर्थोऽपि कश्चिद्धीयते** इत्यादिना, कश्चिदित्येतेनानिश्चितस्वरूपमर्थं निश्चिनोति---**विक्लित्तिर्हीयते** इत्यादिना---विक्लित्त्यर्थो न गम्यते इति भावः। **पठिरुपजायते** इति--पाठार्थः प्रतीयत इति भावः। **कर्तृत्वमेकत्वं चान्वयी**ति---पूर्वप्रयोगसाधारण्येनेहापि तत्प्रतीतिरिति भावः, अत्रान्वयीति पुंलिङ्गनिर्देशोऽर्थशब्दापेक्षया, अन्यथा कर्तृत्वमेकत्वञ्चान्वयि इति, कर्तृत्वमेकत्वं चान्वयिनी इति वा निर्दिश्येत। निगमयति- **तेन मन्यामहे** इत्यादिना, एतेनान्वयव्यतिरेकदर्शनेन, **यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते** इति---पठतीत्यत्र यस्य शब्दस्य [ 'पच्' इत्यस्य ] अभावे योऽर्थो [ विक्लित्तिः ] न प्रतीयते सोऽर्थस्तस्यैव [ अभावप्रतियोगिनः ] शब्दस्य, **यश्च शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते** इति---पठ्शब्द उपजायत इति तस्यासौ पाठरूपोऽर्थः, यः पाठरूपोऽर्थः पठतीत्यत्र प्रतीयत इत्यर्थः। **यश्च शब्दोऽन्वयी तस्यासावर्थो योऽन्वयी**ति---यश्च अतिशब्दोऽन्वयी पचतिपठत्योः साधारण्येन वर्त्तमानः [अतिशब्दः] तस्यासौ [ कर्तृत्वैकत्वरूपः ] अर्थः, यः कर्तृत्वैकत्वरूपः, अन्वयीसाधारण्येन संसृष्ट इत्यर्थः। किञ्च सामान्यविशेषभावेन प्रतीतेरपि पचादीनां क्रियार्थत्वमवगम्यते, यतः किं करोतीति प्रश्ने पचतीत्युत्तरम्, किं करिष्यतीति प्रश्ने पक्ष्यतीत्युत्तरम्, किमकार्षीदिति प्रश्ने च अपाक्षीदित्युत्तरं दृश्यते, तथा च कृगा सामान्यक्रियावाचिना प्रश्ने सति पचादिभिः क्रियाविशेषवाचिभिरेवोत्तरं संभाव्यत इति तेषां क्रियाविशेषवाचित्वमवगम्यते, यदा तु किं करोतीति प्रश्ने, न करोत्यास्त एव केवलमित्युत्तरं तदा व्यापारसामान्यस्यावश्यंभावित्वाद् व्यापारविशेषविषयः प्रश्नः, प्रतिवचनं तु विशेषनिराकरणपरमिति बोध्यम्। तथा च धातुलक्षणे क्रियात्वद्व्याप्यान्यतरवाचित्वं विवक्षितमिति न दोषः। यद्यपि करोतिर्गन्धनावक्षेपणादिष्वपि वर्तते, "गन्धनाऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे" [३.३.७६] इति सूत्रेणैतदर्थात् कृग आत्मनेपदविधानात्, तथापि सामान्यभूतः कारकव्यापार एव तदर्थः प्रसिद्धः। तत्र करोतिर्व्यापार-सामान्यवाची, तद्विशेषवाचिनः पचादयः, किं करोतीत्यस्य यत् करोति तत् किमिति व्यापारविशेष-विषयप्रश्नोऽर्थः। एवं च यन्निष्ठतया प्रश्नविषयक्रियायाः करोतिशब्दवाच्यायाः प्रतीतिस्तन्निष्ठतयैवोत्तरभूतपचतिशब्दवाच्यक्रियायाः प्रतीतिरिति तयोः सामानाधिकरण्यम्, तत्र क्रियाप्रश्नजनकजिज्ञासायास्तद्विषयोत्तरेणैव निरासादेषां क्रियावाचित्वमिति भावः। नन्वेवमुभयोः सामान्यविशेषरूपत्वे स्वीकृते पनसो वृक्ष इति वत् पचति करोतीति सहप्रयोगापत्तिरिति चेन्न-केवलस्य धातोः प्रयोगाभावेन त्यादिप्रयोगे तदर्थपौनरुक्त्यभिया तथा प्रयोगाभावात्। यत्र तु नेदृशं बाधकं तत्र एधांचकार इत्यादिः विशेषसामान्यवाचिनोः सह प्रयोगो भवत्येव। इत्थं करोतिसामानाधिकरण्येन पचादीनां क्रियावाचकत्वसाधने

"Aho Shrutgyanam"

शङ्कते—**ननु च कृतिः करोत्यर्थः क्रिया, तत्र युक्तमित्या**दिना, अयमाशयः-कृतिः क्रियेति समानार्थके पदे, तत्र कृतिरित्यनेन कृधात्वर्थः कथ्यते, तथाच करोत्यर्थ एव क्रिया । तत्र किं करोति ? 'पचति, पठति वा' इत्यादि प्रश्नप्रतिवचनानुगुण्येन पचाद्यर्थस्य करोत्यर्थगर्भितत्वात्, पचतीत्यस्य पाकं करोतीति विवरणात् पठतीत्यस्य पाठं करोतीति विवरणाच्च पचादीनां क्रियार्थत्वं युक्तम्, अस्ति-विद्यते-भवतीनां तु क्रियार्थत्वं न युक्तम्, किं करोतीति प्रश्ने 'अस्तीति, विद्यत इति, भवतीति वा' प्रतिवचनस्यादर्शनात्, अस्तीत्यस्य सत्तां करोतीत्यादिविवरणादर्शनाच्चेति प्रश्नार्थः । उत्तरयति— **तदयुक्तमि**ति—इति यत् पृष्टं तन्न युक्तमिति भावः । अयुक्तत्वमेव प्रतिपादयति— **न करोत्यर्थः क्रियाशब्दस्यप्रवृत्ति निमित्तमपि तर्हि कारकव्यापारविशेषः** इति, अयमाशयः—अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यद्धि प्रवृत्तिनिमित्तमिति रीत्या कृधातुनिष्पन्नोऽपि क्रियाशब्दो न करोत्यर्थमेवाहापि तु कारकव्यापारविशेषमेव, स च कारकव्यापारो नैकरूपोऽपि तु प्रतिप्रयोगं भिन्नरूप एव, तत्र क्वचित् करोत्यर्थगर्भः क्वचिच्च तदतिरिक्त इत्यत्र स्वभाव एव शरणम्, तदाह— **व्यापारश्च व्यापारान्तराद् भिद्यत इत्यस्त्याद्यर्थोऽपि क्रियैवेति**—अस्तीत्याद्युक्तेऽपि आत्मधारणानुकूला क्रियैव प्रतीयत इति नाऽस्तिभवति-विद्यतीनां क्रियार्थत्वाभावः । नन्वेवं करणं क्रियेति विग्रहेण सह विरोध इति चेदत्राह- **करोत्यर्थस्तु क्रियाशब्दस्य व्युत्पत्तिमात्रमि**ति—प्रवृत्तिनिमित्ताद् व्युत्पत्तिनिमित्तस्य भेदस्तु न स्वकल्पितोऽपि तु शास्त्रकृत्सम्मत एवेति प्रतिपादितमधस्तात्, तथा च क्रियाशब्दनिष्पत्तिप्रयोजनकमेव करोत्यर्थेन विग्रहप्रदर्शनं, न तेन तन्मात्रार्थकत्वं क्रियाशब्दस्येति भावः । तथा च पर्यवसितमभिधत्ते— **एवं सतिक्रियासामान्यवचनाः कृभ्वस्तयः, क्रियाविशेषवचनास्तु पचादय इति सिद्धमि**ति, अयमाशयः— कृभ्वसामर्थाः प्रायः सर्वासु क्रियास्वनुस्यूता इति क्रियासामान्यार्थत्वं तेषाम्, अतएव क्रियाविशेषवाचिना सह तस्य प्रयोगोऽपि भवति—'एधांचक्रे, एधांबभूवे, एधामास' इत्यादि । तत्रैधतिः क्रियाविशेषवृद्ध्यर्थकः करोत्यादयश्च सामान्यार्था इति भवति तयोरेकत्र प्रयोगे समावेशः, एधांचक्रे इत्यादीनां चार्थे साम्यमपि कृभ्वसामर्थस्य सामान्यरूपत्वं प्रमाणयति, 'एधांचक्रे, एधांबभूवे, एधामास' इत्यादौ सर्वत्र एककर्तृका भूतानद्यतनपरोक्षा वृद्ध्यभिन्ना क्रियेति प्रतीतेः । ननु करोतिः सकर्मको भवतिस्त्वकर्मक इति कथमिह तुल्यतेति चेत् ? अत्राहुः— यदा हि करोतिरुत्पादनार्थकः स्वातन्त्र्येण प्रयुज्यते—'घटं चक्रे, राज्यं चकार' इत्यादि, तदा नियमतः सकर्मकत्वम्, यदा तु क्रियान्तरसमानाधिकरणः करोतिः "प्रयुज्यते—जुहुवांचकारेत्यादौ तदा यत्समानाधिकरणः" करोतिस्तस्य सकर्मकत्वाऽकर्मकत्वाभ्यां स्वयमपि तथाभावं भजते, एवं भ्वस्त्योरप्याम्प्रकृतिसामानाधिकरण्येन क्वचित् सकर्मकत्वं बोध्यम् । अत एवानुप्रयुज्यमानाद् भवतेः सकर्मकत्वात् कर्मणि परोक्षा, तथा च **माघः**—

"जगत्पवित्रैरपि तन्न पादैः
स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो बृहत्पार्वणचन्द्रचारु,
तस्यातपत्रं विभरांबभूवे" [शि. व. तृ. सर्गे ] ।

इति । श्रीहर्षोऽपि—

"तपर्त्तुपूर्त्तावपि मेदसांभरा
विभावरीभिर्बिभरांबभूविरे ।"

इति प्रायुङ्क्त । कृभ्वोः सामान्यार्थत्वे प्रमाणान्तरमप्याह—**तथा 'भावे घञ्' इत्युक्त्वा कारः पाक इत्यादयोऽप्युदाह्रियन्ते** इति—"भावाऽकर्त्रोः" [ ५. ३. १८. ] इत्यादिभिः सूत्रैर्भावे घञ् विधीयते, भावश्च भवनं भाव इति व्युत्पत्त्यनुसारं भवत्यर्थः, स च सामान्यरूपः करोत्यर्थेन तुल्यश्च न चेत् तर्हि 'कारः पाकः' इति तदुदाहरणं कथं संगतं स्यात् । प्रमाणान्तरमप्याह—**'क्रियोपपदाद्धातोस्तुम्' इत्युक्त्वा योद्धुं धनुर्भवती**यादि—"क्रियायां क्रियार्थायां तुम्" [ ५. ३. १३. ] इत्यादिसूत्रेण क्रियार्थायां क्रियायामुपपदे तुम् विधीयते, योद्धुं धनुर्भवतीत्यादि चोदाह्रियते, तथा च भवत्यर्थोऽपि क्रिया चेन्न स्यात् क्रियोपपदाद् विधीयमानस्तुम्प्रत्ययोऽत्र न स्यादित्युभयथा भावक्रियापदयोः समानार्थत्वमवगम्यत इति भवति कृभ्वसां क्रियासामान्यार्थत्वम् । अभियुक्तोक्त्यापि भ्वस्त्योः क्रियार्थत्वं साधयति—**यदाहुः—"यत्राऽन्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषे प्रयुज्यते"** इति—यत्र-वाक्ये, अन्यत्—अस्त्यादिव्यतिरिक्तं पचतीत्यादि, क्रियापदं, न श्रूयते-न प्रयुज्यते, तत्रास्तिः—सत्तार्थकं क्रियापदं, भवन्तीपरः—वर्तमानाप्रत्ययान्तः, प्रथमपुरुषे—युष्मदस्मदसामानाधिकरण्यनिमित्तके पुरुषे, प्रयुज्यते—अध्याह्रियत इति तदर्थः, अयमाशयः—प्रयोक्ता सौकर्याय त्वरया वा देवदत्तः पृष्टः—

"Aho Shrutgyanam"

कोऽयमिति, तत्र किमपि क्रियापदं न श्रूयते, भवति च वक्तुः कोऽयमस्तीति प्रतीतिः, सा च अस्तीति क्रियापदस्य स्वाभाविकोपस्थित्यैवेति अस्ति-भवतिप्रभृतीनां सर्वक्रियासाधारण्यं गमयतीति भवति तदर्थस्यापि क्रियात्वमिति तेषां धातुसंज्ञा निर्बाधेति ।

अथ क्रियाया भेदं व्याचष्टे--**क्रिया च द्वेधा-सिद्ध-साध्यत्वभेदात्** इति--सिद्धं च साध्यं चेति सामान्यतो नपुंसकेन विगृह्य सिद्ध-साध्ये इति, तयोर्भावः-सिद्धसाध्यत्वमिति, द्वन्द्वान्ते श्रूयमाणतया भावार्थप्रत्ययस्य प्रत्येकं सम्बन्धात् सिद्धत्व-साध्यत्वभेदादित्यर्थः पर्यवस्यति, तथा च क्रिया द्विप्रकारा--सिद्धा साध्या चेत्यर्थः । तौ भेदौ विशदयति--**तत्र सिद्धस्वभावोपसंहृतक्रमा परितः परिच्छिन्ना सत्त्वभावमापन्ना घञादिभिरभिधीयते** इति-तत्र-तयोर्भेदयोर्मध्ये, सिद्धस्वभावा क्रिया घञादिभिरभिधीयत इति सम्बन्धः, तस्याः स्वरूपमाह--उपसंहृतक्रमा-उपसंहृतः-विभज्यागृहीतः, क्रमः-पूर्वापरीभावो यस्यास्तादृशी, अतएव परितः परिच्छिन्ना-सर्वतोभावेन सर्वात्मना परिनिष्ठितस्वरूपा, सत्त्वभावं-द्रव्यस्वभावं लिङ्ग-संख्यान्वयित्वरूपम्, आपन्ना-प्राप्ता, सिद्धस्वभावा क्रिया घञादिभिः-घञ्-अनट्-क्त्यादिप्रत्ययैः, अभिधीयते-वृत्त्या बोध्यत इत्यर्थः । तदुक्तं **हरिणापि--**

"आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥" इति ।

अयमर्थः--आख्यातशब्दे-पचतीत्यादौ, भागाभ्यां--प्रकृति-प्रत्ययाभ्यां, साध्यसाधनवर्त्तिता-साध्यरूपता साधनरूपता च, यथा शास्त्रे प्रकल्पिता-बालव्युत्पादनाय शास्त्रकारैरारोपिता, स-साध्य-साधनरूपतासदृशप्रकृति-प्रत्ययार्थविभागक्रमः, घञादिष्वपि-घञादिप्रत्ययान्तेषु 'पाक' इत्यादिस्थलेष्वपि, विद्यत इति शेषः । तत्र तस्य क्रमस्य सिद्धसाध्यत्वरूपत्वमित्याह--साध्यत्वेनेत्यादि, तत्र-घञादिस्थले, क्रिया साध्यत्वेन धातुरूपनिबन्धना--धातुना साध्यत्वेन क्रिया प्रतीयते इति प्रकृतिभागस्य साध्यावस्थापन्नक्रियाबोधकत्वमित्यर्थः, तस्याः--क्रियायाः, यस्तु सत्त्वभावः--सिद्धस्वरूपद्रव्यस्वभावः, स घञादिनिबन्धनः-घञादिप्रत्ययप्रतिपाद्य इत्यर्थः । तमिममर्थमभियुक्तोक्त्या प्रमाणयति--यदाह--

**"कृदभिहितो भावो द्रव्यवत् प्रकाशते"** इति-कृदभिहितः--कृत्प्रत्ययबोध्यः, भावः--क्रियापदार्थः, द्रव्यवत्-सत्त्वस्वभावापन्नः सन्, प्रकाशते-बोधविषयो भवतीत्यर्थः, अयमाशयः-आख्यातशब्दे प्रकृतिभागेनाभिधीयमाना क्रिया साध्यत्वेन प्रतिपाद्यत इति तस्यां कारक-संख्यादिसम्बन्धो न भवति, 'पाकः' इत्यादौ च साध्यस्वभावाया एव क्रियायाः सिद्धरूपत्वमपि प्रतीयत इति तत्र कर्तृत्वादिकारकस्य "पाको भवति, पाकं पश्यति, पाकायौदनम्" इत्यादिप्रयोगे द्वित्वादिसंख्यायाश्च 'पाकौ भवन्तिः, पाका भवतः' इत्यादिरीत्या प्रतीतिर्भवति । आख्यातशब्दे च कारकत्वसंख्यादि न क्रियायां प्रतीयतेऽपि तु कर्त्रादावेवेति, सिद्ध-साध्यक्रिययोर्भेदः । 'कृदभिहित' इत्युक्त्या सामान्यतः कृत्प्रत्ययोक्तभावार्थस्य सिद्धत्वप्रतिपादनात् तुमन्ते च सिद्धस्वभावानुपलम्भेनोक्तनियमे व्यभिचारमाशङ्कयाह--**तुमादिभिस्तु सत्त्वस्वभावमनापन्नेति विशेषः** इति-तुमादिभिरित्यत्र आदिपदेन क्त्वा-णम्प्रत्यययोः संग्रहः, तावपि प्राक्कालविशिष्टे धात्वर्थसम्बन्धे विहिताविति क्रियावाचिनौ किन्त्वव्ययत्वेन लिङ्गसङ्ख्यानन्वयित्वान्न तदन्तानां सत्त्वरूपत्वमिति यद्यपि तत्र "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति नियमस्य व्यभिचारस्तथाप्यभिधानस्वाभाव्यमाश्रित्य तत्समाधातव्यमिति भावः । सिद्धस्वरूपां क्रियामुक्त्वा साध्यस्वरूपान्तामाह--**साध्यमानावस्था पूर्वापरीभूतावयवा भूत-भविष्यद्वर्त्तमान-सदसदाद्यनेकावयवरूपाऽऽख्यातपदैरुच्यते** इति-साध्यमानावस्था क्रिया आख्यातपदैरुच्यते इत्यन्वयः, साध्यमाना साधन-सम्बन्धमनुभवन्ती, अवस्था-स्वरूपं यस्याः सा-क्रिया, आख्यातपदैः-त्याद्यन्तैः, उच्यते-प्रतिपाद्यत इत्यर्थः, साध्यस्वरूपाया लक्षणमाह--पूर्वापरीभूतावयवेति-पूर्वापरीभूताः--क्रमावस्थिताः, अवयवाः-अवान्तरविशेषा यस्यास्तथाभूता, पूर्वापरीभावमेव विशदयति-भूत-भविष्यद्-वर्त्तमानेत्यादिना, भूतो भविष्यन् वर्त्तमानश्चेति--भूतभविष्यद्वर्त्तमानाः, ते च ते सदसन्तः, एवमादयोऽनेकेवयवा यस्या इति द्वन्द्वपूर्वपदककर्मधारयपूर्वपदकबहुव्रीहिः । अयमर्थः--साध्यमानायाः क्रियाया अवयवानां पूर्वापरीभावे भूतत्वं भविष्यत्वं वर्त्तमानत्वं च मूलम्, पचतीत्यादिप्रयोगकालेऽपि पाकक्रियाया अधिश्रयणाद्यवश्रयणान्तायाः केचिदवयवाः सम्पन्ना इति ते भूतकालिकाः, केचिच्च सम्पत्स्यमाना इति भविष्यत्कालिकाः, केचिच्च विद्यमाना इति वर्तमानकालिकाः, संपूर्णायाश्च

"Aho Shrutgyanam"

क्रियायाः प्रारब्धापरिसमाप्तत्वेन वर्त्तमानत्वमक्षतमेव, यत्र च 'अपाक्षीत्; पक्ष्यति' इत्यादिर्भूत-भविष्यतोः प्रयोगस्तत्रापि तत्तत्काल-वर्त्तमानं क्रममादायावयवानां भूत-भविष्यद्-वर्त्तमानत्वमव्याहतमेव । भूत-भविष्यद्वर्त्तमानेत्यस्यैवोपव्याख्यानं-**सदसदादिति**-भूत-भविष्यन्तावसन्तौ, वर्तमानश्च सन्, भूत-भविष्यदवयवानां वर्त्तमानकालेऽसद्रूपत्वस्य साधारण्यादसत्त्वेन-व्यवहारयोग्यता, आदिपदेन च प्रत्यक्ष-परोक्षत्वयोः संग्रहः, भूत-भविष्यन्तः परोक्षाः, वर्त्तमानाश्च प्रत्यक्षाः, तथा च भूत-भविष्यद्-वर्त्तमानानां सदसतां प्रत्यक्ष-परोक्षाणां वाऽवयवानां यौगपद्येन स्थितिविरहात् पूर्वापरीभूतावयवत्वं स्पष्टमिति पर्यवसितोऽर्थः । उक्तार्थे प्राचीनोक्तिं प्रमाणयति-**यदाह-पूर्वापरीभूतं भावमाख्यातमाचष्टे**" इति—आख्यातं त्याद्यन्तं पदं, पूर्वापरीभूतं क्रमापन्नं, भावं-धात्वर्थम्, आचष्टे-प्रतिपादयतीति तदर्थः । पाकादौ क्रियावयवानां पूर्वापरीभावस्य स्पष्टमवगम्यमानत्वेन तत्र तन्निश्चयेऽप्यस्त्यादौ तदप्रतीत्या तत्र कथमुक्तरूपं साध्यमानावस्थालक्षणं संगच्छत इत्याशङ्कायामाह-**यथा च पचतीत्यत्र पूर्वापरीभावस्तद्वदेव 'जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, भवति, श्वेतते, संयुज्यते, समवैति' इत्यादावपीति**-न केवलं पचतीत्यादिविशकलितानेकावयवकक्रियायामेव पूर्वापरीभावोऽपि तु जायत इत्यादिसमुग्धावयवकक्रियास्वपीति समुदितार्थः । तत्र 'जायते' इत्यनेन प्रादुर्भावस्य वर्त्तमानत्वमभिधीयते, प्रादुर्भावश्च क्रमिक एव, अवयविन एव प्रादुर्भावसम्बन्धः, अवयवी च क्रमशोऽवयवप्रादुर्भावेणैव प्रादुर्भवतीति क्रमोऽवश्यम्भावीति तत्राऽस्ति पौर्वापर्यम् । एवमस्तीत्यनेनावयविनो वर्त्तमानकालसम्बन्धिनी सत्ता प्रतिपाद्यते, तत्राप्यवयवानां क्रमेण तत्सम्बन्धिन्याः सत्ताया अपि क्रमोऽवश्यंभावी, निरवयवस्यात्मादेरपि सत्ता सूक्ष्मतत्तत्कालसम्बन्धात् क्रमिकत्वं न जहाति । 'विपरिणमते' इति कस्यचन वस्तुनस्तात्त्विकोऽन्यथाभावः सम्पद्यमान आख्यायते, अन्यथाभावश्चावयविन एवेति तत्राप्यवयवानां क्रमेणैवान्यथाभाव इति क्रमः सिद्धः । 'वर्धते' इति पदेनावयवोपचय उच्यते, सोऽपि क्रमिक एव यौगपद्येन सर्वावयववृद्ध्यसंभवात् । 'अपक्षीयते' इत्यनेन चावयवापचय उच्यते, सोऽपि चावयवक्रमेणैवेति क्रमिक एव । 'विनश्यति' इत्यनेनापि सर्वावयवादर्शनमेव कथ्यते, तदपि क्रमिकमेवेति सिद्धस्तत्रापि पूर्वापरीभावः । 'भवति' इत्यात्मधारणानुकूला क्रिया वर्त्तमानाऽभिधीयते, सा च क्रिया आत्मनः ( स्वरूपस्य ) अवयवस्वीकारात्मिकैवेति भवति तत्राप्यवयवद्वारा क्रमः, निरवयवेषु [ नित्येषु ] तथा [ भवतीति ] व्यवहारस्यासत्त्वात् । 'श्वेतते' इति श्वेतगुणोत्पत्तिर्वर्त्तमानाऽभिधीयते, साऽप्यवयविनि संभवति, न निरवयवे, अवयविनश्चावयवक्रमेणैव श्वेतगुणसम्बन्ध इति भवति तत्रापि क्रमः । 'संयुज्यते' इति द्रव्यस्य द्रव्यान्तरेण संयोगो वर्त्तमान उच्यते, सोऽपि चावयवानां परस्परं सम्बन्धमन्तरेण न सम्भवतीति तत्राप्यवयवद्वारा क्रमः । 'समवैति' इत्यनेन अवयवाऽवयविनोर्जाति-व्यक्त्योर्द्रव्य-गुणयोर्वा सम्बन्धो जायमान उच्यते, इति तत्राप्यवयविव्यक्ति-द्रव्याणां सावयवानां क्रमेणैवावयवादिसम्बन्धः सम्भवति । यद्यपि जाति-व्यक्त्योः सम्बन्धो न क्रमिको जातेर्निरवयवायाः क्रमेण सम्बन्धासंभवात् तथापि व्यक्तेः क्रमिकोत्पत्तिवशाज्जातेरपि क्रमिकः सम्बन्धोऽनुभूयत इवेति तत्रापि क्रमो न विसंवादीति सर्वत्र क्रमस्य सत्त्वात् पौर्वापर्यमक्षतमिति निष्कर्षः । क्रमस्वीकारे हेतुमाह-**साध्यत्वाभिधानेनेति**, तथा च 'यथा च पचतीत्यत्र' इत्यारभ्य 'क्रियाव्यपदेशः सिद्धः' इत्यन्तमेकमेव वाक्यम्, 'जायते' इत्याद्युक्तप्रयोगेष्वपि साध्यत्वाभिधानेन-साध्यमानावस्थाप्रतिपादनेन, क्रमरूपाश्रयणात्—पूर्वापरीभावस्वीकारात्, क्रियाव्यपदेशः-क्रियात्वव्यवहारः सिद्धलक्षणानुगत इत्यर्थः । स्वोक्तार्थं हरिकारिकया प्रमाणयति-**यावत् सिद्धमसिद्धं वेति**—सिद्धं-सत्तासमवायादि, असिद्धं-घटपटादिः, यावत्-सर्वं यदि साध्यत्वेन साधनसमवायत्वेन, अभिधीयते-विवक्ष्यते, उच्यते वा तत् क्रिया' इति, प्रतीयते-ज्ञायत इत्यन्वयः । तत्र हेतुमाह-**आश्रितक्रमरूपत्वादिति**-आश्रितं क्रमरूपं-पूर्वापरीभावो यया सा आश्रितक्रमरूपा, तस्या भावः-आश्रितक्रमरूपत्वं, तस्मात् साध्यत्वेन प्रतीयमानवस्तुनः क्रमरूपावश्यंभावादिति भावः । सर्वस्यापि साध्यत्वेनाभिधीयमानस्य क्रियात्वकथनेनास्त्याद्यर्थस्यापि क्रियात्वं सिद्धमिति मूलाशङ्कासमाधानं पर्यवसितं वेदितव्यम् । नन्वेतावता प्रबन्धेन अस्त्यर्थस्य सत्ताया अपि साध्यत्वेनाभिधानात् क्रियात्वमिति प्रतिपादितं, तच्च न युक्तं, सत्ताया नित्यत्वेन साध्यमानताऽसम्भवादिति चेदुच्यते-उक्तहरिकारिकारीत्या वस्तुतोऽसाध्यस्यापि साध्यत्वेन विवक्षितस्य साध्यमानत्वमित्यवगमात्, किञ्च क्वचिदेकत्र पाषाणखण्ड-कस्तूरिकयोः समवस्थाने कस्तूरिकामाहात्म्यात् पाषाणखण्डमपि कस्तूरिकाऽऽमोदभाजनं भवति, तथैकत्र पिण्डे क्रियान्तरस्य साध्यमानावस्थस्य पूर्वापरीभावापन्नस्य सत्त्वे तत्साहचर्यात् तत्सम्बद्धायाः सत्ताया अपि साध्यमानत्वावगतेः ।

"Aho Shrutgyanam"

तथा च भाष्यकृताऽस्त्यादीनां क्रियावाचकत्वे यास्कवचनमिदमुपस्थापितम्—"भूवादयो धातवः' [ १.३.१. ] इति सूत्रे—"षड् भावविकारा इति स्माह वार्ष्यायणिः—"जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यति" इति। एतच्च यास्कवचनं कैयटेन द्विधा व्याख्यातम्—"भावस्य क्रियायाः षट् प्रकारा इत्यर्थः, तेषु चास्तिः पठित इति तस्यापि क्रियात्वमित्यर्थः। अथवा भावस्य सत्ताया एते प्रकाराः सत्तैवानेकक्रियात्मिका साधनसम्बन्धादवसीयमानसाध्यरूपा जन्मादिरूपतयाऽवभासत" इति, अयमाशयः- वस्तुतः सत्ताया नित्यत्वैकरूपत्वयोः सत्त्वेऽपि साधनसम्बन्धविवक्षया साध्यरूपतानिश्चयात् जन्मादिशब्दैर्व्यवहारः, उत्पत्ति-विनाशयोरपि सूक्ष्मरूपेण वस्तुनो भावात् तदतिरिक्तेषु "अस्ति, विपरिणमते, वर्धते, अपक्षीयते इत्यादिशब्दप्रतिपाद्यावस्थाविशेषेषु च सत्ताया निर्विवादसिद्धः सर्वत्र सत्तैवानेकक्रियात्मकत्वेन भासत इत्यवसीयते। वेदान्तिनां मते ब्रह्मसत्तैवानेकघट-पटादिरूपाऽतात्त्विकाऽन्यथाभावेन तत्तद्रूपतया भासते, तथैव वस्तुसत्ताऽनेकजन्मादिक्रियारूपा तात्त्विकाऽन्यथाभावभाजन भवतीति परमार्थः, इदं च यास्कवचनं निरुक्ते सम्यग् व्याख्यातमिति विशेषजिज्ञासुभिस्तत एवावगन्तव्यम्।

अत्रेद शङ्कयते-यदि क्रियायाः षडेव प्रकारा इति पूर्वोक्तयास्कवचनेन साध्यते तदा 'स्थितः' इत्यादौ जन्मादिमध्ये कस्यापि प्रकारस्याऽप्रतीतेः क्रियावाचकत्वं न स्यादिति तदभावे ततः क्तप्रत्ययादिर्न स्यात्, इति परिसंख्यायामव्याप्तिदोषः, अव्याप्तिदूषणग्रस्त च परिगणनं कथमस्त्यशे क्रियावाचकत्वे प्रमाणं स्यात्। अत्रोक्त भाष्ये [ १.३.१. ] "एवं तर्हि क्रियायाः क्रिया निर्वर्तिका भवति द्रव्यं द्रव्यस्य निवर्त्तकम्। एव हि कश्चित् कञ्चित् पृच्छति-किमवस्थो देवदत्तस्य व्याधिरिति, स आह वर्धत इति, अपर आह-'अपक्षीयते' इति, अपर आह-स्थित इति। स्थित इत्युक्ते वर्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति" इति, अयमाशयः-जन्मादि क्रियावत् तन्निवृत्तेरपि क्रियात्वमनुमानेन सिध्यति। एव च क्रियायाः क्रियान्तर निवर्त्तक भवति, उत्तरक्रियोत्पत्तौ पूर्वक्रियायाः स्वतः एव निवृत्तेः, द्रव्यस्य यथा द्रव्यान्तरं निवर्त्तक भवति, यथा-'अयं घटः' इत्युक्ते पटादीनां स्वत एव निवृत्तिर्भवति। इत्थं च देवदत्तीयव्याधिविषये अवस्थाप्रश्ने यथा 'वर्द्धते, अपक्षीयते' इत्यनयोरवस्थाविशेषप्रतिपादकत्व तथा परत उक्तेन स्थितः' इति पदेनापि वृद्ध्यपक्षययोर्निवृत्तिरूपा व्याधिस्थितिः प्रतीयते, सा च क्रियैव तत्रानुमानप्रकारश्च-स्थानं क्रिया वृद्ध्यादिक्रियानिवर्त्तकत्वात्, गत्यादिनिवर्त्तकशयनादिक्रियावत्, इत्यन्वयि उदाहरणम्, 'यन्नैवं तन्नैवं यथा द्रव्यम्' इति-व्यतिरेक्युदादरणम्। एवं च स्थितेरपि पूर्वोक्तषट्प्रकारेष्वस्तितायामन्तर्भावाद् न परिगणनाव्याप्तिः, तदुक्तं निरुक्ते—'अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्ति' इति "इस्माह" [१.३ १.] ते यथावचनमभ्यूहितव्याः [१.३ २.] इति। केचन 'षड् भावविकाराः' इति यास्कवचने भावस्य-सिद्धपदार्थस्य षड् विकाराः' इति व्याचक्षते, इति द्रव्यस्यैवेमे विकारा इति न तेन वचनेनास्त्यादीनां क्रियात्वसिद्धिरिति मन्वानं प्रति युक्त्यन्तरमाह भाष्यकृत् तत्रैव "अथवा नान्तरेण क्रियां भूत-भविष्यद्-वर्त्तमानाः काला व्यज्यन्ते, अस्त्यादिभिरपि भूत-भविष्यद्-वर्त्तमानकाला व्यज्यन्ते" इति। अयमाशयः-'घटः' इत्युक्ते कालविशेषावगतिर्नेति, क्रियापदप्रयोगे च तत्प्रतीतिर्भवति, तथा च क्रियैव कालाभिव्यञ्जिकेति सिद्ध्यन्ति, तदुक्तं हरिणापि-"क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका" इति। एवं च 'अस्ति, अभूत्, भविष्यति' इत्यादिप्रयोगेषु वर्त्तमानादिकालप्रतीतेरस्त्यर्थस्य कालाभिव्यञ्जकस्वरूप क्रियात्वं प्रतीयते, तथा चात्राप्यनुमानप्रयोग एष विवक्षितः—'अस्त्यादयः क्रिया भूतादिकालसम्बन्धित्वात् पाकादिवत्' इति। केचित्तु क्रियार्थो धातुरित्यस्य स्थाने "भावार्थो धातुः" इत्येव पठन्ति, तत्र सपरिस्पन्दनसाधनसाध्यो धात्वर्थः क्रिया, अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भाव इति क्रिया-भावयोर्भेदः, अस्तीत्यादिक्रियास्थले च अपरिस्पन्दनसाधनसाध्यत्वाद् भावार्थावगतिर्न तु क्रियात्वप्रतीतिरित्याहुः, तच्च क्रियाभावयोः शास्त्रकृद्व्यवहारेणैक्यस्य प्रतिपादनादेव निरस्तमिति न तदर्थं भूयः प्रयत्यते। नागेशस्तु-क्रियाशब्दः सपरिस्पन्दसाधनसाध्येऽर्थे रूढः, भावशब्दश्च सपरिस्पन्दान्यतरसाधनसाध्ये इत्येवं क्रिया-भावयोर्विशेषमाह। तथा च पचादीनामस्त्यादीनां च क्रियार्थत्वं सिध्यति। भाष्यकृता च भावपदार्थो बहुधा व्याख्यातः, तत्र भवतीति भाव इति कर्तृ-साधनत्वमेव भावशब्दस्य साधितम्, तथा सति नाम्नामपि धातुसंज्ञा प्राप्नोति तदर्थस्याप्युत्पद्यमानत्वादिति तत्परिहाराय पाठनिर्देशः कृतः। "भूवादयो धातवः" [पा.सू. १.३.१.] भुव वदन्तीति विग्रहो भूवादय इत्यस्य प्रदर्शितः, तत्र भवतीति भूः कर्त्तरि क्विप्भाव इत्यर्थः, तं वदन्तीत्यौणादिक इञ्, जायमानमर्थं येऽभिदधति ते भूवादय इत्यर्थः। एवं च भूवादिपदस्यावृत्त्या भाववाचिनो भूप्रभृतयो वा सदृशा धातुसंज्ञा भवन्तीति नाम्नां निवृत्तिरपि साधिता भवति। स्वमते च क्रियार्थस्य धातुत्वे नाम्नां क्रिया-

"Aho Shrutgyanam"

वाचकत्वाभावादेव न धातुत्वम्, अस्त्याद्यर्थस्यापि क्रियात्वमुक्तयुक्त्या साधितमेव । पाठनिर्देशस्य फलान्तरमाणपत्यादिनिवृत्तिश्च शिष्टप्रयोगपरिग्रहेणैव साधितेति सर्वमनवद्यम् ॥ ३. ३. ३. ॥

## न प्रादिरप्रत्ययः ॥ ३. ३. ४. ॥

**त० प्र०—'प्रादिश्चाद्यन्तर्गणः, स धातुः-धातोरवयवो न भवति-तं व्युदस्य ततः पर एव धातुसंज्ञो वेदितव्यः, अप्रत्ययः-न चेत् ततः परः प्रत्ययो भवति । अभ्यमनायत, अभिमिमनायिषते, अभिमनाय्य गतः, प्रासादीयत्, प्रासिसादीयिषति, प्रासादीय्य गतः । प्रादिरिति किम् ? अमहापुत्रीयत् । अप्रत्यय इति किम् ? 'औत्सुकायत, उत्सुसुकायिषते, उत्सुकायित्वा । 'अभिमनायादिः प्रत्ययान्तः स प्रादिसमुदायः क्रियार्थ इति तस्मिन् धातुसंज्ञे प्राप्ते प्रादिस्ततः प्रतिषेधेन बहिष्क्रियते, ततश्च तत उत्तर एव धातुरिति तस्याट् द्विर्वचनं च भवति; प्रादेश्चोत्तरेण समास इति क्त्वाया यबादेशः । असंग्रामयत शूर इति नायं सम् प्रादिः, किन्तु धात्ववयवः, यथा-विच्छाद्यवयवो विः, "संग्रामणि युद्धे" इत्यखण्डस्य चुरादौ पाठात् ॥ ४ ॥**

**श०म० न्यासानुसन्धानम्-न प्रादि० ।** धातुरित्यनुवर्त्तते, तत्र धातुसहचरितस्य प्रादेः क्रियाविशेषकत्वदर्शनात् तत्समुदायस्यैव विशिष्टक्रियावाचकत्वप्रतीतेरुपसर्गसहितस्यैव धातुत्वसंभवात् तस्य चानिष्टत्वात् तन्निषेधार्थमिद सूत्रमिति स्वयमेव वक्ष्यति वृत्तिकृत् । तत्र धातुसज्ञातः पूर्वं भावि धातुसंज्ञकशब्दसहकृतस्य प्रादेर्नोपसर्गसंज्ञेति प्रादिशब्देनैव सूत्रे व्यवहारः। प्रादिशब्दस्यार्थमाह-**प्रादिश्चाद्यन्तर्गणः** इति—चादयोऽव्ययेषु पठिताः "चादयोऽसत्त्वे" [१.१.३१.] इत्यव्ययसंज्ञासूत्रगृहीताः तदन्तर्गण एव प्रादिगण इत्यर्थः । **नेति** शब्देन निषेध्योऽनुवृत्तो धातुरिति, तस्य शब्दस्य पूर्वसूत्रे विधेयसमर्पकतया प्राधान्येन तस्यैवेह निषेध्यत्वेनोपस्थितेः । तत्र प्रादेर्धातुत्वस्य प्राप्तिरेव नास्ति तस्य क्रियावाचकत्वाभावादिति तस्य स्वावयवपरत्वं व्याख्यानादाश्रीयते तदाह-**धातुः-धातोरवयवः** इति-प्रादिसहकृतसमुदायस्यैव धातुसंज्ञाप्राप्तेस्तस्य [ प्रादेः ] धात्ववयवत्वं प्राप्तमिति तत् निषिध्यते, प्राप्तौ सत्यां निषेधस्यौचित्यात् । तस्य धात्ववयवत्वे प्रतिषिद्धे फलितमाह-**तं व्युदस्य ततः पर एव धातुसंज्ञो वेदितव्यः** इति-तं-प्रादिं व्युदस्य धातुकोटेर्बहिष्कृत्य, ततः-प्रादेः, परः-अव्यवहितोत्तरः, क्रियावाची शब्द एव धातुसंज्ञो वेदितव्यः, पूर्वसूत्रानुसारं तन्मात्रस्यैव धातुत्वप्राप्तेरिति भावः । सूत्रस्थम् **अप्रत्ययः** इति पर्युदासपरं पदं व्याख्याति-**न चेत् ततः परः प्रत्ययो भवति** चेत् ?—यदि, ततः-प्रादेः, परः-अव्यवहितोत्तरः, तत्प्रकृतिक इति यावत्, प्रत्ययो न भवति, तदा तस्य धात्ववयवत्व निषिध्यते नान्यथेति भावः, इदं हि आर्थिकार्थकथनम्, अक्षरानुगुण्येन तु प्रत्ययान्तभिन्नः प्रादिर्धात्ववयवो न भवतीत्येवार्थः। उदाहरति-**अभ्यमनायते**ति-अनभिमना अभिमना इवाचरत्' इत्यर्थे "च्व्यर्थे भृशादेः स्तोः" [ ३. ४. २७. ] इति क्यङ्, सकारस्य लुक् "दीर्घश्च्वियङ्-यक्-क्येषु च" [ ४. ३. १०८. ] इति दीर्घे अभिमनायेति, तस्य समुदायस्य क्रियावाचकत्वेन पूर्वसूत्रेण धातुत्वे प्राप्ते प्रादिपठितस्य अभेरनेन सूत्रेण धात्ववयवत्वे प्रतिषिद्धे मनायेत्येतावन्मात्रस्य धातुत्वे ह्यस्तन्यां ते अभिशब्दं परित्यज्य मनायेत्यतः पूर्वमवाटि-अभ्यमनायतेति । एवम्-'अनभिमना अभिमना इवाचरितुमिच्छति' इत्यर्थे क्यङन्तात् सति मनायेत्येतावन्मात्रस्य धातुत्वेन तदाद्यैकस्वरस्य मशब्दस्यैव सन्नन्तत्वनिबन्धनं द्वित्वादि कार्यमिति—**अभिमिमनायिषते** इति रूपम्, एवं-मनायेत्येतावन्मात्रस्यैव धातुत्वेन ततः क्त्वाप्रत्यये अभीत्यनेन सहसमासे "अनञः क्त्वो यप्" [ ३. २. १५४. ] इति क्त्वो यबादेशे-**अभिमनाय्य गतः** इति । **प्रासादीयद्**इति-'प्रासादे इवाचरत्' इत्यर्थे प्रासादशब्दाद्'आधाराच्चोपमानादाशचारे'[३.४.८४.] इति क्यन्, तदन्तस्य क्रियावाचकत्वेन धातुत्वे प्राप्ते 'प्र-आङ्' इति प्रादिसमुदायरूपस्य प्राशब्दस्यानेन धात्ववयवत्वे निषिद्धे सदीयेत्येतावन्मात्रस्य धातुत्वात् ततः पूर्वमेवाट् । **प्रासिसादयिषती**ति-'प्रासाद इवाचरितुमिच्छति' इत्यर्थे क्यन्नन्तात् सन्, 'सादीयस' इत्येतावन्मात्रस्य धातुत्वेन तस्यैव सन्नन्तत्वप्रयुक्तद्वित्वादि कार्यमिति तदादेः साशब्दस्यैव द्वित्वादिना प्रासिसादयिषतीति सिद्धम् । **प्रासादीय्य गतः** इति—प्रासादीयेति समुदायस्थसादीयेत्यस्यैव धातुत्वेन ततः क्त्वाप्रत्यये प्राशब्देन सह गतिसमासे "अनञः क्त्वो यप्" [ ३. २. १५४. ] इति यप् अन्यथा प्राशब्दस्यापि धात्ववयवत्वे समासाभावेन क्त्वो यप् न स्यात् । पदकृत्यं पृच्छति-**प्रादिरिति किमिति,** अयमाशयः-प्रत्ययान्तभिन्नार्थकेन 'अप्रत्ययः' इति पर्युदासेन प्रत्ययान्ततायोग्यस्यैव तद्भिन्नस्य धातुत्वं निषिध्येत, तथा सति च द्रव्यनाम्नः प्रत्ययान्तभिन्नस्य धातुत्वं निषिध्येतेति सर्वत्र द्रव्यनामसु धातुत्वं न स्यादिति कथने निषेधवैयर्थ्यं यतो द्रव्यनाम्नः प्रत्ययान्तभिन्नस्य धातुत्वं प्राप्तमेव नहि क्रियावाचकत्वाभावा-

"Aho Shrutgyanam"

दिति निषेधसामर्थ्याद्द्रव्यवाचकस्य प्रादेरेवाख्यातस्थले क्रियावाचकत्वदर्शनात् तत्रैव धातुत्व-प्रसक्तेर्निषेधः स्यादिति प्रादिरिति पदं व्यर्थमिति । प्रत्युदाहरति-**अमहापुत्रीयदिति**-अत्र 'महांश्चासौ पुत्रो महापुत्रस्तमैच्छत्' इत्यर्थे "अमाव्ययात् क्यन् च" [ ३. ४. २४. ] इति क्यनि प्रत्ययान्तभिन्नस्य सामानाधिकरण्ये द्रव्यवाचकस्य महाशब्दस्यापि धात्ववयवत्वं निषिध्येतेति ततः पूर्वमडागमो न स्यात्, प्रादिरिति कथने तु महाशब्दस्य प्रादित्वाभावेन न भवति निषेधः । **अप्रत्यय इति किमिति**-केवलप्रादेः प्रत्ययान्तत्वासंभव इत्यप्रत्यय इति पर्युदासो व्यर्थ इति प्रष्टुराशयः । प्रत्युदाहरति-**औत्सुकायते**त्यादि-'उदु सु' इत्युभौ प्रादी, ताभ्यां सह स्थिताभ्याम् "उदुत्सोरुन्मनसि" [७. १. १८२.] इति कः, उत्सुकशब्द उन्मनसि [उत्कण्ठिते] रूढः, स इवाचरत् इत्यर्थे "क्यङ्" [३. ४ २६.] इति क्यङ्, अत्र प्रादेर्धात्ववयवत्वनिषेधे 'काय'मात्रस्य धातुत्वे ततः प्रागडागमापत्तेः, तच्चानिष्टमिति 'अप्रत्ययः' इति निषेध आवश्यकः, सति च, तस्मिन् प्रत्ययपरस्य प्रादेर्निषेधाभावे उत्सुकायेत्यस्य धातुत्वे ततः प्रागेवाडागम इति न दोषः । **उत्सुसुकायिषते** इति-उत्सुक इवाचरितुमिच्छतीत्यर्थे क्यङन्तस्य धातुत्वे ततः सन्, तदन्तस्य द्वित्वादि कार्यं धातुत्वं च, तत्र द्वित्वप्रसङ्गे "नाम्नो द्वितीयाद् यथेष्टम्" [ ४. १. ७. ] इति द्वितीयैकस्वरस्य 'सु' इत्यस्य द्वित्वम्, उदो दकारस्य च "न बदनं संयोगादिः [ ४. १. ५. ] इति द्वित्वनिषेधः, "धुटस्तृतीयः" [ २. १. ७६. ] इति दकारस्य तकारस्तु द्वित्वदृष्ट्याऽसन्निति दबुध्यैव द्वित्वनिषेधः । **उत्सुकायित्वे**ति-अत्र च उत्सुकायेति समुदायस्यैव धातुत्वात् समासाभावेन न क्त्वो यप्; एवं चैतेषां सिद्धचर्थमप्रत्यय इति पर्युदासस्यावश्यकत्वमिति भावः । सूत्रप्रयोजनं विशदयति-**अभिमनायादिः प्रत्ययान्तः सप्रादिसमुदायः क्रियार्थः** इत्यादिना, अयमाशयः—क्रियार्थस्य धातुसंज्ञा पूर्वसूत्रेण विहिता क्रिया च सप्रादिना प्रत्ययान्तेन समुदायेन प्रतीयत इति तस्यैव धातुसंज्ञा स्यादिति ततः पूर्वमेवाडागमः स्यात्, द्वित्वं च तत्समुदायसम्बन्धिन आद्यस्वरस्यैव स्यादिति अभिमनायेत्यस्य स्वरादित्वेन तस्य द्वितीय आद्यस्वरः "स्वरादेर्द्वितीयः" [ ४. १. ४. ] इति वचनाद् द्विरुच्येतेति भिशब्दस्यैव द्वित्वं स्यादिति 'अभिमिमनायिषते' इत्यादि रूपं स्यात्, प्रादेः पृथगवस्थानाभावात् समासाभावे च 'अभिमनाय्य गतः' इत्यादौ क्त्वो यप् न स्यादिति पूर्वोक्तानीष्टरूपाणि न सिद्धेयुरिति प्रकृतसूत्रेण प्रादेर्धात्ववयवत्वप्रतिषेधेन धातुस्वरूपाद् बहिष्कारे सति प्रादेः पर एव धातुरिति ततः पूर्वमेवाड् भवति, तदीयैकस्वरस्यैव द्विर्वचनं भवति, धातुबहिर्भूतस्य प्रादेश्चोत्तरेण क्त्वाप्रत्ययान्तेन नाम्ना समास इति क्त्वो यप् च भवतीति । क्वचित् प्रादेरपि धात्ववयवत्वं दृश्यत इत्याशङ्कामपाकर्तुमाह-**असंग्रामयत शूर इति नायं समिति**—ग्रामेति नाम्नो णिः, समिति च प्रादिरिति 'ग्रामि' इत्यस्यैव धातुत्वमुचितमिति ततः प्रागेवाडागमेन भाव्यमितीह कथं समः प्रागडागम इत्याशङ्कामुत्प्रेक्ष्य प्रत्युत्तरयति-नायं समिति, 'संग्रामि' धातौ न समिति प्रादिः किन्तु धात्ववयव एव प्रादिसदृशोऽयं समिति भागः । तत्र दृष्टान्तमाह-**यथा-विच्छाद्यवयवो विरिति**-विच्छधातुर्गत्यर्थः स्वमते तुदादौ पठ्यते, तदवयवो विशब्दः प्रादिवत् प्रतिभासमानोऽपि यथा न प्रादिस्तथा चुरादौ "संग्रामणि युद्धे" इति पठितस्य धातोरवयवोऽयं सम्, न तु प्रादिस्तत्र पठितस्य धातोरखण्डत्वात्, तथा च न सूत्राव्याप्तिरिति । **परे** तु सूत्रमिदं न पठन्ति, ज्ञापकेनैव प्रकृतसूत्रसिद्धमर्थं स्वीकुर्वन्ति, तच्च ज्ञापकं चुरादौ "संग्रामणि युद्धे" इति पाठे समित्येतत्पूर्वस्य ग्रामशब्दस्य पाठ एव, अन्यथा "ग्राम युद्धे" इत्युक्तेऽपि अभिधानस्वाभाव्यात् 'इङ्क्' इत्यस्याधिपूर्वस्येव संग्रामशब्दस्यैव युद्धार्थकत्वेन तत एव णिः स्यादिति सम्पूर्वकः पाठो ज्ञापकः—"उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक्क्रियते" इति, तस्य च पृथक्कारे तद्रहितस्यैव अभिमनायेत्यादौ धातुसज्ञा सिध्यति, उपसर्गसमानाकारमिति च उपसर्गसंज्ञाशून्यत्वे सति तदाकारमित्यर्थकम्, तस्य अभिमनायेत्यादिघटकस्य 'अभि' इत्यादेरुपसर्गत्वाभावेन उपसर्गः पृथक्क्रियत इति कथनासंगतेः, इदं च वचनं तत्रैव प्रवर्त्तते यत्रोपसर्गाकारस्य न सन्ध्यादिकृतो विकारः, अत एव 'आ ऊढा ओढा' स इवाचर्य इत्यर्थे ओढायित्वेत्येव भवति, तत्र सन्धिनोपसर्गाकारस्य विकृतत्वात्, औत्सुकायतेत्यादौ तु नास्य नियमस्य प्रवृत्तिः, तत्र तन्मते उपसर्गाकारकपूर्वपदत्वाभावात्, तत्र हि उत्सुक इत्यखण्डमेव नामेति पूर्वोत्तरपदत्वाभावः, प्रासादीयतेति तन्मते नास्ति किन्तु अप्रासादीयतेत्येव, तत्र 'प्र आ' इत्यनयोः सन्धिभवनेनोपसर्गाकारस्य विकृतत्वात् । तथा च स्वमतात् कश्चित् फलभेदोऽपि । स्यादेतत्-अवधीरयतीत्यादौ 'अव'-शब्दस्य पृथक्करणमस्ति नवा, आद्ये **बोपदेवेनाव**शब्दात् प्रागडागम वशब्दद्वित्वं च कृत्वा चङि आववधीरत् इत्युदाहृतं, तन्न संगच्छेत; द्वितीये तु—

"द्विषद्भिरेवास्य विलङ्घिता दिशो
यशोभिरेवाब्धिरकारि गोष्पदम् ।

"Aho Shrutgyanam"

इतीव धारामवधीर्य मण्डली-
क्रियाश्रियाऽमण्डि तुरङ्गमैः स्थली ॥"
[ नैषधे प्रथमसर्गे ]

इति श्रीहर्षप्रयोगे 'अवधीर्य' इति पाठो न सगच्छेत, अवेत्यस्यापृथक्कारेण समासाभावात् क्त्वो यवभावादिति चेत्? अत्राहुः—नायं धातुश्चुरादौ पठितः, अपि तु "बहुलमेतन्निदर्शनम्" इति बाहुलकादभ्यूहितः ऊहश्च धीरेत्यस्यापि संभवति अवधीरेत्यस्यापि च, प्रयोगद्वयप्रामाण्यात्। यदा अवधीरेति विशिष्टस्यैव चुरादित्वेनोहस्तदा 'अवावधीरत्' इति बोपदेवप्रयोगः साधीयान्, यदा च धीरेत्यस्य तथात्वेनोहस्तदा अवधीर्येति श्रीहर्षप्रयोगः साधुरिति स्वीकर्तव्यम्। 'संग्राम'धातुस्तु चुरादौ पठित एवेति तत्राखण्डस्यैव धातुत्वमिति न तत्र समित्यस्य पृथक्करणमित्यदोषः। स्वमते च ज्ञापकसिद्धस्यासार्वत्रिकत्वसन्देहेन *व्याख्यानाद् वर करणम्* इतिन्याय नुसार च वचनमेवेदमारब्धमिति युक्तम्। ननु परेषां मते ज्ञापकेनेदृशार्थस्वीकारे नामधात्वादिषु निर्वाहसम्भवेऽपि, 'तिष्ठति प्रतिष्ठते' इत्यादावुपसर्गविशिष्टस्यैव विशिष्टक्रियाबोधकत्वेन धातुत्वमुचितमिति प्रातिष्ठतेत्यस्य स्थाने अप्रातिष्ठतेति प्रयोगापत्तिरिति चेत्? सर्वत्र धातोरेव विशिष्टक्रियावाचकत्वमुपसर्गाणां तु तदर्थद्योतकत्वमिति स्वीकारात्॥ ३. ३ ४॥

## अवौ दा-धौ दा ॥ ३. ३. ५.॥

**त० प्र०—'दा धा' इत्येवंरूपौ धातू अवानुबन्धौ दासंज्ञौ भवतः। दारूपाश्चत्वारः, धारूपौ द्वौ। दांम्-प्रणिदाता, देंङ्-प्रणिदयते, डुदांग्क्-प्रणिददाति, दोंच्-प्रणिद्यति; ट्धें-प्रणिधयति, डुधांग्क्-प्रणिदधाति। दा-धारूपोपलक्षितस्य दासंज्ञावचनात् 'दों दें ट्धें' इत्येतेषां शिति दा-धारूपाभावेऽपि दासंज्ञा सिद्धा। दीङो दारूपस्य बहिरङ्गत्वान्न भवति, ततश्च 'उपादास्त' इत्यत्र "इश्च स्थादः" [४. ३. ४१] इतीत्वं न भवति। अवाविति किम्? दांव्-दातं बर्हिः, दैव्-अवदातं मुखम्। अविति वकारो न पकारः, दातिर्दायतिश्च वकारानुबन्धो, तेन प्रणिदापयति प्रणिधापयतीत्यत्र दासंज्ञायां सत्यां नेर्णत्वं सिद्धम्। दादेशाः-'ह्रौ दः" [४. १. ३१.] इत्यादयः॥५॥**

**श० म० न्यासानुसन्धानम्**—अवौ०। अत्र दारूपाश्चत्वारो धारूपौ च द्वौ धातू इत्यग्रे वक्ष्यमाणत्वेन दाश्च धौ चेति विग्रहे 'दाधाः' इति स्यात्; समाहारद्वन्द्वाश्रयणे च क्लीबत्वमेकत्वं च स्यादिति दाधौ' इति द्विवचनान्तनिर्देशः कथं सङ्गत इति न शङ्कनीयम्, दात्वेन दारूपाणां चतुर्णां धात्वेन धारूपयोर्द्वयोरप्येकत्वेन सग्रहात् तयोरितरेतरयोगद्वन्द्वे द्विवचनस्यैवौचित्यात्। **अवौ** इत्यस्य अनुबन्ध 'व'-रहितौ इत्यर्थः, दाधारूपे वकारस्यासंभवेन 'अवौ' इत्यस्य वैयर्थ्यात्, अनुबन्धस्य च संभवेन तदनुबन्धकनिरसाय 'अवौ' इत्यस्य सार्थक्याच्च। तथा च सूत्रार्थमाह- **'दा धा' इत्येवंरूपौ धातू** इति-इत्येवरूपाविति रूपोपलक्षणेन क्वचिदपि तयोस्तद्रूपत्वे संज्ञाप्रवृत्तिरिति सूच्यते, तत्फलं वक्ष्यति स्वयमेव वृत्तिकृत्। रूपग्रहणेनान्येषामपि क्वचित् तद्रूपाणां ग्रहणमित्यनैयत्यात् सूत्रस्य प्रवृत्तिस्थलमनियतं स्यादिति तयोः संकलनामाह-**दारूपाश्चत्वारः, धारूपौ द्वाविति**, तथा च षण्णामेतत्सूत्रप्रवृत्तिस्थलत्वमिति नियत भवति। चतुरो दारूपान् स्वरूपत उदाहरति- **दांम्-प्रणिदाते**त्यादिना, दांम् धातुर्दानार्थको भ्वादिः, तस्यानुबन्धविनिर्गमे दारूपत्वमिति ततस्तृचि दातेत्यत्र दाशब्दस्य दासंज्ञायां सत्यां 'प्र-नि' इत्युपसर्गयोर्मध्ये नीत्युपसर्गसम्बन्धिनो नस्य "नेर्ङ्मा-दा-पत-पद०" [२. ३. ७९.] इति णत्वे सति प्रणिदातेति रूपं भवति। द्वितीयमाह-**देंङ् प्रणिदयते** इति-देंङ् इति पालनार्थो भ्वादिः, तस्य वर्तमानायां दयते इति रूपम्, तस्य चाशिति प्रत्यये "आत् सन्ध्यक्षरस्य" [४. २. १.] इति आत्वे दारूपत्वं भवतीति दासंज्ञायां नेर्नस्य णत्वं भवति। तृतीयमाह-**डुदांग्क्-प्रणिददाती**ति-अयमपि धातुर्दानार्थको जुहोत्यादिपठितः, तस्य वर्तमानायां ददातीति रूपम्, अस्यापि धातोर्दारूपत्वेन दासंज्ञकत्वमिति तस्मिन् परतो नेर्नकारस्य पूर्वोक्तसूत्रेण णकार इति प्रणिददातीति रूपम्। चतुर्थमाह-**दोंच्-प्रणिद्यती**ति-दोंच् धातुश्छेदनार्थो दिवादिः, तस्यापि अशिति आत्वविधानाद् दारूपत्वमिति दासंज्ञायां नेर्नस्य णत्वम्, अस्य दिवादित्वेन वर्तमानायां श्ये तिवि "ओतः श्ये" [४. २. १०३.] इति ओकारस्य लुकि द्यतीति रूपम्, प्र-नीत्युपसर्गयोगे 'प्रणिद्यति' इति। अथ धारूपौ द्वावुदाहरति-**ट्धें-प्रणिधयती**ति-ट्धें धातुः पानार्थको भ्वादिः, अस्य वर्तमानायां धयतीति रूपम्, तस्य प्रनीत्युपसर्गयोगे-प्रणिधयतीति रूपं भवति, अस्यापि अशिति आत्वभवनाद् धारूपत्वमिति दासंज्ञायां सत्यां नेर्नस्य णत्वम्। द्वितीयमाह-**डुधांग्क्-प्रणिदधाती**ति-डुधांग्क् धातुर्धारणार्थकः; तस्य वर्तमानायां जुहोत्यादित्वाद् दधातीति रूपम्, अस्य च स्वतो धारूपत्वेन दासंज्ञायां-प्रणिदधातीत्यत्र नेर्नस्य णत्वं भवति। 'दा धा' इत्येवंरूपाविति व्याख्यानस्य फलमाह- **दा-धारूपोपलक्षितस्येति** — उपलक्षणविधया

"Aho Shrutgyanam"

दारूपस्योपादानादित्यर्थः उपलक्षणं हि–अविद्यमानत्वेऽपि व्यावर्त्तकमुच्यते, तथा च क्वचिद् दा-धारूपत्वे सति प्रकृत-प्रयोगे दाधारूपत्वाभावेऽपि तस्य दासंज्ञा भवतीति कथनात् 'दों दें ट्धें' इत्येतेषां धातूनामौपदेशिकदारूपत्वाभावेऽप्य-शित्या विधानात् शिति दा-धारूपत्वाभावेऽपि दासंज्ञा सिद्धा भवति, उपलक्षकस्य दा-धारूपत्वस्याशिति दृष्टत्वा-दित्यर्थः। "दीङ्च् क्षये" इति धातुर्दिवादौ पठ्यते, तस्यापि "दीङः सनि वा" [ ४. २. ६. ]—"यबक्ङिति [ ४. २. ७. ] इति सूत्राभ्यामात्वविधानादारूपत्वमिति तस्यापि दासंज्ञोचितेति चत्वारो दारूपा इति कथन न्यूनमिति शङ्कायामाह- **दीङो दारूपस्य बहिरङ्गत्वान्न भवति** इति, अयमाशयः—"आत् संध्यक्षरस्य" [ ४. २. १. ] इति सूत्रेण विधीयमानमात्त्वमनैमित्तिकमित्यन्तरङ्गमिति तद्विहितात्त्वानां दाधारूपत्वेन ग्रहणे सत्यपि दीङ आत्त्व सनि यपि अक्ङिति च प्रत्यये विहितमिति परनिमित्तकत्वेन बहिरङ्गमित्यन्तरङ्गायामपरनिमित्तायां दासंज्ञायां कर्त्तव्या-यामसिद्धं भवतीति न तत्र दारूपत्वग्रह इति दासंज्ञाऽभाव इति। तत्फलमाह- **ततश्च उपादास्त इत्यत्रेत्यादि**– ततः– दासंज्ञाभावात्, उपपूर्वकस्य दीङोऽद्यतन्यां ते सिचि च "यबक्ङिति" [४.२ ८.] इत्यात्त्वेऽडागमे चोपादास्तेति रूपं भवति, तत्र "इश्च स्थादः" [४.३ ४१.] इतीत्वं न भवति दासंज्ञाऽभावात्, अन्यथा 'उपादित' इति रूपं स्यात्। पदकृत्य पृच्छति- **अवाविति किमिति**- वानुबन्धरहितयोर्दाधोः संज्ञाविधानं कस्मै प्रयोजनायेति तदर्थः, साधारण्येन सर्वेषां दाधारूपाणां धातूनां दासंज्ञा विधीयतामिति तदाशयः प्रत्यु-दाहरति- **दांव्- दातं बर्हिरि**ति- दांव्क् धातुर्लवनार्थो-ऽदादिः, तस्य वकारानुबन्धत्वात् दासंज्ञाऽभावे, ततः क्ते "दत्" [४.४.१०.] इति ददादेशो न भवति, अवावित्य-स्याभावे चास्यापि दासंज्ञकत्वात् तदादेशापत्तेरिति दत्तं बर्हिरिति रूपं स्यात्। प्रत्युदाहरणान्तरमाह- **दैव्- अव-दातं मुखमि**ति- दैव् धातुः शोधनार्थको वानुबन्धो भ्वादिः, तस्य वानुबन्धत्वेन दासंज्ञा न भवति, ततोऽवपूर्वात् क्ते "स्वरादुपसर्गाद् दस्ति कित्यधः" [४.४.९.] इति दासंज्ञ-कस्य विधीयमानस्तादेशो न भवति, अवावित्यस्याभावे चा-स्यापि दासंज्ञायां तादेशो दुर्वारः स्यादिति– अवत्तं मुखमिति रूपं स्यात्। 'अवौ' इत्यस्य स्थाने केचित् "अपौ" इत्याहुः, तन्मतं निरस्यति- **अविति वकारो न पकारः** इति, तेन वकारसहितस्यैव निषेधो न पकारसहितस्य तत्स्थलमाह– **दातिर्दायतिश्च वकारानुबन्धावि**ति- "दांव्क् लवने" इत्यदादिर्दातिरित्यनेन कथ्यते, "दैव् शोधने" इति भ्वादि-र्दायतिशब्देनोच्यते, तौ च वानुबन्धौ, न तु पानुबन्धौ, तयो-रेव च वर्जनमिष्टमिति वकारवर्जनमेवोचितम्। तस्य फला-न्तरमप्याह– **तेन प्रणिदापयति प्रणिधापयतीत्यत्र दा-सज्ञायामि**ति, अयमाशयः– अवावित्यस्य स्थाने अपाविति यदि स्यात् तर्हि पकाररहितयोरित्यर्थापत्तौ यत्र दासंज्ञकयो-र्ददाति-दधात्योर्णिचि "अर्त्ति-री-ब्ली-ह्री०" [ ४.२ २१. ] इति प्वागमस्तत्र पकारसहितत्वेऽपि निषेधप्रवृत्त्यभावाद् दासंज्ञासत्त्वात् प्रणिदापयति प्रणिधापयतीति प्रयोगयोः "नेर्ङ्मा-दा०" [२.३.७९.] इति नेर्नस्य णत्वं भवत्येवेति। दासंज्ञायाः क्व प्रयोजनमिति जिज्ञासायामाह– **दाप्रदेशाः "हौ दः" [४.१.३१.] इत्यादयः** इति– "हौ दः" इत्यादि सूत्रेषु दाधारूपाणां धातूनां संक्षेपेण ग्रहणार्थं दा-संज्ञाया उपयोग इति भावः।

अत्रेदं विचार्यते– दाधारूपयोर्दासंज्ञाविधायकमिदं सूत्रम्, तत्र प्रतिपदोक्तयोरेव दाधोर्ग्रहण युक्तमिति यत्र "डुदांग् दाने" "डुधांग्क् धारणे" इत्यनयोः प्रयोगस्तत्र दारूपस्य प्रतिपदोक्तत्वेन दासंज्ञाऽस्तु, "देंङ् दोंच् ट्धं" इत्येतेषां दा-धारूपत्व तु आत्त्वसंविधानेनेति तत्र दारूपस्य लाक्षणिक-त्वमिति * लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं, न तु लाक्षणिकस्य * इति न्यायेन लाक्षणिकयोर्दा-धोरिह ग्रहणं कथं व्याख्यातमिति चेत्? अत्रोच्यते– * गा-मा-दाग्रहणे-ष्वविशेषः * इति न्यायेन दाग्रहणे लाक्षणिकत्व-प्रतिपदोक्त-त्वरूपविशेषानाश्रयणात्। ननु सर्वेषां दारूपाणां धारूपाणां च दासंज्ञाविधाने इह कथं न भवति– प्रनिदारयति प्रनिधा-रयतीति, अत्र दृ-धृभ्यां णिगि वृद्धावारि– दारयति धार-यतीति रूपे, तयोः प्र-नीत्युपसर्गयोगे दारूपसत्त्वाद् दासंज्ञायां नेर्नस्य णत्व कुतो नेति चेन्न– अर्थवद्ग्रहणात्, * अर्थवद्-ग्रहणे नानर्थकस्य ग्रहणम् * इति न्यायेनेहार्थवतो र्दा-धोर्ग्र-हणमिति प्रनिदारयतीत्यादौ दा-धोरर्थवत्त्वाभावेन तयोर्दा-सज्ञा न स्यादिति णत्व न भवति, तत्र हि दार्धारोरेवार्थवत्त्वं न तु दा-धोः। न चैवं प्रणिदापयति प्रणिधापयतीत्यादावपि दासंज्ञा न स्यात् तत्रापि णिगि प्वागमे तद्विशिष्टस्यैवार्थ-वत्त्वात्, किञ्च यत्क्रियायुक्ताः प्रादयस्तं प्रत्येवोपसर्गत्वमि-त्यस्यार्थस्य "धातोः पूजार्थस्वति०" [३.१.१.] इति सूत्रे-सिद्धान्तितत्वेन यथा प्रनिदारयतीत्यादौ प्रनीत्यस्य न दा-संज्ञक'दा–'शब्द प्रत्युपसर्गत्वमपि तु दारिशब्दं प्रतीति तथेहापि प्रनीत्यस्य न दाशब्दं प्रत्युपसर्गत्वमपि तु दापिशब्दं प्रतीति कथं णत्वमिति वाच्यम्, *अर्थवत आगमस्य तद्गुणी-भूतत्वेन तद्ग्रहणेनैव ग्रहणात् * यदागमास्तद्गुणीभूतास्तद्-ग्रहणेन गृह्यन्ते * इति न्यायात्, अयमाशयः– लब्धात्मकस्य

"Aho Shrutgyanam"

भावस्य निमित्तवशादुपचयाऽपचयौ व्यपदेशहानिं न कुरुतः, यथा देवदत्तस्याङ्गाधिक्याङ्गच्छेदौ, इहाप्यन्तरङ्गत्वात् दाधोर्दासंज्ञायां कृतायां पश्चादुत्पन्नः ण्यागमो दाव्यपदेशं न विहन्ति, नाप्यर्थवत्त्वमित्यदोषः । प्रनिदारयतीत्यादौ तु दाशब्दमुद्दिश्य रेफस्य न विहितत्वमपि तु ऋकारमुद्दिश्यारो विधानमिति नास्ति दाशब्दस्यार्थत्वमिति दासंज्ञा न भवति, उपसर्गत्वमपि प्रणिदापयतीत्यादौ दाशब्दं प्रति संभवति, प्रनिदारयतीत्यादौ तु दाशब्दं प्रति सभवति तस्यानर्थकत्वात्, यदा तु प्रणिदापयतीत्यादावपि न दाशब्दं प्रत्युपसर्गत्वमपि तु दापीति ण्यन्तसमुदायं प्रति प्रनिदारयतीत्यादावपि दारीति ण्यन्तसमुदायं प्रतीत्युच्यते तदा प्रणिदापयतीत्यादावपि दासंज्ञा नोचितेति प्रनिदापयतीत्येवरूपमुचितमिति कैयटाशयः । तथा च प्रणिददतं प्रणिदधतं वा प्रयोजयतीत्यर्थविवक्षायां दासंज्ञा स्यात्, ददतं दधतं वा प्रनिप्रयोजयतीत्यर्थविवक्षायां च न स्यादिति तत्त्वम् ॥ ३.३.५. ॥

**वर्त्तमाना– तिव् तस् अन्ति, सिव्, थस्, थ, मिव्, वस्, मस्; ते, आते, अन्ते, से, आथे, ध्वे, ए, वहे, महे ॥ ३. ३. ६. ॥**

**त० प्र०– इमानि वचनानि वर्तमानासंज्ञानि भवन्ति । वित्करणं "शिदवित्" [४.३.२०.] इत्यत्र विशेषणार्थम्, एवमन्यत्रापि वित्करणस्य प्रयोजनं द्रष्टव्यम् । वर्तमाना-प्रदेशाः–"स्मे च वर्तमाना" [५.२.१६.] इत्येवमादयः ॥६॥**

**श० म० न्यासानुसन्धानम्– वर्त्तमाना०** । धातुसंज्ञामुक्त्वा धातोर्विधीयमानानां प्रत्ययानां संज्ञा वक्तव्या, ते चाख्यात-कृद्भेदेन द्विधा, तत्र कृतां बहुत्वेनाग्रे वक्ष्यमाणत्वात्, अल्पत्वेन क्रियान्वयिकालाद्यभिधायित्वेन चाभ्यर्हितत्वात् पूर्वमाख्यातप्रत्ययानां संज्ञा एवोच्यन्ते, तत्र तावदिह प्रत्ययमात्रस्वरूपपरिचयार्थं तत्संज्ञाप्रतिपादनं, तद्विधानं तु पञ्चमाध्याये तत्तत्सूत्रैः प्रतिपादयिष्यते । तत्र संज्ञिनां तिवादीनां बहुत्वेऽपि संज्ञाया एकत्वं तिवाद्यष्टादशगतं वर्त्तमानात्वमेकरूपमेवेति बोधनाय, वचनभेदेऽपि संज्ञा-संज्ञिनिर्देशः शास्त्रकृतामभिमत एवं "अनवर्णा नामी" [१. १. ६.] इतिवत् । **'वर्त्तमाना'** इति स्त्रीलिङ्गनिर्देशस्तु विभक्तिशब्दापेक्षया, एते तिवादयो वर्त्तमाना विभक्तिरित्यर्थः, वर्त्तमानेति चान्वर्था संज्ञा वर्त्तमानकालक्रियाबोधकत्वात्, वर्त्तमानः कालो बोध्योऽस्या इत्यर्थे मत्वर्थीयाच्प्रत्ययेन वर्त्तमानाशब्दस्य निष्पत्तेः । तत्र वर्त्तमानत्वं तावत् किमित्याकाङ्क्षायामाहुः– प्रारब्धापरिसमाप्तत्वं वर्त्तमानत्वमिति, तच्च सर्वत्र क्रियारूपमुपाधिमादायैव काले लक्षणीयम्, तथाहि– कालोऽखण्डपदार्थः, सूर्यपरिस्पन्दाद्युपाधिमाश्रित्य क्षण-मुहूर्त्तादिव्यवहारो यथा तथा निरुपाधिकाखण्डकालस्य वर्त्तमानत्व-भविष्यत्त्वादिना प्रत्येतुमशक्यत्वादुपाधिभूतफूत्कारादिनानावयवकपाकक्रियागतवर्त्तमानत्वादिधर्माः काले उपधेये उपचर्यन्ते, उपाधिधर्मा उपधेये भासन्ते इति दृष्टसिद्धयुक्तेः, तथाहि– जलकम्पे प्रतिबिम्बोपहितसूर्यमण्डलकम्पनं भासते, इत्युपाधिधर्माणामुपधेये मानं प्रत्यक्षसिद्धम् । प्रारब्धापरिसमाप्तत्वं च विनष्टावयवप्रागभावाप्रतियोगित्वसमानाधिकरणध्वंसाप्रतियोग्यवयवकत्वे सति क्रियापदप्रयोगाधिकरणत्वम्, तेन भाविभूतक्रिययोर्न लक्षणातिव्याप्तिः, भाविक्रियायां क्रियावयवप्रागभावप्रतियोगित्वात्, भूतक्रियायां च अवयवानां ध्वंसप्रतियोगित्वात्, वर्त्तमानक्रियायां च विनष्टावयवप्रागभावाप्रतियोगित्वसमानाधिकरणत्वमपि विद्यते ध्वंसाप्रतियोग्यवयवकत्वमपि विद्यत एव, तदवयवानां फूत्कारादीनामनुवर्त्तनादिति लक्षणसमन्वयः सिद्धः । न च सत्ताक्रियाया निरवयवकत्वाद् 'आत्माऽस्ति, पर्वताः सन्ति' इत्यादौ वर्त्तमानायाः प्रयोगो न स्यात्, अखण्डवर्त्तमानत्वविरहादिति वाच्यम्, तत्तत्कालिकराजादीनां क्रियायाः सावयवत्वेन प्रागभावप्रतियोगित्वसमानाधिकरणध्वंसप्रतियोगित्वेनानित्यत्वमिति सामानाधिकरण्येनोक्तराजादिक्रियाविशिष्टसत्तारूपेऽर्थे विशेषणीभूतानित्यराजादिक्रियानिष्ठावुत्पत्तिध्वंसावारोप्य वर्तमानत्वादेरुपपादनीयत्वात् । तथा चाहुरभियुक्ताः– इह भूत-भविष्यद्-वर्त्तमानानां राज्ञां क्रियास्तिश्रुतेरधिकरणमिति । हरिरप्याह—

"परतो भिद्यते सर्वमात्मा तु न विकम्पते ।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ॥"

इति, तदर्थस्तु– सर्वं– पच्यादिधात्वर्थसामान्यं, परतः– स्वापेक्षयाऽन्येन वर्त्तमानत्वादिना, भिद्यते– व्यावर्त्त्यते, आत्मा– आत्मसत्ता तु, न विकम्पते– निरवयवत्वेन सनातनत्वादुक्तविशेषणसम्बन्धाभावेन भेदावगतिविषयो न भवतीत्यर्थः । आत्मास्तीति, पर्वताः सन्तीति च कथं प्रयोगस्तत्राह– पर्वतादिस्थितिः– पर्वतात्मादिपदार्थस्थितिः, तस्मात्– नित्यपरमाण्वादिसमवेतविशेषपदार्थातिरिक्तपदार्थस्य स्वतो व्यावृत्तत्वाभावात्, पररूपेण– परस्य राजादिक्रियारूपार्थस्य, रूपेण धर्मेण वर्त्तमानत्वादिना, भिद्यते– भेदप्रतीतिविषयो भवतीति । एवं 'तम आसीत्' 'तुच्छेनाभ्यपिहितं यदासीत्' "अहमेकः प्रथममासं वर्त्तामि च भविष्यामि च" इत्यादिश्रुतयोऽप्यात्मनि तत्तत्कालसम्बन्धबोधिका उक्तरीत्यैवोपपद्यन्ते ।

"Aho Shrutgyanam"

पातञ्जलभाष्येऽप्ययमर्थो विशदय्य विचारितः, तथाहि– [पा० सू० ३. २. १२३.] 'इहाधीमहे, इह वसामः, इह पुष्यमित्रं याजयामः' इत्यादिप्रयोगाः क्रियन्ते, अध्ययनं वासो याजनं च प्रवृत्तमेव तिष्ठति तन्मध्ये च भोजनादिक्रियापि चलति, भोजनादिसमये चाध्ययादीनां वर्त्तमानत्वाभावादग्रे वर्त्तमानत्वमादाय तथाप्रयोगः क्रियते तन्न युक्तम्। किञ्च 'तिष्ठन्ति पर्वताः, स्रवन्ति नद्य.' इति वर्त्तमानाप्रयोगो न युज्यते यतो नित्यप्रवृत्तेषु कालविभागो नास्ति, भूत-भविष्यत्प्रतिद्वन्द्वो वर्त्तमानः कालः न चात्र भूत-भविष्यन्तौ कालौ स्तः, नित्यप्रवृत्तस्य भूत-भविष्यत्वाभावात्, तदभावे च वर्त्तमानत्वाभावोऽपि क्रियारूपत्वाभावश्चेत्याशङ्कयोक्तम्–"न्याय्या त्वारम्भानपवर्गात्" इति। न्याय्या त्वेषा वर्त्तमानकालता। कुतः, आरम्भानपवर्गात्। आरम्भोऽत्रानपवृक्तः। एष एव च नाम न्याय्यो वर्त्तमानकालो यत्रारम्भोऽनपवृक्तः" इति।

अयमाशयः– अध्ययनादि यदा प्रवृत्तं न चोपरतं तदा तस्य भोजनादिक्रिया नान्तरीयकत्वेन व्यवधायिका न भवतीत्यारम्भस्यापरिसमाप्तत्वेन वर्त्तमानत्वं भवान् मन्यते, तत्रापि मध्ये क्रियान्तरं भवति, भुञ्जानो ह्यवश्यं मध्ये हसति वा जल्पति वा पानीयं वा पिबति, तथापि तत्र यदि वर्त्तमानकालता युक्तेति मन्येत, तर्हि प्रकृतेऽपि सा तुल्या। तदुक्तं हरिणा—

"व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः॥
न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्त्तते।
सर्वैव हि क्रियाऽन्येन संकीर्णेवोपलक्ष्यते॥
तदन्तरालदृष्टा वा सर्वैवोवयवक्रिया।
सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते॥" इति।

अयमाशयः– एकैका क्रियाऽवान्तरक्रियासमूहरूपा, यथैकैव पाकक्रिया फूत्काराधःसन्तापनत्वादिभिरवान्तरवयवैर्युक्ता भवति। तथा च भुज्यादिक्रियाऽपि क्रियासमूहरूपा, अन्तरालप्रवृत्तिभिः– हसितजल्पितपीतादिभिः. व्यवधानमुपेत इव– विच्छिन्न इव दृश्यमानोऽपि, अविरामात्, न निवर्त्तते, यतः सर्वैव क्रिया, अन्येन– क्रियान्तरेण, सकीर्णेव– मिश्रितेवोपलक्ष्यते, अथवा प्रवर्त्तमानक्रियामध्यदृष्टा क्रिया सदृशा चेत् तदवयवत्वेन गृह्यते, भिन्ना चेत् तदङ्गत्वेन गृह्यत इति, तथा चाध्ययनादिमध्यप्रवृत्ता भुज्यादिक्रिया तदङ्गमेवेति स्वाङ्गमव्यवधायकमिति न्यायादेकक्रियात्वाव्याघातः, यदुक्तं– 'तिष्ठन्ति पर्वताः' इत्यादौ कालाविभागाद् वर्त्तमानता न युक्तेति, तत्रापि कालविभागोऽस्त्येव, 'तिष्ठन्ति पर्वताः' इतिवत् 'स्थास्यन्ति पर्वताः, तस्थुः पर्वताः' इत्यादिप्रयोगाणामपि दर्शनात् कालविभागस्य प्रतीतिरस्त्येव, सा च न केवलं तादृशप्रयोगनिमित्तिका अपि तु भूत-भविष्यद्-वर्त्तमानानां राज्ञां याः क्रियास्तास्तिष्ठतेरधिकरणमिति स्वीकारात्। इह तावत् तिष्ठन्ति पर्वता इति यदुच्यते तस्यायमाशयः– संप्रति ये राजानः सन्ति तेषां याः क्रियास्तासु वर्त्तमानासु तत्स्थितिर्वर्त्तमानेति, स्थास्यन्ति पर्वता इत्यस्यायमर्थः– इत उत्तरं ये राजानो भविष्यन्ति तेषां याः क्रियास्तासु भविष्यन्तीषु पर्वतानां स्थितिर्भविष्यन्ती, तस्थुः पर्वता इति यदुच्यते तस्यायमर्थः– इतः पूर्वं ये राजानो बभूवुस्तेषां याः क्रियास्तास्वतिक्रान्तासु पर्वतादिस्थितिस्तत्कालीनेति। 'अपर आहुः' इत्यादिना कालद्वयस्यैव सत्ता न वर्त्तमानः काल इति मतान्तरं तत्र भाष्ये इत्थमुपस्थापितम्– नास्ति वर्त्तमानः कालः। अपि चात्र श्लोकानुदाहरन्ति—

"न वर्त्तते चक्रमिषुर्न पात्यते,
न स्यन्दन्ते सरितः सागराय।
कूटस्थोऽयं लोको न विचेष्टितास्ति,
यो ह्येवं पश्यति सोऽप्यनन्धः॥१॥
मीमांसको मन्यमानो युवा मेधाविसंमतः।
काकं स्नेहानुपृच्छति किं ते पतितलक्षणम्॥२॥
अनागते न पतसि अतिक्रान्ते च काक! न।
यदि सम्प्रति पतसि सर्वो लोकः पतत्ययम्॥३॥
हिमवानपि गच्छति।
अनागतमतिक्रान्तं वर्त्तमानमिति त्रयम्।
सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते॥४॥
क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद् विचेष्टितम्।
तत् समीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन्॥५॥ इति।

अयमाशयः– निष्पन्नस्यार्थस्य भूतत्वादनिष्पन्नस्य च भविष्यत्वान्निष्पन्नानिष्पन्नव्यतिरेकेणान्यस्याभावाद् वर्त्तमानकालाभावः, तत्र दृष्टान्तरूपेणाह– न वर्त्तते चक्रमित्यादि। चक्रं परिवर्तते इति प्रयोगो न युक्तः, परिवर्त्तनक्रियाया वर्त्तमानाया अभावात्, पूर्वमपि तस्य परिवृत्तत्वात्, एवम्– 'इषुः पात्यते, सरितः सागराय स्यन्दन्ते' इत्यादयोऽपि प्रयोगा न युक्ताः, यत इषुपातस्य भूतत्वाद् भावित्वाच्च नदीनां स्यन्दनस्यापि पूर्वप्रवृत्तत्वात्। अथ सर्वो लोकः कूटस्थः सिद्धस्वरूपो न विचेष्टितास्ति– वर्त्तमानत्वविशिष्टव्यापारकर्ता नास्ति, एवं यो जानाति सोऽप्यनन्धो दिव्यदृष्टिः, किं पुनर्यस्तदनुकूलमनुतिष्ठति स ह्यविकृतमात्मतत्त्वं भावयन् प्रत्यक्षीकरोति। तथा चोक्तं गीतासु—

"Aho Shrutgyanam"

"ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत् परम् ॥" इति ।

मीमांसकः– विचारकः, मन्यमानः– पूर्वोक्तं कूटस्थत्वं भावयन्, युवा– प्रज्ञापटुः, मेधावी चासौ संमतो लोकपूजितः, काकं स्नेहानुपृच्छति– स्नेहेनानुपृच्छतीत्यर्थः [आर्षप्रयोगः], ते पतितस्य पातस्य लक्षणं स्वरूपं किमिति, नास्त्येव पतनक्रियेत्यर्थः, तदेव स्पष्टयति– अनागते पाते पतसीति न कथयितुं शक्यते, तस्यानागतत्वेन भविष्यत्वात् । हे काक ! अतिक्रान्ते पातेऽपि पतसीति न प्रयोगस्तस्यातिक्रान्तत्वेन भूतत्वात्, क्रियाया असत्वात् । तथापि यदि सम्प्रति पतसीति कथ्यते, तदाऽयं सर्वो लोकः पतति, हिमवानपि गच्छति, यतः क्रियावर्त्तमानत्वाभावेऽपि यदि त्वयि पतसीति व्यवहारस्तदा सर्वत्रासौ व्यवहारः शक्यते कर्तुं क्रियाभावस्य तुल्यत्वात् । गच्छतीति प्रयोगाभावं पर्वतादिषु अन्येषु वा सोपपत्तिकमाह– अनागतमतिक्रान्तमित्यनेन, अनागतमिति भविष्यत्कालमाह– अतिक्रान्तमिति भूतं वर्तमानं च प्रसिद्धमेव । इति शब्दत्रयस्य कालविशेषणतया प्रयोगो दृश्यते, किन्तु क्षण एक एवेति तत्रानागतादिव्यवहारो न संभवति, एकस्मिँश्च क्षणे कथं गमनादिक्रियासम्बन्धः संभवतीति क्षणभङ्गवादिमतेनेदम् । तत्परिहारमाह– क्रियाप्रवृत्तौ यो हेतुरिति, क्रियायां प्रवृत्तौ यो हेतुर्यत् प्रयोजनं, यथा गमनक्रियाया देशान्तरप्राप्तिः, तदर्थं देशान्तरप्राप्तिरूपफलार्थमिति भावः, यद् विचेष्टितं व्यापारविशेषः, तं व्यापारविशेषं समीक्ष्य– प्रत्यक्षेणोपलभ्य, अविचारयन्– निर्विकल्प्यं यथा स्यात् तथा गच्छतीति वर्त्तमानकालिकगमनबोधकं पदं प्रयुञ्जीतेत्यन्वयः । अयमाशयः– क्षणभङ्गवादिनैवैकस्य क्षणस्य क्रियासम्बन्धाभावाद् गच्छतीत्यादिप्रयोगानुपपत्तिरुक्ता, सा न संघटते, 'सोऽयं घटः' इत्यादिप्रत्यभिज्ञानात् क्षणभङ्गवादे निरस्ते, देवदत्तस्य देशान्तरप्राप्तिर्निर्हेतुका न सम्भवतीति गमनक्रियैव देशान्तरप्राप्तेर्निमित्तम्, तदालम्बनश्च गच्छतीति प्रयोगो निर्बाध एव । देवदत्तीयदेशान्तरप्राप्त्यैव क्रियायाः सत्त्वमप्यवगम्यते । वर्त्तमानत्वाभावे च भूत-भविष्यतोरप्यभावप्रसङ्गः, वर्त्तमान एव भूतत्वं भविष्यत्वं च प्रतिपद्यते, तत्रानेकक्षणसमूहात्मकं क्रियासातत्यं बुद्ध्या सङ्कलय्य गच्छतीत्यादि प्रयुज्यत इति ॥

मतान्तरेण वर्त्तमानकालस्य सत्तामाह– [ भाष्ये ] अपर आह– अस्ति वर्त्तमानः काल इति । आदित्यगतिवन्नोपलभ्यत इति । अपि चात्र श्लोकमुदाहरन्ति······

"बिसस्य बाला इव दह्यमाना
न लक्ष्यते विकृतिः सन्निपाते ।
अस्तीति तां वेदयन्ते त्रिभावाः
सूक्ष्मो हि भावोऽनुमितेन गम्यः ॥६॥" इति ।

अयमाशयः– वर्त्तमानः कालोऽस्त्येव, किन्तु सूर्यो गच्छन्नपि दर्शकैरगतिमानेव दृश्यते, तद्गतेरतिसूक्ष्मत्वाद् दूरात् प्रत्यक्षीकर्त्तुमशक्यत्वात्, किन्तु छायादिपरिवर्त्तनदर्शनेन सानुऽमीयत एव । एवं वर्त्तमानः क्षणोऽपि सूक्ष्मत्वान्न लक्ष्यते, किन्तु देशान्तरप्राप्त्यादिनाऽनुमीयते इति । इममर्थं सदृष्टान्तमाह– बिसस्य बाला इव दह्यमाना इति । अयमर्थः– बिसे दह्यमाने तदीयतन्तवोऽपि दह्यन्त एव किन्तु सूक्ष्मत्वाद् दह्यमानत्वेन नावलोक्यन्ते, किन्त्वनुमीयन्ते– बिसान्तर्गतत्वाद् बिसदाहे तेऽपि दह्यन्त एवेति । एवं कारकसन्निपाते एकैकक्षणग्रहणे क्रियालक्षणा विकृतिः प्रत्यक्षेण न लक्ष्यते, किन्तु त्रिभावाः– त्रिषु कालेषु भावो भावना [ प्रत्यक्षीकृतिः ] येषां ते योगिनः, तां– विकृतिमस्तीतिशब्देन वेदयन्तेऽन्यान् प्रतिबोधयन्ति, योगिनो हि शास्त्रोक्तयोगानुष्ठानपरिपूतबुद्धयो योगजप्रत्यक्षेण त्रीनपि कालान् विदन्ति, त एव वर्तमानकालमस्तीति रूपेण व्यपदिशन्ति, अस्माभिस्तु सोऽनुमेय एव सूक्ष्मत्वात्, अनेकक्षणसमूहात्मकस्य धातुवाच्यस्य क्रियारूपस्यार्थस्य युगपदसन्निधानात् सोऽनुमानमात्रगम्य इत्यर्थः । अथ दण्ड-पल-मुहूर्त्ताद्यात्मा, खण्डकाल एव वर्त्तमानत्वादिना वाच्यः, तद्गतं वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणत्वमेव, तदादिशब्दशब्दशक्यतावच्छेदकत्वनिर्णयरीत्या तत्तच्छब्दाधिकरणत्वादीनामनुगमाच्च न शक्त्यानन्त्यम् । यदि वा वर्त्तमानत्वेनैव वर्त्तमानकालबोधोऽनुभवसिद्ध उपेयते, तदा तत्तच्छब्दाधिकरणकालवृत्तिकालत्वव्याप्यधर्मत्वेनोपलक्षिततत्तत्कालत्वावच्छिन्ने एव तिवादीनां शक्तिः, क्रियारम्भात् प्राक्, क्रियासमाप्त्युत्तरं च 'अधीते, पचति' इत्यादिप्रयोगापत्तिस्तु स्ववृत्तिप्रागभावाप्रतियोगिकत्व-स्ववृत्तिध्वंसाऽप्रतियोगिक्रियाऽनुयोगिकत्वविशिष्टाधेयतासंसर्गेणान्वयनियमोपगमाद् वारणीया । 'खण्डक्रिया धात्वर्थः' इति पक्षे तु शुद्धाधेयतासंसर्गेणैवान्वयेऽन्यात्मास्तीत्यादिषु न दोषः, क्रियामात्रार्थस्य [सामान्यतः कालादिविशेषणरहितक्रियार्थस्येत्यर्थः] धातोर्वर्त्तमानत्वादिविशिष्टक्रियायां लक्षणां ग्राहयन्ति तिवादय इत्येके, अन्वय-व्यतिरेकाभ्यां च वर्त्तमानत्वादिना कालस्तिवादिवाच्यः, स चान्वय-व्यतिरेकानुगमः– पचतीत्यादौ वर्त्तमानताप्रतीत्या पक्ष्यतीत्यादौ तदप्रतीत्या च सुगमः, अन्यथा प्रत्ययानां वाचकत्वविलोपप्रसङ्ग इति **परे** । इतोऽधिकं कालविशेषवाच्यतादिविचारोऽन्यत्र प्रपञ्चितो **महावैयाकरणभूषणादा**विति तत एवानुरुन्धातव्यः ।

"Aho Shrutgyanam"

प्रकृतमनुसरामः– तिव्-सिव्-मिवसु वकारस्य प्रयोगेऽप्रतीतेरप्रयोगिनश्चेत्त्वात् किमिह तदनुबन्धकरणफलमिति जिज्ञासायामाह– **वित्करणं "शिदवित्" [४. ३. २०.] इत्यत्र विशेषणार्थमिति**– अनेन हि सूत्रेण विद्वर्जितस्य धातोर्विधीयमानस्य प्रत्ययस्य ङिद्वद्भावो विधीयते, विद्वर्जनं च 'विद्' ज्ञानं विनानुपपन्नम्, वित्त्वं च वकारेत्संज्ञकत्वं, तच्च वित्करणं विनानुपपन्नमिति तिवादिप्रत्ययानां ङित्त्वाभावाय तत्र वित्त्वविशेषणमुपयुज्यते, तद्विशेषणार्थमेवेह तिवादीनां वित्करणमित्यर्थः। न केवलमेतदेव वित्करणप्रयोजनमपि त्वन्यदपीत्याह– **एवमन्यत्रापि वित्करणस्य प्रयोजनं द्रष्टव्यमिति**– एवं विशेषणत्वरूपं वित्करणस्य प्रयोजनं– फलमन्यत्रापि "शिदवित्" [४. ३. २०.] इत्यतोऽन्यस्मिन्नपि सूत्रे द्रष्टव्यं– स्वयमूहनीयमित्यर्थः, तथा च "उत औविति व्यञ्जनेऽद्वेः" [४. ३. ५७.] इत्यादावपि वित्करणफलं बोध्यमिति भावः, तेनापि हि अद्वयुक्तस्योदन्तस्य धातोर्व्यञ्जनादौ वितिप्रत्यये औत्वं विधीयते, तत्रापि वित्प्रत्ययज्ञानं वित्करणफलमिति यावत्। इदमपि संज्ञासूत्रं, संज्ञासूत्राणां च विधिसूत्रोपकारकत्वमेव प्रयोजनमिति कास्योपयोग इत्याकाङ्क्षायामाह– **वर्त्तमानाप्रदेशाः "स्मे च वर्तमाना" [५. २. १६.] इत्येवमादयः** इति– "स्मे च वर्त्तमाना" [५. २. १६] "ननौ पृष्टोक्तौ सद्वत्" [५. २. १७.] "नन्वोर्वा" [५. २. १८] "सति" [५. २. १९] इति चतुःसूत्र्या वर्त्तमानायास्तत्तदर्थे तत्तच्छब्दयोगे च विधानं भवति, तत्रैव वर्त्तमानासंज्ञायाः प्रकृतसूत्रविहिताया उपयोगः, अन्यथा तत्र तिवादीनामष्टादशानामपि ग्रहणमावश्यकं स्यात्, 'लघ्वर्थं हि संज्ञाकरणम्' इत्यभियुक्तोक्तेर्लघुनोपायेन शब्दशास्त्रप्रक्रियानिर्वाहार्थमेव संज्ञाविधानस्य प्रतीतत्वात् ॥ ३. ३. ६. ॥

**सप्तमी– यात्, याताम्, युस्, यास्, यातम्, यात, याम्, याव, याम; ईत, ईयाताम्, ईरन्, ईथास्, ईयाथाम्, ईध्वम्, ईय, ईवहि, ईमहि ॥३.३.७.॥**

**त० प्र०– इमानि वचनानि सप्तमीसंज्ञानि भवन्ति। सप्तमीप्रदेशाः– "इच्छार्थे कर्मणः सप्तमी" [५. ४. ८९.] इत्येवमादयः ॥७॥**

**श० म० न्यासानुसन्धानम्– सप्तमी०।** आख्यातविभक्तिसंज्ञाप्रकरणवशात् वर्त्तमानासंज्ञाविधानोत्तरं सप्तमीसंज्ञामाहानेन, अत्र च संज्ञाक्रमे न किञ्चिद् विनिगमकमपि तु ग्रन्थकर्तुरिच्छैवेति प्रतीयते, सप्तमीसंज्ञा च कमर्थमाश्रित्य कृतेत्यपि निश्चयेन प्रतिपादयितुं न शक्यते किञ्चिदिहैतत्संज्ञामूलविषये विचार्यते– 'वर्त्तमाना, भविष्यन्ती, श्वस्तनी, परोक्षा, आशीः, ह्यस्तनी, अद्यतनी, क्रियातिपत्तिः' इति अष्टासु विभक्तिषु स्ववाच्यार्थमादाय नामकरणदर्शनात्, इह च तदभावाद् भवति विचारणा– किम्मूलिकेयं संज्ञेति, तत्र वय तर्कयामः– पाणिनिप्रभृतिभिः पूर्वाचार्यैर्वर्तमानादिस्थाने 'लट्, लिट्, लुट्, लृट्, लोट्, लङ् लिङ् [२], लुङ्, लृङ्' इत्येवं सानुबन्धाः लकाराः कल्पिताः, तत्र विध्याद्यर्थेषु लिङ् विहितः, एवं च तस्या विभक्तेरनेकार्थत्वेनार्थविशेषनिबन्धना संज्ञा विधातुमशक्येति पूर्वाचार्यक्रमेण तस्या विभक्तेः सप्तमीत्वात् [सप्तसंख्यापूरणीत्वात्] स्वमते सप्तमीत्वेन तद्व्यवहारः कृत इति। 'यात्, याताम्, युस्' इत्येवमादयो विभक्तयः सप्तमीसंज्ञाः स्युरिति सूत्रार्थः। संज्ञाविधानस्य विध्यर्थत्वात् तदुपयोगिविधिप्रदेशं ग्राहयति– **सप्तमीप्रदेशाः–"इच्छार्थे कर्मणः सप्तमी" [५.४ ८९.] इत्येवमादयः** इति, आदिपदेन "सप्तमी चोर्ध्वमौहूर्त्तिके" [५. ३. १२.] "जातु-यद्-यदा-यदौ सप्तमी" [५. ४. १७.] "सप्तम्युताप्योर्बाढे" [५. ४. २१.] "इच्छार्थे सप्तमी-पञ्चम्यौ" [५. ४. २७.] इत्येवमादीनि सूत्राणि संग्राह्याणि, तत्र झटिति स्मृत्यारूढत्वात् "इच्छार्थे कर्मणः सप्तमी" इत्यस्योल्लेखः क्रमाननुगुणो विहितो विज्ञेयः ॥३. ३. ७.॥

**पञ्चमी– तुव्, ताम्, अन्तु, हि, तम्, त, आनिव्, आवव्, आमव्; ताम्, आताम्, अन्ताम्, स्व, आथाम्, ध्वम्, ऐव्, आवहैव्, आमहैव् ॥३.३.८.॥**

**त० प्र०– इमानि वचनानि पञ्चमीसंज्ञानि भवन्ति। पञ्चमीप्रदेशाः– "स्मे पञ्चमी" [५ ४ ३१.] इत्येवमादयः ॥८॥**

**श० म० न्यासानुसन्धानम्– पञ्चमी०।** सर्वत्रात्र प्रकरणे विधेयायाः संज्ञायाः पूर्वमेव निर्देशः स्पष्टप्रतिपत्त्यर्थः, अन्यथा तिवादीननूद्य वर्तमानादिसंज्ञाविधानस्य कार्यत्वेन पूर्वं तिवादीनामुल्लेख एवोचितः स्यात्। अत्राप्यस्या विभक्तेः पञ्चमीसंज्ञाविधाने मूलं मृग्यम्, यद्यपि ऋषीणां स्वातन्त्र्यं प्रसिद्धमिति तत्कृतौ न कश्चनानुयोगो विधेयस्तथाऽप्याचार्याणां यथासम्भवं कार्याणि समूलानि भवन्तीति तन्मूलान्वेषणा समायात्येव, तत्र वयं पूर्वं सप्तमीसंज्ञासूत्रोक्तमेव मूलमिहापि समुपस्थापयामः, तत्र हि पूर्वाचार्याणां लडादिक्रमेण सप्तमीस्थानाया लिङ्विभक्तेः सप्तमीत्वं दृष्टमिति प्रकृतेऽपि तन्मते पञ्चमीस्थानाया 'लोट्' विभक्तेः पञ्चमीत्वमेवास्याः पञ्चमीसंज्ञायां मूलमिति प्रतीयते। अधिकं चैतद्व्याकरणविशेषज्ञैः प्रकाशनीयम्। संज्ञाविधानस्य विध्यर्थ-

"Aho Shrutgyanam"

त्वेन पञ्चमीविधिप्रदेशं स्मारयति– **पञ्चमीप्रदेशाः– "स्मे पञ्चमी" [५. ४. ३१.] इत्येवमादयः** इति, आदिना "इच्छार्थे सप्तमी-पञ्चम्यौ" [५. ४. २७. ] "प्रैषाऽनुज्ञाऽवसरे कृत्यपञ्चम्यौ" [५. ४. २९.] "आशिष्याशीः-पञ्चम्यौ" [५. ४. ३८.] इत्येवमादीनि सूत्राण्युदाहार्याणि । अत्रापि विधिप्रदेशोदाहरणे सूत्रक्रमो न विवक्षितः, यथास्मृति तदुल्लेखः कृतः, केवलपञ्चमीविधायकं सूत्रं वा समुल्लिखितमिति बोध्यम् । अत्रापि तुवादौ वित्करणं "शिदवित्" [५. ३. २०.] इत्यादौ विशेषणार्थमेवेति बोध्यम् ॥ ३. ३- ८. ॥

**ह्यस्तनी– दिव्, ताम्, अन्, सिव्, तम्, त, अम्व्, व, म; त, आताम्, अन्त, थास्, आथाम्, ध्वम्, इ, वहि, महि ॥३. २. ९.॥**

**त० प्र०– इमानि वचनानि ह्यस्तनीसंज्ञानि भवन्ति । ह्यस्तनी प्रदेशाः– "अनद्यतने ह्यस्तनी"** [५. २. ७.] **इत्येवमादयः ॥९॥**

**श० म० न्यासानुसन्धानम्– ह्यस्तनी०** । दिवादीनामष्टादशानां विभक्तीनां 'ह्यस्तनी'संज्ञा विधीयतेऽनेन सूत्रेण, 'ह्यस्तनी'शब्दार्थश्च भूतानद्यतनः कालः, ह्यसित्यव्ययमतीतेऽव्यवहितपूर्वदिने रूढम्, ह्यो भवा ह्यस्तनी "सायं-चिरं-प्राह्णे-प्रगेऽव्ययात्" [६. ३. ८८.] इति तनट्, टित्त्वात् स्त्रियां ङीः, भूतानद्यतनीत्यर्थः । आन्याय्यादुत्थानात् आन्याय्याच्च संवेशात् [न्याय्यमुत्थानसमयमारभ्य न्याय्यसंवेशनसमयमभिव्याप्य] यः कालः सोऽद्यतन इत्येके, उभयतः सार्धरात्रं वा [अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च युक्त]दिनमद्यतनमिति परे, तद्भिन्नो भूतः कालो ह्यस्तनः, तद्बोधिका विभक्तिर्ह्यस्तनी, ह्यस्तनशब्दस्य तादृशकालवाचकार्थे प्रयोगात्, एवंभूतार्थे विधानादस्या विभक्तेरिदं नामान्वर्थम् । एतत्संज्ञोपयोगिविधिप्रदेशमाह– **ह्यस्तनीप्रदेशाः– "अनद्यतने ह्यस्तनी" [५. २. ७.] इत्येवमादयः** इति, आदिशब्देन "ह-शश्वद्-युगान्तः प्रच्छ्ये ह्यस्तनी वा" [५. २. १३.] इत्यादीनि सूत्राण्युदाहार्याणि, अत्रापि दिवादीनां वित्करणफलं पूर्ववदनुसन्धातव्यम् ॥ ३. ३. ९. ॥

**एताः शितः ॥ ३. ३. १०. ॥**

**त० प्र०– एता वर्तमाना-सप्तमी-पञ्चमी-ह्यस्तन्यः शितः– शानुबन्धा वेदितव्याः । शित्त्वाच्च शित्कार्यम्– भवति, भवेत्, भवतु, अभवत् ॥१०॥**

**श० म० न्यासानुसन्धानम्– एताः०** । **'एताः'** इत्यनेनानुपदोक्ताः स्त्रीत्वविशिष्टसंज्ञाबोध्या विभक्तयः परामृश्यन्ते, तदादिशब्दानां बुद्धिस्थपरामर्षकत्वस्य प्रसिद्धत्वात्, तथा चाहुः पदवाक्यविचारपारावारपारीणाः– तदादिशब्दानां बुद्धिविशेषविषयतावच्छिन्ने शक्तिरिति । तथा च योऽर्थः प्रकृतसूत्रस्य फलति तमाह– **एताः– वर्त्तमाना-सप्तमी-पञ्चमी-ह्यस्तन्यः** इति । 'शितः' इत्यस्यार्थमाह– **शानुबन्धाः** इति– श् इत् यासां ताः शित इति बहुव्रीहिणा 'शित्'शब्दस्य शानुबन्धबोधकत्वात् । तत्र च सति वास्तविके श नुबन्धत्वे शानुबन्धत्वविधान व्यर्थं स्यात्, ❋ अप्राप्ते शास्त्रमर्थवद् ❋ इति न्यायेनाप्राप्तविधान एव शास्त्रस्य सार्थक्यादित्यविद्यमानं शकारानुबन्धकत्वमेतासु प्रकृतसूत्रेणारोप्यते । अथवा वर्तमानादिसंज्ञाबोध्यानां तिवादीनां वर्त्तमानादिसंज्ञया सह शित्संज्ञा विधीयते प्रकृतसूत्रेण । संज्ञानां च स्वतो विरोधाभावेन विधिसूत्रद्वारैव विरोध इति न वर्त्तमानादिसंज्ञाभिः सह शित्संज्ञाया बाध्यबाधकभावः । शिन्निमित्तककार्यविधायकेषु च शित्संज्ञस्य वास्तविकस्य च शितो ग्रहणं ❋ कृत्रिमा-ऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ❋ इति न्यायापवादस्य ❋ उभयगतिरिह भवति ❋ इति न्यायस्य जागरूकत्वात्, अन्यथा एतास्वेव शिन्निमित्तकं कार्यं स्यान्न शवादिषु वास्तविकशित्सु । शित्संज्ञायाः शिद्वद्भावस्य वा फलमाह– **शित्वाच्च शित्कार्यमिति**– शिद्वद्भावविधानाच्च शिन्निमित्तकं कार्यमेतासु विभक्तिषु परतो भवतीत्यर्थः । तथा चोदाहरति– **भवति, भवेत्, भवतु, अभवत्** इति, **भवती**ति भूधातोर्वर्त्तमानायां प्रथमपुरुषैकवचने तिवि रूपम्, तत्र तिवः शित्वेन "कर्त्तर्यनद्भ्यः शव्" [३ ४. ७१.] इति शव् भवति, तस्य [शवः] वित्त्वेन च "शिदवित्" [४. ३. २०.] इत्येतद्विषयत्वाभावादङित्त्वेन "नामिनो गुणोऽङिति" [४. ३. १ ] इति गुणेऽवादेशे च– भवतीति सिध्यति । **भवेदि**ति भूधातोः सप्तम्याः प्रथमपुरुषैकवचने तुवि रूपम्, शित्संज्ञादि पूर्ववत् । **अभवदि**ति भवतेरेव ह्यस्तन्याः प्रथमपुरुषैकवचने दिविरूपं शित्वाच्छवि सिध्यति, एतच्च भ्वादेरुदाहरणम्, एवं– दिवाद्यादिषु शित्वात् श्यादिविधानमुदाहार्यम्, एतच्च कर्तरि, भाव-कर्मविहिते शिति च "क्यः शिति" [३. ४. ७०.] इत्यादि कार्यमप्युदाहर्तुं शक्यते, दिङ्मात्रदर्शनस्यैवोदाहरणप्रयोजनत्वादधिकं **नोक्तम्** ॥ ३. ३. १०. ॥

**अद्यतनी– दि, ताम्, अन्, सि, तम्, त, अम्, व, म; त, आताम्, अन्त, थास्, आथाम्, ध्वम्, इ, वहि, महि ॥ ३. ३. ११.॥**

"Aho Shrutgyanam"

**त० प्र०– इमानि वचनान्यद्यतनीसंज्ञानि भवन्ति। अद्यतनीप्रदेशाः– 'अद्यतनी'' [५. २. ४.] इत्यादयः ॥११॥**

**श० म० न्यासानुसन्धानम्– अद्यतनी०।** अस्मिन्नहनीत्यर्थे 'अद्य'शब्दः ''सद्योऽद्य-परेद्यव्यह्नि'' [७. २. ६७.] इति सूत्रेण निपातितः। अद्य भवेत्यर्थे ''सायं-चिरं-प्राह्णे प्रगेऽव्ययात्'' [६. ३. ८८.] इति तनट्, टित्वात् स्त्रियां ङीः– अद्यतनीति सिध्यति। अद्यतनश्च कालो ह्यस्तनीसंज्ञाविधायकसूत्रे व्याख्यातः, सोऽपि त्रिविधः– भूतो भविष्यत् वर्त्तमानश्च, तत्र भूतार्थे एवाद्यतन्या विधानादद्यतनोऽपि भूत एवाद्यतन्या वाच्यः, न केवलमद्यतनो भूतकाल एवाद्यतन्या वाच्योऽपि तु भूतसामान्यं तस्या वाच्यं, सामान्यभूत एव ''अद्यतनी'' [५. २. ४.] इति सूत्रेण तस्या विधानात्, अद्यतनीति नाम तु ह्यस्तनीतुल्यकक्ष्यत्वद्योतनार्थमेव, सा हि अनद्यतने भूते यथा प्रयुज्यते तथेयमद्यतनेऽपि, न तु तत्रैवेति तात्पर्यात्, साऽपि हि न ह्यस्तन एव [अव्यवहितपूर्वदिन एव], अपि तु ततः पूर्वस्मिन्नपि भूते काले न तु परतो[ऽद्यतने]भूते। तथा चाद्यतनीशब्दो नाद्यतनभूतमात्रबोधकत्वाभिप्रायेण 'दि ताम्' इत्यादौ संकेतितोऽपि तु ह्यस्तनीप्रातिकूल्यबोधनाभिप्रायेणैव। अद्यतनीसंज्ञोपयोगिविधिसूत्रमाह–**अद्यतनीप्रदेशाः–''अद्यतनी''** [५. २. ४.] **इत्यादयः** इति, आदिना ''वाऽद्यतनी पुरादौ'' [५. २. १५.] ''माङ्यद्यतनी'' [५. ४. ३९.] इत्यादिसूत्राणां संग्रहो बोध्यः ॥ ३. ३. ११. ॥

## परोक्षा– णव्, अतुस्, उस्, थव्, अथुस्, अ, णव्, व, म; ए, आते, इरे, से, आथे, ध्वे, ए, वहे, महे ॥ ३. ३. १२. ॥

**त० प्र०– इमानि वचनानि परोक्षासंज्ञानि भवन्ति। परोक्षाप्रदेशाः– ''श्रु-सद-वस्भ्यः परोक्षा वा''** [५. २. १.] **इत्येवमादयः ॥१२॥**

**श० म० न्यासानुसन्धानम्– परोक्षा०।** 'णव् अतुस्' इत्यादीनामष्टादशवचनानां परोक्षासंज्ञाविधायकमिदं सूत्रम्। ''परोक्षे'' [५. २. १२.] इति सूत्रेण परोक्षेऽर्थे विधानादर्थनिबन्धनेयं परोक्षा संज्ञा। तत्र परोक्षं यद्यपि भूतभविष्यत्साधारणं तथापि भविष्यतः परोक्षत्वमनिश्चितमिति भूतपरोक्षस्यैवेह परोक्षत्वेन व्यवहारः, 'परोक्षे'' [५. २. १२.] इति सूत्रे 'भूतानद्यतने' इत्यस्य सम्बन्धाच्च भूतानद्यनपरोक्षार्थ एव तस्या विधानात् परोक्षपदेन तादृशं परोक्षत्वमेवेह विवक्षितं विधिसूत्रेण सहैकवाक्यादिति बोध्यम्। तत्र परोक्षत्वं च साक्षात्करोमीत्येतादृशलौकिकव्यवहाराविषयत्वमेव, वा परोक्षत्वमिति तु नोचितम्; पाचकः पपाचेत्युपनीतविधया प्रत्यक्षान्यज्ञानविषयत्वं प्रत्यक्षाविषयत्वं भासमानक्रियायां तादृशपरोक्षत्वासंभवात्, उपनीतमानेन च साक्षात्करोमीत्याकारकप्रतीति - साक्षिकलौकिकव्यवहाराविषयत्वस्याक्षतेः, पाचकः पपाचेत्यादीनां नानुपपत्तिः। ननु दशमस्त्वमसीत्यादिवाक्यादप्यपरोक्षज्ञानमुत्पद्यते, तत्र च प्रत्यक्षत्वं सर्ववादिसम्मतम्, शब्दजन्यतादृशज्ञानगोचरेन्द्रियासम्बन्धक्रियायां परोक्षाप्रत्ययापत्तिरितिचेन्न-इन्द्रियार्थसन्निकर्षस्यैव तादृशलौकिकविषयतानियामकतेति, दशमस्त्वमसीत्यादिस्थले शाब्दधीसहकृतमनसैव दशमसाक्षात्करो न तु मनसेत्याशयात्।

अथास्य परोक्षत्वस्य क्वान्वय इति विचार्यते– तत्र कर्तरि नान्वयः सम्भवति, विद्यमाने प्रत्यक्षविषये कर्त्तरि' अयं पपाच' इति प्रयोगानुपपत्तिः, नापि क्रियायामन्वयसंभवः, तस्या अतीन्द्रियत्वेन प्रत्यक्षविषयत्वयोग्यताभावेन तत्र परोक्षत्वस्यानिर्णयात्। एतच्च भाष्ये इत्थं विचारितम्– ''परोक्षे लिट्'' [पा० सू० ३. २. ११५.] इति सूत्रे, तथाहि– कस्मिन् पुनः परोक्षे लिड् [परोक्षा] भवति? काले। न वै कालाधिकारोऽस्ति। एवं तर्हि धातोरिति वर्त्तते– धातौ परोक्षे। धातुर्वै शब्दः, न च शब्दस्य प्रत्यक्ष-परोक्षतायां संभवोऽस्ति, शब्देऽसंभवादर्थे कार्यं विज्ञास्यते– परोक्षे धातौ– परोक्षे धात्वर्थे इति। कः पुनर्धात्वर्थः क्रिया, क्रियायामपरोक्षायामिति। यद्येवं ह्योऽपचदित्यत्र लिट् [परोक्षा] प्राप्नोति। किं कारणम्? क्रिया नामेयमत्यन्तापरदृष्टाऽनुमानगम्याऽशक्या पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठितः। एवं तर्हि साधनेषु परोक्षेषु। साधनेषु परोक्षेषु भवतः कः सम्प्रत्ययः? यदि तावद् गुणसमुदायः साधनम्, साधनमप्यनुमानगम्यम्। अथान्यद् गुणेभ्यः साधनं भवति, प्रत्यक्षपरोक्षतायां संभवः। अथ यदानेन रथ्यायां तण्डुलोदकं दृष्टम्, कथं तत्र भवितव्यम्? यदि तावत्साधनेषु परोक्षेषु पपाचेति भवितव्यम्, भवन्ति हि तस्य साधनानि परोक्षाणि। अथ य एते क्रियाकृता विशेषाश्चीत्काराः फूत्काराश्च, तेषु परोक्षेषु। एवमपि पपाचेति भवितव्यम्'' इति।

अस्यायमाशयः– कालेन सह परोक्षत्वस्यान्वयासम्भवः, तदसम्बन्धात्। धातुनापि न तस्य सर्वदा परोक्षत्वाद् विशेषणवैयर्थ्यात्। क्रियाया अपि नापरोक्षत्वसंभवः, तस्या अनुमानगम्यत्वात्, तत्रापि तद्विशेषणवैयर्थ्यमेव। एवं च क्रियासाधनेषु परोक्षेषु परोक्षा भवतीति सिद्धान्तः। तत्र क्रियासाधनपदेन द्वयं विवक्ष्यते– क्रियासिद्धिनिमित्तशक्तिमद्द्रव्याणि क्रियासाधिकाः शक्तयो वा, उभयथा परोक्षाप्रत्ययः

"Aho Shrutgyanam"

समुचित एव । अथैतद्विषयेऽन्यैः क्रियाऽवान्तरविशेषाणां फूत्कारादीनां प्रत्यक्षविषयतादर्शनात् क्रियायां परोक्षायामित्यपि पक्षः साधीयानेवेत्युक्तम् । अत एव पश्य मृगो धावतीति प्रयोगे धात्वर्थव्यापारप्राधान्यवादिनां मते उत्कटधावनस्य दृशिकर्मत्वमुपपद्यते, लौकिकप्रत्यक्षविषयताया एव दृश्यर्थत्वात्, अन्यत्र दृशेर्ज्ञानसामान्यार्थत्वेऽपि प्रकृते चाक्षुषप्रत्यक्षविषयतायामेव तत्प्रयोगात् । एतच्च **हरिणा**पि प्रतिपादितम्—

"क्रमात् सदसतामेषामात्मना न समूहिनः ।
सद्वस्तु विषयैर्यान्ति सम्बन्धं चक्षुरादिभिः ॥" इति ।

अस्यायमाशयः— धात्वर्थव्यापाराः क्रमादुत्पद्यमानानाम्, अत एव सदसतां केचिदवान्तरव्यापाराः सन्तः वर्त्तमानाः, केचिदसन्तोऽतीताः, अत एव विद्यमानाविद्यमानानामात्मना स्वरूपेण समूहिनः अवयवसम्पन्ना न सन्ति, तथापि सद्वस्तुविषयैः— विद्यमानपदार्थविषयैश्चक्षुरादिभिरिन्द्रियैः सम्बन्धं यान्ति-गृह्यन्ते इति । एवं च प्रत्यक्षानर्हत्वेऽपि स्वभावात् प्रत्यक्षविषयतेति भवति तेषां पारोक्ष्यसम्भवः, तेषां प्रत्यक्षपरोक्षविषयत्वस्वीकारादेव सदसद्रूपतोपपत्तिः । न चैवमवयवद्वारा क्रियायाः प्रत्यक्षत्वस्वीकारे तस्या अतीन्द्रियत्वकथनपरभाष्यग्रन्थव्याकोपः शङ्कनीयः, अवयवप्रत्यक्षत्वस्य समुदाये समारोपः कार्यसिद्धचर्थं, न तु दोषापादनार्थमिति तदाशयात्, आरोपस्य कार्यसिद्धिमात्रप्रयोजनकत्वस्याचार्यैः स्वीकारात् । 'पश्य मृगो धावति' इत्यादिप्रयोगानुसारं व्यापारस्य [धावनक्रियायाः] लौकिकविषयताशालित्वस्य सकलतान्त्रिकसम्मतत्वेन तत्र विवादाभावः । यदि च धावनजन्यं फलमेव तत्र दृशिकर्मेति स्वीक्रियते तर्हि धातोर्व्यापारमुख्यार्थत्वव्याघातः, 'प्रकृतः कटः' इत्यपि आदिकर्मातीतत्वेन समुदायातीतत्वमनारोप्योपपन्नम् । इत्थं च क्रियापारोक्ष्यमवयवद्वारकमेव सूत्रकारतात्पर्यविषय इति सर्वमनवद्यम् । वयं तु ब्रूमः— विवक्षाधीना एव वर्त्तमानत्व-भूतत्व-भविष्यत्व-परोक्षत्वादिव्यवहाराः, एवं च क्रियाया भूतानद्यतन-परोक्षत्वविवक्षायां 'णव् अतुस् उस्' इत्यादयः प्रत्ययाः, इयांस्तु विशेषः— यत्र योंऽश उपेक्ष्यते तत्र तदतिरिक्तधर्मपुरस्कारेणैवान्वयबोधः, अत एव "अध्यास्त सर्वर्तुसुखामयोध्याम्" इत्यादिप्रयोगोपपत्तिः ।

अत्रेद विचार्यते— परोक्षाया उत्तमपुरुषे कथं प्रयोगः, स्वव्यापारस्य स्वं प्रति पारोक्ष्यस्य कथमप्युपपादयितुमशक्यत्वेन "व्यातेने किरणावलीमुदयनः" इत्यादिस्वकृतकिरणावलीग्रन्थपुष्पिकायामुदयनाचार्यप्रयोगस्य कथं सङ्गतिः, अन्यत्र विषयान्तरसञ्चारप्रभृतिचित्तव्यासङ्गादिना स्वव्यापारस्य पारोक्ष्यसंभवेऽपि बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनाऽतीतत्वयोर्विस्तारक्रियायामसत्त्वेन च परोक्षोत्तमपुरुषप्रयोगासङ्गतेः । एवं च विवक्षावशादेवेदृशाः प्रयोगाः सङ्गमनीयाः । एषां प्रत्ययानां विवक्षाधीनत्वस्वीकारादेव ह्योऽपाक्षीदित्यत्र भूतत्वमात्रविवक्षायामद्यतनीसंज्ञकः प्रत्ययः, अन्यथा ह्यःकालस्यानद्यतनत्वेन ह्योऽपचदित्येव स्यात्, पाके भूतत्वसामान्यविवक्षया अद्यतन्यां जातायां पश्चात् ह्यःपदार्थेनान्वयेऽनद्यतनप्रतीतावपि जातसंस्कारस्य निवर्त्तयितुमशक्यत्वेन तादृशप्रयोगसङ्गतेः ।

परोक्षासंज्ञामुक्त्वा तदुपयोगिविधिसूत्राणि निदर्शयति— **परोक्षाप्रदेशाः— "श्रु-सद्-वस्भ्यः परोक्षा वा"** [५. २. १.] **इत्येवमादयः** इति, अनेन सूत्रेण भूतार्थेभ्यः श्रु-सद्-वस्भ्यः परोक्षासंज्ञकाः प्रत्यया विधीयन्ते, आदिशब्देन "कृतास्मरणाऽतिनिह्नवे परोक्षा ।" [५. २. ११] "परोक्षे" [५. २. १२] इत्यादयः सग्राह्याः ॥ ३. ३. १२ ॥

---

## आशीः— क्यात्, क्यास्ताम्, क्यासुस्, क्यास्, क्यास्तम्, क्यास्त, क्यासम्, क्यास्व, क्यास्म; सीष्ट, सीयास्ताम्, सीरन्, सीष्ठास्, सीयास्थाम्, सीध्वम्, सीय, सीवहि, सीमहि ॥३. ३. १३.॥

**त० प्र०— इमानि वचनानि आशीःसंज्ञानि भवन्ति । कित्करणं "नामिनो गुणोऽक्ङिति"** [४. ३. १.] **इत्यादिषु विशेषणार्थम् । आशीःप्रदेशाः— "आशिष्याशीः-पञ्चम्यौ"** [५. ४. ३८.] **इत्यादयः** ॥१३॥

---

**श० म० न्यासानुसन्धानम्— आशीः०** । 'क्यात्' इत्यादीनां प्रत्ययानामाशीःसंज्ञा विधीयतेऽनेन सूत्रेण, "आशिष्याशीः-पञ्चम्यौ" [५. ४. ३८.] इति सूत्रेणाशीरर्थे विधानादेषामशीःसंज्ञकत्वम् । भविष्यदर्थाऽऽशंसनमाशीः, **अन्ये** तु शुभाशंसनमेवाशीरिति कथयन्ति, तन्न 'मृषीष्ट' इत्यादावाशीःप्रयोगानापत्तेः । क्यादित्यादावनुबन्धस्यासञ्जनं किंनिमित्तकार्यसिद्धचर्थमिति भूयादित्यादौ गुणो न । आशीर्विधिसूत्रं प्रदर्शयति— **आशीःप्रदेशाः— "आशिष्याशीः-पञ्चम्यौ"** [५. ४. ३८.] **इत्यादयः** इति, आदिशब्देन "आशिषि तु-ह्योस्तातङ्" [४. २. ११९.] "आशिषीणः" [४. ३. १०७.] इत्येवमादीनि आशीःसंज्ञके प्रत्यये कार्यविधायकानि सूत्राणि सग्राह्याणि, संज्ञाया न केवलं तत्संज्ञया प्रत्ययविधानार्थत्वमेवाऽपि तु तत्संज्ञाकृतयावद्व्यवहारमात्रार्थत्वमिति स्वीकारात् ॥३. ३. १३.॥

"Aho Shrutgyanam"

**श्वस्तनी- ता, तारौ, तारस्, तासि, तास्थस्, तास्थ, तास्मि, तास्वस्, तास्मस्; ता, तारौ, तारस्, तासे, तासाथे, ताध्वे, ताहे, तास्वहे, तास्महे ॥ ३. ३. १४. ॥**

**त० प्र०- इमानि वचनानि श्वस्तनीसंज्ञानि भवन्ति । श्वस्तनीप्रदेशाः- "अनद्यतने श्वस्तनी" [५. ३. ५.] इत्येवमादयः ॥१४॥**

**श० म० न्यासानुसन्धानम्- श्वस्तनी०।** 'ता तारौ' इत्यादीनां प्रत्ययानां श्वस्तनीसंज्ञा विधीयतेऽनेन सूत्रेण । तत्र श्वःशब्दोऽव्यवहितागामिदिनबोधकः, श्वो भवा इत्यर्थे श्वस्तनीशब्दः "सायं-चिरं-प्राह्णे-प्रगेऽव्ययात्" [६. ३. ८८.] इति सूत्रेण तनटि सिध्यति । एवं च यद्यपि श्वो भाविन्यर्थे एवास्याः प्रयोगो लभ्यते, तथापि "अनद्यतने श्वस्तनी" [५. ३. ४.] इति सूत्रेण वर्त्स्यत्यनद्यतने विधानाद् भविष्यदनद्यतनकाले एवास्याः प्रयोगः, तत्र श्वःशब्दस्य भविष्यदग्रिमदिनवाचकत्वस्य सिद्धत्वेनाग्रिमपदेऽव्यवहितत्वस्याविवक्षया श्वस्तनीशब्दोऽपि भविष्यदनद्यतनकालार्थत्वबोधक इति बोध्यम् । तथा च भविष्यदनद्यतनकालविवक्षायामेवास्याः प्रयोगो भविष्यत्वसामान्यविवक्षायां भविष्यदद्यतनत्वविवक्षायां च भविष्यन्त्याः प्रयोग इति स्पष्टीकरिष्यतेऽग्रिमसूत्रव्याख्यायाम् । श्वस्तनीसंज्ञोपयोगि विधिसूत्रमाह- **श्वस्तनीप्रदेशाः- "अनद्यतने श्वस्तनी" [५. ३. ५.] इत्येवमादयः** इति, आदिपदेन "परिदेवने" [५. ३. ६.] इति सूत्र संग्राह्यम् ॥ ३. ३. १४. ॥

**भविष्यन्ती- स्यति, स्यतस्, स्यन्ति, स्यसि, स्यथस्, स्यथ, स्यामि, स्यावस्, स्यामस्; स्यते, स्येते, स्यन्ते, स्यसे, स्येथे, स्यध्वे, स्ये, स्यावहे, स्यामहे ॥ ३. ३. १५. ॥**

**त० प्र०- इमानि वचनानि भविष्यन्तीसंज्ञानि भवन्ति । भविष्यन्तीप्रदेशाः- "भविष्यन्ती" [५. ३. ४.] इत्यादयः ॥१५॥**

**श० म० न्यासानुसन्धानम्- भविष्यन्ती०।** 'स्यति स्यतः' इत्यादीनां भविष्यन्तीसंज्ञा विधीयते। "भविष्यन्ती" [५. ३. ४.] इति सूत्रेण वर्त्स्यति काले विधानादेषां प्रत्ययानां भविष्यन्तीति यथार्थं नाम, भविष्यत्त्वं च विद्यमानप्रागभावप्रतियोगिसमयोत्पत्तिकत्वम्, विद्यमानो यः प्रागभावस्तस्य प्रतियोगी यः समयः- आगामिकालः, तस्मिन्नुत्पत्तिर्यस्य तादृशत्वमित्यर्थः । भविष्यत्त्वस्योत्पत्तिघटितत्वादेव येषां मते नश्यत्यादिधातूनां नाशमात्रमर्थः, तेषां विद्यमानप्रागभावप्रतियोगित्वं भविष्यत्वमित्येतावन्मात्रोक्तौ श्वो भाविनाशके घटादौ परश्वो नङ्क्ष्यतीति प्रयोगापत्तिः. वर्त्तमानप्रागभावप्रतियोगिनि घटनाशे परश्वः कालवृत्तित्वस्य सत्त्वात् । यदि च परश्वस्तनकालस्य विद्यमानप्रागभावे आकाङ्क्षावैचित्र्यात् सर्वत्रान्वयोऽभ्युपगम्यते, प्रकृते च प्रागभावे तस्यावृत्तित्वान्नानुपपत्तिरित्युच्यते तदा श्वोभाविनाशकेऽपि श्वो नङ्क्ष्यतीति न स्यात् तन्नाशप्रागभावे श्वस्तनकालसम्बन्धबाधात्, भविष्यत्वे उत्पत्तिघटिते स्वीकृते च सर्वत्राकाङ्क्षावशादन्वयाभ्युपगमे निरुक्तस्थले नाशोत्पत्तेः परश्वस्तनकाल सम्बन्धबाधात् न परश्वो नङ्क्ष्यतीति प्रयोगापत्तिलेशोऽपि । यत्र चोत्पत्तिरेव धात्वर्थः, तत्रोत्पत्त्यघटितमेव भविष्यत्वं निर्वक्तव्यम्, अन्यथा द्विधोत्पत्तेर्भानप्रसङ्गः । इदं त्ववधेयम्- इहाद्य घटो भविष्यतीत्यादौ देशकालविशेषादेरधिकरणत्वेन धातुवाच्योत्पत्त्यर्थ एवान्वयोऽभ्युपेयः, न तु भविष्यत्वघटकप्रागभावे उत्पत्त्याश्रये वा, तथा सति कपालनाशजन्यघटनाशस्थले इह कपाले घटध्वंसो भविष्यतीति प्रयोगापत्तेः, घटरूपप्रतियोग्यात्मकघटध्वंसाभावस्य कपाले सत्त्वात् । एवं श्वोभावन्यद्य भविष्यतीति प्रयोगः प्रसज्येत, अद्यतनकालवृत्तित्वस्य प्रागभावे सत्त्वात् । एवं भवने श्वः समुत्पद्य परश्वः प्राङ्गणे गमिष्यति चैत्रे प्राङ्गणे परश्वो भविष्यति चैत्र इत्यापद्येत, उत्पत्तिमतश्चैत्रस्य प्राङ्गणवृत्तित्वात् परश्वस्तनकालवृत्तित्वाच्च । उत्पत्तिघटितभविष्यत्वस्वीकारे तु चैत्रस्य परश्वस्तनकालवृत्तित्वेऽप्युत्पत्तेस्तत्कालावृत्तित्वान्न काचिदनुपपत्तिः । श्वःशब्दाप्रयोगे भविष्यत्वसामान्यविवक्षायां भविष्यन्त्या एव प्रयोगो न श्वस्तन्याः ॥ ३. ३. १५. ॥

**क्रियातिपत्तिः- स्यत्, स्यताम्, स्यन्, स्यस्, स्यतम्, स्यत, स्यम्, स्याव, स्याम; स्यत, स्येताम्, स्यन्त, स्यथास्, स्येथाम् स्यध्वम्, स्ये, स्यावहि, स्यामहि ॥ ३. ३. १६. ॥**

**त० प्र०- इमानि वचनानि क्रियातिपत्तिसंज्ञानि भवन्ति । क्रियातिपत्तिप्रदेशाः- "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [५. ४. ९.] इत्येवमादयः ॥१६॥**

**श० म० न्यासानुसन्धानम्- क्रियातिपत्तिः०।** 'स्यत् स्यताम्' इत्यादिप्रत्ययानां क्रियातिपत्तिसंज्ञा विधीयतेऽनेन

"Aho Shrutgyanam"

सूत्रेण; क्रियाया अतिपत्तिरनिष्पत्तिः- क्रियातिपत्तिः, भविष्यदर्थाद् भूतार्थाच्च धातोः क्रियाया अनभिनिर्वृत्तौ सत्यां क्रियातिपत्तिर्विधीयते "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [५. ४. ९.] इति सूत्रेण, तथा च क्रियातिपत्त्यर्थे विधानादेवाऽस्याः क्रियातिपत्तिसंज्ञा । यद्यपि एवं स्वीकारे परस्पराश्रयत्वदोषः संभवति, क्रियातिपत्तिरूपेऽर्थे विधानात् क्रियातिपत्तिसंज्ञा, क्रियातिपत्तिसंज्ञकत्वाच्च क्रियातिपत्त्यर्थे विधानमितिरूपः, तथापि व्याकरणशास्त्रस्य न शब्दनिष्पादकत्वमपि तु निष्पन्नानामेव शब्दानामर्थबोधाय प्रकृतिप्रत्ययादिविभागकल्प्यकत्वमित्यस्यार्थस्य बहुशो व्याख्यातत्वेन स्थितस्यैव क्रियातिपत्तिबोधकत्वस्य शास्त्रेणानुविधानमित्युत्पत्तौ ज्ञप्तौ वा परस्पराश्रयत्वाभावेनादोषो बोध्यः, एवं वर्तमानादौ सर्वत्र दोषोद्धारो विज्ञेयः । सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यदित्यादिप्रयोगे सुवृष्टिकर्तृकभवनक्रियाया अनभिनिर्वृत्तिनिमित्तायाः सुभिक्षकर्तृकाऽनभिनिर्वृत्तिनिवृत्तेः स्पष्टं प्रतीयमानत्वेन क्रियातिपत्तिसंज्ञाया यथार्थत्वम्, संज्ञामुक्त्वा तदुपयोगिविधिप्रदेशं निर्दिशति- **क्रियातिपत्तिप्रदेशाः- "सप्तम्यर्थे क्रियातिपत्तिः"** [५. ४. ९.] **इत्येवमादयः** इति, आदिपदेन "भूते" [५. ४. १०.] "वोतात् प्राक्" [५. ४. ११.] इति सूत्रे संग्राह्ये । इत्थं त्यादिविभक्तिसंज्ञाविधानं पूर्णम् ॥ ३. ३. १६. ॥

## त्रीणि त्रीण्यन्ययुष्मदस्मदि ॥ ३. ३. १७. ॥

**त० प्र०- सर्वासां विभक्तीनां त्रीणि त्रीणि वचनानि अन्यस्मिन्नर्थे युष्मदर्थे अस्मदर्थे चाभिधेये यथाक्रमं परिभाष्यन्ते । अन्यत्वं युष्मदस्मदपेक्षं संनिधानात् । युष्मच्छब्दोपसृष्टार्थो युष्मदर्थः, तेन भवच्छब्देनोच्यमानो न युष्मदर्थः । स पचति, तौ पचतः, ते पचन्ति; पचति, पचतः, पचन्ति; स पचते, तौ पचेते, ते पचन्ते; पचते, पचेते, पचन्ते; भवान् पचति, भवन्तौ पचतः, भवन्तः पचन्ति; इत्यादि । युष्मदि- त्वं पचसि, युवां पचथः, यूयं पचथ; पचसि, पचथः, पचथ; त्वं पचसे, युवां पचेथे, यूयं पचध्वे; पचसे पचेथे, पचध्वे । अस्मदि- अहं पचामि, आवां पचावः, वयं पचामः; पचामि, पचावः, पचामः; अहं पचे, आवां पचावहे, वयं पचामहे; पचे, पचावहे, पचामहे । एवं सर्वासु । द्वययोगे त्रययोगे च शब्दपराश्रयमेव वचनमतिदिश्यते- स च त्वं च पचथः, स चाहं च पचावः; स च त्वं चाहं च पचामः । कथमत्वं त्वं संपद्यते- अनहमहं संपद्यते- त्वद्भवति मद्भवति ? युष्मदस्मदोर्गौणत्वात्, त्वमादेशौ तु शब्दमात्राश्रयत्वाद् भवत एव । एहि मन्ये- रथेन यास्यसि, नहि यास्यसि, यातस्ते पितेति प्रहासे यथाप्राप्तमेव प्रतिपत्तिर्नात्र प्रसिद्धार्थविपर्यासे किञ्चिन्निबन्धनमस्ति, रथेन यास्यसीति भावगमनाभिधानात् प्रहासो गम्यते, नहि यास्यसीति बहिर्गमनं प्रतिषिध्यते, अनेकस्मिन्नपि प्रहसितरि च प्रत्येकमेव परिहास इत्यभिधानवशात् 'मन्ये' इत्येकवचनमेव, लौकिकश्च प्रयोगोऽनुसर्तव्य इति न प्रकारान्तरकल्पना न्याय्या ॥१७॥**

**श० म० न्यासानुसन्धानम्- त्रीणि०** । "वर्तमाना- तिव्, तस्, अन्ति," [३. ३. ६.] इत्यादि सूत्रैरष्टादशानां विभक्तीनां प्रत्येकं वर्तमानादिसंज्ञा विधीयन्ते, तेषु नवाद्यानां परस्मैपदसंज्ञा 'नवाऽऽद्यानि शतृक्वसू च परस्मैपदम्" [३. ३. १९.] इति सूत्रेण विधास्यते परेषां नवानां चात्मनेपदसंज्ञा "पराणि कानाऽऽनशौ चात्मनेपदम्" [३. ३. २०.] इति सूत्रेण विधास्यते, इति प्रत्येकं वर्तमानादीनां द्विधा विभागोऽङ्गीकृतः, तत्र प्रत्येकस्मिन् विभागे नव वचनानि, तेषामपि त्रिधा विभागः प्रथम-मध्यमोत्तमभेदेनाभीष्टः, तस्यैव विभागस्यार्थविशेषे प्रयोगार्थमिदं सूत्रम् । तत्र '**त्रीणि त्रीणि**' इति न वीप्सार्थे द्विर्वचनमपि तु एकं त्रिपदं त्रित्वावच्छिन्नावयवकसमुदायपरमिति त्रीणि त्रिकानीति लभ्यतेऽर्थः, तदेव स्पष्टीकरिष्यते- त्रीणि त्रीणि वचनानीत्युक्त्या । तत्रास्य सूत्रस्य सन्निहितसूत्रोक्तप्रत्ययमात्रविषयत्वमिति भ्रमस्य व्युदासायाह- **सर्वासां विभक्तीनामिति** । '**अन्ययुष्मदस्मदि**' इति पदमर्थपरमित्याह- **अन्यस्मिन्नर्थे** इत्यादिना, तथा च न तत्तच्छब्दप्रयोग एव तानि तानि वचनान्यपि तु तदर्थविवक्षामात्रे, तथा च 'किं पचसि ?' इत्यादौ त्वशब्दाप्रयोगेऽपि मध्यमपुरुषोपपत्तिः । यथाक्रममिति- प्रथमं त्रिकमन्यार्थे शब्दे प्रयुज्यमाने तदर्थे वा विवक्षिते परिभाष्यते, मध्यमं त्रिकं युष्मदर्थे प्रयुज्यमाने विवक्षिते वा परिभाष्यते, उत्तमं त्रिकमस्मदर्थे प्रयुज्यमाने विवक्षिते वा परिभाष्यते इति भावः । 'परिभाष्यते' इत्युक्त्या चास्य सूत्रस्य परिभाषासूत्रत्वं स्फोरितम्, तथा च वर्तमानादिविधायकसूत्रसहकारकत्वमस्य फलति, एतत्सूत्रसहकारेण वर्तमानादिविधायकसूत्रैः "सति" [५. २. १९.] इत्यादिभिर्विद्यमानक्रियार्थाद् धातोरन्यार्थे वाच्ये वर्तमानाप्रथमपुरुषस्य विधानं भवति, परिभाषासूत्राणां विधिसूत्रैः सहैकवाक्यतास्वीकारात् । "अन्यस्मिन्नर्थे" इत्युक्तं तत्रान्यत्वं च केवलान्वयि, स्वेतरापेक्षया सर्वस्यान्यत्वादिति युष्मदस्मदर्थयोरप्यन्यत्वं भवतीति कोऽर्थोऽत्रान्यार्थतयाऽभिमत इत्याशङ्कायामाह- **अन्यत्वं युष्मदस्मदपेक्षमिति**- अन्यत्वस्य नित्यसापेक्षत्वेनावश्यं प्रतियोगिन आकाङ्क्षोदेति, तत्र*उप-

"Aho Shrutgyanam"

**स्थितं** परित्यज्यानुपस्थितकल्पने मानाभावः* इति न्यायेनोपस्थिते युष्मदस्मदी एव प्रतियोगिनी परिकल्पनीये इति युष्मदर्थास्मदर्थापेक्षयैव तदन्यार्थो विवक्षित इति भावः, तदाह– **सन्निधानादिति**– सन्निधानं च सामीप्यं समीपोपस्थानादित्यर्थः। नन्वेवमस्मदर्थातिरिक्ते सर्वत्र युष्मच्छब्दस्य प्रयोगात् सर्वस्य पदार्थस्य युष्मदर्थत्वमिति युष्मच्छब्दोऽप्यव्यावर्त्तक इति चेदत्राह– **युष्मच्छब्दोपसृष्टार्थो युष्मदर्थः** इति– युष्मच्छब्देनोपसृष्टो– विशेषितो योऽर्थः स युष्मच्छब्दार्थ इति भावः। तथा च बुद्धिविषयत्वोपलक्षितसंबोध्यतावच्छेदकधर्मावच्छिन्ने युष्मदः शक्त्यभ्युपगमेऽपि यदि युष्मच्छब्देन तदर्थस्य प्रतिपिपादयिषा तदैव भवति मध्यमत्रिकं नान्यदेति फलति, एवमर्थविवक्षायाः फलमाह– **तेन भवच्छब्देनोच्यमानो न युष्मदर्थः** इति– भवच्छब्दस्यापि सम्बोध्यतावच्छेदकधर्मावच्छिन्ने शक्तिसत्त्वेऽपि न तदर्थस्य युष्मच्छब्दोपसृष्टार्थत्वमिति न भवति भवदर्थे वाच्ये मध्यमपुरुषप्रयोग इति भावः, भवच्छब्दश्चैवमन्यार्थ इति तद्योगे प्रथमत्रिकस्यैव प्रयोगः, तथा च भवान् पचतीत्येव प्रयोगो न तु भवान् पचसीति। अर्थग्रहणाच्च "किमसि विस्मरसि स्मरसायकान्" इत्यादिप्रयोगेऽसीति पदस्य युष्मदर्थप्रतिपादकत्वेन भवति द्वितीयत्रिकस्य प्रयोगोपपत्तिः, एवं "नास्मि रमे ! किं प्रतारयस्येवम्" इत्यादावस्मीति पदस्यास्मदर्थबोधकत्वेन तत्प्रयोगे उत्तमपुरुषप्रयोगोपपत्तिः। क्रमश उदाहरति– **स पचती**त्यादिना, तच्छब्दस्य बुद्धिस्थपरामर्षकत्वेन युष्मदस्मदर्थोपस्थापकत्वेऽपि प्रकृते युष्मदस्मच्छब्दोपसृष्टार्थबोधाभावेनान्यत्वमेवेति भवति प्रथमत्रिकस्यैव तद्योगे प्रयोगः। 'अन्यस्मिन्नर्थे' इत्यादिरूपेणार्थपरतया व्याख्यानस्य प्रयोजनं स्फोरयति– **पचति, पचतः, पचन्ती**ति तदादिशब्दाघटितप्रयोगेण। तस्यायमाशयः– विनापि तदादिपदं तदर्थस्य वाच्यत्वेन विवक्षणादिह भवति प्रथमत्रिकस्य प्रयोग इति। परस्मैपदप्रथमत्रिकमुदाहृत्यात्मनेपदप्रथमत्रिकमुदाहरति– **स पचते** इत्यादिना। तच्छब्दार्थे समुदाहृत्य भवच्छब्देन योगे समुदाहरति तस्य युष्मच्छब्दार्थताभ्रमव्युदासार्थम्– **भवान् पचतीत्यादि**। **इत्यादीति**– 'भवान् पचते' इत्यादिकम्, देवदत्तः पचतीत्यादिकं वा प्रातिस्विकमुदाहरणं स्वयमूह्यमिति भावः। एवं प्रथमत्रिकमुदाहृत्य द्वितीयत्रिकमुदाहरति **युष्मदी**ति प्रकृत्य– युष्मदर्थे वाच्ये यथेत्यर्थः। **त्वं पचसी**ति– पच्धातूत्तरेण सिप्रत्ययेन युष्मदर्थ एवोच्यते, अत एव त्वमित्यनेन सह तदर्थस्य कर्तुरभेदः, त्वदभिन्नकर्तृको वर्त्तमानकालिकः पाक इत्यर्थात्, तथा च युष्मदर्थसामानाधिकरण्याद् भवति द्वितीयत्रिकम्। विनाऽपि युष्मदः प्रयोगं तदर्थसामानाधिकरण्यविवक्षामात्रेणापि द्वितीयत्रिकमुदाहरति– **पचसी**त्यादि। युष्मदर्थसामानाधिकरण्ये समुदाहरति– **अहं पचामी**त्यादिना। **एवं सर्वास्विति**– वर्त्तमानामात्रोदाहरणेनान्यासु विभक्तिष्वपि प्रथमादित्रिकोदाहरणानि स्वयमूह्यानीति भावः। एवमेकैकमन्यार्थादियोगे व्यवस्थामुक्त्वा यत्रान्ययुष्मदस्मदर्थानां साङ्कर्यं तत्र का व्यवस्थेति जिज्ञासामपनयन्नाह– **द्वययोगे त्रययोगे चेति**– यत्र च अन्यार्थ-युष्मदर्थयोः, अन्यार्थास्मदर्थयोः, युष्मदस्मदर्थयोर्वा सहैकस्यां क्रियायां योगः, यत्र वा समेषामेकत्र योगः, तत्र सूत्रोक्तरीत्या परशब्दनिमित्तकमेव त्रिकं भवतीत्यर्थः। **शब्दस्पर्धादि**त्यस्य सर्वादिपाठानुसारिशब्दपूर्वपरविप्रतिषेधात् प्रकृतसूत्रपाठानुसारिशब्दपूर्वपरविप्रतिषेधादिति वाऽर्थः, उभयथाप्यवस्थायां भेदाभावात्। **पराश्रयमेव वचनमिति**– परपठितशब्दार्थसामानाधिकरण्यनिमित्तकमेव वचनं– त्रिकम्, **अतिदिश्यते**– अनेन सूत्रेण परिभाष्यत इत्यर्थः। तथा चोदाहरति– **स च त्वं च पचथः** इति– अत्र पचिक्रियायां तदर्थ-युष्मदर्थयोरुभयोः सह कर्तृत्वमिति युष्मदर्थसामानाधिकरण्यनिमित्तकं द्वितीयत्रिकमेव भवति। **स चाहं च पचावः** इति– अत्र तदर्थाऽस्मदर्थैरुभयोः कर्तृत्वमिति परत्वादस्मदर्थसामानाधिकरण्याश्रयमेव तृतीयं त्रिकं भवति, एवं– 'त्वं चाहं च पचावः' इत्यपीहोदाहार्यम्, तत्रापि द्वययोगस्य समत्वात्। यत्र त्रययोगस्तत्राह– **स च त्वं चाहं च पचामः** इति– अत्र त्रयाणामपि सत्त्वेऽस्मद एव परत्वात् तदाश्रयं तृतीयं त्रिकमेव भवति. एतच्च सहोक्तौ सत्यां ज्ञेयम्, यत्र सहोक्तिर्नास्ति तत्रैकशेषाभावात् प्रत्येकं क्रिया भविष्यतीति स च त्वं च पचति च पचसि चेति, एवं– स चाहं च पचति च पचामि च, त्वं चाहं च पचसि च पचामि च. स च त्वं चाहं च पचति च पचसि च पचामि चेति, एतच्चैकदेशिनो मतम्। सिद्धान्ती तु कर्त्रोः सह विवक्षाभावादेकशेषाभावेऽपि क्रियाया एकत्वेन तत्रैकशेषः स्वभावसिद्ध एवेति पुरुषव्यवस्था स्पर्धेनैव भविष्यतीति 'स च त्वं च पचथः' इत्याद्येव भविष्यति। स च त्वं चेत्यनयोरेकशेषाभावे युवामिति एकरूपाभावेऽपि क्रियाया एकत्वस्य स्वभावसिद्धतया एकैव क्रिया प्रयोक्ष्यते, तत्र च परत्वात् पुरुषव्यवस्था भविष्यति। परमत्वं पचसि, परमाहं पचामीत्यत्र च युष्मदस्मदर्थयोः प्राधान्यसत्त्वात् तन्निबन्धनैव पुरुषव्यवस्था। अतित्व पचति, अत्यहं पचतीत्यत्र च युष्मदस्मदोरन्यपदार्थं प्रत्युपसर्जनत्वादन्यपदार्थेनैव सामानाधिकरण्यमित्यन्यार्थ एव प्रधानमिति तदनुगामिन्येव पुरुषव्यवस्था। च्विप्रत्ययस्थले पुरुषव्यवस्थां दर्शयितुं

"Aho Shrutgyanam"

शङ्कते- **कथमत्वं त्वं सम्पद्यते, अनहमह संपद्यते- त्वद्भवति, मद्भवती**ति, अयमाशयः- त्वद्भिन्नस्य वस्तुनः त्वत्सम्पत्तिरिहाख्यायते, तत्र सम्पद्यतेः कर्तृत्वं त्वच्छब्दे प्रतीयते इति तदाश्रयेण द्वितीयत्रिकेण भवितव्यं, कथमत्र प्रथमत्रिकं प्रयुज्यते इति, प्रकृति-विकृत्योरभेदविवक्षायां च्विप्रत्ययो विधीयते, तत्र प्रकृत्याश्रयं प्रथमं त्रिकं विकृत्याश्रयं च मध्यमं त्रिकं प्राप्नोति, किन्तु प्रकृतेरेव सम्पत्तौ कर्तृत्वं विवक्षितमिति तदाश्रयेण प्रथमत्रिकेणैव भाव्यम्, ननूभयोरभिन्नत्वेन विकारस्य त्वमित्यस्यापि तत्र कर्तृत्वमस्त्येवेति तदाश्रयेण मध्यमत्रिकेण कुतो न भूयत इति चेदत्राह- **युष्मदस्मदोर्गौणत्वा**दिति, अयमाशयः- युष्मद्भिन्ने युष्मदर्थ आरोप्यते, तथा च तदर्थो गौण इति * गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः * इति न्यायेन आरोपितयुष्मदर्थस्य गौणस्य नेह ग्रहणमित्यन्यार्थनिबन्धनं प्रथमत्रिकमेव भविष्यति । नन्वेव गौणयोर्युष्मदस्मदोस्त्वमादेशावपि न भविष्यत इति चेदत्राह- **त्वमादेशौ हि शब्दमात्राश्रयत्वाद् भवतः** इति- गौणमुख्यन्यायस्यार्थाश्रिते कार्ये प्रवृत्तिः, अर्थ एव हि गौणत्वं मुख्यत्वं च, त्व-मादेशौ तु शब्दयोर्भवतो न त्वर्थनिबन्धनाविति तत्र नास्ति गौणमुख्यन्यायप्रवृत्तिविषयतेति भावः । ननु सादृश्यस्थले उपमानोपमेययोस्तादात्म्यात् त्वमिवाचरति अहमिवाचरतीत्यत्राख्यातार्थवाचित्वं युष्मदस्मदोरपि, तेन त्वद्यसे मद्यसे इति भवितव्यम्, प्रयुज्यते च त्वद्यते मद्यते इति, यथा 'विद्वानिवाचरतीति विग्रहे क्यङ् "सो वा लुक् च" [३. ४. २७.] इति सलुकि- 'विद्वायते' इति, एवमिहापि युष्मदस्मदोः कर्तृत्वात् तदाश्रयेण त्रिकेण भाव्यमिति चेन्न, भेदप्राधान्यात् । किमुच्यते भेदप्राधान्यादिति ? तद्भिन्नत्वे सति तद्धर्मवत्त्वं हि तादात्म्यम्, तत्र तत् तदन्यतरच्छक्यं प्रधानयितुं भेदमभेदं वा, इह प्राधान्येन भेद आश्रीयते, क्यङ्प्रत्यये चिकीर्षिते त्वभेदः । कथं पुनरेकस्मिन् प्रयोगे उभयमाश्रयितुं शक्यम् ? शक्यम्, यथा "पूजाऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विगणन-व्यये नियः" [३. ३. ३१.] इति सूत्रे 'नियः' इति पदे भेदप्राधान्यात् धातुभिन्नत्वमादाय नामसंज्ञा, अभेदप्राधान्यात् धातुसंज्ञया इय् आदेशः । तदुक्तमभियुक्तैः-

"शब्दानां ज्ञप्तिरुत्पत्तिः स्यातां स्याद्वाददर्शने ।
शब्दे चैकान्ततो नित्येऽनित्ये वा तद्द्वयं कुतः ? ॥"

इति, तथा चोभयमेव समाहर्तुं शक्यते । किञ्च त्वमिवाचरतीत्यादौ उपमेयभूताचारक्रियाक्षिप्तायाः उपमानक्रियायाः कर्तृत्वं युष्मच्छब्दार्थस्य न पुनरुपमेयक्रियायाः कर्तृत्वमित्यपि वक्तुं शक्यम् । किञ्च 'त्वं त्वद्यसे, त्वं विद्वायसे' इत्यादौ युष्मदो धातुसामीप्येनोच्चारणादुपोच्चारितपदत्वमिति भवत्येव मध्यमवचनम्, 'त्वद्यते' इत्यादौ तु धातुशरीरघटितत्वमेव युष्मच्छब्दस्य, न तु तत्राख्यातस्य युष्मदर्थसामानाधिकरण्यं नापि त्वद्य-मद्यधातोर्विहिताख्यातप्रत्ययानां वाच्यत्वमर्थद्वारकं तत् तु त्वत्सदृशस्य चैत्रादिरूपान्यस्यैवेति कोऽवकाशश्चोद्यस्य । अथ क्वचिन्मध्यमोत्तमपुरुषयोर्व्यत्यासो लौकिकप्रयोगे दृश्यते, तदुपपत्तिः कथमिति प्रदर्शयितुमाह- **एहि, मन्ये रथेने**ति- कश्चित् कञ्चित् परिहसन्नाह- **एहि** इहागच्छ, **मन्ये** त्वदाशय भावये; तमेवाशयं स्वोक्त्याऽनुवदति- **रथेन यास्यसि** रथेन यास्यामीति भावयसीत्यर्थः, किन्तु **नहि यास्यसि,** गमननिषेधे हेतुमाह- **यातस्ते पिते**ति- ते पितैव रथेन यात इति रथाभावाद् रथेन तव यानमसंभावितमित्यर्थः । अत्र परमतं खण्डयन् स्वाशयमाह- **इति प्रहासे यथाप्राप्तमेव प्रतिपत्तिर्नात्र प्रसिद्धार्थविपर्यासे किञ्चिन्निबन्धनमस्ती**ति- इति- पूर्वोक्तरूपे, प्रहासे- परिहासे, यथाप्राप्तमेव- स्वभावसिद्धमेव, यथा स्यात् तथा, प्रतिपत्तिः- प्रतिपिपादयिषितार्थप्रतीतिर्भवति, इति प्रसिद्धस्य- लोकप्रतीतस्यार्थस्य विपर्यासे- वैपरीत्ये- युष्मदर्थताऽन्यार्थतयोर्विनिमये, किञ्चित्- स्वभावादन्यद् निबन्धनं- कारणं नास्तीत्यन्वयः । ननु विना विशेषवचनमत्र प्रहास इति कथमवगम्येत, तत्त्वकथनस्यापि संभवादिति चेदत्राह-**रथेन यास्यसीति भावगमनाभिधानात् प्रहासो गम्यते** इति-रथेन यास्यसीति शब्देन त्वदीयो भावो मयाऽवगत इति सूचनेन तवाभिप्रायावगत्या मयेदं कथ्यत इति सूचनात् प्रहासो विज्ञायत इत्यर्थः, अत्र 'भाविगमनाभिधानाद्'इत्यपि पाठः सम्भाव्यते, **नहि यास्यसीति बहिर्गमनं प्रतिषिध्यते** इति-गमनस्य संभावितत्वेऽपि बाह्यरूपेण गमनस्य प्रतिषेधो न तु वास्तविक इति हेतोरपि प्रहासो गम्यत इत्यनुषङ्गः । मन्यतेरुत्तमपुरुषेण सह तस्यैकत्वमपि परैर्विधीयते, तत्राह-**अनेकस्मिन्नपि प्रहसितरी**ति-प्रहसितरि द्वित्वे बहुत्वे च द्विवचन-बहुवचनयोः प्राप्तिरिति तत्रैकत्वं परैर्विधीयते, किन्तु अभिधानस्वभावात् प्रत्येकमेव परिहासकर्त्तेति तदनुसारमेकवचनं न्यायप्राप्तमेवेति न तत्रैकत्वस्य विशिष्य विधानमावश्यकम् । ननु यदि मिलितरीत्या द्विकर्तृको बहुकर्तृको वा परिहासो भवेत् तदा द्वित्व-बहुत्वयोरपि प्रयोगः स्यादिति चेदत्राह- **लौकिकश्च प्रयोगोऽनुसर्तव्य इति न प्रकारान्तरकल्पना न्याय्ये**ति- प्रयुक्तानामिदमन्वाख्यानमिति सिद्धान्तेन प्रयुक्ता एव शब्दा व्याकरणेनान्वाख्यायन्त इति यथाप्रयोगस्तथैव व्याकरणेनानुविधेयमिति न विपरीतस्य द्वित्व-बहुत्वयोः प्रसङ्गस्य कल्पना न्याय्या न्याय-

"Aho Shrutgyanam"

प्राप्ता, तथा चैकत्वस्यैव लोके प्रयोगात् स एव भविष्यति, न द्वित्व-बहुत्वे भवत इत्यर्थः ।

अत्रायमभिसन्धिः– "प्रहासे च मन्योपपदे, मन्यतेरुत्तम एकवच्च" [पा० सू० १. ४. १०६.] इति पाणिनीयसूत्रेण प्रहासे गम्यमाने मन्यधातुरुपपदं यस्य तस्माद् धातोर्मध्यमः पुरुषो भवति, मन्यतेश्चोत्तमः पुरुषो भवति, स चैकवद् भवतीति विधीयते. 'एहि, मन्ये– ओदनं भोक्ष्यसे इति, भुक्तः सोऽतिथिभिः, एहि, मन्ये– रथेन यास्यसीति, यातस्ते पितेति चोदाहरणम् । अत्र 'एहि, मन्यसे– ओदनं भोक्ष्ये' इति तत्त्वकथनावस्था, तत्र मन्यतिः परिहास्यमानकर्तृक इति परिहसित्रपेक्षया युष्मदा व्यवहार्य इति युष्मदर्थवाचकतया तत्र मध्यमपुरुषः, 'ओदनं भोक्ष्ये' इति तदीयभावानुवाद इति तस्य [ परिहासस्य ] स्वं प्रति अस्मदा व्यवहार्यत्वेन अस्मदर्थापेक्षया उत्तमपुरुषश्च न्यायप्राप्त इति तद्विपरीतभावाय मन्योपपदाद् भुजेर्मध्यमपुरुषविधानं, मन्यतेरुत्तमपुरुषविधानं च क्रियते । यत्र च द्वौ मन्तारौ भोक्तारौ वा तावेव, यत्र वा त्रयो मन्तारो भोक्तारो वा, तत्रोभयत्र द्विवचन-बहुवचनयोः प्राप्तिरिति मन्यतेरुत्तमपुरुषस्यैकवचनं विधीयते भुज्यादेश्च यथाप्राप्तम् । तेन चाहमेवं कल्पये– यत् त्वं भोक्तुमिच्छसि, परं ते भोजनं न भविष्यति, यतोऽतिथिभिः पूर्वमेव स ओदनो भुक्त इति प्रहासः प्रतीयते, किन्तु तदीयभावाविष्करणमिदमिति न ज्ञायते, तज्ज्ञानं च प्रकृतसूत्रार्थानुसंधानजन्यमेव । अत्र हि न स्वमतमनूद्यते वक्त्राऽपि तु तदीयाभिप्रायानुवादः क्रियत इति तथा सति मन्यतेर्मध्यमो भुजेरुत्तमः प्राप्त इति वैपरीत्यं सूत्रं विना न संभवति । लौकिकप्रयोगानुसरणं च सूत्रकृता, न तु शिष्येण, शिष्या हि लक्षणैकचक्षुष्काः, लक्ष्यैकचक्षुष्कैः शास्त्रकर्तृभिरनुशास्या इति तदर्थमनुशासनस्यावश्यकत्वमिति पाणिनीयानां मतम् । स्वमते च स्वानुमानसूचनेनाऽपि परिहासो गम्यत इति न तदर्थं वचनावश्यकता । एकत्वं च परिहसितुरेकत्वादेवात्र सिद्धम्, यत्रापि बहवः परिहसितारस्तत्रापि स्वभावात् प्रत्येकं परिहसितृत्वं विवक्ष्यत इति न मन्यतेर्द्वित्व-बहुत्वापत्तिरिति स्वीक्रियत इति न तदनुशासनं क्रियत इति विवेकः ।

अत्र सूत्रे अन्ययुष्मदस्मदां त्यदादित्वेन समाहारकरणात् सहोक्तिसत्त्वाच्च "त्यदादिः" [३. १. १२०.] इति सूत्रेणास्मद एव परत्वाच्छेषः स्यादिति न प्रकृतसूत्रनिर्देशः संगत इति चेन्न– पूर्वं शब्दपरत्वविवक्षयाऽनुकरणरूपत्वेनार्थवाचकत्वाभावादेकशेषाभावे सति पश्चादर्थपरत्वेन व्याख्यानेऽपि दोषाभावात् ॥ ३. ३. १७ ॥

## एक-द्वि-बहुषु ॥ ३. ३. १८. ॥

**त० प्र०– अन्यादिषु यानि त्रीणि त्रीणि वचनानि उक्तानि तानि एक-द्वि-बहुष्वर्थेषु परिभाष्यन्ते– एकस्मिन्नर्थे एकवचनम् द्वयोरर्थयोर्द्विवचनम्, बहुष्वर्थेषु बहुवचनम् । स पचति, तौ पचतः, ते पचन्ति इत्यादि । वचनभेदान्नान्यादिभिरेकादीनां यथासंख्यम् ॥१८॥**

**श० म० न्यासानुसन्धानम्– एक०** । पूर्वसूत्रेण प्रथमादित्रिकाणामन्याद्यर्थविशेषे परिभाषणात् तत्र च प्रत्येकं त्रिके त्रयाणां वचनानां क्रमेणैकत्वाद्यर्थेषु परिभाषणार्थं सूत्रमिदमिति पूर्वसूत्रशेषतयेदं सूत्रं व्याख्यायते– **अन्यादिषु यानि त्रीणि त्रीणि वचनान्युक्तानी**त्यादिना, तथा च पूर्वसूत्रमिहापि सम्पूर्णं सम्बध्यते, सूत्रे साकाङ्क्षपददृष्टमन्वयार्थं च पदं * अपेक्षातोऽधिकारः * इति न्यायात् सूत्रान्तरादनुवर्तनीयं सर्वत्रेति नियमात्; एकश्च द्वौ च बहवश्चेत्यर्थे इतरेतरयोगद्वन्द्वे तु सप्तमी । एकादिषु भावप्रधानो निर्देशः, ननु विना यत्नं भावप्रधाननिर्देशोऽयमिदं कथं विज्ञास्यते, यत्नश्च तदुत्तरं त्वप्रत्ययविधानमेव स च द्वन्द्वान्तेपि विहितः प्रत्येकं समन्त्स्यते, तथा चैकद्विबहुत्वेष्विति सूत्रं विधेयमिति चेन्न– अन्तरेणापि यत्नं भावप्राधान्यस्य परिज्ञातुं शक्यत्वात् । कथमिति चेदित्थम्– इह कदाचिद् गुणो गुणिपरो भवति, यथा– पटः शुक्ल इति, अत्र च गुण-गुणिनोः सामानाधिकरण्यं भवति, तत्र च विना भावप्रत्ययं भावप्राधान्यं न प्रतीयते । यदा तु गुणिना गुणो विशेष्यते– पटस्य शुक्लत्वमिति । एवमिहापि 'अन्ययुष्मदस्मदि' इत्यनुवृत्तं षष्ठ्या विपरिणमय्य अन्ययुष्मदस्मदर्थानामेकस्मिन् द्वयोर्बहुषु च क्रमेणैकवचनं द्विवचनं बहुवचनमिति व्याख्यातुं शक्यत्वात् । तथा चान्ययुष्मदस्मदर्थेषु विहितानि त्रीणि त्रीणि वचनानि तेषामेकत्व-द्वित्व-बहुत्वेषु क्रमशः परिभाष्यन्त इति सूत्रवाक्यार्थधीः । वाक्यार्थकाले एकत्वादीनामेकवचनादीनां च समुदितत्वेऽपि यथासंख्यन्यायेन "शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय" इत्यादाविव क्रमेणैव पदार्थान्वयः, तथा चाह– **एकस्मिन्नर्थे एकवचनमि**त्यादिना, 'एकस्मिन्नर्थे' इत्यत्र अन्यादीनामिति सम्बध्यते आकाङ्क्षावशात्, तथा च अन्यार्थे विहितानि यानि तिवादीनि च वचनानि तत्र अन्यार्थस्यैकत्वे एकवचनम्, तस्यैव द्वित्वे द्विवचनम्, तस्यैव बहुत्वे च बहुवचनमित्यादिरीत्यैव लक्ष्यसंस्कारको वाक्यार्थबोधो विज्ञेयः, एवं युष्मदस्मदोरपि विषये लक्ष्यसंस्कारोपयोगि वाक्यं कल्पनीयम् । इह च द्विशब्दसाहचर्यात् सहविवक्षितयोरेक-बहुशब्दयोः संख्यार्थयोरेव ग्रहणं न त्वन्यार्थयोः।

"Aho Shrutgyanam"

"एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥"

इति रीत्यैकशब्दस्यानेकार्थत्वम्, बहुशब्दस्य संघवैपुल्याद्यर्थकत्वमिति प्रकृते संख्यार्थकयोरेव तयोर्ग्रहणं द्विसाहचर्यात् । अत्र पाणिनीयाः– एतच्च सूत्रं स्यादित्यादिप्रत्ययसाधारणम्, स्यादिष्वप्येकत्वादावेकवचनादीनां विधानात्, यदि च तत्रैकवचनमित्यादिमहासंज्ञाबलेनैव विनापि सूत्रमेकत्वादावेकवचनादीनां विधानमिति स्वीक्रियते तर्हि प्रकृतेऽपि तथा सम्भवत्येवेति व्यर्थमेवेदं सूत्रं स्यात् । किञ्च लोके विनापि शास्त्रमेकत्व दावेकवचनस्य प्रयोगः प्रसिद्ध एवेत्यनारम्भणीयमेवेद सूत्रमिति चेदत्रोच्यये– यद्यपि शास्त्रेऽनुपात्तोऽप्यर्थः प्रयोगादेव व्यवस्थाप्यते, त्यादिविधायकवचने च संख्याविशेषानिर्देशात् विशेषानुपादानेनैव तेषां विधानम्, कर्तृकर्मणोर्विधीयमानास्त्यादयः संख्यायुक्तयोरेव तयोः स्युस्तत्र संख्याया अवश्याभ्युपेयत्वात् तत्र कुत्र का संख्येति च लौकिकप्रयोगादेव सेत्स्यतीति नावश्यकत्वं सूत्रस्येति शङ्कितुं शक्यते, तथापि लोकिकप्रयोगे संख्याया विप्रयोगो– विरुद्धः प्रयोगोऽपि दृश्यते, यथा– अक्षीणि मे दर्शनीयानि, पादा मे सुकुमारा इति, अत्र द्वित्व-युक्तयोरप्यक्षिपादयोर्बहुवचनं प्रयुज्यने, तथा मा प्रयोजीत्यर्थं नियमार्थमिदं सूत्रमारब्धव्यमेवेति । तत्र नियमो द्विधा संभवति– प्रत्ययनियमोऽर्थनियमश्च, एकस्मिन्नेवैकवचनं द्वयोरेव द्विवचनं बहुष्वेव बहुवचनमिति प्रत्ययनियमः, एकस्मिन्नेवैकवचनमेव, द्वयोर्द्विवचनमेव, बहुषु बहुवचनमेवेत्यर्थनियमः, तत्रार्थः प्रकृतस्तमपेक्ष्यैव नियमो युक्त इति प्रत्ययनियमपक्ष एव भाष्यादिसम्मतः । एवं च अक्षीणि मे दर्शनीयानीत्यादयः प्रयोगा असाधव एव अवयवगतं वा बहुत्वमारोप्य तथाप्रयोग इति समाधातव्यम् ।

उदाहरति– **स पचती**त्यादिना, स इत्यनेनैकत्वयुक्तः कर्ता प्रतीत इति त्यादिष्वेकवचनं तिवेव तत्र भवति, न द्विवचन-बहुवचने, एवं– **तौ पचतः** इत्यादावपि व्याख्येयम् । **इत्यादी**ति– एवं रीत्याऽन्ययोरपि त्रिकयोरुदाहार्यमिति भावः । ननु अन्ययुष्मदस्मदां त्रित्वेन एकद्विबहुनां त्रयाणां तत्र संख्याक्रमेणान्वये– अन्यार्थे त्रिके एकवचनं युष्मदर्थे त्रिके द्विवचनमस्मदर्थे त्रिके बहुवचनमिति रीत्यैव सूत्रार्थो भविष्यति, न पूर्वप्रतिपादितरीत्येति चेदत्राह– **वचनभेदान्नान्यादिभिरेकादीनां यथासंख्यमि**ति अयमाशयः– लाघवानुरोधी सूत्रकृत् पूर्वसूत्रे समाहारनिर्देशेनान्ययुष्मदस्मदीति एकवचनेन व्यवहृतवान् प्रकृतसूत्रेऽपि तथैकवचनेनैव व्यवहर्त्तव्ये बहुवचनेन संख्याभेदं प्रयोजयन्– इह पूर्वोपात्तेन सह यथासंख्यं नेष्टमपितु अर्थसामार्थ्यलब्धेनैकवचनादिनैवेति सूचयतीति ॥ ३. ३. १८. ॥

## नवाद्यानि शतृ-क्वसू च परस्मैपदम् ॥३. ३. १९.॥

**त० प्र०– सर्वासां विभक्तीनामाद्यानि नव नव वचनानि शतृ-क्वसू च प्रत्ययौ परस्मैपदसंज्ञानि भवन्ति । तिव् तस् अन्ति, सिव् थस् थ, मिव् वस् मस् एवं– सर्वासु । परस्मैपदसंज्ञाप्रदेशाः– "शेषात् परस्मै" इत्यादयः ॥१९॥**

**श० म० न्यासानुसन्धानम्– नवाद्यानि०** । वर्त्तमानादिषु प्रत्येकमष्टादशवचनानि, तेषु विभागद्वयम्-तिवादिमस्पर्यन्तमेको भाग आद्यः, ते आदि-महेपर्यन्तं द्वितीयो भागः परः परिकल्पितः, तत्र भागद्वयस्य लाघवेन व्यवहारार्थं पृथक् पृथक् संज्ञे विधीयेते, तत्र प्रथमोपस्थिततया पूर्वमाद्यभागस्य तत्सधर्मणोश्च शतृ-क्वस्वोरनेन परस्मैपदसंज्ञा विधीयते, तदाह– **सर्वासां विभक्तीनामि**त्यादिना, सर्वपदेन वर्त्तमानादयो दश विभक्तयः समुपस्थाप्यन्ते, यद्यपि * अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा * इति न्यायेनानन्तरायाः क्रियातिपत्तेरेवाद्यानां नवानां परस्मैपदसंज्ञेति शङ्कितुं शक्यते, तथापि "लृदिद्-द्युतादि०"– [३ ४. ६४.] इत्यादिसूत्रेऽद्यतन्या विभक्तेः परस्मैपदेऽङ्विधानादन्यविभक्तीनामप्येते संज्ञे इत्यवगम्यत इति नेहानन्तरस्य विधिर्वेति **न्यायः** समाश्रीयत इत्यवगम्यते; अथवा सूत्रे सूत्रं सम्बध्यते **प्रकरणे प्रक**रणमिति शास्त्रकृत्परम्परया विभक्तिप्रकरणमेवानेन संज्ञाप्रकरणसूत्रेण सह सम्बद्धमिति सर्वासां विभक्तीनामिह सम्बन्धः * अपेक्षातोऽधिकारः * इतिन्यायादित्यास्थेयम् । विभक्तयश्च स्वरूपत एव सम्बध्यन्ते न तु संज्ञया, तत्र सर्वत्राष्टादश विभक्तयः पठिता इति तासु आद्यानां नवानामनेन परस्मैपदसंज्ञा विधीयते. तदाह– **आद्यानि नव नव वचनानि** विभक्तीनां बहुत्वेन प्रत्येकं नवसु संज्ञाप्रवृत्तये नव नवेति वीप्सया कथनम् । **शतृ-क्वसू चे**ति– "शत्रानशावेष्यति तु सस्यौ" [ ५. २. २०. ] इति सूत्रविहितः शतृप्रत्ययो वर्त्तमानासमानविषयो भविष्यन्तीविषयश्च, "तत्र क्वसु-कानौ तद्वत्" [५. २. २.] इति सूत्रविहितः परोक्षाविषयः क्वसुश्च परस्मैपदसंज्ञः । **परस्मैपदमि**त्यन्वर्थताप्रतीत्यर्थं महासंज्ञाकरणम् परस्मैस्वभिन्नाय पद्यते प्रयुज्यत इति परस्मैपदमिति व्युत्पत्तेः, अत्र समासे सत्ति चतुर्थ्या अलुप्, पूर्वाचार्यैः सामान्यतः कर्तृगामिनि क्रियाफले आत्मनेपदं, परगामिनि क्रियाफले परस्मैपदमित्युभयपदिधातुषु व्यवस्थापनादेतयोः संज्ञयोरन्वर्थत्वं प्रतीयते, "ईगितः" [३ ३ ९५.]

"Aho Shrutgyanam"

इति सूत्रेण फलवति कर्तरि आत्मनेपदविधानात् कर्तृभिन्ने क्रियाफलवति ततः परस्मैपदमित्यर्थत एव लभ्यत इति स्वमतेऽपि सा व्यवस्था समादृतैवेति तां हृदि कृत्वैवेद महासंज्ञाकरणम्, अन्यथा संज्ञाया लाघवार्थत्वेन लघुनैव शब्देन व्यवहारः कृतः स्यात् । यद्यपि केवलपरस्मैपदिषु केवलात्मनेपदिषु च धातुषु नेदृशमन्वर्थत्वं सर्वथा संघटते, तथापि यत्रान्वर्थतासंभवस्तादृशोभयपदिधातुमादायापि प्रकृतमहासंज्ञासार्थक्योपपादने क्षत्यभावः । संख्यया निर्दिष्टान्याद्यानि वचनानि स्वरूपतो निर्दिशति– **तिव् तस् अन्ति** इत्यादिना । वर्त्तमानाया नवाद्यानि वचनान्युदाहृत्य परासां विभक्तीनामप्युदाहरणमतिदिशति– **एवं सर्वासु** इति– वर्त्तमानाव्यतिरिक्तास्वन्यास्वपि विभक्तिषु नवाद्यानि प्रकृतरीत्या परस्मैपदसंज्ञार्थमुदाहार्याणीति भावः । संज्ञाया विध्युपकारकत्वेन प्रकृतसंज्ञोपयोगिविधिसूत्रप्रदर्शनस्यापि कस्मै प्रयोजनाय प्रकृतसंज्ञाविधानमिति शिष्यजिज्ञासाऽपनोदायावश्यकत्वमित्यत आह– **परस्मैपदसंज्ञाप्रदेशाः– "शेषात् परस्मै" [ ५. ३. १००. ] इत्येवमादयः** इति, प्रकृतसूत्राग्रिमसूत्राणि– परस्मैपदविषये कार्यविधायकसूत्राणि चात्र त्यादिपदेन संग्राह्याणि ।' ३. ३. १९. ॥

## पराणि काना-ऽऽनशौ चात्मनेपदम् ॥ ३. ३. २०. ॥

**त० प्र०– सर्वासां विभक्तीनां पराणि नव नव वचनानि काना-ऽऽनशौ च प्रत्ययावात्मनेपदसंज्ञानि भवन्ति । ते आते अन्ते, से आथे ध्वे, ए वहे महे, एवं– सर्वासु । आत्मनेपदप्रदेशाः– "सिजाशिषावात्मने" [ ४. ३. ३५. ] इत्यादयः ॥२०॥**

**श० म० न्यासानुसन्धानम्– पराणि०** । नवेति पदं पूर्वसूत्रादनुवृत्तम्, इत्यादिविभक्तयश्च सर्वाः सम्बध्यन्त एव, एवं च परपदस्य नित्यसाकाङ्क्षत्वेन प्रतियोगिविधया नवाद्यानि सम्बध्यन्ते; अनुयोगिविधया संज्ञितया च शेषाणि वचनानि सम्बध्यन्ते, तदाह– **सर्वासां विभक्तीनां पराणि नव नव वचनानीति**, परपदेन त्यादिनवाद्यप्रत्ययातिरिक्तानि नव वचनानि ग्राह्याणि, आद्यनववचनापेक्षस्य परत्वस्य सांनिध्याद् ग्रहीतुमौचित्यात् । **कानाऽऽनशौ चेति**– "तत्र क्वसु-कानौ च तद्वत्" [५. २. २ ] इति सूत्रविहितः परोक्षाविषयः कानः "शत्रानशौ०" [ ५. २. २०. ] इति विहित आनश् च आत्मनेपदसंज्ञौ भवत इति योजना । **आत्मनेपदमित्यपि** महासंज्ञा, सा चाप्यन्वर्था, आत्मने– स्वस्मै–पद्यते–प्रयुज्यत इत्यात्मनेपदमिति व्युत्पत्तेः, आत्मने प्रयुज्यमानत्वं चोभयपदिधातुषु फलवत्कर्त्तरि प्रयुज्यमानत्वेन संगतमित्युक्तं पूर्वसूत्रव्याख्यायाम् । परस्मैपदाऽऽत्मनेपदशब्दयोः समस्तत्वेऽपि "परा-ऽऽत्मभ्यां ङेः" [३. २. १७.] इति ङेश्चतुर्थ्येकवचनस्यालुप् । पराणि नव स्वरूपतो निर्दिशति– **ते आते** इत्यादिना । अन्यास्वपि पराणां नवानामुदाहरणमतिदिशति– **एवं– सर्वास्विति** । आत्मनेपदसंज्ञोपयोगिविधिसूत्रमाह– **आत्मनेपदप्रदेशाः– "सिजाशिषात्मने" [४. ३. ३५.] इत्यादयः** इति, इतोऽग्रिमसूत्रादेवात्मनेपदविधिप्रकरणस्य प्रारब्धत्वेऽपि तत्रात्मनेपदशब्दोच्चारणाभावात् 'तत्'पदेनैवात्मनेपदोपस्थ नादात्मनेपदविधायकसूत्रमिह नोदाहृतमपि तु आत्मनेपदविषये कार्यविधायकसूत्रमेव, तस्यापि आत्मनेपदसंज्ञामाश्रित्य कार्यविधायकत्वेन संज्ञाप्रदेशत्वेन व्यवहर्तुं शक्यत्वात्, आदिपदेन एतदग्रिमसूत्राणि– "दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः" [४. ३. ७४.] इत्यादीनि सूत्राणि चोदाहार्याणि ॥ ३. ३. २०. ॥

## तत् साप्या-ऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च ॥ ३. ३. २१. ॥

**त० प्र०– तत्– आत्मनेपदं, कृत्य-क्त-खलर्थाश्च प्रत्ययाः साप्यात्– सकर्मकाद् धातोः कर्मणि, अनाप्याद् अकर्मकादविवक्षितकर्मकाच्च भावे भवन्ति । क्रियते कटश्चैत्रेण, क्रियमाणः, करिष्यमाणः, चक्राणः । भावे– भूयते भवता, भूयमानं भवता, सकर्मका अप्यविवक्षितकर्माणः कर्त्रेकनिष्ठव्यापारा अकर्मका भवन्ति, तेनैषां भावेऽपि प्रयोगः– क्रियते भवता, मृदु पच्यते भवता, पञ्च वारान् भुज्यते भवता । कृत्य– कार्यः कर्तव्यः करणीयो देयः कृत्यः कटो भवता, भवतो शयितव्यम्, भवता शेयम्, भवता कार्यम्, कर्तव्यम्, करणीयम्; देयं भवता, कृत्यं भवता । क्त– कृतः कटो भवता, शयितं भवता, कृतं भवता । सकर्मकादपि क्लीबे क्तमिच्छन्त्येके– ग्रामं गतं भवता, ओदनं भुक्तं भवता । खलर्थ– सुकरः कटो भवता, सुशयं भवता, सुकरं भवता, सुकटंकराणि वीरणानि, ईषदाढ्यं भवं भवता, सुज्ञानं तत्त्वं मुनिना, सुग्लानं कृपणेन । "काला-ऽध्व-भाव-देशं वा०" [२. २ २३.] इत्यादिना काला-ऽध्व-भाव-देशानां कर्मसंज्ञाया अकर्मकत्वस्य च विधानात् तद्योगे कर्मणि भावे चात्मनेपदादीनि भवन्ति– मास आस्यते, क्रोशो गुडधानाभिर्भूयते, गोदोहः सुप्यते, नदी सुप्यते, मास आसितव्यः, मास आसितः, मासो दुरासः; भावे– मासमास्यते, क्रोशमधीयते, ओदनपाकं स्थीयते, कुरून् सुप्यते, मासमासितव्यम्, मासमासितत्, मासं स्वासम् । भावे च युष्मस्मत्संबन्ध-**

"Aho Shrutgyanam"

निमित्तयोः कर्तृ-कर्मणोरभावात् प्रथममेव त्रयं भवति, साध्यरूपत्वाच्च संख्यायोगो नास्तीति औत्सर्गिकमेकवचनमेव भवति। पाकः पाकौ पाकाः, पाको वर्तते, पाकं करोतीत्यादौ च नव्ययकृदभिहितो भावो द्रव्यवत् प्रकाशत इति संख्यया लिङ्गेन कारकैश्च युज्यते, त्यादिनेवाव्ययेनाभिहितस्त्वसत्त्वरूपत्वान्न युज्यते 'उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते' इति तु बहुवचनं कृदभिहितेनाभेदोपचाराद् भवतीति ॥२१॥

---

श० म० न्यासानुसन्धानम्- तत् साप्या०। त्यादिविभक्तीनां परस्मैपदात्मनेपदाभ्यां विभागं प्रदर्श्य तयोः कस्य कुत्रार्थे, कुतः प्रकृतेर्वा विधानमित्यस्यार्थस्य प्रदर्शनार्थमिदं प्रकरणमारभ्यते, तत्रात्मनेपदविषये बहुवक्तव्यतया पूर्वं तद्विधायकप्रकरणमेवारभते। ते आदीनामात्मनेपदसंज्ञकानां क्तादीनां कृत्प्रत्ययार्थविशेषे शक्तिग्राहकमिदं सूत्रम्, शक्तिश्च बोध्य-बोधकभावापरपर्यायाऽभिधा नाम पदार्थान्तरमिति वैयाकरणसमयः। तदिति पृथक् पदं सर्वनाम आत्मपदपरामर्शकम्, सर्वनाम्नामुत्सर्गतः पूर्वप्रधानपरामर्षित्वात्। आप्यं- कर्मकारकम्, आप्तिविषयमाप्यम्, आप्तिः सम्बन्धः, स च कर्तृव्यापारद्वारकफलाश्रयत्वरूपः, आप्यशब्दस्य तादृशसम्बन्धाश्रये योगरूढिः; आप्येन सह वर्त्तते इति साप्यम्; बहुव्रीहिसमासे सहशब्दस्य सादेशः, साप्यः सकर्मकः न विद्यते विवक्ष्यते वा आप्यं यस्मिन् सोऽनाप्योऽविद्यमानकर्मकोऽविवक्षितकर्मकश्च, साप्यश्चानाप्यश्चानयोः समाहारद्वन्द्वे साप्यानाप्यं, तस्मात्- साप्यानाप्यात्। कर्म च भावश्चेत्यनयोः समाहारः- कर्मभावं, तस्मिन्- कर्मभावे। कृत्यश्च क्तश्च खलर्थश्चेत्येतेषामितरेतरयोगद्वन्द्वे- कृत्यक्तखलर्थाः, 'कर्मभावे' इत्यनेन 'साप्यानाप्यात्' इति पदेन चोपस्थितयोरर्थयोर्यथासंख्येनान्वयः। तदाह- साप्यात्- सकर्मकाद् धातोः कर्मणि, अनाप्याद् अकर्मकादविवक्षितकर्मकाच्च [धातोः] भावे भवन्ति इति। न च सहोक्तौ- सह विवक्षायां द्वन्द्वो विधीयते, सह विवक्षा च मिथोविशेष्य-विशेषणभावापन्नयत्तन्निष्ठविषयतानिरूपितविषयताश्रयानेकपदसमुदायस्यैकधर्मावच्छिन्नेऽन्वयित्व — रूपा, प्रकृते च साप्यस्य कर्मण्यन्वयोऽनाप्यस्य भाव इति स्पष्टं सहोक्त्यभावात् कथं द्वन्द्वस्य साधुत्वम्, अत एव 'अजाविधनौ देवदत्त-यज्ञदत्तौ' इत्युक्तौ न ज्ञायते कस्याजा धनं कस्यावय इति सन्देहः प्रदर्शितः पतञ्जलिना, अजाविधनसमुदायस्य देवदत्त-यज्ञदत्तसमुदायेन सहान्वयात्, इति वाच्यम्; * व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् * इति न्यायेनाचार्यकृतव्याख्यानेन सन्देहस्यापाकरणीयत्वात्। अयमाशयः- पूर्वं कर्म-भावसमुदायस्य साप्याऽनाप्यसमुदायेऽन्वयं परिकल्प्य द्वन्द्वसाधुत्वे सति पश्चाद् यथासंख्यन्यायेन सूत्रसार्थक्यार्थं लक्ष्यसंस्कारको वाक्यार्थबोध इति पूर्वं साप्याऽनाप्यात् कर्म-भावे आत्मनेपदमित्येव समस्तवाक्यार्थबोधः, पश्चादेकत्र कर्म-भावार्थयोः सहावस्थानासंभवाल्लक्ष्यसंस्कारासंभावनायां जातायां यथासंख्येन वृत्युक्तो वाक्यार्थबोध इत्याचार्यव्याख्यानगम्यमिति। सकर्मकत्वं च फलव्यधिकरणव्यापारवाचकत्वम्, फल-व्यापारयोर्वैयधिकरण्यं तु फलाश्रयतानियामकसम्बन्धेन बोध्यम्, फलतावच्छेदक [फलाश्रयतानियामक] सम्बन्धश्च अभिधानस्वभावाधीनः, अत एव त्यजि-विभज्योर्विभागानुकूलव्यापारवाचकत्वेन साम्येऽपि विभागावधिभूतवृक्षादिनिष्ठप्रतियोगित्वविशिष्टसमवायस्त्यज्धातौ फलतावच्छेदकः सम्बन्धः कल्पनीयः, तेनैव सम्बन्धेन विभागस्य वृक्षवृत्तित्वात्, तदनुकूलव्यापारस्य च पत्रनिष्ठत्वात् फलव्यापारयोर्वैयधिकरण्यमिति त्यज्धातोः सकर्मकत्वं, वृक्षं त्यजति पत्रमिति प्रयोगात्, विभजतौ तु पत्रादिरूपकर्तृनिष्ठानुयोगित्वविशिष्टसमवायः फलाश्रयतानियामकः, तेन विभागरूपफल-व्यापारयोः कर्तरि सामानाधिकरण्यमिति विभजतेरकर्मकत्वम्, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति लक्षणात्। एकार्थकयोः [समानार्थकयोः] कथमेवं भेद इति चेत्? अनादिपरम्परागताभिधानस्वाभाव्यादेवेति ब्रूमः। तत्र पूर्वं साप्यात् कर्मणि आत्मनेपदमुदाहरति- क्रियते कटश्चैत्रेणेति- उत्पादना प्रकृते करोतेरर्थः, सा चोत्पत्त्यनुकूलव्यापार एव, उत्पत्तिश्च फलं कर्मस्थम्, तदनुकूलश्च व्यापारः कर्तृस्थ इति फल-व्यापारयोर्वैयधिकरण्याद् भवति करोतेः सकर्मकत्वम्, इति ततः कर्मणि तेप्रत्ययस्य विधानात् कर्मणोऽभिहितत्वेन कटात् प्रथमा विभक्तिः, कर्तुरनभिहितत्वेन च चैत्रात् तृतीया विभक्तिः, इति क्रियते कटश्चैत्रेणेति भवति। क्रियमाणः इति- कर्मणि आनश् वर्त्तमानाविषयः, करिष्यमाणः इत्यत्र च कर्मणि स एव भविष्यन्तीविषयत्वात् स्यः। चक्राणः इत्यत्र कानः परोक्षाविषयः, परोक्षावद्भावाद् द्वित्वादि कार्यम्, सर्वत्र कटश्चैत्रेणेति कर्म-कर्तृबोधकपदे सम्बध्येते, विना ताभ्यां केवलस्यास्य पदस्य प्रयोगानर्हत्वात्, कारकं विना क्रियानिष्पत्त्यभावाच्च। कर्मणि आत्मनेपदमुदाहृत्य भावे तदुदाहरति- भावे- इति प्रकृत्य- भूयते भवता इति। अकर्मकाद् धातोर्भावे आत्मनेपदं भवतीत्युक्तम्, अकर्मकत्वं च द्वेधा विभक्तं- कर्मात्यन्ताभाववत्त्वेन अविवक्षितकर्मत्वेन च, तत्र कर्मात्यन्ताभाववन्तो भवत्यस्ति-विद्यतिप्रभृतयः, एष्वनेकक्षण-

"Aho Shrutgyanam"

मुहूर्त-दिन-मासर्तु-वत्सरादिकालस्थायिनी कालगतपौर्वापर्यमाश्रित्य क्रमवतीति क्रियारूपा सत्ता धात्वर्थः 'उत्पन्नस्य सत्त्वस्य स्वरूपधारणरूपां सत्तामाचष्टेऽस्त्यादिः' इति निरुक्तोक्तेः फलांशस्य कर्मरूपस्य सूक्ष्मतयाऽप्यप्रतीतेः कर्मत्यन्ताभाववत्त्वेनाकर्मकत्वमेतेषाम्, अत एवैतेभ्य आख्यातेन कर्तुरविवक्षायां भावे प्रत्ययः, भावश्च धात्वर्थ एव "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते ।" इत्यभियुक्तोक्तेः, भावयतीति भाव इति व्युत्पत्त्या व्यापारस्य भावशब्दाभिधेयत्वेन सकलधातूनां च क्रियारूपव्यापारवाचकत्वेन यद्यपि भावार्थस्य धातुनैवाभिधानाद् * उक्तार्थानामप्रयोगः * इति न्यायेन ततो भावे प्रत्ययो नोचितस्तथापि यत्र कर्त्रादिगतस्य व्यापारस्यैव प्राधान्येन विवक्षा तत्र धात्वर्थानुवादकस्यापि प्रत्ययस्यावश्यकत्वमेव, प्रत्ययं विना पदत्वाभावेनापदस्य प्रयोगानर्हत्वात्। तथा चात्र वर्त्तमानाविषये भावे विवक्षिते 'ते' इत्यात्मनेपदं भवति, अत्र च कर्तुरात्मनेपदेनानभिधानाद् युष्मदादिना सामानाधिकरण्याभावान्न कस्यापि त्रिकस्य प्राप्तिरिति "त्रीणि त्रीण्यन्ययुष्मदस्मदि" [३ ३.१७.] इति सूत्रेऽन्यपदस्य युष्मदस्मद्भ्यां सामानाधिकरण्याभावे सति प्रथमत्रिकविधानार्थत्वस्य स्वीकारात् भवति प्रथमत्रिकप्राप्तिः, तत्र यद्यपि द्विवचन-बहुवचने अपि संभवतस्तथापि शुद्धधात्वर्थस्याख्यातप्रत्ययवाच्यस्यासत्त्वरूपत्वेन तत्र संख्यान्वयासम्भवेन न द्विवचन-बहुवचने, एकवचनं च संख्यानपेक्षमौत्सर्गिकमिति विनापि संख्यां भवति, 'एकवचनमुत्सर्गतः करिष्यते' इति भाष्योक्तिः । एवं च 'त्वया मया भवता वा भूयते' इति यथा भवति तथा 'युवाभ्यामावाभ्यामन्याभ्यां वा भूयते, युष्माभिरस्माभिरन्यैर्वा भूयते' इत्येव भवति, न तु पुरुषवचनपरिवृत्तिः । एवं च सर्वास्वपि विभक्तिष्वेकमेव रूपं भवतीति 'भूयते, बभूवे, भाविता, भाविष्यते' इत्यादीनि रूपाणि बोध्यानि। आख्यातबोध्यक्रियाया असत्त्वरूपत्वमुक्तं **हरिणा**—

"असत्त्वरूपो भावश्च तिङ्पदै[राख्यातै]रभिधीयते।
सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते ।।" इति ।

सत्त्वं च लिङ्गसंख्यान्वयि द्रव्यम्, सत्त्वलक्षणमप्युक्तं तेनैव—

"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ।।" इति ।

तथा चाख्याताभिहितभावस्य सर्वनामपरामर्शायोग्यत्वेनासत्त्वरूपत्वमसत्त्वरूपत्वाच्च संख्यान्वयायोग्यत्वमिति सिद्धम् । "कृदभिहितश्च भावो द्रव्यवत् प्रकाशते" इत्युक्त्या कृद्भावप्रत्ययान्तानां संख्यान्वयित्वमपि, तथा च—'हतशायिकाः शय्यन्ते, उष्ट्रासिका आस्यन्ते' इत्यादयः प्रामाणिकप्रयोगाः साधवो भवन्ति । यद्यपि तत्रापि क्रियायां न द्वित्व-बहुत्वादिप्रतीतिरिति हतशयनसदृशं शयनम्, उष्ट्रोपवेशनसदृशमुपवेशनमित्याद्येव प्रतीयते, अत्र द्रव्यवद्भावकृत्प्रत्ययार्थ उपमानम्, तत्सामानाधिकरण्यादुपमेयभूतशयनरूपसाध्यक्रियावचनात्, तथाभूतोपवेशनात्मकसाध्यक्रियावचनाच्च शेतेरास्तेश्च भावेऽपि बहुवचनम्, उपमानोपमेययोः समानविभक्तिकत्वनियमात् । उपमानोपमेययोः समानवचनत्वस्य समानलिङ्गत्वस्य चावश्यकत्वादेव—

"हंसीव धवलश्चन्द्रः सरांसीवाऽमलं नभः ।
हरीतकीं भुङ्क्ष्व राजन् ! मातेव हितकारिणीम् ।।"

इत्यादिप्रयोगाणामनुचितत्वमाहुरालङ्कारिकाः । भावाख्यातोदाहरणमुक्त्वा कृद्भावप्रत्ययोदाहरणमाह- **भूयमानं भवतेति**- अत्र वर्तमानाविषय आनश् "क्यः शिति" [३. ४. ७०.] इति क्यः, "अतो म आने" [४. ४. ११४ ] इति मागमः। स्वाभाविकमकर्मकमुदाहृत्याविवक्षितकर्मत्वेनाकर्मकमुदाहर्तुमाह- **सकर्मका अपि अविवक्षितकर्माणः कर्त्रेकनिष्ठव्यापारा अकर्मका भवन्ति** इति । वस्तुतः फलव्यधिकरणव्यापारा अपि धातवः विवक्षावशात् फलांशस्याप्रतीयमानत्वेन तदीयव्यापारस्य केवल कर्त्रैवाधिकरणमिति तत्रैव क्रियाजन्यफलमपि भवतीति फलसमानाधिकरणव्यापारवाचकत्वरूपमकर्मकत्व तेषां भवति । **अन्ये** चानेकविधामकर्मकक्रियामाहुः, तथाहि—

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।।"

इत्युक्तमभियुक्तैः, धातोरर्थान्तरे वृत्तेरकर्मिका क्रिया, धात्वर्थेन कर्मण उपसंग्रहादकर्मिका क्रिया, कर्मणः प्रसिद्धेरकर्मिका क्रिया, कर्मणोऽविवक्षातोऽकर्मिका क्रियाः, इति चतुर्विधामकर्मकक्रियामाहुस्ते। तत्र धातोरर्थान्तरे वृत्तेरकर्मकत्वं यथा- प्रापणार्थस्य 'वह्' धातोः सकर्मकस्यापि स्यन्दने वृत्तौ नदी वहतीत्यादावकर्मकत्वम्, धात्वर्थेनोपसंग्रहादकर्मकत्वं यथा- जीवति-नृत्यतिप्रभृतीनाम्, अत्र हि जीव्धातोः प्राणकर्मक धारणमर्थ इति तत्रैव कर्मण उपसंग्रह इति नास्ति तस्य पृथक् कर्मापेक्षा, कर्मणः प्रसिद्धेरकर्मकत्व यथा मेघो वर्षतीत्यादौ वर्षधातोः कर्मणो जलस्य प्रसिद्धत्वादप्रयोगेणाकर्मकत्वम्; कर्मणोऽविवक्षयाऽकर्मकत्वं 'हितान्न यः संशृणुते स किंप्रभुः इति **भारवि**प्रयोगः, अत्र शृणोतेः सकर्मकस्यापि कर्मणोऽविवक्षयाऽकर्मकत्वेनात्मनेपदम्, हितात्- हितोपदेष्टुः सकाशात्, यः, न संशृणुते- हितोपदेशं न गृह्णाति, स किंप्रभुः ?, कुत्सितः प्रभुरित्यर्थस्य विवक्षितत्वेऽपि हितोपदेशरूपस्य कर्मणोऽत्र शब्दद्वारा विवक्षाऽभावेनाकर्मकत्वाक्षतिः ।

"Aho Shrutgyanam"

तत्र स्वभाविकाकर्मकाणामविवक्षितकर्मणां चेहाकर्मकपदेन ग्रहणम्, स्वाभाविकाकर्मकाश्च पूर्वोदाहृतकारिकायां धात्वर्थोपसंगृहीतकर्मका एव, तथाभूता एव भवत्यादयः, तेषामप्यात्मधारणरूपस्य फलस्याश्रय आत्मा कर्म धात्वर्थ एवान्तर्भूत इति धात्वर्थेनोपसग्रहो भवति कर्मणः। अविवक्षितकर्मकधातुषु तु सर्वेऽपि सकर्मका अकर्मकत्वेनोदाहर्तुं शक्यन्त एवेत्याह-**तेनैषां भावेऽपि प्रयोगः** इति, तेन- अविवक्षितकर्मत्वादकर्मकत्वेन, एषां- सकर्मकाणां भावेऽपि-भावप्रत्ययान्तदशायामपि, प्रयोगो भवतीति शेषः। तथा चोदाहरति - **क्रियते भवता** इति- करोतेरुत्पादनार्थस्य सकर्मकत्वं प्रसिद्धमपि प्रकृतेऽविवक्षितकर्मत्वेन भावे प्रयोग उपपद्यत इति भावः। **मृदु पच्यते** इति-मृद्विति क्रियाविशेषणं, न तु विशेषणविधया पच्यमानद्रव्योपस्थापकम्, पचतिश्च विक्लित्यनुकूलव्यापारवाचकः, विक्लित्तिश्च कर्मस्थेति फलव्यधिकरणव्यापारवाचकत्वेन तस्य सकर्मकत्वेऽप्यविवक्षितकर्मत्वेनाकर्मकत्वम्, तेन च भावे प्रयोग उपपन्नः। **पञ्च वारान् भुज्यते भवतेति**- वारशब्दस्य कालबोधकतया प्रयुक्तत्वात् "कालाध्वनोर्व्याप्तौ" [ २. २. ४२.] इति द्वितीया, भुजिश्च सकर्मकोऽपि प्रकृतेऽविवक्षितकर्मकत्वादकर्मकः, तस्माद् भावे वर्त्तमानाया आत्मनेपदम्। अत एव 'नेह पच्यते, नेह भुज्यते' इत्यादौ भावे प्रयोग इत्याह- "णेरणौ यत् कर्म स चेत् कर्त्तानाध्याने" [पा० सू० १.३ ६७ ] इति पाणिनीयसूत्रव्याख्यायां **हरदत्तः**। अत्यन्ताविद्यमानकर्मणामेवेहाकर्मकपदेन ग्रहणमित्यपि पक्षान्तरम्, 'नेह पच्यते, नेह भुज्यते' इत्यादयस्तु कर्मण्येव प्रयोगाः, कर्मणो गम्यमानत्वाच्च न तत्प्रयोगः, एतदपि तदीयग्रन्थे [ हरदत्तग्रन्थे ] एव स्पष्टम्। पक्षद्वयमपीदं प्रबलं क्षोदक्षमं चेति पाणिनीये भाष्य-कैयटादिग्रन्थावलम्बेन **दीक्षितेन** स्पष्टीकृतं **शब्दकौस्तुभे**। यत् त्वत्र भावे प्रत्यय इति प्रमादकृद्ग्रन्थमुल्लिख्य भाष्यादिविरोधेन दूषयामासुस्तदुपेक्षणीयमेवोभयपक्षस्य भाष्याद्यारूढत्वात्। तुमप्रत्ययविधायकसूत्रे 'इच्छता क्रियते' इत्यत्र भावे प्रयोग इति स्वयमपि स्वीकृतत्वात् हरदत्तेन चानुमोदितत्वात् एवं चाविवक्षितकर्मणामपि अकर्मकत्वेन ग्रहणमिति पक्षस्यैव प्राबल्यम्, कथमन्यथा, 'भुक्तपूर्वी तण्डुलम्, कृतपूर्वी कटम्' इत्यादौ पूर्वमविवक्षितकर्मतयाऽकर्मकत्वेन भावे क्ते पश्चात्, कर्मणा तण्डुलकटादिना योगेन प्रकृतसकर्मकप्रयोगे "कर्तृ-कर्मणोः कृति" [ पा० सू०२.३ ६५ ] इति सूत्रे "कर्मणि कृतः" [ २ ३ ८३ ] इति सूत्रस्थानीये कृतीत्यस्याभावे दोषोद्भावनं भाष्याद्याकरग्रन्थे कृतं संगच्छेत, "क्लीबे क्तः" [ ५.३.१२३. ] इति सूत्रेण भावे विहितः क्तप्रत्ययोऽकर्मकादेव भवतीति कृतपूर्वीत्यादौ कर्मप्रयोगसमये तस्य प्राप्ति कथं स्यात्। परमते तु प्रकृतसूत्रे ["क्लीबे क्तः" [ ५. ३. १२३. ] अकर्मकपदा संबध्योऽग्रे वक्ष्यत इत्यन्यदेतत्। भावे आत्मनेपदमुदाहृत्य कर्मणि कृत्य-क्त-खलर्थानुदाहर्तुं क्रमश आह-'**कृत्ये**ति प्रकृत्य **कार्यः** इत्यादौ कर्तुं योग्य इत्यर्थे क्रमशः 'ध्यण्, तव्य, अनीय, य, क्यप्" प्रत्यया ज्ञेयाः, कर्मणि विधिरिति बोधनायैव **कटः** इति कर्मोपस्थापकपदमुक्तम्। भावे-कृत्यमुदाहरति- **भवता शयनीयमित्यादि**, शेतेरकर्मकत्वाद् भावेऽनीयः, **शयितव्यमित्यत्र** तव्यः, **शेयमित्यत्र** यः। सकर्मकादप्यविवक्षितकर्मणो भावे प्रत्यय इत्युक्तरीतिमनुसृत्य सकर्मकेभ्योऽपि भावे प्रत्ययमुदाहरति-'**भवता कार्यमि**त्यादिना ध्यणादीन् क्यबन्तान् सर्वानेव प्रत्ययानविवक्षितकर्मभ्यो दर्शयति **कृत्यं भवते**त्यन्तेन ग्रन्थेन। क्तमुदाहरति कर्मणि- **कृतः कटो भवते**ति। स्वभाविकाकर्मकाद् भावे क्तमुदाहरति- **शयितं भवते**ति, अविवक्षितकर्मकाद् भावे क्तमाह- कृतं भवतेति भावे च लिङ्गसंख्याभावेऽपि सामान्ये नपुंसकमिति सिद्धान्तादौत्सर्गिकं क्लीबत्वमेकवचनं च, तस्याऽप्यौत्सर्गिकत्वस्योक्तत्वात्। मतान्तरमाह- **सकर्मकादपि क्लीबे क्तमिच्छन्त्येके** इति, अयमाशयस्तेषां- " क्त-क्तवतू " [ ५. १. १७४. ] इति सामान्यसूत्रेण विहितः क्त एवानेन सूत्रेण [तत्साप्यानाप्येति इति प्रकृतसूत्रेण] अकर्मकेभ्यो भावे एव स्यात्, भावे च क्लीबत्वं स्वाभाविकमिति "क्लीबे क्तः" [५. ३. १२३.] इति सूत्रेण क्तविधानं व्यर्थं सत्, तस्य क्तस्य [ " क्त-क्तवतू " इति सूत्रविहितस्य ] भूतार्थवृत्तेरेव धातोर्विधानदस्य कालसामान्यवृत्तेर्धातोर्विधानं सकर्मकेभ्यश्च विधानमिति विज्ञापयति, तथा च-

"गतं तिरञ्चीनमनूरुसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधोधाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः॥"

[ शि० व० स० १, श्लो. २१ ]

इति **माघ**कवि प्रयोगे सकर्मकादपि गच्छतेर्भावे क्तप्रत्यय उदाहृतः, " वा क्लीबे " [ २. २. ९२. ] इति सूत्रेण कर्तरि षष्ठीविधानात् 'अनूरुसारथेः' इति षष्ठ्यन्तम्, एतस्माद् विहितस्य [ सकर्मकधातुर्विहितस्य ] क्तस्य योगे कर्मणि षष्ठ्येव युक्तेति ग्रामस्य गत भवता, ग्रामस्य गतं भवत इति वा प्रयोग इति तेषां मतम्; किन्तु- 'भ्रान्तं देशमनेकदुर्गविषमम्" इत्यादिकविप्रयोगे देशमिति कर्मणि द्वितीयाया अपि दर्शनेन ग्रामं गतं भवतेत्यपि साध्वेव,

"Aho Shrutgyanam"

कर्मणि षष्ठीप्रयोगस्थले च कर्मणः शेषत्वविवक्षा बोध्येति सर्वप्रयोगनिर्वाहः, कृद्योगलक्षणा षष्ठी तु "क्तयोरसदाधारे" [ २. २. ७९. ] इति निषिद्धा, तथा च ग्रामं गतं भवतेति ओदनं भुक्तं भवतेति च प्रयोगौ साधू एव । स्वमते तु "गतं तिरश्चीनमनूरुसारथेः" इति माघप्रयोगेऽविवक्षितकर्मत्वादेव भावे क्तः, भ्रान्तं देशमिति चासाधुरेवेति विज्ञायते, यदि च तादृशप्रयोगसाधुत्वे आग्रहस्तर्हि स्वमतेऽपि "क्लीबे क्तः" [५. ३. १२३.] इति सूत्रेण 'सकर्मकेभ्योऽपि विधानमुक्तयुक्तेरेव समाश्रयणीयमिति न कोऽपि दोषलेश इति बोध्यम् । क्तमुदाहृत्य खलर्थमुदाहर्तुमाह- **खलर्थे**ति । यद्यपि खल्प्रत्ययविधायके "दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल्" [ ५. ३. १३९. ] इति सूत्रे नार्थनिर्देशः, पूर्वत्र च करणाधारयोः प्रकरणम्, "इ-कि-श्तिव् स्वरूपार्थे" [ ५. ३. १३८. ] इति च खल्विधायकसूत्राव्यवहितसूत्रम्, तन्निर्दिष्टार्थश्च नात्र सबन्धुं शक्यतेऽनन्वितत्वादनधिकाराच्च, ततश्च खलर्थः क इति जिज्ञासायां प्रकृतसूत्रेणैव निर्णय इति परस्पराश्रयो दोष आपतति, तथापि खल्पदे तन्त्रेण 'खल्-खलर्थाः' इत्यर्थविवक्षया खलोऽर्थस्यानेन निर्णये सति परेषां खलर्थत्वस्य निर्णयः कार्य इति दोषाभावः । तथा चाकर्मकेभ्यो विहितः खल्भावे सकर्मकेभ्यो विहितश्च कर्मणीति परेषामनादीनामर्थनिर्णयोऽप्यनेनैव प्रकारेण विज्ञेयः । **सुकरः कटो भवते**ति-कृगः सकर्मकत्वेन कर्मणि खल् । **सुशयं भवते**ति-शेतेरकर्मकत्वेन भावे खल् । सकर्मकस्याप्यविवक्षितकर्मतायामकर्मकत्वाद् भावे खलमुदाहरति- **सुकरं भवते**ति । **सुकटंकराणि वीरणा**नि इति-कटभिन्नानि वीरणानि कटस्वरूपाणि सुखेन क्रियन्ते इति प्रयोगार्थः, अकटः- वीरणानि कटः सुखेन क्रियन्ते इति विग्रहस्वरूपम्, कर्मणि खल्, **ईषदाढ्यंभवं भवते**ति- अनाढ्येन भवता सुखेनाढ्येन भूयते इतीषदाढ्यंभवं भवतेति, उभयत्र "च्व्यर्थे कर्त्राप्याद् भूकृगः" [ ५. ३. १४०. ] इति खल् । **सुज्ञानं तत्त्वं मुनिने**ति-सुखेन ज्ञायत इत्यर्थे "शासू-युधि०" [ ५. ३. १४१ ] इत्यनः कर्मणि । **सुग्लानं कृपणेने**ति- पूर्वोक्तसूत्रेण भावेऽनः । अथाकर्मकाणामपि क्वचिदनुशासनवशात् सकर्मकत्वमकर्मकत्वं च दृश्यते, तेभ्यो भावे कर्मणि च प्रत्यया भवन्तीति प्रदर्शयति- **" काला-ऽध्व-भाव-देशं वा० "** [ २ २. २३. ] **इत्यादिने**ति, आदि पदेनानुक्तस्य 'वाऽकर्मचाकर्मकाणाम्' इत्यंशस्य संग्रहः । **कर्मसंज्ञाया अकर्मकत्वस्य चे**ति- कर्मसंज्ञा तावत् सूत्रोपात्तानां कालाध्वभावदेशानामकर्मकत्वं च धातोरिति यथोचितमन्वयोऽभ्यूहनीयः, यथोक्तपाठे च कालाऽध्व-भाव-देशानामित्यस्यैव कर्मसंज्ञाया अकर्मकत्वस्य चेत्यनेन सम्बन्धः प्रतीयते, स चानुचित इति, अकर्मकाणां धातूनां योगे कालाध्वभावदेशं कर्माकर्म च स्यादिति सूत्रार्थ एवानुसन्धेयः प्रकृतोपयोगि कार्यमाह - **तद्योगे कर्मणि भावे चात्मनेपदादीनि भवन्ती**ति— तद्योगे—कर्मसंज्ञकानां कालाध्व-भाव-देशानां योगे सम्बन्धे सति कर्मण्यात्मनेपदादीनि भवन्ति, तस्याकर्मकत्वस्य योगे स्थितौ सत्यामकर्मकत्वप्रयुक्तानि आत्मनेपदादीनि भावे भवन्तीति पृथक् पृथगेवान्वयो व्याख्येयः । प्रथमं कर्मणि प्रत्ययमुदाहरति—**मास आस्यते** इति—'आस्' धातुरकर्मकः, तद्योगे कालवाचिनो मासशब्दस्य कर्मत्वेन धातोर्वर्तमानाया आत्मनेपदप्रथमपुरुषैकवचनम् । आत्मनेपदेन च कर्मणोऽभिहितत्वात् मासात् प्रथमा भवति, तत्रापि गौणाधिकारात् "कालाध्वनो०" [ २. २. ४२. ] इत्यनेनापि द्वितीया न भवति, एवं सर्वत्र । कालं कर्मोदाहृत्याध्वानं कर्मोदाहरति—**क्रोशो गुडधानाभिर्भूयते** इति— देवदत्तो गुडधानाभिः गुडमिश्रितधान्यलाजैः, क्रोशं भवति—क्रोशं यावत् आत्मधारणं करोति इति कर्तरि प्रत्यये सति बोधः, तस्यैव वाच्यपरिवर्त्तने कृते कर्मणि वाच्येऽयं प्रयोगः । तथा च भवतेरकर्मकस्यापि सकर्मकत्वेन कर्मणि प्रत्यये सति कर्मणोऽध्वनः क्रोशस्य प्रथमान्तता भवति । **गोदोहः सुप्यते** इति भावरूपस्य कर्मण उदाहरणम्, 'स्वप्'धातुरकर्मकस्तद्योगे भाववाचिनो गोदोहशब्दस्य कर्मसंज्ञायां कृतयां सकर्मकत्वे सति कर्मणि वाच्ये स्वपेरात्मनेपदम् । आत्मनेपदमुदाहृत्य कृत्य-क्त-खलर्थान् क्रमश उदाहरति—**मास आसितव्य** इति —आसेरकर्मकस्य योगे कालस्य मासस्य कर्मसंज्ञा, तेन कर्मणि तव्यः, **मास आसितः** इत्यत्र कर्मणि क्तः । **मासो दुरासः** इति कर्मणि खल् । "कालाऽध्वभावदेशं वा०" [ २. २. २३. ] इत्यनेनाकर्मत्वविधानपक्षे भावे प्रत्ययमुदाहर्तुमवतारयति— **भावे** इति ।

**मासमास्यते इति**— "कालाऽध्व-भावदेशं वाऽकर्म चाकर्मणाम्" [ २. २. २३ ] इति सूत्रेणाकर्मकाणां धातूनां प्रयोगे कालादिराधारः कर्मसंज्ञो वा भवति, अकर्म च- यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञापि वा भवतीत्यावेदितम् । उभयसंज्ञाविधानाच्च प्रकृतप्रयोगे— अकर्मकत्वमाश्रित्य 'आस्यते' इति भावे आत्मनेपदम्, सकर्मकत्वं चाश्रित्य मासस्य कर्मत्वाद् आत्मनेपदेन तस्यानभिधानाद् 'मासम्' इति कर्मणि द्वितीया भवति । अकर्मसंज्ञा यदि न स्यात् तदा भावे आत्मनेपदं न स्यात् सकर्मकत्वात् कर्मण्यात्मने-

"Aho Shrutgyanam"

पदे तु तेनैवाभिहितत्वात् कर्मणो द्वितीया न स्यात्, न चाभिहिते कर्मणि व्याप्तावपि द्वितीयेष्यते, एवमुत्तरत्रापि ज्ञेयमिति । **क्रोशमधीते** इति—अधिपूर्वस्य "इङ्क् अध्ययने" इत्यस्य वर्तमानाया आत्मनेपदप्रथमपुरुषैकवचनम्, शेषं प्राग्वत् । **कुरून् सूप्यते** इति– अत्राप्यकर्मकत्वमाश्रित्य भावे आत्मनेपदं सकर्मकत्वमाश्रित्य च कर्मणि द्वितीया, कुरूणां निवासो जनपदः कुरवः । आत्मनेपदमुदाहृत्य तव्यादीनुदाहरति । भावे– **मासमासितव्यमि**ति– अत्रापि कर्मणि द्वितीया । लघुन्यासकृताद्वितीयाप्रदानकाले कर्मसंज्ञा षष्ठीप्रदानकाले तु न, स्याद्वादादित्युक्तम्, तस्यायमाशयः– मासमासितव्यमित्यत्र कालवाचिनो मासशब्दस्य द्वितीयोत्पत्त्यर्थं कर्मसंज्ञा स्वीक्रियते, "**कर्मणि कृतः**" [ २. २. ८३. ] इति कृदन्तस्य कर्मणि षष्ठ्युत्पत्त्यर्थं च कर्मसंज्ञा न भवति स्याद्वादाश्रयणादिति, **मासमासितमि**ति– भावे क्तः । **मासं स्वासमि**ति– भावे खल् । अथ भावे प्रत्यये सति कर्मणि प्रत्ययाद् यो विशेषस्तमभिधातुं प्रक्रमते– **भावे च युष्मदस्मत्सम्बन्धनिमित्तयोः कर्तृ-कर्मणोरभावादि**ति-युष्मदस्मद्भ्यां यः सम्बन्धोऽर्थात् समानाधिकरण्यरूपः, तस्य निमित्ते ये कर्तृ-कर्मणी तयोरभावादित्यर्थः । अकर्मकादेव धातोर्भावे प्रत्यय इत्युक्तमेव, तथा च कर्मणोऽभावादेव युष्मदस्मदी कर्मत्वेन न वाच्ये कर्तृत्वेन यद्यपि सम्बन्धो युष्मदस्मद्भ्यां संभाव्यते 'त्वया भूयते' 'मया भूयते' इत्यादौ, तथापि तत्र नाख्यातार्थस्य ताभ्यां सामानाधिकरण्यम्, सामानाधिकरण्यं ह्येकार्थवाचित्वरूपमेव, समानाधिकरणं ययोस्तौ 'समानाधिकरणौ, तयोर्भावः सामानाधिकरण्यमिति व्युत्पत्त्या, शब्दस्यार्थविशेषे वर्त्तमानत्वादर्थोऽधिकरणमिति सामानाधिकरण्यशब्दस्य समानार्थवाचित्वमर्थस्तदेव चैकार्थ्यम् । यथा 'त्वमुच्यसे' इत्यत्र युष्मदः कर्मत्वेनात्मनेपदेनापि कर्मैवाभिधीयत इत्युभयोः सामानाधिकरण्यं भवतीति युष्मदा सामानाधिकरण्यनिमित्तो मध्यमपुरुषः प्रयुज्यते, त्वं पठसीत्यत्र च युष्मदः कर्तृत्वेन पठसीति कर्तृप्रत्ययेनापि स एवाभिधीयत इति कर्तृरूपेण युष्मदा सामानाधिकरण्यमस्तीति मध्यमपुरुषः प्रयुज्यते । एवमस्मदापि सामानाधिकरण्यं कर्मत्वेन कर्तृत्वेन चोदाहर्तुं शक्यते 'अहमुच्ये' 'अहं वच्मि' इत्यादौ तथा च भावप्रत्ययस्थले कर्तृत्वेन सम्बन्धे सत्यपि सामानाधिकरण्यसम्बन्धाभावान्नास्ति युष्मत्सामानाधिकरण्यनिमित्तस्य मध्यमपुरुषस्यास्यास्मत्सामानाधिकरण्यनिमित्तस्योत्तमपुरुषस्य च प्राप्तिरिति प्रथमपुरुषः प्रथम त्रिकमेव भवति । इत्थ प्रथमत्रिके व्यवस्थापिते वचनत्रयस्यापि तत्र प्रयोग इति शिष्यबुद्धिनिवारणार्थमाह– **साध्यरूपत्वाच्च संख्यायोगे नास्तीत्यौत्सर्गिकमेकवचनमेव भवती**ति, अयमाशयः– वचनं संख्या, सा च सिद्धे वस्तुनि संभावति, आख्यातार्थस्य भावस्यासिद्धस्य साध्यावस्थापन्नस्यैकत्वद्वित्वादिभिः सम्बन्धस्यासंभवान्न तत्र संख्याप्रतीतिरिति न किमपि वचनं तत्रान्वेति । एवं चानन्वितत्वात् कस्यापि वचनस्य तत्र विधानाभावे प्राप्ते परिशेषात् प्रत्ययाभाव एव प्रसक्तस्तदपनोदायाह— **औत्सर्गिकमेकवचनमि**ति– एकवचनस्यैकत्वसंख्याया अभेदार्थत्वेन तस्य संख्यानपेक्षत्वेन सर्वत्र प्रयोक्तुं शक्यत्वादौत्सर्गिकत्वमिति संख्यासम्बन्धाभावेऽपि तद् भवितुमर्हतीति प्रथमत्रिकस्यैकवचनमेव भावप्रत्ययस्थले भवतीति । इत्थ सर्वेषां भावप्रत्ययानां साध्यावस्थापन्नार्थवाचकत्वेऽसिद्ध [ असत्त्व ]रूपत्वे संख्यायोगित्वाभावे च प्रसक्ते घञादिकृदभिहितभावेऽपि द्वित्वादियोगो न स्यादिति **पाकौ** भवतः, पाका भवन्ति, इत्यादिप्रयोगो न स्यादित्याशङ्कायामाह– **पाकः पाकौ पाकाः** इत्यादि, वचनत्रयप्रदर्शनार्थं त्रयाणामुपन्यासः, कर्तृत्वप्रदर्शनार्थं च **पाको वर्त्तते** इत्यस्योपन्यासः, कर्मसम्बन्धदर्शनार्थं च **पाकं करोती**त्यस्योक्तिः । न केवलं कर्तृ-कर्मणोरेव कारकयोस्तत्र संभवोऽपि त्वन्येषामपि करण-सम्प्रदानादीनामित्यस्यार्थस्य प्रदर्शनार्थमुक्तम्– **इत्यादावि**ति । कृदभिहितस्य भावस्य संख्यादियोगे हेतुमाह– **अनव्ययकृदभिहितो भावो द्रव्यवत् प्रकाशते** इति– कृदभिहितः– कृत्प्रत्ययवाच्यो भावो, द्रव्यवत्– लिङ्गसंख्याकारकयोगिघटपटादिद्रव्यवत्, प्रकाशते– प्रतीतिविषयो भवतीति 'कृदभिहितो भावो द्रव्यवत् प्रकाशते, इति वाक्यार्थः । तत्र च क्त्वा-णम्-तुमन्तादिकृदभिहितस्य भावस्य लिङ्गसंख्यादियोगादर्शनात् तद्व्यवच्छेदाय **अनव्ययेति** विशेणमुक्तम् । तथा च क्त्वा-णमादीनामव्ययत्वेन तदभिहितभावस्य न द्रव्यवत्प्रतीतिरिति न तत्र लिङ्गादियोगः । द्रव्यवत् प्रकाशनात् यल्लब्धं तदाह– **संख्यया लिङ्गेन कारकैश्च युज्यते** इति– पाक इत्यादौ भावे घञ्, तदन्तस्य चाव्ययत्वं न भवतीत्यनव्ययकृद्घञाऽभिहितो भावो द्रव्यवत् प्रकाशत इति एकत्वादिसंख्यया पुंलिङ्गेन कर्तृत्वादिकारकत्वेन च युज्यत इति समुदितार्थः । अनव्यय इति कृद्विशेषणमुक्तं तदाशयं विवृणोति– **त्यादिनेवाव्ययेनाभिहितस्त्वसत्त्वरूपत्वान्न युज्यते** इति– अत्र संख्यादिभिरिति शेषः, अयमर्थः— यथा त्यादिनाऽभिहितो भावार्थोऽसत्त्वरूपत्वात् संख्या-लिङ्ग-कारकादिभिर्नान्वेति तथा अव्ययेन कृता क्त्वादिनाऽभिहितोऽपि भावार्थोऽसत्त्वरूप एवेति सोऽपि संख्यादिभिर्न युज्यते । घञादिनाऽभिहितोभावार्थः सत्त्व[ द्रव्य ]रूपः क्त्वादिनाऽभिहितश्चा-

"Aho Shrutgyanam"

सत्त्वरूप इत्यत्र विनिगमकस्तु स्वभाव एव, एकमेव वस्तु शब्दान्तरेणाभिधीयमान भिन्नस्वभावं भवतीति दारादिशब्दै-रभिधीयमानो भार्यार्थः पुंस्त्वयोगीव स्वभावमात्रमेव विनि-गमत्वेनाश्रयतीति सर्वैरकामैरपि स्वीकरणीयमेव । किञ्च क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वं सत्त्वरूपत्वम्, तदनु-त्थापकतावच्छेदकत्वं चासत्त्वरूपत्वम्, इति सत्त्वाऽसत्त्व-रूपत्वयोः परिष्कारेणानुगमं कुर्वन्ति साम्प्रदायिकाः । तथा च पाकादिघञन्तस्थले नियमेन स्ववाच्यक्रियाभिन्नक्रियाया आकाङ्क्षादर्शनात् तदाकाङ्क्षोत्थापकता तत्र वर्त्तत इति सत्त्वरूपत्वं तद्वाच्यक्रियायाः, क्त्वा-णमन्तस्थले च 'भुक्त्वा व्रजति, भोजं भोजं व्रजति' इत्यादौ पूर्वकालविषयिण्या अन्यस्याः क्रियाया आकाङ्क्षा नास्तीति तत्र क्रियाया असत्त्व-रूपत्वम्, व्रजतीत्यादिक्रिया चोत्तरकालिकीति न तामपेक्षते क्त्वान्तवाच्या क्रिया, उभयोः कालभेदात् । क्वचिद् भावे त्यादिविधानेऽपि बहुवचनं दृश्यते तत् कथमुपपद्यत इति चेत् ? अत्राह– **'उष्ट्राक्षिका आस्यन्ते, हतशायिकाः शयन्ते' इति तु बहुवचनं कृदभिहितेनाभेदोपचारा-दिति**– आसनमासिका, शयनं शायिका "भावे" [ ५. ३. १२२. ] इति णकः, उष्ट्राणामिवासिका– उष्ट्रासिका, हतानामिव शायिका हतशायिका, उष्ट्राणां यादृशान्या-सनानि हतानां यादृशानि शयनानि तादृशानि देवदत्तादि-कर्तृकान्यासनशयनानीत्यर्थः, अत्र कृदभिहितभावेन लिङ्ग-योगवता सह त्याद्यभिहितभावस्याभेदोपचारादभेदे चासति बाधके समानवचनत्वस्य युक्तत्वाद् भावत्याद्यन्तेऽपि बहु-वचनान्ततोपपद्यत इति भावः । भाष्येऽपि "सार्वधातुके यक्" [ पा० सू० ३. १. ६७. ] इति सूत्रे भावप्रत्यय-स्थले एकवचनमेव भवतीति प्रतिपाद्य कृदभिहितभावे, द्विवचन-बहुवचने अपि भवत इति प्रतिपादितम् । तत्र पुनरुक्तम्— ' तिङभिहिते [ त्याद्यभिहिते ] चापि तथा भावे बहुवचनं श्रूयते, तद्यथा— उष्ट्रासिका आस्यन्ते, हतशायिकाः शयन्ते " इति । अत्र **कैयटेने**त्थमुक्तम्— "अत्राश्रयाणामुष्ट्राणां भेदादनेकप्रकारयुक्तान्यासनानि भिन्नानि तत्सामानाधिकरण्याच्चाख्यातभावभेदादास्यन्त इति बहु-वचनमित्यर्थः । इवशब्दप्रयोगमन्तरेणापि चेवार्थगतिर्भवति । तदयमर्थः–यादृशान्युष्ट्राणामनेकप्रकाराण्यासनानि तादृशानि देवदत्तादिभिः क्रियन्त इति, 'भवद्भिरास्यते' इत्यत्र चाश्रय-भेदादाश्रितभेदस्य प्रतिपन्नत्वात् प्रयोजनाभावाद् भावो भेद नोपादत्त इत्येकवचनमेव भवति, यथा 'ताम्रः पलाशेषु बभूव रागः' इति, न च सर्वत्राश्रयभेदादाश्रितभेदस्य प्रतीतिः, घटान् पचतीत्यादौ पाकस्याभिन्नस्यैवावगमात् । केचिदुष्ट्रा-सिका आस्यन्त इति कर्मणि लकारमिच्छन्ति, उष्ट्रासिका-लक्षणस्य भावस्य कर्मत्वात्, यथा 'गोदोहः सुप्यते' इति । एवं तु विवक्षान्तरे भवत्येवेति भाष्यकारेण भावेऽपि लविधाने [ त्यादिविधाने ] बहुवचनमुपपादितम् इति ।

अयमाशयः–कर्मादिषु कर्मत्वाश्रयव्यक्तिभेदाद् द्वित्व-बहुत्वादीनां संभवः, कर्मणि त्यादिप्रत्ययेऽपि स भेदोऽन्वेतीति तत्र द्वित्वादि भवति, भावस्य चैकत्वात् तदाश्रयाणां भेदेऽपि भावेन [ आख्यातार्थेन ] सहाश्रयाणामभेदाभावात् स [ आ-ख्यातार्थो भावः ] आश्रयगतं भेदं नोपादत्त इति न तत्र द्वित्वादिप्रतीतिः, यथा ताम्रः पलाशेषु बभूव रागः' इत्यत्र ताम्रत्वाश्रयाणां पलाशानां भेदेऽपि तदाश्रितो रागस्तदीय-भेद नोपादत्तेऽपि तु स्वगतमैक्यमेव व्यञ्जयति तथेहापि संभवात् । यदि च 'उष्ट्रासिका आस्यन्ते' इत्यत्र कर्मणि प्रत्ययः स्वीक्रियते, भवति हि अकर्मकाणां धातूनां योगे भाववाचकस्य कर्मसंज्ञा "कालाध्वभावदेशं वा०" [ २. २. २३ ] इत्यादिवचनेन, यथा गोदोहः सुप्यते' इत्यत्र तदा तु कर्मगत बहुत्वमुपादाय युक्तमेव बहुवचनमिति न काचि-दनुपपत्तिः, भावेऽपि त्यादिविधाने बहुवचनोपपादनार्थमेव प्रकृतग्रन्थप्रवृत्तेः, विवक्षाभेदेन सर्वसंभवात् ।

**मनोरमाकारस्तु** 'उष्ट्राशिका आस्यन्ते' इत्यादौ क्रियाविशेषणत्वाद् द्वितीयामाह । न च तथा सति क्लीब-त्वमेकत्वं च स्यात्, क्रियाविशेषणानां तथात्वस्य प्रसिद्ध-त्वादिति वाच्यम् "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्य-धिकारोक्ततया " भावे " [ ५. ३. १२२. ] इति सूत्रेण स्त्रियामेव णकविधानात्, तस्य सामान्ये नपुंसकत्वस्य बा-धकत्वात् क्लीबत्वाभावादुष्ट्रगतबहुत्वस्य तदासनगतप्रकार-बहुत्वस्य च विवक्षितत्वादेकवचनाभावाच्च । इत्थं च प्रकार-त्रयेणापि प्रकृतप्रयोगोपपत्तिरिति विज्ञेयम् ॥ ३. ३. २१. ॥

## इङितः कर्तरि ॥ ३. ३. २२ ॥

**त० प्र०** – **इकारेतो ङकारेतश्च धातोः कर्तर्या-त्मनेपदं भवति । इदित्– एधि-एधते, स्पर्धि-स्पर्धते, एध-मानः, स्पर्धमानः । ङित्-शिङ्–शेते, शयनः, ह्नुङ्–ह्नुनुते, ह्नुवानः; महीङ्–महीयते, महीयमानः; कामयते, काम-यमानः; श्येनायते, श्येनायमानः; पापच्यते, पापच्यमानः; उत्पुच्छयते, उत्पुच्छयमानः । एभ्य एव कर्तरीति नियमार्थं वचनम् ॥ २२ ॥**

**श० म० न्यासानुसन्धानम्—इङितः०** । इश्च ङ् चेत्यनयोः समाहारः—इङ्, इङ् इत् यस्येत्यर्थे बहुव्रीहिः, ततः पञ्चमी **इङितः** इति — अत्र यस्येति बहुव्रीह्यर्थ-घटिका षष्ठी अवयवावयविभावसम्बन्धे, सा च न घटते,

"Aho Shrutgyanam"

इङोरनुबन्धयोर्धात्वनवयवत्वात्, यो हि यदवयवः स कदाचित् तत्रोपलभ्यत एव, अयं च न तथा लक्ष्ये क्वाप्यदर्शनात्, अत एव चाहुरभियुक्ताः * अनेकान्ता अनुबन्धाः * इति, अनेकान्ता इत्यस्यानवयवा इत्यर्थः तथा च यस्येति षष्ठी कस्मिन् सम्बन्धे इति चेत्? न,—अत्र पक्षे [ अनुबन्धानामनेकान्तत्वपक्षे ] 'टित्, इदित्' इत्यादिषु यत्र तत्रोपात्तपदेषु सामर्थ्यात्, धातुप्रत्ययादिनिरूपितसामीप्यवति स्वघटितपदघटके स्वाघटितपदाघटिते अनुबन्धे स्वनिरूपितावयवत्वमारोप्यत इति स्वीकारात्, अत्र चानुबन्धे 'स्वाघटितपदाघटके' इति विशेषणं "वा युष्मदस्मदो ञीनञौ" [ ६. ३. ६६. ] इति सूत्रे ञीनञोर्ञकारोच्चारणसार्थक्याय "वोर्ध्वं दघ्नट् द्वयसट्" [ ७. १. १४२. ] इति सूत्रे द्वयसटः टकारोच्चारणसार्थक्याय च बोध्यम्। वस्तुतस्तु अनुबन्धानामेकान्तत्व[ अवयवत्व ]पक्ष एव सिद्धान्तितोऽभियुक्तैरपीति न काऽपि शङ्का। पक्षद्वयस्यापि शास्त्रे समर्थनस्योपलब्धत्वेऽपि पूर्वपक्षे ज्ञापकानुसरणक्लेशस्याधिक्यात्। प्रकृतमनुसरामः— **इङितः** इति द्वन्द्वगर्भो बहुव्रीहिः, द्वन्द्वान्ते च श्रूयमाणमित्पदमुभाभ्यामिकार-ङकाराभ्यां सम्बध्यते * द्वन्द्वादौ द्वन्द्वान्ते वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते * इति न्यायात्, तदाह- **इकारेतो ङकारेतश्चेति**—"क्रियार्थो०" [ ३. ३. ३. ] इत्यतो धातुरिति प्रकृतम्, तच्च मण्डूकप्लुत्याऽनुवर्त्तमानं प्रकृतसूत्रेऽपि सम्बध्यते, इङित इति पञ्चम्यन्तेनान्वयानुरोधाच्च पञ्चम्यन्ततया विपरिणमते, ईदृशस्थले यद्यपि सग्राहकवाक्ये द्वन्द्वसाहित्यापन्नस्य 'इङ्' इत्यादि समुदायस्यैव साकाङ्क्षेनेत्पदार्थेनान्वयो युक्त इतीत्संज्ञकयोरि-ङोरवयविनो धातोरित्यादिरूपेणैवान्वयबोधो लभ्यते, तथापि 'इङ्' इति समुदायावयवी धातुरेव दुर्लभ इति सूत्रवैयर्थ्यप्रसक्त्या सूत्रारम्भसामर्थ्यात् तल्लक्ष्यसंस्कारकं वाक्यान्तरं परिकल्प्यते- इकारेतो ङकारेतो धातोरिति, तथैव शास्त्रकाराणां व्याख्यानात् समयाच्च। इत्संज्ञकङकारो धातोरवयव औपदेशिको ग्रहीतव्यः * औपदेशिक-प्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् * इति परिभाषणात्, कुतश्चित् सूत्रादुपदेशपदं वाऽनुवर्त्तनीयं मण्डूकप्लुत्या। अत एव **कुकुटिषतीत्यत्र** नात्मनेपदम्।

"धातुसूत्र-गणोणादि-वाक्य-लिङ्गानुशासनम्।
आगम-प्रत्ययाऽऽदेशा उपदेशाः प्रकीर्त्तिताः॥"

इति परिगणय्य एषामाद्योच्चारणमुपदेश इति स्वीकारात्। कुट्धातोः सनि कृते तस्य "कुटादेर्ङिद्वदञ्णित्" [ ४. ३ १७. ] इति ङित्त्वेऽतिदिष्टेऽपि तस्य [ ङित्वस्य ] प्रायोगिकत्वेन आद्योच्चारणदशायामभावेन ङित्वाभावात् प्रकृतसूत्राप्रवृत्तेः। **कर्त्तर्यात्मनेपदमिति**—यद्यपि सूत्रे कर्त्तरीत्यस्याभावेऽपि "तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इति पूर्वसूत्रेण भावकर्मणोरात्मनेपदविधानात् परिशेषादनेन कर्त्तर्येवात्मनेपदं स्यादिति न कर्त्तरीत्यावश्यकं तथाप्यग्रिमसूत्रेषु तस्यावश्यकत्वेन स्पष्टप्रतिपत्तये इहैव कृतमिति बोध्यम्। संहितापाठे च तत्रैव [उत्तरसूत्रे एव] स्थितमिह विभज्य पाठे भ्रमादा यातमितिवा कल्पनीयम्।

क्रमश उदाहरति— **इदित्**–इति प्रकृत्य– **एधीति** धातुर्वृद्ध्यर्थ इकारेत् भ्वादिः, तस्मात् कर्त्तर्यात्मनेपदे विहिते सति **एधते** इति रूपम्। **स्पर्धीति** धातुरपीकारेत् संघर्षार्थो भ्वादिः, तस्मात् कर्त्तर्यात्मनेपदविधाने– **स्पर्धते** इति रूपम्। "पराणि कानाऽऽनशौ चात्मनेपदम्" [ ३. ३. २०. ] इति सूत्रेण 'ते' आदीनामिव कानाऽऽनशोरप्यात्मनेपदसंज्ञाविधानादानशमपीदितो धातोरुदाहरति—**एधमानः, स्पर्धमानः** इति–उभाभ्यां वर्त्तमानाविषये, "शत्रानशावेष्यति तु सस्यौ" [ ५. २. २०. ] इति आनश्, मागमादौ– एधमानः स्पर्धमान इति। इदित उदाहृत्य ङित उदाहरति– **ङित्-शीङ् इत्यादिना**। शीङ्क् धातुरादादिकः स्वप्नार्थकोङकारेत्, ततः कर्त्तरि आत्मनेपदे- **शेते** इत्यादि वर्त्तमानादिषु रूपम्। ह्नुङ्क् धातुरपनयनार्थ आदादिकोङकारेत्, ततः कर्त्तरि वर्त्तमानायां 'ह्नुते' इत्यादिरूपाणि, आनशि– **शयान ह्नुवानः** इति। महीङ् धातुः पूजार्थः कण्ड्वादिः, ततः कर्त्तरि वर्त्तमानाया आत्मनेपदे–**महीयते** इति रूपम्, कण्ड्वादित्याच्छिति यक्; आनशि– **महीयमानः** इति। इहानुवर्त्तमानं पञ्चम्यन्ततया परिणत धातोरिति विशेष्यमिङित इति च विशेषणम्, "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषया तदन्तबोधकमितीदन्तत्वाद् ङिदन्ताच्च धातोः कर्त्तर्यात्मनेपदमित्यर्थलाभः समुदाये एव तदन्तविधेर्युक्तत्वात्, तत्र इदिदंशे तदन्तत्वस्यासंभवाद् विशेषणवैयर्थ्यापत्तौ केवलं ङिदंशे एव तदन्तविधिः स्वीक्रियते, एवं च इदितो ङिदन्ताच्च धातोः कर्त्तर्यात्मनेपदं स्यादिति सूत्रार्थः सम्पद्यते। यश्च धातुर्न ङिदन्तोऽपि तु स्वयमेव ङित् तत्र व्यपदेशिवद्भावे न ङिदन्तत्वमाश्रित्यात्मनेपदं विधेयं, यथा–'शीङ् ह्नुङ् इत्यादौ। तदन्तविधिफलं तु यङन्तादिष्विति केचित्, तत्र-तत्र यङादौ सति धातुसंज्ञया धातोरेव ङित्त्वात्। न च तत्र ङित्त्वस्य फलान्तरसत्त्वान्नात्मनेपदं स्यादिति वाच्यम्, तदन्तविधौ सत्यपि तद्दोषतादवस्थ्यात्। **कामयते** इत्यादि, अत्र "कमेर्णिङ्" [ ३. ४. २. ] इति सूत्रेण कमेर्णिङ्, ततो धातुसंज्ञाया-

"Aho Shrutgyanam"

मयमपि ङिदेव । **श्येनायते** इति– श्येन इवाचारतीत्यर्थे "क्यङ्" [ ३. ४. २७ ] इति क्यङ्, तदन्तस्य धातुसंज्ञाऽनेन तत आत्मनेपद ङित्त्वात्; आनशि– **श्येनायमानः** इति । **पापच्यते** इति– पुनः पुनरतिशयेन वा पचतीत्यर्थे पचेः "व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा" [ ३. ४. ९. ] इति यङ्, यङन्तत्वाद् द्वित्वादौ धातुसंज्ञायां ततोऽनेन ङित्त्वादात्मनेपदम्; आनशि– **पापच्यमानः** इति । **उत्पुच्छयते** इति– पुच्छमुदस्यतीत्यर्थे "पुच्छादुत्परिव्यसने" [ ३. ४ ३९. ] इति णिङ्, तदन्तस्य धातुत्वे ततोऽनेन कर्त्तर्यात्मनेपदम्, आनशि– **उत्पुच्छयमानः** इति– "सति" [ ५. २. १९. ] इत्यादिसूत्रैः परस्मैपदाऽऽत्मनेपदयोरविशेषेण विधानादिङितः परस्मैपदाऽऽत्मनेपदयोरुभयोः प्राप्तावात्मनेपदविधान सिद्धमेवेति प्रकृतसूत्रं किमर्थमित्याशङ्कायामाह– **एभ्य एव कर्त्तरीति नियमार्थं वचनमिति**, अयमाशयः–

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥"

इति मीमांसासरण्या प्रकृते आत्मनेपदस्य इङितः कर्त्तरि पाक्षिकप्राप्तस्य नियमार्थमिदं सूत्रम्, एभ्य एव कर्त्तर्यात्मनेपदं नान्येभ्य इति; एभ्यः कर्त्तर्येवात्मनेपदमिति नियमस्तु न कर्तुं शक्यते "तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इति सूत्रेण भावकर्मणोरेभ्य आत्मनेपदस्येष्टत्वात् तद्बाधापत्तेः, एभ्यः कर्त्तर्यात्मनेपदमेवेत्यपि न नियन्तुं शक्यते "इङितो व्यञ्जनाद्यन्तात्" [ ५. २. ४४. ] इत्यनेन कर्तर्यनस्य विहितस्य बाधापत्तेः । नियमेनानिष्टानां प्रकृतीनां नियम्य सामान्यशास्त्रविहितप्रत्ययसहितानां निवृत्तिः क्रियत इति गौरव, यतो नियमस्थले स्वार्थहानिः प्राप्तबाधः परार्थकल्पना च भवतीति दोषत्रयम्, ततश्च नियम्य विधानं लाघवादाद्रियते, तथा च स्वार्थहानिपरार्थकल्पने न भवतः, केवलं प्राप्तबाध एव, स च स्वसार्थक्यायावश्यक इति फलमुखत्वात् स्वीक्रियते । अत्र हि पक्षे सर्वाण्येव शास्त्राण्यबाधितार्थानि परस्परमङ्गाङ्गिभावेन यथाकाङ्क्षं सङ्गत्य वर्त्तमानासम्बन्ध्यात्मनेपदान्यपुरुषैकवचनमन्यस्मिन्नेकत्वविशिष्टे कर्त्तर्यर्थे इङितो धातोः स्यादित्यादिक्रमेणार्थबोधं जनयन्ति, अत्र पक्षे वाक्यैकवाक्यतया खले कपोतन्यायेन लक्ष्यसंस्कारकमहावाक्यार्थबोधे वृत्ते क्रियासमभिहारेण विधिर्निवृत्तिश्च न कर्त्तव्ये स्यातामिति लाघवम् । **अन्ये** तु वैयाकरणा एकवाक्यतया विधाने भाविसंज्ञाश्रयणादिगौरवमाहुरिति विहितानां नियमेन निवृत्तिरेवेति मन्यन्ते, सा च रीतिः प्रक्रियाभेदमाश्रयत इति नेहोपन्यस्यते ॥ ३. ३. २२. ॥

## क्रियाव्यतिहारेऽगति-हिंसा-शब्दार्थ-हसो हृ-वहश्चानन्योऽन्यार्थे ॥ ३. ३. २३. ॥

**त० प्र०—इतरेण चिकीर्षितायां क्रियायामितरेण हरणं करणं क्रियाव्यतिहारः, तस्मिन् अर्थे वर्त्तमानाद् गद्गति-हिंसाशब्दार्थ- हसवर्जिताद् धातोर्हृ- वहिभ्यां च कर्तर्यात्मनेपद भवति, न चेदन्योऽन्यार्थाः– अन्योऽन्येतरेतरपरस्परशब्दाः प्रयुज्यन्ते । व्यतिलुनते, व्यतिपुनते, व्यतिहरन्ते भारम्, संप्रहरन्ते राजानः, संविवहन्ते वर्गाः । हृ-वहोर्गतिहिंसार्थत्वात् प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुपादानम् । व्यतिहार इति किम् ? लुनन्ति, पुनन्ति । क्रियेति किम् ? द्रव्यव्यतिहारे मा भूत्– चैत्रस्य धान्यं व्यतिलुनन्ति, अत्र लुनातिरुपसंग्रहात्मके लवने वर्तते । चैत्रेण यत् गृहीतं धान्यं पुरस्ताल्लवनेनोपसंगृह्णन्तीत्यर्थः । अगति- हिंसाशब्दार्थ-हस इति किम् ? । व्यतिगच्छन्ति, व्यतिसर्पन्ति, व्यतिहिंसन्ति, व्यतिघ्नन्ति, व्यतिजल्पन्ति, व्यतिपठन्ति, व्यतिहसन्ति। अनन्योऽन्यार्थे इति किम् ? अन्योऽन्यस्य व्यतिलुनन्ति इतरेतरस्य व्यतिलुनन्ति, परस्परस्य व्यतिलुनन्ति । क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योऽन्यादिभिस्तत्कर्माभिसंबध्यते अन्योऽन्यस्य केदारमिति । कर्तरीत्येव ? तेन भाव-कर्मणोः पूर्वेणैव स्यादनेन मा भूत्, यदि ह्यनेन स्यात् तदा व्यतिगम्यन्ते ग्रामाः, व्यतिहन्यन्ते दस्यवः इत्यत्रागतिहिंसाशब्दार्थहस इति प्रतिषेधः स्यादिति ॥ २३ ॥**

---

**श० म० न्यासानुसन्धानम्–क्रियाव्य०** । क्रियाव्यतिहारपदं व्याचष्टे– **इतरेण चिकीर्षितायां क्रियायामि**त्यादिना, या क्रिया स्वभिन्नेन [ प्रकृतकर्तृभिन्नेन ] कर्तुमभिलाषिता तस्याः प्रकृतकर्त्रा करणं प्रकृतकर्त्रा चिकिर्षितायाः क्रियायाश्च तदन्येन करणं क्रियाव्यतिहार इत्यर्थः । व्यतिहारो विनिमयः, तथा च क्रियाविनिमये द्योत्ये, गतिश्च हिंसा च शब्दश्चार्थो येषां ते गतिहिंसाशब्दार्थाः ते च हस् चेत्येतेषां समाहारो गतिहिंसाशब्दार्थहस्, न तत्–अगतिहिंसाशब्दार्थहस्, तस्मात्– **अगतिहिंसाशब्दार्थहसः** गत्यर्थादिभ्योऽन्यस्माद् धातो-र्हृ-वहिभ्यां च [ हिंसागत्यर्थाभ्यां] कर्त्तर्यात्मनेपदं भवति– किं सर्वत्र ? नेत्याह– **न चे**दित्यादिना, अन्योऽन्यार्थाः शब्दाश्चेन्न प्रयुज्यन्ते, के तेऽन्योन्यार्थास्तदाह– **अन्योऽन्येतरपरस्परशब्दाः** इति । उदाहरति– **व्यतिलुनते** इत्यादिना, अन्यस्य योग्यं लवनं–सस्यादिच्छेदनमन्ये कुर्वन्तीत्यर्थः 'वि अति' इत्युपसर्गद्वयेन व्यतिहारो गम्यते, नोच्यत, इति नोक्तार्थन्यायविषयः तत्रानेनात्मनेपदं प्रथमपुरुषबहुवचन वर्त्तमानाया 'अन्ते' इति

"Aho Shrutgyanam"

विहितं, लुनातेः क्र्यादित्वात् श्नाः, ततः परस्य 'अन्त्' इत्यस्य "अनन्तोऽन्तोदात्मने" [ ४.२.११४. ] इत्यत्। **व्यतिपुनते** इति पुनातेः, अन्यस्य योग्यं पवनमन्ये कुर्वन्तीत्यर्थः। **व्यतिहरन्ते भारम्** इति– अन्ययोग्य भारकर्मक हरणमन्ये कुर्वन्तीत्यर्थः, व्यतिपूर्वकस्य हरतेर्भौवादिकस्य वर्त्तमानाबहुवचने रूपम्। परस्परकरणस्यापि क्रियाव्यतिहारत्वमुक्तरीत्या सिद्धमिति तदुदाहरणमाह– **सम्प्रहरन्ते राजानः** इति– अन्येन चिकीर्षितायाः प्रहारक्रियाया अन्येन करणमित्यर्थस्य परस्परकरणेऽपि सङ्गतेरुचितमेवेदमुदाहरणम्, संप्रपूर्वकाद् हरतेर्वर्तमानाबहुवचने रूपमिदम्। अत्र हिंसार्थत्वं हरतेर्धातूनामनेकार्थत्वात्, अगतिहिंसेति पर्युदासादप्राप्तेः पृथग्ग्रहणमिति वक्ष्यति स्वयमेव वृत्तिकृत्। **संविवहन्ते वर्गाः** वर्गाः सह परस्परं विवहनं परिणयं कुर्वन्ति, वर्गस्था जना अन्योऽन्यं विवाहं कुर्वन्तीत्यर्थः, वहेः संविपूर्वकाद् वर्त्तमानायां आत्मनेपदबहुवचनम्। हृधातोर्हरणार्थत्वं, वह्‌धातोः प्रापणार्थत्वमिति गतिहिंसाशब्दार्थत्वाभावादनयोः पर्युदासो न प्राप्त इति पृथगनयोर्ग्रहणमनावश्यकमित्याशङ्कायामाह – **हृवहोर्गति-हिंसार्थत्वात् प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुपादानम्**इति, अयमाशयः— हरणस्य सामान्यतो हिंसाभिन्नत्वेऽप्युपसर्गवशात् प्राणहरणानुकूलव्यापारे वृत्तौ हिंसार्थत्वमस्त्येव, प्रापणमपि स्थानान्तरस्थितस्य स्थानान्तरस्थापनमित्युत्तरदेशसंयोगानुकूलव्यापारं विना तदसंभवः, उत्तरदेशसंयोगानुकूलव्यापार एव च गतिरिति भवत्युभयोः क्रमशो हिंसार्थत्वं गत्यर्थत्वं चेति निषेधस्य प्राप्तिरस्तीति तस्य प्रतिप्रसवार्थं [ निषिद्धस्य कार्यस्य पुनः प्राप्त्यर्थं ] पृथगुपादानमावश्यकमेवेति। केचित् तु सूत्रेऽर्थग्रहणात् शब्दान्तरनिरपेक्षा एव ये गत्याद्यर्थबोधकास्ते एव तदर्थत्वेन गृह्यन्ते, हरतेरुपसर्गवशेन हिंसार्थत्वमिति न शब्दान्तरनिरपेक्षं हिंसार्थत्वम्, प्रापणमपि न साक्षाद्गतिरपि त्वार्थिकार्थरूपा गतिरिति तयोर्हृवहोः प्रतिषेधस्य न प्राप्तिरिति व्यर्थमेव तयोः पृथगुपादानमित्याहुः पाणिनीये तन्त्रे, भाष्ये तु "न गतिहिंसार्थेभ्यः" [ पा० सू० १. ३. १५ ] इति सूत्रे— 'हृवह्योरप्रतिषेधः' इति वार्त्तिककारेणाक्षिप्तम्, तदर्थश्च भाष्यकृतेत्थं कृतः– "हृवह्योरप्रतिषेधो भवतीति वक्तव्यम्। सम्प्रहरन्ते राजानः संविवहन्ते गर्गाः" इति। तथा च हरते हिंसार्थत्वाद् वहतेर्गत्यर्थत्वात् प्रतिषेधप्राप्तिमाशङ्क्यैवेत्थमुक्तम्। "ततः सम्प्रहरिष्यन्तौ दृष्ट्वा कर्ण-धनञ्जयौ।" इति महाभारतप्रयोगे आत्मनेपदाभावश्च, कैयटेन व्यतिहाराविवक्षया समर्थितः, अत्र हि सम्प्रहरिष्यन्ताविति-नेन योत्स्यमानावित्यर्थो विवक्षित इति तत्तात्पर्यम्। अग्रे च भाष्यकृता वहेर्ग्रहणं प्रत्याख्यातम्, तथाहि "न वहिर्गत्यर्थः, देशान्तरप्रापणक्रियोऽत्र वहिः" इति। अत्र कैयट आह भारं वहतीत्यादौ देशान्तरप्राप्त्युपसर्जनं प्रापणमस्य वाच्यम्, तत्र तु गतिर्नान्तरीयकत्वात् प्रतीयते न त्वसौ धात्वर्थः, अस्यैव न्यायसिद्धार्थस्यानुवादकमर्थग्रहणम्। गर्गाणां तु प्रापण कन्याद्वारकमिति वहेर्गत्यर्थत्वाभाव इति। अयमाशयः–ग्रामं प्राप्त इत्यादौ देशान्तरप्राप्तेर्गतिं विनानुपपत्तेः प्रापणे गतिर्नान्तरीयिका, प्राप्तिस्तु सम्बन्धसामान्यं न देशान्तरसंयोग एव अगतिस्थलेऽपि "भूरनेन प्राप्ता" इति व्यवहारात्। नान्तरीयकत्वेन लब्धस्य चार्थस्य न शब्दार्थत्वमित्यस्यैव ध्वननाय सूत्रेऽर्थग्रहणमुपात्तम्, अन्यथा "अगतिहिंसाशब्दहसः" इत्येव ब्रूयात्, गर्गाणां परस्परं प्राप्तिश्च कन्याद्वारिका, विवाहस्य हि कन्याप्राप्तिफलकपाणिग्रहणद्वारकसम्बन्धोऽर्थ इति न प्रकृते वहेर्गत्यर्थत्वमिति। स्वमते च सूत्रेऽर्थग्रहणं स्पष्टप्रतिपत्त्यर्थमेव, नान्तरीयकतया प्रतीयमानस्याप्यर्थस्य यतः प्रतीतिस्तद्वाच्यत्वमेवेति स्वीकृत्य वहेरपि गत्यर्थत्वं सूपपादम्। हरतेर्हिंसार्थत्वं तु परैरपि स्वीकृतमेवेति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुभयोरुपादानमिति सम्यगेवोक्तम्।

"दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्यग्विनिमयेनोभौ दधतुर्भुवनत्रयम्॥"

इति रघुवंशप्रथमसर्गे कालिदासप्रयोगस्तु करणविनिमये एव, न क्रियाविनिमये इति नात्मनेपदम्। अयमाशयः– प्रकृतपद्यं राज्ञो दिलीपस्य वर्णनप्रसङ्गेनागतम्, स–दिलीपः, यज्ञाय–यज्ञं कर्तुं, गां–पृथ्वीं, दुदोह–हृतधनामकरोत्; मघवा—इन्द्रः, सस्याय पृथिव्यां सस्यविवृद्ध्यर्थं, दिव— स्वर्गमाकाशं वा, दुदोह–वृष्टिरूपेण स्वधनेन पृथिवीं पूरितवानित्यर्थः; ततश्च दिलीपो यज्ञेन मघवानं सन्तोष्य स्वर्गलोकं दधार, मघवा च वृष्टिदानेन सस्योत्पत्तिद्वारा भूलोकं दधारेति प्रतीयते। अत्र च परस्परधारणकरणस्य यज्ञस्य सस्यस्य च विनिमय इति न क्रियाविनिमय इति नात्मनेपदमिति। **व्यतिहार इति किमिति**—अवयवद्वारा समुदाये प्रश्नः, क्रियाव्यतिहारे इति किमर्थमिति भावः, केवलस्य क्रियेति पदस्य स्थितौ न कश्चिदर्थः प्रतीयेतेति पूर्णस्यैव क्रियाव्यतिहारपदस्य शङ्काविषयत्वं स्वीकरणीयम्। प्रत्युदाहरति–**लुनन्ति पुनन्ती**ति, अयमाशयः– क्रियाव्यतिहार इत्यस्याभावे गत्यर्थादिवर्जितेभ्यो धातुभ्यः कर्त्तर्यात्मनेपदमेव स्यादित्येवंरूपो नियमः प्रतीयेत, तथा सत्युभयपदिभ्यः केवलपरस्मैपदिभ्यो वा गत्यर्थादिभिन्नेभ्यो धातुभ्य आत्मनेपदमेव स्यादिति लुनन्तीत्यादिप्रयोगा न स्युरिति 'क्रियाव्यतिहारे' इत्यावश्यकम्। अथास्तु

"Aho Shrutgyanam"

व्यतिहार इति पदं, क्रियेति तत्र विशेषणरूपेण यदुक्तं तन्मास्त्विति शङ्कते— **क्रियेति किमि**ति, अयमर्थः— व्यतिहार इत्येतावन्मात्रे कथितेऽपि 'व्यतिलुनीते' इत्यादिलक्ष्यसिद्धिः, लुनन्तीत्याद्यलक्ष्यव्यावृत्तिश्च स्यातामेवेति क्रियापदं तत्राधिकमिति । उत्तरयति— **द्रव्यव्यतिहारे 'मा' भूदि**ति— अन्यदीयद्रव्यस्य हरणे आत्मनेपदं मा भूदित्येतदर्थमिह क्रियाकरणमावश्यकमिति । क्व तदित्याह– **चैत्रस्य धान्यं व्यतिलुनन्ती**ति—अत्र कर्मणो धान्यस्य द्रव्यस्य विनिमय इत्यात्मनेपदं नेष्टम् असति क्रियाग्रहणे इहापि तद् दुर्वारमिति भावः । ननु चैत्रस्वामिकधनस्य [ धान्यस्य ] लवनेऽपि लवनकर्तुः स्वत्वानुत्पत्तेरिह कथं द्रव्यस्यापि विनिमय इति विनिमया [ व्यतिहारा ] भावादेवात्मनेपदाप्राप्तिरिति चेदत्राह—**अत्र लुनातिरुपसंग्रहात्मके लवने वर्त्तते** इति—प्रकृतप्रयोगे लुनातिर्न केवले छेदने वर्त्ततेऽपि तु उपसंग्रहात्मके स्वीकारस्वभावे लवने च्छेदने वर्त्तते, तदेव स्पष्टयति—**चैत्रेण यद् गृहीतमिति**– चैत्रेण यत् स्वायत्तीकृतं तदेव धान्यं छेदनेनोपसंगृह्णन्तीत्यर्थ इति । चैत्रस्वामिकं धान्यं लवनेनोपसंगृह्णन्ति–स्वीकुर्वन्तीत्यर्थात् तत्र द्रव्यस्य विनिमयो गम्यत एवेति **भवति तत्र** व्यतीहारो द्रव्यस्य, क्रियाव्यतिहारग्रहणे तु [ क्रियाग्रहणे तु ] प्रकृते चैत्रेण कस्याश्चिदपि क्रियायाः स्वीकाराभावान्न भवति क्रियाव्यतीहारः । ननु स्थिरेषु द्रव्येष्वन्यसम्बन्धिनो द्रव्यस्यान्यसम्बन्धरूपव्यतिहारसंभवेऽपि क्षणस्थायिक्रियासु तदसंभव इति क्रियाव्यतिहारः कुत्रापि न संभाव्यत इति चेन्न—योग्यतावशादस्येयं क्रिया साध्या, अस्या इदं साधनमिति निश्चिते साध्यसाधनभावे यो व्यत्यासः स एव क्रियाव्यतिहार इति स्वीकारात्, अयमाशयः–नान्यसम्बन्धिनोऽन्यसम्बन्धित्वं क्रियाव्यतिहारः, किन्त्वन्यदीयत्वेन प्रसक्तस्यान्यसम्बन्ध एव सः, एवं च साधनव्यत्यास एव क्रियाव्यत्यास इति पर्यवसितम्, स च सर्वत्र संभाव्यत एव, अन्यकर्तृकक्रियायाः [तत्सदृशक्रियायाः] अन्येनाक्रियमाणत्वात् । यद्यपि साधनभेदात् क्रियाया भेद इति नान्यकर्तृकक्रियाया अन्येन करणं सम्भाव्यते, तथापीदृशस्थले एकैव क्रिया कर्तृद्वयसञ्चारिणी लक्ष्यत इति जातिकृतमेवैक्यमाश्रयणीयम् । प्रायेण व्यती उपसर्गावस्य[क्रियाव्यतिहारस्य]द्योतकौ, क्वचित् समपि. संप्रहरन्ते राजान इति, क्वचित् तु प्रकरणादिकमपि व्यतिहारद्योतकम्, तथापि वाचकपदाभावात् तत्प्रतिपत्तिरात्मनेपदेन भवतीति तदर्थे स विधीयत इति नोक्तार्थानामप्रयोग इति न्यायविषय इत्युक्तपूर्वम् । अस्तु तावदविशेषेण सर्वेभ्य एव धातुभ्यः क्रियाव्यतिहारे आत्मनेपदं, गत्यर्थादिपर्युदासो व्यर्थ इति शङ्कते–अगति-हिंसा-शब्दार्थ-हस इति किमिति । उत्तरयति प्रत्युदाहरणेन–**व्यतिगच्छन्ती**त्यादिना । अर्थग्रहणप्रयोजनप्रदर्शनाय तत्तदर्थकप्रत्युदाहरणद्वयं यथा गत्यर्थस्य– **व्यतिगच्छन्ति, व्यतिसर्पन्ती**ति, हिंसार्थस्य **व्यतिहिंसन्ति, व्यतिघ्नन्ती**ति, शब्दार्थस्य **व्यतिजल्पन्ति, व्यतिपठन्ती**ति, हसः— **व्यतिहसन्ती**ति, अत्र सर्वत्र सर्वेष्वेकस्या एव क्रियायाः सत्त्वात् क्रियाव्यतिहार-क्रियाविनिमयसत्त्वेऽपि न भवत्यात्मनेपदं, गत्याद्यर्थकधातुहसोवर्जनाभावे च स्यादेवेति तद्वारणायावश्यकमगतीत्यादीति भावः । **अनन्योऽन्यार्थे किमि**ति, परस्परकरणस्यापि व्यतिहारत्वमिष्टम्, अत एव च 'सम्प्रहरन्ते राजानः' इत्युदाहृतम्, तथा च परस्परार्थेऽपीष्टमिदमिति तदर्थकशब्दप्रयोगेऽपि भवितव्यमेवात्मनेपदेनेत्यन्योऽन्यार्थशब्दवर्जनमनुचितमिति प्रश्नकर्त्तुराशयः । प्रत्युदाहरति–**अन्योऽन्यस्य व्यतिलुनन्ती**त्यादि, अयमाशयः– परस्परकरणार्थे सूत्रस्य प्रवृत्तेरिष्टत्वेऽपि परस्परार्थे शब्दे समीपोच्चारिते सति नात्मनेपदमिष्टमिति प्रकृते तद्वारणाय 'अनन्योऽन्यार्थे' इत्यावश्यकम् । नन्वन्योऽन्यार्थकशब्देनैव क्रियाव्यतिहारस्य बोधितत्वात् पुनस्तदर्थे आत्मनेपदं न स्यादेव * उक्तार्थानामप्रयोगः * इति न्यायादिति प्रकृतप्रयोगेष्वात्मनेपदवारणाय 'अनन्योऽन्यार्थे' इति नावश्यकमिति चेत् ? न–लौकिके शब्दव्यवहारे लाघवानादरादन्योऽन्यादिशब्दाः क्रियाव्यतिहारद्योतनाय प्रयुज्यन्ते व्यत्ययादिरूपोपसर्गा इव, तथा च लौकिकप्रयोगस्य तथैवानुसर्त्तव्यत्वात् परस्परादिशब्दप्रयोगेऽप्यात्मनेपदं स्यादेवेति तद्वारणायावश्यकमेवान्योऽन्यादिशब्दवर्जनमिति बोध्यम् । ननु प्रकृतेऽन्योऽन्यादिशब्दा व्यती उपसर्गौ च प्रयुक्ताविति कथं व्यतिहारद्योतकोभयशब्दप्रयोग इति चेदत्राह—**क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योऽन्यादिभिस्तत्कर्माभिसम्बध्यते** इति, अयमाशयः—प्रकृते व्यतिहारद्वयं—क्रियाव्यतिहारः कर्मव्यतिहारश्च, तत्र क्रियाव्यतिहारो व्यतिना द्योतितोऽपि कर्मव्यतिहारद्योतनायान्योऽन्यादिशब्दप्रयोग इष्ट एवेति । कर्मसम्बन्धमवगमयति – **अन्योऽन्यस्य केदारमि**ति–अन्योऽन्यस्य केदारं क्रियाव्यतिहारेण लवित्वोपसंगृह्णन्तीत्यर्थ इति भावः । पूर्वसूत्रे कर्त्तरीत्युक्तं, तत्रानावश्यकमपि प्रकृतसूत्रेऽवश्यसम्बन्धनीयमित्याह— **कर्त्तरीत्येवे**ति । तत्फलमाह—**तेन भाव-कर्मणोः पूर्वेणैव स्यादनेन मा भूदि**ति—यत्र सकर्मकेभ्यः कर्मणि प्रत्ययो यत्र वाऽकर्मकेभ्यो भावे प्रत्ययस्तत्र प्रकृतसूत्राप्रवृत्त्यर्थं कर्त्तरीत्यवश्यं कर्त्तव्यमित्यर्थः । ननु आत्मनेपदं विधेयं तदनेनास्तु पूर्वसूत्रेण वा तत्र को विशेष इति चेदत्राह–**यदि ह्यनेन**

"Aho Shrutgyanam"

**स्यात् तदा व्यतिगम्यन्ते ग्रामाः, व्यतिहस्यन्ते दस्यवः इत्यत्रागतिहिंसाशब्दार्थहस इति प्रतिषेधः स्यादिति**, अयमाशयः—प्रकृतसूत्रं कर्त्तरीत्यस्याभावे सामान्येन प्रवृत्तौ भावकर्मणोरपि परत्वात् क्रियाव्यतिहारे विशिष्य विहितत्वाच्चास्यैव सूत्रस्य प्रवृत्तिः स्यात् तत्र च प्रकृतसूत्रीयप्रतिषेधोऽपि प्रसज्येतैवेति 'व्यतिगम्यन्ते ग्रामाः' इत्यत्र गत्यर्थत्वप्रयुक्तो 'व्यतिहस्यन्ते दस्यवः' इत्यत्र हस्धातुविषयश्च निषेधः स्यदिति न स्यादात्मनेपदमिति तत्राप्यात्मनेपदप्रवृत्तये प्रकृतसूत्रे कर्त्तरीत्यावश्यकम्, कृते च कर्त्तरीति पदे भाव-कर्मणोः प्रकृतसूत्राऽप्रवृत्तौ "तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इति पूर्वसूत्रेण निर्बाधमात्मनेपदं भवतीति सर्वसामञ्जस्यम् ॥ ३. ३. २३. ॥

## निविशः ॥ ३. ३. २४ ॥

**त० प्र०— निपूर्वाद् विशः कर्तर्यात्मनेपदं भवति । निविशते । न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वम् । मधुनि विशन्ति भ्रमरा इत्यादि [ इत्यादौ ] तु निविशोरसम्बन्धादनर्थकत्वाच्च न भवति ॥ २४ ॥**

**श० म० न्यासानुसन्धानम् – निविशः ।** नेर्विश्-निविश्, तस्मात् इति समस्तं पदम्, नीत्यविभक्तिकं षष्ठ्यन्तं पदम्, निसम्बन्धिनो 'विश्' धातोरिति तदर्थः, सम्बन्धश्च स्वद्योत्यार्थवाचित्वम्, समस्तत्वेऽपि तत्सम्बन्धस्वरूपान्तर्भाव एव, तथा च तुल्यवित्तिवेद्यतया धातुवाच्यक्रियाविशेषार्थद्योतकत्वं निपदे लभ्यते, तथाविधश्चोपसर्ग एव निरिति न्युपसृष्टविश्धातोः कर्त्तर्यात्मनेपदमिति फलितोऽर्थः, तत्फलं चाग्रे वक्ष्यति—**मधुनि विशन्ति भ्रमरा** इत्यादिना । उदाहरति—**निविशते** इति—निपूर्वाद् विशेर्वर्त्तमानाप्रथमपुरुषैकवचने रूपम्, तथा च **श्रीहर्षेण** प्रयुक्तं—

"निविशते यदि शूकशिखापदे, सृजति सा कियतीमिव न व्यथाम् ।" इति, अत्र केचित् 'निविशः' इति पदं लुप्तपञ्चम्या निर्दिष्टं पञ्चम्यन्तेन समस्तं वेति मत्वा निशब्दादव्यवहितपरादेव विश आत्मनेपदमिति न्यविशतेत्यत्र पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति मते, त्याद्युत्पत्तिविषयतायामेवाडागम इति सिद्धान्ते च पूर्वमडागमे पश्चात् त्याद्युत्पत्तिकालेऽटा व्यवधानान्निशब्दादव्यवहितपरत्वाभावादात्मनेपदं न स्यादिति शङ्कन्ते; तन्मतखण्डनायाह—**न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वमिति**— * यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते * इति न्यायेन धातोरागमोऽट् धात्वङ्गीभूत इति विश्ग्रहणेनैव तस्यापि ग्रहणमिति विशोऽन्यस्य मध्येऽसत्त्वान्न व्यवधायकत्वम् * स्वाङ्गमव्यवधायकम् * इति न्यायात् । ननु 'विश' इति विकरणविशिष्टस्याङ्गमट न तु केवलस्य धातोरिति धात्वङ्गत्वाभावात् तस्य व्यवधायकत्वं स्यादेवेति चेन्न– "अड् धातोरादिर्ह्यस्तन्यां चामाङ्गा" [ ४. ४. २९. ] इति सूत्रस्य विषयसप्तम्या व्याख्यानात् ह्यस्तन्यादिविषये विकरणात् पूर्वमेवाडागमे तस्य धातुमात्रावयवत्वाक्षतेः । एवं चैतदर्थं केचिद् वैयाकरणाः 'उपसर्गनियमे अड्व्यवधाने उपसंख्यानम्' इति वार्त्तिकं स्वीकुर्वन्ति, तदपि प्रत्युक्तम्, अत एव भाष्यकृदादिभिस्तादृशवार्त्तिकस्य चर्चाऽपि न कृता, न चैवमुदस्थादित्यत्र "उदः स्थास्तम्भः सः" [ १. ३. ४४. ] इति सस्य लुक् स्यात्, अटोऽव्यवधायकत्वेन उदोऽव्यवहितस्य 'स्था' इत्यस्य सस्य लोपस्य दुर्वारत्वादिति वाच्यम्, तत्रोदः परत्वं सकारस्येष्टं न तु स्थाधातोः, उदः परस्य स्थास्तम्भावयवस्य सस्य लुगिति सूत्रार्थस्वीकारात् सकारस्याटा व्यवधाने प्राप्त्यभावात्, अट् हि धातोरवयवो न तु सकारस्येति स्थाधातुं प्रति तस्याऽव्यवधायकत्वेऽपि सकारं प्रति व्यवधायकत्वानपायात् । **अन्ये** तु– * निर्दिश्यमानस्यादेशा भवन्ति * इति न्यायेनात्र सलुकं वारयन्ति, तेषामियं प्रक्रिया–"उदः स्था-स्तम्भः सः" [ १. ३. ४४. ] इति सूत्रे 'उदः' इत्येषा पञ्चमी 'स्थास्तम्भः' इति च षष्ठी, षष्ठीनिर्देशेन यदुच्यते तत् कार्यं निर्दिश्यमानस्य भवति * निर्दिश्यमानस्यादेशा भवन्ति * इति न्यायस्य तत्रोपस्थितेः, यत्र चायं न्याय उपतिष्ठते तत्र सप्तम्यन्त-पञ्चम्यन्तयोः षष्ठ्यन्तस्य च व्युत्पत्तिवैचित्र्येणाकाङ्क्षितोपतिष्ठमान - निर्दिश्यमानपदार्थेन तस्य चादेशपदार्थेन साक्षादन्वयो भवति, तथा चोदः परस्य स्था-स्तम्भावयवस्य लुगिति सूत्रार्थः सम्पद्यते, निर्दिश्यमानत्वं हि षष्ठीप्रकृतिशक्यत्वम्, 'यदागमाः०' इति न्यायगृहीतोऽर्थश्च न शक्योऽपि तु लाक्षणिक एवेति उदः परत्व स्थाशब्दस्यापीह न संभवति, किमुत सकारस्येति प्रकृते 'उदस्थात्' इत्यत्राट्सहितस्य स्थाशब्देनाग्रहणेन दोषोद्भावनं सर्वथाऽयुक्तमेवेति संक्षेपः । "निविशः" इति सूत्रस्य यथाकथंचिन्निशब्दात् पराद् विश आत्मनेपदमित्यर्थं वर्णयित्वा 'मधुनि विशन्ति भ्रमराः' इत्यादावात्मनेपदं कुतो नेत्याशङ्कन्ते, तदा शङ्काया अतितुच्छत्वेऽपि 'तुष्यतु दुर्जनः' इति न्यायेनोत्तरमाह–**मधुनि विशन्ति भ्रमरा इत्यादि तु निविशोरसम्बन्धादनर्थकत्वाच्च न भवती**ति– अत्र 'इत्यादि तु' इत्येतत्स्थाने 'इत्यादिषु' इति 'इत्यत्र तु' इति वा पाठ उचितः, प्रकृतपाठे च ईदृशः प्रयोग एव न भवतीत्यर्थः प्रतीयते, स चानुचित एव, तादृशप्रयोगस्यैवेष्टत्वाद् विपरीत[ आत्मनेपदविशिष्ट ]प्रयोगस्यैव वारणीयत्वात् ।

"Aho Shrutgyanam"

तथा चात्र निविशोः परस्परं सम्बन्धाभावो निशब्दस्यानर्थकत्वं च हेतुद्वयमात्मनेपदाप्रवृत्तौ कथितम्, नि-विशोः सम्बन्धश्च स्वद्योत्यार्थवाचित्वमेवेत्युक्तं पूर्वमिति प्रकृते मधुनीति पदावयवस्य निशब्दस्य न विश्धात्वर्थद्योतकत्वमिति न तद्द्योत्यार्थवाचित्वं विश इति न तयोः परस्पर सम्बन्धः, किञ्च नीति विशिष्टरूपस्योपादानम्, विशिष्टरूपोपादानविषये च * अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् * इति न्यायः प्रवर्त्तत इति प्रकृते मधुनीति पदावयवस्य निशब्दस्यानर्थकत्वेन तस्य प्रकृतसूत्रेऽग्रहणादपि नात्मनेपदप्राप्तिः, मधुनीति समुदायस्यैवार्थवत्त्वं न तु तदवयवस्य निशब्दस्य * समुदायो ह्यर्थवान् तस्यैकदेशोऽनर्थकः * इति न्यायात् । "इत्युक्त्वा मैथिलीं भर्तुरङ्के निविशतीं भयात् ।" इति वाल्मीकिप्रयोगे तु 'अङ्गानि विशतीं भयात्' इत्येव पाठः कल्पनीयो लेखकप्रमादात् भ्रष्ट इत्यास्थेयम् । केचित् तु पदसंस्कारपक्षे– अङ्के विशतीमिति पृथक् पृथक् संसाध्य पश्चादुपसर्गेणान्वये * जातः संस्कारो न निवर्त्तते * इति न्यायेन दोषाभाव इति समादधते, तन्न युक्तम्– एवं सति त्वं करोति, भवान् करोषीत्यादेरपि साधुत्वप्रसङ्गात् । तस्मादीदृशस्थले वाक्यसंस्कारपक्ष एव स्वीकरणीयो न तु पदसंस्कारपक्षः । किञ्च पदस्य पदान्तरसम्बन्धे तत्पक्षस्य रक्षकत्वेऽपि धातूपसर्गयोः सम्बन्धस्य चैकपदविषयत्वेन तत्र तत्पक्षेण निर्वाहासम्भवात् । संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसम्बन्धो भवतीति न्यायो हि नानिष्टप्रयोगापादनाय, तन्निर्वाहाय वा स्वीकृतोऽपि क्लिष्टस्थले क्वचित् सन्ध्यादिरूपसंस्काराभावस्य निर्वाहायैवेति न तेनेदृशप्रयोगसाधुत्वमास्थेयम् । ईदृशप्रयोगस्य प्रामाणिकत्वे च आर्षत्वादेव समाधानस्यौचित्यादिति ध्येयम् ॥ ३. ३. २४. ॥

## उपसर्गादस्योहो वा ॥ ३. ३. २५. ॥

**त० प्र०– 'उपसर्गात् पराभ्यामस्यत्यूहिभ्यां कर्तर्यात्मनेपदं वा भवति । विपर्यस्यति, विपर्यस्यते; समूहति, समूहते, "संततं तिमरमिन्दुरुदासे" [ म. घे ] । "यशः समूहन्निव दिग्विकीर्णम्" [ किराते ] । अस्येति श्यनिर्देशोऽस्त्यसतिनिवृत्त्यर्थः । उपसर्गादिति किम् ? अस्यति, ऊहते । अस्यतेरप्राप्ते ऊहतेश्च नित्यं प्राप्ते उभयत्र विभाषेयम् । अन्ये त्वकर्मकाभ्यामेवेच्छन्ति, प्रत्युदाहरन्ति च–निरस्यति शत्रून्, समूहते पदार्थान् ॥ २५ ॥**

**श० म० न्यासानुसन्धानम्–उपसर्गा० । उपसर्गादि**ति पञ्चमी **'अस्योहः'** इत्यस्य विशेषणभूतपरशब्दयोगे । केचित् तूपसर्गादिति पञ्चमी षष्ठ्यर्थे, तेनोपसर्गद्योत्यार्थवाचिभ्यामस्यत्यूहिभ्यामित्यर्थो भवतीति व्याचक्षते, तत्फलं चाडादिव्यवधानेऽपि सूत्रप्रवृत्तिरिति कथयन्ति, परं तु अटोऽव्यवधायकत्वयुक्तेः पूर्वसूत्रव्याख्यायामुक्तत्वेन तदर्थमीदृशक्लिष्टकल्पनाया अनावश्यकत्वमिति साधारणरीत्यैव सूत्रं व्याचष्टे– **उपसर्गात् पराभ्यामस्यत्यूहिभ्यामि**ति । उदाहरति– **विपर्यस्यति, विपर्यस्यते** इत्यादिना, 'विपरि' इत्युपसर्गद्वयात् परत्वसत्त्वेन परस्मैपदिनोऽस्यतेर्वर्त्तमानाया आत्मनेपदप्रथमपुरुषैकवचनम्, अस्यतेर्दैवादिकत्वेन श्यः । **समूहति, समूहते** इति– ऊह् धातोर्नित्यमात्मनेपदिनोऽनेन विकल्पेनात्मनेपदम् । उपसर्गयोगे परस्मैपदिनोऽस्मादात्मनेपदस्य प्रयोगं **माघ**कविप्रयोगेणानुमोदयति– "**सन्ततं तिमिरमिन्दुरुदासे**" इति, इत्थं च पूर्णं पद्यम्–

"लेखया विमलविद्रुमभासा
सन्ततं तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकभङ्गपिशङ्गया
मण्डलं भुव इवादिवराहः ॥" इति ।

चन्द्रोदयवर्णनमिदम्, "इन्दुः विमलविद्रुमभासा लेखया सन्ततं तिमिरमुदासे, कः केन किमिवेत्याह– आदिवराहः कनकभङ्गपिशङ्गया दंष्ट्रया भुवो मण्डलमिव" इत्यन्वयः । चन्द्रो विमलस्य निर्मलस्य, विद्रुमस्य– लतामणेरिव, भाः–कान्तिर्यस्यास्तादृश्या, लेखया– स्वकलया, सन्ततं सर्वतो व्याप्तं, तिमिरम्– अन्धकारम्, उदासे– उच्चिक्षेप । अत्रोपमागर्भं दृष्टान्तमाह– आदिवराहः सलिलमग्नायाः पृथिव्या उद्धाराय धृतवराहशरीरो विष्णुः, कनकभङ्गपिशङ्गया– सुवर्णशकलरक्तपीतया, दंष्ट्रया, भुवः– पृथिव्या मण्डलमिवेति तदर्थः । अत्र 'उदासे' इति अस्यतेरुत्पूर्वस्य परोक्षायाः प्रथमपुरुषैकवचने आत्मनेपदे रूपम् । एतेन च सकर्मकादपि भवत्यात्मनेपदमिति स्वमतमपि प्रमाणितं प्रकृते सकर्मकत्वस्य स्पष्टत्वात् । अस्यतिविषयं कविप्रयोगमुदाहृत्योहिविषयं तमुदाहरति– **यशःसमूहन्निव दिग्विकीर्णमि**ति, **भारविकवेः** किरातार्जुनीयमहाकाव्ये तृतीयसर्गे द्रौपदीवचनमिदम् । शत्रुविजयार्थं वेदव्यासदर्शितपथा तपश्चर्यायै इन्द्रनीलपर्वतं प्रति प्रतिष्ठमानमर्जुनमाह–

"व्रीडानतैराप्तजनोपनीतः,
संशय्य कृच्छ्रेण नृपः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां,
यशःसमूहन्निव दिग्विकीर्णम् ॥" इति ।

अग्रे वक्ष्यमाणेन–

"नवीकरिष्यत्युपशुष्यदार्द्रः
सत्त्वाद् विना मे हृदयं निकारः ।"

"Aho Shrutgyanam"

इति पद्यांशेन सम्बद्धमिदं **पद्यम्**। अस्य पद्यांशस्यायमर्थः– स निकारः, त्वद् विना, आर्द्रः सन्, उपशुष्यत् मे हृदयं नवीकरिष्यतीति, अयमाशयः– शत्रुभिरस्मासु यो निकारोऽपमानजनकव्यवहारः कृतः स सम्प्रति तव वियोगे सति पुनरार्द्रतां नूतनतां प्राप्तः सन्; उपशुष्यत्– दुःखेन पूर्वमार्द्रीभूतमपि कालव्यवधानात् तव सहवासाच्च शुष्कतामुपगतं मे हृदयं नवीकरिष्यति, पुनरार्द्रतां नेष्यति। किमर्थमयं तव विरह इति विचारे समायाते शत्रुभिराचरितस्यापकारस्योद्धारायैव त्वं गतोऽसीति बुद्ध्वा ते ते सर्वेऽपकाराः स्मृतिपथमागत्य मां पीडयिष्यन्तीति भावः। अत्र पद्यांशे निकार इति पदोपस्थापितस्यार्थस्य प्रकारवर्णनमेव प्रकृतपद्येन क्रियते–कीदृशो निकारस्तत्राह–"आप्तजनोपनीतः, व्रीडानतैर्नृपैः संशय्य कृच्छ्रेण प्रपन्नः, पृथिव्यां वितानभूतं विततं दिग्विकीर्णं [भवतां] यशःसमूहन्निव" इत्यन्वयः। आप्तेन– यथार्थवक्त्रा, जनेनोपनीतः– उपस्थापितः कथित इति यावत्, व्रीडया– ईदृशानां पाण्डवानामीदृशमशोभनं वृत्तं स्त्रीवस्त्रहरणादिकमभूदिति लज्जया, आनतैः– नम्रीकृतमुखैः, नृपैः– समानराजभिः, संशय्य– पूर्वमीदृशमसंभाव्यमिति संदिह्य, पश्चात् सर्वथा प्रमाणीकृते सति कृच्छ्रेण–कष्टेन, न त्वञ्जस्येनः प्रपन्नः–तथात्वेन स्वीकृतः पृथिव्यां–भुवि, वितानभूतम्–उल्लोचायितम्–अत एव विततं–सर्वतो विस्तृत, दिग्विकीर्णं, दिक्षु व्याप्त, भवतां, यशः– पराक्रमशालित्वादिजनितकीर्तिं, समूहन्निव प्रतिसंहरन्निव, असौ निकारः, मे हृदयं पुनर्नवीकरिष्यतीति सम्बन्धः। अत्र लघुन्यासे प्रदर्शितपाठे राजजनोपनीत इति पठ्यते 'राजजनोपनीत' इत्यस्य स्थाने, परं साम्प्रतमुपलभ्यमानेषु मुद्रणेषु 'आप्तजनोपनीत' इत्येष एव पाठः समुपलभ्यते, अर्थदृष्ट्या चायमेव पाठः समुचित इति विचार्य स्थापितः, राजपुरुषोपनीतवृत्तापेक्षयाऽऽप्तपुरुषोपनीतवृत्तस्याधिकप्रामाणिकत्वप्रतीतेः. तादृशत्वप्रतीतिश्च प्रकृते आश्चर्यपरिपोषिका विशेषेणेति विज्ञेयम्। अत्र च समित्युपसर्गपूर्वकादूहेरात्मनेपदिनो विकल्पेन तद्विधानात् परस्मैपदे शतरि सति समूहन्निति रूपसिद्धिः।

ननु लाघवाद् 'असोहो' इत्येव पठनीयं, विकरणविशिष्टपाठः किमर्थं इति चेदत्राह– **अस्येति श्यनिर्देशोऽस्यसति निवृत्त्यर्थः** इति, अयमाशयः– असिति सामान्यनिर्देशे असरूपाणां त्रयाणामपि ग्रहणं स्यात्, तत्रैकोऽस्– "असक् भुवि" इति पठितोऽदादौ, परश्च अस्-गतिदीप्त्यादानेषु भ्वादिपठितः, तृतीयश्च क्षेपणार्थो दिवादिपठितः, तत्र दिवादेरेव ग्रहणं स्यात्, न तु भ्वाद्यदादिपठितयोरित्येतदर्थमिह श्यनिर्देशः कृत इति भावः। प्रकृतसूत्रस्योभयत्र विभाषात्वं प्रकटयति–**अस्यतेरप्राप्तेरिति**–अस्यतेः परस्मैपदित्वेन तत आत्मनेपदमप्राप्तमेवेति तदंशे पूर्वं विधिरेव, पश्चात् विहितस्य पाक्षिकोऽभावोऽनुशिष्यते, ऊहेश्चात्मनेपदित्वेन तस्मान्नित्यं प्राप्ते च पाक्षिकोऽभावो विधीयत इत्यस्यतिविषयेऽप्राप्तविभाषा, ऊहिविषये च प्राप्तविभाषेत्युभयत्र विभाषात्वमस्य। मतान्तरमाह–**अन्ये त्विति**–केचिद् वैयाकरणाः प्रकृतसूत्रेऽकर्मकादिति पद सम्बध्नन्ति। पाणिनीये भाष्ये चाकर्मकादित्यस्य निवृत्तिरुक्ता पूर्वप्रदर्शितकविप्रयोगाभ्यामपि सकर्मकादात्मनेपदं प्रमाणितमिति, नैतन्मतं विशेषतः समादरमर्हति, तथापि तत्स्वरूपप्रदर्शनमात्रायेह तन्मतमुपन्यस्तम्। तेषां मते प्रत्युदाहरणस्वरूपमस्याह– **निरस्यति शत्रूनिति**– अत्र परस्मैपदमेव भवति नात्मनेपदमिति तेषामाशयः। आत्मनेपदस्य वैकल्पिकत्वेन प्रकृतप्रयोगोपपत्तौ पूर्वोक्तकविप्रयोगादिसमन्वयायाकर्मकग्रहणमिह न कृतमिति स्वाशयः। **समूहते पदार्थानिति** च नित्यमेवात्मनेपदमिति। अतिप्रसङ्गस्त्वनभिधानादुभयमते वारणीय इत्यलम्॥ ३. ३. २५.॥

## उत्-स्वराद् युजेरयज्ञ-तत्पात्रे॥ ३. २. २६॥

**त० प्र०– उदः स्वरान्ताच्चोपसर्गात् पराद् युनक्तेः कर्तर्यात्मनेपदं भवति, अयज्ञतत्पात्रे–न चेद् यज्ञे यत् तत्पात्रे तद्विषयो युज्यर्थो भवति। उद्युङ्क्ते, उपयुङ्क्ते, नियुङ्क्ते। उत्-स्वरादिति किम्? संयुनक्ति निर्युनक्ति। अयज्ञ-तत्पात्र इति किम्? द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। यत्र तु यज्ञ एव न तु तत्पात्रम्, तत्पात्रमेव वा न यज्ञस्तत्र भवत्येव यज्ञे मन्त्रं रन्धनपात्राणि वा प्रयुङ्क्ते, यज्ञपात्राणि रन्धने प्रयुङ्क्ते। "युजिच् समाधौ" इत्यस्येदित्वादात्मनेपदविधानमनर्थकम्॥ २६॥**

**श० म० न्यासानुसन्धानम्–उत्स्वरा०।** **उदिति** पृथगुपसर्गस्वरूपम्, **स्वरादिति** च तदन्तविधिना स्वरान्तपरम्, तदन्तविधिश्च "विशेषणमन्तः" [७. ४. ११३.] इति परिभाषणात्, विशेष्यं च पूर्वसूत्रादनुवृत्तमुपसर्गादिति पदम्, तथा च योऽर्थः सम्पन्नस्तमाह– **उदः स्वरान्ताच्चोपसर्गादिति**। सूत्रे युजेरिति युज्यतेः युनक्तेश्च [युजिच् समाधौ" दिवादिः, "युजूंपी योगे" रुधादिः, इत्यनयोः] सामान्यनिर्देशे सत्यपि युज्यतेर्नित्यात्मनेपदित्वेन ततस्तद्विधानस्यानर्थक्यमिति युनक्तेरेवायं विधिरित्याशयवानाह– **युनक्तेरिति**, तस्यापीदित्वेन यद्यपि फलवत्कर्त्तरि "ईगितः" [३. ३. ९५.] इत्यात्मनेपदं सिद्धमेवेत्य-

"Aho Shrutgyanam"

फलवत्यपि कर्त्तरि तद्विधानार्थं सूत्रम् । **अयज्ञतत्पात्रे** इति पदं व्याचष्टे- **न चेद् यज्ञे यत् तत्पात्रमि**ति, एतेन यज्ञभिन्ने कार्ये यज्ञीयपात्रप्रयोगे, यज्ञे वाऽयज्ञीयपात्रप्रयोगे निषेधाप्रवृत्तिरिति सूचितं, तत् स्पष्टयिष्यति प्रत्युदाहरणेन उदाहरति-**उद्युङ्क्ते, उपयुङ्क्ते, नियुङ्क्ते,** इति- उदिति च स्वरान्तभिन्नमिति तदर्थं पृथगेव तदुपादानमिति तत्पूर्वकाद् युनक्तेरात्मनेपदमेव भवति फलवत्यफलवति च कर्त्तरि, उपयुङ्क्ते, नियुङ्क्ते इति च स्वरान्तोपसर्गात् परत्वेनात्मनेपदम् । **उत्-स्वरादिति किमि**ति, अयमाशय - एवं कृते प्रायो बहून मुपसर्गाणां संग्रहो जात एवेति व्यर्थमेवैतदुपादानं व्यावर्त्याभावादिति । बहूनां स्वरान्तत्वेऽपि समो निरो दुरो निसो दुसश्चोपसर्गाणां व्यावर्त्तनाय उत्स्वरादित्यावश्यकमित्याह प्रत्युदाहरणेन- **संयुनक्ति, निर्युनक्ती**ति-निरिति निर्-निसोः सामान्येन प्रयोगः, दुर्युनक्तीत्यपि प्रत्युदाहरणं संभाव्यते । इह फलवत्यपि कर्त्तरि नात्मनेपदम्, प्रकृतसूत्रस्य नियामकत्वात्, नियमाकारश्च- उत्स्वरादेवोपसर्गाद् युजेरात्मनेपदं नान्यत्रेति प्रत्युदाहर्तुमाह-**अयज्ञ-तत्पात्र इति किमि**ति- अविशेषेण सर्वत्र उत्स्वरादुपसर्गादात्मनेपदं विधीयतामिति शङ्कितुराशयः । यज्ञे तत्पात्रप्रयोगे न विधानमिष्यत इति तद्वारणाय तदावश्यकमिति प्रत्युदाहरणमुखेनाह- **द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति** द्वन्द्वमित्यस्य द्विशः, इत्यर्थः यज्ञे पात्राणां द्विशः प्रयोगः क्रियत इति प्रसिद्धेर्यज्ञ एवायं यज्ञपात्रप्रयोग इति नात्रात्मनेपदं भवति फलवत्यपि कर्त्तरि, 'अयज्ञ-तत्पात्रे' इत्यस्याभावे चात्रापि स्यादिति तद्वारणाय तदावश्यकमिति भावः । न चेद् यज्ञे यत् तत्पात्रं तद्विषयो युज्यर्थो भवतीति यद् व्याख्यातं तस्याशयमिह स्फोरयति- **यत्र तु यज्ञ एव न तु तत्पात्रं, [यत्र] तत्पात्रमेव वा न यज्ञस्तत्र भवत्येवे**ति, अयमाशयः- एकसत्त्वे द्वयं नास्तीति तार्किकसरण्यं यज्ञसत्त्वेऽपि यज्ञीयपात्राभावे न यज्ञ-तत्पात्रप्रयोगः, यत्र वा तत्पात्रमेव न यज्ञस्तत्राऽपि न यज्ञतत्पात्रप्रयोग इत्येकसत्त्वेऽप्युभयाभावात् प्रकृतनिषेधो न प्रवर्त्तते । तथा प्रयोगस्थलं दर्शयति- **यज्ञे मन्त्रं रन्धनपात्राणि वा प्रयुङ्क्ते** इति- अत्र यज्ञीयविषयतायां सत्यामपि यज्ञीयपात्रप्रयोगो नास्त्यपि तु मन्त्रप्रयोगो रन्धनपात्रप्रयोगो वेति न भवति निषेध इति भवत्येवात्मनेपदम् । इत्थं यज्ञसत्त्वे यज्ञीयपात्राभावप्रयुक्तनिषेधाप्रवृत्तिमुदाहृत्य यज्ञपात्रसत्त्वेऽपि यज्ञविषयत्वाभावप्रयुक्तां निषेधाप्रवृत्तिमुदाहरति- **यज्ञपात्राणि रन्धने प्रयुङ्क्ते** इति- तथा चात्राप्युभयाभाव इति न भवति निषेधप्रवृत्तिरिति भवत्येवात्मनेपदम् । युजेरिति सामान्यनिर्देशे युज्यतेरपीह ग्रहणमुचितमित्याशङ्कापनोदायाह- **"युजिच् समाधौ" इत्यस्येदित्त्वादात्मनेपदविधानमनर्थकमि**ति, अयमाशयः- तस्येदित्त्वेन "इङितः कर्त्तरि" [ ३. ३. २१. ] इति सूत्रेणात्मनेपदमेव भवतीति प्राप्ते विधानस्यानर्थक्येन नेह तद्ग्रहणमिष्टमिति । न च प्राप्ते विधिर्नियमार्थ इति वाच्यम्, पाक्षिकप्राप्तावेव नियमार्थत्वस्य संमतेः अप्राप्ते हि शास्त्रकारशैल्या प्राप्ते विधानस्य नर्थकत्वमेव । एवं चायज्ञतत्पात्रविषय एवास्यात्मनेपदमिति नियमार्थमेव युज्यतेरपीह ग्रहणमित्यपि परास्तम्, यज्ञपात्रविषयेऽस्य प्रयोगाभावात्, कथञ्चित्प्रयोगोपपादनेऽपि विधि-नियमयोर्विधिरेव ज्यायानिति भाष्यकारादिसम्मतसिद्धान्तेनास्य 'सूत्रस्य विधित्वमेवोचितम् । किञ्चास्य युज्यतेर्नित्यमात्मनेपदित्वेन यज्ञतत्पात्रविषयेऽप्यात्मनेपदप्रयोगस्य दुर्वारत्वमेवेति ॥ ३. ३. २६ ॥

## परिव्यवात् क्रियः ॥ ३. ३. २७ ॥

**त० प्र०- 'परि वि अव' इत्येतेभ्य उपसर्गेभ्यः पराक्रीणातेः कर्तर्यात्मनेपदं भवति । पराक्रीणीते, विक्रीणीते, अवक्रीणीते; सर्वत्रेगितः फलवतोऽन्यत्र विधिः । उपसर्गादित्येव-उपरि क्रीणाति, गवि क्रीणाति, वनं बहुविक्रीणाति, अपचावः, क्रीणीवः । 'क्री' इत्यनुकरणमनुकार्येनार्थेनार्थवदिति नामत्वे सति ततः स्यादयः, *प्रकृतिवदनुकरणम्* इति न्यायाच्च धातुकार्यमियादेशः । अत एव च ज्ञापकात्-प्रकृतिवदनुकरणे कार्यं भवति, तेन 'मुनी इत्याह' द्विष्पचतीत्याह इत्यादौ प्रकृतिभाव-षत्वविकल्पादि सिद्धं भवति ॥ २७ ॥**

**श०म० न्यासानुसन्धानम्-परिव्य० । परिव्यवादि**ति पूर्वसूत्रादनुवृत्तेनोपसर्गादित्यनेन सम्बध्यते, एष च समाहारनिर्देश इति विभज्याख्याने बहुत्वमायातीत्याह- **इत्येतेभ्य उपसर्गेभ्यः** इति । **क्रीणातेरि**ति- "डुक्रींग्श् द्रव्यविनिमये" इत्येवं पठिताद् धातोरित्यर्थः । **परिक्रीणीते** इति-परिपूर्वकात् क्रीणातेरात्मनेपदम्, परिक्रयणं च नियतकालं भृत्या स्वीकरणं, तत् कुरुत इत्यर्थः **विक्रीणीते** इति- नियतमूल्येन स्वकीयं द्रव्यमन्यस्मै प्रयच्छतीत्यर्थः । **अवक्रीणीते** इति- समुचितमूल्यादल्पमूल्येन द्रव्यविनिमयं करोतीत्यर्थः । ननु क्रीणातेर्गित्त्वेन "ईगितः" [ ३. ३. ९५. ] इत्यात्मनेपदं सिद्धमेवेति किमर्थं तत इदमात्मनेपदं पुनर्विधीयत इत्याशङ्कायामाह- **सर्वत्रेगितः फलवतोऽन्यत्र विधिरि**ति- यत्र यत्रैतत्प्रकरणे ईगित आत्मनेपदं वि धीयते

"Aho Shrutgyanam"

तत्र सर्वत्र फलवतः कर्तुरन्यत्राफलवत्यपि कर्तर्यात्मनेपदविधानमिति विज्ञेयमिति भावः । अप्राप्ते एव शास्त्रस्यार्थवत्त्वेन फलवति तेनैव प्राप्तेः परिशेषादफलवत्यपि कर्तर्यात्मनेपदं यथा स्यादित्येतदर्थत्वमेव सूत्रस्यायातीति तत्त्वम् । उपसर्गादिति पदस्य सम्बन्ध आवश्यक एवेत्याह– **उपसर्गादित्येवेति,** तत्फलमाह– **उपरि क्रीणातीत्यत्र** परिशब्दात्, परत्वे, **गवि क्रीणाति, बहुवि क्रीणाति** इत्यनयोर्विशब्दात् परत्वे, **अपचाव क्रीणीवः** इत्यत्रावशब्दात् परत्वेऽपि च न भवत्यात्मनेपदम्; उपरि क्रीणातीत्यत्र हि 'उपरि' इत्यव्ययावयवः परिः, गवि क्रीणातीत्यत्र च सप्तम्यन्तगोशब्दावयवो विः, 'बहुवि' इत्यत्र च वनविशेषणीभूतबहुपक्षिवाचकबहुविशब्दावयवो विः, अपचाव इत्यत्र च ह्यस्तन्या उत्तमपुरुषद्विवचनान्तक्रियाऽवयवोऽव इति क्वाप्युपसर्गत्वं नास्तीति न भवत्यात्मनेपदम् । यद्यप्येषु * अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् * इति परिभाषया [ न्यायेन वा ]ऽपि इष्टसिद्धिरस्ति, तथापि उपसर्गादित्यस्य सम्बन्धो न्यायप्राप्त एव तेनैवेष्टसिद्धौ न्यायालम्बनस्यावश्यकत्व नेति बोधयितुमित्थमुक्तम् । किञ्च बहुवि क्रीणातीत्यत्र विशब्दस्यार्थवत्त्वमप्यस्त्येवेति न तेन न्यायेन वारणं संभाव्यत इत्यपि विज्ञेयम् । न च तत्रापि बहुव्रीह्यन्तर्गतस्य विशब्दस्यानर्थकत्वमेव "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" इत्येकार्थीभाववादिमते तदेकदेशस्य विशब्दस्य पृथगर्थत्वाभावादिति वाच्यम्, जहत्स्वार्थावृत्तिपक्षे प्रकृतसमुदायमात्रशक्तेः स्वीकारेऽप्यजहत्स्वार्थावृत्तिपक्षे प्रत्येकपदस्याप्यर्थवत्त्वानपायात् । **क्रियः** इति स्याद्यन्तनिर्देशः, स्यादिप्रत्ययश्च नाम्नो विधीयते, 'क्री' इति च धातुः, धातोर्नाम संज्ञा च "अधातुविभक्तिवाक्यमर्थवन्नाम" [१.१.२७.] इति सूत्रे पर्युदस्तेति कथमयं निर्देशः सङ्गच्छत इति चेदत्राह– **'क्री' इत्यनुकरणमनुकार्येणार्थेनार्थवदिति नामत्वे ततः स्यादयः** इति, अयमाशयः – नात्र 'क्री' इति धातुस्तदर्थबोधनायाप्रयोगात्, किन्तु तस्य धातोः स्वरूपानुकरणमिदम्, अनुकरण चानुकार्यस्वरूपबोधकमिति तेन [ अनुकार्यस्वरूपबोधकत्वेन ] तस्यार्थवत्त्वमस्तीति धातुभिन्नस्यार्थवतोऽस्य नामसंज्ञासिद्धौ ततः स्यादिविभक्तिः सुलभेति । ननु यदि नाय धातुः किन्तु तस्यानुकरणभूतोऽन्य एव शब्दस्तर्हि क्रिय इत्यत्र "धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये" [२.१.५०.] इतीयादेशः कथ तत्र हि धातोरिवर्णस्येति स्पष्टमुक्त्वादिति चेदत्राह– **प्रकृतिवदनुकरणमिति न्यायात्तु धातुकार्यमियादेशः** इति-अयमाशयः– अनुकरणं न सर्वथाप्रकृतिभिन्नमेव, क्वचित् कार्ये प्रकृतिवदपि भवति, ततश्च प्रकृतेरनुकार्यस्य धातुत्वं तत्र सुलभमिति धातुकार्यं तत्र सुलभमितीयादेशो भवति, प्रकृते च वत्करणादस्यातिदेशत्वम्, अतिदेशश्चेष्टसिद्ध्यर्थ एव भवति, नानिष्टापादनार्थं इति तस्य धातुत्वप्रयुक्तं त्याद्युत्पत्तिकार्यं, नामसंज्ञायां पर्युदासश्च न भवति । ननु प्रकृतिवदनुकरणमिति न्यायोऽयं वाचनिकार्थो वेति निर्णयाभावे कथं प्रामाण्यमर्हतीति चेदत्राह– **अत एव च ज्ञापकात् प्रकृतिवदनुकरणे कार्यं भवतीति,** अयमाशयः– किञ्चित् कार्यं शास्त्रकारैः कण्ठतोऽनुक्तमपि तदीयाचारेण विज्ञेयं भवति, तथा च प्रकृतसूत्रे क्रिय इति निर्देशो दृश्यते, तत्र च नामत्वेन धातुत्वाभावोऽपि विज्ञायते, अथ च तत्र धातुत्वप्रयुक्तं कार्यमियादेशोऽपि दृश्यत इति विना तस्य प्रकृतिवद्भावेनानुपपद्यमानं सत् 'येन विना यदनुपपन्नं तेन तदाक्षिप्यते' इति न्यायेन प्रकृतिवदनुकरणे कार्यं भवतीति वचनमाक्षिपत्येवेति प्रकृतनिर्देश एव तज्ज्ञापक इति स्वीकरणीयम् । ननु न केवलं स्वोपपत्तये एव ज्ञापनमुचितं, ज्ञापितस्यार्थस्यान्यत्र फलाभावे ज्ञापनानौचित्यादिति चेत्? बहुशो लौकिकप्रयोगसिद्धिरेव तत्फलमित्याह– **तेन-मुनी इत्याह, द्विष्पचतीत्याहेत्यादौ प्रकृतिभाव-षत्वविकल्पादि सिद्धं भवतीति,** अयमाशयः– 'मुनी' इति मुनिशब्दस्य प्रथम-द्वितीयाविभक्त्योर्द्विवचने रूपमिति तस्य "ईदूदेद् द्विवचनम्" [१.२.३४.] इति सूत्रेण स्वरे परेऽसन्धिर्भवति, प्रकृते च न तत् 'मुनी' इति पदमपि तु तदनुकरणमिति तस्य वस्तुतो द्विवचनान्तत्वाभावेऽपि द्विवचनान्तानुकरणत्वेन तस्य च प्रकृतन्यायेन प्रकृतिवद्भावे सति प्रकृतिकार्यमसन्धिर्भवति । एवं द्विष्पचतीत्यत्र द्विरिति सुजन्तम्, तस्य पचतीति पदादिपकारे परे "सुचो वा" [२.३.१०.] इति षत्व वा भवति, प्रकृते च न तत् सुजन्तं द्विरिति पदमपि तु केनचिदुक्तस्य तस्यानुकरणम्, तस्य च स्वतस्तत्त्वाभावेऽपि प्रकृतन्यायेन प्रकृतिकार्यातिदेशे वैकल्पिक षत्वं भवति । एवं च सफलमिद ज्ञापनमिति प्रकृतन्यायेन प्रकृतनिर्देशः सिद्ध इति ॥ ३.३.२७.॥

## परा-वेर्जे ॥ ३.३.२८ ॥

**त० प्र०– 'परावि' इत्येताभ्यामुपसर्गाभ्यां पराज्जयतेः कर्तर्यात्मनेपदं भवति । पराजयते, विजयते । उपसर्गादित्येव- सेना पराजयति, बहु विजयति वनम् ॥२८॥**

**श० म० न्यासानुसन्धानम्–परा० ।** अत्र यद्यपि पूर्वसूत्रोक्तरीत्या 'जियः' इति निर्देशो युक्तः, प्रकृतिवदनु-

"Aho Shrutgyanam"

करणमित्यतिदेशात् तस्य धातुकार्ये प्राप्ते इयादेशस्यौचित्यात्, तथाप्यातिदेशस्येष्टसिद्धयर्थत्वादिह तदप्रवृत्तिरिति बोध्यम्। 'परा वि' इत्यनयोर्यदि समाहारद्वन्द्वस्तर्हि तस्य नपुंसकत्वेन 'परा-विन.' इत्युचितम्, अथ चेतरेतरयोगद्वन्द्वस्तर्हि परा-विभ्यामित्युचितमिति परावे:' इति निर्देशः कथमुपपद्यत इति चेत्? सूत्राणां छन्दोवद्भावस्य सर्वसम्मतत्वेन छन्दसि दृष्टानुविधानात् सौत्रनिर्देशोऽयमिति सन्तोष्टव्यम्। उदाहरति- **पराजयते, विजयते** इति- 'परा' इत्युपसर्गपूर्वात् जयतेरात्मनेपदे वर्त्तमानाप्रथमपुरुषैकवचने रूपं-'पराजयते, अभिभूतो भवतीति प्रयोगार्थः, 'विजयते' इत्यत्र विपूर्वकाज्जयतेरात्मनेपदम्, अभिभवं करोतीत्यर्थः, उपसर्गमहिम्ना धातोरर्थे भेदः। **उपसर्गादित्येवे**ति- पूर्वसूत्रे उपसर्गादिति पदमुच्चारितमिहापि सम्बन्धनीयमेवेति भावः।

**अन्ये** चात्र प्रकरणे उपसर्गादिति पदं न पठन्ति, अर्थवद्ग्रहणपरिभाषया क्वचित्, क्वचिच्च साहचर्यन्यायेन- *सहचरिताऽसहचरितयोः सहचरितस्यैव ग्रहणम्* इति न्यायेनार्थं साधयन्ति। तत्रार्थवद्ग्रहणन्यायेनेह न निर्वाहः 'सेना परा जयति' इत्यत्र पराशब्दस्याप्यर्थवत्त्वानपायात्, 'वनं बहुवि जयति' इत्यत्र च जहत्स्वार्थावृत्तिरिति पक्षेऽर्थवत्त्वाभावेन तेन न्यायेन सिद्धावप्यजहत्स्वार्थावृत्तिरिति पक्षे सहचरितन्यायेनैव निर्वाहः, स्वातन्त्र्येण विशब्दस्य जयत्यव्यवहितपूर्ववृत्तित्वासंभवेनोपसर्गस्यैव तत्पूर्ववृत्तित्वमित्युपसर्ग एव विरिह ग्रहीष्यते, तत्साहचर्याच्च पराशब्दोऽप्युपसर्ग एव ग्रहीष्यते। न च विशब्दस्य सम्बोधने 'वे' जयसि' इति प्रयोगे * एकदेशविकृतमनन्यवत् * इति न्यायेन तस्य विशब्दत्वाद् भवति जयति- पूर्ववृत्तित्वमिति न विशब्दोऽपि दृष्टापचाराभाव इति तत्साहचर्येण पराशब्दस्योपसर्गस्यैव ग्रहणमित्येषोऽर्थो लभ्यत इति कथं तेषामुपसर्गार्थलाभ इति वाच्यम्, 'वे' इति रूपं हि न विशब्दस्य विकारोऽपि तु 'वि+सि' इति सम्बोधनविभक्त्यन्तस्येति तत्रैकदेशविकृतन्यायेन न विशब्दत्वमपि तु 'विशब्दत्वमेव, तत्र विभक्त्या व्यवधानेन तस्य जयत्यव्यवहितपूर्ववृत्तित्वाभावात् तथा च विशब्दोऽदृष्टापचार एवोपसर्गत्वे इति तत्साचर्येणोपसर्ग एव पराशब्दोऽत्र ग्रहीष्यत इति निर्णीतं "त्रि-पराभ्यां जेः" [पा. सू. १. ३. १७.] इति सूत्रे भाष्ये।

स्वमते चोपसर्गादित्यस्य सम्बन्धः सुकर एवेति नेदृशन्यायाश्रयणावश्यकतेति व्याख्यानाद् वरं करणमिति रीत्योपसर्गादित्यस्य सार्थक्यम्। तथा च तत्फलमाह- **सेना पराजयती**ति- परा- अन्या उत्कृष्टा वा, सेना, जयति - परपक्षमभिभवतीत्यर्थः, अत्र च पराशब्दो नोपसर्गोऽपि तु परशब्दस्य स्त्रीलिङ्गे रूपमिदमिति न भवत्यात्मनेपदम्। एवं- **बहुवि जयति वनमि**त्यत्र बहवो वयः - पक्षिणो यस्मिँस्तादृशं वनं जयतीत्यर्थे 'बहुवि' इति समुदायावयवो विनोपसर्ग इति न तस्मात् परत्वे जयतेरात्मनेपदमित्युपसर्गादित्यस्य सम्बन्धे फलम्, तदसम्बन्धे चात्मनेपद **प्रवृत्तिरनिष्टा स्यादि**ति ॥ ३. ३ २८. ॥

## समः क्ष्णोः ॥ ३. ३. २९. ॥

**त० प्र०- समः परात् क्ष्णोतेः कर्तर्यात्मनेपदं भवति। संक्ष्णुते शस्त्रम्। सम इति किम्? क्ष्णौति। उपसर्गादित्येव- आयसं क्ष्णौति ॥ २९ ॥**

**श० म० न्यासानुसन्धानम् - सम०।** अत्रापि **क्ष्णोरि**ति निर्देशः *प्रकृतिवदनुकरणम्* इति न्यायस्यानित्यतापक्षे एव, अन्यथा धातुत्वादुवादेशे - 'क्ष्णुवः' इति प्रयोगः स्यात्। नन्वग्रे पठ्यमाने "समो गमृच्छि - प्रच्छि - श्रु-वित्-स्वरत्यर्त्ति-दृशः" [ ३. ३. ८४. ] इति सूत्र एव क्ष्णुवोऽपि पाठः क्रियतां किमनेन पृथक् सूत्रेणेति चेन्न - तत्र सूत्रे "अनोः" कर्मण्यसति [ ३ ३. ८० ] इति सूत्रात् कर्मण्यसतीति पदमनुवर्त्तत इति कर्माप्रयोग एव सम्पूर्वकात् क्ष्णौतेरप्यात्मनेपदं स्यादिष्यते तु सकर्मकादपीति पृथक् त्वारम्भस्यावश्यकत्वात् **समः** इति पञ्चम्यन्तमुपसर्गादित्यनुवृत्तस्य विशेषणम्, क्ष्णोरित्यपि पञ्चम्यन्तमेव, तथा च सूत्रार्थमाह - **समः परादि**ति। **संक्ष्णुते शस्त्रम्** इति- संपूर्वकात् "क्ष्णुक् तेजने" इत्यादादिकादात्मनेपदम्, शस्त्रं तेजयति शितीकरोतीत्यर्थः, सकर्मकाद् भवतीति प्रतिपादनार्थमेव कर्मप्रयोगः। **सम इति किमि**ति - सामान्यत एव क्ष्णौतेरात्मनेपदं विधीयतामिति शङ्कार्थः। तथा सति परस्मैपदिनोऽस्य सर्वत्रात्मनेपदमेव स्यात्, तच्चानिष्टमित्याह- **क्ष्णौती**ति प्रत्युदाहरणेन, तथा चात्रात्मनेपदवारणाय समित्यावश्यकमिति भावः। उपसर्गादित्यस्य सम्बन्ध आवश्यक इत्याह - **उपसर्गादित्यवे**ति। व्यावर्त्त्यमाह - **आयसं क्ष्णौती**ति - अयसा निर्मितमस्त्रमायसं तत् क्ष्णौति- तेजयतीत्यर्थः, अत्र आयसमिति स्याद्यन्तावयवं 'सं' शब्दमादाय ततः परत्वे सति मा भूदात्मनेपदमित्येवोपसर्गादित्यस्य व्यावर्त्त्यमित्यर्थः। परेऽत्रार्थवद्ग्रहणपरिभाषया दोषं वारयन्ति, स्वमते च सूत्रस्थपदेनैव तद्वारणसंभवे न्यायाश्रयणमनावश्यकमिति ध्वनितम् ॥ ३. ३. २९. ॥

## अपस्किरः ॥ ३. ३. ३०. ॥

**त० प्र० - अपपूर्वात् किरतेः सस्सट्कात् कर्तर्यात्मनेपदं भवति। अपस्किरते वृषभो हृष्टः, अपस्किरते**

"Aho Shrutgyanam"

**कुक्कुटो भक्ष्यार्थी, अपस्किरते श्वा आश्रयार्थी "अपाच्चतुष्पात्-पक्षि-शुनि हृष्टान्नाऽऽश्रयार्थे" [४. ४. ९६] इति स्सट् । सस्सट्कनिर्देशादिह न भवति- अपकिरति वृषभः । अपेति किम् ? उपस्किरति ॥ ३० ॥**

**श० म० न्यासानुसन्धानम्- अप० । अप** इति पञ्चमीकं, पञ्चम्यन्तेन समासो वा, न च समासे सति तस्य [समस्तस्यापशब्दस्य] उपसर्गादित्यनेन सम्बन्धो न स्यात्, तेनाकाङ्क्षितस्यास्यासमर्थत्वात्, साकाङ्क्षमसमर्थवदिति सिद्धान्तादिति चेन्न- तत्सम्बन्धाभावेऽपि धातुसमभिव्याहारादेवोपसर्गत्वविज्ञानात् । **स्किर** इति ससट्कनिर्देशः, तत्फलमग्रे वक्ष्यत्येव । "कॄत् विक्षेपे" इति तुदादिपठितस्य "अपाच्चतुष्पात् पक्षिशुनि हृष्टाऽन्नाश्रयार्थे" [४. ४. ९५.] इति सूत्रेण विहितस्सडागमसहितस्य स्किर इति निर्देशः; तदाह- **अपपूर्वात् किरतेः सस्सट्कात् कर्त्तर्यात्मनेपदमिति । अपस्किरते वृषभो हृष्टः** इति- अपपूर्वकस्य किरतेः पूर्वम् "अपाच्चतुष्पात्" [४. ४. ९५.] इति स्सटि कृते सत्यनेनात्मनेपदम्, हृष्टः भोजनादिसुहितो वृषभः, अपास्किरते- उत्खातकेलिं करोतीत्यर्थः, वृषभस्यायं स्वभावो यत् यदाऽसौ भोजनादिना तृप्तो विचरति तदा तटादिभूमिं प्राप्य शृङ्गाभ्यां तामुत्खनति, तद्धूलिं चोपरि विकिरिति, तेन च तदीयहर्षोऽवगम्यते, स च हर्षो विस्मयमूलक इति "हृषेः केश-लोम-विस्मय-प्रतिघाते" [४.४.७६.] इति क्तयोरिड्विकल्पेन हृष्ट इति रूपम् । केचित् त्वेनं हृष्टधातुमूदितं मन्यन्ते, तन्मते च तस्य 'ऊदितो वा' [४. ४. ४२.] इति वेट्त्वेन क्तयोः "वेटोऽपतः" [४. ४. ६२] इति इण्निषेधेऽपीदं रूपं साध्वेव । केचिच्च हृष्टिरस्यास्तीत्यर्थे हृष्टिशब्दात् मत्वर्थीयमभ्रादिनिबन्धमच्प्रत्ययं विधाय रूपमिदं साधयन्ति । **अपस्किरते कुक्कुटो भक्ष्यार्थी** अपपूर्वकस्य किरतेरन्नार्थे पूर्वोक्तसूत्रेण स्सडागमः, कृतस्सडागमाच्चानेनात्मनेपदम्, स्वकीयं भक्ष्यमन्विष्यन् कुक्कुटस्तृणादिकं पादेनोत्क्षिपति परितो वा विकिरिति तत्रेदमुदाहरणम् । **अपस्किरते श्वा आश्रयार्थीति**- अत्रापि पूर्ववदेवापात् परस्य किरतेराश्रयार्थे स्सट् ततोऽनेनात्मनेपदम्, शयनोपवेशनस्थानं निर्मिमाणः श्वा भूमिं पद्भ्यां खनति, खनंश्च मृत्तिकादिकं परितो विकिरतीति तत्स्वभावस्तद्विषयमेवेदमुदाहरणम् । स्सट्सहितनिर्देशस्य फलमाख्यास्यन् पूर्वं स्सड्विधायकसूत्रमाह- **अपाच्चतुष्पादिति** । ननु किरतिर्विक्षेपवचनस्सौत्रादिकः, तत्प्रयोगे हर्षादिप्रतीतिः कथमिति चेदित्थम्- हर्षादयो नेह धातुवाच्यत्वेन निर्दिष्टा अपि तु तादृशे कर्त्तरि- हृष्टे अन्नार्थिनि आश्रयार्थिनि च कर्त्तरि सति स्सट् भवतीति निमित्तकोटौ निक्षिप्ताः, तत्र धात्वर्थस्य विक्षेपस्य च कार्यकारणभावसम्बन्धेनान्वयः, हर्षो हि विक्षेपस्य कारणम्, अन्नमाश्रयश्च विक्षेपस्य कार्यं [फले] इति भवति विक्षेपेण सह सर्वेषां कार्यकारणभावसम्बन्धः । सस्सट्कनिर्देशो व्यर्थः, विनापि तन्निर्देशं प्रकृतप्रयोगेष्वात्मनेपदप्रवृत्तौ बाधकाभाव इत्याशङ्कां प्रत्युदाहरणेनापाकर्तुमाह- **सस्सट्कनिर्देशादिह न भवतीति** । क्वेत्याह- **अपकिरति वृषभः** इति - अनभिमतं भक्ष्यवस्तु यतस्ततं विक्षिपतीत्यर्थः, अत्र हि हर्षाद्यभावान्न स्सट्, तदभावाच्चात्मनेपदमपि न भवति, असति स्सट्सहितनिर्देशे प्रकृतेप्यपात् परत्वसत्त्वेन स्यादेवात्मनेपदमिति तद्वारणायेदृशनिर्देशस्यावश्यकत्वमिति भावः । **अपेति किमिति**, अयमाशयः - अपात् परत्वे सत्येव स्सट् विधीयत इति सस्सट्कनिर्देशेनैवापात् परत्वे सत्येवात्मनेपदं स्यादिति अपेति सूत्रे न कार्यमिति । न केवलमपात् परस्यैव किरतेः स्सट्, किन्तु उपात् प्रतेश्च परस्यापि, ततश्च तत्पूर्वकादपि किरतेरात्मनेपदं स्यात् तन्मा भूदित्येतदर्थमपेत्यावश्यकमित्याह- **उपस्किरतीति** प्रत्युदाहरणेन, "किरो लवने" [४. ४. ९३.] "प्रतेश्च वधे" [४. ४. ९४.] इति सूत्राभ्यामुपपूर्वकस्य प्रतिपूर्वस्य च किरतेः स्सट् विधीयत इति केवलसस्सट्कनिर्देशेनेहात्मनेपदवारणं न संभवतीत्यपेत्यावश्यकम्, प्रकृतप्रयोगे च यदि लवनार्थे प्रयोगस्तर्हि पूर्वेण, यदि वधार्थे प्रयोगस्तर्हि परेणोक्तसूत्रेण स्सट्, तत्र परस्मैपदमेव भवति ॥ ३. ३. ३०. ॥

## उदश्चरः साप्यात् ॥ ३. ३. ३१. ॥

**त० प्र०— उत्पूर्वाच्चरतेः साप्यात् - सकर्मकात् कर्त्तर्यात्मनेपदं भवति । गुरुवचनमुच्चरते, मार्गमुच्चरते, व्युत्क्रम्य गच्छतीत्यर्थः; ग्रासमुच्चरते, सक्तूनुच्चरते, भक्षयतीत्यर्थः । उद इति किम् ? चारं चरति । साप्यादिति किम् ? धूम उच्चरति, शब्द उच्चरति, ऊर्ध्वं गच्छतीत्यर्थः ॥ ३१ ॥**

**श०म० न्यासानुसन्धानम्—उद०** । आप्यं कर्म, तेन सह वर्त्तत इति साप्यः, तस्मात् साप्यादिति पदार्थमाह- **सकर्मकादिति**- एकस्यैव धातोरर्थवशेनाकर्मकत्वं सकर्मकत्वं च संभाव्यत इति सकर्मकमात्रपरिग्रहार्थं साप्यादिति पदम् । कर्त्तरीति पदं पूर्वतोऽनुवृत्तमेव स्पष्टप्रतिपत्तये सम्बध्यते, अन्यथा भावकर्मणोरात्मनेपदस्य पूर्वेणैव विहितत्वात् परिशेषादेव कर्त्तरि विधानस्य प्राप्तेरनर्थकम् तत्, उदाहरति - **गुरुवचनमुच्चरते** इति-गुरुवचनकर्मकमुल्लङ्घनं करोतीत्यर्थः,

"Aho Shrutgyanam"

उत्पूर्वकाच्चरतेर्वर्त्तमानायाः प्रथमपुरुषैकवचने रूपम् । एवं- **मार्गमुच्चरते** इत्यत्रापि, प्रयोगार्थमाह- **व्युत्क्रम्य गच्छतीत्यर्थः**, व्युत्क्रमणं च विपरीताचरणमुल्लङ्घनं वा । नन्वत्र गुरुवचनमार्गयोर्व्युत्क्रमणक्रियानिरूपितं कर्मत्वं, सा च क्रिया धात्वन्तरप्रतिपाद्या न तु चर्धातुप्रतिपाद्येति तेन कर्मणा चरेः सकर्मकत्वं कथं स्यादिति सकर्मकत्वाभावात् तद् आत्मनेपदं कथं भवतीति चेत् ? न-चरिरेव प्रकृते व्युत्क्रमणविशिष्टायां गतौ वर्त्तते, अभिधानस्वाभाव्यादिति व्युत्क्रमणं न धात्वन्तरार्थोऽपि तु चरेरेवार्थ इति गुरुवचनादीनां चरिनिरूपितमेव कर्मत्वमिति न सकर्मकत्वहानिः, यथा जीवतेः प्राणधारणार्थकस्य प्राणाः कर्मभूता धात्वर्थ एवान्तर्भूता इति तस्याकर्मकत्वं तथा प्रकृते व्युत्क्रमणमपि चरिवाच्यान्तर्गतमेवेति न तस्य पृथगर्थता । किञ्चैतादृशस्यार्थस्य न चरिवाच्यत्वमपि तु प्रकृतप्रयोगोपाधिकत्वमेव, 'ग्रासमुच्चरते' इत्यादौ तदप्रतीतेः, यदि चरिवाच्यता स्यात् सा सर्वत्र प्रतीयेत, तथा च यत्र प्रयोगे योऽर्थः प्रतीयते स तत्रत्यशब्दवाच्य एव शब्दानुपस्थितस्यार्थस्य शाब्दबोधे मानानभ्युपगमादिति कृत्वा चरिवाच्यत्वं व्युत्क्रमणविशिष्टाया गतेरित्यन्यदेतत् । न व्युत्क्रमणपूर्विकायां गतावेव चरेः सकर्मकत्वमपि तु भक्षणार्थेऽपीत्याह- **ग्रासमुच्चरते, सक्तूनुच्चरते** इति । प्रकृतप्रयोगार्थमाह- **भक्षयतीत्यर्थः** इति- चर्धातोर्गतिभक्षणे अर्थौ, तत्रोत्पूर्वकस्य गतिविषयप्रयोगे उल्लङ्घ्यगमनप्रत्यायकत्व यथा तथा- भक्षणार्थेऽपि उपसर्गकृतः कश्चिद् विशेषः प्रतीयत एव, किन्तु स प्रकृते न विवक्षितोऽपि तु धात्वर्थमात्र विवक्षितमिति भावः । **उद इति किमिति**- सामान्यतः साप्याच्चरेः कर्त्तर्यात्मनेपद विधीयतामिति भावः । **चारं चरतीति**- चर्यते- भक्ष्यत इति चारो बाहुलकात् कर्मणि घञ्, पशुभक्ष्यघासादिकं चारशब्देनोच्यते, तं चरति भक्षयतीत्यर्थः, प्रकृते चरेः सकर्मकत्वेऽपि उत्पूर्वकत्वाभावादात्मनेपदं न भवति, उद इत्यस्याभावे च स्यादेवेति तद्वारणायोद इत्यावश्यकमिति भावः । ननु **रावण**कृतशिवताण्डवस्तोत्रे- "शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम्" इति प्रयोगे उत्पूर्वकाच्चरेः सकर्मकादपि कथं परस्मैपदस्य शतुः प्रयोग इति चेदत्र केचित्- तस्या[रावणस्या]नेकव्याकरणाभिज्ञतया व्याकरणान्तरानुसार्ययं प्रयोगो नास्मद्व्याकरणानुकूल इति, तत् तुच्छम्- साधुप्रयोगस्य सकलव्याकरणसाधारण्यात्, प्रयुक्तानामेव सर्ववैयाकरणैरन्वाख्यानात्, प्रतिव्याकरण प्रयोगभेदे च शब्दप्रयोगे कोलाहलप्रसङ्गात्, तस्मादुपायान्तरमन्वेषणीयमस्य साधुत्वार्थं, भक्तिप्रवाहपतितस्य तस्य मुखादसाध्वेव वा पदमिदं निःसृतमिति निर्धारणीयम्, इत्थं प्राप्ते**ऽन्ये** समादधति- साध्यत्वविशिष्टक्रियाया एव प्राधान्यात् सूत्रे साप्यग्रहणात् * प्रधानेन व्यपदेशा भवन्ति * इति न्यायेन साध्यक्रियाबोधकस्यैव सकर्मकस्य चरेर्ग्रहणमिति, प्रकृते च कृदन्ते सत्त्वस्वभावक्रियाया गुणीभावेन प्राधान्यविरहान्नात्मनेपदमिति । **साप्यादिति किमिति**- गतिभक्षणार्थस्य चरेरर्थवशादेव सकर्मकत्वं निश्चितं, नहि गतिः कर्महीना सम्भवति, उत्तरदेशसंयोगानुकूलव्यापारो हि गतिः, सा चावश्यं कर्मवती, एवं भक्षणमपि कर्मरहितं न संभवतीति निश्चिते सकर्मकार्थकं साप्यादिति विशेषणमव्यावर्त्तकमिति प्रष्टुराशयः । प्रत्युदाहरणेनोत्तरयति - **धूम उच्चरति, शब्द उच्चरतीति**, अयमाशयः- चरतेरर्थवशात् । सकर्मकत्वमिति यदुक्तं तन्न- यतः सकर्मकपदस्य नार्थवशलब्धकर्मसहितत्वमर्थोऽपि तु प्रयुज्यमानकर्मसहितत्वम्, तथा च प्रकृते कर्मण ऊर्ध्वप्रदेशस्योपसर्गवशाद् धात्वर्थेनैवोपसंग्रहात् कर्मणः प्रयुज्यमानत्वाभावान्न सकर्मकत्वमिति न भवत्यात्मनेपदम्, असति साप्यादिति पदे च स्यादेव तदिति तद्वारणाय साप्यादित्यस्यावश्यकत्वम्, एतदेव प्रयोगार्थकथनेन सूचयति- ऊर्ध्वं गच्छतीत्यर्थः इति ॥ ३. ३. ३१. ॥

## समस्तृतीयया ॥ ३. ३. ३२. ॥

**त० प्र०— समः पराच्चरतेस्तृतीयान्तेन योगे सति कर्त्तर्यात्मनेपदं भवति । अश्वेन संचरते, रथेन संचरते । तृतीययेति किम् ? "उभौ लोकौ संचरसि, इमं चामुं च देवल !" 'किं त्वं करिष्यसि रथ्यया, संचरति चैत्रोऽरण्ये' इत्यत्र तु तृतीयान्तेन योगाभावान्न भवति ॥ ३२ ॥**

**श०म० न्यासानुसन्धानम्- सम० । तृतीययेति** पदं प्रत्ययबोधकं, प्रत्ययग्रहणे च तदन्तग्रहणं न्यायसिद्धम्, तथा च तृतीयापदं तृतीयान्तपरं, तस्य च तृतीयाविभक्तियोगेन तृतीयान्तेनेत्यर्थः । **अन्ये** व्याचक्षते- धातोस्तृतीयया योगाभावादाह- **तृतीयान्तेन योगे** इति- तृतीया स्यादिविभक्तिस्तया योगः पूर्वापरीभावरूपः प्रकृतिप्रत्ययभावरूपो वा धातोर्न संभवति, यतो नाम्न एव स्यादिप्रत्ययविधिः, धातोश्च नामसंज्ञा पर्युदस्ता, तस्मात् तृतीयान्तेन नाम्ना योगे सम्बन्धे सतीत्यर्थ उक्त इति तदाशयः । वस्तुतस्तु तृतीयापदं प्रत्ययबोधकत्वेन तदन्तपरमिति स्वभावत एव तृतीयान्तेनेत्यर्थकं, तच्च धातुविशेषणं न साक्षात् सम्भवति, नहि क्रियाकरणभावादिस्तृतीयान्तेन सह सम्बन्धो धातोः

"Aho Shrutgyanam"

शब्दरूपत्वेन तेन सह तादृशसम्बन्धासंभवादित्यर्थद्वारक एव सम्बन्धः, तथा च तृतीयान्तेन तृतीयान्तार्थेन युक्तार्थवाचकाच्चरतेः सम्पूर्वकादात्मनेपदमिति सूत्रार्थः पर्यवस्यति । उदाहरति- **अश्वेन संचरते, रथेन संचरते** इति- अत्र तृतीयान्तमश्वेनेति पदं रथेनेति पदं च, तदर्थेन सह चरतेरर्थस्य क्रियाकरणभावसम्बन्धसत्त्वेन भवत्यात्मनेपदम् । **तृतीययेति किमिति**, अयमाशयः- धातोस्तृतीयान्तेन योगो न संभवतीत्यर्थयोर्योग इह विवक्षित इत्युक्तम्, अर्थयोश्च योगः सर्वत्र विधित एव. क्रियायाः करणं विनानुपपद्यमानत्वेन करणेन सह सम्बन्धस्य सर्वत्र सत्त्वादिति तृतीययेति पदमव्यावर्त्तकमेवेति । प्रत्युदाहरणेनोत्तरयति- **"उभौ लोकौ संचरसि इमं चामुं च देवल !"** इति- अत्र तृतीयान्तपदाभावान्न तृतीयान्तेन योग इति न भवत्यात्मनेपदं, तृतीययेत्यस्याभावे च स्यादेवेति तद्वारणाय तृतीययेत्यावश्यकम् । अयमाशयः- तृतीयान्तेन योगे मतीत्युच्यते, सर्वत्र च तृतीयान्तेन योगः सम्भाव्यते, न केवलं चरतेः सर्वधातूनामर्थस्य तृतीयान्तार्थेन योगोऽवश्यंभावी, करणं विना क्रियाया अनुत्पत्तेः, "असिना च्छिनत्ति, असिस्तैक्ष्ण्येन च्छिनत्ति, तैक्ष्ण्यमात्मना च्छिनत्ति' इत्यादिरूपेण सर्वत्र तत्सम्बन्धात् । यत्रापि करणाभिधायि पदं न श्रूयते तत्रापि केनचित् करणेन भाव्यम्, अन्ततः एकस्यैव पदार्थस्य भेदविवक्षायामात्मा करणम्, प्रकृतेऽपि [ उभौ लोकौ संचरतीत्यत्रापि ] विद्यया तपसा वेत्यादितृतीयान्तेन सम्बन्धः संभाव्यत एवेति तृतीययेति पदं यद्यप्यव्यावर्त्तकं तथापि तृतीययेति सहार्थतृतीयान्तपदसामर्थ्याद् यत्र तृतीयान्तेन साक्षादुच्चरितेन योगस्तत्रैव भविष्यति, यत्र चार्थवशाद् गम्यमानेन तृतीयान्तेन योगस्तत्र न भविष्यतीत्येतदर्थमेव तृतीययेति पदमिति भावः । यत्र च सत्यपि तृतीयान्ते पदे तेन सह चरतेर्न सम्बन्धस्तत्रापि न भवतीत्याह— **किं त्वं करिष्यसि रथ्यया, संचरति चैत्रोऽरण्ये** इति- अत्र रथ्ययेति तृतीयान्तं पदं न संचरतिक्रियया सम्बद्धमपि तु करिष्यतीति क्रियया, तथा च संचरतेस्तेन सह सम्बन्धाभावादेव नात्मनेपदमित्याह- **तृतीयान्तेन योगाभावान्न भवतीति**, एवं- सह धनेन देवदत्तः संचरतीत्यत्रापि न भवत्यात्मनेपदं, धनेनेति तृतीयान्तस्य देवदत्तेन सम्बन्धो न तु क्रियया विद्यमानधनो देवदत्तः संचरतीत्यर्थावगतेः । एवं च सत्यपि तृतीयान्तपदप्रयोगे तेन[तदर्थेन] सह संचरतेः सम्बन्धाभावे, असति वा तत्प्रयोगे तदर्थस्य गम्यमानत्वे सत्यप्यात्मनेपदव्यावृत्त्यर्थं तृतीययेत्यावश्यकमिति समुदितार्थः ।। ३. ३. ३२. ।।

## क्रीडोऽकूजने ।। ३. ३. ३३. ।।

**त० प्र०— कूजनमव्यक्तः शब्दः ततोऽन्यस्मिन्नर्थे वर्तमानात् संपूर्वात् क्रीडेः कर्तर्यात्मनेपदं भवति । संक्रीडते, सक्रीडमाणः, रमते इत्यर्थः । सम इत्येव क्रीडति । अकूजन इति किम् ? संक्रीडन्ति शकटानि, अव्यक्तं शब्दं कुर्वन्तीत्यर्थः ।। ३३ ।।**

**श०म० न्यासानुसन्धानम्-क्रीडो० । 'अकूजने'** इति पदं व्याचष्टे- **कूजनमव्यक्तः शब्दः** इति- अव्यक्तशब्दार्थः कूज्धातुर्भ्वादौ पठितस्ततो भावेऽने कूजनशब्दो व्युत्पन्नोऽव्यक्तशब्दार्थ एव भवति । न कूजनमकूजनमिति नञ्समासेनाव्यक्तशब्दभिन्नेऽर्थे वर्त्तमानात् क्रीडतेर्विहारार्थकात् सम्पूर्वकात् कर्त्तर्यात्मनेपदं भवतीति सूत्रार्थः सम्पद्यते । उदाहरति- **सक्रीडते, संक्रीडमानः** इति- सम्पूर्वात् क्रीडतेर्वर्तमानाप्रथमपुरुषैकवचने आनशि च रूपद्वयम् । कूजनभिन्नार्थत्वविज्ञानार्थं प्रयोगार्थमाह- **रमते इत्यर्थः** इति- विहारार्थस्य तस्यायमर्थः स्वाभाविक एव, उपसर्गश्च तदर्थस्यैव सम्यक्त्वद्योतनार्थः । सम इत्यस्य पूर्वसूत्रात् सम्बन्ध आवश्यक एवेत्याह- **सम इत्येवेति** । व्यावर्त्यमाह- **क्रीडतीति**- समुपसृष्टत्वाभावे परस्मैपदिनोऽस्मात् परस्मैपदमेव यथा स्यादित्येतदर्थं सम इत्यस्य आवश्यकत्वमिति भावः । क्रीडतेर्विहारार्थकस्याव्यक्तशब्दार्थत्वं न संभाव्यत इत्यव्यक्तशब्दार्थनिषेधो व्यर्थ एवेत्याशयवान् पृच्छति- **अकूजन इति किमिति** । धातूनामनेकार्थत्वेन प्रसिद्धार्थमात्रनिर्देशो धातुपाठे क्रियते, अर्थपरिच्छेदश्च प्रयोगाधीनः, तत्रापि उपसर्गवशेन कारकविशेषसन्निधानेन च भिन्नभिन्नोऽर्थः प्रतीयत इति कूजनार्थप्रतीतिरपि क्रीड्धातोर्भवतीति तत्र आत्मनेपदविधिर्मा भूदित्येतदर्थमकूजने इत्यावश्यकमित्याह प्रत्युदाहरणमुखेन-**संक्रीडन्ति शकटानीति** । शकटेष्वचेतनेषु विहाररूपस्य क्रीडनस्यासंभवात् । क्रीडासमये प्रायो मनुजानामपि परस्परमव्यक्तशब्दप्रयोगाच्छकटेषु तावन्मात्रेण क्रीडतेः प्रयोग इति कूजनार्थादस्मान्नात्मनेपदं भवति, 'अकूजने' इत्यस्याभावे च तद्दुर्वारमिति तदावश्यकमिति भावः, तदाह-**अव्यक्तं शब्दं कुर्वन्तीत्यर्थः** इति- यद्यप्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपस्य कारकचक्रप्रयोक्तृत्वरूपस्य केवलकृतिमत्त्वरूपस्य वा कर्तृत्वस्याचेतनेषु शकटेष्वसंभवस्तथापि तत्र तादृशं कर्तृत्वमारोप्यैवं प्रयोगा भवन्त्येवेत्यदोषः । **केचित्** तु कूजनमव्यक्तशब्दः, तद्भिन्नमकूजनं व्यक्तशब्द एव * नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः * इति न्यायेन व्यक्तशब्दभिन्ने

"Aho Shrutgyanam"

तत्सदृशे चार्थेऽकूजनशब्दस्य वृत्तौ सादृश्यस्य च शब्दत्वेन ग्रहणे, व्यक्तशब्दार्थस्यैव लाभादिति रमणार्थप्रयोगे 'संक्रीडते, संक्रीडमानः' इत्यादौ कथमात्मनेपदमित्याशङ्क्य तन्न्यायानित्यतया समादधति, अथवा वाक्यभेदेन सूत्रार्थं वर्णयन्ति, तथा च 'क्रीडः' इत्येकं वाक्यं संपूर्वकात् क्रीडतेरात्मनेपदमित्यर्थकम्, "अकूजने" इति च पृथग् वाक्यम्, तत्राकारो निषेधार्थः, अनन्तरपूर्ववाक्येन यदात्मनेपदं विहितं तत् कूजनेऽव्यक्तशब्दे वर्तमानात् क्रीडतेर्न भवतीति तदर्थ इति। वयं तु कूजनमित्यस्याव्यक्तशब्दोच्चारणमित्यर्थः, तत्र हि नञ्समासेन तद्भिन्नतत्सदृशयोः प्रतीतावपि सादृश्यस्य शब्दत्वेन ग्रहणे मानाभावः, नह्यव्यक्तशब्दोच्चारणक्रियायां शब्दत्वधर्मो येन सादृश्यं गृह्येतेति क्रियात्वेनैव सादृश्यं ग्राह्यमिति रमणमपि क्रियैव, सा चाव्यक्तशब्दोच्चारणभिन्नैवेति तदर्थे आत्मनेपदप्रवृत्तौ न किमपि बाधकमित्येतदर्थं न्यायानित्यत्वस्य वाक्यभेदस्य वा कल्पने न किमपि बीजमिति विभावयामः, "कूज अव्यक्ते शब्दे" इत्याद्यर्थनिर्देशस्तु शब्दशब्दस्य शब्दनक्रियापरत्वेनेति बोध्यम् ॥ ३. ३. ३३. ॥

## अन्वाङ्परेः ॥ ३. ३. ३४. ॥

त० प्र०— 'अनु आङ् परि' इत्येतेभ्य उपसर्गेभ्यः **परात् क्रीडतेः कर्तर्यात्मनेपदं भवति। अनुक्रीडते, अनुक्रीडमाणः। आक्रीडते, आक्रीडमाणः। परिक्रीडते, परिक्रीडमाणः। उपसर्गादित्येव— माणवकमनु क्रीडति, माणवकेन सह क्रीडतीत्यर्थः, धातुना अनोरसम्बन्धाद् वा न भवति। एवम् उपरि क्रीडति ॥ ३४ ॥**

**श० म० न्यासानुसन्धानम्—अन्वा०।** क्रीड इत्यनुवर्त्तते, अकूजन इति च निवृत्तं पृथक् सूत्रारम्भसामर्थ्यात्, तथा च सूत्रार्थमाह— **इत्येतेभ्य उपसर्गेभ्यः परादि**ति— उपसर्गादिति पदमनुवृत्तं, तद् यथायोग्यं वचनविपरिणामेन सम्बध्यत इति प्रकृते उपसर्गाणां बहुत्वेन बहुवचनान्ततया विपरिणामः। उदाहरति—**अनुक्रीडते, अनुक्रीडमानः,** इत्यादिना, त्यादिषु वर्तमानायाः प्रथमपुरुषैकवचने प्रयोगः कृत्सु आनशि च प्रयोगस्तस्याप्यात्मनेपदसंज्ञकत्वात्। उपसर्गादित्यस्य सम्बन्धः प्रकरणप्राप्त इहाप्यावश्यक एवेत्याह— **उपसर्गादित्येवेति**। व्यावर्त्यमाह— **माणवकमनु क्रीडतीति**— अत्र "हेतुसहार्थेऽनुना" [ २. २. ३८. ] इति सूत्रेणानुना युक्तान्माणवकाद् द्वितीया भवतीत्यनोर्धातुना योगाभावादुपसर्गत्वं नास्तीति तस्मात् परात् क्रीडतेर्नात्मनेपदम्। उपसर्गादित्यस्य सम्बन्धाभावेऽपि प्रकृते आत्मनेपदवारणं संभवतीत्याह— **धातुना अनोरसम्बन्धाद् वा न भवतीति।**

अयमाशयः— 'अन्वाङ्परेः' इति पदमावर्त्तते एकं षष्ठ्यन्तमपरं पञ्चम्यन्तम्, तथा च एतेषां सम्बन्धिन एभ्यः पराच्च धातोरात्मनेपदं विधीयते, सम्बन्धश्च स्वद्योत्यार्थवाचकत्वरूप एवेति प्रकृतेऽनोर्धातुना सह तादृशसम्बन्धाभावादप्यात्मनेपदम् वारयितुं शक्यत इत्युपसर्गादित्यस्यासम्बन्धेऽपि न दोषः। इत्थं व्याख्यानमभिप्रेत्यैवान्यैर्वैयाकरणैः प्रकृतप्रकरणे उपसर्गादिति न पठ्यते, स्वमते च स्पष्टार्थमेव तत् पठ्यत इति प्रकृतवृत्तिग्रन्थेन सूचितं भवति ॥ ३. ३. ३४. ॥

## शप उपलम्भने ॥ ३. ३. ३५. ॥

**त० प्र०— उपलम्भनेऽर्थे वर्तमानाच्छपतेः कर्तर्यात्मनेपदं भवति। उपलम्भनं—प्रकाशनं ज्ञापनम्। मैत्राय शपते, मैत्रं कञ्चिदर्थं बोधयतीत्यर्थः, मैत्रमेवंभूतोऽसावित्यन्यस्मै प्रकाशयतीत्येके। अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथ इति यावत्। मैत्राय शपते इति; वाचा मात्रादिशरीरस्पर्शनेन मैत्रं स्वाभिप्रायं बोधयतीत्यर्थः। प्रोषितस्य भावाऽभावोपलब्धौ कस्यचिदर्थस्यासेवनं चोपलम्भनम्— मैत्राय शपते इति, प्रोषिते मैत्रे तस्य भावेऽभावे चोपलब्धे सति तदनुरूपं किञ्चिदनुतिष्ठतीत्यर्थः। उपलम्भन इति किम्? मैत्रं शपति, आक्रोशतीत्यर्थः ॥३५॥**

**श० म० न्यासानुसन्धानम्—शप०।** उपलम्भनं—शब्दार्थमाह— **उपलम्भनं प्रकाशनं ज्ञापनमिति**— उपपूर्वकाल्लभतेर्ण्यन्ताद् भावेऽनटि—उपलम्भनशब्दसिद्धिः, तथा च कञ्चित् प्रति कस्यचिदर्थस्य प्रापणमुपलम्भनशब्दार्थो भवति, परन्तु प्रयोगस्वाभाव्यादिह तस्य प्रकाशनमर्थः, प्रकाशनमपि बहुविधं भवति पिहितस्यादृष्टस्य वस्तुनो दृष्टिविषयीकरणमज्ञातस्य वस्तुनो ज्ञापनं चैवमादि, तत्र प्रकृते ज्ञापनरूपमेव प्रकाशनं ग्राह्यम्, तदपि आक्रोशार्थकशपधातुमहिम्ना कस्यचिज्जनस्य दोषाणामन्यं प्रति कथनमेव प्रकृते ग्राह्यम्। तथैवोदाहरति— **मैत्राय शपते** इति— मैत्रं प्रति तदीयदोषगुणान् सशपथं प्रकाशयतीत्यर्थः, अत्र शप्धातुरन्तर्भूतण्यर्थः तथा च प्रयोज्ये ज्ञाप्ये मैत्रे "श्लाघह्नु-स्था-शपा प्रयोज्ये" [ २. २ ६०. ] इति सूत्रेण चतुर्थी भवति, अत्र चोपलम्भनार्थसत्त्वादनेनाकर्तृगेऽपि फले भवत्यात्मनेपदम्, शप्धातोरुभयपदित्वेऽपि कर्तृगामिनि क्रियाफले एव प्राप्तस्यात्मनेपदस्यान्यत्रापि विधानार्थं सूत्रमिदम्। मतान्तरेण प्रकृतप्रयोगार्थमाह— **मैत्रमेवं-**

"Aho Shrutgyanam"

**भूतोऽसावित्यस्मै प्रकाशयतीत्येके** इति– 'मैत्रमेवान्यस्मै प्रकाशयति' इति प्रयोगार्थः, तत्र मैत्रकर्मकं प्रकाशनमन्यं प्रति किं तस्य स्वरूपतः प्रकाशनमुत रूपान्तरेणेत्याह– एवंभूतोऽसाविति, यथाऽसौ भवता विज्ञायते, नासौ वस्तुतस्तथाऽपि तु तस्यैवंस्वरूपगुणदोषादीति प्रकाशनाभिप्रायः, इत्थं चात्र मैत्रस्य प्रयोज्यत्वं नास्ति यस्मै प्रकाशयति स एव प्रयोज्य इति मैत्रात् पूर्वोक्तसूत्रेण चतुर्थी न प्राप्तेति तादर्थ्यादौ चतुर्थी विज्ञेया । स्वसम्मतमेव पक्षान्तरमाह– **अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथ इति यावदिति**– स्वाभिप्रायस्य–स्वोक्तार्थस्य परत्र–अन्यस्मिन् जने, आविष्करणं–याथार्थ्येन बोधनमेवोपलम्भनशब्देन बोध्यते, तदेव हि लोके शपथशब्देनोच्यते, शपथेन हि स्वोक्तार्थ एव प्रामाणिकत्वेन परत्राविष्क्रियत इति तदेवोपलम्भनमिति तदर्थः । अयमर्थश्च पूर्वमुक्तात् प्रकाशनरूपादनन्य एव तस्यैव प्रकारान्तरेण व्याख्यानरूपः, तत्र हि सामान्येन कस्यचिदर्थस्य ज्ञापनमुक्तम्, अत्र च स्वाभिप्रायस्यैव प्रत्यायनरूपमाविष्करणं प्रकाशनमुक्तमियानेव विशेषः । प्रकृतार्थानुरूपेण प्रयोगार्थं प्रकटयितुं पुनः प्रयोगमाह– **मैत्राय शपते** इति । **वाचे**त्यादि प्रयोगार्थः, **वाचा मात्र दिशरीरस्पर्शनेने**ति–स्पर्शनं यद्यपि हस्तादिद्वारा त्वक्सम्बन्ध एव, तथापि मात्रादेः सर्वत्राविद्यमानत्वेन वाचैव तदीयचरणादिस्पर्शनमभिनीय मैत्राय स्वाभिप्राय बोधयति– प्रत्याययतीत्यर्थः । उक्तं च **काशिका**कृताऽप्युपलम्भनं शपथ इति । **नागेश**भट्टस्तु– उपलम्भनशब्दस्य न शपथे रूढिर्नवा योगशक्त्या तादृगर्थलाभ इति काशिकामतं खण्डयन्ति 'क्रोडोऽनुसंपरिभ्यश्च'' [ पा०सू० १. ३. २१. ] इति सूत्रव्याख्यानशेषे उद्द्योतग्रन्थे, शब्देन्दुशेखरे चात्मनेपदप्रक्रियायामयमर्थो **दीक्षित**ग्रन्थखण्डनत्वेनोपन्यस्तः । दीक्षितेनापि आक्रोशार्थात् शपतेः कर्तृगेऽपि फले शपथरूपेऽर्थे वर्त्तमानादित्यादिरूपेण 'शप उपालम्भे[उपलम्भने]' इति वार्तिकं व्याख्यातम्, तथा च सोऽपि प्रकृते काशिकाकृदनुसार्येव, परं तु प्रकृतबृहद्वृत्तिवर्णितदिशा शपथेन ज्ञापनमुपलम्भनमिति प्रतीयते, न केवलं शपथः, अथवा पूज्यजनाङ्कादेर्हस्तादिना साक्षाद् वाचा वा मानसस्पर्शाख्यानरूपक्रियाद्वारा स्वाभिप्रायप्रत्यायने शपथशब्दस्यानादितात्पर्यवती लक्षणेति स्वमतं बोध्यमिति न नागेशखण्डनस्येह संभवः । प्रकारान्तरेणोपलम्भनशब्दार्थं व्याचष्टे– **प्रोषितस्य भावाऽभावोपलब्धौ कस्यचिदर्थस्यासेवनं चोपलम्भनमि**ति– प्रोषितस्य– स्थानान्तरं गतस्य, भावेऽभावे चोपलब्धे केनचित् कथिते स्वप्नादिना वा विज्ञाते, तदीयशुभाशंसनाय कस्यचिदर्थस्य कुशलप्रेषणस्वेष्टदेवतोपासनादेः, आसेवनमाचरणमुपलम्भनमिति तदर्थः, एव चोपलम्भनशब्दस्यानुष्ठानद्वाराभीष्टप्राप्तिसमुद्योगे योगरूढिः । अनन्तरोक्तोपलम्भनस्य प्रयोगे सङ्गमनाय पुनः प्रयोगमाह– **मैत्राय शपते** इति । अर्थमाह– **प्रोषिते मैत्रे** इत्यादिना, मैत्रे देशान्तरं गते सति तस्य मैत्रस्य भावे– स्थानविशेषस्थितौ, अभावे– यत्र गतस्तत्र तस्यानुपस्थितौ, चोपलब्धे–विज्ञातायां, तदनुरूपं तद्भावाभावानुसारं, किञ्चिद्भावे तदर्थं संवादप्रेषणादिकमभावे तदीयकुशलयुक्तस्थित्यर्थं देवताराधनादिकं चानुतिष्ठतीति प्रयोगार्थः, अत्र च यद्यपि शप्धात्वर्थ आक्रोशो न गम्यते, तथापि धातूनामनेकार्थत्वेन प्रकृतोक्तार्थप्रतीतिः स्वीक्रियते । केवलशपथे तु न भवत्यामनेपदं, तथाहि–बहुशः कविप्रयोगाः शपथे परस्मैपदस्य दृश्यन्ते, यथा–

"धन्यासि या कथयसि प्रियसङ्गमेऽपि,
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण,
सख्यः शपामि यदि किञ्चिदपि स्मरामि ॥'' इति ।

किञ्च—"आचम्य चाम्बु तृषितः करकोशपेयं,
भावानुरक्तललनासुरतैः शपेयम् ।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ॥"

इति घटकर्परकविश्लोके च शपथार्थे सत्यपि परस्मैपदमेव प्रयुक्तं दृश्यत इति न केवलं शपथरूपेऽर्थे प्रकृतसूत्रप्रवृत्तिरिति । यद्यपि घटकर्परश्लोके स्वाभिप्रायस्याविष्करणमपि दृश्यते, पूर्वत्रापि सखीं प्रति नायिकावाक्ये स्वाभिप्रायप्रकाशनमस्ति, तथापि तत्र शपथमात्रस्य विवक्षितत्वेन नात्मनेपदमिति सन्तोष्टव्यम् । यद्यप्युक्तरीत्योपलम्भनशब्दार्थस्य न परिच्छेदः प्रकारान्तरेषु कस्यात्र ग्रहणमित्यनिश्चयात्, तथा चान्यतमस्यैव कस्यचिदर्थस्य प्रकृते निर्णेतव्यत्वात् सन्देहस्योपस्थितौ शास्त्रस्यानिर्णायकता स्यादिति शक्यते वक्तुं, तथापि प्रकाशनरूपस्य ज्ञापनस्य सर्वत्रार्थे यथाकथंचिदनुस्यूतत्वेन 'अन्यायो ह्यनेकशब्दार्थत्वम्' इति न्यायस्यानवसरान्न दोष इति बोध्यम् । **उपलम्भन इति किमि**ति– सर्वत्र शप्धातुप्रयोगे ज्ञापनार्थस्य यथाकथंचित् प्रतीतिरस्त्येवेति ज्ञापनार्थ एव भविष्यतीत्युपलम्भनपदस्यावर्त्तकत्वेनानुपादेयत्वमिति शङ्कार्थः । व्यावृत्तिस्थलं प्रदर्शयति– **मैत्रं शपति** इति– अत्र केवलं निन्दाकरणमेवार्थो न तु कञ्चित् प्रति कस्यचिदर्थस्य ज्ञापनमिति न भवत्यात्मनेपदम्, असति चोपलम्भनपदे स्यादेवेति तद्वारणाय तदावश्यकमिति भावः । तदाह– **आक्रोशतीत्यर्थः** इति ॥ ३. ३. ३५. ॥

"Aho Shrutgyanam"

## आशिषि नाथः ॥ ३.३.३६. ॥

**त० प्र०—आशिष्येवार्थे वर्तमानान्नाथतेः कर्तर्यात्मनेपदं भवति। सर्पिषो नाथते, मधुनो नाथते, सर्पिर्मे भूयान्मधु मे भूयादित्याशास्ते इत्यर्थः। आशिष्येवेति नियमः किम्? याच्ञयां मा भूत मधु नाथति। ङित्करणं त्वस्यानप्रत्ययार्थम् ॥३६॥**

**श० म० न्यासानुसन्धानम्- आशिषि०।** "नाथृङ् उपतापैश्वर्याशीःषु च" इति भ्वादौ पठ्यते, तत्र चकारेण याचनार्थसङ्ग्रहः, तस्मादात्मनेपदस्य ङित्त्वप्रयुक्तस्य सर्वत्रार्थे स्वतः सिद्धेरिदं सूत्रं व्यर्थं सन्नियमार्थत्वेन पर्यवस्यति, तदाह- **आशिष्येवार्थे वर्त्तमानादिति।** नियमपदार्थश्च सङ्कोचः, स च व्यर्थताप्रयोजक- "इङितः" [३. ३. २२.] इतिशास्त्रीयोद्देश्यविशेषणविशिष्टे ङकारेत्संज्ञकधातौ नाथभिन्नत्वेन सङ्कोचः, व्यर्थशास्त्रोद्देश्यविशेषणयावद्धर्मव्यापकः, व्यर्थताप्रयोजकशास्त्रीयोद्देश्यतावद्धर्म्मव्याप्यो यावान् धर्मः, तदितरत्वेन सर्वत्र व्यर्थताप्रयोजकशास्त्रोद्देश्यसकलविशेषणविशिष्टे सङ्कोच इति सिद्धान्तात्; व्यर्थशास्त्रं तु स्वीयोद्देश्यसकलविशेषविशिष्टस्य विधिमुखेन प्रवृत्तिमद् भवतीति लाघवम्; निषेधमुखेन प्रवृत्तौ हि स्वार्थहानिः प्राप्तबाधः परार्थकल्पना च भवतीति गौरवं, लक्षणारूपजघन्यवृत्त्याश्रयणं च भवतीत्युपपादितमन्यत्र। एवं च प्रकृतनियमेन "इङितः कर्त्तरि" [३. ३. २२.] इति सामान्यसूत्रे स्वीयव्यर्थताप्रयोजके नाथधातुभिन्नङित्त्वेन सङ्कोचे तस्य सूत्रस्य नाथधातावप्रवृत्तिः, तथा च **सर्पिषो नाथते, मधुनो नाथते** इत्यनयोरनेनात्मनेपदम्, "नाथः" [२. २. १०.] इति सूत्रेण व्याप्यस्य कर्मसंज्ञाविकल्पे सम्बन्धसामान्ये षष्ठी, सर्पिषो नाथत इति, एवं मधुनो नाथत इत्यपि। प्रयोगार्थमाह- **सर्पिर्मे भूयादि**त्यादिना, तथा च स्वस्वामिकसर्पिरादेराशा वाच्येति भावः। **आशिष्येवेति नियमः किमिति**- विधिरेव स्वीक्रियतां नियमाश्रयणे किं फलमिति प्रष्टुराशयः। उत्तरयति- **याच्ञायां मा भूदिति**- आशीरर्थातिरिक्ते याचनार्थ एव विशेषतः प्रयोगादुक्तं याञ्चायां मा भूदिति, अन्यथोपतापैश्वर्ययोरपि व्यावृत्तिरुक्ता स्यात्। नन्वेवमाशिष्यनेनात्मनेपदविधानेऽन्यत्रार्थे च नियमसामर्थ्यात्मनेपदाप्रवृत्तौ 'नाथृङ्' इति ङिद्विशिष्टः पाठो व्यर्थः, ङित्त्वफलस्यात्मनेपदस्य निवृत्तत्वादिति चेदत्राह- **ङित्करणं त्वस्यानप्रत्ययार्थमिति** "इङितो व्यञ्जनाद्यन्तात्" [५. २. ४४.] इति सूत्रेणानप्रत्ययविधानार्थं ङित्त्वं चरितार्थमिति भावः। नन्वेवं भारविकविकृतौ किरातार्जुनीये महाकाव्ये मायाशुकरशरीरघातिबाणमुद्दिश्य कपटकिरातशिवदूतस्यार्जुनं प्रति- "नाथसे किमु पतिं न भूभृताम्" इति वाक्ये कथमात्मनेपदप्रयोग इति चेदत्र प्रामाणिकाः "नाथसे" इत्येव पाठस्तत्रोचित इति, तथा च "नाथृङ्" धातुरपि याञ्चार्थे पठितस्तस्यैवायं प्रयोगो न तु नाथतेः, नाथतेरेव प्रयोग इत्याग्रहे तु "निरङ्कुशाः कवयः" इति, "छन्दोवत् कवयः कुर्वन्ति" इति वा शरणम् ॥ ३. ३. ३६ ॥

## भुनजोऽत्राणे ॥ ३. ३. ३७. ॥

**त० प्र० — त्राणात् - पालनादन्यत्रार्थे वर्तमानाद् भुनक्तेः कर्तर्यात्मनेपदं भवति। ओदनं भुङ्क्ते, परिभुङ्क्ते। अत्राण इति किम्? महीं भुनक्ति, पालयतीत्यर्थः; "अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्" इत्यत्र तु न पालनं भुजेरर्थः, किन्तु पालननिमित्तक उपकारः, धातूनामनेकार्थत्वात्, पालनेन महीमुपकृतवन्तौ महाश्रयं फलं स्वीकृतवन्ताविति वेत्यर्थः। उभयपदिनमेनमन्ये मन्यन्ते। भुनजिति श्नानिर्देश "भुजोंत् कौटिल्ये" इत्यस्य निवृत्त्यर्थः- ओष्ठौ निर्भुजति, कुटिलयतीत्यर्थः ॥३७॥**

**श०म० न्यासानुसन्धानम्—भुनजो०।** 'भुनज्' इति "भुजप् पालनाभ्यवहारयोः" इति पठितस्य रौधादिकस्य ग्रहणं श्नेन निर्देशात्, तत्फलं वक्ष्यति। त्राणं पालनं, तद्भिन्नमत्राणं, भक्षणमभ्यवहारः, तस्मिन्नर्थे वर्त्तमानात्। यद्यपि त्राणादन्यत्रार्थे इत्येव लभ्यते, संयोगवद् विप्रयोगस्यापि विशेषावगतिहेतुत्वमिति सिद्धान्तात् त्राणादन्यस्य त्राणविपरीतस्य भक्षणस्यैव ग्रहणं, प्रकृतधातोरर्थद्वय एव पाठात्। एवं च कौटिल्यार्थस्य भुजतेर्ग्रहणं वारितं स्यादिति श्नेन निर्देशोऽनावश्यक इति प्रतिभाति, तथापि उपकारोपभोगप्रभृत्यर्थेऽपि आत्मनेपदस्येष्टत्वेन त्राणादन्यस्य भक्षणमात्रस्य ग्रहणमित्यङ्गीकारे च तदप्राप्त्या न तादृशार्थसङ्कोच इष्ट इति सूचयितुमेव श्नेन निर्देश इति बोध्यम्। उदाहरति- **ओदनं भुङ्क्ते** इति- अत्र त्राणादन्यस्मिन्नभ्यवहारार्थे धातोर्वर्तमानत्वेन तत आत्मनेपदे- भुङ्क्ते इति रूपम्। अत्रोपसर्गपूर्वकस्य तद्रहितस्य च सामान्येन ग्रहणं विशेषानुपादानादिति सूचयितुमुपसर्गपूर्वकमप्युदाहरति - **परिभुङ्क्ते** इति। भुनजेः प्राय आत्मनेपद एव प्रयोगदर्शनात् सामान्येन विधीयतामपालने इति प्रतिषेधो व्यर्थ इत्याशयवान् पृच्छति- **अत्राण इति किमिति** न केवलमस्य आत्मनेपद एव प्रयोगः परस्मैपदेऽपि पालनार्थे प्रयोगस्य दर्शनात्, अन्यथा परस्मैपदिषु पाठस्य वैयर्थ्यप्रसङ्गादिति

"Aho Shrutgyanam"

पालनादन्यत्रैवात्मनेपदं स्यान्न तु पालन इति तदर्थं सूत्रेऽत्राण इत्यावश्यकमिति व्यावर्त्यमाह- **महीं भुनक्ति** इति । अत्र योऽर्थस्तमाह- **पालयतीत्यर्थः** इति, तथा च नात्रात्मनेपदमिष्टमिति भावः । ननु क्वचित् पालनार्थेऽपि प्रयोगे आत्मनेपदं दृश्यते तत कथममुपपद्यत इति शङ्कां मनसि निधाय तत्समाधानमाह- **"अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्" इत्यत्र त्विति**, अत्र "अरिषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः" इति पूर्वार्धमपि योज्यमन्यथा बुभुजाते इति द्विवचनोपपत्तिर्न स्यात्, अम्बरीष-नाभागयोरैकाधिकरण्यादेकव्यक्तिवाचकत्वात्, तत्र हि अम्बरीष इति राजनाम, नाभाग इति वंशकीर्त्तनं विशेषणार्थमन्यस्य प्यम्बरीषनाम्नो राज्ञः संभवात्, अत्र च कर्मणो मह्या भक्षणाद्यसंभवाद्रक्षणमेवार्थं इति कथमत्रात्मनेपदमिति शङ्कायाम्- **अत्र तु न पालनं भुजेरर्थः** इत्याद्युत्तरम्, प्रकृतप्रयोगे भुजेर्न पालनार्थत्वम्, किन्तु पालननिमित्तक उपकार इति तत्र उपकारमात्रे धातोर्वृत्तिः, पालनं त्वर्थत उपलभ्यते, पालनादन्यस्योपकारस्यासभवादिति न धातोः पालनार्थे वृत्तिः, तथा च कथं प्रकृतार्थं इति चेत् ? तदाह- **धातूनामनेकार्थत्वादिति**- अनेकार्था हि धातवो भवन्तीति पालनाभ्यवहारादन्यस्मिन्नप्यर्थेऽस्य वृत्तौ क्षत्यभावात् । एव पालननिमित्तके उपकारार्थे स्थिरीकृते प्रकृतप्रयोगार्थमाह- **पालनेन महीमुपकृतवन्ताविति** । बहूनां मत इहोपभोगो भुजेरर्थो न तूपकार इति तन्मतसाधारण्येनार्थमाह- **मह्याश्रयं फलं स्वीकृतवन्ताविति वेति**- अत्र हि अरिषड्वर्गत्यागस्य फलरूपतयाऽग्रिमोऽर्थोऽभिधेयः, अरिषड्वर्गस्य- काम-क्रोध-लोभ-मोह-मद-मात्सर्याणां त्यागेन जितेन्द्रियतया च जामदग्न्याऽम्बरीषौ बहुकालपर्यन्तं मह्याश्रयं फलमुपभुक्तवन्ताविति हि विवक्षितोऽर्थः, केवलं महीपालस्य पुरुषार्थतया महीपालनलभ्यतदाश्रितफलोपभोगस्यैव तत्फलत्वेन—अरिषड्वर्गत्यागफलत्वेन कथनस्य युक्तत्वात् । एवं-"बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्" इत्यत्राप्युपभोग एव भुजेरर्थो न पालनमित्युक्तं **दीक्षितेन** सिद्धान्तकौमुद्यामात्मनेपदप्रक्रियायाम् । मतान्तरेण प्रकृतप्रयोगसमाधानमाह- **उभयपदिनमेनमन्ये मन्यन्ते** इति, अस्यायमाशयः- केषांचित् [पागिनीयव्यतिरिक्तानां] वैयाकरणानां मते भुनजिरुभयपदी, तस्मात् कर्तृगामिनि क्रियाफले तु पालनेऽपालने च सर्वत्रात्मनेपदं भवत्येव, अपालने अकर्तृगेऽपि क्रियाफले आत्मनेपदार्थं प्रकृतसूत्रमिति "अम्बरीषश्च नाभागो बुभुजाते महीं चिरम्" इति "बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्" इति च प्रयोगः पालनेऽपि कर्तृगामिक्रियाफलविवक्षायां साध्वेव, यत्र च क्रियाफलं परगामि तत्र केवलमपालनार्थ एवात्मनेपदप्रयोग इति । परं तु स्वमतेऽस्य केवलपरस्मैपदित्वेनोक्तरूपेणोपकारोपभोगाद्यार्थपरत्वेन व्याख्यानमेव श्रेय इति बोध्यम् । ननु "भुजोऽत्राणे" इत्येव सूत्रमस्तु संभवत्राणार्थस्य रौधादिकस्यैव ग्रहणं स्यात् संयोगविप्रयोगयोर्विशेषावगतिहेतुत्वस्य स्वीकृतत्वादिति चेदत्राह- **भुनजिति श्येननिर्देशो "भुजोंत् कौटिल्ये" इत्यस्य निवृत्त्यर्थः** इति- सत्युपायान्तरे न्यायाश्रयणस्यानौचित्येन तथा [श्येन] निर्देश एव तद्वारणार्थमुचित इति भावः । **केचित्** तु * निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणम् * इति न्यायेनौकारानुबन्धस्य "भुजोंत् कौटिल्ये" इत्यस्य ग्रहणं वारयन्ति, तन्न युक्तम् भुजिति सामान्यनिर्देशो न निरनुबन्धत्वसूचकोऽनुबन्धेन धातुनिर्देशस्य क्वाचित्कत्वात्; यथाकथञ्चिद्रौधादिकस्यापि सानूबन्धत्वाच्च । कौटिल्यार्थकस्योदाहरणमाह- **ओष्ठौ निर्भुजती**ति- अत्र हि परस्मैपदमेव भवति नात्मनेपदमिति तद्व्यावृत्तये उपायान्तराश्रयणात् श्नेननिर्देश एव लाघवमिति भावः । प्रयोगार्थमाह- **कुटिलयतीत्यर्थः** इति- भावविशेषसूचनार्थमोष्ठयोः कुटिलीकरणस्य दर्शनादिति ।। ३. ३. ३७. ।।

## हृगो गतताच्छील्ये ।। ३. ३. ३८. ।।

**त० प्र० — गतं प्रकारः सादृश्यमनुकरणमित्येकोऽर्थः, तच्छीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम्, उत्पत्तेः प्रभृत्याविनाशात् तत्स्वभावता । हरतेः प्रकारताच्छील्येऽर्थे वर्तमानात् कर्तर्यात्मनेपदं भवति । शब्दशक्तिस्वाभाव्याच्चानुपूर्व एव हरतिर्गतताच्छील्ये वर्तते । पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते, पितुरागतं मातुरागतं गुणविषयं क्रियाविषयं वा सादृश्यमविकलं शीलयन्तीत्यर्थः । एवं- पितुरनुहरते, पितरमनुहरते; मातुरनुहरते, मातरमनुहरते । गतग्रहणं किम् ? पितुर्हरति, मातुर्हरति । ताच्छील्य इति किम् ? नटो राममनुहरति, नटो हि कञ्चिदेव कालं राममनुकरोतीत्यसातत्ये न भवति । यद्वा गमनं गतं, तस्य पित्रादेः शीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम्, गतेन- गमनेन ताच्छील्यं तस्मिन्नर्थे वर्तमानाद्धरतेः कर्तर्यात्मनेपदं भवति । पैतृकमश्वा अनुहरन्ते, पितुरागतं गमनमविच्छेदेन शीलयन्तीत्यर्थः । एवं- पितुरनुहरते, पितरमनुहरते गतताच्छील्य इति किम् ? धर्मान्तरेण पितरमनुहरन्ति । अथवा गते- गमने ताच्छील्ये च वर्तमानाद्धरतेरात्मनेपदं भवति- पैतृकमश्वा अनुहरन्ते, तद्वद् गच्छन्ति तद्वच्छीलन्ति वेत्यर्थः ।। ३७ ।।**

"Aho Shrutgyanam"

**श०म० न्यासानुसन्धानम्—हृगो०** । 'हृगः' इति "हृंग् हरणे" इति भ्वादिषु पठितस्य निर्देशः । गतताच्छील्यशब्दमनेकधा व्याख्याति– **गतं प्रकार** इत्यादिना, गम्यते सादृश्येन ज्ञायते इति गतं, तच्च धर्मिगतोऽन्यप्रतियोगिकसादृश्यवान् धर्म एव, स एव च धर्मिणि प्रकारीभूय भासते, अत एव प्रकारशब्दं सादृश्येन प्रतिशब्दयति । उभयोरपि सत्त्वरूपत्वादसत्त्वार्थकधातुवाच्यताऽसम्भविनीति संदिहान आह– **अनुकरणम**िति, तथा च क्रियारूपतासिद्धिः । ताच्छील्यशब्दं व्याचष्टे– **तच्छीलस्ये**त्यादिना, तदिति पदेन गतशब्दोपस्थापितोऽर्थो गृह्यते, तद्गतं, शीलं– स्वभावो यस्य स तच्छीलस्तस्य भाव इत्यर्थे "पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि" [ ७. १. ६०. ] इति ट्यणि– ताच्छील्यमिति, ताच्छील्यशब्दं व्युत्पाद्यार्थमाह– **उत्पत्तेः प्रभृत्याविनाशात् तत्स्वभावते**ति– जन्मप्रभृति मृत्युपर्यन्तं यः प्रकारो यत्र वर्त्तते स एव शीलशब्देन स्वभावशब्देन वा व्यवह्रियत इति तद्भाव एव ताच्छील्यमिति भावः । तथा च सूत्रार्थमाह– **हरतेः प्रकारताच्छील्येऽर्थे वर्त्तमानाद**िति । ननु हरतेस्तादृशेऽर्थे प्रयोगो न दृष्ट इति कथं तस्य तादृशेऽर्थे वर्त्तमानता संभाव्यत इति चेदत्राह– **शब्दशक्तिस्वाभाव्याच्चानुपूर्व एव हरतिर्गतताच्छील्ये वर्त्तते**, अयमाशयः– केवलस्य हरतेर्गतताच्छील्ये प्रयोगाभावेऽपि अनुपूर्वो हरतिस्तादृशेऽर्थे वर्त्तते, हरतेर्हरणार्थस्य पश्चाद्भावद्योतकेनानुना योगे कथं तादृशार्थप्रतिपादकतेति चेदत्राह – **शब्दशक्तिस्वाभाव्याद**िति । अयमाशयः– 'अनित्याः शब्दशक्तयः' इत्यभियुक्तोक्तदिशा हरतेरनोश्च प्रातिस्विकरूपेण तादृशार्थाबोधकत्वेऽप्युभयोः सह प्रयोगे भवति गतताच्छील्यार्थाप्रतीतिरिति स्वभावः, स्वभावश्च न पर्यनुयोगमर्हति, अन्यथा कथं वह्नेर्दाहिकता कथमपां शीततेत्यपि पर्यनुयोगः स्यात् । अन्ये तु – केवलोऽपि हरतिस्ताच्छील्ये वर्तते, यथा – पितुर्हरतीति, परं गतताच्छील्येऽनुपूर्व एव गतताच्छील्य एवानुपूर्वो हरतिरिति वैपरीत्य तु न स्वीकार्यं नटो राममनुहरतीत्यादौ गतताच्छील्य विनापि सादृश्यानुकरणेऽनुहरतिप्रयोगदर्शनादित्याहुः, तथा च हरतेस्ताच्छील्ये शक्तिः प्रसिद्धैव, अनुना गतताच्छील्यं द्योत्यत इति लभ्यते ।

उदाहरति—**पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते** इति– अत्र गतताच्छील्यस्य विवक्षितत्वादात्मनेपद भवति । प्रयोगार्थं ग्राहयति– **पितुरागतं पैतृकम्**, आगतमित्यर्थे योनिसम्बन्धवाचिनः पितृशब्दात् "ऋत इकण्" [ ६. ३. १५२ ] इतीकण् "ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक्" [ ७. ४. ७१ ] इतीतो लुकि आदिस्वरवृद्धौ– पैतृकमिति, एवं– **मातृकमि**ति, अश्वा जन्मसम्बन्धेन पितुरागतं गुणविषयं सात्त्विकत्वादि क्रियाविषयं वाक्पाणिपादसंचालनादिविशेषं सादृश्यमविकलं साकल्येन शीलयन्ति– आकलयन्तीत्यर्थः, एवं गावोऽपि मातुरागतं गुणादिसादृश्यं जन्मत आरभ्याविनाशं धारयन्तीत्यर्थः, प्रकारसादृश्याऽनुकरणानां वस्तुत ऐक्येऽपि शब्दशक्तिस्वाभाव्यादेव शाब्दिकप्रतीतौ भेदः, तथा च प्रकारत्वेन गतस्य विवक्षायामिदमुदाहरणम् । सादृश्येन विवक्षायामाह– **पितुरनुहरते** इति, अनुकरणत्वेन विवक्षायामाह– **पितरमनुहरते** इति, सादृश्यानुशीलनविवक्षायां पितुः कर्मत्व नास्तीति सम्बन्धसामान्ये षष्ठी, अनुकरणानुशीलनविवक्षायां च तस्य कर्मत्वमिति द्वितीया । एवं– **मातुरनुहरते** इत्यादावपि बोध्यम् । **गतग्रहणं किमि**ति– ताच्छील्येनैव तद्गतगुणादिपरिशीलनस्य प्रतीतौ प्रकारादिबोधकगतशब्दोपादानं व्यर्थमिति प्रष्टुराशयः । व्यावर्त्यमाह– **पितुर्हरति, मातुर्हरती**ति– अत्र पैतृकस्य धनादेर्हरणं शीलयतीत्यर्थप्रतीतावपि गतानुशीलनं न प्रतीयत इति न भवत्यात्मनेपदम्, गतग्रहणाभावे तु तत्रापि स्यादेव तत्, नन्वस्तु प्रकृते आत्मनेपदवारणार्थं गतग्रहणं, ताच्छील्यग्रहणमेव त्यजतामिति शङ्कते– **ताच्छील्य इति किमि**ति । प्रत्युदाहरति– **नटो राममनुहरती**ति, अत्र गतानुकरणसत्त्वेऽपि ताच्छील्यं नास्तीति प्रतिपादयति– **नटो हि कश्चिदेव कालं राममनुकरोतीत्यसातत्ये न भवति** इति, अयमाशयः– नटो नाट्यावसर एव रामभूमिकां प्राप्य तदीयं प्रकारमनुकरोति, अन्यदा तु स स्वभाव एव तिष्ठतीति न उत्पत्तिप्रभृत्याविनाशात् तत्स्वभावता तस्येति ताच्छील्याभावादिह न भवत्यात्मनेपदम्, ताच्छील्यग्रहणाभावे च गतानुकरणसत्त्वात् तद्दुर्वारं स्यादिति तद्वारणाय ताच्छील्य इत्यावश्यकमिति ।

गतताच्छील्यशब्दं प्रकारान्तरेण व्याचष्टे– **यद्वे**ति, **गमनं गतम**िति– गमेर्भावे क्लीबे क्तः । तदिति पदेन प्रकृतं गत न ग्राह्यमपि तु बुद्धिस्थोऽनन्तरमुच्चारितश्च पित्रादिरित्याह– **तस्य पित्रादेः शीलमस्ये**ति– पित्रादेः शीलस्य पित्रादावेव वर्तमानत्वेन पुत्रादौ तदभावात् तत्सदृशं शीलमित्यर्थो विवक्षितः, तथा च पित्रादिसदृशं शीलमस्येति तच्छीलः, तस्य भावस्ताच्छील्यम् । गतशब्देन सह तृतीयासमास इत्याह– **गतेन गमनेन ताच्छील्यम**िति– गमनहेतुकं तत्सादृश्यानुशीलनमिति भावः । तथा च सूत्रार्थमाह– **तस्मिन्नर्थे वर्त्तमानाद**िति । प्रकृतव्याख्या-

"Aho Shrutgyanam"

नुसारं प्रयोगार्थं प्रदर्शयितुं प्रयोगस्वरूपं पुनराह– **पैतृकमश्वा अनुहरन्ते** इति । प्रयोगार्थमाह– **पितुरागतं गमनमविच्छेदेन शीलयन्तीत्यर्थः** इति – यादृशं गमनं पितुर्यासीत् तादृशमेव जन्मसम्बन्धात् तैर्लब्धं, तदेव धारयन्त्याविनाशमिति भावः । उदाहरणान्तरमपि पूर्ववदेवाह– **पितुरनुहरते, पितरमनुहरते** इति । **गतताच्छील्य इति किमिति**– पूर्वोक्तप्रकारेण व्याख्यातस्य गतताच्छील्यस्य ग्रहणं किमर्थमिति प्रश्नः । गतमात्रेण ताच्छील्ये स्यादन्यधर्मेण ताच्छील्ये मा भूदित्येतदर्थं तद्ग्रहणमित्याह – **धर्मान्तरेण पितरमनुहरन्तीति**– धर्मान्तरं गतादन्यो धर्मो वागक्षिव्यापारादिस्तेन पितरमनुकरोतीत्यर्थः, अत्रात्मनेपदं नेष्टं, गतेन ताच्छील्यमित्यर्थकगतताच्छील्यग्रहणाभावे च स्यादेवेति तद्ग्रहणमावश्यकम् ।

पुनरपि प्रकारान्तरेण गतताच्छील्यशब्दं व्याचष्टे– **अथवा गते-गमने ताच्छील्ये चेति**, तथा च गतशब्दस्य ताच्छील्यशब्दस्य चानन्तरपूर्वप्रकारवर्णित एवार्थः केवलमुभयोः पार्थक्येनार्थबोधकत्वम्, तथा चार्थद्वये आत्मनेपदविधानं फलति, तथा चोत्पत्तेः प्रभृत्याविनाशात् तत्स्वभावता न ताच्छील्यमपि तु तत्सादृश्यमात्रम् । गतार्थेऽपि सादृश्यद्योतको वतिर्योजनीयः, परार्थे प्रयुज्यमानः शब्दो वतिं विनापि वत्यर्थं गमयति– यथाऽपण्डिते पण्डितोऽयमिति प्रयोगे पण्डितवदयमिति प्रतीतिर्भवति । तथा चोदाहरति– **पैतृकमश्वा अनुहरन्ते** इति । प्रयोगार्थमाह – **तद्वद्गच्छन्ति, तद्वच्छीलन्ति वेत्यर्थः** इति– पितुरागतं गमनं यथा स्यात् तथा गच्छन्ति, पितुरागतं यथा स्यात् तथा शीलन्तीति तदर्थः । एवं च पैतृकशब्दस्य क्रियाविशेषणत्वमिति व्याख्यातारः । परं त्वेवं सति पितुरनुहरन्ति पितरमनुहरन्तीत्यादि प्रयोगा न स्युः, तत्र पित्रादीनां क्रियाविशेषणत्वासम्भवात् । तथा च पैतृकमश्वा अनुहरन्ते इत्यत्रापि पितुरागतं गमनं कुर्वन्ति, यथा पितुर्गमनं तथा गच्छन्तीत्यर्थः, तथा च तद्वत् गच्छन्तीत्यार्थिकोऽर्थः । एवं– पितुरागतं शीलं धारयन्तीति ताच्छील्येऽर्थः, तद्वच्छीलन्तीत्यार्थिकोऽर्थः, इति वयम् । इत्थं च प्रकारत्रयेण गतताच्छील्यशब्दव्याख्यानमुक्तम्, एतच्च संभवप्रदर्शनमात्रम्, वस्तुतस्तु गतताच्छील्यस्य प्रकारानुशीलनमेवार्थः, तेन च स्वेषामर्थानां सङ्ग्रहोऽपि सुकरः, गतेन ताच्छील्यमपि प्रकारानुशीलनस्यैव विशेषः, गतसादृश्यं शीलसादृश्यं चा[तृतीयव्याख्यालभ्यम्]पि प्रकारानुशीलनान्नान्यदिति तदेव व्याख्यानं मुख्यमन्यद् व्याख्यानद्वयं ग्रन्थप्रपञ्चार्थमेवेत्यवधेयम् ॥ ३. ३. ३८. ॥

## पूजा-ऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विगणन-व्यये नियः ॥ ३. ३. ३९. ॥

**त० प्र० — पूजाऽऽचार्यक-भृतिषु यथासंख्यं कर्म-कर्तृ-धात्वर्थविशेषणेषु गम्यमानेषु, उत्क्षेपादिषु च धात्वर्थेषु वर्तमानान्नयतेः कर्तर्यात्मनेपदं भवति । पूजा–सन्मानः– नयते विद्वान् स्याद्वादे, प्रमाणव्यापारवित् स्याद्वादे जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य शिष्यबुद्धिं प्रापयतीत्यर्थः ते युक्तिभिः स्थिरीकृताः पूजिता भवन्ति । आचार्यस्य भावः कर्म वा-ऽऽचार्यकम्, माणवकमुपनयते, स्वयमाचार्यो भवन् माणवकमध्ययनाया-ऽऽत्मसमीपं प्रापयतीत्यर्थः । भृतिः– वेतनम्, कर्मकरानुपनयते, वेतनेनात्मसमीपं प्रापयतीत्यर्थः । उत्क्षेपः– ऊर्ध्वं नयनम्, शिशुमुदानयते, उत्क्षिपतीत्यर्थः । ज्ञानं–प्रमेयनिश्चयः, नयते तत्त्वार्थे, तत्र प्रमेयं निश्चिनोतीत्यर्थः । विगणनम्–ऋणादेः शोधनम्, मद्राः कारं विनयन्ते, राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । व्ययो धर्मादिषु विनियोगः, शतं विनयते सहस्रं विनयते, धर्मार्थं तीर्थादिषु विनियुङ्क्त इत्यर्थः । एतेष्विति किम् ? अजां नयति ग्रामम् । गित्वादफलवदर्थ आरम्भः ॥ ३९ ॥**

**श०म० न्यासानुसन्धानम्—पूजा०** । अत्रोत्क्षेपज्ञान-विगणन-व्यया नयतेर्वाच्याः इतरे प्रयोगोपाधयः, तत्र कोऽर्थः कुत्रान्वेतीति जिज्ञासायामाह– **पूजाऽऽचार्यकभृतिषु यथासंख्यं कर्म-कर्तृ-धात्वर्थविशेषणेष्विति**– अत्र पूजा कर्मविशेषणीभूय नयत्यर्थविशेषणीभवति, सर्वेषां कारकाणां क्रियाविशेषणत्वेन तद्विशेषणानामपि परम्पराक्रियाविशेषणत्वात्, आचार्यकम्– आचार्यस्य कर्म, तच्च कर्तुराचार्यस्य विशेषणीभवद् धात्वर्थेऽन्वेति, एवं–भृतिः साक्षादेव धात्वर्थविशेषणम् । इतरे च धातुवाच्या एवेत्याह– **उत्क्षेपादिषु धात्वर्थेष्विति** । पूजाशब्दस्य देवाद्युद्देश्यकभक्तिविहितस्रक्चन्दनादिसमर्पणकर्मण्येव रूढत्वादिह तस्य कोऽर्थ इति जिज्ञासायामाह– **पूजा–सन्मानः** इति सन्मानशब्दापेक्षयाऽत्र संमानशब्द एवोपयुक्तः, सम्यङ् माननं हि संमानः, सँश्चासौ मानः सन्मान इति संमान- सन्मानयोर्भेदेन प्रकृते एकशब्देनैव पूजार्थस्य वक्तव्यतया संमानशब्दस्यैवौचित्याद् व्याकरणान्तरसंवादाच्च । **नयते विद्वान् स्याद्वादे** इति– शिष्यमिति कर्मानुक्तम्, नयतेर्द्विकर्मकत्वेनैकस्य कर्मणः स्याद्वादपदार्थस्याधिकरणत्वविवक्षया सप्तमी । प्रयोगार्थं विशदय्य ग्राहयति– **प्रमाणव्यापारविदित्यादिना**, 'विद्वान्'

"Aho Shrutgyanam"

इत्यस्यार्थः– प्रमाणव्यापारविदिति, प्रमाणानां प्रमितिकरणानामागमादीनां व्यापारमर्थग्राहकताशक्तिं यो वेत्ति स एव विद्वान् । 'स्याद्वादे' इत्यस्य स्याद्वादस्थितपदार्थपरत्वमित्याह– **जीवादीन् पदार्थानिति–** आदिपदेन अजीवाऽऽस्रव-संवर-निर्जर-बन्ध-मोक्षा विज्ञेयाः, एषामेव सप्तपदार्थानां विज्ञानं स्याद्वादप्रतिपाद्यम्; संक्षेपतस्तु द्वौ पदार्थौ जीवोऽजीवश्च, आस्रवादीनामजीव एवान्तर्भावात्, जीवाऽजीवौ भोक्तृ-भोग्यौ, विषयाभिमुख्येनेन्द्रियाणां प्रवृत्तिरास्रवः; तां प्रवृत्तिं संवृणोतीति संवरो यम-नियमादिः, निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः, बन्धोऽष्टविधं **कर्म,** तत्र घातिकर्मचतुर्विधम्, तद्यथा– ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमन्तरायमिति, तथा चत्वार्यघातिकर्माणि, वेदनीयं नामिकं गोत्रिकमायुष्कं चेति, तदेतत् कर्माष्टकं पुरुषं बध्नातीति बन्धः, विगलितसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरि देशावस्थानं मोक्ष **इत्येके, अन्ये** तूर्ध्वगमनशीलो हि जीवो धर्मास्तिकायेन बद्धस्तद्विमोक्षाद् यदूर्ध्वं गच्छत्येव स मोक्ष इत्याहुः । एतान् सप्त पदार्थान् **युक्तिभिः** सप्तभङ्गीनयादिभिः, **स्थिरीकृत्य** संशयादिरहितत्वेन व्यवस्थाप्य, **शिष्यबुद्धिं प्रापयति** शिष्यं बोधयतीत्यर्थः । अत्र कर्मणः पूजामाह–**ते युक्तिभिः स्थिरीकृताः पूजिता भवन्तीति–** ते शिष्याः पदार्थाश्च, उभयोरपि कर्मत्वेन तत्पदग्राह्यत्वात् पूजाविषयत्वाच्च, पदार्था अपि स्थिरतां प्राप्यैव संमान लभन्ते, शिष्या अपि स्थिरीकृतपदार्था एव लोके संमानपात्रतां यान्ति । इत्थं पूजाविषयमुदाहरणं व्याख्यायाचार्यकविषयमुदाहरणं वक्तुमाचार्यकपदं व्याचष्टे– **आचार्यस्य भावः कर्म वेति–** आचार्यशब्दाद् भावे कर्मणि वार्थे "योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्" [ ७. १ ७२. ] इत्यकञ्, अत्र चाचार्यस्य कर्मण्येवाचार्यकशब्दप्रयोगस्तस्यैवार्थस्य प्रकृतोपयोगित्वादित्यन्यत् । सूत्रे च केवलस्य नियो ग्रहणं साधारण्येनोपसृष्टानुपसृष्टोभयपरिग्रहार्थमित्याचार्यके केवलस्य नियोऽप्रयोगादुपोपसृष्टस्योदाहरणमाह– **माणवकमुपनयते** इति– उपपूर्वान्नयतेराचार्यकर्मवत् कर्तृयोगादात्मनेपदम् । प्रयोगार्थमाह – **स्वयमाचार्यो भवन्निति** – स्वस्मिन्नाचार्यत्वं भावयन् माणवकं बटुं शिष्यमात्मसमीपं नयतीति प्रयोगार्थः । केवलमात्मसमीपे नयनेनाचार्यकं न प्रादुर्भवत्यपि तु आचारादिशिक्षणेनेत्याह– **अध्ययनायेति**– शिष्योऽधीते, तमात्मसमीपं नीत्वाऽध्यापनेन स्वस्मिन्नाचार्यकमुत्पादयतीत्यर्थः । भृतिशब्दार्थमाह–**भृतिः– वेतनमिति**– भ्रियन्तेऽनया कर्मकरा इति भृतिः पारिश्रमिकरूपेण दीयमानं द्रव्यं, तदेव वेतनशब्देनाभिधीयते । **कर्मकरानुपनयते इति–** अत्र भृतिर्न कर्मभूतानां कर्मकराणां नवा भर्तुर्विशेषणमपि तु धात्वर्थविशेषणमेव, भृतिदानपूर्वकं यथा स्यात् तथोपनयत इत्यर्थात्, तथा च धात्वर्थविशेषणीभूतायां भृतौ विवक्षितायामात्मनेपदमनेन विधीयते । तथा च प्रयोगार्थमाह– **वेतनेनात्मसमीपं प्रापयतीत्यर्थः** इति– वेतनपदं वेतनदानोपलक्षकं, वेतनदानेनात्मसमीपं प्रापयति. आत्मनः कर्मणि नियुङ्क्ते इत्यर्थः । उत्क्षेपणार्थं उदाहर्तुमुत्क्षेपपदार्थमाह– उत्क्षेपः–**ऊर्ध्वं नयनमिति**– उदित्यस्योर्ध्वार्थत्वात् क्षिपेः प्रेरणार्थत्वात् भावघञन्तस्य ऊर्ध्वनयनार्थत्वं सम्पद्यते । उदाहरति– **शिशुमुदानयते** इति– उत्-आङ्पूर्वकान्नयतेरात्मनेपदम्, यद्यपि केवलमुत्पूर्वकस्याप्यूर्ध्वनयनमर्थः संभवति तथापि नीचैःस्थस्योर्ध्वप्रदेशस्थापनार्थप्रतीतये आङोऽपि प्रयोगः । प्रयोगार्थमाह - **उत्क्षिपतीत्यर्थः** इति– उत्क्षेपपूर्वकं स्थापयतीत्यथः । ज्ञानशब्दस्यार्थप्रतिपत्तिरूपेऽर्थे प्रसिद्धत्वेऽपि प्रकृते विशिष्टार्थविवक्षया तदर्थमाह– **ज्ञानं– प्रमेयनिश्चयः** इति– ज्ञानस्य यथार्थाऽयथार्थभेदेन द्वैविध्यात् प्रकृते यथार्थज्ञानस्य निश्चयरूपस्यैव ग्रहणमिति प्रमेयस्य– प्रमाविषयीकर्तुमभिलषितस्य वस्तुनो निश्चयः– सन्देहराहित्येनाधिगतिर्ज्ञानशब्देन गृह्यत इति भावः । उदाहरति– **नयते तत्त्वार्थे** इति– तत्त्वार्थे इति सप्तमी विषयतायां, तथा च प्रयोगार्थमाह– **यत्र प्रमेयं निश्चिनोतीत्यर्थः** इति– तत्त्वार्थविषयं जिज्ञासित वस्तु प्रमाणेन यथार्थतया प्रतिपद्यत इत्यर्थः । विगणनार्थे उदाहरणात् पूर्वं विगणनशब्दार्थमाह– **विगणनम्– ऋणादेः शोधनमिति–** ऋणम् उत्तमर्णायावश्यं प्रत्यर्पणीयं द्रव्यम्, आदिपदेन तादृशमेवावश्यदेयं वस्तु गृह्यते, तस्य शोधनमपाकरणं प्रत्यर्पणं दानेन स्वाच्छन्द्यप्राप्तिर्वा । उदाहरति– **मद्राः कारं विनयन्ते** इति– मद्राः– मद्रदेशोद्भवा जनाः, कारं– राज्ञे देयं द्रव्य, तत्तद्वस्तुषु प्रतिनियतं राज्ञा ग्राह्यं षष्ठांशादिकं दानेन शोधयन्तीत्यर्थमाह– **राजग्राह्यमि**त्यादिना । व्ययशब्दार्थमाह– **व्ययो धर्मादिषु विनियोगः** इति– धर्मः शुभजनकमदृष्टं तदुत्पादकं कर्म वा, आदिपदेनार्थोपार्जनादि गृह्यते, तदर्थं द्रव्यस्य समर्पणं व्ययशब्देनोच्यत इत्यर्थः । उदाहरति– **शतं विनयते, सहस्रं विनयते,** इत्यादि । प्रयोगार्थमाह– **धर्मार्थं तीर्थादिषु विनियुङ्क्त इत्यर्थः** इति– शतेन सहस्रेण वा परिच्छिन्न द्रव्य धर्मोत्पत्त्यर्थमादिपदेन ख्यातियशोलाभार्थं वा तीर्थे आदिपदग्राह्येषु पूज्यजनसेवा-दीनजन-मरणादिषु च ददातीत्यर्थः । **एधिवति किमिति** – अर्थविशेषपरिग्रहेणात्मनेपदविधानं

"Aho Shrutgyanam"

किमर्थमिति प्रश्नः । अन्यत्राकर्तृगे क्रियाफले परस्मैपदमेव भवति, तत्रात्मनेपदाप्रवृत्त्यर्थमर्थविशेषपरिग्रह आवश्यक इति प्रत्युदाहरणेनाह- **अजां नयति ग्राममिति**- नयतेर्द्विकर्मकत्वेनाजाया ग्रामस्य च कर्मसंज्ञा, तत्राजा मुख्यं कर्म ग्रामो गौणः, अत्रात्मनेपदवारणायैतेषां ग्रहमावश्यकमिति भावः । ननु नयतेर्गित्त्वेनोभयपदित्वादात्मनेपदपरस्मैपदयोरुभयोरञ्जसैव प्रयोग इति न तदर्थं सूत्रस्यावश्यकत्वमिति चेदत्राह- **गित्वादफलवदर्थ आरम्भः** इति- गित्वात् फलवत्कर्त्तरि आत्मनेपदं प्राप्तमप्यफलवत्कर्त्तर्यपि तद् यथा स्यादित्येतदर्थमेव सूत्रमिदमारब्धम्, तथा चैष्वर्थेष्वफलवत्यपि कर्त्तर्यात्मनेपदमेव भवति न परस्मैपदमिति भावः ।। ३. ३. ३९. ।।

## कर्तृस्थामूर्ताप्यात् ।। ३. ३. ४० ।।

**त० प्र०—कर्तृस्थममूर्त्तमाप्यं- कर्म यस्य तस्मान्नयतेः कर्त्तर्यात्मनेपदं भवति । श्रमं विनयते, क्रोधं विनयते, शमयतीत्यर्थः । कर्तृस्थेति किम् ? चैत्रो मैत्रस्य मन्युं विनयति । अमूर्तेति किम् ? गडुं विनयति, घट्टं विनयति । आप्येति किम् ? बुद्ध्या विनयति । 'श्रमं विनयते' इत्यादौ श्रमापगमादेः फलस्य कर्तृसमवायित्वात् सिद्धे आत्मनेपदे नियमार्थं वचनम्, व्यवच्छेद्यं च प्रत्युदाहरणम् । शमयतिक्रियावचनादेव च नयतेरात्मनेपदं इष्यते न प्रापणार्थात्, यथा-**

**"शिवमौपयिकं गरीयसीं**
**फलनिष्पत्तिमदूषितायतिम् ।**
**विगणय्य नयन्ति पौरुषं,**
**विहितक्रोधरया जिगीषवः ।।१।।"[किराते]**

**यथा च कोपं शमं नयति, मन्युं नाशं नयति, प्रज्ञां प्रवृद्धिं नयति, बुद्धिं क्षयं नयति ।। ४० ।।**

**श० म० न्यासानुसन्धानम्—कर्तृ०**- 'नियः' इति पूर्वसूत्रादनुवृत्तं, तस्यैव विशेषणरूपमेकपदं सूत्रम् । नियः कर्त्तर्यात्मनेपदमिति हि प्रकरणलब्धं, तत्र कीदृशान्निय इत्याकाङ्क्षायामिदं सूत्रं विशेषणत्वेन सम्बध्यते । कर्तृस्थामूर्त्तात् पदस्यार्थं व्याचष्टे- **कर्तृस्थममूर्त्तमाप्यं यस्ये**त्यादि- कर्त्तरि तिष्ठतीति कर्तृस्थम्, कर्तृपूर्वकात् स्थः "स्था-पा-स्ना-त्रः कः" [ ५. १. १४२. ] इति कप्रत्यये कर्तृस्थपदं निष्पद्यते, तस्य कर्तृवृत्तीत्यर्थः, मूर्च्छ्यते- परिच्छिद्यते करचरणादिभिः शरीरारम्भकैस्तत्त्वैर्वेति मूर्त्तं शरीरं, तद्भिन्नममूर्त्तशरीरं मूर्त्तपदं चावयवादिपरिच्छिद्यमानपरमिति शरीरावयवानामपि स्वारम्भकावयवसमवेतत्वान्मूर्त्तत्वमेव; आप्यते- क्रियया प्राप्यते इत्याप्यं कर्म, कर्तृवृत्ति शरीर-शरीरावयवभिन्नं कर्म यस्य तादृशान्नयतेः कर्त्तरि प्राप्तमप्यात्मनेपदं पुनर्विधीयते, तेन चास्य नियमार्थत्वमित्यग्रे वक्ष्यति । उदाहरति- **श्रमं विनयते, क्रोधं विनयते** इति- श्रम-क्रोधयोः कर्तृस्थत्वमशरीररूपत्वं [अमूर्त्तत्वं] चास्तीति तादृशे कर्मणि सति भवत्यात्मनेपदम् । शरीरार्थकमूर्त्ततादात्म्यापन्नस्यैव कर्तृत्वादभेदे चाधाराराधेयभावस्यासंभवात् तादात्म्यसम्बन्धस्य वृत्त्यनियामकत्वाच्च मूर्त्तपदस्य स्वावयवपरत्वमिति पूर्वमुक्तम्, एवं सति मूर्त्तावयवानां समवायेन सम्बन्धेनाधाराधेयभावः संभवति तथा च श्रमादीनामिव गड्वादेरपि कर्तृस्थत्वसम्पत्तिपूर्वकं मूर्त्तत्वं सिद्ध्यतीति भवत्यग्रे व्यावृत्तिसंगतिः, एतदेव गमयितुं शरीरपदमपहाय मूर्त्तपदं गृहीतं सूत्रे गड्वादीनां स्वतोऽपि मूर्त्तत्वात् । **कर्तृस्थेति किमिति**- कर्मणि कर्तृस्थत्वं विशेषणं किमर्थमिति प्रश्नः । व्यावर्त्यमाह- **चैत्रो मैत्रस्य मन्युं विनयती**ति- अत्र नयतेः कर्ता चैत्रः, कर्म च मन्युमैत्रस्थमिति कर्तृस्थं कर्म नास्तीति न भवत्यात्मनेपदम् । यदि च कर्तृस्थेति विशेषणं नोपादीयते तर्हि अमूर्त्तं कर्मास्तीति भवतिप्राप्तिः, तद्वारणाय कर्तृस्थेति । विशेषणमावश्यकमिति भावः । **अमूर्त्तेति किमिति**- कर्तृस्थकर्मण इत्येवोच्यतां तावतापि 'चैत्रो मैत्रस्य मन्युं विनयति' इत्यत्रातिव्याप्तिः 'श्रमं विनयते' इत्यादावव्याप्तिश्च परिहृते स्यातामित्याशयः । **गडुं विनयति, घट्टं विनयति** इति- गडुः क्वचित् शरीरैकदेशे मांसग्रन्थ्यादिः, घट्टः संघर्षणजन्यः किणादिः, उभयोरपि मूर्त्तत्वमिति तत्र न भवत्यात्मनेपदम्, अमूर्त्तेति विशेषणाभावे च स्यादेव, तद्वारणाय तदावश्यकत्वमिति । **आप्यमिति किमिति**- तथा सति "कर्तृस्थामूर्तात्" इत्येव सूत्रं स्यात्, तदर्थश्च कर्तृवृत्तिमूर्त्तभिन्नात् परान्नियः कर्त्तर्यात्मनेपदमित्यर्थः स्यात्, नीधातुः क्रियावाची, क्रिया च कारकं विनाऽनुपपन्नेति कर्तृस्थामूर्तं किमपि कारकमेव ग्रहीष्यत इति कर्तृस्थामूर्त्तकर्मणोऽपि परत्वे 'श्रमं-विनयते' इत्यादौ निराबाधा प्रवृत्तिः, चैत्रो मैत्रस्य मन्युं विनयतीति, गडुं विनयतीति च व्यावृत्तं स्यादेवेत्याप्यपदं वृथैवेत्यर्थः । प्रत्युदाहरति- **बुद्ध्या विनयती**ति- बुद्धिहेतुकं विनयं प्राप्नोतीति तदर्थः । तथा चाविवक्षितकर्मत्वेन धात्वर्थोपसंगृहीतकर्मत्वेन वाऽकर्मकत्वमिति न कर्मणः प्रयोगस्यावश्यकत्वमिति कर्तृस्थामूर्त्तकर्मकत्वाभावादत्र न भवत्यात्मनेपदम् तदभावे च बुद्ध्या कर्तृस्थत्वममूर्त्तत्वं चास्त्येवेति तस्मात् परत्वसत्त्वादात्मनेपदस्य दुर्वारत्वं स्यात्; आप्यग्रहणे कृते तु प्रकृते आप्याभावात् न भवति ।

"Aho Shrutgyanam"

अथ सूत्रस्य वैयर्थ्योपपादनपुरःस्सरं नियमार्थत्वं प्रतिपादयति– **'श्रमं विनयते' इत्यादौ श्रमापगमादेः फलस्य कर्तृसमवायित्वादिति**, अयमाशयः– कर्तृस्थेऽमूर्त्ते कर्मणि सत्येवात्मनेपदं विधीयते नयतेः, नयतिश्चोभयपदी गित्वात्, ततश्च तस्मात् कर्तृसमवायिनि क्रियाफले सति "ईगितः" [ ३.३.७५. ] इत्यात्मनेपदं स्यादेव तादृशस्य कर्मणोऽवश्यं कर्तृसमवायित्वात् तद्विषयक्रियाजन्यफलस्यापि कर्तृसमवायित्वध्रौव्यात् । एवं च सिद्धे सत्यारभ्यमाणोऽय योगो नियमार्थ एव, नियमाकारश्च–नियश्चेदात्मनेपदं स्यात् तर्हि कर्तृस्थामूर्त्तण्यिदेव नान्यस्मात्, तेनान्यत्र कर्तृगामिन्यपि क्रियाफले न भवत्यात्मनेपदं, यथा– चैत्रो मैत्रस्य मन्युं विनयतीत्यादौ, अत्र हि यदि मैत्रश्चैत्रोपरि कुपितः, चैत्रश्च प्रणिपातादिना तदीयं मन्युं शमयति, तर्हि तत्फलं कर्त्तरि चैत्रेऽपि प्राप्तमेव, मैत्रमन्यव्यपगमाभावे तेन संभावितस्य भर्त्सन-ताडनादेर्वारणादिति सत्यपि कर्तृसमवायिनि क्रियाफले न भवत्यात्मनेपदम्, तदाह– **व्यवच्छेद्यं च प्रत्युदाहरणमिति ।** अथ क्वचित् क्वचित् प्रयोगे कर्तृस्थामूर्तकर्मणि सत्यप्यात्मनेपदं न दृश्यते, तदुपपत्त्यर्थमन्ये प्रकारान्तरेण चेष्टन्ते, स्वमते चाञ्जसैव तत्समाधानमाह– **शमयति क्रियावचनादेव च नयतेरात्मनेपदं दृश्यते न प्रापणार्थादिति**, अयमाशयः– न व्याकरणेन किमपि नवीनं शब्देषूत्पाद्यतेऽपि तु यथास्थितः प्रयोग एव साधुत्वादिना व्युत्पाद्यते शिष्यावबोधार्थम्, तथा च यथा प्रयोगः शिष्टैः कृतस्तमेवानुसरत्यनुशासनम्, शिष्टैश्च शमयत्यर्थकादेव नयतेरात्मनेपदं प्रयुज्यते इति तादृशार्थत्वे सत्येवामूर्त्तकर्मणो नयतेरात्मनेपदं स्यान्न तु प्रापणार्थात्, सत्यपि तथाभूते कर्मणीति क्वचित् कविप्रयोगे यद्यात्मनेपदं न दृश्यते, तर्हि तत्र तस्य प्रापणार्थत्वं विवक्षितमिति समाधेयमिति भावः । एतच्च **भारवि**प्रयोगेण समर्थयति– **यथा– शिवमौपयिकमिति**, इदं पद्यं किरातार्जुनीयकाव्ये तृतीयसर्गे शत्रून् प्रतिक्रुद्धं युद्धेनैव दुर्योधनादयः साधनीया नान्यथेति बहुसंरम्भेणोक्तवन्तं भीमसेनं प्रति युधिष्ठिरस्य वचनम् ।

"विजितक्रोधरयाः जिगीषवः,
गरीयसीम् अदूषितायतिम् ।
फलनिष्पत्तिं विगणय्य पौरुषं
शिवमौपयिकं नयन्ति ॥"

इत्यन्वयः । विजितः क्रोधस्य रयो वेगो यैस्तादृशाः, जिगीषवः– स्वशत्रूनभिभवितुमिच्छवो जनाः गरीयसीं– क्रियमाणोपायजन्यहान्यपेक्षयातिशयगुर्वी बहुश्रेष्ठामिति यावत्, तथा अदूषितायतिं– निरवद्योत्तरकालाम्, फलनिष्पत्तिं– कृतोपायजन्यफलसिद्धिं, विगणय्य–निश्चित्य, पौरुषं– स्वकीयं पुरुषार्थं सामर्थ्यं शिवं– कल्याणयुक्तम्, औपयिकम्– उपायं, प्रापयन्ति– कल्याणकरेणोपायेन सह पौरुषं योजयन्तीत्यर्थः । केवलं क्रोधेन सहसा शत्रोरुपरि यथाकथंचिदाक्रमणेन न कार्यसिद्धिः, अपि तु पूर्वमनेनोद्योगेन यावान् श्रमो व्ययो हानिर्वा सम्भाव्यते तदपेक्षयोद्योगसाफल्ये सति जायमानसिद्धिर्यदि गरीयसी उत्तरकाले दोषरहिता च निश्चीयेत, तदा कल्याणवतोपायेन सह पौरुषमाचरणीयमिति भावः । अत्र च पौरुषं कर्म प्रधानम्, औपयिकं चाप्रधानं पौरुष्यस्योपयिकं प्रति प्रापणमेवात्र विवक्षितमिति शमयत्यर्थत्वाभावान्नात्रात्मनेपदं भवति । अस्ति च धातूनामनेकार्थत्वमिति प्रापणार्थस्यापि नयतेः क्वचित् शमयत्यर्थत्वं नासंभवि 'श्रमं विनयते' इत्यादौ तादृशार्थस्य प्रतीयमानत्वात् । **अन्ये** तु प्रकृते उपायेन पौरुषप्रयोगजन्यफलस्य शत्रुपराजयादेर्न कर्तृगामित्वं विवक्षितमिति नात्मनेपदमिति समादधते । संभवत्ययमप्युपायः परमुक्तरूपेणार्थभेदपरत्वेन समाधाने संभवति विवक्षाश्रयणस्यानावश्यकत्वमिति स्वमतम् । यद्यप्यत्रापि मतेऽयमर्थभेदः प्रयोगमहिम्नैव व्यवस्थाप्य इति न किमपि वचनं तत्र मूलं, तथापि प्रयोगमहिम्नः सर्वैरादर्त्तव्यत्वादियं व्यवस्था न नवीनेति सन्तोष्टव्यम् । प्रकृतार्थेऽन्यान्यपि लौकिकोदाहरणानि दर्शयति– **यथा च कोपं शमं नयति, मन्युं नाशं नयति, प्रज्ञां प्रवृद्धिं नयति, बुद्धिं क्षयं नयति** इति– एषु नयतेः प्रापणार्थत्वमेवेति कोप-मन्यु-प्रज्ञा-बुद्धीनां कर्मणां कर्तृस्थामूर्त्तत्वे सत्यपि न भवत्यात्मनेपदप्रयोगः, पूर्वोक्तार्थभेदमूलकव्यवस्थाऽस्वीकारे तु प्रकृतप्रयोगेष्वपि कर्तृगामिक्रियाफलत्वाविवक्षा समाश्रयणीया स्यादिति गौरवम् । **केचित्** त्वकर्तृगेऽपि क्रियाफले कर्तृस्थामूर्त्तण्यान्निय आत्मनेपदविधानार्थं सूत्रं, संभवति हि 'क्रोधं विनयते' इत्यादौ क्रोधापगमादेः फलमन्यस्मिन्नपि, यदुपरि क्रोधस्तदनिग्रहानाचरणादेः फलस्य परस्मिन् समवेतत्वविवक्षाऽपि तत्र चात्मनेपदमप्राप्तमित्यप्राप्तप्राप्तिफलकत्वेन विधित्वमेवास्य सूत्रस्योचितमित्याहुः, तत्र ब्रूमः– साक्षात्क्रियाजन्यफलस्य क्रोधापगमस्य तज्जन्यस्य वा चित्तप्रसादस्य कर्त्तर्येव सत्त्वेन तेन हेतुना प्राप्तमात्मनेपदमपहाय परम्परया विवक्षितस्य परगामिक्रियाफलत्वस्याश्रयणेन परस्मैपदप्राप्तिकल्पने मानाभावः । तथा च यत्रेदृशं कर्म तत्र फलस्य कर्तृसमवायित्वं ध्रुवमिति प्राप्तस्यैवात्मनेपदस्य विधायकत्वेन नियमार्थमेवेदं सूत्रमिति वृत्त्युक्तं युक्तमेवेति ॥ ३. ३. ४०. ॥

"Aho Shrutgyanam"

ऽपेनोपसर्गेण अभिव्यज्यते— द्योत्यत इत्यर्थः तथा चापं विना तदर्थाभिव्यक्त्यभावेन तदुपसृष्टस्यैवोदाहरणं युक्तमिति भावः। **निह्नव इति किमिति**— ज्ञ इत्येव सूत्रमस्तु तावताऽपि शतमपजानीते इत्येतत्सिद्धौ बाधकाभाव इत्यभिप्रायः प्रष्टुः। प्रत्युदाहरति— **तत्त्वं जानातीति**, अयमाशयः— निह्नवादन्यत्र परस्मैपदमेव प्रयुज्यते, अत्र निह्नवे इत्यस्याभावे च फलवत्यफलवति च कर्त्तरि सर्वत्रात्मनेपदमेव स्यान्न क्वापि परस्मैपदमिति तदर्थं निह्नवे इत्युपादेयमेवेति ॥ ३. ३. ६८. ॥

## सं-प्रतेरस्मृतौ ॥ ३. ३. ६९. ॥

**त०प्र०— सं-प्रतिभ्यां पराज्ज्ञानातेरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं भवति। शतं संजानीते, अवेक्षते इत्यर्थः। शतं प्रतिजानीते, शतेन संजानीते, अभ्युपगच्छतीत्यर्थः। अस्मृताविति किम्? मातुः संजानाति, मातरं संजानाति, स्मरतीत्यर्थः ॥ ६९ ॥**

**श०म० न्यासानुसन्धानम्— सं-प्रते०।** ज्ञ इति— सम्बध्यते। **सम्प्रतेरिति** समाहारनिर्देशे पुंस्त्वं सौत्रम्। **अस्मृतावित्यत्र** नञ्पर्युदासार्थः समस्यमानस्य नञस्तदर्थकत्वनिर्णयात्। तथा च स्मृतिभिन्नेऽर्थे वर्तमानात् सम्प्रतिपूर्वकाज्ज्ञः कर्त्तर्यात्मनेपदं विधीयते। जानातेः संपूर्वकस्य स्मरणेऽपि प्रयोगात् तत्राप्रवृत्त्यर्थमस्मृताविति पर्युदासः, तेन च सामान्येन स्मृत्यर्थे निषेधः, सा स्मृतिरुत्कण्ठापूर्विका भवतु, सामान्येन वेत्यत्र नाग्रहः। **अन्ये** च उत्कण्ठापूर्वकस्मृतावेव निषेधमारभन्ते तन्न स्वसंमतम्। उदाहरति— **शतं संजानीते** इति, प्रयोगार्थमाह— **अवेक्षते इत्यर्थः** इति— सम्यक्प्रकारेण ज्ञानमेवावेक्षापदार्थः **शतं प्रतिजानीते** इति— शतमहं दास्यामीति स्वीकारोतीत्यर्थः। **शतेन संजानीते** इति— "समो ज्ञोऽस्मृतौ वा" [२. २. ५१.] इति स्मृत्यर्थादन्यत्र विकल्पेन तृतीयाविधानात् शतेनेति, तदभावे च शतं संजानीते इति द्वितीयान्तं कर्मोदाहृतमेव। उभयत्र प्रतिज्ञार्थमेवाह— **अभ्युपगच्छतीत्यर्थ** इति। इत्थं संपूर्वकस्यावेक्षाभ्युपगमार्थे प्रयोगं दृष्ट्वा स्मृत्यर्थासंभावनया पृच्छति— **अस्मृताविति किमिति**। स्मृतावपि संपूर्वकस्य प्रयोगो दृश्यते तत्र मा भूदित्याह— **मातुः संजानाति, मातरं संजानातीति**— "स्मृत्यर्थदयेशः" [२. २. ११.] इति विकल्पेन कर्मत्वे कर्मत्वाभावपक्षे "शेषे" [३.२.८१.] इति षष्ठी, सति कर्मत्वे द्वितीया। ननु कर्मत्वाभावपक्षे "ज्ञः" [३. ३. ८१.] इत्यात्मनेपदेन भाव्यमिति 'मातुः संजानीते' इति स्यादिति चेन्न— तत्र कर्मण्यसतीति कथनेन सर्वथा कर्माभाववत एवात्मनेपदविधानादस्य च पाक्षिककर्मणः सत्त्वात् कर्मात्यन्ताभावत्वं नास्तीत्यदोषात्। केचित् त्वेतदर्थमत्र सूत्रे अस्मृताविति योगविभागं परिकल्प्य योगविभागसामर्थ्याच्च तत्र सम्प्रतेरित्यस्यासम्बन्धेन, अस्मृतावित्यत्र अकारस्य निषेधार्थत्वेन च स्मृतौ नेत्यर्थलाभात् केनापि सूत्रेण प्राप्तस्यात्मनेपदस्यानेन निषेधः। यद्यपि * अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा * इति न्यायेनानन्तरसूत्रेण "सम्प्रतेः" इत्यनेन प्राप्तस्यैवात्मनेपदस्यानेन निषेधो भविष्यति, "न तु व्यवहितेन ज्ञः" [३.३.८२.] इति सूत्रेण प्राप्तस्येति शङ्कितुं शक्यते, तथापि योगविभागसामर्थ्यादेव तन्न्यायस्येहाप्रवृत्तिरिति कल्पनेनादोषात्। स्मृत्यर्थविवक्षायां मातुर्मातरं वा जानातीत्यत्र "ज्ञोऽनुपसर्गात्" [३.३.९६.] इति प्राप्तस्यात्मनेपदस्याप्यनेन योगेन बाध इति कर्त्तव्य एव योगविभाग इति तेषां मतम्। एतच्च स्वमतेऽपि स्वीकर्तुं शक्यते विरोधाभावात्। योगविभागाभावेऽपि यथाऽत्रात्मनेपदवारणं संभाव्यते तथोक्तमेव प्राक् ॥ ३. ३. ६७. ॥

## अननोः सनः ॥ ३. ३. ७०. ॥

**त० प्र० — सन्नन्ताज्ज्ञानातेः कर्तर्यात्मनेपदं भवति, स चेदनोरुपसर्गात् परो न भवति। धर्मं जिज्ञासते। अननोरिति किम्? धर्ममनुजिज्ञासति। कथमौषधस्यानुजिज्ञासते? अकर्मकात् "प्राग्वत्" [३. ३ ७४] इत्यनेन भविष्यति ॥७०॥**

**श० म० न्यासानुसन्धानम्— अननोः०।** ज्ञ इत्यनुवर्त्तते, **अननोरिति** पर्युदासे अनुभिन्नादुपसर्गात् परत्वे सत्येवात्मनेपदं स्यात्, तथा च 'धर्मं जिज्ञासते' इत्यत्र न स्यादिति प्रसज्यप्रतिषेधरीत्या पर्युदासं वाक्यभेदेन व्याख्याति— **स चेदनोरुपसर्गात् परो न भवतीति**। उदाहरति— **धर्मं जिज्ञासते** इति— सकर्मकत्वेन "ज्ञः" [३. ३. ८२] इत्यनेनात्मनेपदाप्राप्तेः "प्राग्वत्" [३. ३. ७४.] इत्यनेनात्र न सिद्धिरिति सूत्रारम्भः। किञ्च फलवति कर्तरि "ज्ञोऽनुपसर्गात् [३. ३. ९६.] इत्यनेन केवलादात्मनेपदस्य विहितत्वेन सन्नन्तात् "प्राग्वत्" [३. ३ ९६.] इत्यनेनैव सिद्धिरिति 'धर्मं जिज्ञासते' इत्यादिप्रयोगसिद्धौ इदं सूत्रमफलवदर्थम्। **अननोरिति किमिति**— सामान्येनैव सन्नन्ताज्ज्ञ आत्मनेपदं विधीयतामिति भावः। **धर्ममनुजिज्ञासतीति**— इह फलवत्यपि कर्त्तर्यात्मनेपदं न भवति, सोपसर्गत्वेन "अनुपसर्गाज्ज्ञः" [३. ३. ९६.] इत्यस्याप्राप्तेः, प्रकृतसूत्रेऽनोर्निषेधाभावे-

"Aho Shrutgyanam"

ऽत्राप्यात्मनेपदं दृश्यते तत् कथं संगच्छत इत्याशङ्कते- **कथमौषधस्यानुजिज्ञासते** इति । उत्तरयति- **अकर्मकात् "प्राग्वत्" इत्यनेन भविष्यतीति**, अयमर्थः- इह ज्ञाधातुरकर्मकः, तस्मात् केवलात् [सन्रहितात्] "ज्ञः" [३ ३. ८२. ] इत्यनेनात्मनेपदं विधीयत इति सन्नन्तावस्थायां "प्राग्वत्" [ ३ ३.७४. ] इत्यनेनात्मनेपदं भवति, नानेन सूत्रेण, अनेन तु सकर्मकादेवात्मनेपदं विधीयते, इत्यकर्मकात् प्राप्त्यभावेन तदंशे प्रतिषेधास्याप्यप्रवृत्तिः । ननु कथमिदं निश्चीयते- यदनेन सूत्रेण सकर्मकादात्मनेपदं विधीयत इति चेच्छृणु- अकर्मकात् सनः पूर्वं "ज्ञः" [ ३. ३. ८२ ] इत्यनेनात्मनेपदविधानात् ततः "प्राग्वत्" [३.३ ७४.] इत्यनेन सन्नन्तावस्थायामात्मनेपदं सिद्धमेवेति परिशेषात् कर्मकादेवानेनात्मनेपदं विधीयत इति व्यवस्थितेः । यद्यपि "प्राग्वत्" इत्यनेनानेन चात्मनेपदविधाने विशेषाभावस्तथापि "धर्ममनुजिज्ञासते" इत्यादावात्मनेपदाप्रवृत्त्यर्थमननोरित्यस्यावश्यकत्वेन 'औषधस्यानुजिज्ञासे' इत्यादावस्य प्रवृत्त्यभावात् तेनैवात्मनेपदं भवितुमर्हतीति विज्ञेयम् । एवमेव 'सर्पिषोऽनुजिज्ञासते' इत्यादावपि बोध्यम् ॥ ३. ३ ७०. ॥

## श्रुवोऽनाङ्-प्रतेः ॥ ३. ३. ७१. ॥

**त० प्र०- सन्नन्ताच्छृणोतेः कर्तर्यात्मनेपदं भवति, स चेदाङ्-प्रतिभ्यामुपसर्गाभ्यां परो न भवति । शुश्रूषते गुरून्, संशुश्रूषते शब्दान् । अनाङ्-प्रतेरिति किम् ? आशुश्रूषति, प्रतिशुश्रूषति । 'चैत्रं प्रति शुश्रूषते' इति प्रतिना सम्बन्धाभावात् प्रतिषेधो न भवति ॥ ७१ ॥**

**श० म० न्यासानुसन्धानम्- श्रुवो० । अनाङ्-प्रते**रितीह समस्यमानस्यापि नञो न पर्युदासार्थकत्वमपि तु प्रतिषेधार्थकत्वमेव लक्ष्यानुरोधात्, पर्युदासाश्रयणे हि पर्युदासस्य सदृग्ग्राहितया आङ्प्रतिभिन्नात् परत्व एव स्यान्न त्वनुपसर्गात् । तथा च निषेधपरत्वेनैव व्याख्याति- **स चेदाङ्-प्रतिभ्यामुपसर्गाभ्यां परो न भवतीति** । **शुश्रूषते गुरून्** इति- निरुपसर्गाच्छृणोतेः, सन्नन्तादात्मनेपदम्, यथा निरुपसर्गाद् भवति तथा सोपसर्गादपि सामान्येन विधानात्, तदोदाहरति- **संशुश्रूषते शब्दान्** इति- शब्दशक्तिस्वाभाव्यात् पूर्वत्र सेवितुमिच्छति, परत्र सम्यक् श्रोतुमिच्छतीत्यर्थः । पदकृत्यं पृच्छति- **अनाङ्-प्रतेरिति किमिति**- अविशेषेण सर्वत्रात्मनेपदमस्त्विति भावः । **आशुश्रूषति, प्रतिशुश्रूषतीति**- ईदृशस्थले आत्मनेपदं नेष्टं तद्वारणायानाङ्प्रतेरित्यावश्यकमिति भावः । अत्रानाङ्प्रतेरिति निषिध्यमानोऽपि प्रतिना सम्बन्धः, श्रुधातुसम्बन्धिना प्रतिना योगे एव प्रवर्त्तते निषेध इत्यवगमयति, सत्येव सम्बन्धे तस्य श्रुधात्वर्थव्यञ्जकत्वात् तेन सह सामर्थ्यात् । तत्फलमाह- **चैत्रं प्रतिशुश्रूषते इति प्रतिना सम्बन्धाभावात् प्रतिषेधो न भवतीति**, अयमाशयः- इहाङा साहचर्यादुपसर्ग एव प्रतिगृह्यते उपसर्गत्वं च यत्क्रियायुक्तः प्रतिस्त प्रत्येव, इह च प्रतेर्न क्रियया योगोऽपि तु चैत्रेणेति क्रियायोगाभावादुपसर्गत्वाभावे निषेधोऽपि तत्र न प्रवर्त्तत इति भवत्येवात्मनेपदमिति ॥ ३. ३. ७१. ॥

## स्मृ-दृशः ॥ ३. ३. ७२. ॥

**त०प्र०- स्मृ-दृशिभ्यां सन्नन्ताभ्यां कर्तर्यात्मनेपदं भवति । सुस्मूर्षते पूर्ववृत्तम्, दिदृक्षते देवम् ॥७२॥**

**श०म० न्यासानुसन्धानम्- स्मृ०** । स्पष्टम् ॥ ३. ३ ७२. ॥

## शको जिज्ञासायाम् ॥ ३.३.७३. ॥

**त० प्र०- शकिः स्वभावादन्यधात्वर्थानुसंहितः प्रवर्तते- शक्नोति भोक्तुमन्यद् वेति ततो ज्ञानानुसंहितार्थात् सन्नन्तात् कर्तर्यात्मनेपदं भवति । विद्याः शिक्षते, ज्ञातुं शक्नुयामितीच्छतीत्यर्थः । जिज्ञासायामिति किम् ? शक्तुमिच्छति- शिक्षति । "शिक्षि विद्योपादाने" इत्यनेनैव सिद्धे आमनुप्रयोगार्थं वचनम्, तेन 'शिक्षांचक्रे' इति भवति, न तु शिक्षांचकारेति । केचित् तु शकेः सन्नन्तस्यात्मनेपदमनिच्छन्तः शिक्षतेरेव जिज्ञासायामात्मनेपदमन्यत्र च परस्मैपदमिच्छन्ति ॥७३॥**

**श० म० न्यासानुसन्धानम्- शको०** । सन इत्यनुवर्त्तते, सन्नन्ते चेच्छार्थस्य प्राधान्यमिति प्रकृते शकेः सन्नन्तस्य शक्तीच्छार्थ इति कथं जिज्ञासार्थवाचकत्वमिति चेदत्राह- **शकिः स्वभावादन्यधात्वर्थानुसंहितः प्रवर्त्तते- शक्नोति भोक्तुमन्यवद् वेति**- शकधातुः शब्दशक्तिस्वभावाद् धात्वन्तरार्थसम्बद्ध एव स्वार्थमाह, यथा शक्नोति भोक्तुमित्यत्र भुज्यर्थसम्बद्धमेव स्वार्थं कथयति, एवं शयितुं शक्नोतीत्यादौ शयनार्थसम्बद्धम् । प्रकृते च जिज्ञासाविषयः शकिर्गृह्यते, ततश्च ज्ञानविशिष्टा ज्ञानविषयिणी शक्तिरिच्छाविषय इति परम्परया ज्ञानमपीच्छाविषयो भवतीति जिज्ञासा प्रतीयते, तत्र इच्छा सन्प्रत्ययार्थः, शक्तिः शक्यर्थः, तस्य ज्ञानविषयत्वमात्मनेपदद्योत्यम् । तदाह- **ज्ञानानुसंहितार्थात् सन्नन्तादिति**-ज्ञानानुसंहितार्थज्ञानसम्बद्धार्थादित्यर्थः, एतच्च शकेर्विशेषणं न सन्नन्तस्य, तस्यापि

"Aho Shrutgyanam"

शक्तिविशेषणत्वेन विशेषणसम्बन्धानर्हत्वात्; तथा च सन्नन्तस्य तद्विषयेच्छार्थत्वं सिद्धयति । उदाहरति– **विद्याः शिक्षते** इति, विद्याविषयकज्ञानफलकशक्तिर्मे स्यादितीच्छतीति कारकप्रकृतिप्रत्ययसमुदायार्थं इत्याह– **ज्ञातुं शक्नुयामितीच्छतीत्यर्थः** इति– विद्या इति शेषः । **जिज्ञासायामिति किमिति**– शकेर्नियमतो धात्वन्तरार्थोपसंहितत्वेन ज्ञानार्थोपसंहितादपि स्यादेवेति जिज्ञासायामित्यनावश्यकमिति शङ्कार्थः । **शक्तुमिच्छति शिक्षती**ति– अत्रापि पठितुमित्यादिपदाध्याहारः, तथा च क्रियान्तरविषयत्वेऽपि शक्तीच्छाया न जिज्ञासाविषयत्वमिति न भवत्यात्मनेपदम्, जिज्ञासायामित्यस्याभावे च स्यादेव 'शिक्षते' इत्यादिप्रयोगान्यथासिद्धिप्रदर्शनपूर्वकमस्य सूत्रस्य सार्थक्यमाह– **"शिक्षि विद्योपादाने" इत्येनेनैव सिद्धे आमनुप्रयोगार्थं वचनमिति**– "शिक्षि विद्योपादाने" इति धातुरिदित्वादात्मनेपदी, तस्मात् सर्वत्रात्मनेपदमेव भवति, संभाव्यते च तत्रापि जिज्ञासार्थप्रतीतिः जिज्ञासां विना विद्योपादानासंभवात्, इति तमादायैव 'विद्याः शिक्षते' इत्यादिप्रयोगा यद्यपि सिध्यन्त्येव तथापि यत्र ततः सन्नन्तात् परोक्षायाम् आम् प्रयुज्यते तत्र कृगादिस्तत्पश्चादनुप्रयुज्यते, तत्रामोऽनुप्रयुज्यमानात् कृगोऽप्यात्मनेपदमेव यथा स्यान्न तु परस्मैपदमित्यर्थं वचनम्, यद्येतन्न स्यात् तर्हि सन्नन्तादामि शिक्षांचकारेत्येव स्यात् "आमः कृगः" [ ३. ३. ७५. ] इत्यत्र प्राग्वदित्यनुवृत्तेः केवलात् सन्नन्तात् परस्मैपदस्यैव प्रयोगेणामनुप्रयुज्यमानात् कृगोऽपि तस्यैवौचित्यात् । तदाह– **तेन 'शिक्षांचक्रे' इति भवति, न तु शिक्षां चकारे**ति, तथा च शकेः सन्नन्तस्य परोक्षायां 'शिक्षांचक्रे' इत्यादिरूपसिद्धिः फलम्, "शिक्षि विद्योपादाने" इत्यस्य तु न तादृशं रूपं, ततः परोक्षायामामोऽभावात् अत्रैव मतान्तरमाह– **केचित् तु शकेः सन्नन्तस्यात्मनेपदमनिच्छन्तः** इति– "क्रीडोऽनुसपरिभ्यश्च" [ पा०सू० १.३.२१. ] इति सूत्रे भाष्ये "शिक्षेर्जिज्ञासायाम्" इति वार्त्तिकं दृश्यते, तद्व्याख्याने वृत्तिकृदादयः– शिक्षि विद्योपादान इत्यस्यैव ग्रहणं न तु शकेः सन्नन्तस्येत्याहुः, ततश्च आत्मनेपदस्य स्वतः सिद्धत्वेन विधानवैयर्थ्यमिति नियमार्थत्वं वर्णयन्ति– शिक्षतेर्जिज्ञासायामेवात्मनेपदमन्यत्र न परस्मैपदमिति । कंयटादिभिस्तु शकेः सन्नन्तस्यैवेह ग्रहणं निर्णीतम्, तद्ग्रहणे *सूत्रस्य विध्यर्थत्वात्* विधि-नियमसम्भवे विधिरेव ज्यायान् इति न्यायात्, स्वमतेऽपि तदेव विचार्य शकेः सन्नन्ताद् विधानमेव कृत, तदीयफलान्तरं च पूर्वमुक्तमेव । यद्यपि फलवत्कर्तरि शकेरप्यात्मनेपदं भवतीति तस्मात् सन्नन्तादप्यात्मनेपदं "प्राग्वत्" [ ३. ३. ७४. ] इति सिद्धमेवेति 'शिक्षते, शिक्षाञ्चक्रे' इत्यादीनां विनापि सूत्रं सिद्धिरस्त्येव, तथापि जिज्ञासायामफलवत्यपि कर्त्तर्यात्मनेपदं यथा स्यादित्येवमर्थं सूत्रस्यास्यावश्यकत्वमस्त्येव, अत एवारुचिसूचकस्तु शब्दः **केचित् त्वि**ति ।। ३. ३. ७३. ।।

## प्राग्वत् ।। ३. ३. ७४. ।।

**त० प्र०– सनः प्राक् पूर्वो यो धातुस्तस्मादिव सन्नन्तात् कर्तर्यात्मनेपदं भवति, यत् पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वाऽऽत्मनेपदं दृष्टं तत् सन्नन्तादतिदिश्यते । अनुबन्धेन–शीङ् शेते, शिशयिषते; एधि– एधते, एदिधिषते; लोलूयते, लोलूयिषते; श्येनायते, शिश्येनायिषते । उपपदेन– निर्विशते, निर्विविक्षते; अश्वेन सचरते अश्वेन सचिचरिषते । अर्थविशेषेण– शास्त्रेऽस्य क्रमते बुद्धिः, चिक्रंसते । उभयेन– आक्रमते चन्द्रः, आचिक्रंसते । यत् पुनः सप्रत्ययधातुनिमित्तं तन्नातिदिश्यते शिशित्सति, मुमूर्षति, अत्र हि न शदि-म्रियती एव निमित्ते, किं तर्हि ? शिदाशीरद्यतन्योऽपि । अनुबन्धादिनिमित्तमपि यद् विशेषविधानबाधया प्राग् न दृष्टं तन्नातिदिश्यते, यथा–अनुकरोति, अनुचिकीर्षति; पराकरोति, पराचिकर्षति । तिजादीनां त्वर्थविशेषेषु केवलानामप्रयोगात् सन्नन्तसमुदायार्थमेव अनुबन्धविधानम्, तेन 'तितिक्षते, जुगुप्सते, मीमांसते' इत्यादौ प्रागदृष्टमप्यात्मनेपदमनुबन्धसामर्थ्यात् भवति, यथा कुस्मि– चित्रङ्-महीङ्-हृणीङामनुबन्धो णिच्-क्यन्-यगन्तसमुदायार्थः– विकुस्मयते, चित्रीयते, महीयते, हृणीयते । अवयवे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति, यथा– गोः सक्थनि कर्णे वा कृत लिङ्ग–चिह्नं गोरेव विशेषकं भवति न गोमण्डलस्य, सन्नन्तं च समुदायं तिजादयोऽर्थविशेषेषु न व्यभिचरन्ति णिगन्तं पुनर्व्यभिचरन्ति । ननु सन्नन्तमपि व्यभिचरन्ति– तेजयति, गोपायति, मानयतीति; नैवम्– अर्थविशेषेषु न व्यभिचार इत्युक्तत्वात् । "गूप्-तिजो गर्हा-क्षान्तौ" [ ३. ४. ६. ] "शान्-दान्-मान्-बधान्निशानाऽऽर्जव-विचार-वैरूप्ये" [ ३. ४. ९. ] इति हि वक्ष्यत इति ।। ७४ ।।**

**श०म० न्यासानुसन्धानम्– प्राग्वत्** । प्राचस्तुल्यं– **प्राग्वत्** । 'सनः' इत्यनुवर्त्तते, तच्च तन्त्रेणोभयथा सम्बध्यते– प्राक्शब्देनात्मनेपदेन च, तत्र प्राक्शब्देन सम्बन्धकाले सन इति पञ्चमी प्राक्शब्दयोगे, आत्मनेपदेन सम्बन्धे च परशब्दयोगे प्रत्ययरूपस्यात्मनेपदस्य परत्वेन विधानात्, तथा च सूत्रं व्याख्याति– **सनः प्राक् पूर्वो यो**

"Aho Shrutgyanam"

**धातुस्तस्मादि**वेति, यद्यपि पञ्चम्यन्तादेव वतिप्रत्यय इति न नियमः "स्यादिरिवे" [ ७. १. ५२. ] इति सूत्रेण स्यादिसामान्यान्ताद् विधानात् तथापि निर्विशेषं न सामान्यमिति युक्त्या सामान्यस्य विशेष एव पर्यवसानात्; अत्र प्रत्ययविधौ धातोः पञ्चम्यन्ततैवेति तादृशार्थमनुरुध्य तस्मादिवेति पञ्चम्यन्ततयोपमानस्य ग्रहणम् । ननु एकमेव 'सनः' इति पद द्विधा सम्बध्यतां किमर्थमावृत्तिः स्वीक्रियत इति चेन्न ? शब्द-बुद्धि-कर्मणां विरम्य व्यापाराभाव इति न्यायेन प्राक्शब्दसम्बन्धे सति पुनस्तस्यात्मनेपदेन सम्बन्धाभावात्, आवृत्तौ स्वीकृतायां तु भवति तथा सम्बन्ध इत्याशयात् । सन्प्रकृतिभूता धातवो बहुविधाः– केचनानुबन्धनिमित्तात्मनेपदिनः, केचनोपपदनिमित्तात्मनेपदिनः, केचन च प्रत्ययविशेषनिमित्तात्मनेपदिनः, तेषु सर्वेषामिह ग्रहणमुत नेत्याशङ्कायां स्पष्टयति– **यत् पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वाऽऽत्मनेपदं दृष्टं तत् सन्नन्तादतिदिश्यते** इति, अयमाशयः– पूर्वत्र चत्वारो हेतव आत्मनेपदस्योक्ताः, अनुबन्ध उपपदमर्थविशेषः प्रत्ययविशेषश्च, तत्र त्रयाणामाद्यानां सन्प्रकृतिभूतधातुगतत्वमेवेति तन्निमित्तकात्मनेपदिन एव सन्नन्तादात्मनेपदमिहातिदिश्यते, न तु प्रत्ययविशेषनिमित्तात्मनेपदिनः प्रत्ययस्य बहिर्भूतत्वेन सन्प्रकृतिगतत्वाभावात्, एतच्चाग्रे विशदयिष्यते । तत्र क्रमश उदाहर्त्तुमवतारयति– **अनुबन्धेने**ति– अनुबन्धनिमित्तात्मनेपदिनः सन्नन्तादात्मनेपदमुदाह्रियत इत्यर्थः । **शीङ्–शेते, शिशयिषते** इति– शीङो ङित्त्वेन "इङितः कर्त्तरि" [३. ३. २२.] इत्यात्मनेपदे 'शेते' इति रूपं भवतीति तस्मात् सन्नन्तादप्यात्मनेपदे सति 'शिशयिषते' इति रूपमिति भावः । **एधि– एधते, एदिधिषते** इति– एध्धातुरिदित्, तस्मात् कर्तरि पूर्वसूत्रेणात्मनेपदं विधीयत इति तस्मात् सन्नन्तादप्यात्मनेपदे 'एदिधिषते' इति रूपम् । **लोलूयते, लोलूयिषते** इति– 'लोलूयते' यङन्तम्, यङो ङित्त्वेन तदन्तस्य ङित्त्वनिबन्धनमेवात्मनेपदित्वमिति यङन्तात् सनि सति तदन्तादप्यनेनात्मनेपदम् । **श्येनायते, शिश्येनायिषते** इति– श्येन इवाचरतीत्यर्थे "क्यङ्" [ ३. ४. २६. ] इति क्यङ्, तस्यापि ङित्त्वेन तदन्तात् कर्तर्यात्मनेपदम्, ततः सनि तदन्तादनेनात्मनेपदम् । इत्थमनुबन्धनिमित्तात्मनेपदिन उदाहृत्योपपदनिमित्तात्मनेपदिन उदाहर्त्तुमवतारयति– **उपपदेने**ति– उपपदनिमित्तात्मनेपदिनः सन्नन्तादात्मनेपदमुदाह्रियत इत्यर्थः, उप समीपे उच्चारितं पदमुपपदम् तच्चोपसर्गरूपं तृतीयान्तादि पदं च । क्रमेणोदाहरति– **निविशते, निविविक्षते** इति– "निविशः" [३.३.२४.] इति न्युपसर्गाद् विशः कर्तर्यात्मनेपदं विधीयत इति सन्नन्तादपि तद् भवति । **अश्वेन सचरते, अश्वेन संचिचरिषते** इति– "समस्तृतीयया" [ ३.३.३२. ] इति तृतीयान्तेन युक्तात् सम्पूर्वाच्चरतेरात्मनेपदं कर्त्तरि विधीयत इति तथाभूतात् सन्नन्तादपि भवत्यात्मनेपदम् । तृतीयमात्मनेपदनिमित्तमुदाहरति । **अर्थविशेषेणे**ति प्रकृत्य अर्थविशेष निमित्तीकृत्य यस्माद् धातोरात्मनेपदं विधीयते तस्मात् सन्नन्तादप्यनेनात्मनेपदं भवति, यथा– **शास्त्रेऽस्य क्रमते बुद्धिः, चिक्रंसते** इति– "वृत्ति-सर्ग-तायने" [३.३.४८.] इति सूत्रेण वृत्त्याद्यर्थनिमित्तमात्मनेपदं क्रमेर्विधीयत इति शास्त्रेऽस्य क्रमते बुद्धिरित्यत्र वृत्त्यर्थे आत्मनेपदम्, ततः सन्नन्तादपि तद् भवति– चिक्रंसते इति, अत्राऽपि शास्त्रेऽस्य बुद्धिरिति सम्बध्यत एव तथैव सति वृत्त्यर्थप्रतीतेः । **उभयेने**ति– उपपदेन, अर्थविशेषेण चेति द्वयेन निमित्तेन यस्मादात्मनेपदं विधीयते तस्मात् सन्नन्तादप्यात्मनेपदं भवति, तदुदाह्रियत इति भावः । **आक्रमते चन्द्रः, आचिक्रंसते** इति– "आङो ज्योतिरुद्गमे" [३.३.५२.] इति सूत्रेणाङ्पूर्वात् क्रमेश्चन्द्रादिज्योतिरुद्गमार्थादात्मनेपदं विधीयत इति तादृशात् सन्नन्तादपि भवत्यनेनात्मनेपदम्, इह चाङ् उपसर्ग उपपदं, ज्योतिरुद्गमोऽर्थश्चात्मनेपदनिमित्तमित्युभयनिमित्तकोदाहरणमिदम् । अथ चतुर्थमात्मनेपदनिमित्तमुपादाय यस्मादात्मनेपदं भवति तस्मात् सन्नन्तान्नानेनात्मनेपदं विधीयत इत्याह– **यत् पुनः सप्रत्ययधातुनिमित्तं तन्नातिदिश्यते** इति– यदात्मनेपदं प्रत्ययविशेषप्रकृतिभूतधातुनिमित्तकं भवति, तदात्मनेपदमनेन सूत्रेण नातिदिश्यत इत्यर्थः । अयमत्र निष्कर्षः– यत्र सप्रत्ययो धातुर्निमित्तत्वेनाश्रीयते तत्र सन्नन्तस्थले तथाविधधातोरभावेन नास्ति तत आत्मनेपदप्राप्तिरिति । "पूर्ववत् सनः" [ पा० सू० १.३.६२. ] इति सूत्रे भाष्ये शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदवारणार्थं बहुधोपाय प्रदर्श्य, सर्वत्र च कञ्चिद्दोषमुद्भाव्यान्ते, सिद्धान्तितं यत्– सामग्र्याः कारणत्वं न केवलस्य शदेर्म्रियतेर्वा, सा च सामग्री सन्नन्तस्थले नास्ति, शित्परस्य शदेरद्यतन्याशीः शित्परस्य म्रियतेर्वा सना व्यवधानात् । यद्यपि "शदेः शिति" [ ३. ३. ४१. ] "म्रियतेरद्यतन्याशिषि" [ ३ ३.४२.] इति सूत्रयोः सप्तमीविषयत्वार्थतया व्याख्याता–शिद्विषयात् शदेः, अद्यतन्याशीःशिद्विषयाच्च म्रियतेरित्येवरूपेणेति शितः, अद्यतन्याशिषोश्च न परत्वेन निमित्तताऽऽश्रितेति मध्ये सना व्यवधानेऽपि शिद्विषयताऽद्यतन्याशीर्विषयता चाऽस्त्येवेति सामग्रीसद्भाव एव, न तु तद्वैकल्यमित्याशङ्कितुं शक्यते, तथापि सन्नन्त-

"Aho Shrutgyanam"

स्थले न सनः पूर्वस्य धातोः शिद्विषयताऽद्यतन्याशीर्विषयता वाऽस्तीति सामग्रीवैकल्यमेवेति नात्मनेपदस्य प्राप्तिरिति बोध्यम् । किञ्च विषयत्ववर्णनेऽपि शिदद्यन्याशिषां निमित्तत्वं न व्याहन्यते इति न केवलं सनः प्राग्विद्यमानस्य धातोस्तद्गतस्यार्थस्य वाऽऽत्मनेपदनिमित्तत्वमिति नास्ति सन्नन्तादात्मनेपदप्राप्तिरिति परस्मैपदमेवोदाहरति– **शिशत्सति, मुमूर्षति** इति, अत्र यथा नात्मनेपदप्राप्तिस्तथोपदिशति– **अत्र हि न शदि-म्रियती एव निमित्ते, किं तर्हि शिदाशीरद्यतन्योऽपीति**– हि– यतोऽत्र केवलं शदि-म्रियती सनः प्राग्विद्यमानौ धातू एव आत्मनेपदस्य न निमित्तं, किं तर्हि तस्य निमित्तमिति चेच्छृणु– शिदाशीरद्यतन्योऽपि यथायोगं निमित्तानि, शदेरात्मनेपदविधाने केवलं शिन्निमित्त, म्रियतेश्चात्मनेपदविधाने शिदाशीरद्यतन्य इति तदर्थः । पूर्वोक्तेऽनुबन्धनिमित्तकात्मनेपदेऽपि विशेषं वक्ति– **अनुबन्धादिनिमित्तमपि यद् विशेषविधानबाधया प्राग् न दृष्टं तन्नातिदिश्यते** इति– अनुबन्धः, आदिपदेन गन्धनाद्यर्थविशेषः, तन्निमित्तमपि यदात्मनेपदं विशेषविधानेन "परानोः कृगः" [३.३.१०१.] इत्यादिपरस्मैपदविधायकसूत्रेण परत्वाद् बाधया, प्राक्-सनः पूर्वं न दृष्टं, तत् सन्नन्ते नातिदिश्यत इत्यर्थः । तथाहि– कृग्धातुर्गित्, ततः "ईगितः" [३.३.९५.] इति फलवत्कर्त्तरि यदात्मनेपदं विधीयते तत् अनुबन्धनिमित्तम्, यच्च तत एव [कृग एव] गन्धनाद्यर्थेषु "गन्धनावक्षेपसेवा०" [३.३.७६.] इति सूत्रेण गन्धनाद्यर्थविशेषनिमित्तमात्मनेपदं विधीयते तदुभयमपि तस्य "परानोः कृगः" [३.३.१०१.] इति सूत्रेण परत्वाद् बाध्यत इत्यनुपरापूर्वकात् कृगः सन्नन्तादपि न भवति, तादृशसन्नन्तप्रकृतिभूतधातोस्तस्या[आत्मनेपदस्या-]दर्शनात्, इति तत्र परस्मैपदमेव भवतीत्याह– **यथा– अनुकरोति, अनुचिकीर्षति; पराकरोति, पराचिकीर्षति** इति ।

अथेत्थमाशङ्क्यते– यदि सनः प्राग्विद्यमानाद् धातोरात्मनेपदं दृष्टं तर्हि सन्नन्तादप्यात्मनेपदं भवति, ततश्चेन्न दृष्टं तत् तर्हि सन्नन्तादपि न भवतीत्येव, प्रकृतसूत्रविषयश्चेत्? गुप्-तिज्-शान-दान्-मान्-बध्धातुभ्यः सन्नन्तेभ्य आत्मनेपदं न स्यात् सनः प्राग् विद्यमानेभ्य एभ्यो धातुरूपेभ्य आत्मनेपदादर्शनादिति, अत्राह– **तिजादीनां स्वार्थविशेषेषु केवलानामप्रयोगात् सन्नन्तसमुदायार्थमेवानुबन्धविधानमि**त्यादि, तिजादयः–तिज्-गुप्-शान्-दान्-मान्-बधः, एषामर्थविशेषेषु–क्षान्ति-गर्हा-निशान-ऽऽर्जव-विचार-वैरूप्येषु नित्यसन्नन्ततया केवलानां प्रयोगाभाव इति अनुबन्धानां केवलेषु तेषु न चारितार्थ्यमिति सन्नन्तेभ्योऽपि तेभ्य आत्मनेपदं यथा स्यादित्येवमर्थमेवानुबन्धकरणमिति विज्ञेयमित्यर्थः । तत्फलं दर्शयति– **तेन 'तितिक्षते, जुगुप्सते, मीमांसते' इत्यादौ प्रागदृष्टमपि आत्मनेपदमनुबन्धसामर्थ्याद् भवती**ति, अयमाशयः– 'तिजि क्षमा-निशानयोः' "गुपि कोपन-कुत्सनयोः" "मानि पूजायाम्" इत्येवंरूपेणेदितो धातवः पठिताः तेभ्यश्च "गुप्-तिजो गर्हा-क्षान्तौ" [३.४.६.] "शान-दान-मान्०" [३.४.७.] इति सूत्राभ्यामर्थविशेषेषु– गर्हा-क्षान्ति-विचारादिषु स्वार्थे सन् नित्यं विधीयत इति तेषां केवलानामुक्तेष्वर्थेषु प्रयोगो न भवतीति तेषु कृतोऽनुबन्धो व्यर्थः स्यादित्यनुबन्धकरणसामर्थ्यात् सनः प्राग्भूतेभ्यस्तेभ्य आत्मनेपदाभावेऽपि सन्नन्तादप्यात्मनेपदमनुबन्धनिमित्तकमेव भवति, न तु तत्र प्रकृतसूत्रस्य विषयः, तथा च 'तिजेस्तितिक्षते, गुपेर्जुगुप्सते, मानेर्मीमांसते' इत्येवंरूपाणि भवन्तीति । अमुमर्थं दृष्टान्तेन साधयति– **यथा– कुस्मि-चित्रङ्-महीङ्-हृणीङामनुबन्धो णिच-क्यङ्-यगन्तसमुदायार्थः** इति अयमर्थः– यथा कुस्मिरिदित् चुरादिषु पठ्यते, ततः स्वार्थे णिज् भवतीति केवलस्य तस्याप्रयोग इति तदीयानुबन्धो णिजन्तादात्मनेपदविधानार्थः, चित्रङ् धातुः सौत्रः "नमो-वरिवश्चित्रङोऽर्चा-सेवा-ऽऽश्चर्ये" [३.४.३७.] इति सूत्रे क्यन्प्रत्ययविधानार्थं पठ्यत इति केवलस्य तस्याप्रयोग इति क्यनन्तादेव तस्मादात्मनेपदविधानार्थं ङित्त्वमिति फलतीति क्यनन्तादात्मनेपदं भवति, एवं महीङ्-हृणीङौ कण्ड्वादिषु पठ्येते, कण्ड्वादयश्च "धातोः कण्ड्वादेर्यक्" [३.४.८.] इति सूत्रेण स्वार्थे यगन्ता एव साधुत्वेनान्वाख्यायन्त इति तेषां केवलानामप्रयोग इति यगन्तेभ्य एव तेभ्य आत्मनेपदविधानार्थमनुबन्धकरणमिति सर्वैः स्वीक्रियते; तथा तिजादीनामप्यनुबन्धकरणमर्थविशेषे तेषां नित्यसन्नन्ततया केवलेऽचरितार्थमिति सन्नन्तादात्मनेपदविधानार्थं भविष्यति । कुस्म्यादीनामनुबन्धकरणसामर्थ्याणिगाद्यन्ते आत्मनेपदमुदाहरति– **विकुस्मयते, चित्रीयते, महीयते, हृणीयते** इति– एषु प्रथमे णिगन्ताद् द्वितीये क्यन्नन्तात् तृतीय-चतुर्थयोश्च यगन्तात् समुदायादनुबन्धकरणसामर्थ्यादेवात्मनेपदं प्रयुज्यत इति भावः । अत्रैवार्थे समाधानान्तरमाह– **अवयवे वा कृतं लिङ्गं समुदायस्य विशेषकं भवती**त्यादि– अवयवे-णिजन्त-कुस्म्यादि-सन्नन्त-तिजादिसमुदायावयवभूते कुस्मितिज्यादौ कृतमारब्धं लिङ्गमनुबन्धादि समुदायस्य णिगन्त-सन्नन्तादेर्विशेषकं तत्तत्कार्योपयोगि व्यावर्त्तकं भवति, इति तस्य समुदायस्य तन्निमित्तकं कार्यं भवति, किमविशेषेण ? सर्वत्र तल्लिङ्गं समुदायस्य

"Aho Shrutgyanam"

विशेषकं भवतीत्याशङ्कायां संकोचमाह- **यं समुदायं सोऽवयवो न व्यभिचरतीति**- येन समुदायेन सहानुबन्धविशिष्टस्यावयवस्य न कदापि व्यभिचारस्तस्यैव समुदायस्य सोऽवयवो भवतीति तस्य लिङ्गमपि तादृशसमुदायस्यैव विशेषकं भवति, न व्यभिचरितस्य समुदायस्य । उक्तमर्थं दृष्टान्तेन दृढयति- **यथा गोः सक्थनि कर्णे वा कृतं चिह्नं गोरेव विशेषकं भवति, न गोमण्डलस्येति**- कस्यापि अवयवसमूहरूपस्य गोशरीरस्यावयवभूते सक्थनि कर्णे वा विहितं स्वाम्यादिविशेषपरिचायकं स्वस्तिकादि चिह्नं तस्यैव गोर्विशेषकं यदीयाव्यभिचरितेऽवयवे कृतं, न तु गोसमूहस्य तत्रत्यगवान्तरे तदवयवव्यभिचारात् । प्रकृते निगमयति- **सन्नन्तं च समुदायं तिजादयोऽर्थविशेषेषु न व्यभिचरन्ति, णिगन्तं पुनर्व्यभिचरन्तीति**, अयमाशयः- अनुबन्धरूपलिङ्गवन्तस्तिजादयः क्षान्त्याद्यर्थविशेषेषु तितिक्षेत्यादिसन्नन्तरूपसमुदायं न व्यभिचरन्ति तेष्वर्थेषु तेषां सन्प्रत्ययं विना प्रयुज्यमानत्वाभावात्, इति तद्विशेषकस्तदीयोऽनुबन्ध इति युक्तं, णिगन्तं समुदायं तु व्यभिचरन्त्येव णिगं विनापि तेषां प्रयुज्यमानत्वादिति तदीयोऽनुबन्धो णिगन्तस्य विशेषको न भवतीति ततो न तदनुबन्धनिमित्तकमात्मनेपदं भवति । सन्नन्तसमुदायव्यभिचारोऽपि तिजादीनां दृष्ट इति शङ्कासमुत्थापनेन पूर्वग्रन्थे समुपात्तस्यार्थविशेषेष्विति पदस्य सार्थक्यमाह- **ननु सन्नन्तमपि व्यभिचरन्ती**त्यादिना, अयमाशयः- यत् त्वया सन्नन्तसमुदायाव्यभिचारस्तिजादीनामुक्तः स त्वदुक्त्यैव व्याहतो यतस्त्वमेवोक्तवानसि- णिगन्तं पुनर्व्यभिचरन्तीति, अनेन हि कथनेन तेषां णिगन्तता स्वीकृतेति णिगन्तावस्थायां सन्नन्तव्यभिचारः स्पष्टमेव स्वीकृत इति कथमुच्यते- सन्नन्तं च समुदायं न व्यभिचरन्तीति । मदीयवाक्यार्थांशेन त्वया नावधारित इति मनसिकृत्याह- **नैवमि**ति- त्वयोक्तं सन्नन्तमपि व्यभिचरति णिगन्तावस्थायां तेजयतीत्यादौ तन्नास्माकं प्रतिकूल्येन सन्नन्तव्यभिचारसाधकं कुत इति चेदत्राह-**अर्थविशेषेषु न व्यभिचार इत्युक्तत्वादि**ति, अयमाशयः- क्षान्त्यादावर्थे तिजादयः सन्नन्ततां न व्यभिचरन्तीति मयोक्तम्, तेजयतीत्यादयो णिगन्ताः प्रयोगास्तु निशानकोपनादावर्थे भवन्तीति तत्र सन्नन्तताया व्यभिचारेऽप्यस्मदुक्तौ व्याघाताभावः, तथा च तदर्थेऽनुबन्धः सन्नन्तसमुदायविशेषकः स्यादेवेति । कुत्रार्थे न व्यभिचार इति वक्ष्यमाणसूत्रोपन्यासपुरःसरं प्रकृतविचारं समापयति- **"गुप-तिजो गर्हा-क्षान्तौ" [ ३.४.६. ] "शान-दान-मान-बधान्निशानाऽऽर्जव-विचार-वैरूप्ये" [ ३.४.७. ] इति हि वक्ष्यते** इति- यत एवमर्थविशेषे तेषां सन्नन्तता वक्ष्यतेऽतस्तत्र तत्रैव व्यभिचाराभावोऽस्मदभिप्रेत इति भावः ।। ३.३.७४. ।।

## आमः कृगः ।। १.६.७५. ।।

**त० प्र०— आमः परादनुप्रयुज्यमानात् करोतेराम एव प्राग् यो धातुस्तस्मादिव कर्तर्यात्मनेपदं भवति । भवति न भवति चेति विधि-प्रतिषेधावतिदिश्येते, यथा-उशीरवन्मद्रेषु यवाः, सन्ति न सन्तीति । 'ईहांचक्रे, ईक्षांचक्रे' इत्यफलवत्यपि भवति, 'बिभयांचकार, जागरांचकार' इति फलवत्यपि न भवति । यत्र तु पूर्वस्मादुभयं तत्र फलवत्यफलवति चोभयं भवति- बिभरांचक्रे. बिभरांचकार; पाचयांचक्रे, पाचयांचकार । कृग इति किम् ? करोतेरेव यथा स्यादिह मा भूत्- ईक्षामास, ईक्षांबभूव ।। ७५ ।।**

**श० म० न्यासानुसन्धानम्- आमः० ।** आमः इति परोक्षाया विधीयमानः प्रत्ययो गृह्यते कृगः सान्निध्यात्, नहि स्यादिप्रत्ययान्तर्गतस्यामः कृगः सान्निध्यमस्ति । प्राग्वदिति च सम्बध्यते, प्राक्त्वं चामोऽपेक्षया, कृगा सहाम्प्रकृतीनां पूर्वापरीभावायोगात्, आमा व्यवधानादित्येतत् सर्वमभिप्रेत्याह- **आमः परादनुप्रयुज्यमानात् करोतेराम एव प्राग् यो धातुस्तस्मादिव कर्त्तर्यात्मनेपदं भवती**ति । अतिदेशस्थले क्वचिद् भावाऽभावयोरुभयोरतिदेशो भवति सादृश्यस्य वैधर्म्य-साधर्म्योभयमूलकत्वात्, तदाह- **भवति न भवति चेति विधि-प्रतिषेधावतिदिश्येते** इति- यदि आम्प्रकृतिभूताद् धातोरात्मनेपदं भवति तदा ततोऽनुप्रयुज्यमानात् करोतेरप्यात्मनेपदं भवति, यदि चाम्प्रकृतेरात्मनेपदं न भवति तदाऽनुप्रयुज्यमानात् कृगोऽपि तन्न भवतीति फलितोऽर्थः । अतिदेशस्थले भावाऽभावयोरुभयोः प्रतीतौ दृष्टान्तमाह- **यथा- उशीरवन्मद्रेषु यवाः, सन्ति न सन्ती**ति, अयमर्थः- उशीरवन्मद्रेषु यवा इतिकथिते यदि उशीरदेशे यवाः सन्तीति प्रसिद्धिर्भवति तर्हि मद्रेष्वपि तदीयसत्ता प्रतीयते, यद्युशीरेषु यवा न सन्तीति प्रसिद्धिस्तदा मद्रेष्वपि ते न सन्तीत्येव प्रतीयते। उक्तं च "पूर्ववत् सनः" [ पा०सू० १. ३. ६२. ] इति सूत्रे भाष्येऽपि "वतिनिर्देशोऽयं, कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा- उशीरवन्मद्रेषु यवाः सन्ति न सन्तीति, मातृवदस्याः कलाः सन्ति न सन्तीति । एवमिहापि पूर्ववद् भवति न भवतीति" इति । इत्येवमतिदेशस्थले भावाऽभावयोरुभयोरतिदेशं समर्थ्य तथोदाहरति- **ईहांचक्रे, ईक्षांचक्रे इत्यफलवत्यपि**

"Aho Shrutgyanam"

**भवती**ति, अयमाशयः– कृग्धातुर्गित्, तस्मात् फलवत्कर्त्तरि "ईगितः" [ ३. ३. ९५. ] इत्यात्मनेपदम्, अफलवति च "शेषात् परस्मै" [ ३.३.१००. ] इति परस्मैपदं सिद्धमेव, तत्रानेनात्मनेपदप्रकृतिकामः परात् कृग आत्मनेपदस्य विशिष्य विधानेनाफलवत्यपि कर्त्तरि तदेव भवति न परस्मैपदम्। इत्थं च ईह-ईक्षधातू इदित्त्वादात्मनेपदिनौ, ततः परादामः परात् कृगोऽपि भवत्यात्मनेपदम्, उपमानभूताभ्यामीहीक्षिभ्यां तद्दर्शनात्। '**बिभयांचकार, जागरांचकार' इति फलवत्यपि न भवती**ति, अयमाशयः– बिभेतिर्जागर्तिश्च परस्मैपदिनौ, ततश्चात्मनेपदं न दृष्टमिति तत्प्रकृतिकामः परात् कृगोऽपि न भवत्यात्मनेपदं यदि फलवानपि कर्त्ता भवति। इत्थं च क्रमशो भावाभावावतिदेशस्वभावलब्धौ पार्थक्येन दर्शयित्वा क्वचिच्चोभयपदिनः परादामः परात् कृगोऽप्युभयपदं भवतीत्याह– **यत्र तु पूर्वस्मादुभयं तत्र फलवत्यफलवति चोभयं भवति,** अयमर्थः–इदं सूत्रं सामान्येनाम्प्रकृतिभूताद् यद् यथा दृष्टं तत् तथैव विधत्त इति नास्ति नियमः, यत उभयपदिनो धातोः फलवति कर्त्तर्यात्मनेपदस्याफलवति परस्मैपदस्य स्वतः सिद्धत्वेनोभयपदि-आम्प्रकृतिवत् ततः परस्य कृगोऽप्युभयपदित्वात् तेन रूपेण [ फलवदफलवत्कर्तृनिमित्तेन ] उभयपदसिद्धेः स्वाभाविकत्वात्, किन्तु फलवानफलवान् वा कर्त्ता भवतु किन्त्वाम्प्रकृतिभूतधातुवत् आत्मनेपदं फलवत्त्वादिनिरपेक्षं भवतीति विधत्ते परिशेषात् परस्मैपदमपि चेदाम्प्रकृतेर्दृष्टं तर्हि तदप्यफलवत्कर्तृनिरपेक्षं प्रवर्त्तत इत्युभयमुभयथा भवतीति। क्वेत्याह– बिभरांचक्रे, बिभरांचकार; पाचयांचक्रे, पाचयांचकारेति, इह बिभर्तेः पचतेश्चोभयपदित्वेन तत्प्रकृतिकामः परात् कृगोऽप्युभय भवति फलवदफलवत्कर्तृनिरपेक्षमिति भावः। **कृग इति किमि**ति– आमः इत्येतावदेव सूत्रमस्तु, तावताप्यामः परात् कृगः प्राग्वदात्मनेपदं सेत्स्यत्येवेति प्रश्नाशयः। तावता सूत्रेणाव्याप्तिर्मा भूदतिव्याप्तिस्तु स्यादित्याह– **ईहामास, ईक्षांबभूवे**ति। अयमाशयः– आमः परोऽनुप्रयुज्यमानः कृगेव यदि स्यात् तदा नासीत् कृगो ग्रहणस्य प्रयोजनं, किन्तु "धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्" [ ३. ४. ४६. ] इत्यादिसूत्रैः कृग्वत् भ्वस्ती अप्यनुप्रयुज्येते इति तावप्यामः पराविति ताभ्यामप्यात्मनेपदमेव स्यादिष्यते तु परस्मैपदमेवेति ईहामास, ईक्षांबभूवेत्याद्यात्मनेपदिधातुप्रकृतिकामः पराभ्यां भ्वस्तिभ्यामात्मनेपदवारणार्थं कृगो ग्रहणमावश्यकमिति ॥ ३. ३. ७५. ॥

---

**गन्धनाऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे ॥ ३ ३. ७६. ॥**

**त० प्र०– गन्धनादिष्वर्थेषु वर्तमानात् करोतेः कर्तर्यात्मनेपदं भवति। गन्धनं– द्रोहाभिप्रायेण परदोषोद्घाटनम्, प्रोत्साहनादिकमन्ये। उत्कुरुते, उदाकुरुते माम्, अध्याकुरुते जिघांसुः, अपकर्त्रे कथयतीत्यर्थः। अवक्षेपणम्– अवक्षेपः कुत्सनं भर्त्सनं वा, दुर्वृत्तानवकुरुते, कुत्सयतीत्यर्थः; श्येनो वर्तिकामपकुरुते, भर्त्सयतीत्यर्थः। सेवा– अनुवृत्तिः, महामात्रानुपकुरुते, सेवते इत्यर्थः। साहसम्– अविमृश्य प्रवृत्तिः, परदारान् प्रकुरुते, विनिपातमविभाव्य तान् अभिगच्छतीत्यर्थः। प्रतियत्नः– सतो गुणान्तराधानम्, एधोदकस्योपस्कुरुते, तत्र गुणान्तरमादधातीत्यर्थः। प्रकथनं– कथनप्रारम्भः प्रकर्षेण कथनं वा, जनवादान् प्रकुरुते, कथयितुमारभते, प्रकर्षेण कथयति वेत्यर्थः। उपयोगो– धर्मादौ विनियोगः, शतं प्रकुरुते, धर्मादौ विनियुङ्क्ते इत्यर्थः। एष्विति किम्? कटं करोति। अफलवत्कर्त्रर्थ आरम्भ ॥ ७६ ॥**

---

**श०म० न्यासानुसन्धानम्– गन्धना०**। कृग इत्यनुवर्त्तते। गन्धनादयोऽर्थाः क्वचित् साक्षात् कृगो वाच्याः क्वचिच्च प्रयोगोपाधयः एतच्च तत्र तत्रार्थविशेषव्याख्यानकाले स्फुटीभविष्यति। सामान्येन सूत्रार्थमाह– **गन्धनादिष्वर्थेषु वर्तमानादि**ति। प्रत्येकमर्थान् व्याख्याति– **गन्धनं-द्रोहाभिप्रायेण परदोषोद्घाटनमि**ति– परदोषोद्घाटनं द्विधा संभाव्यते– परस्य सन्मार्गोपदेशाय तदीयदोषानुद्घाट्य तत्परिहारप्रदर्शनाय, तदीयापकाराय च, तत्रेह द्वितीयाकोटिर्ग्रहीतुमभिलषितेत्याह– द्रोहाभिप्रायेणेति, परस्य– शत्रोरुदासीनस्य वा कस्यचिद् द्रोहं कर्तुं दोषाणामुद्घाटनमाविष्करणमित्यर्थः मतान्तरमाह– **प्रोत्साहनादिकमन्ये** इति–अत्रापि द्रोहाभिप्रायेणेति योजनीयमेव, अन्यथाऽत्यन्तभेदापत्तेः। **भट्टोजिदीक्षितेन** च गन्धनं हिंसेत्युक्तम्, परद्रोहेण हि तदीयदोषसूचने तदीयहिंसैव फलतीति नाधिको भेदः। तत्र परदोषोद्घाटनं स्वतोऽत्र धात्वर्थः, हिंसा तु विषयविधयेति भेदः। उदाहरति– **उत्कुरुते, उदाकुरुते, अध्याकुरुते** इति– 'उत्, उत् आङ्, अधि आङ्' इत्येवमेकोपसर्गाद् द्व्युपसर्गाद् वा कृग आत्मनेपदम्, सर्वत्र मामिति कर्म योज्यमेव। प्रयोगत्रयसामान्यमर्थमाह– **जिघांसुरपकर्त्रे कथयतीत्यर्थः**, मां जिघांसुर्ममापकर्त्रे मदीयदोषान् प्रकटयतीत्यर्थ इति भावः। द्वितीयमर्थं व्याख्याति– **अवक्षेपणम्– अवक्षेपः** इति– अवपूर्वात् क्षिपेर्भावे घञ्। अर्थमाह–

"Aho Shrutgyanam"

**कुत्सनं भर्त्सनम्** कुत्सनं निन्दा, भर्त्सनं च निन्दया सह, केवलं सा तर्जनम् । तत्र क्रमश उदाहरति– **कुत्सने– दुर्वृत्तानवकुरुते** इति– दुर्वृत्ता दुश्चरित्रा जनाः, तान् अवकुरुते– कुत्सयतीत्यर्थः, अवपूर्वात् करोतेरात्मनेपदम् । द्वितीयमवक्षेपमुदाहरति– **श्येनो वर्त्तिकामपकुरुते** इति– श्येनः क्षुद्रपक्षिहिंसकः पक्षिविशेषः, वर्त्तिकां क्षुद्रपक्षिविशेषजातिस्त्रियमपकुरुते इति– अपपूर्वात् करोतेरवक्षेपे वर्त्तमानादात्मनेपदम् । **भर्त्सयतीत्यर्थः** इति– अवक्षिपतीत्यर्थपर्यवसानम्, भर्त्सयतेरिदित्त्वेन नित्यणिजन्तत्वेन चानुबन्धस्य केवलेऽचारितार्थ्याण्णिजन्तादात्मनेपदं प्रयोक्तुमुचितं, तथापि * आत्मनेपदमनित्यम् * इति न्यायमाश्रित्य परस्मैपदं प्रयुक्तम्, अस्य न्यायस्य ज्ञापकश्च भ्राजेरात्मनेपदिषु द्विधा पाठ इत्युपपादितमस्माभिर्न्या**यसमुच्चये** । तृतीयार्थं सेवारूपं व्याख्याति– **सेवा– अनुवृत्तिरि**ति– अनुवर्त्तनमनुवृत्तिः, आनुकूल्येनाचरणं प्रीत्यनुकूलव्यापार इति यावत् । **महामात्रानुपकुरुते** इति महामात्राः प्रधानामात्याः, तदुक्तम्—

"मन्त्रे कर्मणि भूषायां वित्ते माने परिच्छदे ।
मात्रा तु महती येषां महामात्रास्तु ते स्मृताः ।।" इति,

तानुपकुरुते इत्युपपूर्वकात् करोतेरात्मनेपदम् । प्रयोगार्थमाह– **सेवते इत्यर्थः** इति–ताननुकूलयितुं तत्प्रीत्यनुकूलाचारं करोतीत्यर्थः, चतुर्थमर्थं साहसं व्याख्याति– **साहसम्– अविमृश्य प्रवृत्तिरि**ति– सहसा– अविचारेण कृतं साहसमिति व्युत्पत्तेरविमृश्याचरणमेव साहसम्, एतच्च विषयतया धातुवाच्यम्, न तु धात्वर्थः धातोस्तावन्मात्रार्थत्वे परदारानिति द्वितीयानुपपत्तेः, अतः साहसप्रवृत्तिविषयीकरणपर्यन्तं धातुवाच्यम् । उदाहरति– **परदारान् प्रकुरुते** इति– प्रपूर्वकात् करोतेरात्मनेपदम् । प्रयोगार्थमाह– **विनिपातमविभाव्य तानभिगच्छतीत्यर्थः**। विनिपातः–ऐहिकं दुर्यशः आमुष्मिक नरकप्राप्त्यादिः, तमविभाव्य– अनेन कर्मणा मे विनिपातो भविष्यतीत्यविमृश्य, तान्– परदारान् अभिगच्छति– स्ववशे करोतीत्यर्थः । पञ्चममर्थं प्रति यत्नाख्यं व्याख्याति– **प्रतियत्नः– सतो गुणान्तराधानमि**ति– सत – स्वेन रूपेण वर्त्तमानस्य वस्तुनो, गुणान्तरस्य– पूर्वगुणापेक्षाऽन्यगुणस्य, आधानम्– उत्पादनं प्रतियत्न इत्यर्थः, असतः– स्वरूपप्रच्युतस्य दुग्धादेर्दध्यादिरूपेण परिणमनं न प्रतियत्न इति बोधयितुं सत इत्युक्तम् । उदाहरति– **एधोदकस्योपस्कुरुते** इति– एध इत्यकारान्तः शब्दः काष्ठवाची "काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्" इति कोशात्, एधश्चोदकं चैधोदकं तस्य– एधोदकस्य, उपस्कुरुते, अथवा एधसिति सकारान्तः शब्दः काष्ठवाच्येव, दकमित्युदकनाम, तदुक्तं **हलायुधेन**– "प्रोक्तं प्राज्ञैर्भुवनविदितं जीवनीयं दकं च" इति, एधश्च दकं चैधोदकं तस्येति वा विग्रहः । एतच्च वाक्यबहिर्भूतकर्तृकं क्रियापदमिति मत्वा व्याख्यानं, यदि चैध इति कर्तृपदं स्वीक्रियते दकस्येति– उदकस्येत्यर्थकं तदा न समासावश्यकतेति । उपपूर्वात् करोतेरात्मनेपदम् "उपात् भूषा-समवाय-प्रतियत्न०" [ ४.४.९२. ] इति स्सडागमः प्रयोगार्थमाह– **तत्र गुणान्तरमादधातीत्यर्थः** इति– एधसि गुणोऽनुष्णशीतस्पर्शादिः, दके च शीतस्पर्शादिः, तदपेक्षयाऽग्निसंयोगादिना उष्णस्पर्शादिरूपं गुणान्तरं तत्रोत्पादयतीत्यर्थः । षष्ठमर्थं प्रकथनाख्यमाख्याति– **प्रकथनं कथनप्रारम्भः** इति– प्रशब्द आद्यर्थः, कथनस्यादिः प्रकथन कथनप्रारम्भ इति यावत् । तस्यैवान्यथा व्याख्यानमाह– **प्रकर्षेण कथनं वे**ति– कस्यचिद् वस्तुनः सम्यक्तया प्रतिपादनमिति यावत् । **जनवादान् प्रकुरुते** इति– जनवादाः– प्रातिस्विकरूपेण जनोक्तयः, प्रपूर्वकात् करोतेरात्मनेपदम् । प्रयोगार्थमाह– **कथयितुमारभते, प्रकर्षेण कथयति वेत्यर्थः** यथाविवक्षं यथाप्रकरणं वा विविच्यार्थद्वयप्रतीतिर्न तु द्वयोरर्थयोरैक्येनैकत्र वा प्रतीतिरिति बोध्यम्, अर्थयोर्भेदस्य जागरूकत्वात् । सप्तममुपयोगार्थं व्याख्याति– **उपयोगो धर्मादौ विनियोगः** इति– उपयोजनमुपयोगः, तथा च कस्मिश्चित् कृत्ये कस्यचिद् वस्तुनो विनियोगः, स इह प्रयोगस्वाभाव्याद् धर्मादिकृत्ये विनियोग एव उपयोगशब्देन प्रसिद्धः । उदाहरति– **शतं प्रकुरुते** इति– प्रपूर्वकात् करोतेरात्मनेपदम्, अत्र प्रशब्दमहिम्नाऽऽत्मनेपदेन च धर्मकृत्ये व्ययतीति भावः । **एष्विति किमि**ति– अर्थविशेषपरिग्रहमनादृत्य सामान्येन करोतेरफलवत्यपि कर्त्तर्यात्मनेपदं विधीयतामिति प्रष्टुराशयः । गन्धनाद्यर्थादन्यत्राफलवत्कर्त्तर्यात्मनेपदं नेष्टमित्युत्तरयति– **कटं करोती**ति– सामान्येन विधाने करोतेः फलवत्यफलवति च कर्त्तर्यात्मनेपदमेव प्रयोक्ष्यत इति परस्मैपदस्य प्रयोगो न स्यादिति भावः । ननु करोतेर्गित्त्वेन तत "ईगितः" [ ३.३ ९५. ] इति सूत्रेण सामान्यत एव फलवत्कर्त्तर्यात्मनेपदमन्यत्र "शेषात् परस्मै" [३.३.१००.] इति परस्मैपदमित्युभयपदस्य सिद्धेरनेनार्थविशेषे आत्मनेपदविधानमनर्थकमप्राप्ते हि शास्त्रमर्थवदिति न्यायादिति चेदत्राह– **अफलवत्कर्त्रर्थ आरम्भः** इति– अफलवान् कर्त्ता यस्य तादृशः कृग्– अफलवत्कर्ता, तस्मादात्मनेपदविधानमर्थः– प्रयोजनं यस्य तादृशोऽयमारम्भः– सूत्रस्यानुष्ठानमिति तदर्थः, अयमाशयः– सामान्येन सर्वत्रार्थे

"Aho Shrutgyanam"

फलवत्कर्तर्यात्मनेपदमफलवत्कर्त्तरि च परस्मैपदमिति प्राप्तेऽपि गन्धनाद्यर्थेष्वफलवत्यपि कर्त्तर्यात्मनेपदविधानार्थमिदं सूत्रमिति ॥ ३. ३. ७६. ॥

## अधेः प्रसहने ॥ ३ ३ ७७. ॥

त० प्र०— अधेः परात् करोतेः प्रसहने वर्तमानात् कर्त्तर्यात्मनेपदं भवति । प्रसहनं– पराभिभवः परेणापराजयो वा, तं प्रसेहे, तमभिभूतवान् तेन वा न पराजित इत्यर्थः । अथवा सहनं– क्षमा तितिक्षोपेक्षेति यावत्, प्रकर्षेण सहनं– प्रसहनम्, तच्च द्विधा– शक्तस्याशक्तस्य च, "भवादृशाश्चेदधिकुर्वते परान्, 'समर्था अपि यद्युपेक्षन्ते तदा निराश्रया हन्त ! हता मनस्विता" [किराते], 'अधिचक्रे न यं हरिः' सोढुमशक्तः सन् तेन न्यत्क्रियते । प्रसहन इति किम् ? तमधिकरोति । अधेरिति किम् ? शत्रून् प्रकरोति ॥ ७७ ॥

श० म० न्यासानुसन्धानम्— अधेः० । कृग इति प्रकृतम्, तदाह– अधेः परात् करोतेरिति । "षहि मर्षणे" इत्यस्मात् प्रपूर्वात् भावेऽनटि प्रसहनशब्दसिद्धिः, तदर्थस्य सामान्यतो ज्ञानेऽपि प्रकृते विशेषार्थत्वेनेष्टत्वात् तदर्थमाह– प्रसहनं– पराभिभवः परेणापराजयो वेति– परस्य– शत्रोः, अभिभवः– तिरस्कारो विजयो वा, परेणापराजयश्च परेण स्वकीयाभिभवाभाव एव, पूर्वत्र परस्मादुत्कृष्टत्वं परत्र तस्मादनपकृष्टत्वं प्रतीयत इत्येव विशेषः, तं हाधिचक्रे इति– तमिति प्रक्रान्तं परमुपस्थापयति, ह इत्यव्ययं प्रसिद्धार्थकम्, अधिपूर्वात् करोतेः परोक्षाया आत्मनेपदैकवचनस्य विधानम् । प्रयोगार्थमाह संक्षिप्य– तं प्रसेहे इति । इममर्थमेव प्रसहनशब्दोक्तार्थानुकूलं विवृणोति–तमभिभूतवान् तेन वा न पराजित इत्यर्थः । प्रसहनशब्दस्य विशेषार्थाविवक्षायां सोपसर्गसप्रत्ययधातुवाच्यप्रसिद्धार्थपरिग्रहेण तदर्थमाह– अथवा सहनं क्षमा तितिक्षोपेक्षेति यावत् इति । मर्षणार्थत्वाद् धातोरुपसर्गेण च तदर्थस्यैव प्रकर्षबोधनात् प्रसहनशब्दस्य भावार्थकानप्रत्ययान्तस्य क्षमैवार्थः, सा च द्विविधा– तदपकारतितिक्षारूपा, तदीयोपेक्षारूपा वेत्युभयं गृहीतम् । तस्य द्वैविध्यमाह– तच्च द्विधा शक्तस्याशक्तस्य चेति– शक्तस्य क्षमा तदुपरि दयया किमत्र क्षुद्रे वस्तुन्यहं पराक्रममाचरामीति बुद्ध्या वा; अशक्तस्य मयाऽस्य प्रतीकारे न शक्ष्यते इति बुद्ध्वा वरं तत्सहनमेवेति निश्चयेन । तत्र प्रथमप्रकारमुदाहरति– भवादृशाश्चेदधिकुर्वते परानिति– युधिष्ठिरं प्रति द्रौपद्या वाक्यमिदं भारविकविविरचिते किरातार्जुनीये महाकाव्ये प्रथमसर्गे, तत्र च सम्प्रति मुद्रिते पुस्तके 'भवादृशाश्चेदधिकुर्वते रतिम्' इति पाठो लभ्यते, तथा सति च नात्रोदाहर्तुं योग्यमिदं वाक्यमिति प्रकृतोदाहरणानुकूलमयमेव पाठः समीचीनः । प्रयोगार्थमुक्त्वा वाक्यं पूरयति– समर्था अपि शत्रून् यद्युपेक्षन्ते तदा निराश्रया हन्त ! हता मनस्वितेति– शत्रुभिः सर्वथाऽपकृता अपि तदभिभवे समर्था अपि भवादृशा महापुरुषाः परान् यद्युपेक्षन्ते तदा मनस्विता, निराश्रया– निराधारा सती, हता– नष्टा, इति प्रतीयते, ये किल सर्वथा आत्मसंमानरक्षणे समर्थास्त एव मनस्वितताया आश्रया इति तानवलम्ब्यैव सा जीवति, ते च भवादृशा एव भवन्ति । तेऽपि चेत् परकृतमपमानमुपेक्ष्य तत्प्रतीकारं न कुर्वन्ति, तर्हि मनस्विता क्व तिष्ठत्विति नश्येदेवेति भावः । अत्र शक्तस्य क्षमा प्रतीयत एव । अशक्तस्य क्षमां– प्रसहनमुदाहरति– "अधिचक्रे न यं हरिः" इति– हरिरिन्द्रो य दैत्यं न अधिचक्रे इत्यन्वयः । प्रयोगार्थमाह– सोढुमशक्तः सन् तेन न्यत्क्रियत इति– अत्राधिचक्रे इति क्रियायाः प्रसहनमेवार्थः, स च नञा निषिध्यत इति प्रसहनाभावो विज्ञायते, तदुक्तं– सोढुमशक्तः सन् इति, तेन– पूर्वोपक्रान्तेन दैत्यविशेषेण, न्यत्क्रियते– अभिभूयत इत्यर्थः । अधेः प्रयोगे प्रसहनार्थस्यैव प्रतीतिरिति प्रागुदाहृतोदाहरणैर्निश्चित्य विनाऽपि 'प्रसहने' इति पदं प्रसहने एव भविष्यतीत्यभिमानेन पृच्छति–प्रसहन इति किमिति । आत्मनेपदमहिम्नैव प्रसहनार्थप्रतीतिर्न तु सर्वत्राऽस्य तदर्थत्वमिति तदर्थाविवक्षायां मा भूदात्मनेपदमित्यर्थं प्रसहन इत्यावश्यकमिति प्रत्युदाहरणेनाह– तमधिकरोतीति– प्रक्रान्तं कञ्चित् कश्चिदधिकारे नियोजयतीत्यर्थप्रतीत्या प्रसहनार्थाभावेन नात्रात्मनेपदम्, प्रसहन इति पदाभावे च स्यादेवेत्याशयः । अधेरिति किमिति– अधिरूपोपसर्गसत्त्व एव प्रसहनार्थप्रतीतिरिति विनाऽपि तद्ग्रहणं तत्पूर्वकादेव भविष्यत्यात्मनेपदमिति मत्वा प्रश्नः । शत्रून् प्रकरोतीति– अत्राधिशब्दाभावेऽपि शत्रूनभिभवतीत्यर्थप्रतीतेः प्रसहनसत्त्वेऽप्यधिशब्दाभावान्न भवत्यात्मनेपदं सूत्रे तदुपादानाभावे च स्यादेवेति तदुपादानमावश्यकमित्याशयः ॥ ३.३.७७. ॥

## दीप्ति-ज्ञान-यत्न-विमत्युपसंभाषोपमन्त्रणे वदः ॥ ३. ३. ७८. ॥

त०प्र०— दीप्त्यादिष्वर्थेषु गम्यमानेषु वदतेः कर्त्तर्यात्मनेपदं भवति । दीप्तिर्भासनम्, सा च कर्त्तृविशेषणं वा, वदनक्रियासहचारिणी धात्वर्थो वा, केवलैव वा धात्वर्थः । वदते विद्वान् स्याद्वादे सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद् दीप्यमानो वदतीति वा वदन् दीप्यते– इति वा, दीप्यत एव वेत्यर्थः । ज्ञानमवबोधः, तच्च वदिक्रियाया

"Aho Shrutgyanam"

**हेतुर्वा, विषयि वा, फलं वा, केवलमेव वा धात्वर्थः, वदते धीमांस्तत्त्वार्थे, ज्ञात्वा वदतीति वा; जानाति वदितुमिति वा, वदन् जानातीति वा, जानात्येव वेत्यर्थः। यत्न उत्साहः, स च धात्वर्थस्य विषयो, धात्वर्थ एव वा; श्रुते वदते, तपसि वदते, तद्विषयमुत्साहं वाचाविष्करोति, तत्रोत्सहते इति वेत्यर्थः। नानामतिर्विमतिः, सा च धात्वर्थस्य हेतुः, धात्वर्थ एव वा; धर्मे विवदन्ते, विमतिपूर्वकं विचित्रं भाषन्त इति वा, विविधं मन्यन्त इति वेत्यर्थः। उपसंभाषोपसान्त्वनमुपालम्भो वा धात्वर्थ एवायम्; कर्मकरानुपवदते, उपसान्त्वयति, उपलभते वेत्यर्थः। उपमन्त्रणं रहसि उपच्छन्दनम्, तदपि धात्वर्थ एव; कुलभार्यामुपवदते, परदारानुपवदते, रहस्युपलोभयतीत्यर्थः। दीप्त्यादिष्विति किम्? यत्किञ्चिद् वदति ॥ ७८ ॥**

**श०म० न्यासानुसन्धानम्— दीप्ति०** । दीप्त्यादीनां समाहारद्वन्द्वः, दीप्तिश्च ज्ञानं च यत्नश्च विमतिश्चोपसंभाषा चोपमन्त्रणं चेति विग्रहः। एषु केचनैव धात्वर्था अन्ये प्रयोगोपाधय इति साधारण्येनाह— **दीप्त्यादिष्वर्थेषु गम्यमानेष्विति**— अत्रोपसंभाषोपमन्त्रणे साक्षाद् धातोर्वाच्ये इतरे प्रयोगोपाधयः, सर्वे धात्वर्था एव वेति पक्षान्तरमपि, तत् तदर्थव्याख्यानावसरे स्फुटीभविष्यति। क्रमशोऽर्थान् व्याख्यास्यन् प्रथमं दीप्त्यर्थमाह— **दीप्तिर्भासनम्** इति— मुखविकासादिना शोभमानत्वमिति भावः। अस्याः प्रकृते कथं प्रतीतिरिति विवृणोति— **सा च कर्तृविशेषणं वा वदनक्रियासहचारिणी धात्वर्थो वा, केवलैव वा धात्वर्थः** इति— वदनकाले दीप्यमानः कर्तैवेति कर्तृगतत्वेन तस्याः कर्तृविशेषणत्वम्, वदनेन सहैव सा प्रतीतिविषयो भवतीति वदनक्रियासहचरितत्वेनैकपदप्रतिपाद्यतया धात्वर्थतामेव भजत इति वा, वदनमिह न विवक्षितमपि तु दीप्तिरेवेति धातुना तन्मात्रप्रतीतेः सा केवलमेव स्वातन्त्र्येणैव धात्वर्थ इति वा, इत्थं चात्र पक्षत्रयम्। उदाहरति— **वदते विद्वान् स्याद्वादे** स्याद्वादः पूर्वं लक्षितोऽनेकान्तवादः, सप्तमी विषयत्वार्थे, विद्वान् स्याद्वादविषये वदते इत्यन्वयः। प्रयोगार्थं वर्णितरीत्या त्रिधा प्रतिपादयति, तत्र सा कर्तृविशेषणमिति प्रथमे पक्षे आह— **सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद् दीप्यमानो वदतीति वेति**— दीप्यमानत्वे हेतुः— विकसितमुखत्वादिति, विकसितमुखो हि शोभते इति प्रत्यक्षविज्ञेयम्, विकसितमुखत्वे च हेतुद्वयमुपात्तं— सम्यग्ज्ञानादनाकुलकथनाच्च, विषयमसम्यग्जानानो हि सन्दिग्धमनाः संकुचितमुखो भवति, परप्रतारणार्थं यथाकथंचित् स्वमतप्रतिपादनार्थं वा वदन्नपि विषयसम्यग्ज्ञानाभावात्, स्वनिग्रहं शङ्कमानो विवर्णमुखो भवत्येवेति मुखविकासाय सम्यग्ज्ञानमावश्यकम्, सम्यग्जानानोऽपि सम्यक् प्रतिपादयितुमशक्तो विवर्णमुखो भवतीत्यत आह— अनाकुलकथनाच्च, अनाकुलमसंकीर्णं यथा स्यात् तथा कथनात्— प्रतिपादनात् च विकसितमुखत्वम्। अथवा सम्यग्ज्ञानादेवानाकुलकथनमिति पक्षे च हेतौ न तु हेतुसमुच्चये, यतः सम्यग्ज्ञानमत एवानाकुलकथनम्, असम्यग्जानानो हि परस्परसङ्कीर्णमस्पष्टं वदति, अथवा आकुलीभूय वदति, सम्यग्ज्ञानवांश्च सङ्कीर्णं स्पष्टं वदति अव्याकुलो वा वदति, सम्यग्ज्ञानवान् स्पष्टमव्याकुलं वा यथा स्यात् तथा प्रतिपादयन् विकसितमुखो दीप्यमानो वदतीति समुदितार्थः। मुद्रितबृहद्वृत्तिपुस्तके पूर्ववाक्यनिविष्टो वाशब्दो विरामचिह्नात् परं मध्यमवाक्ये संनिविष्टो 'वावदन् दीप्यत इति वा' इति, तन्न युक्तम्— **'वदन् दीप्यत इति वा'** इत्येव मध्यमपक्षार्थस्वरूपस्यौचित्यात्। पुनः पुनरतिशयेन वा वदनं वावदनमित्यर्थस्तु न विवक्षित इति यङ्लुबन्ताश्रयणेन तत्समाधानमशोभनम्। वदनक्रियासहचारिणी धात्वर्थो वा [दीप्तिः] इति मध्यमपक्षेऽर्थकथनमिदं प्रतिवाक्यं च पक्षान्तरद्योतकवाशब्दप्रयोग इति पूर्ववाक्ये वाशब्दाभावो मध्यमवाक्ये च वाशब्दद्वयमिति नोचितमिति पूर्ववाक्यस्थमेव तत्, अस्तु, 'वदन् दीप्यते' इति कथने वदनस्य दीप्तेश्चैककालयोगेन सहचरितत्वं प्रतीयते। तृतीये केवलैव वा धात्वर्थ इति पक्षे प्रयोगार्थमाह— **दीप्यत एवेत्यर्थः** इति— अत्र 'दीप्यत एव वेत्यर्थः' इति पाठ उचितः, वैकल्पिकपक्षेषु सर्वत्र वाशब्दप्रयोगौचित्यात्।

द्वितीयमर्थं व्याख्याति— **ज्ञानमवबोधः** इति— विषयस्य यथार्थाधिगतिरवबोधः, अत्रापि चत्वारः पक्षास्तानाह— **तच्च वदिक्रियाया हेतुर्वा विषयि वा, फलं वा, केवलमेव वा धात्वर्थः** इति— तदित्यनेन ज्ञानमुपस्थाप्यते, ज्ञानं च वदिक्रियायाः प्रकृतधात्वर्थतया प्रसिद्धाया हेतुरित्येकः पक्षः, यो हि विषयं जानाति स एव वदितुं शक्नोतीति ज्ञानं वदनस्य कारणमिति युक्तिरत्र पक्षे। **विषयि वेति**— अत्रापि वदिक्रियाया इति सम्बध्यते, तथा च वदनं विषयो ज्ञानं विषयि इति वदनस्य ज्ञानमिति फलति। **फलं वेति**— वदनक्रियाया इति शेषः, तथा प्रथमपक्षवैपरीत्येन वदनमेव ज्ञानस्य हेतुरित्यायात्यत्र पक्षे, यतो वदत्यतो जानातीति प्रतीतेः। चतुर्थं पक्षमाह— **केवलमेव वा धात्वर्थः** इति— ज्ञानमेव प्रकृते धात्वर्थो न तु स्पष्टशब्दोच्चारणव्यापाररूपं वदनमिति भावः। उदाहरति— **वदते धीमांस्तत्त्वार्थे**, 'तत्त्वार्थे' इत्यत्र विषयसप्तमी, तत्त्वार्थ-

"Aho Shrutgyanam"

विषये वदत इत्यर्थः, तत्त्वार्थविषये वदनकर्तृत्वं न यस्य कस्यचित् सम्भाव्यतेऽपि तु बुद्धिमत एवेत्याह- **धीमानिति**, तथा च यथाकथंचिज्ज्ञानस्येह विवक्षितत्वाद् भवत्यात्मनेपदम् । पूर्वोक्तप्रकारचतुष्टयानुसारं प्रयोगार्थमाह- **ज्ञात्वा वदतीत्यादिना**, तत्र 'ज्ञात्वा वदति' इति ज्ञानं वदिक्रियाया हेतुरिति पक्षे क्त्वाप्रत्ययेन ज्ञानस्य पूर्ववृत्तित्वप्रतिपादनात् कार्यनियतपूर्ववृत्तेश्च कारणत्वाज्ज्ञानं वदने हेतुरिति स्पष्टम् । 'ज्ञानं वदिक्रियाया विषयि' इति पक्षमाश्रित्यार्थमाह- **जानाति वदितुमिति**, अत्र वदिक्रियाज्ञानस्य विषय इति विषयि ज्ञानमिति भवति । 'ज्ञानं वदिक्रियायाः फलम्' इति पक्षमाश्रित्याह- **वदन् जानातीति**- वदिक्रियया ज्ञानस्यानुमेयत्वेन फलत्वम्, अथवा वारं वारं कस्यापि विषयस्य स्पष्टतया पूर्वमज्ञातस्यापि ज्ञानं भवतीति वदिक्रियायाः ज्ञानमिति रीत्या फलम् । 'ज्ञानं केवलमेव धात्वर्थः' इति पक्षे आह- **जानात्येवेति**- जानातीत्येवार्थं इत्येवमेवकारो योजनीयः, अयोगव्यवच्छेदार्थस्यैवकारस्य 'वदते' इति पदस्यार्थेऽन्तर्भावाभावात्, 'जानाति' इत्येव केवलमर्थ इति विवक्षितमिति भावः, इत्थं च ज्ञानस्य स्वातन्त्र्येणैव धात्वर्थत्वं फलति ।

तृतीयं यत्नार्थं व्याख्याति- **यत्न उत्साहः** इति- यतिः प्रयत्नार्थकः, तस्माद् भावे प्रत्ययेन यत्नशब्दः सिध्यति, तस्येहोत्साहार्थत्वम्, उत्साहश्च स्थेयान् संरम्भः, कस्यापि कार्यस्य कृते स्थिरतमं प्रावण्यमिति यावत् । तत्रापि पक्षद्वयमाह- **स च धात्वर्थस्य विषयो धात्वर्थ एव वेति**- धात्वर्थोऽत्र व्यक्तं शब्दोच्चारणमेव, तद्विषयत्वमुत्साहस्य तेनैव प्रत्येतव्यम्, यो यथा यद्विषये वदति तस्य तद्विषय इव तद्वदनविषयेऽप्युत्साहः प्रतीयत एव । पक्षान्तरमाह- **धात्वर्थ एव वेति**- उत्साह एवात्र स्वातन्त्र्येण धातुवाच्य इत्यर्थः । उदाहरति- **श्रुते वदते, तपसि वदते** इति- उत्साहे गम्ये भवत्यात्मनेपदम् । प्रकारद्वयानुकूल्येन प्रयोगार्थद्वयमाह- **तद्विषयमुत्साहं वाचाविष्करोति, तत्रोत्सहत इति वाऽर्थः** इति- अत्र तत्पदेन यद्यपि श्रुततपसी ग्राह्ये इति प्रतिभाति तयोरेव सप्तम्या निर्दिष्टतया विषयत्वार्थे वर्त्तमानत्वात्, तथापि केवलं 'वदते' इति प्रयोगार्थस्यैव वक्तव्यतया, तथैव पूर्वत्र सर्वत्रोक्ततया च तत्पदेन व्यक्तोच्चारणरूपो धात्वर्थ एव ग्राह्यः, श्रुततपसी च स्वातन्त्र्येणोत्साहाविष्करणस्य विषयौ, तथा च श्रुतविषये वदने स्वकीयमुत्साहं वाचाविष्करोति, तपोविषये वदने स्वकीयमुत्साहं वाचाविष्करोतीति वाक्यार्थः, अत्र च 'वदने' इति या सप्तमी प्रयुक्ता तदर्थमेव विषयत्वं तद्विषयपदेनोक्तमिति भावः । उत्साहः स्वयमेव धात्वर्थ इति पक्षे च, तत्रोत्सहते वेत्यर्थः, अत्र 'उत्सहते वेत्यर्थः' इत्येव क्रमागतरीत्या कथनीयम्, 'वदते' इत्येतावन्मात्रार्थस्य सर्वत्र वर्णितत्वात्, तत्रेति पदेन चाकामेनापि श्रुत-तपसी एव ग्राह्ये स्याताम्, तथा सति च 'तद्विषयम्' इति पदेनापि पूर्वत्रार्थे दत्तेन श्रुततपोविषयम्' इत्येवार्थो ग्राह्यः स्यात्, स च नेष्टः, धात्वर्थविषयस्यैवोत्साहस्य पूर्वं कथनात्, तथा च तत्रेति पदमधिकमेव, वाक्यार्थवर्णनभावनया वा प्रयुक्तमिति स्वीकार्यमिति प्रतीमः ।

चतुर्थं विमतिपदार्थमाह- **नानामतिर्विमतिरिति**- एकत्र धर्मिणि विभिन्नप्रकारा प्रतिपत्तिरिति तदर्थः । तत्रापि पक्षद्वयमाह- **सा च धात्वर्थस्य हेतुः, धात्वर्थ एव वेति**- यत्र विप्रतिपत्तिनिमित्तं वदनं तत्र वदनक्रियारूपस्य धात्वर्थस्य विमतिर्हेतुः, यत्र च धातुना विमतेरेव विवक्षा तत्र सा धात्वर्थ इति विवेकः । उदाहरति- **धर्मे विवदन्ते** इति- धर्मविषये यत्र विभिन्नं मत वादिनां, तत्कारणादेव च सर्वेषां परस्परं विवादस्तत्र प्रथमः पक्ष इत्याह- **विमतिपूर्वकं विचित्रं भाषन्ते इति वेति**, विमतिपूर्वकमिति विमतेः पूर्ववृत्तित्वकथनेन कारणत्वं प्रकाशितम्, विचित्रमिति कथनेन विमतेः स्वरूपमुद्घाटितम् । धात्वर्थ एवेति मते आह- **विविधं मन्यन्त इति वेति**- विविधमित्यस्य प्रकारमित्यादि शेषः, धर्मविषये विभिन्नं प्रकारं मन्यन्ते इति तदर्थः, तथा च विमतिरेव धातुवाच्येति धात्वर्थत्वं तस्याः ।

एवं चतुर्णां परम्परया साक्षाद् वा धातुप्रतिपाद्यानामुदाहरणमुक्त्वा साक्षादेव धातुप्रतिपाद्ययोर्द्वयोरर्थयोर्व्याख्यां क्रमश आह- **उपसंभाषोपसान्त्वनमुपालम्भो वेति**- केनापि कारणेन पीडितमनसः सन्तोषाय वाक्प्रयोग उपसान्त्वनम्, **उपालम्भो वेति**- निन्दापूर्वकं कटुवचनम्, तेन तदीयाप्तजनेन वा कृतस्यापराधस्य तत्समीपे प्रकाशनं वा उपालम्भः, अस्य साक्षाद् धातुवाच्यत्वमाह- **धात्वर्थ एवायमिति**- उपसर्गयोगादीदृशभाषणस्य धातुनैव प्रतिपाद्यत्वात् धात्वर्थत्वम् । उदाहरति- **कर्मकरानुपवदते** इति- पूर्वं स्वेनैव भर्त्सितान् तान् उपसान्त्वयति, साम्ना प्रकृतिस्थान् करोतीत्यर्थः । पक्षान्तरे प्रयोगार्थमाह- **उपलभते वेति**- तदीयदोषान् तत्समीप एव प्रकाशयतीत्यर्थः ।

षष्ठमर्थं व्याख्याति- **उपमन्त्रणं रहसि उपच्छन्दनमिति**- छन्दसा-आनुकूल्येन उपचरणमुपच्छन्दनम् । अस्यापि उपसर्गमहिम्ना धातुवाच्यत्वमेवेति कथयति- **तदपि धात्वर्थ एव** । अयमाशयः- यद्यपि उपसंभाषणमुपमन्त्रणं

"Aho Shrutgyanam"

वा न केवलेन वदिना प्रतीयते अपि तूपसर्गसहितेनैव, तथाप्युपसर्गाणां द्योतकत्वस्यैव विशेषसम्मतत्वेन तदर्थत्वं धातोरेव, उपसर्गः केवलमभिव्यञ्जक इति तयोर्धात्वर्थत्वानपायः। उदाहरति- **परदारानुपवदते** इति- परदारान् रहसि छन्दसोपचरतीत्यर्थमेव शब्दान्तरेणाह- **रहस्युपलोभयतीत्यर्थः । दीप्त्यादिष्विति किमिति-** अर्थविशेषाश्रयणं व्यर्थं सामान्येनैवात्मनेपदं विधीयतामिति भावः। प्रत्युदाहरति- **यत्किञ्चिद् वदती**ति, अयमाशयः- अर्थविशेषपरिग्रहाभावे सर्वत्र वदेरात्मनेपदमेव स्यादिति परस्मैपदं क्वापि न प्रयुज्येत, न च तदिष्टम्; परस्मैपदिषु तत्पाठस्य वैयर्थ्यापत्तेरित्येष्वेवात्मनेपदमस्तु नान्यत्रेत्यर्थमर्थविशेषपरिग्रह आवश्यक एवेति ॥ ३. ३. ७८. ॥

## व्यक्तवाचां सहोक्तौ ॥ ३. ३. ७९. ॥

**त०प्र०— व्यक्ताव्यक्ताक्षरा वाग् येषां ते व्यक्तवाचः, रूढ्या मनुष्यादय एवोच्यन्ते; तेषां सहोक्तौ- संभूयोच्चारणे वर्तमानाद् वदेः कर्तर्यात्मनेपद भवति। संप्रवदन्ते ग्राम्याः, संप्रवदन्ते पिशाचाः, संभूय भाषन्त इत्यर्थः। व्यक्तवाचामिति किम्? संप्रवदन्ति कुक्कुटाः, संप्रवदन्ति शुकाः। शुकसारिकादीनामपि व्यक्तवाक्त्वात् सहोक्ताविच्छन्त्यन्ये- संप्रवदन्ते शुकाः, संप्रवदन्ते सारिकाः। सहोक्ताविति किम्? चैत्रेणोक्ते मैत्रो वदति ॥ ७९ ॥**

**श० म० न्यासानुसन्धानम्— व्यक्त० ।** वद इतिप्रकृतम्, 'वाक्'पदेन वैखरीनाद एव लोके ज्ञायते, तथा च सर्वे एव व्यक्तवाचः "वैखर्या हि कृतो नादः परश्रवणगोचरः" इति **वाक्यपदीयोक्तेः**, वैखरीनादस्य व्यक्ततासत्त्वादेव परश्रवणगोचरत्वमिति सर्वे वाक्शक्तियुक्ता जीवा व्यक्तवाच एवेति व्यक्तवाचामिति पदमव्यावर्तकमिति शङ्कामपाकुर्वन्नाह- **व्यक्ताव्यक्ताक्षरा वाग् येषां ते व्यक्तवाचः** इति- न ध्वनिमात्रस्य व्यक्तत्वेन व्यक्तवाक्त्वं स्वीक्रियते किन्तु येषां वाचि कादिवर्णाः स्फुटं प्रतीयन्ते त एव व्यक्तवाच इति कथ्यन्त इति भावः। एवमपि सर्वेषामेव जीवानां बहूनां ता व्यक्तवाक्त्वं स्यात्, पक्ष्यादिशब्देष्वपि लोकैस्तत्तदक्षरव्यक्तिभावस्यानुमीयमानत्वात्, शुकादीनां वाचि च स्फुटतरवर्णोपलब्धेरिति चेदत्राह- **रूढ्या मनुष्यादय एवोच्यन्ते** इति, अयं भावः-नायं शब्दयौगिक एव येन यस्य कस्यचित् स्पष्टवर्णवाचो जीवस्यानेन परिग्रहः स्यात्, किन्तु योगरूढिरियम्, अथवा केवलं रूढिरेव। तथा च मनुष्यादिष्वेवैतच्छब्दप्रयोगः, मनुष्यादय इत्यत्रादिपदेन देवासुरादयो गृह्यन्ते तेषामपि व्यक्तवाक्त्वस्य निर्विवादत्वात्। अयं च विशेषार्थो व्यक्तवाचामिति पदस्य ग्रहणादेव परिज्ञायते, यतो वदधातुः स्वयमेव व्यक्तवागर्थः, तेनैव व्यक्तवाग्रूपस्यार्थस्य लाभ इति तद्वैयर्थ्येन [ व्यक्तवाचामित्यस्य वैयर्थ्येन ] तद्ग्रहणसामर्थ्यादत्र व्यक्तवाक्पदस्य रूढार्थपरत्वमिति विज्ञायते। अवश्यं पशुपक्षिणामपि वाग् व्यक्ता अत एव च कुक्कुटेनोक्ते जना जानन्ति- इयं कुक्कुटस्य वागिति, अन्येषामपि वाचं व्यक्तत्वादेव परिचिन्वन्ति। किञ्च, अकारादयो वर्णा अपि तेषां वाचि व्यक्ता भवन्ति, अत एव 'कुक्कुटेनोक्ते कुकूडिति वदति, कोकिलेनोक्ते कुहूरिति वदति' इत्येवं जनाः कथयन्ति, यदि कादिवर्णव्यक्तिस्तत्र न स्यात् तर्हि कथमेवमुक्तिः संगच्छेतेति व्यक्ताक्षरा वाग् येषामिति कथनेऽपि न निस्तार इति मनुष्यादिषु रूढिराश्रिता। भाष्ये [ पा०सू० १. ३. २८. ] व्यक्ताक्षरा वाग् येषामिति बहुव्रीहिणैव मनुष्यादयो गृह्यन्ते, पक्ष्यादिवाचि अक्षराणां प्रतीयमानत्वेऽपि न व्यक्तत्वं, तत्तत्स्थानप्रयत्नाद्यप्रतीतेः, कुकूडित्यादिकथनं चानुकरणमात्रं न तु वस्तुगत्या तत्स्वरूपोपस्थापकम्। शुकसारिकादिवाचि कतिपयवर्णव्यक्तेः प्रतीयमानत्वेऽपि तस्य मनुष्ययत्नसाध्यत्वेन न तेषां व्यक्तवाक्त्वमिति रूढ्याश्रयणमनावश्यकमिति तद्रीत्या प्रतिभाति। यथाकथञ्चिन्मनुष्यादय एव ग्राह्या इति नियतविषयत्वेन पदस्य रूढत्वमेव पर्यवस्यतीति मत्वा स्वमते रूढिराश्रिता। सहोक्तेः 'चार्थे द्वन्द्वः सहोक्तौ' [ ३. १. ११७. ] इति सूत्रे सहविवक्षारूपेण वर्णितत्वादिहापि सोऽर्थ एव स्यादिति शङ्कापाकरणाय सहोक्तिपदं व्याख्याति- **संभूयोच्चारणे** इति- संभूय बहुभिर्मिलित्वा शब्दोच्चारणे इत्यर्थः। उदाहरति- **संप्रवदन्ते ग्राम्याः** इति- शब्दोच्चारणं सर्वैः पृथगेव कार्यं तत्प्रयोजनस्यार्थावबोधस्य तथैव सत्त्वात्, संभूयोच्चारणे च कः कस्य शृणुयात्, तदभावे च कथमर्थाधिगतिः, एवमुच्चारणं न परीक्षकजनव्यवहारोऽपि तु पामरव्यवहार एवेत्यतो ग्राम्या एवेह कर्तृत्वेनोपात्ताः। **सम्प्रवदन्ते पिशाचाः** इति- पिशाचानां देवयोनित्वेऽपि तमःप्राधान्यात् तेषामपि तथोच्चारणस्य सम्भव इति त एवादिपदग्राह्येषूक्ताः, तथा च सहोक्तिसत्त्वाद् भवत्यात्मनेपदम्। **व्यक्तवाचामिति किमिति**-"वद व्यक्तायां वाचि" इति धातुपाठे तदर्थकथनादेव व्यक्तवाचामेव कर्तृत्वमिह भविष्यतीति व्यक्तवाचामिति पदं व्यर्थमिति प्रष्टुराशयः। अत एवेह व्यक्तवाचामिति पदस्य रूढत्वमाश्रितमिति मनुष्यादिभिन्नकर्तृकोच्चारणे मा भूदित्यर्थत्वं तस्येत्याह प्रत्युदाहरणद्वारा- **संप्रवदन्ति कुक्कुटाः** इति- अयं च प्रयोगो भाष्येऽप्युक्तः- "वरतनु ! संप्रवदन्ति कुक्कुटाः"

"Aho Shrutgyanam"

इत्येवंरूपेण, तथा च प्रतीयते यत्– कुपितकामिनीप्रसादनपरस्य वाक्यस्य[पद्यस्य]शेषांशोऽयमिति, कुक्कुटानां संभूय वदनेन रात्रिशेषोऽवगम्यत इति नातः परं मानधारणस्य समय इति वक्तुस्तात्पर्यम्, अत्र व्यक्तवाक्कर्तृत्वाभावादेव नात्मनेपदं प्रयुक्तम्, व्यक्तवाचामिति पदाभावे चात्मनेपदमत्र दुर्वारं स्यात्। **सम्प्रवदन्ति शुकाः** इति– शुकादिपक्षिणामपि संभूय शब्दकरणं स्वभाव इति व्यक्तवाक्त्वाभावादेव तत्कर्तृकेऽत्र नात्मनेपदमिति रूढ्याश्रयणप्रमाणभूत व्यक्तवाचामिति पदमिहोपादेयमेवेति भावः। मतान्तरमाह– **शुकसारिकादीनामपि व्यक्तवाक्त्वात् सहोक्ताविच्छन्त्यन्ये** इति– मनुष्योच्चारितादनु तेषामपि तादृशोच्चारणदर्शनात् व्यक्ताक्षरत्वमिति व्यक्ताक्षरा वाग् येषामिति विग्रहरीत्या तेऽपि ग्राह्या एवेति तेषामपि संभूयोच्चारणे भवितव्यमेवात्मनेपदेनेति तेषामाशयः। तन्मतेनोदाहरणमेवेदं न प्रत्युदाहरणमिति आत्मनेपदं दर्शयति– **संप्रवदन्ते शुकाः, संप्रवदन्ते सारिकाः** इति, स्वमतं तु मनुष्यादौ रूढ्याश्रयणेनैव व्यवस्थापितमिति तद्रीत्याऽत्र परस्मैपदमेव युक्तमिति बोध्यम्। **सहोक्ताविति किमिति**–व्यक्तवाचामिति बहुवचनेनैव बहुकर्तृकवदने एव विधिः स्यादिति संभूयोच्चारणार्थकसहोक्तिपदस्यानावश्यक मिति प्रष्टुराशयः। व्यक्तवाचामिति बहुवचनस्यानेकव्यक्तवाक्जातिपरिग्रहार्थत्वेन न तस्य बहुकर्तृकवदने तात्पर्यग्राहकत्वमेष्टव्यमिति सहोक्त्यभावे व्यक्तवाचां क्रमोक्तावप्यात्मनेपदं स्यादित्याह– **चैत्रेणोक्ते मैत्रो वदतीति**, तथा च क्रमिकवदनमेवात्र विवक्षितमिति न भवत्यात्मनेपदं, सहोक्तावित्यस्याभावे च स्यादेवेति तद्वारणाय तदावश्यकत्वमिति भावः ॥३.३.७९.॥

## विवादे वा ॥ ३. ३. ८०. ॥

**त० प्र०— विरुद्धार्थो वादो– विवादः, व्यक्तवाचां सहोक्तौ विवादरूपायां वर्तमानाद् वदेः कर्तर्यात्मनेपदं वा भवति। विप्रवदन्ते विप्रवदन्ति वा मौहूर्ताः, परस्परप्रतिषेधेन युगपद् विरुद्धं वदन्तीत्यर्थः। विवाद इति किम्? सम्प्रवदन्ते वैयाकरणाः, सह वदन्तीत्यर्थः। व्यक्तवाचामित्येव– सम्प्रवदन्ती शकुनयः, नानारुतं कुर्वन्ति जातिशक्तिभेदात्। सहोक्तावित्येव– मौहूर्तो मौहूर्तेन सह क्रमेण विप्रवदति, विरुद्धाभिधानमात्रमिह विवक्षितं न तु विमतिपूर्वकम्, तेन विमतिलक्षणमप्यात्मनेपदं न भवति ॥८०॥**

**श० म० न्यासानुसन्धानम्— विवादे०।** वदः व्यक्तवाचां सहोक्ताविति च सम्बध्यते। विवादपदार्थमाह– **विरुद्धार्थो वादो– विवादः** इति– तत्त्वनिर्णयार्थैकत्र विषये परस्परविरुद्धा अर्था अभिधेया यत्र स विरुद्धार्थः, वादो– वाक्प्रयोगो– विवाद इत्यर्थः। 'विवादे' इति च पूर्वसूत्रानुसृतेन सहोक्ताविति पदेन विशेषणविधया सम्बध्यते, तथा च योऽर्थः सूत्रस्य तमाह– **व्यक्तवाचां सहोक्तौ विवादरूपायामिति। विप्रवदन्ते विप्रवदन्ति वा मौहूर्ताः** इति– मुहूर्तं कार्यविशेषोचितकालं जानन्तीति मौहूर्ता दैवज्ञाः, कञ्चिद् विषयमवलम्ब्य परस्परविरुद्धार्थकं वाक्प्रयोगं संभूय कुर्वन्तीत्यर्थविवक्षायां पूर्वेण नित्यमात्मनेपदे प्राप्तेऽनेन विकल्पेन तद्विधानम्। प्रयोगार्थमाह– **परस्परप्रतिषेधेन युगपद् विरुद्धं वदन्तीत्यर्थः** इति– विरुद्धं युगपद् वदन्तीत्येतावानेव प्रयोगार्थः, विरुद्धमित्यनेन विवादार्थगतविरोधः, 'युगपद्' इत्यनेन सहोक्तिश्चाख्यायते, तत्र विरुद्धमित्यस्य निमित्तं परस्परप्रतिषेधेनेति पदेन कथ्यते, एकोऽपरस्य मतं प्रतिषेधयन् वदतीति विरुद्धत्वं वादस्येति भावः। **विवाद इति किमिति–** तथा च केवलस्य 'वा' इत्यस्य पृथक् सूत्रत्वायोगात् पूर्वसूत्रेणैव सर्वत्र सहोक्तावात्मनेपदं विकल्पेन विधीयतामिति प्रष्टुराशयः प्रतिभाति, तथा च विरुद्धार्थकथनाभावेऽपि स्याद् विकल्पेनात्मनेपदमित्याह प्रत्युदाहरणेन– **संप्रवदन्ते वैयाकरणाः** इति– यत्र न परस्परविरुद्धार्थकथनं केवलमहं कथयाम्यहं कथयामीति स्वगुणप्रकाशनेच्छया बहवो वैयाकरणाः संभूय वदन्ति तत्र पूर्वसूत्रेण नित्यमेवात्मनेपदमिष्टं तन्न सिध्येदिति भावः। तथा च प्रयोगार्थमाह– **सह वदन्तीत्यर्थः** इति। अत्रापि [अर्थनिर्देशपरप्रकृतवाक्येऽपि] सहोक्तेः सत्त्वात् सह वदन्ते इति प्रयोग उचित इति चेन्न– सहोक्तेः सहशब्देनोक्तत्वादुक्तार्थत्वात् सहोक्तिद्योतकस्यात्मनेपदस्याप्रवृत्तेः। व्यक्तवाचामित्यस्य सम्बन्धोऽप्यावश्यक इत्याह– **व्यक्तवाचामित्येवेति**। व्यावर्त्यमाह– **संप्रवदन्ति शकुनयः** इति। नन्विह द्व्यङ्गवैकल्यं, यतोऽत्र शकुनीनां न केवलं व्यक्तवाक्त्वाभाव एवापि तु विवादाभावोऽपि तेषां वादे विरुद्धार्थत्वाभावादिति चेन्न– स्वरभेदादिना तेषामपि विरुद्धार्थत्वस्य प्रतीत्या विवादसंभवात्। व्यक्तवाक्त्वे सति विवादविवक्षा नास्त्यत्रेति रीत्येह द्व्यङ्गवैकल्यं न समाधेयम्, तादृशार्थविवक्षायां गमकाभावात्, फलतश्च विवादाभावोऽपि तत्र सिध्यत्येवेति द्व्यङ्गवैकल्यस्य तावताऽपि परिहाराभावाच्च। कोऽत्र प्रयोगार्थ इत्याह– **नानारुतं कुर्वन्ति जाति-शक्तिभेदादिति**– जातिभेदात् शक्तिभेदाच्च, यद्वा जातिशक्तिर्जातिस्वभावः, तस्य भेदात् परस्परवैलक्षण्यात् परस्परविरुद्धमिव प्रतीयमानमनेकप्रकारं शब्दं कुर्वन्तीत्यर्थः, अत्र शकुनीनां पूर्वोक्तरूपेण [पूर्वसूत्रव्याख्याप्रतिपादितरीत्या]

"Aho Shrutgyanam"

व्यक्तवाक्त्वाभावेन न भवत्यनेन विकल्पेन पूर्वसूत्रेण नित्यं वा आत्मनेपदम्, व्यक्तवाचामिति पदस्य सम्बन्धाभावे चेहानेन सूत्रेणात्मनेपदं दुर्वारम्। सहोक्ताविति पदस्यापि प्रकृतसूत्रेऽनुवृत्तिरावश्यिकेत्याह– **सहोक्तावित्येवेति**। व्यावर्त्यमाह– **मौहूर्त्तो मौहूर्त्तेन सह क्रमेण विप्रवदतीति**– अत्र व्यक्तवाचां विवादस्य सत्त्वेऽपि क्रमेण कथने संभूयकथनरूपसहोक्त्यभावान्न भवत्यात्मनेपदम्, तत्पदानुवृत्त्यभावे च दुर्वारमेवेति भावः। ननु मा भूदनेन सूत्रेण पूर्वेण वाऽऽत्मनेपदम् "दीप्ति-ज्ञान०" [ ३. ३. ७८. ] इति पूर्वतरेण सूत्रेणात्मनेपदं कुतो न भवति विरुद्धार्थत्वेन नानामतिरूपविमतेः सत्त्वादिति चेदत्राह– **विरुद्धार्थाभिधानमात्रमिह विवक्षितं न तु विमतिपूर्वकमिति**– मौहूर्त्तयोः कथनमर्थतः परस्परविरुद्धमस्तु न तु तयोः परस्परविरुद्धार्थप्रतिपादनेच्छारूपा विमतिः पूर्वमस्ति, पूर्वं विमतेरभावाच्च तस्या धात्वर्थहेतुतयाऽवस्थानमिति न भवति तत्सूत्रप्रवृत्तिः। तदाह– **तेन विमतिलक्षणमप्यात्मनेपदं न भवतीति**, किञ्च प्रतिपादनरीतेः परस्परविरुद्धत्वे तयोर्मतेर्भेदाभावेन नानामतिरूपाया विमतेरिह साक्षादपि धात्वर्थत्वं नास्तीत्यदोष इत्यवधेयम्॥ ३. ३. ८०.॥

## अनोः कर्मण्यसति ॥ ३.३.८१.॥

**त० प्र०– व्यक्तवाचामित्येवाऽनुवर्तते। व्यक्तवाचां सम्बन्धिन्यर्थे वर्तमानादनुपूर्वाद् वदेः कर्मण्यसति कर्तर्यात्मनेपदं भवति। अनुः सादृश्ये पश्चादर्थे वा। अनुवदते चैत्रो मैत्रस्य, यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः अनुवदते आचार्यस्य शिष्यः, आचार्येण पूर्वमुक्ते पश्चाद् वदतीत्यर्थः। कर्मण्यसतीति किम्? उक्तमनुवदति। व्यक्तवाचामित्येव– अनुवदति वीणा। कथं 'वाचिक-षडिकौ न संवदेते' इति, मिथो विरुध्येते इत्यर्थः; विमतिविवक्षायां भविष्यति। अकर्मकादित्यनुक्त्वा 'कर्मण्यसतीति' इति निर्देश उत्तरत्र शब्दे स्वेऽङ्गे च कर्मणीति लाघवेन प्रतिपत्त्यर्थः॥८१॥**

**श० म० न्यासानुसन्धानम्– अनो०।** वदः इति सम्बध्यते, व्यक्तवाचामिति च, तत्रैकयोगनिर्दिष्टन्यायेन सहोक्तावित्यपि प्रकृतेऽनुवर्त्तेतैवेति शङ्कापाकरणायाह– **व्यक्तवाचामित्येवानुवर्त्तते** इति– अत्र च मूल व्याख्यानमेव, अथवा 'व्यक्तवाक्सहोक्तौ' इति समासेन निर्देशलाघवात् कर्तव्ये व्यासेन निर्देश एव तावन्मात्रस्यापि क्वचित् सम्बन्ध सूचयति। यद्यपि षष्ठ्यन्तस्य वदिना सम्बन्धो न घटते तथापि धात्वर्थद्वारकक्रियाकर्तृभावरूपविषयसम्बन्धे "शेषे" [ २. ३.८. ] इति व्यक्तवाचां वदेरिति सम्बन्धमाश्रित्य षष्ठी विधेया। तथा च सूत्रार्थमाह– **व्यक्तवाचां सम्बन्धिन्यर्थे वर्त्तमानादिति**– वदेति धातुस्वरूपेण व्यक्तवाचां सम्बन्धाभावेऽपि तदर्थेन सह क्रियाकर्तृभावः सम्बन्धोऽस्तीति– तत्सम्बन्धिन्यर्थे वदेर्वर्त्तमानत्वं सुघटम्। अनोरुपसर्गस्यानेकार्थतया प्रकृते ग्राह्यावर्थावाह– **अनुः सादृश्ये पश्चादर्थे वेति**– सादृश्यं च वदन[ वदिक्रिया ]-निरूपितं न तु मैत्रादिनिरूपितम्, एवं पश्चादर्थोऽपि वदिक्रियासम्बद्ध एवेति मैत्रादिना सम्बन्धाभावान्नाव्ययीभावसमासप्रसङ्गः। **अनुवदते चैत्रो मैत्रस्येति**– अत्र सकर्मकस्यापि वदेः कर्मणः प्रयोगाभावादविवक्षितकर्मतयाऽकर्मकत्वेन वाऽनेनात्मनेपदम्। प्रयोगार्थमाह– **यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः** इति– चैत्र-मैत्रयोरुभयोर्व्यक्तवाक्त्वमिति भवति लक्षणसङ्गतिः। सादृश्यार्थे उदाहृत्य पश्चादर्थे उदाहरणमाह– **अनुवदते आचार्यस्य शिष्यः** इति पश्चादर्थत्वं विवृणोति–**आचार्येण पूर्वमुक्ते पश्चाद् वदतीत्यर्थः** पठितार्थविगतिः शिष्यास्याभून्नवेति परिज्ञानाय आचार्योक्तानुवादः शिष्येण कार्य इति प्राचीनपरम्परा, सेह प्रयोगेण गम्यते, पश्चादर्थेऽनोः सत्त्वात् तत्पूर्वकाद् व्यक्तवाक्शिष्यसम्बन्धिन्यर्थे वर्त्तमानाद् वदेरात्मनेपदमभूत्। **कर्मण्यसतीति किमिति**–यत्र सादृश्ये पश्चादर्थे वाऽनोः प्रयोगस्तत्र वदेः प्रायोऽकर्मकत्वमेवेत्यभिमानेन प्रश्नः। नायं नियमो यत् सर्वत्र सादृश्यार्थकात् पश्चादर्थकाद् वाऽनोः परस्य वदेरकर्मत्वमेवेति, **उक्तमनुवदती**त्यादौ तददर्शनादिति तत्रात्मनेपदं मा भूदित्येतदर्थं कर्मण्यसतीत्यावश्यकमिति भावः। **व्यक्तवाचामित्येवेति**– पूर्वतः सहोक्तावित्यस्यासम्बन्धेऽपि लक्ष्यानुरोधाद् व्यक्तवाचामित्यस्य सम्बन्ध आवश्यक इति भावः। तद्व्यावर्त्यमाह– **अनुवदति वीणेति**– मृदङ्गस्येति अन्यद् वा सम्बन्धिपदमध्याहार्यम्, यथा मृदङ्गः स्वरविशेषमाश्रित्य वदति तथा वीणाऽपीति प्रयोगार्थः, तत्र व्यक्तवाक्सम्बन्धिन्यर्थे वदेर्वर्त्तमानत्वाभावान्न भवत्यात्मनेपदम्, व्यक्तवाचामित्यस्य सम्बन्धाभावे च स्यादेवेति तत्सम्बन्ध आवश्यकः।

वदेरात्मनेपदविधानप्रकरणस्य परिसमाप्ततया, तद्विषयं भाष्यप्रयोगमसङ्गच्छमानं शङ्कते– **कथं वाचिकषडिकौ न संवेदेते** इति– "न पदान्तद्विर्वचनवरे यलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" [ पा०सू० १.१.५८. ] इति सूत्रे भाष्ये विधिशब्दो भावसाधनः कर्मसाधनो वा [ विधानं विधिरित्यर्थः, विधीयते यः स विधिरित्यर्थो वा] इति पक्षद्वयगुणदोषविचारप्रसङ्गे भावसाधनपक्षे षडिक इत्यस्य सिद्धौ वाचिक इत्यस्यासिद्धिः कर्मसाधनपक्षे वाचिक इत्यस्य

"Aho Shrutgyanam"

सिद्धौ सत्यामपि षडिक इत्यस्यासिद्धिरिति प्रदर्शिते, तटस्थेनोच्यते– 'वाचिक-षडिकौ न सवदेते' इति, 'न सवदेते' इत्यस्यार्थं **कैयट** आह– नैकपक्षेण सिध्यत इति। अत्र कथमात्मनेपदं पूर्वोक्तसूत्राणामविषयत्वादिति प्रकृतशङ्कार्थः। शङ्कायाः स्थिरीकरणाय स्वानुकूलं प्रयोगार्थमाह– **मिथो विरुध्येते इत्यर्थः** इति, तथा चात्र विवादे सत्यपि व्यक्तवाक्कर्तृकत्वस्य सहोक्तेश्चाभावान्न "विवादे वा" [ ३. ३. ८०. ] इत्यस्य नवा "व्यक्तवाचां सहोक्तौ" [ ३. ३. ७४. ] इत्यस्य प्राप्तिः, दीप्त्याद्यर्थाभावाच्च "दीप्तिज्ञान०" [ ३. ३. ८७. ] इत्यस्य अनुपूर्वकत्वाभावाद् व्यक्तवाक्सम्बन्ध्यर्थे वर्त्तमानत्वाभावाच्च प्रकृतसूत्रस्यापि न प्रवृत्तिरिति कथमात्मनेपदं प्रयुज्यत इति भावः। उत्तरयति– **विमतिविवक्षायां भविष्यतीति**– वाचिक-षडिकयोः कर्तृत्वार्थं तयोः शब्दत्वेऽपि उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपस्य कर्तृत्वस्य स्वीकरणीयत्वेन नानाकर्मसाधनविषया भावसाधनविषया च मतिस्तत्र स्वीकर्तव्येति विमतिरूपार्थसत्त्वात् "दीप्तिज्ञानयत्नविमति०" [३.३.७८ ] इति सूत्रेणात्मनेपदमिति भावः। वाचिक-षडिकयोः सिद्धिस्तु स्वमते इत्थम्– वागाशीर्दत्त इति प्रकृतेरनुकम्पार्थे "अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा" [७. ३. ३५ ] इतीके षड्वर्जैकस्वरपूर्वपदस्य स्वरे" [७.३ ४० ] इति उत्तरपदस्य आशीर्दत्त इत्यस्य लुक् सिति य्वर्जव्यञ्जनादौ च नाम्नः पदत्वविधानात् पदत्वाभावात् "चजः कगम्" [२.१.८६.] इति कत्वं "धुटस्तृतीयः" [२.१.७६.] इति गत्वं च न भवतीति वाचिक इति सिध्यति, षडङ्गुलिदत्त इति प्रकृतेश्चानुकम्पार्थे पूर्ववदिके "षड्वर्जैकस्वर०" [७ ३.४०.] इत्यत्र षड्वर्जनात् तस्याप्राप्तौ "द्वितीयात् स्वरादूर्ध्वम्" [७ ३.४१ ] इति षडङ्गुलिदत्तस्य लुकि "लुगस्यादेत्यपदे" [२.१.११३.] इत्यकारस्य लुकि षडिक इति सिद्ध्यति। अत्र च असित्प्रत्ययपरत्वस्य। अकारस्य स्थानिवद्भावेन व्यवधानात् पदत्वमस्त्येवेति षस्य डत्वं सिध्यति "न सन्धि०" [७ ४ १११.] इति निषेधस्तु न "षड्वर्ज०" [७.३.४०.] इति सूत्रे षड्वर्जनसामर्थ्यात्, षडिक इत्यत्र डकाररक्षार्थमेव हि तत्र षड्वर्जनं क्रियते, अन्यथाऽनेनैव एकस्वरादूर्ध्वस्य लुकि षषिक इत्यस्य सिद्धौ षड्वर्जनवैयर्थ्यं स्यात्। तथा च षड्वर्जनसामर्थ्यादत्र स्थानित्वं भवत्येव, स्थानित्वे च सति-अकारेणासित्प्रत्ययव्यवधानात् षकारान्तस्यान्तर्वर्तिविभक्त्या पदत्वेन डत्वस्य सिद्धिः। वाचिक इत्यत्र तु आशीर्दत्तेति समुदायस्य लोप इति स्वरमात्रस्थानिकविधित्वाभावेन न स्थानित्वप्राप्तिरित्यसित्प्रत्यये परतः पदत्वाभावेन कत्व-गत्वे न भवतः। अत्रत्यलघुन्यासग्रन्थस्तु न संघटते, तथाहि– तत्र वाचिक-षडिकावुक्तरीत्या प्रसाध्य "ननु षडिक इत्यत्र पदसंज्ञायाः सित्येवेति नियमेन निर्वत्तितत्वात् पदान्तत्वाभावाड्डत्वं न प्राप्नोति। न च वाच्यं "स्वरस्य०" [ ७ ४. ११०. ] इति परिभाषया स्थानिनाकारेणासित्प्रत्ययस्य व्यवधानं, "न सन्धि०" [७.४.१११.] इत्यस्यावस्थानात्, सत्यम्– "षड्वर्ज०" इत्यत्र षड्वर्जनं ज्ञापयति– नात्र स्थानित्वप्रतिपत्तिः" इति। अत्रेद विचारणीयं– षडिक इत्यत्र 'षष्' इत्यस्य पदत्वार्थमसित्प्रत्ययस्यास्याकारेण व्यवधानमेष्टव्यम्, अन्यथाऽसित्प्रत्ययपरत्वसत्त्वेन पदत्वं न स्यात् सित्येवेति नियमात्। तथा च षड्वर्जनेन स्थानित्वनिषेधस्य कथमिष्टत्वं स्यात्। किञ्च, स्थानित्वनिषेधः "न सन्धि०" इत्यनेनैव पूर्वमुक्तः, तथा च षड्वर्जनेन तत्साधनेन किं विशिष्टं प्रयोजन सिध्यति। तथा चात्र न सन्धीति निषेधस्यैवाप्रवृत्तिः साधनीयेति युक्तं, न तु तेन स्थानिवत्त्वनिवृत्तिः साधनीयेति प्रतिभाति। ननु "प्रत्ययः प्रकृत्यादेः" [ ७.४.११५.] इति नियमेन यस्य प्रत्ययस्य या प्रकृतिः स एव तदन्तत्वेन गृह्यत इति तन्निमित्तकं [ प्रत्ययनिमित्तं ] कार्यमपि प्रकृतेरेव स्यादित्यसित्प्रत्ययनिमित्तकपदत्वाभावः षडङ्गुलिदत्त इति समुदायस्यैव स्यान्न तु षषिति तदवयवस्येत्यसित्प्रत्ययमपरत्वाभावात् स्वभावत एवात्र पदत्वं सिद्धमिति षड्वर्जनसामर्थ्येन स्थानिवद्भावमाश्रित्याकारव्यवधानेन नियमाप्रवृत्तौ अन्तर्वर्त्तिविभक्त्या पदत्वाश्रयणेन डत्वविधानमिति क्लिष्टकल्पनाया अनावश्यकत्वमिति वाच्यम्, तथा सति षड्वर्जनस्यापि वैयर्थ्यापत्तिरिति तत्सामर्थ्यादेवावयवस्यापि प्रत्ययनिमित्तं कार्यं भवति, सोऽपि प्रत्ययान्ततया स्वीक्रियत इति ज्ञापनात्। अयमाशयः– एकस्वरादूर्ध्वस्य अङ्गुलिदत्त इत्यस्य लोपेऽसित्प्रत्ययपरत्वेन पदत्वस्याभावात् डकारो न श्रूयेतेति तद्वारणाय [ एकस्वरादूर्ध्वस्य लोपवारणाय] षड्वर्जनं क्रियते, यदि च "प्रत्ययः प्रकृत्यादेः" [ ७. ४. ११५. ] इति नियमोऽत्र प्रवर्त्तेत तर्हि इके परतः षषित्यस्य पदत्वनिषेधाभावादेव डत्वसिद्धिरिति षड्वर्जनं व्यर्थमेव स्यादिति तत्सामर्थ्यादवयवस्यापि नियमो भवति– अवयवोऽपि प्रत्ययान्तत्वनिमित्तकार्यं लभत इति विज्ञायते। इत्थं च वाचिक इत्यस्यापि सिद्धिर्भवति, अन्यथा तत्र आशीर्दत्त इत्यस्य लोपे तस्य स्वरमात्रादेशत्वाभावेन स्थानित्वाप्रवृत्तावपि वागित्येतन्मात्रे सित्प्रत्ययान्तत्वाभावात् तस्य पदत्वनिषेधाभावेन पदान्तत्वात् "चजः कगम्" [२.१.८६.] इति कत्वम् "घुटस्तृतीयः" [२.१.७६.] इति गत्वं च दुर्वारं स्यात्। भाष्यस्थप्रकृतग्रन्थस्तु पाणिनीय-

"Aho Shrutgyanam"

प्रक्रियाऽनुसारीति तद्व्याख्यानमिहानपेक्षितमिति न प्रदर्शितम् । ननु लाघवानुरोधेन "अनोरकर्मकात्" इत्येव सूत्र्यताम्, तथा सति वद इत्यनेन सामानाधिकरण्येनान्वयोऽपि सम्पत्स्यत इति कर्मण्यसतीति वैयधिकरण्येन निर्देशो व्यर्थ इत्याशङ्कायामाह– **अकर्मकादित्यनुक्त्वे**त्यादि, अयमाशयः– कर्मण्यसतीति परत्रानुवर्त्तते, तत्र क्वचित् केवलं 'कर्मणि' इत्यस्य 'असति' इत्यनेनैव सम्बन्धः, क्वचिच्च तस्यावृत्त्याऽन्येनापि सम्बन्धः शक्यते कर्तुम्, यथा "वेः कृगः शब्दे चानाशे" [ ३.३.८५. ] "आङो यमहनः स्वेऽङ्गे च" [३.३.८६.] इत्यनयोः सूत्रयोरनुवृत्तं कर्मण्यसतीति पदद्वयं सम्बध्यते, अथ च तत्रस्थ 'कर्मणि' इत्यावृत्तं सत् 'शब्दे' इत्यनेन स्वेङ्गे' इत्यनेन च सम्बध्यत इति कर्मण्यसति शब्दरूपे कर्मणि च सति; कर्मण्यसति स्वाङ्गरूपे कर्मणि च सति' इत्येवमर्थो लभ्यते, अत्राकर्मकादित्युक्तौ च तत्रापि शब्दकर्मकात्, स्वाङ्गकर्मकादिति च यथायोगं निर्देशः कर्त्तव्यः स्यादिति दोषः प्रसज्येतेति प्रकृतनिर्देश एव लाघवमिति, तथा च कर्मण्यसतीति व्यधिकरणमेव विशेषणं धातूनामिहाश्रितम् ।' ३.३.८१. ॥

## ज्ञः ॥ ३.३.८२. ॥

**त०प्र०—जानातेः कर्मण्यसति कर्तर्यात्मनेपदं भवति । सर्पिषो जानीते, मधुनो जानीते । कथमत्र जानातिरकर्मकः? उच्यते नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम् किं तर्हि ? प्रवृत्तौ करणत्वेन– सर्पिषा मधुना वा करणेन भोक्तुं प्रवर्तत इत्यर्थः, अत एव "अज्ञाने ज्ञः षष्ठी" [२.२ ८०.] इति षष्ठी; मिथ्याज्ञानार्थो वा जानातिः– सर्पिषि रक्तः प्रतिहतो वोदकादिषु सर्पिष्ट्या ज्ञानवान् भवतीत्यर्थः, मिथ्याज्ञानं चाज्ञानमित्यज्ञानार्थत्वे पूर्ववदेव षष्ठी; अथवा सर्पिः संबन्धि ज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मकः, तदा तु सम्बन्धे षष्ठी । कर्मण्यसतीत्येव– तैलं सर्पिषो जानाति, तैलं सर्पिष्ट्या जानातीत्यर्थः; स्वरेण पुत्रं जानाति । केचित् तु– ज्ञानोपसर्जनायां प्रवृत्तावेवाकर्मकाज्जानातेरात्मनेपदमाहुः, अत एव ते– 'संभविष्याव एकस्यामभिजानासि मातरि" 'अभिजानासि मंत्र ! कश्मीरेषु वत्स्यामः' इत्यादौ प्रवृत्त्यर्थाभावादात्मनेपदाभावं मन्यन्ते; "ज्ञास्ये रात्राविति प्राज्ञः" इत्यत्रापि ज्ञात्वा प्रवर्तिष्य इति व्याचक्षते; 'जाने कोपपराङ्मुखी'' [ अमरुशतके ] इत्यत्र तु 'ज्ञोऽनुपसर्गात्" [ ३ ३. ९६. ] इत्यनेनात्मनेपदमिच्छन्तीति ॥ ८२ ॥**

**श० म० न्यासानुसन्धानम्**– ज्ञः । कर्मण्यसतीत्यनुवर्त्तते । उदाहरति– **सर्पिषो जानीते** इत्यादि, अत्र कर्मणोऽभावेनाकर्मकत्वाज्जानातेरात्मनेपदं प्रयुज्यते, अन्यथा तस्य परस्मैपदित्वेन परस्मैपदमेव स्यात् । ज्ञानस्य निर्विषयत्वाऽसंभवाज्ज्ञानार्थस्य जानातेः कथमकर्मकत्वमिति शङ्कामुत्थाप्य समाधातुमाह– **कथमत्र जानातिरकर्मकः** इति, अयमाशयः–

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥"

इत्यकर्मकधातुसंग्राहकवाक्यानुसारमस्याकर्मकता न संभाव्यते कर्मभूतस्य सर्पिषोऽत्र स्पष्टमुक्तत्वेनाविवक्षाभावात्, अन्येषां चाकर्मत्वसंपादकानां निमित्तानामदर्शनादित्यकर्मकत्वाभावेन कथमात्मनेपदमिति । उत्तरयति– **उच्यते** । इत्युल्लिख्य **नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितमि**ति– सर्पिर्मधुनोरत्रोल्लेखेन तयोर्ज्ञानकर्मतयाऽकर्मकत्वं कथमिति यच्छङ्कसे तन्न यतस्तयोरत्र कर्मत्वेन विवक्षाया अभावः, नो चेत् कर्म तर्हि कथं तयोः क्रियायां सम्बन्ध इत्याशङ्क्योत्तरयति– **किं तर्हि ? प्रवृत्तौ करणत्वेने**ति, अयमाशयो– नात्र ज्ञानार्थो जानातिरपि तु प्रवृत्त्यर्थः, तथा च धातोरर्थान्तरे वर्त्तमानत्वादकर्मकत्वं, सर्पिरादि तु तदर्थतया प्रकृते विवक्षितायां प्रवृत्तौ करणत्वेन विवक्षितमिति । तथा च वाक्यार्थमाह– **सर्पिषा मधुना वा करणेन भोक्तुं प्रवर्त्तत इत्यर्थः** इति– भोजनं प्रवृत्तेर्विषयः, सर्पिरादि च करणम् । ननु तर्हि करणे तृतीयया भवितव्यं– सर्पिषा जानातीति, कथमत्र षष्ठीत्याह– **"अज्ञाने ज्ञः षष्ठी" [ २. २. ८०. ] इति षष्ठी**ति– अनेन हि अज्ञानार्थस्य जानातेः करणे षष्ठी विधीयत इति तृतीया न भवतीति भावः । प्रकारान्तरेणाज्ञानार्थत्वं जानातेराह– **मिथ्या ज्ञानार्थो वा जानाति**रिति । प्रकृतपक्षे प्रयोगार्थमाह– **सर्पिषि रक्तः प्रतिहतो वोदकादिषु सर्पिष्ट्या ज्ञानवान् भवतीत्यर्थः** इति– रागोऽत्यासक्तिः, प्रतिघातो द्वेषः, अत्यासक्तिविषये द्वेषविषये च वस्तुनि रागाद् द्वेषाद् वा तत्त्वज्ञानस्य [ यथार्थज्ञानस्य ] प्रतिबद्धत्वेन मिथ्याज्ञानं जायते, अतस्मिंस्तद्बुद्धिर्हि मिथ्याज्ञानम्, उदकादौ सर्पिष्ट्वरहिते सर्पिष्ट्वेन ज्ञानं मिथ्याज्ञानमेव, रागो द्वेषो वा स्वविषयमेव सर्वत्र दर्शयति, स्त्रीरक्तस्य हि सर्वं जगत् तन्मयमेव प्रतिभाति, "कृष्णद्वेषी कंस सर्वत्र कृष्णमेवापश्यत्" इति भागवतप्रसिद्धिः । तथा सर्पिषि रागवान् तत्र द्वेषवान् वा जलाद्यपि सर्वथा सर्पिष्ट्या जानातीति युक्तं वचः । षष्ठीमुपपादयति– **मिथ्याज्ञानं चाज्ञानमेवे**ति– अज्ञानमित्यत्र हि नञो न भेदार्थत्वं, तथा सति मिथ्याभूतस्य ज्ञानस्य

"Aho Shrutgyanam"

ज्ञानभिन्नत्वरूपाज्ञानत्वासंभवात्, किन्तु विरोध्यर्थत्वं, ज्ञानविरोधि यत् तदज्ञानमिति, तथाहि नञर्थभेदप्रकरणेऽभियुक्तोक्तिः—

"तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥" इति ।

असुरशब्दे यथा नञो विरोध्यर्थत्वं तथेहापीति न मिथ्याज्ञानस्याज्ञानत्वहानिः । एतेन मिथ्याज्ञानस्यायथार्थज्ञानान्तर्गततया ज्ञानरूपत्वमेवेति प्रकृते जानातेरज्ञानार्थत्वाभावादिह षष्ठी नोचितेति केषांचिन्मतं प्रत्युक्तं वेदितव्यम् । नैयायिकवासनया तथोक्तिसंभवेऽपि भावरूपाज्ञानस्वीकर्तृवेदान्तसिद्धान्तेन मिथ्याज्ञानस्याज्ञानरूपत्वसिद्धेः, प्रायो वैयाकरणानां शब्दब्रह्मवादिनां वेदान्तदर्शनेन सह मतैक्यस्य प्रसिद्धेः । नैयायिकानुयायिनोऽपि परितोषाय प्रकृतप्रयोगमन्यथा व्याचष्टे– **अथवा सर्पिःसम्बन्धि ज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मकः** इति, अयमाशयः– कारकाणां विवक्षाधीनत्वस्य सर्वैः स्वीकृतत्वेन कर्मणः शेषत्वविवक्षया ज्ञानार्थस्यापि जानातेरविद्यमानकर्मत्वरूपमकर्मकत्वं संभाव्यत एवेति तथैव प्रकृते विज्ञेयम् । तथा च माषाणामश्नीयादित्यादि प्राचीनप्रयोगवदिहापि सम्बन्धसामान्ये षष्ठी बोध्येत्याह– **तदा तु सम्बन्धे षष्ठी**ति– अज्ञानार्थत्वाभावेन करणत्वाभावेन च "अज्ञाने ज्ञः षष्ठी" [२.२.८०.] इत्यस्य प्राप्तिविरहात् । कर्मण्यसतीत्यस्य सम्बन्ध आवश्यक इत्याह– **कर्मण्यसतीत्येवे**ति, व्यावर्त्त्यमाह– **तैलं सर्पिषो जानाती**ति–अत्रापि जानातेर्ज्ञानार्थत्वमेवेति शेष एव षष्ठी । प्रयोगार्थमाह–**तैलं सर्पिष्ट्वा जानातीत्यर्थः** इति । यद्यप्येवमर्थविवक्षायां तैल-सर्पिषोरुभयोरुद्देश्यविधेयभावेन स्थितेः समानविभक्तित्वमेव न्याय्यमिति तैलं सर्पिर्जानातीत्येव प्रयोग उचितः, सम्बन्धसामान्यविवक्षा चेदुभयत्र सोचितेति सर्पिष इति षष्ठी दुरुपपादेति प्रतिभाति, तथाप्याचार्यप्रयोगप्रामाण्येन मा स्वीकार्येति बोध्यम् । **अथवा** प्रकृतप्रयोगेऽरुचेरेव प्रत्युदाहरणान्तरमाह– **स्वरेण पुत्रं जानाती**ति, साक्षात् पुत्रमपश्यन् तदीयस्वरपरिचयेन तं परिचिनोतीत्यर्थः, तथा चोभयत्र जानातेः सकर्मकतयाऽकर्मकत्वाभावेन न भवत्यात्मनेपदम्, कर्मण्यसतीत्यस्य सम्बन्धाभावे च स्यादेवेति तदीयसम्बन्धस्यावश्यकत्वम् । वैयाकरणान्तरमतमाह– **केचित् तु ज्ञानोपसर्जनायां प्रवृत्तावेवाकर्मकाज्जानातेरात्मनेपदमाहुरि**ति– ज्ञानमुपसर्जनमुपकारकतयाऽप्रधानं यत्र तादृश्यां प्रवृत्तौ कर्मणोऽविवक्षादिना च जानातेरकर्मकत्वं यद्यपि भवति तथापि पूर्वत्रैवाकर्मकत्वे सत्यात्मनेपदं न त्वविवक्षितकर्मत्वेनाकर्मकत्वेऽपीति तेषामभिप्रायः । इत्थं व्याख्यानस्य तत्सम्मतं फलमाह– **अत एव ते "संभविष्याव एकस्यामभिजानासि मातरि" "अभिजानासि मैत्र! कश्मीरेषु वत्स्यामः" इत्यादौ प्रवृत्त्यर्थाभावादात्मनेपदाभावं मन्यन्ते** इति, अत्र यद्यपि स्वमते 'एकस्यां मातरि संभविष्यावः' 'कश्मीरेषु वत्स्यामः' इति वाक्यार्थयोरेव कर्मत्वं पश्य मृगो धावतीत्यादाविवेति सकर्मकत्वादेव नात्मनेपदं तथापि त इह वाक्यार्थस्य कर्मत्वं न मन्यन्तेऽपि तु 'एकस्यां मातरि संभविष्यावः' इत्युल्लेखेनाभिजानासीति रीत्याऽर्थबोधं मन्यन्ते इत्यकर्मकत्वे सत्यपि प्रवृत्त्यर्थाभावादेवात्मनेपदाभावः । इत्थं च तन्मते न द्व्यङ्गवैकल्यम्, अन्यथा सकर्मकत्वादात्मनेपदाभावः प्रवृत्त्यर्थाभावाद् वेति विनिगमकाभावेन प्रवृत्त्यर्थाभावोदाहरणत्वमस्य न सङ्गच्छेत, अत्र च "अयदि स्मृत्यर्थे भविष्यन्ती" [५.२.६.] इत्युभयत्र भविष्यन्ती । तन्मतानुसारं पूर्वमतिव्याप्तिवारणमुक्त्वाऽव्याप्तिवारणस्थलमाह– **"ज्ञास्ये रात्राविति प्राज्ञः" इत्यत्रापि ज्ञात्वा प्रवर्त्तिष्ये इति व्याचक्षते** इति, तथा च तत्रापि प्रवृत्त्यर्थसत्त्वादात्मनेपदमनेनैव सूत्रेण भवतीति तेषामाशयः । स्वमते च प्रवृत्त्यर्थतया व्याख्यानाभावेऽप्यकर्मकत्वादेवात्मनेपदमिति बोध्यम् । अकर्मकत्वं चाविवक्षितकर्मकत्वेनैव न तु धातोरर्थान्तरवृत्तित्वेन, यत्र च कथमपि प्रवृत्त्यर्थतया व्याख्यानासंभवस्तत्राप्यात्मनेपदप्रयोगश्चेद् दृश्यते, तर्हि तत्रोपायमाह– **"जाने कोपपराङ्मुखी" इत्यत्र तु "ज्ञोऽनुपसर्गात्" [३.३.९६.] इत्यनेनात्मनेपदमिच्छन्ती**ति– अत्र ज्ञानार्थस्यावर्जनीयत्वेन प्रवृत्त्यर्थतया व्याख्यानासंभवादस्य सूत्रस्य प्रवर्त्तयितुमशक्यतया परेणैवात्मनेपदम् । एवं च 'सर्पिषो जानीते' इत्यादावपि यद्यपि तेनैवात्मनेपदं सिध्यतीति प्रकृतसूत्रप्रयोजनाभाव इति प्रतिपत्तुं शक्यते, तथापि यत्र सोपसर्गस्याकर्मकत्वं प्रवृत्त्यर्थत्वं वा तत्र तेनात्मनेपदाप्राप्तेरस्य सूत्रस्य सार्थक्यात् । स्वमते च प्रकृते [ "जाने कोपपराङ्मुखी" इत्यत्र ] वाक्यार्थस्य कर्मत्वे "ज्ञोऽनुपसर्गात्" इत्यनेनात्मनेपदम्, 'इत्युल्लेखेन' इति रीत्या व्याख्याने चाकर्मकत्वादनेनैवाऽऽत्मनेपदमिति विवेको बोध्यः । प्रकृतपद्यं **चामरुशतक**स्य, तथाहि– पूर्णं पद्यमिदम्—

"जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।
नो यावत् परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥१॥ इति ।

इत्थं चात्र 'जाने' इत्यस्य स्मरामीत्यर्थत्वात् प्रवृत्त्यर्थत्वाभावः सुतराम्, अत्र च वाक्यार्थस्यैव कर्मत्वं स्पष्टं प्रतीयत इत्यु-

"Aho Shrutgyanam"

भयमते तेनैव सूत्रेणात्मनेपदमुचितं न त्वनेनेति प्रतीयते, केवलं केचिदिति प्रकृत्योल्लिखिते मते प्रवृत्त्यर्थत्वाभावादपि न प्रकृतसूत्रप्राप्तिः, स्वमते च केवलमकर्मकत्वादेवेति विवेकः ॥ ३. ३. ८२. ॥

## उपात् स्थः ॥ ३.३.८३. ॥

**त० प्र०**—उपपूर्वात् तिष्ठतेः कर्मण्यसति कर्तर्यात्मनेपदं भवति । भोजनकाल उपतिष्ठते, योगे योग उपतिष्ठते, ज्ञानमस्य ज्ञेयेषूपतिष्ठते, संनिधीयत इत्यर्थः । कर्मण्यसतीत्येव- राजानमुपतिष्ठति ॥ ८३ ॥

**श०म० न्यासानुसन्धानम्- उपात्०** । कर्मण्यसतीति संबध्यत एव । तथा च सूत्रार्थमाह- **उपात् तिष्ठतेः कर्मण्यसतीति** । उदाहरति- **भोजनकाल उपतिष्ठते** तद्देशवृत्तिसंयोगानुकूलो व्यापार उपतिष्ठतेरर्थः, फलाश्रयस्य देशस्येहाविवक्षितत्वेनाकर्मकत्वम्, अथवा भोजनकाल इति प्रथमान्तं कर्तृवाचकं पदम्, स सन्निहितो भवतीति वक्तुस्तात्पर्यम् । **योगे योग उपतिष्ठते** इति- इहापि उभयं सप्तम्यन्तं, किञ्चित् पदं प्रतियोगमुपस्थितं भवतीति तदर्थः, एकं सप्तम्यन्तमपरं प्रथमान्तमिति वा, एकस्मिन् योगेऽपरो योग उपतिष्ठत इति तदर्थः, उभयत्राकर्मकत्वं स्पष्टमेव । **ज्ञानमस्य ज्ञेयेषूपतिष्ठते** इति- ज्ञेयविषयं ज्ञानमस्य सर्वदा वर्त्तत इत्यर्थः, सर्वत्रोपस्थितेः कर्मरहितत्वमेव । सर्वप्रयोगसाधारण्येनार्थमाह- **संनिधीयत इत्यर्थः** इति- यथायोगं कर्मादीनामपि कर्तृत्वविवक्षाया दृष्टत्वात् कर्मणः कर्तृत्वविवक्षायां संनिपूर्वस्य दधातेः प्रयोगः, कारकान्तराणां कर्तृत्वविवक्षायां तु नेदृशः प्रयोगः संभाव्यते, "धीङ्च् अनादरे" इत्यस्य वा प्रयोगः धातूनामनेकार्थत्वेन च विवक्षितार्थलाभः । कर्मण्यसतीत्यस्याप्यावश्यकत्वमित्याह- **कर्मण्यसतीत्येवेति** । व्यावर्त्त्यमाह- **राजानमुपतिष्ठतीति**- राजसमीपं गच्छतीत्यर्थविवक्षायां राज्ञः कर्मत्वेनाकर्मकत्वाभावान्न भवत्यात्मनेपदम्, कर्मण्यसतीत्यस्याभावे च स्यादेवेति तत्सम्बन्ध आवश्यकः ॥ ३.३.८३. ॥

## समो गमृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्ति-दृशः ॥ ३. ३. ८४ ॥

**त०प्र०**—समः परेभ्यो गमादिभ्यः कर्मण्यसति कर्तर्यात्मनेपदं भवति । संगच्छते, समृच्छते, समृच्छिष्यते, संपृच्छते, संशृणुते, नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम्- संवित्ते, संस्वरते, अर्तीति सामान्यनिर्देशात् भ्वादिरदादिश्च गृह्यते- समृच्छते, समियृते, संपश्यते, स्वरत्यर्त्योस्तिव्निर्देशो यङ्लुप्निवृत्त्यर्थः । कर्मण्यसतीत्येव- संगच्छति सुहृदम् ॥ ८४ ॥

**श०म० न्यासानुसन्धानम्- समो०** । कर्मण्यसतीति सम्बध्यत एव । **संगच्छते** इति- सामञ्जस्यं प्राप्नोतीत्यर्थः । **समृच्छते** इति- ऋच्छधातुस्तौदादिकः "ऋच्छत् इन्द्रियप्रलयमूर्तिभावयोः" इति तुदादिषु पाठात् । अर्त्तेरपि शिति "श्रौति-कृवु-धिवु०" [ ४.२.१०८. ] इत्यनेन ऋच्छादेशविधानाद्रूपसाम्यमिति ऋच्छेः स्पष्टीकरणाय शित्युदाहरति- **ऋच्छिष्यते** इति । पृच्छतेः **संपृच्छते** इति । शृणोतेः **संशृणुते** इति । विद्धातुरनेकत्रानेकार्थपठितः, तत्रैकस्येह ग्रहणं सर्वेषां वेति संशये आह- **नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणमिति**- गम्यादयो दृश्पर्यन्ताः सर्वे एव नित्यपरस्मैपदिनः, तन्मध्ये विद्धातुः पठ्यते, अयं च ज्ञानार्थ एव नित्यपरस्मैपदी, सत्तायां विचारणे चात्मनेपदी, प्राप्तावुभयपदीति, केवलं ज्ञानार्थस्यैव ग्रहणमिति । **संवित्ते** इति- ज्ञानार्थस्यैव रूपमन्यस्य तु यथायथं संपूर्वस्यापि नित्यं पाक्षिकं वात्मनेपदम् । **संस्वरते** इति- स्वरतेः शब्दोपतापार्थस्य । अर्त्तिरपि भ्वादावदादौ च पठ्यते, तत्रैकस्य द्वयोर्वा ग्रहणमित्याशङ्कायामाह- **अर्तीति सामान्यनिर्देशाद् भ्वादिरदादिश्च गृह्यते** इति- उभयोरेव परस्मैपदित्वेन परस्मैपदिसाहचर्यस्य नियामकत्वाप्राप्ते विशेषादुभयोर्ग्रहणमिति भावः । "ऋश् गतौ" इति क्र्यादिस्तु न गृह्यते, ह्रस्वत्वेन सामान्याभावात् । तत्र भ्वादेः शिति ऋच्छादेशः, अदादेश्च द्वित्वादिना रूपे भेदात् तत्र न भवति ऋच्छादेश इति रूपान्तरमाह- **समियृते** इति, अद्यतन्यां भ्वादेः 'मा समृत, मा समृषाताम्, मा समृषत' इत्यादि । इयर्त्तेस्तु 'मा समरत, मा समरेताम्, मा समरन्तेति । माङोऽभावे च भ्वादेः समार्त्त, समार्षाताम्, समार्षतेति । अदादेश्च समारत, समारेतां, समारन्तेत्यादिरूपाणि । अत्र सूत्रेण कस्यचित् स्वरूपेण कस्यचिदिक्प्रत्ययान्तत्वेन निर्देशो दृश्यते, तत्र पूर्वयोर्लाघवेन तथैव स्वरत्यर्त्योरपि निर्देशस्यौचित्ये श्तिवा निर्देशः किमर्थ इत्याशङ्कायामाह- **स्वरत्यर्त्योः श्तिव्निर्देशो यङ्लुप्निवृत्त्यर्थः** इति- यङ्लुबन्तस्य तस्येह ग्रहणं न स्यादित्यर्थ इति भावः, अन्यथा * प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम् * इति न्यायेन तत्रापि [ यङ्लुबन्तेऽपि ] आत्मनेपदप्रवृत्तिः स्यात्, श्तिव्निर्देशे सति च—

श्तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च ।
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥"

इति न्यायेन तत्र न भवत्यात्मनेपदम्, तथा च तत्र स्वरतेः संसरिस्वर्त्ति, संसरीस्वर्ति, संसस्वर्त्तीति, अर्त्तेस्तु- समरियर्त्ति, समरियरीति, समरर्त्तीति च । अन्येभ्यस्तु- यङ्लुबन्तेभ्यो-

"Aho Shrutgyanam"

ऽप्यात्मनेपदं भवत्येवेति गम्यादीनां क्रमशः- 'संजङ्गते, संपरीपृष्टे, संशोश्रुते, संवेवित्ते, संदरीदृष्टे' इत्यादिरूपाणि । ऋच्छेस्तु यङेव न भवति व्यञ्जनादित्वाभावात् कुतो यङ्लुप् इति तदुदाहरणं नास्ति । कर्मण्यसतीत्यस्य सम्बन्धं दृढयति- **कर्मण्यसतीत्येवेति** । व्यावर्त्यमाह- **संगच्छति सुहृदमिति**- अत्र सुहृदः कर्मणः सत्त्वेनाकर्मकत्वाभावादात्मनेपदनिवृत्त्यर्थं तदावश्यकमिति भावः ।। ३ ३ ८४. ।।

## वेः कृगः शब्दे चानाशे ।। ३ ३ ८५. ।।

**त०प्र०—विपूर्वात् करोतेरनाशेऽर्थे वर्तमानात् कर्मण्यसति शब्दे च कर्मणि कर्तर्यात्मनेपदं भवति । कर्मण्यसति- विकुर्वते सैन्धवाः, साधु दान्ताः शोभनं वल्गन्तीत्यर्थः; ओदनस्य पूर्णाश्छात्रा विकुर्वते निष्फलं चेष्टन्त इत्यर्थः । शब्दे कर्मणि- क्रोष्टा विकुरुते स्वरान्, नानोत्पादयतीत्यर्थ । शब्दे चेति किम् ? विकरोति मृदुम् । अनाश इति किम् ? विकरोत्यध्यायं, विकरोति शब्दं विनाशयतीत्यर्थः ।। ८५ ।।**

**श० म० न्यासानुसन्धानम्- वेः०** । कर्मण्यसतीति सम्बध्यते, तत्र कर्मणीति पदमावर्त्तते, तथा च तस्य **'शब्दे'** इत्यनेनापि सम्बन्धः । **'अनाशे'** इति च धात्वर्थपर्युदासः । स च यद्यपि सामर्थ्यात् शब्दे च कर्मणीत्यंशेनैव सम्बध्यते, अकर्मकतादशायां नाशार्थत्वस्यासंभवात्, नाशो हि सकर्मकः कर्मरहितस्य तस्यासंभवात् । यद्यपि कर्तुरपि नश्यमानत्वं सम्भवति घटो नश्यतीत्यादिदर्शनात्, तथापि करोत्यर्थनाशस्य कर्मण्येव सम्भव इति शब्दकर्मकत्वे सत्येवासौ पर्युदासः समन्वेतीति स्वीकार्यम्, तथैव चोदाहरणदानात् । तथापि सामान्येन करोतेरर्थव्यावर्त्तकतयैव वाक्यार्थे प्रवेश इत्याशयेनाह-**विपूर्वकात् करोतेरनाशेऽर्थे वर्त्तमानादि**त्यादि, तथा च सूत्रस्य द्विविधो विषयः- अकर्मकः शब्दकर्मकश्च, तत्राकर्मकमुदाहर्तुमवतारयति- **कर्मण्यसतीति** । **विकुर्वते सैन्धवाः** इति- सैन्धवाः- सिन्धुदेशोद्भवा अश्वविशेषाः, विकुर्वते- विविधमाचरन्ति । तमेवार्थं प्रकृतोपयोगितयाह- **साधु दान्ताः शोभनं वल्गन्तीत्यर्थः** इति- दान्ताः- गतिविशेषेषु शिक्षिताः, अत एव शिक्षानुकूलां गतिं दर्शयन्ति, अन्यथाऽपि प्रयोगोऽयं व्याख्यातुं शक्यः, यत्रादान्ता एवाश्वा गतिकाले न सम्यगाचेष्टन्ते तत्रापि प्रकृतप्रयोगस्य संभवात्, अदान्ता अश्वाः प्रतिकूलं वल्गन्तीति तत्रार्थप्रतीतेः, विपूर्वकस्य करोतेरनिष्टोत्पत्तिविषय एव बाहुल्येन प्रयोगात् । उदाहरणान्तरमाह- **ओदनस्य पूर्णाश्छात्रा विकुर्वते** इति- छात्राणामल्पभोजित्वमेवाध्ययने समुपकारकम्, कृतपूर्णभोजनानां तेषामध्ययनातिरिक्तक्रियास्वेव बाहुल्येन प्रवृत्तेरिति प्रकृते 'विकुर्वते' इत्यस्य तदनुकूलमेवार्थमाह- **निष्फलं चेष्टन्ते इत्यर्थः** इति । अत्र केचित् "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः" इति पद्ये 'विक्रियन्ते' इति कर्मकर्तरि प्रयोगमाश्रित्य तत्र "भूषार्थ-सन्-किरादिभ्यश्च ञिक्यौ" [ ३. ४. ९३. ] इति सूत्रे चकारेण "णि-स्नु-श्र्यात्मनेपदाकर्मकात्" [ ३. ४. ९२. ] इति सूत्रस्थानुकर्षणादात्मनेपदविधावकर्मकात् विपूर्वकात् करोतेः कथं क्य इत्याशङ्कन्ते, परं तन्न युक्तम्, यतोऽत्र न कर्मकर्तरि प्रयोगोऽपि तु शुद्धे कर्मण्येव, विकारहेतौ सति तेन विकारकेण कर्त्रा येषां चेतांसि न विक्रियन्ते विकृतानि न विधीयन्ते त एव धीरा इत्यर्थस्य विवक्षितत्वात् । इत्थमकर्मकादुदाहृत्य शब्दकर्मकादुदाहर्तुमवतारयति- **शब्दे कर्मणीति क्रोष्टा विकुरुते स्वरानि**ति- क्रोष्टा शृगालः, स हि प्रकृत्या नानाविधान् स्वरान् करोति, तथा चार्थमाह- **नानोत्पादयतीत्यर्थः** इति । **शब्दे चेति किमिति**- वेः 'कृगोऽनाशे' इत्येव सूत्रमस्तु, 'अनाशे' इत्येतत्सामर्थ्यादेव सकर्मकादपि विधिः स्यादेव, नहि नाशार्थस्य कृगोऽकर्मकत्वं सम्भवति तथा च कर्मण्यसतीत्यनुवृत्तमपि प्रकृते पाक्षिकतया संभन्त्स्यते, तथा च कर्मण्यसति नाशाभिन्ने चार्थे सत्यपि कर्मणि सूत्रप्रवृत्तिः स्यादिति क्रोष्टा विकुरुते स्वरानित्यादौ स्यादेवात्मनेपदमसत्यपि शब्दे चेत्यस्याभावे, इत्यनर्थकं शब्दे चेत्यस्योपादानमिति प्रष्टुराशयः प्रतिभाति, तमाशयं परिलक्ष्यैवाव्याप्तिदोषमप्रदर्श्यातिव्याप्तिदोषमेवाह- **विकरोति मृदुमि**ति, अन्यथा कर्मण्यसतीत्यस्य सम्बन्धे शब्दे चेत्यस्याभावे क्रोष्टा विकुरुते स्वरानिति लक्ष्येऽव्याप्तिरेव दोष इत्यतिव्याप्तिप्रदर्शनस्यायुक्तत्व स्यात्, अतिव्याप्त्यपेक्षयाऽव्याप्तिदोषस्य बलीयस्त्वाच्च । एवं च 'अनाशे' इत्येतत्पदसामर्थ्याद् यथाकथंचिदकर्मकात् सकर्मकाच्च वेः परात् कृग आत्मनेपदविधानस्य "तुष्यतु दुर्जनः" इति न्यायेन स्वीकरणेऽव्याप्तिनिस्तारेऽपि नास्त्यतिव्याप्तिनिस्तार इति विकरोति मृदुमित्यादिशब्दभिन्नकर्मकस्थले आत्मनेपदवारणाय शब्दे चेत्यस्यावश्यकत्वमिति प्रत्युदाहरणाशयः । **अनाश इति किमिति**- शब्दकर्मकादेव सकर्मकात् स्यादन्यस्मादकर्मकादेव स्यादिति शब्दस्य च विनाशार्थककरोतिना सह सामर्थ्यमेव नास्ति तस्य नित्यत्वादिति तदन्यत्र प्रवृत्तेः स्वत एवानिष्टतया नाशार्थकात् करोतेः प्राप्तिरेव नास्तीति वृथाऽनाशे इति पदमिति प्रष्टुराशयः । शब्दस्य स्फोटरूपस्य नित्यत्वेऽपि व्यावहारिकस्य तस्योत्पाद-विनाशयोराविर्भाव-तिरोभावरूपयोर्वैयाकरणैरपि स्वीकृततत्वेन नैयायिकादिभिश्च तस्यानित्यत्वस्यापि साधितत्वेन तत्र सम्भवति नाशार्थकस्य कृगः

"Aho Shrutgyanam"

प्रयोग इति तत्रात्मनेपदवारणार्थमावश्यकम् 'अनाशे' इति पदमित्याह– **विकरोत्यध्यायं, विकरोति शब्दमिति**– अध्यायस्य वाक्यसमूहविशेषरूपस्योत्पाद-विनाशशालित्वस्य सर्वसम्मतत्वेन तत्र नाशार्थकस्य करोतेः प्रयोगे, सामान्यतः शब्दमात्रस्यानित्यतावादिनां च मते शब्दविषयेऽपि तादृशार्थकस्य करोतेः प्रयोगे चात्मनेपदवारणार्थमावश्यकम्, 'अनाशे' इति पदमिति भावः। **अन्ये** वैयाकरणाश्चैतत्सूत्र-समानविषयके सूत्रेऽनाशे इति नोपाददत एव, तन्मते च शब्दस्य कर्मत्वे नाशेऽनाशे वा सर्वत्रात्मनेपदमेव स्यादिति विकुरुते शब्दमित्येव प्रयोगस्तेषामिष्ट इति प्रतिभाति। किमत्र तत्त्वमिति लक्ष्यैकचक्षुष्का एव निर्णेतुमलमिति ॥ ३. ३. ८५. ॥

## आङो यम-हनः स्वेऽङ्गे च ॥ ३.३.८६ ॥

**त० प्र०– आङः पराभ्यां यमि-हनिभ्यां कर्मण्यसति कर्तुः स्वेऽङ्गे च कर्मणि कर्तर्यात्मनेपदं भवति।** आयच्छते, **आहते। स्वेऽङ्गे आयच्छते पादम्**, आहते शिरः। **स्वेऽङ्गे चेति किम्? आयच्छति रज्जुम्**, आहन्ति वृषलम्। **स्व इति किम्? आयच्छति पादौ चैत्रस्य, आहन्ति शिरो मैत्रस्य। अङ्ग इति किम्? स्वामायच्छति रज्जुम्, स्वं पुत्रमाहन्ति। स्वाङ्ग इति समस्तनिर्देशे पारिभाषिकस्वाङ्गप्रतिपत्तिः स्यादित्यसमस्ताभिधानम् ॥ ८६ ॥**

**श० म० न्यासानुसन्धानम्– आङो०।** कर्मण्यसतीति सम्बध्यते, तत्र च कर्मणीति पदमावृत्तं सत् 'स्वेऽङ्गे' इत्यनेनापि सम्बध्यते, स्वत्वं च कर्तुरपेक्षयैव, अन्यथा सर्वस्याङ्गस्य यत्किञ्चिदपेक्षया स्वत्वेन स्वपदमव्यावर्त्तकं स्यात्। कर्तुरेव कारकचक्रप्रयोक्तृत्वेन प्राधान्यात् सर्वादेश्चोत्सर्गतः प्रधानपरामर्शित्वेन कर्तुरपेक्षयैव स्वत्वस्य ग्रहीतुमौचित्यं चेत्येतत् सर्वमभिप्रेत्य सूत्रं व्याचष्टे–**आङः पराभ्यां यमि-हनिभ्यां कर्मण्यसति कर्तुः स्वेऽङ्गे च कर्मणी**त्यादि, यमि-हन्योः स्वभावतः सकर्मकत्वेऽप्यर्थान्तरवृत्तितादशायां कर्मणोऽविवक्षया वा कर्माभावः सम्भवति, तथा च पूर्वमकर्मकमेवोदाहरति– **आयच्छते, आहते** इति– स्वयमेव दीर्घीभवति, यत्किञ्चिदाहन्तुं प्रवर्त्तते इति चार्थः। अकर्मकत्वे उदाहृत्य स्वेऽङ्गे कर्मण्युदाहरति– **स्वेऽङ्ग** इति प्रकृत्य– **आयच्छते पादमिति**– दीर्घीकरोतीत्यर्थः। **आहते शिरः** इति– ताडयतीत्यर्थः, अनयोः स्वपादं स्वशिर इति स्वशब्दघटितपाठाभावेऽपि स्वभावतः स्वीयस्यैव पादस्य शिरसो वा प्रतीतिः अङ्गानामङ्गिसम्बन्धस्य स्वभावसिद्धत्वेनाङ्गिनोऽनुपादाने यत्किञ्चिदङ्गयपेक्षया कर्तुरेवोपस्थितत्वात् परिग्रहः, यथा च 'पितरि वर्त्तितव्यम्, मातरि शुश्रूषितव्यम्' इत्यादिवाक्येषु स्वशब्दाभावेऽपि ज्ञायत एव स्वस्मिन् पितरि स्वस्यां मातरीति, तथेहापि स्वशब्दानुपादानेऽप्यन्तरङ्गत्वात् कर्तुरेवाङ्गस्य प्रतीतिरिति। **स्वेऽङ्गे चेति किमिति**– 'सति च' इत्येतदेव तत्स्थाने पाठ्यमिति भावः। तथा सति कर्मण्यसति सति चाङः पराभ्यां यमि-हनिभ्यामात्मनेपदं स्यादित्यर्थः स्यात्, एवं चाकर्मकात् सकर्मकाच्च सर्वस्माद् भविष्यति। नन्वेवं कर्मण्यसतीति निवर्त्त्य सामान्यत एव आङो यम-हन आत्मनेपदं विधीयतां, सति चेत्यपि नावश्यकम्, कर्मण्यसतीत्यस्य सम्बन्धे सत्येव 'आयच्छते पादम्, आहते शिरः' इत्यादेः सिद्ध्यर्थं सति चेत्यस्य प्रस्तावादिति चेन्न– उत्तरत्रानुवृत्त्यर्थं तत्सम्बन्धस्यावश्यकत्वात्, सति च तत्सम्बन्धे 'आयच्छते पादम्' इत्याद्यर्थं सति चेत्यस्याप्यावश्यकत्वमेव, अन्यथा 'आयच्छति रज्जुम्' इति प्रत्युदाह्रियमाणेऽपि द्व्यङ्गवैकल्य स्यादिति प्रत्युदाहरणासंगतिरपि स्यात्, सति चेत्यस्याभावे ह्यकर्मकादेव विधिः स्यादिति 'आयच्छति रज्जुम्' इत्यत्र प्राप्तिरेव नेति कथं प्रत्युदाहरणसंगतिः। एवं च सति चेति स्वेऽङ्गे चेत्यस्य स्थाने पाठ्यमित्येव प्रष्टुराकूतमिति स्वीकार्यम्। तथा चाकर्मकात् सकर्मकाच्च विधिः स्यादिति 'आयच्छते पादम्' इत्यादावव्याप्त्यभावादतिव्याप्तिमाह– **आयच्छति रज्जुमिति, आहन्ति वृषलमि**ति च, 'स्वेऽङ्गे' इत्यस्याभावे सति चेति पाठे चात्राप्यात्मनेपदं स्यात्, तत्सत्त्वे च कर्तुः स्वाङ्गस्य कर्मत्वाभावेन न भवति। नन्वस्य दोषस्य अङ्गे चेत्येतावताऽपि परिहारसंभवात् 'स्वे' इति व्यर्थमेवेति शङ्कते– **स्वे इति किमिति**– तदभावे रज्जु-वृषलयोरङ्गत्वाभावेन तत्र दोषाभावेऽपि यत्र पराङ्गस्य कर्मत्वं तत्रात्मनेपदं दुर्वारं स्यादित्याह– **आयच्छति पादौ चैत्रस्य, आहन्ति शिरो मैत्रस्ये**ति– अत्र पाद-शिरसो चैत्र-मैत्रयोरङ्गत्वेऽपि कर्तुरङ्गत्वाभावेन न भवत्यात्मनेपदम्, 'स्वे' इत्यस्याभावे च तद् दुर्वारमिति तदावश्यकत्वम्। अत्रेदं शङ्क्यते– यदि पराङ्गकर्मकादात्मनेपदं न भवति तर्हि "आजघ्ने विषमविलोचनस्य वक्षः" इति **किरातार्जुनीय**महाकाव्यधृतभारविप्रयोगस्य, "आहध्वं मा रघूत्तमम्" इति भट्टिप्रयोगस्य च कथं साङ्गत्यम्, पूर्वत्र "गाण्डीवी कनकशिलानिभं भुजाभ्याम्" इति पूर्वचरणेन सम्बन्धात्– "अर्जुनः कर्त्ता विषमविलोचनस्य– शिवस्य वक्षो भुजाभ्यामाजघ्ने इत्यन्वयेन, परत्रापि दशरथवाक्ये प्रजानां कर्तृत्वेन परस्यास्मच्छब्दबोध्यस्य दशरथस्य कर्मत्वेन च स्वाङ्गकर्मत्वाभावः स्पष्ट एवेति न भवितव्यमात्मनेपदेनेति चेदत्राहुः– प्रमाद

"Aho Shrutgyanam"

एवायमिति **भागवित्त्यादय** आचार्याः । **अन्ये** तु प्राप्येत्यध्याहृत्य– 'विषमविलोचनस्य वक्षः प्राप्य आजघ्ने' 'रघूत्तमं मां प्राप्य आहध्वम्' इत्येवमन्वयं स्वीकृत्य हन्तेरकर्मकतामाहुः, तथा चाकर्मकत्वादेवात्मनेपदम् । न चैवं यबन्तस्याप्रयुज्यमानत्वेन "गम्ययपः कर्माधारे" [ २. २ ७४. ] इति कर्मणि पञ्चमी स्यादिति शङ्कनीयम्, यत्र यबन्तं विनैव यबन्तार्थावगतिर्यथा 'प्रासादादासनाद् वा प्रेक्षते' इत्यादौ तत्रैव तत्प्रवृत्तेरिष्टत्वात्, इह च प्राप्येति पदाध्याहारं विना तदर्थावगत्यभावात् । अथवोक्तेषु स्थलेषु भेत्तुमित्यस्याध्याहारः कार्यः– विषमविलोचनस्य वक्षो भेत्तुमाजघ्ने, रघूत्तमं मां भेत्तुमाहध्वमित्यर्थात्, एवमपि भिदिं प्रत्येव वक्षो-रघूत्तमयोः कर्मत्वं न तु हन्तिं प्रतीत्यकर्मकत्वादात्मनेपदमिति न दोषः । अथ 'स्वे' इत्येतावदेवास्तु, स्वकीये कस्मिंश्चिद् वस्तुनि कर्मणि सत्यात्मनेपदं भवतीत्यर्थेन 'आयच्छति पादौ चैत्रस्य' इत्यादौ दोषाभावाद् 'अङ्गे' इत्यस्य वैयर्थ्यमिति पृच्छति– **अङ्ग इति किमिति**, स्वकीयाङ्गभिन्ने कर्मण्यात्मनेपदमनिष्टमिति तद्वारणायाङ्गे इत्यप्यावश्यकमेवेत्याह प्रत्युदाहरणेन– **स्वामायच्छति रज्जुं, स्वं पुत्रमाहन्तीति**– अत्र रज्जु-पुत्रयोः स्वीयत्वेऽपि स्वीयाङ्गत्वाभावान्न भवत्यात्मनेपदम् । अथ समस्तपाठमनादृत्य व्यस्तपाठादरे किं प्रयोजनमिति जिज्ञासायामाह– **स्वाङ्ग इति समस्तनिर्देशे पारिभाषिकस्वाङ्गप्रतिपत्तिः स्यादित्यसमस्ताभिधानमिति**, अयमाशयः– स्वाङ्गं द्विधेह स्यातम्– यौगिकं पारिभाषिकं च, तत्र यौगिकं तावत् स्वमङ्गं स्वाङ्गमिति, पारिभाषिकं च–

"अविकारोऽद्रवं मूर्त्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥"

इति, "असह-नञ्-विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः" [२.२.३८.] इति सूत्रं बृहद्वृत्त्युक्तम् । अस्यार्थः– विकारो वातादिक्षोभजन्मा शोफादिः, तद्भिन्नमद्रवं मूर्त्तिमत् स्वाङ्गमित्येकम्; तत्– अविकारादिलक्षणयुक्तं प्राणिस्थत्वाभावेऽपि प्राणिनश्च्युतं चेत् तदपि स्वाङ्गमिति द्वितीयम्; प्रतिमादिषु स्थितं प्रथमलक्षणलक्षितस्वाङ्गसदृशमपि स्वाङ्गमिति तृतीयमिति प्रकारत्रयविशिष्टं स्वाङ्गं व्याकरणशास्त्रे उच्यते इति । एवं च स्वाङ्गशब्देनोभयोरर्थयोरुपस्थितौ * कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः * इति न्यायेन * रूढिर्योगाद् बलीयसी * इति न्यायेन वा स्वाङ्गपदेन पारिभाषिकस्वाङ्गस्यैव ग्रहणं स्यात्, तन्मा भूदित्यसमस्तरूपेण 'स्वेऽङ्गे' इत्यभिहितमिति ॥ ३. ३. ८६ ॥

## व्युदस्तपः ॥ ३. ३. ८७. ॥

**त० प्र०– व्युद्भ्यां परात् तपेः कर्मण्यसति, स्वेऽङ्गे च कर्मणि कर्तर्यात्मनेपदं भवति । वितपते उत्तपते रविः, दीप्यत इत्यर्थः । स्वेऽङ्गे– वितपते उत्तपते पाणिम्, तापयतीत्यर्थः । व्युद इति किम् ? निष्टपति स्वेऽङ्गे चेत्येव– वितपति पृथिवीं सविता, संतापयतीत्यर्थः; उत्तपति सुवर्णं सुवर्णकारः, द्रवीकरोतीत्यर्थः । स्व इत्येव– उत्तपति पृष्ठं चैत्रस्य । अङ्ग इत्येव– स्वं सुवर्णमुत्तपति । इह 'दीप्यते ज्वलति भासते रोचते' इत्येष्वर्थेषु तपिमकर्मकं स्मरन्ति, यथा– वहति भारमिति प्रापणे वहिं सकर्मकं, स्यन्दने त्वकर्मकम्– वहति नदी, स्यन्दत इत्यर्थः ॥ ८७ ॥**

**श० म० न्यासानुसन्धानम्– व्युद०** । कर्मण्यसति स्वेऽङ्गे चेति पूर्वसूत्राभ्यां सम्बध्यते । तथा च सूत्रार्थमाह– **कर्मण्यसति स्वेऽङ्गे च कर्मणीति**– सकर्मकस्यापि तपतेर्यथा कर्मणोऽभावस्तथाग्रे स्वयमेव प्रतिपादयिष्यति । **व्युदः** इति समस्तनिर्देशेऽपि व्यस्ताभ्यामेव परात् तपतेरात्मनेपदं भवति न समस्ताभ्यां परात्, तथाप्रयोगानुपलब्धेः । उदाहरति– **उत्तपते वितपते रविरिति**– कर्मण्यसतीत्यस्योदाहरणमिदम् । उभयत्रोपसर्गभेदेऽपि नार्थे भेद इति साधारण्येनोभयोरर्थमाह– **दीप्यते इत्यर्थः** इति– संतापनार्थस्यापि तपतेरिह दीप्त्यर्थे वर्त्तमानत्वेनार्थान्तरवृत्तित्वादकर्मकत्वम् । स्वेऽङ्गे कर्मण्युदाहरति– **वितपते उत्तपते पाणिमिति**– स्वाङ्गभूतपाणिकर्मकं तापनमिह विवक्षितमिति भवति स्वाङ्गकर्मकत्वेनात्मनेपदम् । तथा चार्थमाह साधारण्येन– **तापयतीत्यर्थः** इति– अग्न्यादिसम्पर्केणापगतशैत्यं करोतीत्यर्थः । उपसर्गकृतस्यार्थविशेषस्याप्रतीयमानत्वेनोपसर्गविशेषयोरुपादानमनर्थकं सामान्येनैव तप आत्मनेपदं विधीयतामिति शङ्कते– **व्युद इति किमिति**– उपसर्गान्तरपरात् तपतेरात्मनेपदमनिष्टमिति तद्वारणायावश्यक उपसर्गविशेषपरिग्रह इत्याह प्रत्युदाहरणद्वारा– **निष्टपति**– अत्राकर्मकत्वे स्वाङ्गकर्मत्वेऽपि वा न भवत्यात्मनेपदं व्युदोऽन्यस्माद् परत्वात् । कर्मण्यसति स्वेऽङ्गे च कर्मणीत्युभयमपि सम्बन्धनीयमेवेत्याह– **स्वेऽङ्गे चेत्येवेति**– इह चकारेणैव कर्मण्यसति चेत्यस्यापि संग्रह इत्युभयोः फलप्रदर्शनायोपयुक्तमेव । प्रत्युदाहरणमाह– **वितपति पृथिवीं सवितेति**– अत्र पृथिव्याः कर्मत्वेन कर्मण्यसतीत्यस्य प्रत्युदाहरणत्वं, तस्याश्चाङ्गत्वाभावे 'अनङ्गे' इत्यस्यापि प्रत्युदाहरणत्वम् । प्रयोगार्थमाह– **सन्तापयतीत्यर्थः** इति– स्वकीयेनातपेन तस्या जलं सशोष्योष्णीकरोतीत्यर्थः । न

"Aho Shrutgyanam"

केवलं ताप एवार्थेऽस्य सकर्मकत्वमपि त्वन्यत्रापीति प्रदर्शयितुं प्रत्युदाहरणान्तरमाह– **उत्तपति सुवर्णं सुवर्णकारः** इति– अत्रापि सकर्मकत्वादकर्मकत्वनिबन्धनस्वाङ्गकर्मकत्वाच्च स्वाङ्गकर्मकत्वनिबन्धनं वाऽऽत्मनेपदं न भवति। प्रयोगार्थमाह– **द्रवीकरोतीत्यर्थः** इति– अग्निसंयोगेन घनत्वनाशाद् द्रवत्वमुत्पादयतीत्यर्थः, तथा चैवमादिष्वात्मनेपदं वारयितुं स्वेऽङ्गे चेत्यावश्यकमिति भावः। नन्वत्रातिव्याप्तिवारणार्थमङ्गे चेत्येतावदेवास्तु पृथिवी-सुवर्णयोरङ्गत्वाभावादेव न स्यादात्मनेपदमिति 'स्वे' इत्यनावश्यकमिति चेदत्राह– **'स्वे' इत्येवेति**– स्वस्मिन्नङ्गे एव कर्मणि सति भवति, न तु परकीयाङ्गस्य कर्मत्वे इत्यपि वाच्यमेवेत्यर्थः। व्यावर्त्यमाह– **उत्तपति पृष्ठं चैत्रस्येति**– अङ्गस्य पृष्ठस्य कर्मत्वे सत्यपि तत्र कर्तुः स्वत्वाभावान्न भवत्यात्मनेपदम्। 'स्वे' इत्येवास्तु, स्वकीये वस्तुनि कर्मणि सति भवतीत्यर्थेऽपि प्रदर्शितप्रत्युदाहरणेषु व्यावृत्तिः, उक्तोदाहरणेषु च प्रवृत्तिः स्यादेवेति 'अङ्गे' इत्येव त्यज्यतामिति चेदत्राह– **अङ्ग इत्येवेति**– न स्वस्मिन् यस्मिन् कस्मिंश्चिद् वस्तुनि कर्मणि सति भवत्यपि तु 'अङ्गे' एव स्वीये कर्मणि सतीत्यपि स्वीकार्यमेवेत्यर्थः। व्यावर्त्यमाह– **स्वं सुवर्णमुत्तपतीति**– अत्र स्वीये सुवर्णे कर्मणि सत्यपि न भवत्यात्मनेपदम्, 'अङ्गे' इत्यस्याभावे च तद् दुर्वारमेवेति भावः। तपेः संतापार्थकस्य फल-व्यापारयोर्व्यधिकरणत्वेन कथमकर्मकत्वम् सकर्मकाऽकर्मलक्षणं सामान्यतः—

"फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥"

इत्येवं रीत्योक्तमभियुक्तैः। तथा च फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्, फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति लक्षणं फलति, तथ्यर्थः संतापश्च न कर्तरि किन्तु तदतिरिक्ते एवेति फलव्यधिकरणव्यापारवाचकत्व तपेः स्पष्टमेवेति नायमकर्मक इति चेदत्राह– **इह 'दीप्यते ज्वलति भासते रोचते' इत्येष्वर्थेषु तपिमकर्मकं स्मरन्ति** इति, अयमाशयः– सन्तापार्थे वर्त्तमानस्तपिर्नाकर्मक इति सत्यम्– किन्तु तस्य दीप्त्याद्यर्थान्तरवृत्तिदशायामकर्मकत्वं पूर्वाचार्यसम्मतम्, धातूनामर्थस्यानियतत्वाच्च तस्य दीप्त्यादिष्वर्थेषु वर्त्तमानत्वं न निर्मूलम्, धातोरर्थान्तरवृत्तित्वे अकर्मकता च—

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥"

इति कारिकया स्वीकृताऽभियुक्तैः। अर्थान्तरवृत्तित्वे धातोरकर्मकतामुदाहरणेन प्रमाणयति– **यथा–वहति भारमिति प्रापणे वहिं सकर्मकं स्पन्दने त्वकर्मकमिति**– यथा वहति भारमिति प्रयोगे वहिंसकर्मकं स्मरन्ति, स्पन्दनेऽर्थे तु तमेवाकर्मकं स्मरन्ति, तथा संतापे 'तपति पृथिवीं सविता' इत्यादौ सकर्मकस्यापि तपेः 'तपति सूर्यः' इत्यादिवाक्ये दीप्यत इत्यर्थेऽकर्मकत्वमित्यर्थः। स्पन्दने वहेः प्रयोगमुदाहरति– **नदी वहतीति**– अत्र वहेर्न कर्मापेक्षेत्यकर्मकत्वम्। अर्थमाह– **स्पन्दते** इति– प्रस्रवतीत्यर्थः, अत्रार्थे कर्मापेक्षाभाव एवेति यथा, तथा दीप्त्यादिष्वर्थेषु तपेरपीति॥ ३. ३. ८७॥

## अणिकर्मणिक्कर्तृकाण्णिगोऽस्मृतौ ॥ ३. ३. ८८. ॥

त० प्र०— "प्रयोक्तृव्यापारे णिग्" [ ३. ४. २०. ] इति वक्ष्यते, अणिगवस्थायां यत् कर्म तदेव णिगवस्थायां कर्ता यस्य सोऽणिक्कर्मणिक्कर्तृकः, तस्मात्, णिगन्ताद् धातोरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं भवति। आरोहन्ति हस्तिनं हस्तिपकाः; आरोहयते हस्ती हस्तिपकान्, आस्कन्दयत इत्यर्थः, पश्यन्ति राजानं भृत्याः, दर्शयते राजा भृत्यान् भृत्यैरिति वा; पिबन्ति मधु पायकाः, पाययते मधु पायकान्। अणिगिति किम्? आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयति हस्तिपकान् महामात्रः, आरोहयन्ति महामात्रेण हस्तिपकाः; प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्तर्यपि मा भूत्। गित्करणं किम्? गणयति गणं गोपालकः, गणयते गणो गोपालकम्, इति णिजन्तकर्मणिक्कर्तृकादपि णिगन्तात् प्रतिषेधो मा भूत्। कर्मेति किम्? करणादेः कर्तृत्वे मा भूत्– पश्यन्ति भृत्याः प्रदीपेन, दर्शयति प्रदीपो भृत्यान्। णिगिति किम्? यस्याणिगन्तस्यैव कर्म कर्ता भवति ततो णिगन्तान्मा भूत्– लुनाति केदारं चैत्रः, लूयते केदारः स्वयमेव, तं प्रयुङ्क्ते– लावयति केदारं चैत्रः। कर्तृग्रहणं किम्? आरोहन्ति हस्तिनं हस्तिपकाः, तानेनमारोहयति महामात्रः। णिग इति किम्? आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयते हस्तीत्यणिगवस्थायां मा भूत्। प्रत्यासत्तेश्च यस्यैव धातोरणिगवस्था तस्यैव धातोर्णिगवस्था गृह्यते न धात्वन्तरस्य, तेनेह न भवति– आरुह्यमाणो हस्ती चेतयति पृष्ठं मूत्रेण। 'हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति मनुष्यान्' इत्यत्र तु सदृशधातुप्रयोगेऽपि पूर्वो हस्तिपककर्तृको रुहिः परश्च मनुष्यकर्तृक इति साधनभेदात् क्रियाभेदे धातुभेदः। अस्मृताविति किम्? स्मरति वनगुल्मं कोकिलः, स्मरयत्येनं वनगुल्मः।

कथं हन्त्यात्मानं, घातयत्यात्मेति, अत्र ह्यात्मनोऽणिक्कर्मणो णिकर्तृत्वमस्तीति; नैवम्– द्वावात्मानौ-शरीरात्मा-

ऽन्तरात्मा च, तत्र मेवैनैव लोके नित्यमयं प्रयोगः, हन्त्यात्मानमिति शरीरात्मनोऽन्तरात्मनो वा कर्मत्वम्. घातयत्यात्मानमित्यपि तस्यैव कर्मत्वं न कर्तृत्वमिति। ननु यदि अणिक्कर्मणो णिक्कर्तृतायां णिगन्तादात्मनेपदमिष्यते तर्हि 'शुष्यन्त्यातपे व्रीहयः, शोषयते व्रीहीनातपः' इत्यादावधिकरणादेः कर्तृतायामात्मनेपदं न प्राप्नोति, न- फलवत्कर्तृरि भविष्यति। यद्येवमारोहयते हस्ती हस्तिपकानित्यादावपि तथैवास्तु, सत्यम्- किन्तु फलवतः कर्मस्थक्रियाच्चान्यत्रायं विधिः, तथाहि- 'लावयते केदारः, भूषयते कन्या, कारयते कटः गणयते गणः, आरोहयते हस्ती स्वयमेव' इत्यादौ कर्मस्थक्रियत्वात् 'एकधातौ कर्मक्रिययैकाकर्मक्रिये" [३. ४. ४६] इत्यनेनैवात्मनेपदं भवति।

नन्वारोहयते हस्ती स्वयमेवेत्यस्य 'आस्कन्दयते' इति किलार्थः, तत् कथं कर्मस्थक्रियता रुहेः, उच्यते- यदा न्यग्भावनर्थोऽयं तथा कर्मस्थक्रियत्वम् तथाहि- 'आरोहन्ति हस्तिनं हस्तिपकाः' इति न्यग्भवनोपसर्जने न्यग्भावने रुहिर्वर्तते, स द्वितीयस्यामवस्थायाम् आरुह्यते हस्ती स्वयमेव' इत्यस्यां कर्मकर्तृविषयो न्यग्भवनमात्रवृत्तिर्भवति, अथ चतुर्थ्यामन्तर्भूततृतीयायाम् 'आरुह्यमाणं प्रयुङ्क्ते' इति हस्तिपकव्यापारप्रधानायां णिगन्तः सन् 'आरोहयन्ति हस्तिनं हस्तिपकाः' इत्यस्यां शुद्धारोहतिवन्न्यग्भवनोपसर्जने न्यग्भावने वर्तते, पुनर्यदा अस्यैव प्रयोजकव्यापाराविवक्षा तदा 'आरोहयते हस्ती स्वयमेव' इत्यस्यां पञ्चम्यामवस्थायाम् 'आरुह्यते हस्ती स्वयमेव' इतिवन्न्यग्भवनलक्षणस्य विशेषस्य हस्तिसमवेतत्वेनोपलम्भात् 'लावयते केदारः' इत्यादाविव कर्मस्थक्रियत्वमस्त्येवेति न किञ्चिदमुपपन्नम्। तदुक्तम्—

"न्यग्भावना न्यग्भवनं, रुहौ शुद्धे प्रतीयते।
न्यग्भावना न्यग्भवनं, ण्यन्तेऽपि प्रतिपद्यते॥
अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि।
निवृत्तप्रेरणाद् धातोः प्राकृतेऽर्थे णिगुच्यते॥" इति

॥ ८८ ॥

---

**श० म० न्यासानुसन्धानम्- अणि०।** वाक्यार्थं बोधयितु पदार्थं व्याख्याति- **प्रयोक्तृव्यापारे णिगि**त्यादिना, णिगिह त्रिरुपात्तः सूत्रे, तत्र णीत्येव निर्देशे लाघवं स्यादिति शिष्यशङ्कानिरासाय णिग्निर्देशे विशेषस्य विवक्षितस्य भूमिकारूपेण वायं णिगः परिचयो दीयते, प्रयोक्तुः- कर्मणि प्रवृत्तस्य प्रेरयितुर्व्यापारे वाच्ये यो णिगुक्तसूत्रेण विधास्यते तस्यैव परिग्रहार्थमयं निर्देश इति भावः। **अणिक्कर्मणिक्कर्तृका**दिति पदं विगृह्य व्याख्याति- **अणिगवस्थायां यत् कर्म तदेव णिगवस्थायां कर्ता यस्य सोऽणिक्कर्मणिक्कर्तृकः** इति- प्रयोजकव्यापारविवक्षातः पूर्वं यद् वाक्यं प्रयुज्यते तदवस्थायां तस्य क्रियापदस्य यत् कर्मत्वेनोपात्तं तदेव प्रयोजकव्यापारविवक्षया णिगन्तावस्थापन्नस्य क्रियापदस्य यदि कर्तृत्वेन विवक्षितं स्यात् तर्हि प्रकृतसूत्रप्रवृत्तिविषयतेति तात्पर्यम्। **अणिक्कर्मणिक्कर्तृका**दिति च **णिगः** इत्यस्य विशेषणम्, णिक् च प्रत्यय इति तद्ग्रहणे तदन्तस्य ग्रहणं भवतीति पूर्वोक्तविशेषणविशिष्टाण्णिगन्तात् प्रकृतेः स्मृतिभिन्नेऽर्थे वर्तमानादात्मनेपदं भवतीति सूत्रार्थः पर्यवसितः, तमाह- **तस्मात् णिगन्ताद् धातोरित्या**दिना, सर्वत्राणिक्कर्मणिक्कर्तृकत्वं द्योतयितुमणिगवस्थानिर्देश उदाहरणेषु क्रियते- **आरोहन्ति हस्तिनं हस्तिपकाः** इति- अत्र रुहेर्गजोपरिप्राप्त्यनुकूलन्यग्भावनादिरर्थः, हस्तिपका गजमारोढुं तं न्यग्भावयन्तीत्यर्थः, न्यग्भावनं च तस्य [गजस्य] नीचैरुपवेशपूर्वकारोहणानुकूलतदीयपादार्पणशिरोऽधूननादिकृते तत्प्रेरणम्, इयं च प्रेरणा रुहेरन्तर्भाविता। यदा च गजस्य शिक्षितत्वविवक्षार्थं हस्तिपकव्यापारो न विवक्ष्यतेऽपि तु गजस्यैव तदनुकूलाचरणं विवक्ष्यते तदा गजस्य प्रयोजकतया तद्व्यापारवाचको णिग् भवतीत्ययं स्वयमेव तानारोहयते इति प्रयोगः पर्यवस्यति, तमाह- **आरोहयते हस्ती हस्तिपकानि**ति- अत्राणिगवस्थाकर्मण एव कर्तृत्वमिति भवति सूत्रप्रवृत्तिः। प्रयोगार्थमाह- **आस्कन्दयते इत्यर्थः** इति- हस्तिपका हस्तिन उपर्यागच्छन्ति तांस्तदनुकूलाचरणेनागमयतीत्यर्थः, **आस्कन्दयते** इत्यत्राप्यनेनैवात्मनेपदम्, हस्तिपका हस्तिनमास्कन्दन्तीति प्रथमकक्ष्यायामणिगवस्थायां कर्मणो हस्तिन एवात्रापि कर्तृत्वात्। उदाहरणान्तरमवतारयति- **पश्यन्ति राजानं भृत्याः** इत्यादिना, इयमणिगवस्था कर्मणः प्रदर्शनार्थम्। प्रकृतसूत्रोदाहरणं तु **दर्शयते राजा भृत्यान्** इति- राजा स्वयमेव भृत्यानां चाक्षुषज्ञानविषयो भवतीति पश्यतो भृत्यान् स्वदर्शनाय प्रेरयतीति वार्थः, अत्राणिगवस्थाकर्मणो राज्ञो णिगवस्थायां कर्तृत्वसत्त्वाद् भवत्यनेनात्मनेपदम्, "दृश्यभिवदोरात्मने"[२.२.९.] इत्यात्मनेपदविषयतायामणिक्कर्तृणां भृत्यानां विकल्पेन कर्मत्वे सति द्वितीया, तदभावे चाणिगवस्थाकर्तृत्वमूलिका तृतीया; तदाह- **भृत्यैरि**ति। पुनरुदाहरति- **पिबन्ति मधु पायकाः** इत्यादिना, पिबन्तीति पायकाः, पिबतेर्णकि "आत ऐः कृञ्ञौ" [४. ३. ५३.] आकारस्यैकारे आयादेशे च- पायका इति, इयं चाणिगवस्था, कर्मणो मधुन एवामोदादिना पायकप्रेरकत्वे णिगि- **पाययते मधु पायकानि**ति- अत्र यद्यपि "चल्याहारार्थेङ्०" [३.३.१०८.] इति सूत्रेण परस्मैपदं प्राप्तं विशेषविहिततया

"Aho Shrutgyanam"

प्रबाध्य "परिमुहायमायस०" [ ३. ३. ९४. ] इत्यात्मनेपदं प्राप्तमेव तथापि तेन फलवति कर्त्तरि भवत्यात्मनेपदमनेन चाफलवत्यपि कर्त्तरीत्यफलवत्कर्तृत्वे इदमुदाहरणम् । चित्तवत्कर्तृत्वेऽचित्तवत्कर्तृकत्वे चोदाहृत्य सम्प्रति पदकृत्यमाह- **अणिगिति किमिति**, तथा च कर्मकर्तृकाण्णिगोऽस्मृताविति सूत्राकारोऽस्तु, क्वचिदवस्थायां कर्मणो यत्र कर्तृत्वं तस्माण्णिगन्तादित्यर्थेऽर्थादेवाणिगि कर्मणो णिगि कर्तृत्वमिति लभ्येत, अन्यथा णिगि कर्मणो णिगि कर्तृत्वस्वसिद्धमेवेति तत्कथनस्य वैयर्थ्यमेवेति 'अणिग्' इत्यस्याभावेऽपि प्रकृतार्थलाभः स्यादेवेति प्रष्टुराशयः । समाने [ एकस्मिन् ] णिगि कस्यचित् कर्मत्वकर्तृत्वयोर्यौगपद्येनासिद्धत्वेऽपि णिग्द्वयस्थले णिगन्तकर्मण एवापरणिगन्तकर्तृत्वं संभाव्यत एवेति तत्र सूत्रप्रवृत्तिरनिष्टा स्यादित्याह क्रमप्रदर्शनपूर्वकम्- **आरोहन्ति हस्तिनं हस्तिपकाः** इत्यादिना, अत्राणिगवस्थाप्रदर्शनं णिग्द्वयोत्पत्तिक्रमप्रदर्शनमात्रार्थं न तु पूर्वोदाहृतस्थलवदणिगि कर्मणो णिगि कर्तृत्वप्रतिपादनार्थं तस्येहानावश्यकत्वात् । अत्रैव प्रयोजकव्यापारविवक्षायां णिगन्तप्रयोगं प्रदर्शयति- **आरोहयति हस्तिपकान् महामात्रः** इति- महामात्रः प्रधानहस्तिपकः, आरोहतो हस्तिपकान् स प्रेरयतीति विवक्षायां णिग्, अत्र नास्ति पूर्वावस्थायां कर्मणः प्रकृतावस्थायां कर्तृत्वमिति नास्ति प्रकृतसूत्रप्राप्तिः । अत्रापि प्रेरणार्थविवक्षायां णिगि प्रत्युदाहरणत्वमित्याह- **आरोहयन्ति महामात्रेण हस्तिपकाः** इति- आत्मन आरोहयन्तं महामात्रं हस्तिपकाः प्रेरयन्तीत्यर्थः । अत्र प्रथमणिगवस्थायां कर्मणां हस्तिपकानां कर्तृत्वमिति कर्मणः कर्तृत्वमस्तीति आत्मनेपदं स्यात् तन्मा भूदित्याह- **प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्तर्यपि मा भूत्** इति, अयमाशयः- अणिगित्यस्याभावे- अणिगवस्थाकर्मणो णिगवस्थाकर्तृकाण्णिगन्ताद् यथाऽऽत्मनेपदं भवति तथा णिगवस्थाकर्मणोऽपराणिगवस्थाकर्तृतादशायां मा भूदित्येतदर्थमणिगित्यस्यावश्यकत्वमिति । पुनः पृच्छति- **गित्करणं किमिति**- सामान्येन णिनिर्देश एव कार्यो न तु गित्वविशिष्टणिनिर्देश इति प्रष्टुराशयः; यद्यपि णिगिह सूत्रे त्रिर्निदिष्टस्तथापि प्रथमोपस्थितत्वात् पूर्वं तत्फलकथनस्यैव प्रस्तुतत्वाच्च तदीयगित्वविषयक एवायं प्रश्नः । प्रत्युदाहरणेनोत्तरयति- **गणयति गणं गोपालकः** इति- चौरादिकस्य गणयतेः स्वार्थण्यन्तस्य प्रयोगोऽणिगवस्थासूचनार्थः, सा ह्यवस्था सिद्धान्ते प्रकृतसूत्रप्रवृत्त्यनुकूलैव, गित्करणाभावे च तस्याः प्रातिकूल्यं वक्ष्यति । ततः प्रयोजकव्यापारविवक्षायां णिगन्तप्रयोगमाह- **गणयते गणो गोपालकम्** इति गणयन्तं गोपालकं गणः प्रेरयतीति विवक्षायां णिगि सति अणिक्कर्मणो गणस्य णिगवस्थायां कर्तृत्वसत्त्वाद् भवत्येवात्मनेपदम्, गित्करणाभावे च गणयति गणं गोपालक इत्यस्याण्यन्तत्वाभावेन तत्र कर्मणो गणस्य णिगन्तावस्थायां कर्तृत्वसत्त्वेऽपि न स्यादात्मनेपदमित्याह- **णिजन्तकर्मणिक्कर्तृकादपि णिगन्तात् प्रतिषेधो मा भूदिति**- णिजन्तावस्था गणयति गणं गोपालक इति, तत्र कर्मणो गणस्य णिगि कर्तृत्वं यत्र तादृशाण्णिगन्ताद् गणयते गणो गोपालकमिति प्रयोगस्थिताद् गणयतेः प्रतिषेधः- आत्मनेपदाप्रवृत्तिर्मा भूदित्यर्थः । पुनः शङ्कते- **कर्मेति किमिति**-अणिक्कर्मेति अणिगवस्थायां कर्मण एव णिगवस्थायां कर्तृत्वं यत्रेति विशिष्य कारकविशेषनिर्देशो न कार्यः, किन्तु सामान्येन अणिक्कारकणिक्कर्तृकादिति वक्तव्यमिति प्रष्टुराशयः, तथा सति लाघवाभावेऽपि सूत्रस्य व्यापकत्वं स्यादिति "असति बाधके प्रमाणानां सामान्ये पक्षपातः" इति न्यायानुकूल्यमपि स्यादिति तन्मूलम् । केवलमणिगवस्थाकर्मण एव णिगवस्थाकर्तृत्वे सूत्रप्रवृत्तिरिष्टा, न तु कारकान्तरस्य तत्कर्तृत्वे इति स्वाशयं प्रकटयति- **करणादेः कर्तृत्वे मा भूदिति**- यत्र कर्मभिन्नस्य अणिगवस्थाकारकस्य करणादेर्णिगवस्थायां कर्तृत्वविवक्षा तत्र सूत्रप्रवृत्तिर्मा भूदित्येतदर्थं कर्मग्रहणं कार्यमिति भावः । तादृशस्थलं दर्शयति- **पश्यन्ति भृत्याः प्रदीपेने**ति- अत्राणिगवस्थायां प्रदीपस्य करणत्वं तस्यैव यदि प्रयोजकत्वं विवक्षितं तदा **दर्शयति प्रदीपो भृत्यानि**ति प्रयोगः, एतदेव च प्रकृते प्रत्युदाहरणम्, तथा चात्राणिगवस्थाकरणस्य प्रदीपस्य णिगवस्थायां कर्तृत्वमस्तीति प्रकृतसूत्रप्रवृत्तिः स्यात्, कर्मग्रहणे कृते तु न भवति प्रदीपस्य कर्मत्वाभावात् । द्वितीयस्य णिग्ग्रहणस्य फलं पृच्छति- **णिगिति किमिति**, तथा च "अणिक्कर्मकर्तृकाण्णिगोऽस्मृतौ" इति सूत्रमस्तु, णिगन्तादेवात्मनेपदस्य विधीयमानत्वेन तं प्रत्येवाणिक्कर्मणः कर्तृत्वं विज्ञास्यते प्रत्यासत्त्येति प्रष्टुराशयः । प्रत्युदाहरणस्थलं प्रदर्शयति- **यस्याणिगन्तस्यैव कर्म कर्ता भवति ततो णिगन्तान्मा भूदिति**- अणिगवस्थायामेव यत्र कर्मणः कर्तृत्वं विवक्षितं तत्राणिक्कर्म कर्तृत्वमस्ति, तादृशकर्तृकाद् धातोः प्रयोजकव्यापारविवक्षायां णिगि कृते प्रकृतसूत्रप्रवृत्तिर्मा भूदित्यर्थः । क्वेत्याह- **लुनाति केदारं चैत्रः** इति- कर्तृव्यापारविवक्षावस्थेयम्, यदा च कर्मण एव कर्तृत्वं विवक्ष्यते सौकर्यातिशयद्योतनार्थं तदा- **लूयते केदारः स्वयमेवेति**- "एकधातौ कर्मक्रिययैकाऽकर्मक्रिये" [ ३.४.८६. ] इत्यात्मनेपदं क्यश्च भवति । अत्रैव प्रयोजकव्यापारविवक्षायां-

"Aho Shrutgyanam"

**लावयति केदारं चैत्रः** इति– अत्राणिगवस्थाकर्मकर्तृकाल्लुनातेर्णिगन्तादात्मनेपदं स्यात्, णिगित्युक्तौ च केदारस्य णिगवस्थाकर्मणोऽत्र कर्तृत्वाभावान्न भवतीति 'लावयति' इति परस्मैपदमेव भवत्यफलवत्कर्त्तरि, णिगित्यस्याभावे च फलवत्यफलवति च सर्वत्रात्मनेपदमेव स्यात्। ननु यथा लूयते केदारः स्वयमेवेत्यत्र "एकधातौ०" [ ३. ४. ८६. ] इत्यात्मनेपदं भवति तथा आरोहयते हस्ती हस्तिपकान्" इत्यत्रापि तेनैवात्मनेपदं सिद्धं, या हि पूर्वं 'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यवस्थायां कर्मणि क्रिया दृष्टा सैवेह 'आरोहयते हस्ती हस्तिपकान्' इत्यत्र कर्तरि दृश्यते इति लूयते केदारः स्वयमेवेत्यनेन साम्यादिति चेन्न– अकर्मकक्रियत्वाभावात्, लूयते केदारः स्वयमेवेत्यत्र हि कर्मणः कर्तृत्वविवक्षायां क्रियाऽकर्मिका भवति, आरोहयते हस्ती हस्तिपकानित्यत्र च क्रिया सकर्मिकेति भेदात्। अत एव हि तत्र सूत्रे 'अकर्मकक्रिये' इत्युच्यते, तादृशी च क्रिया यत्र सौकर्यातिशयद्योतनार्थं कर्मणोऽविवक्षा तत्रैव, न तु प्रकृते इति तेन सूत्रेण प्रकृते आत्मनेपदप्राप्त्यभावात् प्रकृतसूत्रावश्यकताऽस्त्येवेति। **णिग इति किमिति**– द्वितीयणिग्ग्रहणादेव णिगन्तादात्मनेपदमनेन विधीयत इति प्रतीतेः पुनर्णिग इति व्यर्थम्, अणिगि कर्म णिगि कर्त्ता यस्येत्युक्तौ णिगन्तस्यैव तादृशस्य संभव इत्यभिसन्धिः। तत्र प्रत्युदाहरणेनोत्तरमाह– **आरोहन्ति हस्तिनं हस्तिपकाः** इत्यादिना, अयमाशयः– णिग इत्यनुक्तौ अणिक्कर्मणिक्कर्तृकपदेन मूलभूतो धातुरेव ग्रहीष्यतेऽन्यस्यानुपस्थितेरिति यस्य धातोरणिगवस्थाकर्म णिगवस्थायां कर्ता स्यात् तस्मादणिगन्ताण्णिगन्ताद् वा आत्मनेपदं भवतीति सूत्रार्थे सति यथा णिगन्तादात्मनेपदं भवति तथाऽणिगन्तादपि प्रथमावस्थायामेवात्मनेपदं स्यादिति, तदेवाह– **अणिगवस्थायां मा भूदिति**– प्रकृते एकधातोरित्यनुक्तावपि प्रत्यासत्तिन्यायादेकधातोरेवाणिगवस्था-णिगवस्थे गृह्येते इत्याह– **प्रत्यासत्तेश्च यस्यैव धातोरणिगवस्था तस्यैव धातोर्णिगवस्था गृह्यते, न धात्वन्तरस्येति**– प्रत्यासत्तिः सामीप्यम्, तच्चोपस्थित परित्यज्यानुपस्थितकल्पने मानाभावमूलकं समीपस्थसम्बन्ध्युपस्थापकम्, अणिगवस्थया सम्बन्धो यस्य गृहीतस्तस्यैव णिगवस्थासम्बन्धोऽपि ग्राह्य इति भावः। तत्फलमाह– **तेनेह न भवति– आरुह्यमाणो हस्ती सेचयति पृष्ठं सूत्रेण**ति– अत्रारुह्यमाणो हस्तीत्यणिगवस्था, तत्र कर्मणो हस्तिन एव सेचने प्रयोजककर्तृत्वमित्यणिगि कर्मणो णिगि कर्तृत्वमस्ति किन्तु भिन्नधातुसम्बन्धीति न भवत्यात्मनेपदम्, मूत्रं पृष्ठं सिञ्चति, तमारुह्यमाणो हस्ती प्रेरयतीत्यर्थविवक्षायां न रुहेर्णिगवस्थया सम्बन्धो नवा सिञ्चतेरणिगवस्थयेति यस्यैव धातोरणिगवस्था तस्यैव णिगवस्था नास्ति, प्रकृतन्याय [ प्रत्यासत्तिन्याय ] समाश्रयणाभावे च तद् दुर्वारम्। किञ्चैकस्यापि धातोः कारकभेदाद् भिन्नत्वमिति भिन्नकारकस्थले न तस्यैकत्वमिति तत्रापि न भवत्यात्मनेपदमित्याह– **हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति मनुष्यान्** इत्यादिना, हस्तिपका हस्तिनमारोहन्ति तैरारुह्यमाणो हस्ती मनुष्यान् स्थलमारोहयतीत्यण्यन्तावस्थाकर्मणो हस्तिनो ण्यन्तावस्थायां कर्तृत्वे सत्यपि प्रकृतेः रुहेः कर्तृकर्मादिभेदेन भिन्नत्वान्नैकत्वम्। स्थलमिति च गजपृष्ठस्थितं काष्ठादिनिर्मितमुपवेशनस्थानमुच्यते, तथा च हस्ती स्थलं न्यग्भावयन् मनुष्यानारोहयतीति स्थलस्यापि कर्मतयाऽत्र द्विकर्मकत्वं रुहेः, पूर्वत्र चैककर्मकत्वमेवेति साधनभेदेन साध्यायाः क्रियाया भिन्नत्वात् तद्वाचकस्य धातोरपि भेदः स्पष्ट एव। तदाह– **सदृशधातुप्रयोगेऽपि पूर्वो हस्तिपककर्तृको रुहिः परश्च मनुष्यकर्तृक इति साधनभेदात् क्रियाभेदे धातुभेदः** इति, अयमाशयः– पूर्वत्र रुहेः कर्त्ता हस्तिपकः, परत्र चाण्यन्तावस्थायामेव मनुष्याणां कर्तृत्वम्, मनुष्याः स्थलं हस्तिनं चारोहन्ति, तान् हस्तिपकैरारुह्यमाणो हस्ती प्रेरयतीति विवक्षायां साधनभेदस्य स्पष्टत्वमिति तत्प्रयुक्तः परम्परया धातुभेदोऽपि। धातोः सादृश्यं च समानानुपूर्वीकत्वमात्रेण न तु साध्यसाधनादिसर्वांशेनेति भेदो भवत्येव। पदकृत्यं पृच्छति– **अस्मृताविति किमिति**– अस्मृतावित्यनेन किं व्यावर्त्यमिति पृच्छा। व्यावर्त्यमाह–**स्मरति वनगुल्ममित्यादिना**, तथा च प्रकृते आत्मनेपदाप्रवृत्तयेऽस्मृतावित्यावश्यकमिति भावः।

क्वचित् सर्वोपाधिसत्त्वेऽप्यात्मनेपदं न दृश्यते तत् कथमित्याशङ्कते– **कथं हन्त्यात्मानं, घातयत्यात्मेति**– अत्राणिगवस्थायां कर्मण आत्मनो णिगवस्थायां कर्तृत्वमिति भवति प्रकृतसूत्रप्राप्तिरिति शङ्कयितुरभिप्रायः। तमेव प्रकटयति– **अत्र ह्यात्मनोऽणिक्कर्मणो णिक्कर्त्तृत्वमिति**। प्रतिवक्ति– **नैवमिति**– यथा त्वमिमं प्रयोगं प्रत्युदाहरसि तथा नायमिति भावः। वास्तविकं प्रयोगस्वरूपं प्रकटयति– **द्वावात्मानौ शरीरात्माऽन्तरात्मा चेति**– शरीरेऽपि 'अहं स्थूलोऽहं कृशः' इत्यस्मच्छब्दप्रयोगाल्लौकिकदृष्ट्या शरीरस्याप्यात्मत्वम्; अन्तरात्मा च शरीरप्रेरकश्चैतन्यविशेषः, स च न हननकर्मतामर्हति निरवयवत्वान्नित्यत्वाद्धन्तुरभावाच्च; किन्तु शरीरात्मैव कर्म, अन्तरात्मा च कर्तेति हन्त्यात्मानमात्मेति पूर्णः प्रयोगः; घातयत्यात्मे-

"Aho Shrutgyanam"

त्यत्र,प्यात्मानमिति कर्म संबध्यत एव, तथा च य एवात्माऽणिगवस्थायां कर्म स एव णिगवस्थायामपीत्यणिक्कर्मणो णिगि कर्तृत्वं नास्तीति न भवति प्रकृतसूत्रप्राप्तिविषयता । तदेव स्पष्टयति– **तत्र भेदेनैव लोके नित्यमयं प्रयोगः** इति– शरीरात्माऽन्तरात्मनोर्भेदमास्थायैव हन्त्यात्मानमात्मा, घातयत्यात्मानमात्मेति प्रयोग इति भावः । तथा च फलितमाह– **हन्त्यात्मानमिति शरीरात्मनोऽन्तरात्मनो वा कर्मत्वम्, घातयत्यात्मानमिति तस्यैव कर्मत्वं न कर्तृत्वमिति**– इति । यद्यपि हन्त्यात्मानमात्मेति वाक्ये शरीरात्मन एव कर्मत्वमुचितं तस्यैव हन्त्यर्थकर्मत्वसम्भवादिति 'अन्तरात्मनो वा कर्मत्वम्' इति पक्षान्तरोपन्यासो न युक्तस्तथापि विवक्षावशात् कस्यचिन्मते शरीरात्मन एव स्वातन्त्र्यमिति संभवत्पक्षमादायानास्थया पक्षान्तरोपन्यास इति ध्येयम् । घातयत्यात्मानमित्युक्त्या च प्रत्युदाहरणत्वेन प्रदर्शिते 'घातयत्यात्मा' इति वाक्ये त्वया कर्मोपन्यासो न कृतः किन्तु तत्र तदुपन्यास आवश्यक इति सूचयति, अन्यथा कर्मान्तरसम्बन्धे आत्मनः कर्मत्वं न स्यात्, आत्मशब्देन स्वस्यैव कर्मत्वं बलादाक्षिप्यते, परं प्रति आत्मशब्दोपन्यासासंभवात् । अस्यां च स्थितौ य एवात्मा पूर्ववाक्ये–[हन्त्यात्मानमिति वाक्ये ]–कर्मतयोपात्तः स एव परत्रापि [ घातयत्यात्मानमात्मेति वाक्येऽपि] कर्मेति तस्य कर्तृत्वं नास्तीति नैतत्सूत्रप्रवृत्तिरिति पर्यवासितोऽर्थः । क्वचिदणिगि कर्मभिन्नकारकस्यापि णिगि कर्तृत्वे आत्मनेपदं दृश्यते तत्र कथमस्य सूत्रस्य प्रवृत्तिरणिगि कर्मण एव कर्तृतायां सूत्रप्रवृत्तेरुक्तत्वादिति शङ्कते– **ननु यदि अणिक्कर्मणो णिक्कर्तृतायामात्मनेपदमिष्यते तर्हि– 'शुष्यन्त्यातपे व्रीहयः, शोषयते व्रीहीनातपः' इत्यादावधिकरणादेः कर्तृतायामात्मनेपदं न प्राप्नोती**ति– अणिगि कर्मण एव णिगि कर्तृतायामात्मनेपदमिष्टमित्यस्यार्थस्य पूर्वं निर्णीतत्वेऽपि यदीत्युक्तिः शङ्कितुः सिद्धान्तिनमहमनया शङ्कया स्वसिद्धान्तात् प्रच्यावयिष्यामीत्यभिमानेन; अधिकरणादेरित्यादिपदं प्रकृते आतपस्य करणत्वविवक्षाया अपि संभवेन तत्संग्रहाय प्रयोगान्तरे करणादेरपि कर्तृत्वविवक्षायाः संग्रहाय वा । उत्तरयति– **फलवत्कर्तरि भविष्यती**ति– णिगो गित्त्वेन तदन्तात् "ईगितः" [ ३. ३. ९५. ] इत्यनेनेहात्मनेपदं न तु प्रकृतसूत्रेणेति भावः । नन्वातपस्य कर्तुरचेतनस्य केन फलेन सम्बन्धः सम्भवतीति चेत्– कृषीवलादिकृतं शोषणसामर्थ्याधिक्यादिमूलकं प्रशंसादिकमेव तस्य फलमित्यवेहि । उक्तयुक्त्या [ कर्तुः फलवत्त्वविवक्षया ] आरोहयते हस्ती हस्तिपकानित्यादिप्रकृतसूत्रोदाहरणेऽप्यात्मनेपदस्य सिद्धत्वेन प्रकृतसूत्रवैयर्थ्यं शङ्कते– **यद्येवमि**त्यादिना, एवं फलवत्कर्तरि आत्मनेपदस्यान्यथा सिद्धत्वे सतीह 'आरोहयते हस्ती' इत्यादावपि तथैवास्तु किमनेनेति तदर्थः । आक्षेपं स्वीकुर्वन् समादधाति– **सत्यम्– किन्तु फलवतः कर्मस्थक्रियाच्चान्यत्रायं विधिरि**ति, अयमाशयः– अप्राप्ते हि शास्त्रमर्थवद् भवतीति यत्रान्येन सूत्रेणात्मनेपदं प्राप्तमेव [ सिद्धमेव ] तत्र नास्य विधेरावश्यकतेति सत्यम्, किन्तु यत्र न प्राप्तमात्मनेपदं तदर्थत्वमस्य स्वीक्रियताम्, फलवति कर्तरि "ईगितः" [ ३. ३. ९५. ] इत्यनेन, कर्मस्थक्रिये च "एकधातौ कर्मक्रिययैकाकर्मक्रिये" [ ३. ४. ४६. ] इत्यनेन चात्मनेपदं सिद्धमिति तद्विषयादन्यत्र प्रकृतसूत्रेणात्मनेपदं विधेयमित्यफलवत्कर्तरि कर्तृस्थक्रिये च प्रकृतसूत्रप्रवृत्तिरिति । कर्मस्थक्रियेषु तर्हि केनात्मनेपदमिति चेत् ? तदेवोपपादयति– **तथाही**त्यादिना, **लावयते केदारः स्वयमेवे**ति– लुनाति केदारं चैत्र इति प्रथमावस्था, तत्र चैत्रस्य कर्तृत्वेऽविवक्षिते सौकर्यातिशये द्योत्ये केदारस्यैव कर्तृत्वे– लूयते केदारः स्वयमेवेति द्वितीयावस्था, पुनश्चैत्रप्रेरणाविवक्षायां– स्वतो लूयमानं केदारं चैत्रः प्रेरयतीत्यर्थे लावयति केदारं चैत्र इति तृतीयावस्था, तस्या च प्रथमावस्थया सहार्थे साम्यम्, ततश्चैत्रस्य प्रयोजकत्वाविवक्षायां केदारस्यैव प्रयोजकत्वे लावयते केदारः स्वयमेवेति चतुर्थ्यवस्था, अस्याश्च द्वितीयावस्थया सहार्थे साम्यम्, अत्र च लवनक्रियायाः कर्मस्थत्वेन कर्मस्थक्रियत्वात् "एकधातौ०" [ ३ ४. ४६. ] इत्यनेनैवात्मनेपदम्, अस्य सूत्रस्य तु प्राप्तिरेव नास्ति, अणिक्कर्मणः कर्तृत्वाभावात्, अणिगवस्था द्वितीयावस्था लूयते केदारः स्वयमेवेति, तत्र कर्मणोऽभावात् । एवं– **भूषयते कन्या** इत्यत्रापि अवस्थाचतुष्टय योजनीयम्– भूषयति कन्यां चैत्रः, भूषयते कन्या स्वयमेवेति द्वयमणिगवस्थायां स्वार्थिकणिचि, ततः प्रेरणायां णिगि– भूषयति कन्यां चैत्र इति, पुनः चैत्रस्य प्रयोजकत्वं कन्यायामारोप्य भूषयते कन्या स्वयमेवेति, अत्रापि कर्मस्थक्रियत्वेन कर्मणः कर्तृत्वविवक्षयाऽणिक्कर्मणः कर्तृत्वं च नास्त्येवेति न प्रकृतसूत्रप्राप्तिः । एव– कारयते कट इत्यादावपि योजनीयम् । यदि त्ववस्थात्रयमेव अध्यारोपितप्रेक्षणपक्षमाश्रित्य व्याख्यायते तदाऽणिक्कर्मणो णिगि कर्तृत्वमस्तीति प्रकृतसूत्रस्य प्राप्तिरस्ति परं कर्मस्थक्रियत्वेन परत्वात् "एकधातौ०" [ ३. ४. ४६. ] इत्येव प्रवर्त्तते, तथाहि– लुनाति केदारं चैत्र इति प्रथमावस्था, लावयति केदारं चैत्रेण मैत्र इति द्वितीयावस्था, ततः कर्मण एव प्रयोजककर्तृत्वविवक्षायां लावयते केदारः स्वयमेवेत्यणिक्कर्मणः

"Aho Shrutgyanam"

केदारस्य कर्तृत्वमस्तीति प्रकृतसूत्रप्राप्तावपि कर्मस्थक्रियत्वेन [ कर्मणः केदारस्य लवनसम्बन्धात् ] "एकधातौ" [ ३. ४. ४६. ] इत्यस्यापि प्राप्तौ स्पर्धसद्भावात् परत्वात् तेनैवात्मनेपदमिति। कक्षात्रयपक्षे च अणिगवस्थायामपि कर्मणः क्रियाजन्यफलाश्रयतासिद्ध्यर्थं कर्तृकृता प्रेरणा धात्वर्थान्तर्भूता, ततः प्रयोजकव्यापारविवक्षायां भूयोऽपि निवर्त्तना [ निवृत्तिकृते प्रेरणा ] तत उभयोरपि प्रेरयोयोस्त्यागे केवलं निर्वर्त्तनं [ क्रियासम्पत्तिः ] प्रतीयते, एतच्चाग्रे स्फुटीकरिष्यते। नन्वारोहयते हस्ती स्वयमेवेत्यस्यामवस्थायां [ या च शाब्दिकी चतुर्थ्यवस्था प्रायोगिकी च पञ्चमावस्था भवति, एतदप्यग्रे स्फुटीभविष्यति] हस्तिनः कर्तुरेव न्यग्भवनं प्रतीयत इति कथमत्र रुहेः प्रयोजकव्यापारार्थकस्य णिगः प्रवृत्तिः प्रयोजकत्वस्य निमित्तस्य निवृत्तत्वात् * निमित्तापाये नैमित्तिकस्याप्यपायः * इति न्यायादिति चेन्न- प्रयोजकत्वस्य वस्तुतोऽनिवृत्तेः, सौकर्यातिशयद्योतनार्थमेव हि प्रयोजकान्तरव्यापारो न विवक्ष्यते, कर्मण्येव स्वप्रयोजकत्वारोपः क्रियते, तावता वस्तुसतः प्रयोजकत्वस्य निवृत्त्ययोगात्। अत्र च "णि-स्नु-श्र्यात्मनेपदाकर्मकात्" [ ३. ४. ९२. ] इति सूत्रेण ण्यन्तेभ्यः कर्मकर्त्तरि ञिचः "भूषार्थ०" [ ३. ४. ९३. ] इत्यादिना च तेभ्य एव तत्रैव ञिक्ययोश्च निषेधविधानमपि प्रमाणम्, अन्यथा कर्मकर्त्तरि प्रयोजकत्वनिवृत्तौ णिगोऽपि निवृत्तिः स्यादिति कर्मकर्त्तरि णिगन्ताञ्ञिक्ययोः प्राप्तिरेव नास्तीति तन्निषेधविधानमनर्थकमेव स्यात्। **कैयटेन** तु सर्वत्र निमित्तापाये नैमित्तिकस्यापाय इति नियमो नास्तीत्येवंरीत्या णिगोऽनिवृत्तिः साधिता, तथाहि तद्ग्रन्थः- न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो [स्वमते णिगो] निवृत्तिः, उपायनिवृत्तावप्युपेयानिवर्तनात्। सिद्धशब्दव्युत्पादनाय हि प्रकृतिप्रत्ययविभागकल्पना आश्रीयते, अर्थस्योपादानं त्यागश्च क्रियते, लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयते केदार इति प्रयुज्यते इति"। अनेन उपायनिवृत्तावुपेयनिवृत्तिरिति स्वीकृत्यापि उपायस्य प्रयोजकत्वस्येह वस्तुतो न निवृत्तिरपि तु सिद्धशब्दव्युत्पादनाय निवृत्त्यारोपमात्रमिति न तेन णिगो निवृत्तिः शङ्कनीयेति प्रतिपादितं भवति।

पूर्वमारोहयते हस्ती हस्तिपकानिति प्रकृतसूत्रोदाहरणत्वेनोपन्यस्तम्, साम्प्रतं च रुहेः कर्मस्थक्रियैः लुनात्यादिभिः समम्- आरोहयते हस्ती स्वयमेवेत्यत्र "एकधातौ०" [ ३. ४. ४६. ] इति सूत्रेणैवात्मनेपदमित्युक्तम्, तत्र पूर्वापरविरोध इव प्रतिभातीति मत्वा पृच्छति- **नन्वारोहयते हस्ती स्वयमेवेत्यस्यास्कन्दयते इति किलार्थः, तत् कथं कर्मस्थक्रियता रुहेरिति**- 'आस्कन्दयते' इत्यस्य स्वयं तानुपर्यागमयतीत्यर्थः, तथा च रुहेर्गत्यर्थकता प्रतीयते, गत्यर्थानां च प्राप्यकर्मकत्वमिति तत्र कर्मणि क्रियाकृतविशेषादर्शनात् कथं कर्मस्थक्रियत्वमुच्यते। किञ्च, कर्मस्थक्रियत्वे कथं द्वितीयकक्षायाम्- आरोहयते हस्ती हस्तपकानिति पूर्वमुदाहृतमिति कर्मस्थक्रियत्वे तदसंगतिः कर्तृस्थक्रियत्वे चानुपदोक्तग्रन्थासङ्गतिश्चेत्युभयतः पाशा-रज्जुरिति शङ्कार्थः। शङ्कामङ्गीकृत्येव पूर्वापरग्रन्थसाङ्गत्यप्रकटनायाह- **उच्यते- यदा न्यग्भावनार्थोऽर्थो यं तदा कर्मस्थक्रियत्वमिति**, अयमाशयः- धातूनामनेकेऽर्थाः, तत्र रुहेर्गत्यर्थतामाश्रित्य पूर्वं द्वितीयकक्षायामारोहयते हस्ती हस्तिपकानित्युदाहृतम्, यदा तु तस्य [रुहेः] अर्थान्तरे न्यग्भावने वृत्तिस्तदान्यग्भवन-न्यग्भावनयोर्गात्रसंकोचादिरूपत्वेन कर्मणि क्रियाकृतविशेषस्य दर्शनात् कर्मस्थक्रियत्वमेव तस्येति।

प्रकृतमर्थं वक्ष्यमाण **हरि**कारिकारीत्या साधयितुं तामेवकारिकां व्याख्यास्यन्नाह-तथाहि-**आरोहन्ति हस्तिनं हस्तिपका इति न्यग्भवनोपसर्जने न्यग्भावने रुहिर्वर्त्तते** इति- न्यग्भवनं-नीचैरात्मगात्रसंकोचनं, तदुपसर्जनम्- अङ्गतया भासमानं यत्र तादृशे न्यग्भावने रुहिरिहास्तीति भावः। सर्वत्र सकर्मकक्रियाया द्विष्ठत्वं- कर्तृस्थत्वं कर्मस्थत्वं च, फलांशस्याश्रयः कर्म, व्यापारांशस्याश्रयः कर्ता, तत्र न्यग्भवनरूपं फलं न्यग्भावना च व्यापारः, न्यग्भवनं च कर्मसमवेतमिति कर्मस्थक्रियत्वमिति क्वचिन्यग्भवनमात्रवृत्तित्वमित्याह- **स द्वितीयस्यामवस्थायाम्- आरुह्यते हस्ती स्वयमेव इत्यस्यां कर्मकर्तृविषयो न्यग्भवनमात्रवृत्तिर्भवती**ति। इत्थं शुद्धस्य रुहेरर्थद्वयपरत्वं व्याख्याय ण्यन्तस्थलेऽपि तथाप्रतीतिमाह- **अथ चतुर्थ्या**मिति- प्रायोगिकी चतुर्थ्यवस्था तृतीयायास्तत्रैवान्तर्भूतत्वस्वीकारात्, शाब्दिकी तु तृतीयैवेयमवस्था, अत एवाह- **अन्तर्भूततृतीयायामिति**- ण्यन्तेऽपि न्यग्भावनान्यग्भवनयोः प्रतीतेः शब्दशक्तिस्वभावसिद्धत्वेन यदा न्यग्भवनमन्तर्भाव्य [ उपसर्जनीकृत्य ] न्यग्भावनं विवक्ष्यते तदासौ चतुर्थ्यवस्था। तत्रत्यं विग्रहवाक्यमाह- **आरुह्यमाणं प्रयुङ्क्ते** इति- हस्तिपका इति शेषः, अत्र चावस्थायां हस्तिपकव्यापारस्य प्राधान्यं विवक्षितमिति 'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यत्र योऽर्थः स एवेहापि। यद्यपि 'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यवस्थायामपि न्यग्भवनोपसर्जनं न्यग्भावनं प्रतीयते, इह च प्रयोजकव्यापारवाचिणिक्सन्नियोगेनापरापि प्रेरणा प्रतीयेतेति प्रथमयाऽवस्थया सहास्याभेद इति शङ्कितुं

"Aho Shrutgyanam"

शक्यते, तथापि शुद्धस्य कर्मकर्तृस्थले धात्वर्थान्तर्भूतप्रेरणायास्त्याग इति त्यक्तप्रेरणांशादेव शुद्धाण्णिगिति नार्थाधिक्यं शुद्धधातोः प्रथमावस्थात इति हृदयम्। तदेतन्मनसिकृत्याह– **शुद्धारोहतिवन्न्यग्भवनोपसर्जने न्यग्भावने वर्त्तते** इति। अथ शाब्दिकीं चतुर्थीं प्रायोगिकीं च पञ्चमीमवस्थामाह– **पुनर्यदा अस्यैव प्रयोजकव्यापाराविवक्षा तदा 'आरोहयते हस्ती स्वयमेव' इत्यस्यां पञ्चम्यामवस्थायाम् 'आरुह्यते हस्ती स्वयमेव इतिवन्न्यग्भवनलक्षणस्य विशेषस्य हस्तिसमवेतत्वेनोपलम्भात् 'लावयते केदारः' [स्वयमेवेति] इत्यादाविव कर्मस्थक्रियत्वमस्त्येवेति न किञ्चिदनुपपन्नमिति।** अयमर्थः– धात्वर्थान्तर्भूतप्रेरणांशरहितरुहेर्ण्यन्तस्य न्यग्भावना न्यग्भवनोपसर्जना प्रतिपाद्या, तस्यैव यदि णिगर्थप्रयोजकव्यापारो न विवक्षितस्तदा शुद्धरोहतेर्निवृत्तप्रेरणस्य योऽर्थः 'आरुह्यते हस्ती स्वयमेव' इत्यत्र प्रतीयते स एव प्रतीयेत, विशेषभूतस्य प्रत्ययार्थस्याविवक्षया द्वितीयावस्थाऽर्थमात्रे विश्रामात्। तथा च यथा द्वितीयस्यामवस्थायां केवलं न्यग्भवनं प्रतीयते तथाऽस्यामपि चतुर्थ्यां शाब्दिक्यां पञ्चम्यां च प्रायोगिक्यामवस्थायां प्रतीयत इति तत्रापि न्यग्भवनमात्रमर्थः। न्यग्भवनरूपश्च विशेषो हस्तिनि समवेतः, स च यद्यपि प्रकृते कर्ता न तु कर्म तथाऽपि तत्र कर्तृत्वमारोपितमात्रं न तु वास्तविकं, वास्तविकं तु तत्र कर्मत्वमेवेति भवति तस्य [रुहेः] कर्मस्थक्रियत्वमिति मया यत् प्राग् 'लावयते केदारः स्वयमेव' इतिवत् 'आरोहयते हस्ती स्वयमेव' इत्युक्तं तन्नायुक्तं, किन्तु प्रकृतप्रदर्शितरीत्या सूपपन्नमेवेति। उक्तमर्थं **हरि**कारिकया समर्थयति– **तदुक्तं– "न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते"** इत्यादिना, **शुद्धे रुहौ– 'आरोहन्ति हस्तिनं हस्तिपकाः'** इत्यत्र न्यग्भावना, "आरुह्यते हस्ती स्वयमेव' इत्यत्र न्यग्भवनं प्रतीयते, तस्यैव [निवृत्तप्रेरणस्य] ण्यन्ते कृतेऽपि 'आरोहयन्ति हस्तिनम्' इत्यत्र न्यग्भावना, आरोहयते हस्ती स्वयमेव' इत्यत्र न्यग्भवनं प्रतीयते।' कर्मकर्तरि तां निवृत्तप्रयोजकव्यापारामवस्थां पञ्चमीं प्रयोगावस्थां [न तु शाब्दिकीं, शब्दप्रक्रियया तस्याश्चतुर्थीत्वस्यैव सत्त्वात्] प्राहुः। अयं हि प्रयोगक्रमः शुद्धे पूर्वं न्यग्भवनोपसर्जना न्यग्भावना, ततः केवलं न्यग्भवनम्, ण्यन्तेऽत्र न्यग्भवनोपसर्जनं न्यग्भावनप्रेरणम् न्यग्भवनप्रेरणं, केवलं न्यग्भवनमिति, पञ्चावस्थाः। तत्र शुद्धयोः स्पष्टत्वमेव, ण्यन्तानां च धात्वर्थस्य न्यग्भवनोपसर्जनन्यग्भावनस्य स्वाभाविकी प्रतीतिः, ततो धात्वर्थप्रेरणांशस्य त्यागे न्यग्भवनप्रेरणप्रतीतिः, णिगर्थप्रेरणांशस्य त्यागे च केवलन्यग्भवनप्रतीतिरिति कर्मकर्त्तरि अवस्थाद्वयमिति। तदेवाह– **"निवृत्तप्रेरणाद् धातोः प्राकृतेऽर्थे णिगुच्यते"** इति– निवृत्तप्रेरणात्– प्रेरणाद्वय[धात्वर्थप्रेरणा ण्यर्थप्रेरणा च] रहिताद् धातोः, प्राकृते– न्यग्भवनरूपेऽर्थे णिगुच्यते इत्यर्थः, अत्र णिजुच्यते इत्येव **वाक्यपदीय** पाठः, स्वमतसाधकत्वेनोपन्यासात् 'णिगुच्यते' इति पाठकल्पनम्, वाक्यपदीयपाठस्य तादृशत्वे च प्रकृतस्थलीयलघुन्यासग्रन्थोऽपि प्रमाणम्, किञ्च तद्रीत्या बृहद्वृत्तावपि 'णिजुच्यते' इत्येव पाठ आसीदिति प्रतिभाति। तथाहि– तत्र 'णिजुच्यते' इति प्रतीकमुपादायणिजिति मतान्तरेण स्वमते तु णिगेव इत्युक्तम्।

**अन्ये** तु रुहिं कर्तृस्थक्रियं मन्यन्ते, तथाहि– रुहिर्गत्यर्थः, उपसर्गवशादेव तस्यात्रोपरिगमनरूपमारोहणं प्रतीयते, तथा च यथा गच्छति ग्रामः स्वयमेवेति नहि गतागतग्रामे आरूढानारूढे वा हस्तिनि क्रियाकृतविशेषो दृश्यते, यत्र कर्मणि क्रियाकृतविशेषादर्शनं तत्र क्रियायाः कर्तृस्थत्वमेव न कर्मस्थत्वमित्येव प्राचीनानां सिद्धान्तः, तथापि 'न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते" इत्यादिपूर्वप्रदर्शित**हरि**कारिकारीत्या प्रकृते रुहेस्तदर्थत्वमेव न गत्यर्थत्वं धातूनामनेकार्थत्वादिति मत्वाऽस्य कर्मस्थक्रियता व्याख्याता प्राचीनास्तु न्यग्भावना-न्यग्भवनयोरत्र प्रतीतावपि तदर्थस्य प्रयोगोपाधिकत्वमेव, न तु धात्वर्थत्वमिति न तदर्थमादाय रुहेः कर्मस्थक्रियता युक्तेति मन्यन्ते। तन्नास्माकमभिमतम्– शब्दात् प्रतीयमानस्यैवार्थस्य तदर्थत्वस्यौचित्यादिति कर्मस्थक्रियत्वमस्य साधूपपन्नम्।

अत्रायं विवेकः– 'आरोहयते हस्ती' 'दर्शयते राजा' इत्यादि कर्मपदरहितमेवोदाहरणम्, 'स्मरयति वनगुल्मः' इति कर्मपदरहितमेव प्रत्युदाहरणं, प्रकृतसूत्रसमानविषये "णेरणौ यत् कर्म स चेत् कर्ताऽनाध्याने" [पा० सू० १. ३. ६७.] इति सूत्रे भाष्ये दृश्यते, तदुपपत्तये उदाहरण– प्रत्युदाहरणयोः कक्षात्रयं कक्षाचतुष्टयं च– अध्यारोपितप्रेषणपक्षे अविवक्षितप्रेषणपक्षे च क्रमशः प्रदर्शितं **दीक्षितादिभिः**। स्वमते चोदाहरण-प्रत्युदाहरणयोः कक्षाद्वयमेव, आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयते हस्ती हस्तिपकानिति रीत्योदाहरणे; 'स्मरति वनगुल्मं कोकिलः, स्मरयत्येनं वनगुल्म इति– प्रत्युदाहरणे च तथैवदर्शनात्। कक्षात्रयकक्षाचतुष्टयप्रदर्शनमूलं च तेषां प्रकृतसूत्रे **अणौ** यत् कर्मेति पदस्यावृत्त्या कर्मपदस्य क्रियापरत्वेन, **अणौ**–अण्यन्तावस्थायां यत् कर्म, या क्रिया सैव चेण्ण्यन्ते नोच्येतेत्यर्थकरणम्, तादृशार्थकरणावश्यकता हस्तिपकैरारुह्यमाणो हस्ती स्थल-

"Aho Shrutgyanam"

मारोहति मनुष्यानित्यादावतिव्याप्तिवारणार्थमेव स्वीकृता। स्वमते च तत्र क्रियाभेदे धातुभेदमास्थाय यस्यैव धातोरित्यादिग्रन्थेन प्रदर्शितरीत्याऽतिव्याप्तिर्वारितेति न तादृशव्याख्यानावश्यकतेति कक्षाद्वयेनैव निर्वाह इत्यलमन्यप्रक्रियागवेषणेनेति संक्षेपः ।। ३ ३. ८८. ।।

## प्रलम्भे गृधि-वञ्चेः ।। ३. ३. ८९ ।।

**त० प्र०– गृधि-वञ्चिभ्यां णिगन्ताभ्यां प्रलम्भे– वञ्चने वर्तमानाभ्यां कर्तर्यात्मनेपदं भवति। बटुं गर्धयते, बटुं वञ्चयते, विप्रतारयतीत्यर्थः। प्रलम्भ इति किम्? श्वानं गर्धयति, प्रलोभयतीत्यर्थः, अहिं वञ्चयति, गमयतीत्यर्थः। णिग आत्मनेपदविधानं सर्वत्राफलवदर्थम् ।। ८९ ।।**

**श० म० न्यासानुसन्धानम्– प्रलम्भे०।** प्रलम्भनं प्रलम्भोऽतथात्वेन किञ्चिदुपन्यस्य प्रलोभनं प्रतारणं वा। णिग इति प्रकृतम्, तच्चोभयोर्विशेषणमिति तदन्तविधिना प्रत्ययग्रहणमूलकेन वा तेन णिगन्ताभ्यामाभ्यां कर्तर्यात्मनेपदमित्यर्थः सम्पद्यते, तदाह– **गृधि वञ्चिभ्यामि**त्यादिना, गृधिरभिकाङ्क्षार्थो दिवादिपठितः, वञ्चिः प्रलम्भनार्थश्चुरादिपठितः, तस्मात् णिजन्तात् फलवति कर्त्तरि सिद्धेऽप्यात्मनेपदे णिगन्तादफलवत्यपि कर्तरि तद्विधानार्थं वचनम्, णिगन्तादेव प्रतारणार्थप्रतीतेश्च। उदाहरति– **बटुं गर्धयते** इत्यादिना, **बटुर्गृध्यति, चैत्रो** बटुं वञ्चयति, गृध्यन्तं वञ्चयन्तं च प्रयुङ्क्ते इत्यर्थे णिगि अफलवत्यपि कर्त्तर्यनेनात्मनेपद भवति। प्रयोगार्थमाह– **विप्रतारयतीत्यर्थः** विप्रतारणं हि किञ्चिद् वस्तु दीयमानत्वेन प्रदर्श्याऽप्रदानम्, अन्यथाभूतस्य वस्तुनो वा प्रकारान्तरेण प्रतिपादनम्। अनयोः शब्दशक्तिस्वभावादेव वञ्चने [प्रतारणे] एव प्रयोग इति विनापि, प्रलम्भे' इति पदं तदर्थ एव भविष्यत्यात्मनेपदमिति 'प्रलम्भे' इत्यनावश्यकमित्याह– **प्रलम्भ इति किमिति**, प्रत्युदाहरति– **श्वानं गर्धयतीति**– किमपि भोज्यं वस्तु प्रदर्श्याभिकाङ्क्षामस्योत्पादयतीत्यर्थः, अत्र प्रदर्श्यमानेन वस्तुना न तस्य प्रतारणमपि तु तद्ग्रहणार्थमेव रुच्युत्पादनमिति प्रतारणाभावान्न भवत्यात्मनेपदं फलवत्यपि कर्तरि। यद्यपि फलवति कर्तरि 'ईगितः" [३. ३. ९२.] इति प्राप्तमात्मनेपद तथापि त प्रबाध्य "अणिगि प्राणिकर्तृकानाप्याण्णिगः" [३. ३. १०७.] इति परस्मैपदमेव भवति, 'प्रलम्भे' इत्यस्याभावे च विशेषविहितत्वात् "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्।" इति न्यायमाश्रित्यानेन फलवत्यफलवति च कर्त्तर्यात्मनेपदमेव स्यात्। **अहिं वञ्चयतीति**– अत्र णिगन्तत्वेऽपि अफलवति कर्तरि न भवत्यात्मनेपदम्, अस्य च सकर्मकत्वात् "अणिगि प्राणि०" [३. ३. १०७.] इत्यस्याप्राप्तौ फलवति कर्त्तरि भवत्येवात्मनेपदम्। प्रलम्भार्थाभावप्रदर्शनायोभयत्र प्रयोगार्थमाह– **प्रलोभयति, गमयतीति**– पूर्वत्र गृधेरभिकाङ्क्षार्थस्य प्रलोभनार्थत्वेन सन्देहः, परं च प्रलम्भार्थस्य वञ्चेर्गमनार्थत्वं तु प्रयोगस्वाभाव्यात्। णिगन्तात् फलवति कर्त्तरि "ईगितः" [३. ३. ९५.] इत्यात्मनेपदस्य सिद्ध्या प्रकृतप्रकरणस्यानावश्यकत्वमाशङ्क्याह– **णिग आत्मनेपदविधानं सर्वत्राफलवदर्थमि**ति– णिगो गित्त्वेन तदन्तात् फलवति कर्तरि "ईगितः" [३. ३. ९५.] इत्यनेन सिद्धत्वेऽपि अफलवति तदसिद्ध्याऽनेनोभयत्रात्मनेपदं विधीयत इति भावः, नेदं प्रकृतसूत्रमात्रस्य फलप्रदर्शनमपि तु णिगन्तादात्मनेपदविधायकस्यास्य प्रकरणस्यैवेति बोधयितुं सर्वत्रेत्युक्तिः, णिगो यत्र यत्रात्मनेपदं विधीयते तत्र सर्वत्रेत्थमेव ज्ञेयमिति भावः ।। ३. ३ ८९. ।।

## लिङ्-लिनोऽर्चाऽभिभवे चाऽऽच्चाऽकर्तर्यपि ।। ३. ३. ९० ।।

**त० प्र०– लीयति-लिनातिभ्यां णिगन्ताभ्यामर्चाऽभिभवयोः प्रलम्भे चार्थे वर्तमानाकर्तर्यात्मनेपदं भवति, अनयोश्चान्तस्याकर्तर्यप्याकारो भवति। जटाभिरालापयते, परैरात्मानं पूजयतीत्यर्थः, श्येनो वर्तिकामपलापयते, अभिभवतीत्यर्थः; कस्त्वामुल्लापयते, वञ्चयते इत्यर्थः। एष्विति किम्? बालकमुल्लापयति, उत्क्षिपतीत्यर्थः। कथं तर्ह्यत्रात्त्वम्? "लीङ्-लिनोर्वा" [४. २. ९.] इति भविष्यति। अकर्तर्यपीति किम्? जटाभिरालाप्यते जटिलेन। ङिच्छ्नानिर्देशो यौजादिकनिवृत्त्यर्थः ।। ९० ।।**

**श० म० न्यासानुसन्धानम्– लीङ्०।** णिग इति प्रकृतम्, चकारः प्रलम्भार्थस्यात्मनेपदस्य च समुच्चयार्थः, प्रलम्भार्थस्य पूजाभिभवाभ्यामर्थाभ्यामात्मनेपदस्य च विधेयेनाकारेण सह समुच्चयः। तथा च सूत्रं व्याख्याति– **लीयति-लिनातिभ्यामि**त्यादि– लीयतिः "लीङ्च् श्लेषणे" इति दिवादिपठितः, 'लींश् श्लेषणे" इति क्र्यादिपठितश्च लिनातिः, अत्रार्चार्थो धातुवाच्य एव, अभिभव-प्रलम्भौ तु णिगन्त एव प्रतीयेते इति प्रयोगोपाधी, तदिदं स्पष्टयिष्यति प्रयोगार्थकथनावसरे, आत्मनेपदस्य कर्तर्येव विधानात् तत्सन्नियोगशिष्टमात्वमपि कर्त्तरि प्रत्यये सत्येव स्यात्, इष्यते तु कर्मणि प्रत्ययेऽपीति तत्सिद्धये– **अकर्त्तर्यपीति** आत्वविशेषणमुक्तम्। उदाहरति– **जटाभिरालापयते** इति– परे आलीयन्ते पूज्यत्वबुद्ध्या जटिति श्लिष्यन्ते तान्

"Aho Shrutgyanam"

जटाभिरालापयति भिक्षुरिति वाक्यप्रक्रिया, तत्र पूजार्थस्य सत्त्वाद् भवत्यनेनात्मनेपदम् । प्रयोगार्थमाह– **परैरात्मानं पूजयतीत्यर्थः** इति– अत्र पूजयतेरपि णिगन्तस्यैव प्रयोगः, अत एव पूजार्थस्य णिगन्तप्रकृतिवाच्यता प्रतीयते, अन्यथा परेभ्यः पूजामधिगच्छतीत्यर्थ इति व्याख्यायेत । यद्यप्यन्ये वैयाकरणास्तथैव व्याचक्षते, तेषां च मते नास्य धातोः पूजार्थत्वं, तथापि श्लेषस्य स्वस्मिन् पूज्यत्वबुद्ध्या सम्बन्धस्य धातुवाच्यत्वसंभवात् प्रयोगोपाधित्वस्वीकारो वृथैवेति स्वमते पूजाया धातुवाच्यत्वेनैव स्वीकारः । पूजार्थे उदाहृत्याभिभवार्थे उदाहरति– **श्येनो वर्त्तिकामपलापयते** इति– श्येनः क्षुद्रपक्षिहिंसकः पक्षिविशेषः वर्त्तिका च क्षुद्रशकुनिविशेषः, वर्त्तिका भयादपलीयते तां श्येनोऽपलापयते इति वाक्यप्रक्रिया, अत्राभिभवस्य आक्रमणस्य तिरस्कारस्य वा सत्त्वाद् भवत्यात्मनेपदम् । प्रयोगार्थमाह– **अभिभवतीत्यर्थः** इति– अभिभवं तदीयं पराभवं तिरस्कारं वा करोतीत्यर्थः । प्रलम्भार्थे आह– **कस्त्वामुल्लापयते** इति– कश्चित् परेणोपन्यस्तं स्वप्रवर्तकं कञ्चन विषयं कस्मैचित् कथयति, तदवगत्यासौ तमाह– कस्त्वामुल्लापयते इति, यदिदं त्वयोक्तं तेन विज्ञायते– कोऽपि त्वां वञ्चयति, कोऽसाविति कथय । अत्र त्वमुल्लीयसे, तं कश्चित् प्रेरयतीत्यर्थविवक्षा, अत्र प्रकृतेर्नासावर्थः किन्तु णिगन्त एवासौ [ प्रलम्भार्थः ] प्रतीयत इति स्वार्थणिजन्तेन वञ्चिना प्रयोगार्थमाह– **वञ्चयतीत्यर्थः**, तस्य वञ्चना स्वार्थमिति फलवत्त्वं बोधयितुमात्मनेपदप्रयोगो न तु णिगन्तस्य पूर्वसूत्रेणात्मनेपदं विधाय प्रयोगः । **अन्ये** तु वञ्चयतीत्यर्थ इत्येव व्याचक्षते; तत्र च वञ्चनायाः प्रयोजनं तदर्थमन्यार्थं वेति न निश्चितमिति तेषामाशयः प्रतिभाति । प्रायो णिगन्तयोरेतयोरेष्वेवार्थेषु प्रयोग इत्यर्थविशेषोपादानं व्यर्थमिति शङ्कते– **एष्विति किमिति**, प्रत्युदाहरति– **बालकमुल्लापयति** अत्रैभ्योऽर्थान्तरस्य विवक्षितत्वान्न भवत्यात्मनेपदम् । प्रयोगार्थमाह– **उत्क्षिपतीत्यर्थः** इति– तथा चार्थान्तरेऽपि णिगन्तयोरनयोः प्रयोग इति प्रकृतार्थेभ्योऽन्यत्रात्मनेपदवारणार्थमर्थविशेषोपादानमावश्यकमिति भावः । ननु यदि आत्मनेपदमर्थविशेषनिबन्धनं तर्ह्यात्त्वमपि तथैवेति तदर्थाभावात् कथमात्त्वं विहितमिति शङ्कते– **कथं तर्ह्यत्रात्त्वमिति** । उत्तरयति– **"लीङ्-लिनोर्वा" [ ४. २. ९. ] इति भविष्यतीति**, तथा च पक्षे– उल्लापयतीत्यपि प्रयोगः । **अकर्त्तर्यपीति किमिति**– आत्मनेपदसन्नियोगशिष्टस्य तस्य तेन सहैव प्रवृत्तिरुचितेति प्रश्नाशयः । नात्र तन्न्यायस्य प्रवृत्तिरपि तु वचनानुरोधेनास्यै-

तद्विहितात्मनेपदाभावे कर्मनिमित्तके आत्मनेपदेऽपि प्रवृत्तिरिष्टेत्याह– **जटाभिरालाप्यते जटिलेन** कर्मण्यात्मनेपदेऽनेनात्त्वं भवति, तदर्थमकर्तर्यपीत्यावश्यकमिति भावः । उभयोर्धात्वंशस्यैकरूप्यात् सहैव 'लियः' इत्येवंरूपेण निर्देशे लाघवमनादृत्य किमिति गौरवग्रस्तोऽनुबन्धेन विकरणेन च सह निर्देश इत्याशङ्कायामाह– **ङिच्छ्नानिर्देशो यौजादिकनिवृत्त्यर्थः** इति– पूर्वस्य ङित्त्वेन परस्य च श्नारूपविकरणेन निर्देशो यः कृतः स चुराद्यन्तर्गणयुजादिपठितस्य "लीण् द्रवीकरणे" इत्यस्येह ग्रहणं मा भूदित्यर्थमिति भावः, तस्य चात्त्वमपि नेष्टमात्वविधायकेऽपि "लीङ्-लिनोः०" [४. २. ९.] इति ङिच्छ्नानिर्देशात्, तथा च तस्य विलाययति, स्नेहद्रवेऽभिधेये विलीनयतीत्येव रूपं न तु 'विलापयते' इति **अन्ये** तु आत्मनेपदविधायके आत्त्वविधायके च ङिच्छ्नानिर्देशं न कुर्वन्ति, तेषामयमाशयः– णिगन्तादात्मनेपदं विधीयत इति णिगव्यवहितपूर्वस्यैवात्त्वमपि भवति, चौरादिकस्तु स्वार्थणिजन्तस्तस्मादेव प्रयोजकव्यापारे णिग् भवति, न तु केवलादिति तत्र णिगि णिचो लोपेऽपि स्थानिवद्भावेन तद्व्यवधानाल्लियो णिगन्तत्वं णिगव्यवहितपूर्वत्वं च नास्तीति न भवत्यात्मनेपदं नवाऽऽत्वमिति । परमेतादृशव्याख्यानापेक्षयाऽनुबन्ध-विकरणाभ्यां निर्देश एव लाघवमिति विचार्य स्वमते तथा निर्देशः कृत इति ॥ ३. ३. ९०. ॥

## स्मिङः प्रयोक्तुः स्वार्थे ॥ ३. ३. ९१ ॥

**बृ० प्र०– प्रयोक्तुः सकाशाद् यः स्वार्थः स्मयस्तत्र वर्तमानाण्णिगन्तात् स्मयतेः कर्तर्यात्मनेपदं भवति, अस्य चान्तस्याकारोऽकर्तर्यपि भवति । जटिलो विस्मापयते । प्रयोक्तुः स्वार्थे इति किम् ? करणात् स्वार्थे मा भूत–रूपेण विस्माययति । अकर्तर्यपीत्येव– विस्मापनम् । ङिन्निर्देशाद् यङ्लुपि न भवति–सेष्माययति ॥ ९१ ॥**

**श० म० न्यासानुसन्धानम्– स्मिङः०** । णिग इति प्रकृतम् । स्वार्थ इत्यत्र स्वपदमुपस्थितं धातुमेव परामृशति, तथा च प्रयोक्तुः– प्रयोजकात् कर्तुर्हेतुभूताद् यदि धात्वर्थस्य स्मयस्योत्पत्तिः स्यात् तदैवैतेनात्मनेपदमात्त्वं च भवति । 'आच्चाकर्त्तर्यपि' इति पूर्वसूत्रात् सम्बध्यत एवेत्याह– **अस्य चान्तस्याकारोऽकर्त्तर्यपीति** । उदाहरति– **जटिलो विस्मापयते** इति– बालो विस्मयते तं जटिलः प्रेरयतीति विग्रहवाक्यम्, अत्र जटिलः प्रयोक्ता, तत एव स्मयो न तु कारणान्तरादिति भवत्यात्त्वमात्मनेपदं च । शङ्कते–**प्रयोक्तुः स्वार्थे इति किमिति**–य एव स्मयप्रयोजकस्तत एव स्मयो

"Aho Shrutgyanam"

भविष्यत्येवेति 'प्रयोक्तुः स्वार्थे' इत्यव्यवच्छेदकमिति न पठनीयमिति प्रश्नाशयः। प्रत्युदाहरणपर्यालोचनेनैतत् प्रतीयते यत्– न केवलं प्रयोजकसकाशादेव स्मयो भवति– नहि प्रयोजक एव स्मयोत्पत्तिमूलमपि तु कारकान्तरमपीति यत्र कारणादेव स्मयोत्पत्तिस्तत्रैतत्प्रवृत्तिर्मा भूदित्येतदर्थं प्रयोक्तुरित्यावश्यकमिति प्राह– **करणात् स्वार्थे मा भूदिति**– करणाद् यत्र स्वार्थस्य स्मयस्योत्पत्तिस्तत्र मा भूदित्यर्थः। कुत्रेत्याह– **रूपेण विस्मापयतीति**– विस्मयमानं कञ्चित् स्वकीयरूपेण करणेन विस्मितं करोतीत्यर्थे रूपस्यैव विस्मयजनकत्वमिति न भवति तत्रास्य सूत्रस्य प्रवृत्तिरिति तत्र प्रवृत्त्यभावार्थमस्मिन् सूत्रे 'प्रयोक्तुः स्वार्थे' इत्यावश्यकमिति भावः।

नन्वेवं "विस्मापयन् विस्मितमात्मवृत्तौ" इति **कालिदास**प्रयोगे कथमात्त्वम्? इत्थं हि तदीयं पूर्णं पद्यम्—

तमार्यगृह्यं निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन् विस्मितमात्मवृत्तौ
सिंहोरुसत्त्वं निजगाद सिंहः॥"

इति [ रघु. २५ सर्गे ] पुत्रप्राप्त्यर्थं वसिष्ठनिदेशेन नन्दिनीं वने चारयतो दिलीपस्य क्षणमात्रं दृश्यान्तरे लग्नचक्षुषः परीक्षणार्थं नन्दीन्येव स्वमायया स्वोपरि सिंहाक्रमणं प्रदर्शितवती, तां च तदाक्रान्तां विलोक्य तन्मारणोद्योगे नष्टचेष्टं दिलीपं प्रति सिंहवचनारम्भवर्णनमिदं कवेः। "निगृहीतधेनुः सिंहः आर्यगृह्यं मनुवंशकेतुम् आत्मवृत्तौ विस्मितं सिंहोरुसत्त्वम् तं [ दिलीपं ] मनुष्यवाचा विस्मापयन् निजगाद" इत्यन्वयः, अत्र मनुष्यवाचेति कथनात् करणादेव स्मय इति प्रयोक्तुः सकाशान्न तदुत्पत्तिरिति न भाव्यमात्मनेपदेन, किञ्चात्त्वे कृते तत् सन्नियोगशिष्टेनात्मनेपदेनापि भवितव्यमिति विस्मापयमान इति प्रयोक्तुमुचितमिति प्रागुक्तशङ्काशयः। अत्राहुः साम्प्रदायिकाः– विस्माययन्नित्येव पाठो न तु विस्मापयन्निति, पकार-यकारयोः स्वरूपेऽल्पभेदाल्लेखकप्रमाद एवायमिति तेषामाशयः। यथाकथंचित् प्रकृतपाठसमाधानरसिका– चेत्थं व्याचक्षते **दीक्षिता**दयः– मनुष्यवाक् प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति णिगन्ताण्णिगि शतृप्रत्यये सति रूपमिदमिति, अयमाशयः– राजा विस्मयते तं मनुष्यवाक् विस्मापयते, विस्मापयमानां मनुष्यवाचं सिंहः प्रयुङ्क्ते इति मनुष्यवाचा सिंहो विस्मापयन्निति प्रयोगोपपत्तिरिति। तत्र प्रथमणिगि प्रयोक्तुरेव स्मय इति तत्रात्मनेपदा-ऽऽत्त्वयोः प्रवृत्तिः, परतश्च सिंहस्य प्रयोजकत्वविवक्षायां णिगि क्रियाफलस्य परगामित्वविवक्षया परस्मैपदमिति शत्रन्तप्रयोगोपपत्तिरिति। अकर्त्तर्यपीत्यस्यात्त्वे सम्बन्ध आवश्यक इत्याह– **अकर्त्तर्यपीत्येवेति**। तत्फलमाह– **विस्मापनमिति**– इह भावेऽनटि विधेयेऽपि भवत्यात्त्वमिति भावः। ङिन्निर्देशस्य फलान्तरमप्याह– **ङिन्निर्देशाद् यङ्लुपि न भवतीति**– इहैकस्य लीयतेर्ङित्त्वेन निर्देशादनुबन्धनिर्दिष्टत्वेन प्रकृतसूत्रविधेयस्यात्त्वस्यात्मनेपदस्य च लुपि न प्रवृत्तिः—

"श्तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च।
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि॥"

इति न्यायादिति भावः। क्वेत्याह– **सेष्माययतीति**– स्मायीति णिगन्तस्य यङि यङ्लुपि च द्वित्वादिकार्ये कृते प्रकृतरूपसिद्धिः॥ ३. ३. ९१.॥

## बिभेतेर्भीष् च ॥ ३. ३. ९२॥

**त० प्र०– प्रयोक्तुः सकाशात् स्वार्थे वर्तमानाण्ण्यन्ताद् बिभेतेः कर्तर्यात्मनेपदं भवति, अस्य च भीषादेशः, पक्षेऽन्तस्याकारश्चाकर्तर्यपि भवति। मुण्डो भीषयते मुण्डो भापयते। प्रयोक्तुः स्वार्थे इत्येव कुञ्चिकया भाययति। अकर्तर्यपीत्येव– भीषा, भापनम्। तिवनिर्देशाद् यङ्लुपि न भवति– मुण्डो बेभाययति॥ ९२॥**

**श० म० न्यासानुसन्धानम्– बिभेते०**। णिग प्रयोक्तुः स्वार्थे आत्वाकर्तर्यपीति च सम्बध्यते, तथा च सूत्रार्थमाह– **प्रयोक्तुः सकाशात् स्वार्थे** इत्यादिना। भीषादेशपक्षे चात्त्वस्य न प्रवृत्तिरवकाशाभावादिति आदेशद्वयविधानाय बिभेतेरित्यावर्त्तनीयम्, एकत्र स्थानषष्ठी परत्र चावयवषष्ठीति बिभेतेः स्थाने भीष्, बिभेतेरन्तस्य चात्त्वमित्यर्थाश्रयणात् विनापि विकल्पवचनं विधेयद्वयावकाशाय भीषादेशस्य पाक्षिकत्वं पर्यवस्यतीत्याह– **पक्षेऽन्तस्याकारश्चाकर्त्तर्यपि भवतीति**, अकर्त्तर्यपीत्यस्य च भीषादेशेनापि सम्बन्धः स्वीकार्य एव तुल्ययोगक्षेमत्वात्, तथा चोदाहरणे स्पष्टीकरिष्यति। **मुण्डो भीषयते** इति– बालो बिभेति बिभ्यतं तं मुण्डो भीषयते इति वाक्यक्रमः, बिभेतेः प्रयोजकव्यापारविवक्षायां णिग्, प्रयोजकादेव च धात्वर्थस्य भयस्योत्पत्तिरिति आत्मनेपद-भीषादेशौ भवतः। पक्षे आत्त्वानुकूलं रूपमाह– **मुण्डो भापयते** इति। 'प्रयोक्तुः स्वार्थे' इत्यस्य सम्बन्ध आवश्यक इत्याह– **प्रयोक्तुः स्वार्थे इत्येवेति**। व्यावर्त्यमाह– **कुञ्चिकया भापयतीति**– अत्र कुञ्चिका भयस्य करणं न तु प्रयोक्त्रीति ततो धात्वर्थस्य भयस्योत्पत्तिविवक्षायां न भवत्यात्मनेपदं नवा भीषादेशात्त्वे भवत इति भावः। अकर्त्तर्यपीत्यस्याप्यावश्यकत्वमित्याह– **अकर्त्तर्य-**

"Aho Shrutgyanam"

**पीत्येवे**ति, तत्फलमाह- **भीषा, भापनमि**ति, बिभेतेर्णिगन्ताद् भावे "भीषि-भूषि०" [ ५. ३. १०९. ] इत्याङि विवक्षितेऽपि भवति भीषादेश इति भावः, भावप्रत्ययेऽनटि विवक्षितेऽपि च भवत्यात्वमिति भापनमित्यस्य सिद्धिरिति भावः। "भियो भीष् च" इत्येव निर्देशे लाघवाद् विधेये बिभेतेरिति तिव्निर्देशगौरवं किमर्थमाश्रितमित्याशङ्कायामाह- **तिव्निर्देशाद् यङ्लुपि न भवती**ति- श्तिवा शवेत्यादिपूर्वप्रदर्शितन्यायसाचिव्येन तिव्निर्देशमवलम्ब्य विहितकार्यस्यात्मनेपदस्य भीषादेशात्वयोश्च यङ्लुपि न प्रवृत्तिर्भवति सत्यपि प्रयोजकाद् भये। क्वेत्याह- **मुण्डो बेभाययती**ति- भायीति णिगन्ताद् यङ्लुपि रूपमिदम्, अत्रापि मुण्ड एव प्रयोजको भयोत्पादकश्चेति तिव्निर्देशाभावे सूत्रप्रवृत्तिर्दुर्वारेति भावः ॥ ३. ३. ९२. ॥

**मिथ्याकृगोऽभ्यासे ॥ ३. ३. ९३ ॥**

**त० प्र०- मिथ्याशब्दयुक्तो यः कृग् तस्माण्णिगन्तादभ्यासेऽर्थे वर्तमानात् कर्तर्यात्मनेपदं भवति। अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिः। पदं मिथ्याकारयते, स्वरादिदोषदुष्टमसकृदुच्चारयति- पाठयतीत्यर्थः। आत्मनेपदेनैव क्रियाभ्यावृत्तेर्द्योतितत्वात् आभीक्ष्ण्ये द्विर्वचनं न भवतीति केचित्। मिथ्येति किम्? पदं साधु कारयति। कृग इति किम्? पदं मिथ्या वाचयति। अभ्यास इति किम्? सकृत् पदं मिथ्या कारयति ॥ ९३ ॥**

**श० म० न्यासानुसन्धानम्- मिथ्या०**। णिग इत्येतावन्मात्रं पूर्वतोऽनुवर्त्तनीयं नान्यत् किंचित् तावतैव वाक्यं पूर्णमिति पदान्तराकाङ्क्षाऽभावः। **मिथ्याकृग** इति समुदायस्य प्रकृतित्वं न दृष्टमिति तदन्यथा व्याचष्टे- **मिथ्याशब्दयुक्तो यः कृगि**ति, तथा च मिथ्यायुक्तः कृगिति विग्रहे मयूरव्यंसकादित्वपरिकल्पनात् मध्यमपदलोपी समासः। **अन्ये** तु मिथ्याशब्दः सहार्थे तृतीयान्त इति व्याचक्षते, परं विना सहार्थशब्दयोगे तादृशतृतीयाया अदर्शनात्, तदर्थकशब्दाध्याहारे च गौरवाद् वृत्त्युक्तमेव साध्विति प्रतीयते। **अभ्यासेऽर्थे वर्त्तमानादि**ति- णिगन्तकृगो मिथ्योपपदस्य तादृशेऽर्थे वृत्तिर्द्योतकविधया न तु वाचकत्वेन, तादृशवाचकतया प्रामाणिकैरनुक्तेः। अभ्यासशब्दार्थमाह- **अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिरि**ति- असकृदावृत्तिरभ्यावृत्तिः पौनःपुन्यम्। **पदं मिथ्या कारयते** इति- मिथ्येति पदविशेषणं, तस्य चाव्ययत्वेन तत उत्पन्नाया अम्विभक्तेः "अव्ययस्य" [ ३. २. ७. ] इति लुप्, अयं मिथ्याभूतं पदं कश्चित् करोति- उच्चरति, तमन्यः प्रयुङ्क्ते इति णिग्, अयं च प्रयोगोऽभ्यासस्थल एव क्रियत इत्यभ्यासार्थे वर्त्तमानत्वाद् भवत्यात्मनेपदम्। प्रयोगार्थमाह- **स्वरादिदोषदुष्टमसकृदुच्चारयति- पाठयतीत्यर्थः** इति- स्वरः- उदात्तादिः, तद्विषयको यो दोष उदात्तस्थानेऽनुदात्तस्य स्वरितस्य वा प्रयोगः, स्वरितादिस्थानेऽनुदात्तादेः प्रयोगो वा स्वरदोषः, स्वमते उदात्तादीनामपरिभाषणात् तेषां वेदमात्रविषयतायाश्च "तुल्यस्थानास्यप्रयत्नः स्वः" [ १. १. १७. ] इति सूत्रे महान्यासे कथितत्वात् स्वरादिदोषपदेन ह्रस्वत्व-दीर्घत्वादिगुणपरिवृत्तिरेव दोषत्वेन ग्रहीतुं शक्यते, एवमादिपदग्राह्ये व्यञ्जनदोषेऽपि स्थानप्रयत्नपरिवृत्तिकृत एव दोषो ग्राह्यः, असकृदिति अभ्यासार्थस्फोरणाय। अत्र पौनःपुन्यस्य प्रतीतौ "भृशाभीक्ष्ण्याविच्छेदे०" [ ७. ४. ७३. ] इति द्वित्वं कुतो न भवतीत्याशङ्कायां परकृतं समाधानमाह- **आत्मनेपदेनैवे**त्यादिना, अभ्यासार्थे आत्मनेपदं विधीयत इति यदर्थे यस्य विधिस्तेन सोऽर्थ उच्यत इति * उक्तार्थानामप्रयोगः * इति न्यायमाश्रित्य न तदर्थद्योतनाय द्विःप्रयोगरूपं द्विर्वचनं विधीयत इति भावः। केचिदित्यनेनान्योक्तमपि समाधानमिदमविरुद्धत्वादस्माभिरपि स्वीकृतमिति द्विर्वचनं न कृतमिति वृत्त्याशयः प्रतिभाति।

लघुन्यासकृतस्तु- "केचिदिति प्रतीकमुपादाय स्वमते तु द्विर्वचनं भवत्येव शब्दशक्तिस्वाभाव्यात्। केवलेनात्मनेपदेनाभ्यासो वक्तुं न शक्यते, यथा भोजं भोजं व्रजतीत्यादावाभीक्ष्ण्ये आगतोऽपि णम् द्विर्वचनमाकाङ्क्षतीति" इत्याहुः। किन्तु यदि स्वमतमेतत् स्यात् तर्हि द्वित्वं कृत्वैवोदाहृतं स्यान्न च तथोदाहृतं वृत्तौ। लघुन्यासकृतापि "द्विर्वचनमाकाङ्क्षतीत्युक्त्वापि 'पदं मिथ्या कारयते' इति प्रयोगो ज्ञेयः" इति प्रतिपादयता द्विर्वचनं न प्रयुक्तम्, संभवति तत्र लेखकप्रमादोऽपि, किन्तु ख्णमो दृष्टान्तेन न सर्वत्र पौनःपुन्ये द्वित्वावश्यकता प्रतिपादयितुं शक्या, ख्णमः पौनःपुन्यादन्यत्रापि विधानान्न नियमेन तस्य तदर्थवाचकत्वमिति द्वित्वं विना तदर्थस्य साधुप्रतीतिर्न स्यादिति तत्र द्विर्वचनं विधीयते, प्रकृतात्मनेपदस्य च तत्रैव विधानाद् विनापि द्विर्वचनमभ्यावृत्तिप्रतिपादकत्वाच्च न द्वित्वविधानमिति युज्यते। ख्णम्विषये च द्वित्वं विनाऽऽभीक्ष्ण्यप्रतातिर्नास्तीति तत्र द्वित्वविधानमावश्यकम्। तथा च "ख्णम् चाभीक्ष्ण्ये" [ ५. ४. ४८. ] इति सूत्रबृहद्वृत्तौ स्पष्टमेवोक्तम्- "अत्र क्त्वा-ख्णमौ हि स्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीति आभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवति" इति। प्रकृतात्मनेपदस्य च तद्द्योतने सामर्थ्यमस्तीति द्वित्वाकरणादेव विज्ञायत इति न द्वित्वं कृतमिति ग्रन्थकृतो

"Aho Shrutgyanam"

हृदयम् । केचिदित्यनेन न्यासकृदादीनां ग्रहणमित्यपि लघुन्यासकृतः । पाणिनीयानामप्यत्र विषये एतदेव मतमिति स्पष्टीकृतं तत्वबोधिन्यादौ । वस्तुतस्तु क्रियाभ्यावृत्तिर्णिगन्तस्यैवार्थो यतो वृत्तौ– अभ्यासार्थे वर्तमानादिति णिगन्तस्यैव विशेषणमुक्तम्, तथा च आत्मनेपदेनैव द्योतितत्वादिति अवधारणयुक्तं तेषां मतं न स्वाभिमतमित्यत एव केचिदित्युक्तम् । एतावताऽत्र द्वित्वं स्वाभिमतम्, 'पदं मिथ्या कारयते' इति सकृत् 'कारयते' इत्यस्य लेखनं तु एकदेशेनोदाहरणरूपमित्यपि वक्तुं न शक्यते, अन्यत्र द्विर्वचनस्थले तथोदाहरणस्य ग्रन्थकृतशैलीबहिर्भूतत्वात् । अत एव प्रत्युदाहरणे पदं साधु कारयतीत्यादावपि न द्वित्वं प्रयुक्तम्, यदि हि आत्मनेपदमेवाभ्यासार्थद्योतकं स्यात् तर्हि तदभावे तदर्थद्योतनायात्र द्वित्वं कृतं स्यात्, न च तत्र नास्त्येवाभ्यासार्थ इति वाच्यम्, तथा सति प्रत्युदाहरणे द्व्यङ्गवैकल्यं स्यादिति मिथ्याग्रहणप्रयोजनप्रदर्शनाय तत्र समर्थं स्यात् किंमिथ्यापदाभावप्रयुक्त आत्मनेपदाभाव उताभ्यासार्थाभावप्रयुक्त इति निर्णयाभावे प्रत्युदाहरणासंगतेः स्पष्टत्वात् । एतेन लघुन्यासकृद्भिः 'पदं मिथ्या कारयते' इत्यत्र द्वित्वावश्यकतासमर्थनाय केचिदितिरीत्या प्रदर्शितमतस्य खण्डनाय यदुक्तम्– "तदपरे न मृष्यति, यत एवमभ्युपगम्यमानेऽभ्यासे द्योतकस्यात्मनेपदस्याभावे पदं साधु कारयतीत्यादिप्रत्युदाहरणेषु कस्मान्न भवति, न चाभ्यासो नास्तीति वाच्यं, द्व्यङ्गवैकल्यप्रसङ्गात्, तस्माद्यदेकदेशेनेत्युक्तं स एव पक्षो न्याय्यः" इति तदपि प्रत्युक्तं भवति, यतो नात्मनेपदस्याभ्यासार्थे विधानमिति स्वमतमपि तु परमतत्वेन तदुक्तम्, स्वमते तु प्रकृतेरेव तादृशेऽर्थे [ अभ्यासार्थे ] वृत्तिः, यत्किञ्चित्प्रत्ययसमभिव्याहारेण च तत्प्रतीतिः । यत्र च न तत्प्रतीतिरिष्टा तत्र सकृत् पदं प्रयुज्यते, यथा– अभ्यास इति किम् ? सकृत् पदं मिथ्या कारयतीति प्रत्युदाहरणे । यैश्चात्मनेपदस्यैव द्योतकत्वं स्वीक्रियते तैरपि तादृशेऽर्थे तस्य विधानं न स्वीक्रियत इति प्रकृतेरेव तदर्थे वृत्तिः सर्वसम्मता । ततश्च तदर्थवृत्तेः प्रकृतेर्यः कश्चित् प्रत्ययः, आत्मनेपदं वा परस्मैपदं वाऽऽगच्छेत् तस्य सर्वस्य तदर्थद्योतकता स्वीकार्या स्यात्, इत्यात्मनेपदाभावेऽपि तदर्थप्रतीतिः पदं साधु कारयतीत्यादौ भवति, यत्र च न तत्प्रतीतिरिष्टा तत्र सकृत् पदं प्रयुज्यते, अन्यथा तत्प्रयोगोऽपि व्यर्थ एव स्यात्, सकृदुच्चारितः शब्दः सकृदेवार्थं गमयतीति सिद्धान्तात् तत्प्रयोगाभावेऽपि सकृदेव क्रिया प्रतीयेत किमर्थं सकृच्छब्दः प्रयुज्येत । पश्यति त्वाचार्यो यत्– प्रकृतेरेवाभ्यासार्थेऽत्र वृत्तिः शब्दशक्तिस्वाभाव्यादिति यत्र न तदर्थविवक्षा तत्र सकृच्छब्दप्रयोग आवश्यक इति तथा प्रयुङ्क्ते । यच्च तैः स्वमतसामञ्जस्यार्थैकदेशेनोदाहरणं सर्वत्रैव स्थले समाश्रीयते तच्च शास्त्रकृच्छैलीबहिर्भूतमित्युक्तमेव पूर्वमित्यलं पल्लवितेन । पदकृत्यमाह– **मिथ्येति किमिति**– मिथ्यायुक्तात् कृगो णिगन्ताद् यदात्मनेपदं विधीयते तत्र मिथ्यायुक्तत्वं विशेषणं नोपादेयं, केवलादेवाभ्यासार्थे वर्तमाण्णिगन्तात् कृगो विधीयतामात्मनेपदमिति प्रश्नाशयः । प्रत्युदाहरति– **पदं साधु कारयती**ति– अत्र नात्मनेपदं भवति सत्यप्यभ्यासार्थे । **कृग इति किमि**ति– मिथ्योपपदात् [ मिथ्यायुक्तात्– इति वा ] अभ्यासे इत्येव सूत्रमस्तु, यद्यपि तादृशसूत्रकरणे लाघवाभावस्तथापि सूत्रस्य बहुविषयता सिध्यतीत्येव फलमिति प्रष्टुराशयः । कृगोऽन्यप्रकृतेर्मिथ्यायुक्तादात्मनेपदं नेष्टं तद्वारणायावश्यकं कृग इति कथनमित्याह प्रत्युदाहरणद्वारा– **पदं मिथ्या वाचयती**ति– वचेर्णिगन्तादेवमर्थे [ अभ्यासार्थे ] वर्त्तमानादपि न भवत्यात्मनेपदमिति भावः । **अभ्यास इति किमि**ति– अभ्यासार्थे विधानाभावात् प्रकृतिविशेषणत्वेनाभ्यासे इति न कार्यं सामान्येनाभ्यासेऽनभ्यासे वा वर्त्तमानाद् विधेमात्मनेपदमिति प्रश्नाशयः । प्रत्युदाहरति– **सकृत् पदं मिथ्या कारयति** इति– अत्र सकृत्पदसानिध्यादभ्यासार्थाभावः स्पष्ट इति तत्रात्मनेपदं न भवति, सूत्रे तदभावे च स्यादेवेति तद्वारणायावश्यकमभ्यासे इति इति भावः ॥ ३. ३. ९३. ॥

**परिमुहा-ऽऽयमा-ऽऽयस-पा-ट्धे-वद-वस-दमा-ऽऽद-रुच-नृतः फलवति ॥ ३. ३. ९४ ॥**

**त० प्र०– फलवतीति भूम्न्यतिशायने वा मतुः, तेन यत् क्रियायाः प्रधानं फलमोदनादि यदर्थमियमारभ्यते तद्वति कर्तरि विवक्षिते परिपूर्वान्मुहेराङ्पूर्वाभ्यां यमियसिभ्यां– पिबति-ट्धे-वद-वसति-दमा-ऽऽद-रुच-नृतिभ्यश्च णिगन्तेभ्यः कर्तर्यात्मनेपदं भवति । परिमोहयते चैत्रम्, आयामयते सर्पम्, आयासयते मैत्रम् । पाययते बटुम्, धापयते शिशुम्, वादयते शिशुम्, वासयते पान्थम्, दमयतेऽश्वम्, आदयते चैत्रेण, अदेर्नेच्छन्त्यन्ये– आदयति चैत्रेण, रोचयते मैत्रम्, नर्तयते नटम् । पिबत्यत्तिट्धेधातूनामाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायामकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वादुत्तराभ्यां परस्मैपदे प्राप्ते वचनम् । 'पा' इति 'ट्धे' साहचर्यात् पिबतेर्ग्रहणम्, न पातेः; वदसाहचर्याच्च 'वस' इति वसतेर्न वस्तेरिति– पाति चैत्रो नोदास्ते, पालयति चैत्रम्; वस्ते मैत्रो न नग्नः, वासयति मैत्रमित्येव भवति ॥ ९४ ॥**

"Aho Shrutgyanam"

**श० म० न्यासानुसन्धानम्– परि०** । अत्र फलवतीति कर्तृविशेषणं, तच्च व्यर्थं सर्वत्र हि कर्ता क्रियाफलमुद्दिश्यैव क्रियायां प्रवर्त्तते तथा च रूढिः– "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति, सत्यां च क्रियायां तत्फलस्यावश्यं कर्त्रा सम्बन्धः, अन्येन कृतायाः क्रियायाः फलस्यान्यस्मिन्नसंभवादिति विनापि फलवतीति कथने फलवत्येव कर्तरि स्यादिति तद्ग्रहणस्य वैयर्थ्यमाशङ्कयाह– **फलवतीति भूम्नि अतिशायने वा मतुः**, अयमाशयः– न सम्बन्धमात्रे इह मतुर्विहितोऽपि तु भूयसि सम्बन्धेऽतिशयिते वा सम्बन्धे, तथा च क्रियायाः फलेन भूयसाऽन्यापेक्षया आधिक्येनातिशयेन कारकान्तरापेक्षयाऽतिरिच्यमानत्वेन वा सम्बन्धे सत्येव फलवत्त्वमभिप्रेतम् । अथवा भूम्ना प्रभूतेन, अतिशयितेन सर्वापेक्षया प्रधानेन क्रियान्तरासाध्येन वा फलेन यत्र कर्तुः सम्बन्धस्तादृशस्य कर्तुः परिग्रहार्थं फलवतीत्युच्यत इति बोधयितुं– भूम्न्यतिशायने वेत्युक्तम् । क्रियायाः फलं द्विविधम्– प्रधानमप्रधानं च, यथा पचतीत्यादौ प्रधानं फलमोदनसम्पत्तिः, तस्याः क्रियान्तरेणासाध्यत्वात्, अप्रधानं फलं भोक्तुर्भोजनसम्पत्तिः, पक्तुः स्वामिप्रीतिर्भृतिर्लाभो वा, तत्र यत्र पक्ताप्रधानेन फलेनौदनेन सम्बध्यते तत्रैव पचते इति प्रयोगो भवति, न तु यत्रान्यार्थं पाकं करोति तत्र, तत्र च पचतीत्येव प्रयोगः । तदाह– **तेन यत् क्रियायाः प्रधानं फलमोदनादि, यदर्थमियमारभ्यते तद्वति कर्तरीति** । उक्तं च **हरिणापि–**

"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत् प्रधानं फलं तेषां न लाभादि प्रयोजनम् ॥" इति ।

अत्र पचादय इत्युत्तरमेवकार अध्याहार्यः, यस्यार्थस्य प्रसिद्ध्यर्थं पचादय एवारभ्यन्ते न क्रियान्तराणि, तत् तेषां प्रधानं फलम्, लाभादि प्रयोजनं तु प्रधानं फलं न, तस्य क्रियान्तरेणापि संभवादित्यन्वयः । अयमर्थः– यां क्रियां विना योऽर्थो न सिद्ध्येत्, स एव तस्याः क्रियायाः प्रधानं फलम्, पचिक्रियां विनौदनस्य सिद्धिर्न दृष्टेत्योदनमेव पचिक्रियाया मुख्यं फलम्, पक्तुर्लाभादि च क्रियान्तरेणापि संभवति, पाचकेन यावद् वेतन पचिक्रियार्थं लभ्यते तावदन्यकार्यकरणेऽपि लब्धुं शक्यत एवेति लाभो न पचिक्रियायाः प्रधानं फलं भवितुमर्हति । तादृशफलवत्त्वं च विवक्षाधीनं यत्र कर्तुरोदनेन फलेन सम्बन्धो विवक्षितस्तत्रैव तस्य फलवत्त्वमिति तत्रैव ईदित्वप्रयुक्तमात्मनेपदं ततः स्यात्– पचते इति । यत्र च पाचकानां लाभादि प्रयोजनं विवक्षितं तत्र पचन्ति पाचका इत्याद्येवेति स्पष्टीभविष्यत्यग्रिमसूत्रव्याख्यायाम् । तदाह– **तद्वति कर्त्तरि विवक्षिते** इति ।

अत्र णिग इत्यपि प्रकृतमेवेति णिगन्तेभ्य एव परिमुहादिभ्य आत्मनेपदमनेन विधीयते, तदेतदाह– **परिपूर्वान्मुहेरि**त्यादिना । सूत्रे 'पा' इत्युक्तत्वेन पिबतिः पातिर्वा ग्राह्य इति संशये आह– **पिबती**ति, तद्ग्रहणे प्रमाणं दर्शयिष्यत्यग्रे । **परिमोहयते चैत्रमि**ति– अत्र परिमोहनस्य प्रधानं फल चित्तविक्षेपः, तेन च परिमोग्धा चैत्रः सम्बन्ध्यत एवेत्यस्ति फलवत्त्वं कर्तुस्तथैव विवक्षितत्वात् । **आयामयते सर्पमि**ति– आङ्पूर्वाद् यमेर्णिगि रूपम्, सर्प आयच्छति– दीर्घो भवति, तं प्रेरयतीत्यर्थः, अत्रापि दीर्घीभवनस्य क्रियाफलस्य सर्पेण सम्बन्ध इति भवत्यात्मनेपदम् । यद्यपि चैत्रसर्पादयः सम्प्रति कर्मतां गतास्तथापि वस्तुतस्तेषां धात्वर्थं प्रति कर्तृत्वमेवेति मूलधातोरेव कर्तुः फलवत्त्वं विवक्षितं न तु णिगन्तस्य, णिगन्तकर्त्तुः प्रयोजकत्वेन तस्य धात्वर्थकर्तृत्वाभावात्, यद्यपि स्वमते "यमोऽपरिवेषणे णिचि च" [ ३. २. २६. ] इति सूत्रे 'अपरिवेषणे' इत्युक्ततयाऽत्र परिवेषण एव ह्रस्वविधानादन्यत्र दीर्घस्यैव प्रयोगात् तदनुसारेणैवात्र 'आयामयते' इति दीर्घनिर्देशो लेखकप्रमादाद् वा । **आयासयते मैत्रमि**ति– मैत्र आयस्यति तं चैत्रः प्रेरयते इत्यर्थः । "यसूच् प्रयत्ने" इति दिवादिपठितो यस्धातुः, प्रयत्नस्य कर्तृगामित्वमेव प्राधान्येनेति फलवत्कर्तृत्वमस्याप्यस्त्येव । **पाययते बटुमि**ति– बटुः पिबति, तं प्रेरयतीत्यर्थः, पानक्रियायाः फलं द्रवद्रव्यस्य गलबिलाधःसंयोगः, तेन च फलेन कर्तुः सम्बन्धः स्पष्ट एव । **धापयते शिशुमि**ति– शिशुर्धयति, तं धात्री प्रेरयतीति विवक्षा, ट्धें धातुरपि पानार्थः । **वादयते शिशुमि**ति– शिशुर्वदति– 'अम्ब !' इत्यादिशब्दमुच्चारयति, तं स्वजनः प्रेरयति– अन्यशब्दोच्चारणे प्रवर्त्तयतीत्यर्थः । **वासयते पान्थम्** पान्थो दिनान्ते कस्यचिद् गृहे वसति, तं गृहपतिर्वासयति, निवासार्थो वसतिरपि फलवत्कर्तृकः । **दमयतेऽश्वमि**ति– अश्वो दाम्यति, तं सादी प्रेरयतीति विग्रहः । **आदयते चैत्रेण** अत्ति चैत्रः, तं मैत्रः प्रेरयति, अत्राणिगवस्थाकर्तुश्चैत्रस्य णिगवस्थायां प्राप्तमपि कर्मत्वं "गति-बोध०" [ २. २. ५. ] इति सूत्रे 'अनीरवाद्यदि०' इत्यादिपर्युदासान्न भवतीति कर्त्तरि तृतीयैव भवति । मतान्तरमाह– **अदेर्नेच्छन्त्यन्ये** इति, पाणिनीयेष्वेतद्विषये सूत्रेऽदेर्ग्रहणं न दृश्यते, आदयतीत्येव च सर्वत्र प्रयोगो दृश्यते । **रोचयते मैत्रमि**ति– मैत्रो रोचते, तन्मन्यः प्रेरयति । **नर्त्तयते नटम्** नटो नृत्यति, तन्मन्यः प्रवर्त्तयति । सर्वत्रोदाहरणेषु धात्वर्थप्रधानफलस्य कर्त्रा सम्बन्धस्य विवक्षितत्वेन णिगन्तावस्थायां भवत्यात्मनेपदम् ।

णिगो गित्त्वेन "ईगितः" [ ३. ३. ९५. ] इत्यग्रिम-

"Aho Shrutgyanam"

सूत्रेणैव फलवत्कर्तृतायां संभवत्येवात्मनेपदमिति प्रकृतसूत्रस्य वैयर्थ्यमाशङ्क्याह- **पिबत्यत्ति-ट्धेधातूनाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायामकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वादुत्तराभ्यां परस्मैपदे प्राप्ते वचनमिति**, अयमाशयः- "ईगितः" इत्यनेन सामान्यतो विधीयमानमात्मनेपदं- प्रकृतधातूनां यथायथमाहारार्थत्व-चलनार्थत्वा-ऽकर्मकत्वैरुत्तरसूत्राभ्याम् "अणिगि प्राणिकर्तृका०" [ ३. ३. १०७. ] "चल्याहारार्थ०" [ ३. ३. १०८. ] इत्येताभ्यां प्राप्तेन परस्मैपदेन परत्वाद् बाधितं स्यादिति बाधकबाधनार्थमेवानेन विशिष्यात्मनेपदविधानम्। तत्र प्रत्येकं धातूनां परस्मैपदप्राप्तिनिमित्तं स्पष्टयितुमाह- **'पिबत्यत्ति-ट्धेधातूनामाहारार्थत्वादिति**- पिबतिः पानार्थकः, अत्तिर्भक्षणार्थः, ट्धे धातुरपि पानार्थ एव, एषां च वस्तुत आहारार्थत्वेनैव पर्यवसानमिति "चल्याहारार्थ०" [ ३. ३. १०८. ] इत्यनेन प्राप्तिः। नृतेर्गात्रविक्षेपार्थस्य चलनार्थत्वमिति तस्याप्युक्तसूत्रेणैव परस्मैपदप्राप्तिः, अन्येषां वस्-यम्-यस्-द्रम्-रुच्-धातूनां स्वभावादेवाकर्मकत्वं, वदेश्च विवक्षातोऽकर्मकत्वमिति, अथवा सर्वेषामेवाकर्मकत्वं यतः पिबत्यादीनामपि स्वार्थपरित्यागेनौदासीन्यनिवृत्तिपरत्वेऽकर्मकत्वमेव, मुह्-यम्-यस्-वस्-दम्-रुच्-नृतां स्वभावत एवाकर्मकत्वं, वदेश्च विवक्षावशादिति सर्वेभ्य एतेभ्यः "अणिगि प्राणि०" [ ३. ३. १०७. ] इति सूत्रेण परस्मैपदं प्राप्तमिति तत्प्राबधनायानेन विशिष्यात्मनेपदविधानमावश्यकम्। विशिष्य विधाने हि निरवकाशत्वेनापवादकत्वात् परत्वमूलकप्राप्तेर्बाधकत्वसंभवात्, अपवादस्य सर्वापेक्षया बलवत्त्वस्य सर्वसम्मतत्वात्।

अत्र सूत्रे पठिताः केचन धातवो द्विधा धातुपाठे समुपलभ्यन्ते, तत्रोभयोर्ग्रहणमन्यतरस्य वा, अन्यतरस्य चेत्? तत्र किं मूलमिति शङ्कायामाह- **'पा' इति ट्धे-साहचर्यादिति**- 'ट्धे'धातुरपि पानार्थकः शव्विकरणश्चेति तत्साहचर्यात् तथा भूतस्य पिबतेरेव ग्रहणं न तु पाते रक्षार्थकस्य। एवं- 'वस्'धातुरपि निवासार्थको भ्वादिः, आच्छादनार्थकोऽदादिः, अत्र कस्य ग्रहणमित्यत्राह- **वदसाहचर्याच्च वस इति वसतेर्न वस्तेरिति**-'वदधातुर्भ्वादिरिति तत्साहचर्यात् तत्सदृशस्य वसतेर्निवासार्थकस्यैव ग्रहणं न वस्तेराच्छादनार्थस्यादादेः। तत्फलमाह- **पाति चैत्रो नोदास्ते, पालयति चैत्रमिति**- 'नोदास्ते' इति कथनेनोदासिन्यनिवृत्तिपरत्वमात्रदशायामस्याकर्मकत्वमिति "अणिगि प्राणि०" [ ३. ३. १०७. ] इत्यस्याग्रे परस्मैपदविधायकता स्फोरिता, तथा च ततः [ पातेः ] णिगि पालयतीति परस्मैपदमेव भवति, नानेन विशेषविहितमात्मनेपदमिति भावः। **एवं वस्ते मैत्रो न नग्नः** इत्यत्र न नग्न इति कथनेन धातोर्नग्नतानिवृत्तिमात्रपरत्वेनाकर्मकतां स्फुटीकृत्य णिगन्ते प्रोक्तसूत्रेण परस्मैपदमुदाहरति- **वासयति मैत्रमित्येव भवतीति**- अनियमे च परत्वादस्य प्रवृत्तावुभयत्रात्मनेपदं दुर्वारमिति भावः ॥ ३. ३ ९४. ॥

## ईगितः ॥ ३. ३. ९५ ॥

**त० प्र०- ईकारेतो गकारेतश्च धातोः फलवति कर्तर्यात्मनेपदं भवति। यजीं- यजते, डुपचींष्- पचते। लक्षीण्- लक्षयते; डुकृंग- कुरुते, टुडुभृंगक्- बिभृते, कण्डूग्- कण्डूयते णिगन्त- गमयते। ईगित इति किम्? गच्छति, चोरयति। फलवतीत्येव- यजन्ति याजकाः, पचन्ति पाचकाः, कुर्वन्ति कर्मकराः, गमयत्यश्वं दमकः, नात्र स्वर्गौदनादि प्रधानं फलं कर्त्रा संबध्यते, यच्च दक्षिणावेतनादि संबध्यते, न तत् क्रियायाः फलं प्रधानमिति।**

**तच्चैतत् स्वार्थलक्षणं फलं सदसद् वा विवक्षानिबन्धनमेव, ग्राह्यं तथैव लोके व्यवहारात्। तथाहि- क्वचिदसदपि सद्विवक्ष्यते, यथा- शोषयते व्रीहीनातपः, शब्दः प्राक् स्वार्थमभिधत्ते ततो द्रव्यम्, परकर्मण्यपि प्रवृत्ताः कदाचिदाहुः- यजामहे, इमे पचामहे, यत्नादस्मदीयमेवैतदिति। क्वचित् सदप्यसद् विवक्ष्यते, यथा- इमे ब्रूमः, अवचनप्रतिषेधपरत्वेन प्रवृत्तेर्विवक्षितत्वात्, एवम्- अगमकत्वादिति ब्रूमो न ब्रूमोऽपशब्दः स्यादिति। तदाहुः-**

**"क्रियाप्रवृत्तावाख्याता, कैश्चित् स्वार्थपरार्थता।**
**असती वा सती वापि विवक्षितनिबन्धना॥" इति।**

**केचित् तु णिग्वर्जितादीगितो धातोर्णिगर्थे एव प्रेरणाध्येषणविशेषे प्रतिविधाननाम्नि वर्तमानादात्मनेपदमिच्छन्ति- पचते, पाचयतीत्यर्थः; केशश्मश्रु वपते, वापयतीत्यर्थः; वेदो वैधर्म्यं विधत्ते, विधापयतीत्यर्थः, इत्यादि यदाहुः-**

**"क्रीणीष्व वपते धत्ते, मिनुते चिनुतेऽपि च।**
**आप्तप्रयोगा दृश्यन्ते, येषु ण्यर्थोऽभिधीयते॥" इति।**

**एतच्च श्रोत्रियमतमित्युपेक्ष्यते ॥ ९५ ॥**

**श० म०** न्यासानुसन्धानम्- **ईगितः**। णिग इति निवृत्तमनाकाङ्क्षितत्वात्, फलवतीति चानुवर्तत एव। ईश्च ग् च- ईगौ, ताविती यस्य तस्मादिति विग्रहे यद्यपि एकस्यैव धातोरीगित्वं प्रतिभाति, तथापि तथाभूतस्य धातोरनुपलम्भाल्लक्ष्यसंस्कारानुरोधेन प्रातिस्विकरूपेण ईकारेत्त्वं, गित्वं च विवक्षितमित्याह- **ईकारेतो गकारेतश्चेति**।

"Aho Shrutgyanam"

उदाहरति– **यजीं– यजते** इति– यज्धातुरीकारेत् देवपूजाद्यर्थः, देवपूजादेः फलं हि देवपरितोषः स्वर्गादिलाभश्च प्रधानम्, अप्रधानं च याजकानां दक्षिणादिलाभः, तत्र यजमानस्य स्वर्गादिफलभाक्त्वे विवक्षितेऽनेनात्मनेपदं भवति । **डुपचींष्– पचते** इति– अत्र 'डु-ई-ष्' एते त्रयोऽप्यनुबन्धा भिन्नभिन्नप्रयोजनाः, तत्रेकारेत्त्वेनात्मनेपदमात्रमत्रोदाहार्यम्, पचधात्वर्थफलमोदनादिसम्पत्तिः, तेन फलेन यत्र पक्ता सम्बद्धस्तत्रानेनात्मनेपदं भवति । **लक्षीण्– लक्षयते** इति– "लक्षीण् दर्शना-ऽङ्कनयोः" इति चुरादौ पठ्यते तत्र, यत्र दर्शनमङ्कनं स्वार्थमाचर्यते तत्र दर्शनफलस्य ज्ञानस्य, अङ्कनफलस्य परिचयस्य कर्त्रा सम्बन्धस्तत्रात्मनेपदं भवति । ईकारेत उदाहृत्य गकारेत उदाहर्तुमाह– **डुकृंग्– कुरुते** इति– उत्पादनार्थः कृग् गकारेत्, तत्र क्रियाफलं कार्योत्पत्तिर्यदि कर्तृसम्बद्धा तदाऽऽत्मनेपदमनेन भवति । **टुडुभृंगक्– बिभृते** इति– अत्र चत्वारोऽनुबन्धाः प्रातिस्विकप्रयोजनाः, प्रकृते गित्त्वनिबन्धनमात्मनेपदमात्रमुदाहार्यम्, बिभर्त्तिर्धारणार्थः पोषणार्थश्च जुहोत्यादिः, धारणपोषणफलं यदा कर्त्रा सम्बद्धं तदाऽऽत्मनेपदमन्यथा परस्मैपदम् । **कण्डूग्– कण्डूयते** इति– यत्रात्मनो गात्रविघर्षणम्, आत्मार्थं वा गवादेर्गात्रविघर्षणं तत्रात्मनेपदं भवति । णिग्प्रत्ययेऽपि गकार इत्, णिगन्तस्यापि च धातुत्वं क्रियावाचकत्वनिबन्धनम्, ततश्च धातोर्गित्त्वं भवतीति यत्र प्रेरणाविषयीभूतगमधात्वर्थस्थानान्तरप्राप्तिरूपफलेन कर्तुः सम्बन्धस्तत्रात्मनेपदम्, गतिश्चलनाद्भिन्नेति न "चल्याहार०" [ ३. ३. १०८. ] इति परस्मैपदम् । पदकृत्यमाह– **ईगित इति किमिति**– पूर्वसूत्रे यत् फलवतीत्युक्तम्, तस्य पृथगेव योगः कर्तव्यः, पूर्वसूत्रे च तत् णिगन्तैस्तैः सह सम्बद्धम्, योगविभागसामर्थ्याच्च पृथगारब्धे फलवतीति योगे णिग इत्यस्यासंबन्धात् सामान्यत एव सर्वस्माद् धातोः फलवति कर्तरि विवक्षिते आत्मनेपदं विधीयताम्, "ईगितः" इति विशिष्य ईकारेतो गितश्च फलवति कर्तर्यात्मनेपदविधानमनर्थकमिति प्रष्टुराशयः । सामान्येन फलवति कर्त्तरि आत्मनेपदविधानेऽव्याप्तिदोषाभावेऽप्यतिव्याप्तिः स्यादित्याह– **गच्छति, चोरयतीति**, गच्छतेरपि क्रियाफलस्योत्तरदेशसंयोगस्य कर्तृगामित्वेन विवक्षणे आत्मनेपदं स्यादिष्यते तु नैव, एवं स्वार्थणिजन्ताच्चुरेरपि फलवति कर्तरि विवक्षिते तत् स्यात्, ईगित इति कथने तु न भवति । यद्यपि अन्यैः स्वार्थणिजन्ताच्चुरादेरपि कर्तृगामिनि क्रियाफले [ फलवति कर्त्तरि ] आत्मनेपदमिष्यत एव, परं स्वमते नेष्यत इति प्रत्युदाहरणसंभवोऽस्त्येव । फलवतीत्यस्य सम्बन्ध आवश्यक इत्याह– **फलवतीत्येवेति** । व्यावर्त्यमाह– **यजन्ति याजकाः** इत्यादिना, याजका दक्षिणादिप्राप्तिफलेन यज्ञे प्रवर्त्तमाना यजन्ति– यज्ञं कुर्वन्तीति तदर्थः, अत्र यज्ञस्य प्रधानं फलं स्वर्गस्तेन च न याजकानां सम्बन्ध इति प्रधानफलवत्कर्तुरभावादिह परस्मैपदमेव भवति नात्मनेपदमिति, फलवतीत्यस्य सम्बन्धाभावे तद्दुवारम् । **एवं पचन्ति पाचकाः** इति– पाचकाः– भृतिप्राप्तिकामनया पाके नियुक्ता न तत्फलेनौदनेन सम्बद्धत्वेन विवक्षिता इति फलवत्कर्तुरभावादिहापि परस्मैपदमेव भवति सत्यपीदित्त्वे । गितं प्रत्युदाहरति– **कुर्वन्ति कर्मकराः** कर्मकरा भृतिदानेन कर्मणि नियुक्ताः कुर्वन्ति, यत्र कार्ये नियुक्तास्तत् सम्पादयन्तीति प्रयोगार्थः, अत्र धात्वर्थप्रधानफलेन कार्येण न तेषां सम्बन्धोऽपि तु भृतिमात्रेणेति न भवत्यात्मनेपदम् । केवलान् धातून् प्रत्युदाहृत्य प्रत्ययान्तं गितं धातुं प्रत्युदाहरति– **गमयत्यश्वं दमकः** इति– दमकोऽशिक्षितस्याश्वस्य दमयिता– दमनपूर्वकं तत्तद्गतिविशेषशिक्षकः, अश्वं गमयति– गत्यर्थं प्रेरयतीति प्रयोगार्थः, अत्र दमकोऽपि अश्वस्वामिस्वीकृतस्य पारिश्रमिकरूपफलस्यैव स्वामी न तु तस्याश्वगत्या किमपि स्थानान्तरप्राप्त्यादिफलमीशितव्यमिति न भवति तस्य फलवत्त्वमिति तत्कर्तृकाद् गमयतेर्नात्मनेपदम् । प्रत्युदाहरणेषु कर्तुः फलवत्त्वाभावं संगमयति– **नात्र स्वर्गौदनादि प्रधानं फलमिति**– यजन्ति याजका इत्यत्र स्वर्गः प्रधानं फलम्, पचन्ति पाचका इत्यत्रौदनं प्रधानं फलम्, कुर्वन्ति कर्मकरा इत्यादौ कृष्यादिकार्यं प्रधानं फलमादिपदग्राह्यम्, तच्च कर्त्रा याजकादिना न सम्बध्यते– स्वत्वेन नान्वेति । ननु दक्षिणावेतनादिप्राप्तिरूपं फलं तु तत्रापि याजकादिरूपे कर्तरि सम्बध्यत एवेत्यस्त्येव फलवत्कर्तृत्वं तत्रापीति चेदत्राह– **यच्च दक्षिणावेतनादि सम्बध्यते न तत् क्रियायाः प्रधानं फलमिति**– यजन्ति याजका इत्यत्र दक्षिणा, पचन्ति पाचका इत्यत्र वेतनम्, कुर्वन्ति कर्मकरा इत्यत्र भृतिरित्यादिपदग्राह्यं यथायोगं फलं यत् तेषु स्थलेषु कर्तृसम्बद्धमस्ति, तन्न प्रधानं फलमपि गौणमिति भूम्नि अतिशायने वा मत्वन्तेन फलवच्छब्देन तेषां न ग्रहणम्, प्रधानं फलं चेतरक्रियाऽसाध्यत्वे सति तत्क्रियामात्रसाध्यम्, तथाभूतं च दक्षिणादि नास्ति कार्यान्तरेणापि तल्लाभस्य संभवात् । इदं च फलं न वस्तुत एव कर्तरि विद्यमानमेव आत्मनेपदोपयोगि, अपि तु वस्तुतोऽविद्यमानमपि कर्तृसम्बद्धत्वेन विवक्षितं चेत् तदा भवितव्यमात्मनेपदेनेत्याह– **तच्चैतत् स्वार्थलक्षणं फलं सदसद् वा विवक्षानिबन्धनमेव ग्राह्यमिति**– अत्र स्वपदेन क्रियावाचकस्य आत्मनेपदप्रकृतिभूतस्य धातोर्ग्रहणम् उत कर्तुरिति

"Aho Shrutgyanam"

चेदुच्यते- कर्तुरेव ग्रहणस्यौचित्यम्, यतः स्वपदेन धातोर्ग्रहणे न तदर्थत्व स्वर्गादेः सम्भवति, कर्तृग्रहणे च तेनार्थनीयत्वं स्वर्गादेरुपपद्यते, एवं च स्वस्य- कर्तुः, अर्थः- अर्थनीयः, तदेव लक्षणं- स्वरूपं यस्य तादृशं फलं- स्वर्गादि, सत्- स्वार्थनीयत्वेन विद्यमानं, वस्तुतः स्वेनार्थ्यमानम्, असत्- तादृशत्वेनाविद्यमानं वा, विवक्षानिबन्धनं- विवक्षामात्रमेव निबन्धनं- निमित्तं यत्र तादृशमेव ग्राह्यम्, यत्रार्थनीयत्वेनासदपि सत्त्वेन विवक्ष्यते तत्र कर्तुः फलवत्त्वं व्यवह्रियते, यत्र च सदपि अर्थनीयत्वेन न विवक्ष्यते तत्र कर्तुः फलवत्त्वं न व्यवह्रियत इति भावः। अत्र मूलमाह- **तथैव लोके व्यवहारादिति**- लोके सतोऽप्यविवक्षावशादसत्त्वमसतोऽपि विवक्षावशात् सत्त्वं व्यवह्रियते, शास्त्रमपि लोकप्रसिद्धशिष्टव्यवहारमेवानुविधत्ते न किंचिन्नूतनं शास्ति, तथा चोक्तार्थे तादृशो लोकव्यवहार एव मूलमिति भावः। तमेव व्यवहारं प्रदर्शयति- **तथाही**त्यादिना, **क्वचिदसदपि सद् विवक्ष्यते** अविद्यमानमपि कर्तरि फलवत्त्वं विद्यमानतया विवक्ष्यते इति तदर्थः, क्वेत्याह- **यथा शोषयते व्रीहीनातपः** इति- अत्र शोषणकर्त्ता आतपः, स यद्यपि अचेतनत्वेन क्रियाफलभाग् न भवितुं युक्तस्तथापि तत्क्रियायामात्मनेपदं प्रयुज्यत इति तत्कर्तरि असदपि फलवत्त्वं सदिव विवक्ष्यत इत्यायाति। तथा च आतपे व्रीहिशोषणजन्यं किं फलं भवितुमर्हतीति चेत् पृच्छ्यते, तर्हि तदीयतीव्रतरत्वादिरूपा प्रशंसैव, सा च यद्यपि न शोषयतेः प्रधानं फलं तथापि तदिह प्रधानत्वेन विवक्षितमित्यवधातव्यम्। उदाहरणान्तरमाह- **शब्दः प्राक् स्वार्थमभिधत्ते ततो द्रव्यमिति** इदं शब्दार्थनिर्णयपरग्रन्थस्थं क्वचित्कं वाक्यम् पञ्चकं नामार्थः स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकाणि, तत्र नाम्ना कोऽर्थः पूर्वं कश्च पश्चादभिधीयत इति विचारप्रस्तावे आह- शब्दः प्राक् स्वार्थमित्यादि, स्वार्थः- प्रवृत्तिनिमित्तं गोत्वादि जातिरूपम्, गवादयो हि शब्दाः प्रथमं गोत्वमुपस्थापयन्ति पश्चात् तद्विशिष्टं द्रव्यं सास्नादिमत्पिण्डरूपां प्रातिस्विकगवादिव्यक्तिम्, गोत्वावच्छिन्ने हि गवादीनां शक्तिः, तत्र व्यक्तीनामानन्त्यादेकस्यां व्यक्तौ शक्तिग्रहेऽन्यस्यां शक्तिग्रहाभावात् तद्व्यक्तिबोधो न स्यात्, सकलव्यक्तिषु च शक्तिग्रहस्यासंभवः, एकत्रैकदा सकलव्यक्तीनामनन्तदेशकालव्यवहितानामुपस्थत्यसम्भवात्, तथा च केवलं जातावेव शक्तिर्व्यक्तिबोधस्तु अविनाभावमूलया लक्षणयेति **मीमांसकाः**। जाति-व्यक्त्योरुभयोरेव शक्तिर्व्यक्तीनामानन्त्येऽपि जात्या सामान्यप्रत्यासत्त्या सकलगोषु शक्तिग्रहसम्भवान्न व्यभिचारादिदोष **इत्यन्ये**। अस्ति चात्र बहुतरतान्त्रिकाणां परस्परं विसंवादः, तस्य चेहाप्राकरणिकत्वेन नास्त्युपन्यासावश्यकता, केवलमत्रात्मनेपदं शब्दे कर्तरि असदपि फलवत्त्वं विवक्षावशात् सदिव मत्वा प्रयुक्तमित्येतावदर्थमस्य वाक्यस्योपन्यासः। व्यवहारान्तरमपि विवक्षाधीनमुदाहरति- **परकर्मण्यपि प्रवृत्ताः कदाचिदाहुः- यजामहे इमे पचामहे** इति- परार्थमपि यागं पाकं वा कुर्वन्त एवं व्यवहरन्ति आत्मनेपदप्रयोगानिति, तच्च स्वस्मिन् फलवत्त्वमारोप्यैव। न चास्ति तेषां प्रधानेन फलेन स्वर्गौदनादिना सम्बन्धो वास्तविक इति विवक्षानिबन्धन एव स स्वीकार्यः। तथा व्यवहारे तेषां मनसि स्थितं हेतुमाह- **यत्नादस्मदीयमेवैतदि**ति- यतो वयं स्वर्गादिसिद्ध्यर्थं यत्नं कुर्मस्ततोऽस्मदीयमेव स्वर्गादि फलमिति तदाशयः। इत्थं क्वचिदसतोऽपि सद्विवक्षां प्रामाणिकवाक्य-लौकिकव्यवहारादिना प्रमाणयित्वा क्वचित् सतोऽप्यसद्विवक्षामुदाहर्त्तुमाह- **क्वचित् सदप्यसद् विवक्ष्यते** इति- क्वचित् स्थले कर्त्तरि सदपि फलवत्त्वमसद्रूपेण वक्तुमिष्यते। क्वेत्याह- **यथा- इमे ब्रूमः** इति- अत्र वचनफलस्य स्वाशयप्रकाशनस्य स्वेन सम्बन्धे सत्यपि परस्मैपदमेव प्रयुज्यते, न फलवत्कर्तृत्वनिबन्धनमात्मनेपदम्। एतदुपपादनाय कारणमाह- **अवचनप्रतिषेधपरत्वेन प्रवृत्तेर्वक्ष्यमाणत्वादिति**- नात्र वक्तुः स्वाशयप्रकाशनार्थं प्रवृत्तिरपि तु अहं किंचिन्न वच्मीति न विज्ञेयमित्येतावन्मात्रबोधनाय प्रवृत्तिरिति तादृशेन फलेन नात्मनः सम्बन्ध इति नात्मनेपदमिति भावः। अत्र भाष्यकृतो वाक्यमपि समर्थकत्वेनोपन्यस्यति- **एवम्- 'अगमकत्वादिति ब्रूमो, न ब्रूमोऽपशब्दः स्यादिति'** इति- "समर्थः पदविधिः" [ पा० सू० २.१.१. ] इति सूत्रे 'सविशेषाणां वृत्तिर्न वृत्तस्य च विशेषणयोगो न' इत्येतस्यार्थस्य देवदत्तस्य गुरुकुलमित्यादिस्थले व्यभिचारे शङ्किते एतादृशस्थले गमकत्वात्- समासेन विवक्षितार्थस्य बोधनात् वृत्तिर्भवति, ऋद्धस्य राज्ञः पुरुष इत्यादौ च वृत्तिर्न भवतीति सिद्धान्तिना कथिते तत्र हेतुकथनावसरे एतदुक्तं भाष्यकृता- अगमकत्वादिति ब्रूमो न ब्रूमोऽपशब्दः स्यादिति। ऋद्धस्य राजपुरुष इत्यादिस्थले समासेन वाक्यार्थानभिधानादेव समासो न भवति किन्तु समासे सति अपशब्दः स्यादिति हेतोः समासो न भवतीति नास्माकं कथनमिति तदाशयः। अत्र 'ब्रूमो' 'न ब्रूमः' इति परस्मैपदं यत् प्रयुक्तं तदपि सतः फलवत्त्वस्याविवक्षयैवेति भावः। तत्र साम्प्रदायिकवचनं प्रमाणयति-

क्रियाप्रवृत्ताख्याता कैश्चित् स्वार्थपरार्थता।
असती वा सती वापि विवक्षितनिबन्धना॥" इति।

"Aho Shrutgyanam"

"कैश्चित् क्रियाप्रवृत्तौ विवक्षितनिबन्धना सती वा असती वापि स्वार्थपरार्थता आख्याता" इत्यन्वयः। कैश्चिदाचार्यैः क्रियाप्रवृत्तौ क्रियावाचकस्य पदस्यार्थप्रतिपादकतायां विवक्षितेति भावप्रधानो निर्देशः, विवक्षितत्वं निबन्धनं हेतुर्यस्यां तादृशी, सती– सत्त्वेन विवक्षिता, असती– असत्त्वेन विवक्षिता वा, स्वार्थपरार्थता– स्वार्थं च परार्थं च स्वार्थपरार्थे तयोर्भावः स्वार्थपरार्थता, द्वन्द्वान्ते श्रूयमाणतया भावप्रत्ययस्योभयत्रान्वयः, स्वार्थता परार्थता च स्वस्मै इदं फलं स्वार्थं, परस्मै इदं फलं परार्थं, तत्ता, आख्याता– कथिता। विवक्षानिबन्धनमेव स्वस्य कर्तुः फलवत्त्वम्, परस्य कर्तृभिन्नस्य वा फलवत्त्वं भवतीति तेषां कथनस्याशय इति भावः। प्रसङ्गादणिगन्तेऽपि क्वचित् णिगर्थप्रतीतिं पूर्वाचार्यसंमतां शिष्यबुद्धिवैशद्यार्थमाह– **केचित् त्वि**त्यादिना, "णिग्वर्जिताद्– अणिगन्तादेव, ईगितो धातोः णिगर्थे एव वर्त्तमानात्– अणिगन्तत्वेऽपि णिगर्थमभिदधानात्, आत्मनेपदमिच्छन्ति" इत्यन्वयः। तत्र णिगर्थमेव शब्दान्तरैः परिचाययति– **प्रेरणाऽध्येषणविशेषे प्रतिविधाननाम्नी**ति– प्रेरणविशेषे अध्येषणविशेषे वा, शुद्धधात्वर्थान्तर्भूताया भवितुर्भवनानुकूलाया भावनायाः शुद्धप्रेरणरूपत्वमध्येषणरूपत्वं नास्ति किन्तु तत्समकक्षत्वमेवेति तां प्रतिविधानमित्याचक्षते, अत एव प्रेरणविशेषेऽध्येषणविशेषे इति प्रोक्तम्, तथा णिगभावेऽपि आत्मनेपदेनैव तत्र प्रतिविधाननामा णिगर्थः प्रतीयते, न तावत् प्रतिविधानमिति प्रयोजकव्यापारसामान्यस्य नाम किन्तु धात्वर्थविध्यनुकूलस्य कर्तृगतव्यापारस्य विधानं– धात्वर्थोत्पत्तिं प्रति गतमाभिमुख्येन प्रवृत्तं **प्रतिविधानम्**। यद्यपि वास्तविकः प्रयोजकव्यापारोऽपि धात्वर्थोत्पत्तिं प्रतिगच्छति– आभिमुख्येन आनुकूल्येन वर्त्तते तथापि तस्य कर्तृप्रवर्त्तनाद्वारा धात्वर्थोत्पत्त्यानुकूल्यम्, अत्र तु कर्तुः स्वयमेव धात्वर्थोत्पत्त्यानुकूल्यमिति प्रेरणप्रतिविधानयोर्विशेषः। उदाहरति– **पचते** इति– अत्र पच्धात्वर्थो विक्लित्तिः, तदनुकूला विक्लेदनाऽपि कर्तृव्यापाररूपैव शुद्धधात्वर्थ एवान्तर्भूता, विक्लिद्यत एव विक्लित्त्युत्पत्तिसंभवात्, तादृशी भावना यदाऽऽविर्भूतत्वेन विवक्षिता तदाऽऽत्मनेपदं विधीयते। तथा च 'पचते' इत्यस्यैव प्रेरणार्थतायां प्रतिविधाने वृत्तिः, तथा चार्थमाह– **पाचयतीत्यर्थः** इति। अन्यदुदाहरणमाह– **केशश्मश्रु वपते** इति– यदि कर्तुरेव केशस्य श्मश्रुणश्च वपनं विवक्षितं तदाऽऽत्मनेपदमिदं भवति, ततश्च वापनमेव ततः प्रतीयते, स्वतो वपनस्यानुचितत्वाददर्शनाच्च। तथा चार्थमाह– **वापयतीत्यर्थः** इति। **वेदो वैधर्म्यं विधत्ते** इति– वैधर्म्यस्य साक्षाद् वेदविधेयत्वाभावात् प्रयोजकत्वे एव तात्पर्यमिति तथार्थमाह– **विधापयतीत्यर्थः** इति, सर्वत्र चात्मनेपदेनैवेदृशार्थप्रतीतिः। स्वोक्तार्थे पूर्वाचार्यसम्मतिमाह– **क्रीणीष्व वपते धत्ते** इत्यादिना, क्रीणीष्वेत्यस्य क्रापयतेत्यर्थः, 'वपते, धत्ते' इत्यनयोर्ण्यर्थता व्याख्यातपूर्वा, 'मिनुते' इत्यस्य माययति– प्रक्षेपयतीत्यर्थः, 'चिनुते' इत्यस्य चाययतीत्यर्थः, एते ण्यर्थाभिधायका आप्तप्रयोगा दृश्यन्ते इति कारिकार्थः। स्वमते तदनुकूलं वचनं कुतो न विहितमिति न्यूनताशङ्कां परिहरति– **एतच्च श्रोत्रियमतमित्युपेक्ष्यते** इति– इदं नास्माकं लोकभाषाव्याकर्तॄणां मतमपि तु श्रोत्रियाणां– छन्दोऽध्येतॄणां तदध्यापकानां वा मतमिति स्वप्रयोजनोपयोगित्वाभावादुपेक्ष्यते, न तदनुविधानार्थं यत्नः क्रियते इत्यर्थः ॥ ३. ३. ९५. ॥

---

**ज्ञोऽनुपसर्गात् ॥ ३. ३. ९६ ॥**

**त० प्र०– अविद्यमानोपसर्गाज्जानातेः फलवति कर्त्तर्यात्मनेपदं भवति। गां जानीते, अश्वं जानीते। अनुपसर्गादिति किम्? स्वर्गं प्रजानाति। फलवतीत्येव– परस्य गां जानाति। अकर्मकात् पूर्वेण सिद्धे सकर्मकार्थं वचनम् ॥ ९६ ॥**

---

**श० म० न्यासानुसन्धानम्– ज्ञो०। अनुपसर्गादिति**– नञः प्रसज्यप्रतिषेधपरत्वमेव स्वीकार्यं, पर्युदासपरत्वे हि उपसर्गभिन्नात् कस्माच्चिदपि परत्वे सत्येव स्यादात्मनेपदं, तच्च नेष्टं केवलादेव विधानस्येष्टत्वात्। तथा चान्यपूर्वकात् प्राप्तिरेव नास्ति, तेन सह धातोः सामर्थ्याभावात्, उपसर्गपूर्वकादस्ति प्राप्तिसंभवस्तस्यानेन निषेधः क्रियत इत्यायाति। उदाहरति– **गां जानीते** इति– अकर्मकात् पूर्वं "ज्ञः" [ ३. ३. ८१. ] इत्यनेनात्मनेपदस्य विहितत्वात् सकर्मकादेवानेन विधानमिति सूचयितुं गामिति कर्मोपन्यस्तम्, उपसर्गपूर्वकत्वाभावाद् भवत्यनेनात्मनेपदम्। एवम्– **अश्वं जानीते** इत्यत्रापि बोध्यम्। **अनुपसर्गादिति किमिति**– सामान्येनैव फलवति कर्तरि सकर्मकादपि ज्ञ आत्मनेपदं विधीयतामिति प्रश्नः। **स्वर्गं प्रजानाती**ति– सकर्मकस्योपसर्गपूर्वकस्येह ग्रहणं वारयितुमावश्यकमनुपसर्गादिति भावः। नन्वेवम्–

'क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-
र्यास्यन् सुतस्तप्स्यति मां समन्युम्।
इत्थं नृपः पूर्वमवालुलोचे
ततोऽनुजज्ञे गमनं सुतस्य ॥"

इति भट्टिकाव्ये प्रथमसर्गे सकर्मकस्यानुपूर्वकस्य **'अनुजज्ञे'** इत्यात्मनेपदे रूपं कथमुक्तमिति चेदुच्यते– 'नृप इत्थमवालु-

"Aho Shrutgyanam"

लोचे' इत्येकं वाक्यं पश्चात् नृपेणेति तृतीयान्तत्वेन विपरिणमय्य कर्मणि प्रयोगेणास्य आत्मनेपदस्य संगतेः । इदं च पद्यं विश्वामित्रेण यज्ञरक्षार्थं रामलक्ष्मणौ वनाय नेतुं याचितस्य दशरथस्य विचारवर्णनपरम् । अस्यार्थः– यदि रामस्य वनगमनं मया न स्वीक्रियते, तर्हि क्रुध्यन् विप्रवह्निः– विश्वामित्ररूपोऽग्निः, [ शापेन ] कुलं– समस्तमेव परिवारं धक्ष्यति, मया तद्गमनेऽनुमते सति, यास्यन्– वनं गमिष्यन्, सुतः– रामः, समन्युं– सशोकं, मां– केवलं मामेव, तप्स्यति– संतापयिष्यति, नृपः– दशरथः, पूर्वम्, इत्थम्, अवालुलोचे– आलोचितवान्, ततः सुतस्य वनगमनम्, अनुजज्ञे– अनुज्ञातम् । अत्र यदि 'अनुजज्ञे' इत्यत्र कर्त्तरि परोक्षा स्वीक्रियते तर्हि प्रकृतसूत्रव्याकोप इति प्रष्टुराशयः, नेयं कर्तरि परोक्षाऽपि तु कर्मणीति तदनुरोधेन कर्तरि तृतीया नृपेणेति कल्पनीयेति समाधातुराशयः । फलवतीत्यस्यापि सम्बन्ध आवश्यक इत्याह– **फलवतीत्येवेति** । व्यावर्त्यमाह– **परस्य गां जानातीति**– अत्र परकीयगव्या अवेक्षणं प्रतीयते, तत्फलं च न जानाति कर्तुरपि तु परस्यैवेति अनुपसर्गपूर्वकत्वेऽपि न भवत्यात्मनेपदम् । "ज्ञः" [ ३. ३. ८२. ] इत्यनेन सामान्यत एव [ सोपसर्गादनुपसर्गाच्च ] जानातेरात्मनेपदविधानात् तेनैव सिद्धे सूत्रमिदं व्यर्थमित्याशङ्कायामाह– **अकर्मकात् पूर्वेण सिद्धे सकर्मकार्थं वचनमिति**– तत्र सूत्रे "अनोः कर्मण्यसति" [ ३. ३. ८१. ] इत्यतः कर्मण्यसतीत्यस्य सम्बन्धादकर्मकादेव तेनात्मनेपदविधानमिति सकर्मकादात्मनेपदविधानार्थमिदं सूत्रमावश्यकमिति भावः, अकर्मकत्वे तु अफलवत्यपि कर्तरि तेनात्मनेपदमिति तत्सूत्रस्य विशेष इति परस्परं द्वे अपीमे सूत्रे चरितार्थे इति भावः ॥ ३. ३. ९६. ॥

## वदोऽपात् । ३. ३. ९७ ॥

**त० प्र०– अपपूर्वाद् वदतेः फलवति कर्तर्यात्मनेपदं भवति । एकान्तमपवदते । अपादिति किम् ? वदति । फलवतीत्येव– अपवदति परं स्वभावतः ॥९७॥**

**श० म० न्यासानुसन्धानम्– वदो०** । फलवतीति सम्बध्यते, तथा च सूत्रार्थमाह– **अपाद् वदतेरिति** । **एकान्तमपवदते** इति– एकान्तः– एकान्तत्वादः, सर्वस्य पदार्थस्यैकस्वभावत्ववादः, तमपवदते– वाचा प्रतिषेधतीत्यर्थः, अत्रापात् परत्वेन वदेरात्मनेपदं भवति । **अपादिति किमिति**– सामान्येनैव वद आत्मनेपदं विधीयतां, तथा चापपूर्वादपि भविष्यत्येवेति नाव्याप्तिरिति प्रष्टुराशयः । अपपूर्वादिव केवलादपि फलवति कर्तर्यात्मनेपदं स्यात्, इष्यते तु परस्मैपदमेवेति प्रत्युदाहरणेनाह– **वदतीति** । फलवतीत्यस्यापि सम्बन्ध आवश्यक इत्याह– **फलवतीत्येवेति** । व्यावर्त्यमाह– **अपवदति परं स्वभावतः इति**– कस्यचिदेवं स्वभाव एव यदन्यं जनमपवदति– निन्दतीति, अत्र परापवादेन परस्यैव सम्बन्ध इति न भवति आत्मनेपदम्, फलवतीत्यस्याभावे च तद् दुर्वारमिति ॥ ३. ३. ९७ ॥

## समुदाङो यमेरग्रन्थे ॥ ३. ३. ९८ ॥

**त० प्र०– समुदाङ्भ्यः परात् यमेरग्रन्थविषये प्रयोगे फलवति कर्तर्यात्मनेपदं भवति । संयच्छते व्रीहीन्, उद्यच्छते भारम्, आयच्छते वस्त्रम् । समुदाङ इति किम् ? नियच्छति वाचम् । अग्रन्थ इति किम् ? वैद्यश्चिकित्सामुद्यच्छति, चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः । फलवतीत्येव– संयच्छति उद्यच्छति, आयच्छति परस्य वस्त्रम् । आङ्पूर्वादकर्मकात् स्वाङ्गकर्मकाच्च "आङो यम-हनः०" [ ३. ३. ८६. ] इति सिद्धेऽन्यकर्मकार्थं वचनम् ॥ ९८ ॥**

**श० म० न्यासानुसन्धानम्– समु०** । सूत्रे समाहारनिर्देशेऽपि समाहारस्य समूहरूपत्वेन उक्तसर्वोपसर्गसमूहपूर्वकादेवानेनात्मनेपदविधानमिति भ्रमव्युदासाय वृत्तौ इतरेतरयोगनिर्देशपूर्वकमाह– **समुदाङ्भ्यः परादिति** । ग्रन्थे यमेः प्रयोगाभावेन यमेस्तदर्थत्वाभावेन 'अग्रन्थे' इति पर्युदासस्य वैयर्थ्यं स्यादिति विषयसप्तम्या व्याख्याति– **अग्रन्थविषये प्रयोगे** इति, तथा च यमेर्यः कश्चिदर्थोऽस्तु संपूर्णवाक्यस्य ग्रन्थविषये प्रयोगाभाव एव तात्पर्यमित्यायाति । उदाहरति– **संयच्छते व्रीहीनिति**– राशीभूतान् करोतीत्यर्थः, सकर्मकत्वेनोदाहरणमाङोऽप्यप्राप्तविषयत्वख्यापनार्थम्, अग्रे तत् स्फुटीभविष्यति । **उद्यच्छते भारमिति**– उत्थापयतीत्यर्थः । **आयच्छते वस्त्रमिति**– आयतं करोतीत्यर्थः, यथायथमुपसर्गत्रयपूर्वकत्वादात्मनेपदम् । **समुदाङ इति किमिति**– 'यमेरग्रन्थे' इत्येतावदेवास्तु तावतापि उदाहृतेषु प्रवृत्तौ बाधाभावादुपसर्गविशेषपरिग्रहो व्यर्थ इति भावः । **नियच्छति वाचमिति**– मौनमाश्रयतीति तदर्थः, अत्रोपसर्गान्तर[ नि ]पूर्वकान्न भवत्यात्मनेपदम्, उपसर्गविशेषापरिग्रहे च तद् दुर्वारम् । **अग्रन्थ इति किमिति** । ग्रन्थविषये प्रयोगस्यानुपलब्धेरेव न प्रवृत्तिः स्यादिति तत्पर्युदासो व्यर्थ इति भावः । प्रत्युदाहरति– **वैद्यश्चिकित्सामुद्यच्छतीति**– चिकित्सायाः क्रियारूपत्वेन ग्रन्थविषयत्वाभाव एवेहेति नेदं प्रत्युदाहरणं भवितुमर्हतीति शङ्कायां प्रयोगार्थवर्णनेन तत्समाधानमाह– **चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः** इति– चिकित्साशब्दस्य चिकित्साप्रतिपादके ग्रन्थे

"Aho Shrutgyanam"

निरूढा लक्षणेति भावः, अथवा चिकित्स्यते अनयेत्यर्थे चिकित्सेति सन्नन्तात् "शंसि-प्रत्ययात्" [ ५. ३. १०५ ] इत्यकारप्रत्ययः, ग्रन्थस्य पुंलिङ्गत्वेऽपि प्रत्ययस्य स्त्र्यधिकारे विधानात् स्त्रीत्वम्, इत्थं च चिकित्साग्रन्थ इति कर्मधारयसमासः। फलवतीत्यस्य सम्बन्धोऽपि विद्यत एवेत्याह– **फलवतीत्येवे**ति– व्यावर्त्त्यमाह– **संयच्छति उद्यच्छति आयच्छति परस्य वस्त्रमि**ति– परकीयवस्त्रविषये संयमादेः परेणैव सम्बन्धो न तु कर्त्रेति न भवत्यात्मनेपदम्। आङ्पूर्वकात् पूर्वमात्मनेपदस्य विहितत्वेन पौनरुक्त्यमाशङ्कमान आह– **आङ्पूर्वकादकर्मकात् स्वाङ्गकर्मकाच्च "आङो यम-हन०" इति सिद्धेऽन्यकर्मकार्थं वचनमि**ति– "आङो यम-हनः स्वेऽङ्गे च" [ ३. ३. ८६. ] इति सूत्रेणाङ्पूर्वकादकर्मकात् स्वाङ्गकर्मकाच्चात्मनेपदं विधीयते, तद्भिन्नोऽस्य विषय इति स्वाङ्गभिन्नकर्मकार्थत्वमेवाङ्पूर्वकाद् विधानस्य फलति। समुत्पूर्वकात् तु कुतोऽपि न प्राप्तमिति सर्वथैवापूर्वविधित्वमेव तद्विषये, तथा च नांशेनापि पौनरुक्त्यमिति भावः ॥ ३. ३. ९८. ॥

## पदान्तरगम्ये वा ॥ ३. ३. ९९ ॥

**त० प्र०– अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तं तत् पदान्तराद् गम्ये फलवति कर्तरि वा भवति। स्वं शत्रुं परिमोहयते परिमोहयति वा, स्वं– यज्ञं यजते यजति वा, स्वं कटं कुरुते करोति वा, स्वमश्वं गमयते गमयति वा, स्वं शिरः कण्डूयते कण्डूयति वा, स्वां गां जानीते जानाति वा, स्वं शत्रुमपवदते अपवदति वा, स्वान् व्रीहीन् संयच्छते संयच्छति वा ॥९९॥**

**श० म० न्यासानुसन्धानम्–पदान्तर०। 'पदान्तरगम्ये'** इति सप्तम्यन्तं पदं सप्तम्यन्तेन पूर्वतोऽनुवृत्तेन फलवतीत्यनेन सम्बध्यते, आकाङ्क्षावशाच्च फलवतीति पदं भावप्रधाननिर्देशपरम्, तथा च कर्तुः फलवत्त्वे पदान्तरगम्ये विकल्पेन आत्मनेपदमनेन भवतीति फलति। तथा च येन येन सूत्रेण फलवत्यात्मनेपदं विहितं तस्य तस्य सूत्रस्य शेषभूतमिदं सूत्रमिति पर्यवस्यति। तदाह– **अनन्तरसूत्रपञ्चकेने**त्यादि, पूर्वप्रक्रान्तैतत्सूत्राव्यवहितसूत्रपञ्चकेनेति भावः, तच्च सूत्रपञ्चकम् "परिमुहायस०" [ ३. ३. ९४. ] इत्यारभ्यैतदव्यवहितपूर्वपठित "समुदाङो यमेरग्रन्थे" [३. ३. ९८.] इतिपर्यन्तम्। पञ्चानामप्यमीषां फलवति कर्त्तर्यात्मनेपदविधाकत्वेन यत्र पदान्तरेण– तत्तत्सूत्रविहितात्मनेपदभिन्नपदेन, 'स्वम् आत्मीयं निजम्' इत्यादिपदेन, गम्ये– प्रतीयमाने फलवति कर्त्तरि कर्तुः फलवत्त्वे वा भवति। तथा च सर्वसूत्रोदाहरणेषु पाक्षिक परस्मैपदमुदाहरति– **स्वं शत्रुं परिमोहयते परिमोहयति वा** इत्यादिना। यद्यपि प्राप्तविभाषास्थले निषेध एव शास्त्रविधेयतात्वेन पूर्वं परस्मैपदस्यैवोदाहरणं न्याय्यं, तथापि आत्मनेपदस्य पूर्वमुपस्थितत्वेन तस्यैव पूर्वमुदाहरणं, परस्मैपदस्याग्रे विधीयमानत्वेन पश्चादुदाहरणमिति बोध्यम् ॥ ३. ३. ९९. ॥

## शेषात् परस्मै ॥ ३. ३. १०० ॥

**त० प्र०– पूर्वप्रकरणेनात्मनेपदनियमः कृतः, परस्मैपदं तु अनियतमिति नियमार्थमिदम्, उपयुक्तादन्यः शेषः। येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मादेव धातोः कर्तरि परस्मैपदं भवति। अनुबन्धोपसर्गार्थोपपदप्रत्ययभेदाच्चानेकधा शेषः। अनुबन्धशेषात्– भवति, अत्ति, बोभवीति, दीव्यति, गोपायति, पणायति, पुत्रीयति, पुत्रकाम्यति, अश्वति, मन्तूयति। उपसर्गशेषात्– प्रविशति, अधितिष्ठति, आगच्छति, विपश्यति। अर्थशेषात्– करोति, नयति, वदति। उपपदशेषात्– गृहे संचरति, साधुभ्यः संप्रयच्छति, साधु पदं कारयति। प्रत्ययशेषात्– शत्स्यति, मुमूर्षति ॥१००॥**

**श० म० न्यासानुसन्धानम्– शेषात्०।** आत्मनेपदविधिप्रकरणं परिसमाप्य परस्मैपदविधिप्रकरणं व्याख्यास्यन् प्रकरणपरिशुद्धिमाह– **पूर्वप्रकरणेनात्मनेपदनियमः कृतः** इति, अयमाशयः– आत्मनेपद-परस्मैपदयोरुभयोरपि धातुभ्यः सामान्येन प्राप्ततया तद्विधानेऽपूर्वत्वाभावेन तद्विधायकशास्त्रं नियमार्थमेव भवति, उभयोरेकदा विधानासभवेन कदाचिदुक्तेभ्यो धातुभ्यो यथोक्तविशेषणविशिष्टेभ्यः परस्मैपद कदाचिच्चात्मनेपदं स्यादित्यात्मनेपदस्य पाक्षिकप्राप्तौ तद्विशिष्यविधानस्य नियमत्वे पर्यवसानात् "नियमः पाक्षिके सति" इति **मीमांसका**दिसम्मतसिद्धान्तात्। तथा चेतः पूर्वम् "इङितः कर्त्तरि" [ ३. ३. २२. ] इत्येतदारभ्योक्तेन प्रकरणेनात्मनेपदस्य नियमः कृतः– एवंभूतेभ्यो धातुभ्य एव कर्त्तर्यात्मनेपदं नान्येभ्य इति, न तु तेन प्रकरणेन धातुनियमः कृतः– एभ्यो धातुभ्य आत्मनेपदमेव न परस्मैपदमिति। इत्थं च परस्मैपदस्यानियतत्वेन सर्वेभ्य एव धातुभ्यस्तत्प्राप्तिरिति तदीयोऽपि नियमः कर्त्तव्य इति तदर्थमितः परं प्रकरणमित्याह–**परस्मैपदं तु अनियतमिति नियमार्थमिदमि**ति, तथा चानेन प्रकरणेनापि 'एभ्य एव धातुभ्यः परस्मैपदं नान्येभ्यः' इति नियमः कर्तव्य इति भावः। नियमस्थले च पक्षद्वयम्– विहितानां नियम इत्येकः, नियम्य विधानमिति च परः पक्षः, तत्र प्रथमे पक्षे यद्यपि सर्वस्माद् धातोः सामान्यसूत्रैः वर्त्तमानादिसर्वप्रत्ययानुत्पाद्य विशेषसूत्राणा-

"Aho Shrutgyanam"